नमो नमो निम्मल दंसणस्स



आगमसुत्ताणि
(सटीकं)

भागः - २४

: संशोधक सम्पादकश्च :

मुनि दीपरत्नसागर

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

बालब्रह्मचारी श्री नेमिनाथाय नमः

नमो नमो निम्मल दंसणस्स

श्री आनंद-क्षमा-ललित सुशील सुधर्मसागर गुरूभ्योनमः

आगम सुत्ताणि (सटीकं)

भाग : २४

४०	आवश्यक-मूलसूत्रम् - १

पीठिका एवं अध्ययनं-१

-: संशोधकः सम्पादकश्चः :-

मुनि दीपरत्नसागर

ता. १४/४/२००० रविवार २०५६ चैत्र सुद ११

४५- आगम सुत्ताणि-सटीकं
मूल्य रू.११०००/-

卐 आगम श्रुत प्रकाशन 卐

-: संपर्क स्थल :-

''आगम आराधना केन्द्र'' शीतलनाथ सोसायटी विभाग-१,
फ्लेट नं-१३, ४-थी मंझिल, व्हायसेन्टर, खानपुर,
अहमदाबाद (गुजरात)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आवश्यक-मूलसूत्रस्य विषयानुक्रमः

पीठिका एवं अध्ययनं-१-अत्रएव वर्तते

अध्ययनानि - २, ३, ४, ५, ६, आगामी (२५) भागे वर्तते

मूलाङ्कः	विषयः	पृष्ठाङ्कः	मूलाङ्कः	विषयः	पृष्ठाङ्कः
-	- **पीठिका**	३	१-२	**अध्ययनं - १**	३३०
..	- मङ्गल	३	-	- नमस्कार - व्याख्या	३३२
-	- ज्ञानस्य पञ्चप्रकाशः	८	-	- अर्हत्शब्दस्यनिरुक्तिः	३५५
-	- उपक्रम-आदि	१७	-	- सिद्धस्यनिक्षेपाः, निरुक्ति	
-	- उपोदघातनिर्युक्तिः	४६		इत्यादि -	३५८
-	- वीरआदिजिनवक्तव्यता	५३	-	- सिद्धशिला वर्णनम्	३८३
-	- भरतचक्री-कथानकम्	१३२	-	- आचार्य निक्षेपाः	३८९
-	- बलदेव-वासुदेव कथनम्	१४१	-	- उपाध्याय - निक्षेपाः	३९०
-	- समवसरण वक्त्वाव्यता	१९८	-	- साधु - निक्षेपाः	३९०
-	- गणधरवक्तव्यता	२०९	-	- सामायिक - व्याख्या	३९५
-	- दशधा सामाचारी	२३०	-	- सामायिक सूत्रस्य स्वरुपम्,	
-	- निक्षेप, नय, प्रमाणादि	२५७		करणनिक्षेपाः,	३९५
-	- निह्नव वक्तव्यता	२७५	-	- उद्देश - वाचना - अनुज्ञा	४१२
-	- सामायिकस्वरूपम्	२८७	-	- सूत्र स्पर्शे भङ्गाः	४२३
-	- सम्यक्त्वादि विषयः	२९३	-	- उपसंहारः	४२९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

આર્થિક અનુદાતા

-પ.પૂ. માલવભુષણ તપસ્વી આચાર્યદેવ શ્રી નવરત્નસાગર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી શ્રી લાલભાઈ દેવચંદ શાહ તરફથી - નકલ એક.

-પ.પૂ. સરળ સ્વભાવી-શ્રીમદ્ ભગવતીસૂત્ર વ્યાખ્યાન પટુ આચાર્યદેવ શ્રી નરદેવસાગરસૂરીશ્વરજી મ.સા. તથા પૂજ્યશ્રીના શિષ્યરત્ન તપસ્વી ગણિવર્યશ્રી ચંદ્રકીર્તિસાગરજી મ.સા.ની પ્રેરણાથી શ્રી પુરુષાદાનીય પાર્શ્વનાથ શ્વે. મૂર્તિ. જૈન સંઘ, દેવકીનંદન સોસાયટી, અમદાવાદ તરફથી નકલ એક.

-પ.પૂ. શાસન પ્રભાવક-ક્રિયારાગી આચાર્યદેવશ્રી વિજય ઋચકચંદ્ર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી એક સદ્‌ગૃહસ્થ તરફથી નકલ એક.

-પ.પૂ. સાહિત્યપ્રેમી મુનિરાજ શ્રી સર્વોદય સાગરજી મ.સા.ની પ્રેરણાથી-"અચલગચ્છાધિપતિ પ.પૂ.આ.ભ.શ્રી ગુણસાગરસૂરીશ્વરજી મ.સા.ના શિષ્યરત્ન પ.પૂ. મુનિરાજ શ્રી ચારિત્રરત્નસાગરજી મ. ની ૧૯મી અઠ્ઠાઇ નિમિત્તે-શ્રી ચારિત્રરત્ન ફા.ચે.ટ્રસ્ટ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્ત્યકારિકા સાધ્વી શ્રી મલયાશ્રીજી મ.સા.ના શિષ્યા વ્યવહાર વિચક્ષણા પૂ. સાધ્વી શ્રી હિતજ્ઞાશ્રીજી મ.ની પ્રેરણાથી જૈન આરાધના મંદિર-"જ્ઞાનખાતા" તરફથી નકલ એક.

-પ.પૂ. સૌમ્યમૂર્તિ સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી મ.ની પ્રેરણાથી પ.પૂ. ગુરુમાતા-વાત્સલ્યમૂર્તિ સા.શ્રી રત્નત્રયાશ્રીજી મ.ની પંચમી પુન્યતિથિ નિમિત્તે શ્રીમતી લીલમબેન પ્રાણલાલ પી. દામાણી તરફથી નકલ એક.

-પ.પૂ. સ્વનામધન્યા સા. શ્રી સૌમ્યગુણાશ્રીજી તથા તેઓના શિષ્યા સા.શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી-૨૦૫૩ના યશસ્વી ચાતુર્માસ નિમિત્તે શ્રી પાર્શ્વપદ્માવતી જૈન સંઘ, પારૂલનગર, અમદાવાદ તરફથી નકલ બે.

-પ.પૂ. રત્નત્રયારાધકા સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી તથા તેઓશ્રીના શિષ્યા સા. શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી સંવત ૨૦૫૪ના નિર્મળ આરાધનામય ચાતુર્માસની સ્મૃતિમાં-ઘાટલોડિયા (પાવાપુરી) જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ તરફથી નકલ એક.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

-પ.પૂ. સાધ્વી શ્રી રત્નત્રયાશ્રીજી મ.ના પરમ વિનેયા સા.શ્રી સૌમ્યગુણાશ્રીજીની પ્રેરણાથી તેઓના સંસારીભાઈશ્રી ઇન્દ્રવદનભાઈ દામાણીના અનુમોદનીય પુરુષાર્થથી "આગમ દીપ-સંપુટ"ના બદલામાં પ્રાપ્ત રકમમાંથી-નકલ ચાર.

-પ.પૂ. પ્રશમરસનિમગ્ના સાધ્વીશ્રી પ્રશમશીલાશ્રીજી મ.ની પ્રેરણાથી-સમ્મેતશિખર તિર્થોદ્ધારિકા પ.પૂ. સાધ્વીશ્રી રંજનશ્રીજી મ.સા.ના શિષ્યા અપ્રતિમ વૈયાવૃત્ત્યકારિકા સા.શ્રી મલયાશ્રીજી તત્ શિષ્યા સા. શ્રી નરેન્દ્રશ્રીજી-તત્ શિષ્યા સા. શ્રી પ્રગુણાશ્રીજી મ.ના. આત્મશ્રેયાર્થે-અરિહંત ટાવર, જૈન સંઘ, મુંબઇ તરફથી નકલ એક.

-પ.પૂ. આગમોદ્ધારક આચાર્યદેવશ્રી ના સમુદાયવર્તી પ.પૂજ્ય વૈયાવૃત્ત્યકારિકા સા.શ્રી મલયાશ્રીજી મ.ના શિષ્યા પૂ.સા. શ્રી કૈવલ્યશ્રીજી મ.ના શિષ્યા પૂ.સા.શ્રી ભવ્યાનંદશ્રીજી મ.સા.ના સુશિષ્યા મિષ્ટભાષી સાધ્વીશ્રી પૂર્ણપ્રજ્ઞાશ્રીજી મ.સા. તથા તેમના વિનિત શિષ્યા સા. શ્રી પૂર્ણદર્શિતાશ્રીજી તથા સા. પૂર્ણનંદીતાશ્રીજીની પ્રેરણાથી-સર્વોદય પાર્શ્વનાથ ચેરીટેબલ ટ્રસ્ટ, મુલુન્ડ મુંબઈ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્ત્યકારિકા સાધ્વીશ્રી મલયાશ્રીજી મ.ના પ્રશિષ્યા સા. શ્રી ભવ્યાનંદશ્રીજીમ.ના સુવિનિતા સા.શ્રી કલ્પપ્રજ્ઞાશ્રીજી તથા કોકીલકંઠી સા. શ્રી કૈરવપ્રજ્ઞાશ્રજી ની પ્રેરણાથી -મેહુલ સોસાયટી, આરાધનાભવન, સુભાષનગર, વડોદરાની બહેનો તરફથી નકલ એક

-શ્રી વિશાશ્રીમાળી તપગચ્છજ્ઞાતિ-જ્ઞાનખાતું, જૈન પાઠશાળા, જામનગર તરફથી નકલ બે.

-શ્રી મંગળ પારેખનો ખાંચો-જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ. તરફથી ૨૦૫૪ના ચાતુર્માસ નિમિત્તે નકલ બે.

- શ્રી આકોટા જૈન સંઘ, વડોદરાની બહેનો તરફથી નકલ એક.

-શ્રીમતી નયનાબેન રમેશચંદ્ર શાહ, વડોદરાની પ્રેરણાથી આગમોના સેટના બદલામાં પ્રાપ્ત રકમમાંથી નકલ પાંચ.

શેષ સર્વે રકમ "અમારા"આજ પર્યન્ત પ્રકાશનોના બદલામાં પ્રાપ્ત થયેલી છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमो नमो निम्मल दंसणस्स

पंचम गणधर श्री सुधर्मास्वामिने नमः

४० आवश्यक-मूलसूत्रं

(सटीकं)

[प्रथमं मूलसूत्रं]

मूलम् + भद्रबाहुस्वामिरचिता निर्युक्तिः +
पूर्वाचार्य रचितं भाष्यं + हरिभद्रसूरिरचिता वृत्तिः

आवश्यक सूत्रे - "पीठिका"

प्रणिपत्य जिनवरेन्द्रं, वीरं श्रुतदेवतां गुरून् साधुन् ।
आवश्यकस्य विवृतिं, गुरूपदेशादहं वक्ष्ये ॥
यद्यपि मया तथाऽन्यैः, कृताऽस्य विवृतिस्तथापि संक्षेपात् ।
तद्रुचिसत्त्वानुग्रहहेतोः त्रियते प्रयासोऽयम् ॥

वृ- इहावश्यप्रारम्भप्रयासोऽयुक्तः, प्रयोजनादिरहितत्वात्, कण्टकशाखामर्दनवत् इति एवमाद्याशङ्कापनोदाय प्रयोजनादि पूर्वं प्रदर्श्यत इति, उक्तं च-

"प्रेक्षावतां प्रवृत्त्यर्थं, फलादित्रितयं स्फुटम् ।
मङ्गलं चैव शास्त्रादौ, वाच्यमिष्टार्थसिद्धये ॥

इत्यादि । अतः प्रयोजनमभिधेयं सम्बन्धो मङ्गलं च यथावसरं प्रदर्श्यत इति । तत्र प्रयोजनं तावत् परापरभेदभिन्नं द्विधा, पुनरेकैकं कर्तुश्रोत्रपेक्षया द्विधैव, तत्र द्रव्यास्तिकनयालोचनायामागमस्य नित्यत्वात् कर्तुरभाव एव, "इत्येषा द्वादशाङ्गी न कदाचिन्नासीत्, न कदाचिन्न भविस्यति, न कदाचिन्न भवति" इतिवचनात् । पर्यायास्तिकनयालोचनायां चानित्यत्वात्तत्सद्भाव इति । तत्त्वालोचनायां तु सूत्रार्थोभयरूपत्वादागमस्य अर्थपेक्षया नित्यत्वात् सूत्ररचनापेक्षया चानित्यत्वात् कथञ्चित् कर्तुसिद्धिरिति । तत्र सूत्रकर्तुः परमपवर्गप्राप्तिः अपरं सत्त्वानुग्रहः, तदर्थप्रतिपादयितुः किं प्रयोजनमिमित चेत्, न किञ्चित्, कृतकृत्यत्वात्, प्रयोजनमन्तरेणार्थप्रतिपादनप्रयासोऽयुक्तः इतिचेत्, न, तस्य तीर्थकरनामगोत्रविपाकित्वात्, वक्ष्यति च- "तं च कहं वेइज्जइ ?, अगिलाए धम्मदेसनादीहि" इत्यादिना । श्रोतृणां त्वपरं तदर्थाधिगमः, परं मुक्तिरेवेति । कथम् ? ज्ञानक्रियाभ्यां मोक्षस्तन्मयं चावश्यकमितिकृत्वा, नावश्यकश्रवणमन्तरेण विशिष्टज्ञानक्रियावाप्तिरुपजायते, कुतः ?, तत्कारणत्वात्तदवाप्तेः, तदवाप्तौ च पारम्पर्येण मुक्तिसिद्धेः, इत्यतः प्रयोजनवानावश्यकप्रारम्भप्रयास इति । तदभिधेयं तु सामायिकादि । सम्बन्धश्च उपायोपेयभावलक्षणः तर्कानुसारिणः प्रति, कथम् ? उपेयं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सामायिकादिपरिज्ञानं, मुक्तिपदं वा, उपायस्तु आवश्यकमेव वचनरूपापन्नमिति, यस्मात्ततः सामायिकाद्यर्थनिश्चयो भवति, सति च तस्मिन् सम्यग्दर्शनादिवैमल्यं क्रियाप्रयत्नश्च, तस्माच्च मुक्तिपदप्राप्तिरिति। अथवा उपोद्धातनिर्युक्तौ "उद्देसे निद्देसे य" इत्यादिना ग्रन्थेन सप्रपञ्चेन स्वयमेव वक्ष्यति। कश्चिदाह-अधिगतशास्त्रार्थानां स्वयमेव प्रयोजनादि-परिज्ञानात् शास्त्रोदौ प्रयोजनाद्युपन्यासवैयर्थ्यमिति, तन्न, अनधिगतशास्त्रार्थानां प्रवृत्तिहेतुत्वात् तदुपन्यासोपपत्तेः। प्रेक्षावतां हि प्रवृत्तिर्निश्चयपूर्विका, प्रयोजनादौ उक्तेऽपि च अनधिगताशास्त्रार्थस्य तन्निश्चयानुपपत्तेः, संशयतः प्रवृत्त्यभावात्तदुपन्यासोऽनर्थकः इति चेत्, न, संशय-विशेषस्य प्रवृत्तिहेतुत्वदर्शनात्, कृषीवलादिवत्, इत्यलं प्रसङ्गेन। साम्प्रतं मङ्गलमुच्यते -यस्मात् श्रेयांसि बहुविघ्नानि भवन्ति इति, उक्तं च-

"श्रेयांसि बहुविघ्नानि, भवन्ति महतामपि।
अश्रेयसि पवृत्तानां, क्वापि यान्ति विनायकाः ॥" इति।

आवश्यकानुयोगश्च अपवर्गप्राप्तिबीजभूतवात् श्रेयोभूत एव, तस्मात्तदारम्भे विघ्नविनायकाद्युपशान्तये तत् प्रदर्श्यत इति। तच्च मङ्गल शास्त्रादौ मध्ये अवसाने चेष्यत इति। सर्वमेवेदं शास्त्रं मङ्गलमित्येतावदेवास्तु, मङ्गलत्रयाभ्युपगमस्त्वयुक्तः, प्रयोजनाभावात् इति चेत्, न, प्रयोजनाभावस्यासिद्धत्वात्। तथाच कथं नु नाग विनेया विवक्षितशास्त्रार्थस्याविघ्नेन पारं गच्छेयुः ? अतोऽर्थमादिमङ्गलोपन्यासः, तथा स एव कथं नु नाम तेषां स्थिरः स्याद् ? इत्यतोऽर्थं मध्यमङ्गलस्य, स एव च कथं नु नाम शिष्यप्रशिष्यादिवंशस्य अविच्छित्त्या उपकारकः स्याद् ? इत्यतोऽर्थं चरममङ्गलस्य इत्यतो हेतोरसिद्धता इति। तत्र "आभिनिबोहियनाणं, सुयनाणं चैवे" त्यादिनाऽऽदिमङ्गलमाह। तथा "वंदन चिति कितिकम्मं" इत्यादिना मध्यमङ्गलं, वन्दनस्य विनयरूपत्वात्, तस्य चाभ्यन्तरतपोभेदत्वात्, तपोभेदस्य च मङ्गलत्वात्। तथा "पच्चक्खाणं" इत्यादिना चावसानमङ्गलं, प्रत्याख्यानस्याद्यतपोभेदत्वादेव मङ्गलत्वमिति। तत्रेतत्स्यात्, इदं मङ्गलत्रयं शास्त्राद्भिन्नमभिन्नं वा ? यदि भिन्नमतः शास्त्रममङ्गलं, तद्भेदान्यथानुपपत्तेः, अमङ्गलस्य च सतोऽन्यमङ्गलशतेनापि मङ्गलीकर्तुमशक्यत्वात् तन्मङ्गलोपन्यासवैयर्थ्ये, तदुपादानेऽनिष्ठा वा, यथा प्रागमङ्गलस्य सतः शास्त्रस्य मङ्गलमुक्तम्, एवं मङ्गलान्तरमप्यभिधातव्यम्, आद्यमङ्गलाभिधानेऽपि तदमङ्गलत्वात्, इत्थं पुनरप्यभिधा-तव्यमित्यतोऽनिष्ठेति। अथाभिन्नम्, एवं सति शास्त्रस्यैव मङ्गलत्वात् अन्यमङ्गलोपा-दानानर्थक्यमेव, अथ मङ्गलाभावप्रसङ्गः, कथम् ? यथा मङ्गलात्मकस्यापि सतः शास्त्रस्य अन्यमङ्गलनिरपेक्षस्यामङ्गलता, एवं मङ्गलस्याप्यन्यमङ्गलशून्यस्य, इत्यतो मङ्गलाभाव इति।

अत्रोच्यते--आद्यपक्षोक्तदोषाभावस्तावदनभ्युपगमादेव, तदभ्युपगमेऽपिच मङ्गलस्य लवणप्रदीपादिवत् स्वपरानुग्रहकारित्वादुक्तदोषाभाव इति। चरमपक्षेऽपि न मङ्गलोपादानानर्थक्यं, शिष्यमतिमङ्गलपरिग्रहाय शास्त्रस्यैव मङ्गलत्वानुवादात्, एतदुक्तं भवति-कथं नु नाम विनेयो मङ्गलमिदं शास्त्रमित्येवं गृह्णीयात् ?, अतो मङ्गलमिदं शास्त्रमितिकथ्यते। आह--यद्यपि मङ्गलमिदं शास्त्रमित्येव न गृह्णाति विनेयस्तथापि तत् स्वतो मङ्गलरूपत्वात् स्वकार्यप्रसाधनायालमेवेति कथं नानर्थक्यं ?, न, अभिप्रायापरिज्ञानात्, इह मङ्गलमपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मङ्गलबुद्धया परिगृह्यमाणं मङ्गलं भवति, साधुवत्, तथाहि-साधुमङ्गलभूतोऽपि सन्मङ्गलबुद्धयैव गृह्यमाणः प्रशस्तचेतोवृत्तेर्भव्यस्य तत्कार्यप्रसाधको भवति, यदा तु न तथा गृह्यते तदा कालुष्योपहतचेतसः सत्त्वस्य न भवतीति, एवं शास्त्रमपीतिभावार्थः। आह–यद्येवममङ्गलमपि मङ्गलबुद्धेः प्राणिनो मङ्गलकार्यकृत्प्राप्नोतीति, अनिष्टं चैतदिति, न, तस्य स्वरूपेणैवामङ्गलत्वात्, मङ्गलस्य च स्वबुद्धिसापेक्षस्य स्वकार्याभिनिवर्त्तकत्वादिति, तथाहि–यदि कश्चित्काञ्चनमेव काञ्चनतयाऽभिगृह्य प्रवर्त्तते ततस्तत्फलमासादयति, न पुनरकाञ्चनं सत्काञ्चनबुद्धया, नाप्यतद्बुद्धयेति। मङ्गलत्रयापान्तरालद्वयमित्थममङ्गलमापद्यत इति चेत्, न, अशेषशास्त्रस्यैव तत्त्वतो मङ्गलत्वात्, तस्यैव च संपूर्णस्यैव त्रिधा विभक्तत्वात् मोदकवदपान्तरालद्वयाभाव इति, यथा हि मोकस्य त्रिधाविभक्दस्य अफन्तरालद्वयं नास्ति, एवं प्रकृतशास्त्रस्यापीति भावार्थः। मङ्गलत्वं चाशेषशास्त्रस्य निर्जरार्थत्वात्, प्रयोगश्च-विवक्षितं शास्त्रं मङ्गलं, निर्जरार्थत्वात्, तपोवत्। कथं पुनरस्य निर्जरार्थतेति चेत्, ज्ञानरूपत्वात्, ज्ञानस्य च कर्मनिर्जरणहेतुत्वात्, उक्तं च –

"जं नेरइओ कम्मं, खवेइ बहुयाहि वासकोडीहिं।
तं नाणी तिहि गुत्तो, खवेइ ऊसासमित्तेणं ॥"

स्यादेतत्, एवमपि मङ्गलत्रयपरिकल्पनावैयर्थ्यमिति, न, विहितोत्तरत्वात्, तस्मात्स्थितमेतत्-शास्त्रस्य आदौ मध्येऽवसाने च मङ्गलमुपादेयमिति।

आह-मङ्गलमिति कः शब्दार्थः ? उच्यते, अगिरगिलगिवगिमगिइतिदण्डकधातुः, अस्य "इदितो नुम्धातोः" इति नुमि विहिते औणादिकालचूप्रत्ययान्तस्यानुबन्धलोपे कृते प्रथमैकवचनान्तस्य मङ्गलमितिरूपं भवति, मङ्ग्यते हितमनेनेति मङ्गलं, मङ्ग्यते अधिगम्यते साध्यत इतियावत्, अथवा मङ्गेतिधर्माभिधानं, 'ला आदाने' अस्य धातोर्मङ्ग उपपदे "आतोऽनुपसर्गे कः" इति कप्रत्ययान्तस्य अनुबन्धलोपे कृते "आतो लोप इटि च क्ङिति" इत्यनेन सूत्रेणाकारलोपे च प्रथमैकवचनान्तस्यैव मङ्गलमिति भवति, मङ्गलातीति मङ्गलं धर्म्मोपादानहेतुरित्यर्थः, अथवा मां गालयति भवादिति मङ्गलं संसारादपनयतीत्यर्थः। तच्च नामादिन चतुविधं, तद्यथा-नाममङ्गलं १ स्थापनामङ्गलं २ द्रव्यमङ्गलं ३ भावमङ्गलं ४ चेति। तत्र–

"यद्वस्तुनोऽभिधानं स्थितमन्यार्थे तदर्थनिरपेक्षम्।
पर्यायानभिधेयं (च) नाम यादृच्छिकं च तथा ॥"

अस्यायमर्थः - 'यद्' 'वस्तुनो' जीवाजीवादेः 'नाम' यथा गोपालदारकस्येन्द्र इति, 'स्थितमन्यार्थे' इति परमार्थतः त्रिदशाधिपेऽवस्थानात्, 'तदर्थनिरपेक्षम्' इति इन्द्रार्थनिरपेक्षं, कथम् ? तत्र गुणतोवर्त्तत इति, इन्दनादिन्द्रः 'इति परमैश्वर्ये' इति तस्य परमैश्वययुक्तत्वात्, गोपालदारके तु तदर्थशून्यमिति, तता पर्यायैः – शक्रपुरन्दरादिभिः नाभिधीयत इति, इह नामनामवतोरभेदोपचाराद्गोपालवस्त्वेव गृह्यते, एवंभूतं नामेति, तथाऽन्यत्रावर्त्तमानमपि किञ्चिद् यादृच्छिकं डित्थादिवत्; चशब्दात् यावद्द्रव्यभावि च प्रायस इति। यत्तु सूत्रोपदिष्टं "नामं आवकहियं" तत् प्रतिनियतजनपदसंज्ञामाश्रित्येति, नाम च तन्मङ्गलं चेतिसमासः, तत्र यत् जीवस्याजीवस्योभयस्य वा मङ्गलमिति नाम क्रियते तन्नाममङ्गलं, जीवस्य यथा -सिन्धुविषयेऽग्निर्मङ्गलमभिधीयते, अजीवस्य यथा-श्रीमल्लाटदेशे दवरकवलनकं मङ्गलमभिधीयते, उभयस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा-वन्दनमालेति ।

"यत्तु तदर्थवियुक्तं तदभिप्रायेण यच्च तत्करणि ।
लेप्यादिकर्म तत् स्थापनेति क्रियतेऽल्पकालं च ॥"

अस्यायमर्थः - 'यद्' वस्तु 'तदर्थवियुक्तं' भावेन्द्राद्यर्थरहितं, तस्मिन्नभिप्रायदभिप्रायः, अभिप्रायो बुद्धिः, तद्बुद्ध्येत्यर्थः, करणिराकृतिः, यच्चेन्द्राद्याकृति 'लेप्यादिकर्म क्रियते' चशब्दात्त-कृतिशून्यं चाक्षनिक्षेपादि 'तत्स्थापनेति' तच्चेत्वरमल्पकालमितिपर्यायौ, चशब्दाद्यावद्रव्यभावि च, स्थाप्यत इति स्थाना, स्थापना चासौ मङ्गलं चेति समासः, तत्र स्वस्तिकादि स्थापनामङ्गलमिति।

"भूतस्य भाविनो वा भावस्य हि कारणं तु यल्लोके ।
तद्रव्यं तत्त्वज्ञैः सचेतनाचेतनं कथितम् ॥"

अस्यायं भावार्थः - 'भूतस्य' अतीतस्य 'भाविनो वा' एष्यतो 'भावस्य' पर्यायस्य 'कारणं' निमित्तं 'यद्' एव 'लोके' 'तद् द्रव्यम्' इति द्रवति गच्छति तांस्तान्पर्यायान् क्षरति चेति द्रव्यं 'तत्त्वज्ञैः' सर्वज्ञैस्तीर्थकृद्भिरितियावत् सचेतनम् अनुपयुक्तपुरुषाख्यम् अचेतनं ज्ञशरीरादि तथाभूतमन्यद्वा 'कथितं' आख्यातं प्रतिपादितमित्यर्थः । तत्र द्रव्यं च तन्मङ्गलं चेतिसमासः, तच्च द्रव्यमङ्गलं द्विधा-आगमतो नोआगमतश्च, तत्र आगमतः खल्वागममधिकृत्य आगमा-पेक्षमित्यर्थः, नोआगमतस्तु तद्विपर्ययमाश्रित्य, तत्रागमतो मङ्गलशब्दाध्येता अनुपयुक्तो द्रव्यमङ्गलम् 'अनुपयोगो द्रव्य' मितिवचनात्, तथा नोआगमतस्त्रिविधं द्रव्यमङ्गलं तद्यथा-ज्ञशरीरद्रव्यमङ्गल १ भव्यशरीरद्रव्यमङ्गलं २ ज्ञशरीरभव्यशरीरव्यतिरिक्तं ३ द्रव्यमङ्गलमिति। तत्र ज्ञस्यशरीरं ज्ञशरीरं, शीर्यत इति शरीरं ज्ञशरीरमेव द्रव्यमङ्गलं ज्ञशरीरद्रव्यमङ्गलम्, अथवा ज्ञशरीरं च तद्रव्यमङ्गलं चेतिसमामः । एतदुक्तं भवति–मङ्गलपदार्थज्ञस्य यच्छरीरमात्मरहितं तदतीतकालानुभूततद्भावानुवृत्त्या सिद्धशिलादितलगतमपि घृतघटादिन्यायेन नोआगमतो ज्ञशरीरद्रव्यमङ्गलमित, मङ्गलज्ञानशून्यत्वाच्च तस्य, इह सर्वनिषेध एव नोशब्दः । तथा भव्यो योग्यः, मङ्गलपदार्थं ज्ञास्यति यो न तावद्विजानाति स भव्य इति, तस्य शरीरं भव्यशरीरं, भव्यशरीरमेव द्रव्यमङ्गलम्, अथवा भव्यशरीरं च तद्रव्यमङ्गलं चेतिसमास इति । अयं भावार्थः– भाविनी वृत्तिमङ्गीकृत्य मङ्गलोपयोगाधारत्वात् मधुघटादिन्यायेनैव तत् बालादिशरीरं भव्यशरीर-द्रव्यमङ्गमिति, नोशब्दः पूर्ववत् । ज्ञशरीरभव्यशरीरव्यतिरिक्तं च द्रव्यममङ्गलं संयमतपो-नियमक्रियानुष्ठाता अनुपयुक्तः, आगमतोऽनुपयुक्तद्रव्यमङ्गलवत्, तथा यच्छरीरमात्मद्रव्यं वा अतीतसंयमादिक्रियापरिणामं, तच्च उभयातिरिक्तं द्रव्यमङ्गलं, ज्ञशरीरद्रव्यमङ्गलवत्, तथा यद् भाविसंयमादिक्रियापरिणामयोग्यं तदपि उभयव्यतिरिक्तं, भव्यशरीरमङ्गलवत्, तथा यदपि स्वभावतः शुभवर्णगन्धादिगुणं सुवर्णमाल्यादि, तदपि हि भावमङ्गलपरिणामकारणत्वाद् द्रव्यमङ्गलम्, अत्रापि नोशब्दः सर्वनिषेध एव द्रष्टव्यः, इत्युक्तं द्रव्यमङ्गलम् ।

"भावो विवक्षितक्रियानुभूतियुक्तो हि वै समाख्यातः ।
सर्वज्ञैरिन्द्रादिवदिहेन्दनादिक्रियानुभवात् ॥"

अस्यायमर्थः - भवनं भावः, स हि वक्तुमिष्टक्रियानुभवलक्षणः सर्वज्ञैः समाख्यातः, इन्दनादिक्रियानुभवनयुक्तेन्द्रादिवदिति । तत्र भावतो मङ्गलं भावमङ्गलम्, अथवा भावश्चासौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मङ्गलं चेति समासः, तच्च द्विधा-आगमतो नोआगमतश्च, तत्रागमतो मङ्गलपरिज्ञानोपयुक्तो भावमङ्गलं, कथमिह भावमङ्गलोपयोगमात्रात् तन्मयताऽवगम्यत इति, नह्यग्निज्ञानोपयुक्तो माणवकोऽग्निरेव, दहनपचनप्रकाशनाद्यर्थक्रियाप्रसाधकत्वाभावाद् इति चेत्, न, अभिप्राया-परिज्ञानात्, संवित् ज्ञानम् अवगमो भाव इत्यनर्थान्तरं, तत्र 'अर्थाभिधानप्रत्ययाः तुल्यनामधेयाः' इति सर्वप्रवादिनामविसंवादस्थानम्, अग्निरितिच यज्ज्ञानं तदव्यतिरिक्तो ज्ञाता तल्लक्षणो गृह्यते, अन्यथा तज्ज्ञो सत्यपि नोपलभेत, अतन्मयत्वात्, प्रदीपहस्तान्धवत् पुरुषान्तरवद्वा, नचानाकारं तज्ज्ञानं, पदार्थन्तरवद्विवक्षितपदार्थापरिच्छेदप्रसङ्गात्, बन्धाद्यभावश्च, ज्ञानाज्ञानसुख दुःखपरिणामान्यत्वाद्, आकाशवत्, न चानलः सर्व एव दहनाद्यर्थक्रियाप्रसाधको, भस्मच्छन्नादिना व्यभिचारात्, इत्यलं प्रसङ्गेन, प्रकृतमुच्यते -नोआगमतो भावमङ्गलम् आगमवर्जं ज्ञानचतुष्टय-मिति, सर्वनिषेधवचनत्वान्नोशब्दस्य, अथवा सम्यग्दर्शनज्ञानचारित्रोपयोगपरिणामो यः स नागम एव केवलः न चानागमः, इत्यतोऽपि मिश्रवचनत्वान्नोशब्दस्य नोआगमत इत्याख्यायते, अथवा अर्हन्नमस्काराद्युपयोगः खलगमैकदेशत्वात् नोआगमतो भावमङ्गलमिति ॥

ननु नामस्थापनाद्रव्येषु मङ्गलाभिधानं विवक्षितभावशून्यत्वाद् द्रव्यत्वं च समानं वर्त्तेः ततश्च क एषां विशेष इति, अत्रोच्यते, यथा हि स्थापनेन्द्रे खल्विन्द्राकारो लक्ष्यते, तथा कर्तुश्च सद्भूतेन्द्राभिप्रायो भवति, तथा द्रष्टुश्च तदाकारदर्शनादिन्द्रप्रत्ययं:, तथा प्रणतिकृतधियश्च फलार्थिनः स्तोतु प्रवर्त्तन्ते, फलं च प्राप्नुवन्ति केचिद्देवतानुग्रहात्, न तथा नामद्रव्येन्द्रयोरिति, तस्मात्स्थापनायास्तावदित्थं भेद इति । यथा च द्रव्येन्द्रो भावेन्द्रस्य कारणतां प्रतिपद्यते, तथोपयोगापेक्षायामपि तदुपयोगतामासादयिष्यति अवाप्तवांश्च, न तथा नामस्थापनेन्द्रावित्ययं विशेषः । भावमङ्गलमेवैकं युक्तं, स्वकार्यप्रसाधकत्वात्, न नामादयः, तत्कार्याप्रसाधकत्वात्, पापवद् इति चेत्, न, नामादीनामपि भावविशेषत्वात्, यस्मादविशिष्टमिन्द्रादि वस्तु उच्चरित-मात्रमेव नामादिभेदचतुष्टयं पतिपद्यते, भेदाश्च पर्याया एवेति, अथवा नामस्थापनाद्रव्याणि भावमङ्गलस्यैवाङ्गानि, तत्परिणामकारणत्वात्, तथा च मङ्गलाद्यभिधानं सिद्धाद्यभिधानं चोपश्रुत्य अर्हत्प्रतिमास्थापनां च द्दष्ट्वा भूतयतिभावं भव्ययतिशरीरं चोपलभ्य प्रायः सम्यग्दर्शना-दिभावमङ्गलपरिणामो जायते, इत्यलं प्रसङ्गेन, प्रकृतं प्रस्तुमः-तत्र नोआगमतोऽर्हन्नमस्करादि भावमङ्गलमुक्तं, अथवा नोआगमतो भावमङ्गलं नन्दी, तत्र नन्दनं नन्दी, नन्दन्त्यनयेति वा भव्यप्राणिन इति नन्दी, असावपि च मङ्गलवन्नामादिचतुर्भेदभिन्ना अवगन्तव्येति, तत्र नामस्थापने पूर्ववत्, द्रव्यनन्दी द्विधा-आगमतो नोआगमतश्च, आगमतो ज्ञाताऽनुपयुक्तो, नोआगमतस्तु ज्ञशरीरभव्यशरीरोभयव्यतिरिक्ता च द्रव्यनन्दी द्वादशप्रकारस्तूर्यसंघातः ।

'भंभा मुकुंद मद्दव कडंब झल्लरि हुडुक्क कंसाला ।
काहलि तलिमा वंसो, संखो पणवो य बारसमो ॥'

तथा भावनन्द्यपि द्विधाआगमतो नोआगमतश्च, आगमतो ज्ञाता उपयुक्तः, नोआगमतः पञ्चप्रकारं ज्ञानं, तच्चेदम्-

नि. (१) आभिनिबोहियनाणं सुयनाणं चेव ओहिनाणं च ।
तह मनपज्जवनाणं केवलनाणं च पंचमयं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अर्थाभिमुखो नियतो बोधः अभिनिबोधः, अभिनिबोध एव आभिनिबोधिकं, विनयादि-पाठात् अभिनिबोधशब्दस्य "विनयादिभ्यष्ठग्" इत्यनेन स्वार्थ एव ठक्प्रत्ययो, यथा विनय एव वैनयिकमिति अभिनिबोधे वा भवं तेन वा निर्वृत्तं तन्मयं तत्प्रयोजनं वाअथवाऽभिनिबुध्यते तद् इत्याभिनिबोधिकं, अवग्रहादिरूपं मतिज्ञानमेव, तस्य स्वसंविदितरूपत्वात्, भेदोपचार-दित्यर्थः, अभिनिबुध्यते वाऽनेनत्याभिनिबोधिकं, तदावरणकर्मक्षयोपशम इति भावार्थः, अभिनिबुध्यते अस्मादिति वाऽऽभिनिबोधिकं, तदावरणकर्मक्षयोपशम एव, अभिनिबुध्य-तेऽस्मिन्निति वा क्षयोपशम इत्याभिनिबोधिकं, आत्मैव वाऽभिनिबोधोपयोगपरिणामानन्यत्वाद् अभिनिबुध्यत इत्याभिनिबोधिकं, आभिनिबोधिकं च तज्ज्ञानं चेति समासः । तथा श्रूयत इति श्रुतं शब्द एव, भावश्रुतकारणत्वादिति भावार्थः, अथवा श्रूयतेऽनेनेति श्रुतं, तदावरण क्षयोपशम इत्यर्थः, श्रूयतेऽस्मादिति वाश्रुतं, तदावरणक्षयोपशम एव , श्रूयतेऽस्मिन्निति वा क्षयोपशम इति श्रुतं, शृणोतीति वाऽऽत्मैव तदुपयोगानन्यत्वात्, श्रुतं च तज्ज्ञानं चेति समासः, चशब्दस्त्वनयोरेव तुल्यकक्षतोद्भावनार्थः, स्वाम्यादिसाम्यात्, कथम् ? य एव मतिज्ञानस्य स्वामी स एव श्रुतज्ञानस्य "जत्थ मइनाणं तत्थ सुयनाण" मिति वचनात्, तथा यावान्मतिज्ञानस्य स्थितिकालस्तावानेवेतरस्य, प्रवाहापेक्षया अतीतानागतवर्त्तमानः सर्व एव, अप्रतिपतितैक-जीवापेक्षया च षट्रषष्टिसागरोपमाण्यधिकानीति, उक्तं च भाष्यकारेण –

"दोवारे विजयाइसु गयस्स तिन्नच्चुए अहव ताइं ।
अइरेगं नरभविअं नाणाजीवाण सव्वद्धं ॥"

यथा च मतिज्ञानं क्षयोपशमहेतुकं, तथा श्रुतज्ञानमपि, यथा च मतिज्ञानमादेशतः सर्वद्रव्या-दिविषयम्, एवं श्रुतज्ञानमपि, यथा च मतिज्ञानं परोक्षम्, एवं श्रुतज्ञानमपि इति, एवकारस्त्व-वधारणार्थः, परोक्षत्वमनयोरेवावधारयति, आभिनिबोधिकश्रुतज्ञाने एव परोक्षो इति भावार्थः। तथा अवधीयतेऽनेन इत्यवधिः, अवधीयते इति अधोऽधो विस्तृतं परिच्छिद्यते, मर्यादया वेति, अवधिज्ञानावरणक्षयोपशम एव, तदुपयोगहेतुत्वादित्यर्थः, अवधीयतेऽस्मादिति वेति अवधिः, तदावरणीयक्षयोपशम एव, अवधीयतेऽस्मिन्निति वेत्यवधिः, भावार्थः पूर्वदेव, अवधानं वाऽवधिः, विषयपरिच्छेदनमित्यर्थः, अवधिश्चासौ ज्ञानं च अवधिज्ञानं, चशब्दः खल्वनन्त-रोक्तज्ञानद्वयसाधर्म्यप्रदर्शनार्थः, स्थित्यादिसाधर्म्यात्, कथम् ? यावान्मतिश्रुतस्थितिकालः प्रवाहापेक्षया अप्रतिपतितैकसत्त्वाधारापेक्षया च, तावानेवावधेरपि, अतः स्थितिसाधर्म्यात्, यथा मतिश्रुते विसर्ययज्ञाने भवतः, एवमिदमपि मिथ्यादृष्टेर्विभङ्गज्ञानं भवतीति विपर्यय-साधर्म्यात्, य एव च मतिश्रुतयोः स्वामी स एव चावधेरपि भवतीति स्वामिसाधर्म्यात्, विभङ्गज्ञानिनः त्रिदशादेः सम्यग्दर्शनावाप्तौ युगपज्ज्ञानत्रयं संभवतीति लाभसाधर्म्याच्च ।

तथा मनः पर्यवज्ञानं, अयं भावार्थः - परिः सर्वतो भावे, अवनं अवः,अवनं गमनं वेदन-मिति पर्यायाः, परि अवः पर्यवः पर्यवनं वा पर्यव इति, मनसि मनसो वा पर्यवो मनः पर्यवः, सर्वतस्तत्परिच्छेद इत्यर्थः, स एव ज्ञानं मनः पर्यवज्ञानं, अथवा मनसः पर्यायाः, पर्याया भेदा धर्मा बाह्यवस्त्वालोचनप्रकारा इत्यनर्थान्तरं, तेषु ज्ञानं मनः पर्यायज्ञानं, तेषां वा सम्बन्धि ज्ञानं मनःपर्यायज्ञानं, इदं चार्धतृतीयद्वीपसमुद्रान्तर्वर्त्तिसंज्ञिमनोगतद्रव्यालम्बनमेवेति, तथा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शब्दोऽवधिज्ञानसारूप्यप्रदर्शनार्थः, कथम् ? छद्मस्वस्वामिसाधर्म्यात्, तथा पुद्गलमात्रालम्बनत्वसाम्यात्, तथा क्षायोपशमिकभावसाम्यात्, तथा प्रत्यक्षत्वसाम्याच्चेति । केवलमसहायं मत्यादिज्ञाननिरपेक्षं, शुद्धं वा केवलं, तदावरणकर्ममलकलङ्काङ्करहितं, सकलं वा केवलं, तत्प्रथमतयैव अशेषतदावरणाभावतः संपूर्णोत्पत्तेः, असाधारणं वा केवलं, अनन्यसदृशमितिहृदयं, ज्ञेयानन्तत्वाद् अनन्तं वा केवलं, यथावस्थिताशेषभूतद्भाविभावस्वभावावभासीति भावना, केवलं च तज्ज्ञानं चेति समासः, चशब्दस्तूक्तसमुच्चयार्थः, केवलज्ञानं च पञ्चमकमिति, अथवाऽनन्त राभिहितज्ञानसारूप्यप्रदर्शक एव, अप्रमत्तभावयतिस्वामिसाधर्म्यात् विपर्ययाभावयुक्तत्वाच्चेति गाथासमासार्थः ॥

मतिज्ञानश्रुतज्ञानयोः कः प्रतिविशेष इति, उच्यते, उत्पन्नाविनष्टार्थग्राहकं साम्प्रत-कालविषयं मतिज्ञानं, श्रुतज्ञानं तु त्रिकालविषयं उत्पन्नविनष्टानुत्पन्नार्थग्राहकमिति, भेदकृतो वा विशेषः, यस्मादवग्रहाद्यष्टाविंशतिभेदभिन्नं मतिज्ञानं, तथाऽङ्गानङ्गादिभेदभिन्नं च श्रुतमिति, अथवाऽऽत्मप्रकाशकं मतिज्ञानं, स्वपरप्रकाशकं च श्रुतमित्यलं प्रसङ्गेन, गमनिकामात्रमेवैतदिति । अत्राह-एषां ज्ञानानामित्थं क्रमोपन्यासे किं प्रयोजनं इति, उच्छते, परोक्षत्वादिसाधर्म्यान्मितिश्रुतसद्भावे च शेषज्ञानसंभवात् आदावेव मतिश्रुतोपन्यासः, मतिज्ञानस्य पूर्वं किमिति चेत्, उच्यते, मतिपूर्वकत्वात् श्रुतस्येति, मतिपूर्वकत्वं चास्य "श्रुतं मतिपूर्वम्" इति वचनात्, तत्र प्रायो मतिश्रुतपूर्वकत्वात्प्रत्यसाधर्म्याच्च ज्ञानत्रयोपन्यास इति, तत्रापि कालमिवपर्ययादिसाम्यान्मतिश्रुतोपन्यासानन्तरमेवावधेरुपन्यास इति, तदनन्तरं च छाद्मस्थिकादिसाधर्म्यान्मनः पर्यायज्ञानस्य, तदनन्तरं भावमुनिस्वाम्यादि-साधर्म्यात्सर्वोत्तमत्वाच्च केवलस्येति गाथार्थः ॥

साम्प्रतं 'यथोद्देशं निर्देशः' इति न्यायाद् ज्ञानपञ्चकादावुद्दिष्टस्य आभिनिबोधिकज्ञानस्य स्वरूपमभिधीयते–तच्चाभिनिबोधिकज्ञानं द्विधा, श्रुतनिश्रितमश्रुतनिश्रितं च, यत्पूर्वमेव कृतश्रुतोपकारं इदानीं पुनस्तदनपेक्षमेवानुप्रवर्त्तते तद् अवग्रहादिलक्षणं श्रुतनिश्रितमिति । यत्पुनः पूर्व तदपरिकर्मितमतेः क्षयोपशमपटीयस्त्वात् औत्पत्तिक्यादिलक्षणं उपजायते तदश्रुतनिश्रितमिति । आह–"तिवग्गसुत्तत्थगहियपेयाला" इति वचनात् तत्रापि किञ्चित् श्रुतोपकारादेव जायते, तत्कथमश्रुतनिश्रितमिति, उच्यते, अवग्रहादीनां श्रुतनिश्रिताभिधानाद् औत्पत्तिक्यादिचतुष्टयेऽपिच अवग्रहादिसद्भावात् यथायोगमश्रुतनिश्रितत्वमवसेयं, न तु सर्वमेवेति, अयमत्र भावार्थः-श्रुतकृतोपकारनिरपेक्षं यदौत्पत्तिक्यादि तदश्रुतनिश्रितं, प्रातिभमितिहृदयं, वैनयिकीं विहायेत्यर्थः, बुद्धिसाम्याच्च तस्या अपि निर्युक्तौ उपन्यासोऽविरुद्ध इत्यलं प्रसङ्गेन । तत्र श्रुतनिश्रितमतिज्ञानस्वरूपप्रदर्शनायाह–

नि. (२) उग्गह ईहाऽवाओ य धारणा एव हुंति चत्तारि ।
आभिनिबोहियनाणस्स भेयवत्थू समासेणं ॥

वृ- तत्र सामान्यार्थस्याशेषविशेषनिरपेक्षानिर्देश्यस्य रूपादेरवग्रहणं अवग्रहः, तदर्थविशेषालोचनं ईहा, तथा प्रक्रान्तार्थविशेषनिश्चयोऽवायः, चशब्दः पृथक् २ अवग्रहादिस्वरूप-स्वातन्त्यप्रदर्शनार्थः, अवग्रहादीनां ईहादयः पर्याया न भवन्तीत्युक्तं भवति, अवगतार्थविशषधरणं धारणा, एवकारः क्रमप्रदर्शनार्थः, 'एवं' अनेनैव क्रमेण भवन्ति, चत्वारि, आभिनिबोधिकज्ञानस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिद्यन्त इति भेदा विकल्पा अंशा इत्यनर्थान्तरं, त एव वस्तूनि भेदवस्तूनि, कथम् ?, यतो नानवगृहीतमीह्यते, न चानीहितमवगम्यते, न चानवगतं धार्यत इति। अथवा काक्वा नीयते–एवं भवन्ति चत्वार्याभिनिबोधिकज्ञानस्य भेदवस्तूनि ?, 'समासेन' संक्षेपेण अविशिष्टावग्रहादिभाव-स्वरूपापेक्षया, न तु विस्तरत इति, विस्तरतोऽष्टाशिंतिभेदभिन्नत्वात्तस्येति गाथार्थः ॥
इदानीमनन्तरोपन्यस्तानामवग्रहादीनां स्वरूपप्रतिपिपादयिषयेदमाह–

नि. (३) अत्थाणं ओगहणंमि उग्गहो तह वियारणे ईहा।
ववसायंमि अवाओ धरणंमि य धारणं बिंति ॥

वृ- तत्र अर्यन्ते इत्यर्थाः, अर्यन्ते गम्यन्ते परिच्छिद्यन्त इतियावत्; ते च रूपादयः, तेषां अर्थानां, प्रथमं दर्शनानन्तरं ग्रहणं अवग्रहणं अवग्रहं ब्रुवत इतियोगः। आह–वस्तुनः सामान्य-विशेषात्मकतयाऽविशिष्टत्वात् किमिति प्रथमं दर्शनं न ज्ञानमिति, उच्यते, तस्य प्रबला-वरणत्वात्, दर्शनस्य चाल्पावरणत्वादिति। स च द्विधाव्यञ्जनावग्रहोऽर्थावग्रहश्च, तत्र व्यञ्जनावग्रहपूर्वकत्वादर्थावग्रहस्य प्रथमं व्यञ्जनावग्रहः प्रतिपाद्यत इति। तत्र व्यञ्जनावग्रह इति कः शब्दार्थः ?, उच्यते, व्यज्यतेऽनेनार्थः प्रदीपेनेव घट इति व्यञ्जनं, तच्च उपकरणेन्द्रियं शब्दादिपरिणतद्रव्यसंघातो वा, ततश्च व्यञ्जनेन उपकरणेन्द्रियेण शब्दादिपरिणतद्रव्याणां च व्यञ्जनानां अवग्रहो व्यञ्जनावग्रह इति। अयं च नयनमनोवर्जेन्द्रियाणामवसेय इति, न तु नयनमनसोः, अप्राप्तकारित्वात्, अप्राप्तकारित्वं चानयोः "पुट्ठं सुणेइ सद्दं रूवं पुण पासई अपुट्ठं तु" इत्यत्र वक्ष्यामः। तथा च व्यञ्जनावग्रहचरमस-मयोपात्तशब्दाद्यर्थावग्रहणलक्षणोऽ-र्थावग्रहः, सामान्यमात्रानिर्देश्यग्रहणमेकसामयिकमिति भावार्थः। 'तथा' इत्यानन्तर्ये 'विचारेणं' पर्यालोचनं अर्थानामित्यनुवर्त्तते, ईहनमीहा तां, ब्रुवत इति सम्बन्धः।

एतदुक्तं भवति–अवग्रहादुत्तीर्णः अवायात्पूर्वं सद्भूतार्थविशेषोपादानाभिमुखोऽसद्-भूतार्थविशेषत्यागाभिमुखश्च प्रायो मधुरत्वादयः शङ्ख-शब्दधर्मा अत्र घटन्ते न खरकर्कश-निष्ठुरतादयः शार्ङ्गशब्दधर्मा इति मतिविशेष ईहेति। विशिष्टोऽवसायो व्यवसायः, निर्णयो निश्चयोऽवगम इत्यनर्थान्तरं, तं व्यवसायं च, अर्थानामिति वर्त्तते, अवायं ब्रुवत इति संसर्गः, एतदुक्तं भवति-शाङ्ख एवायं शार्ङ्ग एव वा इत्यवधारणात्मकः प्रत्ययोऽवाय इति, चशब्द एवकारार्थः, स चावधारणे, व्यवसायमेवावायं ब्रुवते इति भावार्थः। घृतिर्धरणं, अर्थानामिति वर्त्तते, परिच्छिन्नस्य वस्तुनोऽविच्युतिस्मृतिवासनारूपं तद्धरणं पुनर्धारणां ब्रुवते, पुनः शब्दोऽप्येवकारार्थः, स चावधारणे, धरणमेव धारणां ब्रुवत इति, अनेन शास्त्रपारतन्यमाह, इत्थं तीर्थकर-गणधरा ब्रुवत इति। एवं शब्दमधिकृत्य श्रोत्रेन्द्रियनिबन्धना अवग्रहादयः प्रतिपादिताः, शेषेन्द्रियनिबन्धना अपि रूपादिगोचराः स्थाणुपुरुष-कुष्ठोत्पल-संभूतकरिल्लमांस-सर्पोत्पलनालादौ इत्थमेव द्रष्टव्याः, एवं मनसोऽपि स्वप्ने शब्दा-दिविषया अवग्रहादयोऽवसेया इति, अन्यत्र चेन्द्रियव्यापाराभावेऽभिमन्यमानस्येति। ततश्च व्यञ्जनावग्रहश्चतुर्विधः, तस्य नयनमनोवर्जेन्द्रियसंभवात्, अर्थावग्रहस्तु षोढा, तस्य सर्वेन्द्रियसंभवात्। एवमीहादयोऽपि प्रत्येकं षट्प्रकारा एवेति। एवं संकलिताः सर्व एव अष्टाविंशतिर्मतिभेदा अवगन्तव्या इति। अन्ये त्वेवं पठन्ति-'अत्थाणं उग्गहणंमि उग्गहो' तत्र अर्थानामवग्रहणे सति अवग्रहो नाम

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मतिभेद इत्येवं ब्रुवते, एवं ईहादिष्वपि योज्यं, भावार्थस्तु पूर्ववदिति । अथवा प्राकृतशैल्या 'अर्थवशाद्विभक्तिपरिणाम' इति यथाऽऽचाराङ्गे-"अगनिं च खलु पुट्ठा एगे संघायमावज्जंति" इत्यत्र अग्निना च स्पृष्टाः, अथवा स्पृष्टशब्दः पतितवाची, ततश्चायमर्थः-अग्नौ च पतिता 'एके' शलभादयः 'संघातमापद्यन्ते' अन्योऽन्यगात्रसंकोचमासादयन्तीत्यर्थः, तस्माद् अग्निसमारम्भोऽनेकसत्त्वव्यापत्तिहेतुः इत्यतो न कार्यः इत्यादिविचारे द्वितीया तृतीयार्थे सप्तम्यर्थे च व्याख्यातेति । एवमत्रापि सप्तमी प्रथमार्थे द्रष्टव्येति गाथार्थः ॥

इदानीमभिहितस्वरू-पाणामवग्रहादीनां कालप्रमाणमभिधित्सुराह-

नि. (४) उग्गह इक्क समयं ईहावाया मुहुत्तमद्धं तु ।
कालमसंखं संखं च धारणा होइ नायव्वा ॥

वृ- तत्र अभिहितलक्षणोऽर्थावग्रहो जघन्यो नैश्चयिकः, स खलु एकं समयं भवतीति संबन्धः, तत्र कालः परमनिकृष्टः समयोऽभिधीयते, स च प्रवचनप्रतिपादितोत्पलपत्रशतव्यत्तिभेदोदाहरणाद् जरत्पट्टशाटिकापाटनदृष्टान्ताश्च अवसेयः, तथा सांव्यवहारिकार्थावग्रहव्यञ्जनावग्रहौ तु पृथक् पृथग् अन्तर्मुहूर्तमात्रं कालं भवत इति विज्ञातव्यौ । ईहा चावायश्च ईहावायौ, प्राकृतशैल्या बहुवचन, उक्तं च-

"दुव्ववणे बहुवयणं छट्टीविहत्तीए भण्णइ चउत्थी ।
जह हत्था तह पाया, नमोऽत्थु देवाहिदेवाणं ॥"

तावीहावायौ मुहूर्तार्धं ज्ञातव्यौ भवतः, तत्र मुहूर्तशब्देन घटिकाद्वयपरिमाणः कालोऽभिधीयते, तस्यार्धं तु मुहूर्तार्धं, तुशब्दो विशेषणार्थः, किं विशिनष्टि ?-व्यवहारापेक्षया एतद् मुहूर्तार्धमुक्तं, तत्त्वतस्तु अन्तमुहूर्तमवसेयमिति । अन्ये त्वेवं पठन्ति 'मुहुत्तमन्तं तु' मुहूर्तान्तस्तु द्वे पदे, अयमर्थः-अन्तर्मध्यकरणे, तुशब्द एवकारार्थः, स चावधारणे, एतदुक्तं भवति-ईहावायौ मुहूर्तान्तः, भिन्नं मुहूर्तं ज्ञातव्यौ भवतः, अन्तर्मुहूर्तमेवेत्यर्थः । कलनं कालः तं कालं, न विद्यते संख्या इयन्तः पक्षमासर्त्वयनसंवत्सरादव इत्येवंभूता यस्यासावसंख्यः, पल्योपमादिलक्षण इत्यर्थः, तं कालमसंख्यं, तथा संख्यायत इति संख्यः, इयन्तः, पक्षमासर्त्वयनादय इत्येवं संख्याप्रमित इत्यर्थः, तं संख्यं च, चशब्दात् अन्तर्मुहूर्तं च, धारणा अभिहितलक्षणा भवति ज्ञातव्या, अयमत्र भावार्थः-अवयोत्तरकालं अविच्युतिरूपा-अन्तर्मुहूर्तं भवति, एवं स्मृतिरूपाऽपि, वासनारूपा तु तदावरणक्षयोपशमाख्या स्मृतिधारणाया बीजभूता संख्येयवर्षायुषां सत्त्वानां संख्येयं कालं असंख्येयवर्पायुषां पल्योपमादिजीविनां चासंख्येयमिति गाथार्थः ॥ इत्थमवग्रहादीनां स्वरूपमभिधाय इदानीं श्रोत्रेन्द्रिवादीनां प्राप्ताप्राप्तविषयतां प्रतिपिपादयिषुराह-

नि. (५) पुट्ठं सुणेइ सद्दं रूवं पुन पासई अपुट्ठं तु ।
गंधं रसं च फासं च बद्धपुट्ठं वियागरे ॥

वृ- आइ-ननु व्यञ्जनावग्रहनिरूपणाद्वारेण श्रोत्रेन्द्रिययादीनां प्राप्ताप्राप्तविषयता प्रतिपादित्तैव, किमर्थ पुनरयं प्रयास इति, उच्यते, तत्र पक्रान्तगाथा व्याख्यानद्वारेण प्रतिपादिता, साम्प्रतं तु सूत्रतः प्रतिपद्यत इत्य दोषः । तत्र 'स्पृष्टं' इत्यालिङ्गितं, तनौ रेणुवत्, शृणोति गृह्णाति उपलभत इति पर्यायाः, कम् ?-शब्यतेऽनेनेति शब्दः तं शब्दप्रायोग्यं द्रव्यसंघातं, इदमत्र हृदयम्-तस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूक्ष्मत्वात् भावुकत्वात् प्रचुरद्रव्यरूपत्वात् श्रोत्रेन्द्रियस्य चान्येन्द्रियगणात्प्रायः पटुतरत्वात् स्पृष्टमात्रमेव शब्दद्रव्यनिवहं गृह्णाति । रूप्यत इति रूपं तद्रूपं पुनः, पश्यति गृह्णाति उपलभत इत्येकोऽर्थः, अस्पृष्टमनालिङ्गितं गन्धादिवन्नं संबद्धमित्यर्थः, तुशब्दस्त्वेवकारार्थः, स चावधारणे, रूपं पुनः पश्यति अस्पृष्टमेव, चक्षुषः अप्राप्तकारित्वादिति भावार्थः, पुनः शब्दो विशेषणार्थः, किं विशिनष्टि ?-अस्पृष्टमपि योग्यदेशावस्थितं, न पुनरयोग्यदेशावस्थितं अमरलोकादि । गन्ध्यते घ्रायत इति गन्धस्तं, रस्यत इति रसस्तं च, स्पृश्यत इति स्पर्शस्तं च, च-शब्दौ पूरणार्थौ, 'बद्धस्पृष्टं' इति बद्धमाश्लिष्टं नवशरावे तोयवदात्मप्रदेशैरात्मीकृतमित्यर्थः, स्पृष्टं पूर्ववत्, प्राकृतशैल्या चेत्थमुपन्यासो 'बद्धपुट्ठं' ति, अर्थतस्तु स्पृष्टं च बद्धं च स्पृष्टाबद्धं। आह–बद्धद्धं गन्धादि तत् स्पृष्टं भवत्येव, अस्पृष्टस्य बन्धयोगात्, ततश्च स्पृष्टशब्दोच्चारणं गतार्थत्वादनर्थकमिति, उच्यते, सर्वश्रोतृसाधारणत्वाच्छास्त्रारम्भस्यायमदोष इति । त्रिप्रकाराश्च श्रोतारो भवन्ति-केचिद् उद्घाटितज्ञाः, केचित् मध्यमबुद्धयः, तथाऽन्ये प्रपञ्चितज्ञा इति, तत्र प्रपञ्चितज्ञानां अनुग्रहाय गम्यमानस्याप्यभिधानमदोषायैव, अथवा विशेषणसमासाङ्गीकरणाददोषः, स्पृष्टं च तद्बद्धं च स्पृष्टबद्धं, तत्र स्पृष्टं गन्धादि विशेष्यं, बद्धमिति च विशेषणं । आह–एवमपि स्पृष्टग्रहणमतिरिच्यते, यस्माद्यद्बद्धं न तत्स्पृष्टत्वव्यभिचारि, उभयपदव्यभिचारे च विशेषणविशेष्यभावो दृष्टो यथा नीलोत्पलमिति, न चेह उभयपदव्यभिचारः, अत्रोच्यते, नैष दोषः, यस्मादेकपदव्यभिचारेऽपि विशेषणविशेष्यभावो दृष्टो यथा अब्द्रव्यं पृथिवी द्रव्यमिति, भावना-अब् द्रव्यमेव, न द्रव्यत्वं व्यभिचरति, द्रव्यं पुनरब् चानबू चेति व्यभिचारि, अथ च विशेषणविशेष्यभाव इति । प्रकृतभावार्थस्त्वयम्-आलिङ्गितानन्तरमात्मप्रदेशैरागृहीतं गन्धादि बादरत्वाद् अभावुकत्वात् अल्पद्रव्यरूपत्वात् घ्राणादीनां चापटुत्वात् गृह्णाति निश्चिनोति घ्राणेन्द्रियादिगण इत्येवं व्यागृणीयात् प्रतिपादयेदितियावत् ।

आह–भवतोक्तं योग्यदेशावस्थितमेव रूपं पश्यति, न पुनरयोग्यदेशावस्थितमिति, तत्र कियान् पुनश्चक्षुषो योग्य विषयः ?, कियतो वा देशादागतं श्रोत्रादि शब्दादि गृह्णातीति, उच्यते, श्रोत्रं तावच्छब्दं जघन्तुः खल्वङ्गुलासंख्येय-मात्राद्देशात्, उत्कृष्टतस्तु द्वादशभ्यो योजनेभ्य इति, चक्षुरिन्द्रियमपि रूपं जघन्येनाङ्गुलसंख्येयभागमात्रावस्थितं पश्यति, उत्कृष्टतस्तु योजनशतसहस्राभ्यधिकव्यवस्थितं इति, घ्राणरसनस्पर्शनानि तु जघन्येनाङ्गुलासंख्येयभागमात्राद्देशादागतं गन्धादिकं गृह्णन्ति, उत्कृष्टतस्तु नवभ्यो योजनेभ्य इति । आत्माङ्गुलनिष्पन्नं चेह योजनं ग्राह्यमिति । आह–उक्तप्रमाणं विषयमुल्लङ्घ्य कस्माच्चक्षुरादीनि रूपादिकमर्थं न गृह्णन्तीति, उच्यते, सामर्थ्याभावात्, द्वादशभ्यो नवभ्यश्च योजनेभ्यः परतः समागतानां शब्दादिद्रव्याणां तथाविधपरिणामाभावाच्च, मनसस्तु न क्षेत्रतो विषयपरिमाणमस्ति, पुद्गलमात्रनिबन्धनाभावात्, इह यत् पुद्गलमात्रनिबन्धनियतं दृष्टं, यथाऽवधिज्ञानं मनः पर्यायज्ञानं वेति गाथासमासार्थः ॥

साम्प्रतं यदुक्तमासीत् यथा "नयनमनसोरप्राप्तकारित्वं 'पुट्ठं सुणेइ सद्दं' इत्यत्र वक्ष्यामः, तदुच्यते, नयनं योग्यदेशावस्थिताप्राप्तविषयपरिच्छेदकं, प्राप्तिनिबन्धनतत्कृतानुग्रहोपघातशून्यत्वात्, मनोवत्, स्पर्शनेन्द्रियं विपक्ष इति । आह–जलघृतवनस्पत्यालोकनेष्वनुग्रहसद्भावात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूर्याद्यालोकनेषु चोपघातसद्भावात् असिद्धो हेतुः, मनसोऽपि प्राप्तविषयपरिच्छेदकत्वा-त्साध्यविकलो दृष्टान्तः, तथा च लोके वक्तारो भवन्ति-"अमुत्र मे गतं मनः" इति, अत्रोच्यते, प्राप्तिनिबन्धनाख्यहेतुविशेषणार्थनिराकृतत्वाद् अस्याक्षेपस्येत्यदोषः । किं च-यदि हि प्राप्तिनिबन्ध-नौ विषयकृतावनुग्रहोपघातौ स्यातां, एवं तर्हि जलाद्यालोकनेषु दाहभेदक्लेदादयः स्युरिति। किं च-प्राप्तविषयपरिच्छेदकत्वे सति अक्षिअञ्जनमलशलाकादिकमपि गृह्णीयात् । आह—नायना मरीचयो निर्गत्य तमर्थं गृह्णन्ति, ततश्च तेषां तैजसत्वात् सूक्ष्मत्वाच्चानलादिसंपर्के सत्यपि दाहाद्यभाव इति, अत्रोच्यते, प्राक् प्रतिज्ञातयोरनुग्रहोपघातयोरप्यभावप्रसङ्गाद् अयुक्तमेतत्, तदस्तित्वस्य उपपत्त्या ग्रहीतुमशक्यत्वाच्च । व्यवहितार्थानुपलब्ध्या तदस्तित्वावसाय इति चेत्, न, तत्रापि तदुपलब्धौ क्षयोपशमाभावात् व्यवहितार्थानुपलब्धिसिद्धेः, आगममात्रमेवैतत् इति चेत्, न, युक्तिरप्यस्ति, आवरणाभावेऽपि परमाण्वादौ दर्शनाभावः, स च तद्विधक्षयोपशमकृतः, यच्चोक्तं-'साध्यविकलो दृष्टान्त' इति, तदप्ययुक्तं, ज्ञेयमनसोः संपर्काभावात्, अन्यथा हि सलिलकर्पूरादिचिन्तनादनुगृह्येत, वह्निशस्त्रादिचिन्तनाच्चोपहन्येत, न चानुगृह्यते उपहन्यते वेति। आह—मनसोऽनिष्टविषयचिन्तनातिशोकात् दौर्बल्यं आर्त्तध्या नादुरोऽभिघातश्च उपलभ्यते, तथेष्टविषयचिन्तनात्प्रमोदः, तस्मात्प्राप्तकारिता तस्येति, एतदप्ययुक्तं, द्रव्यमनसा अनिष्टेष्टपुद्ग-लोपचयलक्षणेन सकर्मकस्य जन्तोरनिष्टेष्टाहारेणेवोपघातानुग्रहकरणात्कथं प्राप्तविषयनेति।

किं च-द्रव्यमनो वा बहिः निस्सरेत्, मनः परिणामपरिणतं जीवाख्यं भावमनो वा ?, न तावद्भावभनः, तस्य शरीरमात्रत्वात्, सर्वगत्वे च नित्यत्वात् बन्धमोक्षाद्यभावप्रसङ्गः । अथ द्रव्यमनः, तदप्ययुक्तं, यस्मान्निर्गतमपि सत् अकिञ्चित्करं तत्, अज्ञत्वात्, उपलवत् । आह—करणत्वाद्रव्यमनसस्तेन प्रदीपेनेव प्रकाशितमर्थमात्मा गृह्णातीत्युच्यते, न, यस्मात् शरीरस्थेनैवानेन जानीते, न बहिर्गतेन, अन्तः करणत्वात्, इह यदात्मनोऽन्तः करणं स तेन शरीरस्थेनैव उप-लभते, यथा स्पर्शनेन, प्रदीपस्तु नान्तः करणमात्मनः, तस्माद् दृष्टान्तदार्ष्टान्तिक-योर्वैषम्यमित्यलं विस्तरेण, प्रकृतं प्रस्तुम इति गाथार्थः ॥

किं च प्रकृतं ?, स्पृष्टं शृणोति शब्दमित्यादि, अत्र किं शब्दप्रयोगोत्सृष्टान्येव केवलानि शब्दद्रव्याणि गृह्णाति ? उत अन्यान्येव तद्भावितानि ? आहोस्विन्मिश्राणि इति चोदकाभिप्राय-माशङ्क्य, न तावत्केवलानि, तेषां वासकत्वात्, तद्योग्यद्रव्याकुलत्वाच्च लोकस्य, किन्तु मिश्राणि तद्वासितानि वा गृह्णाति इत्यमुमर्थमभिधित्सुराह –

नि. (६) भासासमसेढीओ, सद्दं जं सुणइ मीसयं सुणई ।
वीसेढी पुण सद्दं, सुणेइ नियमा पराघाए ॥

वृ- भाष्यत इति भाषा, वक्त्रा शब्दतयोत्सृज्यमाना द्रव्यसंहतिरित्यर्थः, तस्याः समश्रेण्यो षट्सु दिक्षु विद्यन्ते, यासूत्सृष्टा सती भाषाऽऽद्यसमय एव लोकान्तमनुधावतीति, ता इतो भाषासमश्रेणीतः, इतो गतः प्राप्तः स्थित इत्यनर्थान्तरम्, एतदुक्तं भवति-भाषासमश्रेणिव्यवस्थित इति । शब्द्यतेऽनेनेति शब्दः-भाषात्वेन परिणतः पुद्गलराशिस्तं शब्दं 'यं' पुरुषाश्वादिसंबन्धिनं शृणोति गृह्णात्युपलभत इति पर्यायाः, यत्तदोर्नित्यसंबन्धात्तं मिश्रं शृणोति, एतदुक्तं भवति—व्युत्सृष्टद्रव्यभावितापान्तरालस्थशब्दद्रव्यमिश्रमिति । विश्रेणिं पुनः इत इति वर्त्तते, ततश्चायमर्थो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवति-विश्रेणिव्यवस्थितः पुनः श्रोता 'शब्दं' इति, पुनः शब्दग्रहणं पराघातवासितद्रव्याणामपि तथाविधशब्दपरिणाम ख्यापनार्थे, शृणोति 'नियमात्' नियमेन पराघाते सति यानि शब्दद्रव्याणि उत्सृष्टाभिघातवासितानि तान्येव, न पुनरुत्सृष्टानीति भावार्थः। कुतः ?-तेषामनुश्रेणिगमनात् प्रतीघाताभावाच्च, अथवा विश्रेणिस्थित एव विश्रेणिरभिधीयते, पदेऽपि पदावयवप्रयोगदर्शनात् 'भीमसेनः सेनः सत्यभामा भामा' इतिगाथार्थः ॥ केन पुनर्योगेन एषां वाग्द्रव्याणां ग्रहणमुत्सर्गो वा कथं वेत्येतदाशङ्क्य गुरुराह–

नि. (७) गिण्हइ य काइएणं, निस्सरइ तह वाइएण जोएणं।
एगंतरं च गिण्हइ, निसिरइ एगंतरं चेव ॥

वृ- तत्र कायेन निर्वृत्तः कायिकः तेन कायिकेन योगेन, योगो व्यापारः कर्म क्रियेत्यनर्थान्तरं, सर्व एव हि वक्ता कायक्रियया शब्दद्रव्याणि गृह्णाति, चशब्दस्त्वेवकारार्थः, स चाप्यवधारणे, तस्य च व्यवहितः संबन्धः, गृह्णाति कायिकेनैव, निसृजत्युत्सृजति मुञ्चतीति पर्यायाः, तथेत्यानन्तर्यार्थः, उक्तिर्वाक् वाचा निर्वृत्तो वाचिकस्तेन वाचिकेन योगेन। कथं गृह्णाति निसृजतीति वा ? किमनुसमयं उत अन्यथेत्याशङ्कासभवे सति शिष्यानुग्रहार्थमाह–एकान्तरमेव गृह्णाति, निसृजति एकान्तरं चैव, अयमत्र भावार्थः-प्रतिसमयं गृह्णाति मुञ्चति चेति, कथम्?, यथा ग्रामादन्यो ग्रामो ग्रामान्तरं, पुरुषाद्वा पुरुषोऽनन्तरोऽपि सन्निति, एवमेकैकस्मात्समयाद् एकैक एव एकान्तरोऽनन्तरसमय एवेत्यर्थः। अयं गाथासमुदायार्थः। अत्र कश्चिदाह-ननु कायिकेनैव गृह्णातीत्येतद् युक्तं, तस्यात्मव्यापाररूपत्वात्, निसृजति तु कथं वाचिकेन ?, को वाऽयं वाग्योय इति।

किं वागेव व्यापारापन्ना आहोश्वित् तद्विसर्गहेतुः कायसंरम्भ इति ?, यदि पूर्वो विकल्पः, स खल्वयुक्तः, तस्या योगत्वानुपपत्तेः, तथा च न वाक्केवला जीवव्यापारः, तस्याः पुद्गलमात्रपरिणामरूपत्वात्, रसादिवत्, योगश्चात्मनः शरीरवतो व्यापार इति, न च तया भाषया निसृज्यते, किन्तु सैव निसृज्यत् इत्युक्तं, अथ द्वितीयः पक्षः, ततः स कायव्यापारएवेतिकृत्वा कायिकेनैव निसृजतीत्यापन्नं, अनिष्टं चैतत् इति, अत्रोच्यते, न, अभिप्रायापरिज्ञानात्, इह तनु-योगविशेष एव वाग्योगो मनोयोगश्चेति, कायव्यापारशून्यस्य सिद्धवत् तदभावप्रसङ्गात्, ततश्चात्मनः शरीरव्यापारे सति येन शब्दद्रव्योपादानं करोति स कायिकः, येन तु कायसंरम्भेण तान्येव मुञ्चति स वाचिक इति, तथा येन मनोद्रव्याणि मन्यते स मानस इति, कायव्यापार एवायं व्यवहारार्थे त्रिधा विभक्त इत्यतोऽदोषः। तथा 'एकान्तरं च गृह्णाति, निसृजत्येकान्तरं चैव' इत्यत्र केचिदेकैकव्यवहितं एकान्तरमिति मन्यन्ते, तेषां च विच्छिन्नरत्नावलीकल्पो ध्वनिरापद्यते, सूत्रविरोधश्च, यत उक्तं-"अनुसमयमविरहियं निरन्तरं गिण्हइ" त्ति।

आह–यत्पुनरिदमुक्तं "संतरं निसरति, नो निरंतरं, एगेणं समएणं गिण्हति, एगेणं निसरती" त्यादि, तत्कथं नीयते ?, उच्यते, इह ग्रहणापेक्षया निसर्गः सान्तरोऽभिहितः, एतदुक्तं भवति-यथा आदिसमयादारभ्य प्रतिसमयं ग्रहणं, नैवं निसर्ग इति, यस्मादाद्यसमये नास्तीति, ग्रहणमपि निसर्गापेक्षया सान्तरमापद्यत इति चेत्, न, तस्य स्वतन्त्रत्वात्, निसर्गस्य च ग्रहणपरतन्त्रत्वात्, यतो नागृहीतं निसृज्यत इति, अतः पूर्वपूर्वग्रहणसमयापेक्षया सान्तरव्यपदेश इति। तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकेन समयेन गृह्णाति एकेन निसृजति, किमुक्तं भवति ?-ग्रहणसमयानन्तरेण सर्वाण्येव तत्समयगृहीतानि निसृजतीति । अथवा एकसमयेन गृह्णात्येव, आद्येन, न निसृजति, तथा एकेन निसृजत्येव, चरमेण, न गृह्णाति, अपान्तरालसमयेषु तु ग्रहणनिसर्गावर्थगम्यौ इत्यतोऽ-विरोध इति । आह-ग्रहणनिसर्गप्रयत्नौ आत्मनः परस्परविरोधिनौ एकस्मिन्समये कथं स्यातामिति, अत्रोच्यते, नायं दोषः, एकसमये कर्मादाननिसर्गक्रियावत् तथोत्पादव्ययक्रियावत् तथाऽङ्गुल्याकाशदेशसंयोगगविभागकियावच्च क्रियाद्वय-स्वभावोपपत्तेरिति गाथार्थः

यदुक्तं-'गृह्णाति कायिकेन' इत्यादि, तत्र कायिको योगः पञ्चप्रकारः, औदारिकवैक्रिया-हारकतैजसकार्मणभेदभिन्नत्वात्तस्य, ततश्च किं पञ्चप्रकारेणापि कायिकेन गृह्णाति आहोस्विदन्यथा इत्याशङ्कासंभवे सति तदपनोदायेदमाह-

नि. (८) तिविहंमि सरीरंमि, जीवपएसा हवंति जीवस्स ।
जेहि उ गिण्हइ गहणं, तो भासइ भासओ भासं ॥

वृ- 'त्रिविधे' त्रिप्रकारे, शीर्यत इति शरीरं तस्मिन्, औदारिकादीनामन्यतम इत्यर्थः, जीवतीति जीवः तस्य प्रदेशाः जीवप्रदेशाः, भवन्ति, एतावत्युच्यमाने 'भिक्षोः पात्रं' इत्यादौ षष्ठ्या भेदेऽपि दर्शनात् मा भूद् भिन्नप्रदेशतयाऽप्रदेशात्मसंप्रत्यय इत्यत आह-जीवस्य आत्मभूता भवन्ति, ततश्चानेन निष्प्रदेशजीववादिनिराकरणमाह, सति निष्प्रदेशत्वे करचरणोरुग्री-वाद्यवयवसंसर्गाभावः, तदेकत्वापत्तेः, कथम् ?-करादिसंयुक्तजीवप्रदेशस्य उत्तमाङ्गादिसं-बद्धात्मप्रदेशेभ्यो भेदाभेदविकल्पोनुपपत्तेरिति । यैः किं करोतीत्याह-'यैस्तु गृह्णाति' तुशब्दो विशेषणार्थः, किं विशिनष्टि ? न सर्वदैव गृह्णाति, किन्तु तत्परिणामे सति, किं ?-गृह्यत इति ग्रहणं, ग्रहणमिति "कृत्यल्युटो बहुलं" इतिवचनात्कर्मकारकं, शब्दद्रव्यनिवहमित्यर्थः, 'ततो' गृहीत्वा 'भाषते' वक्ति, भाषत इति भाषकः क्रियाऽऽविष्ट इत्यर्थः, अनेन निष्क्रियात्म-वादव्यवच्छेदमाह, सति तस्मिन्निष्क्रियत्वात् अप्रच्युतानुत्पन्नस्थिरैकरूपत्वाद्भाषणाभावप्रसङ्गः, काम् ?-भाष्यत इति भाषा तां भाषां । आह - 'ततो भाषते भाषक' इत्यनेनैव गतार्थत्वाद्-भाषाग्रहणमतिरिच्यते इति, न, अभिप्राया-परिज्ञानात्, इह भाष्यमाणैव भाषोच्यते, न पूर्वं नापि पश्चाद्, इत्यस्यार्थस्य ख्यापनाय भाषाग्रहणमदुष्टमेवेति गाथार्थः ॥ यदुक्तं - 'त्रिविधे शरीरे' इत्यादि, तत्र न ज्ञायते कतमत् त्रैविध्यमिति, अतस्तदभिधातुकाम आह-

नि. (९) ओरालियवेउव्वियआहारो गिण्हई मुयइ भासं ।
सच्चं मोसं सच्चामोसं च असच्चमोसं च ॥

वृ- तत्र औदारिकवानौदारिकः, इहौदारिकशब्देनाभेदोपचाराद् मतुब्लोपाद्वा औदारिक-शरीरिणो ग्रहणमिति, एवं वैक्रियवान्वैक्रियः, आहारकवानाहारक इति । असौ औदारिकादिः, 'गृह्णाति' आदत्ते 'मुञ्चति' निसृजति च, भाष्यत इति भाषा तां भाषां, शब्दप्रायोग्यतया तद्भावपरिणतद्रव्यसंहतिमित्यर्थः । किंविशिष्टामित्याह-सतां हिता सत्या, सन्तो मुनयस्त-दुपकारिणी सत्येति, अथवा सन्तो मूलोत्तरगुणास्तदनुपघातिनी सत्या, अथवा सन्तः पदार्था जीवादयः तद्धिता तत्प्रत्यायनफला वस्त्वेकदेशप्रत्यायनफला उत्पन्नमिश्रादिभेदा सत्यामृषेति तां, तथा तिसृष्वप्यनधिकृता शब्दमात्रस्वभावाऽऽमन्त्रण्यादिभेदा असत्यामृषेति तां च, चशब्दः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समुच्चयार्थः, आसां च स्वरूपमुदाहरणयुक्तानां सूत्रादवसेयमिति गाथार्थः ॥

आह–'औदारिकादिः गृह्णाति मुञ्चति च भाषां' इत्युक्तं, सा हि मुक्ता उत्कृष्टतः कियत्क्षेत्रं व्याप्नोतीति, उच्यते, समस्तमेव लोकमिति, आह–यद्येवं 'कइ०' त्तिगाहा, अयं सूत्रतोऽभिसंबन्धः, अथवाऽर्थतः, प्रतिपाद्यते, आह–द्वादशभ्यो योजनेभ्यः परतो न शृणोति शब्दं, मन्दपरिणामत्वात्ताद्रव्याणामित्युक्तं, तत्र किं परतोऽपि द्रव्याणामागतिरस्ति ?, यथा च विषयायन्तरे नैरन्तर्येण तद्वासनासामर्थ्ये, एवं बहिरप्यस्ति उत नेति, उच्यते, अस्ति, केषाञ्चित् कृत्स्नलोकव्याप्तेः, आह–यद्येव–

नि. (१०) कइहि समएहि लोगो, भासाइ निरंतरं तु होइ फुडो ।
लोगस्स य कइ भागे, कइ भागो होइ भासाए ॥

वृ- 'कतिभिः समयैः' 'लोकः' लोक्यत इति लोकः चतुर्दशरज्ज्वात्मकः क्षेत्रलोकः परिगृह्यते, भाषया निरन्तरमेव भवति स्पृष्टः व्याप्तः पूर्ण इत्यनर्थान्तरं, लोकस्य च कतिभागे कतिभागो भवति भाषायाः ?, ॥ अत्रोच्यते–

नि. (११) चउहि समएहि लोगो, भासाइ निरंतरं तु होइ फुडो ।
लोगस्स य चरमंते, चरमंतो होइ भासाए ॥

वृ- चतुर्भिः समयैर्लोको भाषया निरन्तरमेव भवति स्पृष्टः, आह-किं सर्वथैव भाषया उत विशिष्टयैवेति, उच्यते, विशिष्टया, कथम् ?-इह कश्चिन्मन्दप्रयत्नो वक्ता भवति, स ह्यभिन्नान्येव शब्दद्रव्याणि विसृजति, तानि च विसृष्टानि असंख्येयात्मकत्वात् परिस्थूलत्वाच्च विभिद्यन्ते, भिद्यमानानि च संख्येयानि योजनानि गत्वा शब्दपरिणामत्यागमेव कुर्वन्ति, कश्चित्तु महाप्रयत्नः, स खलु आदाननिसर्गप्रयत्नाभ्यां भित्त्वैव विसृजति, तानि ज सूक्ष्मत्वाद्बहुत्वाच्च अनन्तगुणवृद्ध्या वर्धमानानि षट्सु दिक्षु लोकान्तमाप्नुवन्ति, अन्यानि च तत्पराघातवासितानि वासनाविशेषात् समस्तं लोकमापूरयन्ति, इह च चतुः समयग्रहणात् त्रिपञ्चसमयग्रहणमपि प्रत्येतव्यं, तुलादिमध्यग्रहणवत्, तत्र कथं पुनस्त्रिभिः समयैः लोको भाषया निरन्तरमेव भवति स्पृष्ट इति ? उच्यते, लोकमध्यस्थवक्तृपुरुषनिसृष्टानि, यतस्तानि प्रथमसमय एव षट्सु दिक्षु लोकान्तमनुधावन्ति, जीवसूक्ष्मपुद्गलयोः 'अनुश्रेणि गतिः' इति वचनात्, द्वितीयसमये तु त एव हि षट् दण्डाश्चतुर्दिशमेकैकशो विवर्धमानाः षट् मन्थानो भवन्ति, तृतीयसमये तु पृथक् पृथक् तदन्तरालपूरणात् पूर्णो भवति लोक इति, एवं त्रिभिः समयैर्भाषया लोकः स्पृष्टो भवति, यदा तु लोकान्तस्थितो वा भाषको वक्ति, चतसृणां दिशामन्यतमस्यां दिशि नाड्या बहिरवस्थितस्तदा चतुर्भिः समयैरापूर्यत इति, कथम् ?, एकसमयेन अन्तर्नाडीमनुप्रविशति, त्रयोऽन्ये पूर्ववद्रष्टव्याः, यदा तु विदिग्व्यवस्थितो वक्ति, तदा पुद्गलानामनुश्रेणिगमनात् समयद्वयेनान्तर्नाडीमनुप्रविशति, शेषसमयत्रयं पूर्ववद्रष्टव्यमित्येवं पञ्चमिः समयैरापूर्यत इति । अन्ये तु जैनसमुद्घातगत्या लोकापूरणमिच्छन्ति, तेषां चाद्यसमये भाषायाः खलु ऊर्ध्वाधोगमनात् शेषदिक्षु न मिश्रशब्दश्रवणसंभवः, उक्तं चाविशेषेण-"भासासमसेढीओ, सद्दं जं सुणइ मीसयं सुणइ" त्ति ।

अथ मतं-'व्याख्यानतोऽर्थप्रतिपत्तिः' इति न्यायाद्दण्ड एव मिश्रश्रवणं भविष्यति, न शेषदिक्ष्विति, ततश्चादोष इति, अत्रोच्यते, एवमपि त्रिभिः समयैर्लोकापूरणमापद्यते, न चतुः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समयसंभवोऽस्ति, कथम् ? -प्रथमसमयानन्तरमेव शेषदिक्षु पराघातद्रव्यसद्भावात् द्वितीयसमय एव मन्थानसिद्धेः, तृतीये च तदन्तरालपूरणात् इति । आह–जैनसमुद्घातवच्चतुर्भिरेवापूरणं भविष्यतीति को दोष इति, अत्रोच्यते, न, सिद्धान्तापरिज्ञानात्, इह जैनसमुद्घाते स्वरूपेणापूरणात्, न तत्र पराघातद्रव्यसंभवोऽस्ति, सकर्मकजीवव्यापारत्वात्तस्य, ततश्च कपाटनिर्वृत्तिरेव तत्र द्वितीयसमय इति, शब्दद्रव्याणां त्वनुश्रेणिगमनात्पराघातद्रव्यान्तरवा-सकस्वभावत्वाच्च द्वितीयसमय एव मन्थानापत्तिरिति, अचित्तमहास्कन्धोऽपि वैश्रसिकत्वात् पराघाताभावाच्च चतुर्भिरेव पूरयति, न चैवं शब्द इति, सर्वत्रानुश्रेणिगमनात्, इत्यलमतिविस्तरेण, गमनिकामात्रमेवैतत् प्रस्तुतमिति । यदुक्तं-'लोकस्य च कतिभागो भवति भाषायाः' इति, तत्रेदमुच्यते – 'लोकस्य च' क्षेत्रगणितमपेक्ष्य 'चरमान्ते' असंख्येयभागे 'चरमान्तः' असंख्येयभागो भवति 'भाषायाः' समग्रलोकव्यापिन्याः इति गाथार्थः ॥

'तत्त्व-भेद-पर्यायैर्व्याख्या' इति न्यायात् तत्त्वतो भेदतश्च मतिज्ञानस्वरूपमभिधाय इदानीं नानादेशजविनेयगणसुखप्रतिपत्तये तत्पर्यायशब्दान् अभिधित्सुराह–

नि. (१२) ईहा अपोह वीमंसा, मग्गणा य गवेसणा ।
सण्णा सई मई पण्णा, सव्वं आभिनिबोहियं ॥

वृ- 'ईह चेष्टायां' ईहनमीहा सतामर्थानां अन्वयिनां व्यतिरेकिणां च पर्यालोचना इतियावत्; अपोहनं अपोहः निश्चय इत्यर्थः, विमर्शनं विमर्शः ईहाया उत्तरः, प्रायः शिरःकण्डूयनादयः पुरुषधर्मा घटन्ते इति संप्रत्ययो विमर्शः, तथा अन्वयधर्मान्वेषणा मार्गणा, चशब्दः समुच्चयार्थः, व्यतिरेकधर्मालोचना गवेषणा, तथा संज्ञानं संज्ञा, व्यञ्जनावग्रहोत्तर-कालभावी मतिविशेष इत्यर्थः, स्मरणं स्मृतिः, पूर्वानुभूतार्थालम्बनः प्रत्ययः, मननं मतिः-कथञ्चिदर्थपरिच्छित्तावपि सूक्ष्मधर्मालोचनारूपा बुद्धिरिति, तथा प्रज्ञानं प्रज्ञा-विशिष्टक्षयोपशमजन्या प्रभूतवस्तुगतयथावस्थितधर्मालोचनरूपा मतिरित्यर्थः, सर्वमिदं 'आभिनिबोधिकं' मतिज्ञानमित्यर्थः, एवं किञ्चिद्भेदाद्भेदः प्रदर्शितः, तत्त्वतस्तु मतिवाचकाः सर्व एवैते पर्यायशब्दा इति गाथार्थः ॥

तत्त्वभेदपर्यायैर्मतिज्ञानस्वरूपं व्याख्यायेदानीं नवभिरनुयोगद्वारैः पुनस्तद्रूपनिरूपणायेदमाह–

नि. (१३) संतपय परूवणया दव्वपमाणं च खित्त फुसणा य ।
कालो अ अंतरं भाग, भावे अप्पाबहुं चेव ॥

नि. (१४) गइ इंदिए य काए, जोए वेए कसाय लेसासु ।
सम्मत्तनाणदंसणसंजयउवओग आहारे ॥

नि. (१५) भासग परित्तं पज्जत्त सुहुमे सण्णी य होइ भवं चरिमे ।
आभिनिबोहिअनाणं, मग्गिज्जइ एसु ठाणेसु ॥

वृ- सच्च तत्पदं च सत्पदं तस्य प्ररूपणं सत्पदप्ररूपणं तस्य भावः सत्पदप्ररूपणता गत्यादिभिर्द्वारैराभिनिबोधिकस्य कर्तव्येति, अथवा सद्विषयं पदं सत्पदं, शेषं पूर्ववत्, आहकिमसत्पदस्यापि प्ररूपणा क्रियते ? येनेदमुच्यते 'सत्पदप्ररूपणेति,' क्रियत इत्याह खरविषाणादेरसत्पदस्यापीति, तस्मात् सद्ग्रहणमिति, अथवा सन्ति च तानि पदानि च सत्पदानि गत्यादीनि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तैः प्ररूपणं सत्पदप्ररूपणं मतेरिति । तथा 'द्रव्यप्रमाणं' इति जीवद्रव्यप्रमाणं वक्तव्यं, एतदुक्तं भवति-एकस्मिन् समये कियन्तो मतिज्ञानं प्रतिपद्यन्त इति, सर्वे वा कियन्त इति, चः समुच्चये, 'क्षेत्रं' इति क्षेत्रं वक्तव्यं, कियति क्षेत्रे मतिज्ञानं संभवति, 'स्पर्शना च' वक्तव्या, कियत् क्षेत्रं मतिज्ञानिनः स्पृशन्ति, आह—क्षेत्रस्य स्पर्शनायाश्च कः प्रतिविशेषः ?, उच्यते, यत्रावगाहस्तत् क्षेत्रं, स्पर्शना तु तद्बाह्यतोऽपि भवति, अयं विशेष इति, चशब्दः पूर्ववत्, कालश्च वक्तव्यः, स्थित्यादिकालः, अन्तरं च वक्तव्यं प्रतिपत्त्यादाविति, भागो वक्तव्यः मतिज्ञानिनः शेषज्ञानिनां कतिभागे वर्त्तन्त इति, तथ भावो वक्तव्यः, कस्मिन् भावे मतिज्ञानिन इति, अल्पबहुत्वं च वक्तव्यं, आह-भागद्वारादेवायमर्थोऽवगतः, ततश्चालमनेनेति, न, अभिप्रायापरिज्ञानात्, इह मतिज्ञानिनामेव पूर्वप्रतिपन्नप्रतिपद्यमानकापेक्षया अल्प बहुत्वं वक्तव्यमिति समुदायार्थः ।

इदानीं प्रागुपन्यस्तगाथाद्वयेनाभिनिबोधिकस्य सत्पदप्ररूपणाद्वारावयवार्थः प्रतिपाद्यते, कथम् ?, अन्विष्यते 'आभिनिबोधिकज्ञानं किमस्ति नास्तीति,' अस्ति, यद्यस्ति क्व तत् ?, तत्र 'गताविति' गतिमङ्गीकृत्या-लोच्यते, सा गतिश्चतुर्विधा-नारकतिर्यङ्नरामरभेदभिन्ना, तत्र चतुष्प्रकारायामपि गतौ आभिनिबोधिकज्ञानस्य पूर्वप्रति-पन्ना नियमतो विद्यन्ते, प्रतिपद्यमानास्तु विवक्षितकाले भाज्याः, कदाचिद्भवन्ति कदाचिन्नेति, तत्र प्रतिपद्यमाना अभिधीयन्ते ते ये तत्प्रथमतयाऽऽभिनिबोधिकं प्रतिपद्यन्ते, प्रथमसमय एव, शेषसमयेषु तु पूर्वप्रतिपन्ना एव भवन्ति १ । तथा 'इन्द्रियद्वारे' इन्द्रियाण्यङ्गीकृत्य मृग्यते, तत्र पञ्चेन्द्रियाः पूर्वप्रतिपन्नाः नियमतः सन्ति, प्रतिपद्यमानास्तु विकल्पनीया इति, द्वित्रिचतुरिन्द्रियास्तु पूर्वप्रतिपन्नाः संभवन्ति, न तु प्रतिपद्यमानाः, एकेन्द्रियास्तु उभयविकलाः २ । तथा 'काय इति' कायमङ्गीकृत्य विचार्यते, तत्र त्रसकाये पूर्वप्रतिपन्ना नियमतो विद्यन्ते, इतरे त भाज्याः, शेषकायेषु च पृथिव्यादिषु उभयाभाव इति ३ । तथा 'योग इति' त्रिषु योगेषु समुदितेषु पञ्चेन्द्रियवद्वक्तव्यं, मनोरहित-वाग्योगेषु विकलेन्द्रियवत्, केवलकाययोगे तूभयाभाव इति ४ । तथा 'वेद इति' त्रिष्वपि वेदेषु विवक्षितकाले पूर्वप्रतिपन्ना अवश्यमेव सन्ति, इतरे तु भाज्या इति ५ ।

तथा 'कषाय इति द्वार' कषायाः क्रोधमानमायालोभाख्याः प्रत्येकमनन्तानुबन्ध्यप्रत्याख्यान-प्रत्याख्यानावरणसंज्वलनभेदभिन्ना इति, तत्राद्येषु अनन्तानुबन्धेषु क्रोधादिषूभयाभाव इति, शेषेषु त पञ्चेन्द्रियवद् योज्यम् ६ । तथा 'लेश्यासु' चिन्त्यते, तत्र श्लेषयन्त्यात्मानमष्टविधेन कर्मणा इति लेश्याः- कायाद्यन्यतमयोगवतः कृष्णादिद्रव्यसंबन्धादात्मनः परिणामा इत्यर्थः, तत्रोपरितनीषु तिसृषु लेश्यासु पञ्चेन्द्रियवद्योजनीयं इति, आद्यासु तु पूर्वप्रतिपन्नाः संभवन्ति, नत्वितर इति ७ । तथा 'सम्यक्त्वद्वारं' सम्यग्दृष्टिः किं पूर्वप्रतिपन्नः किं वा प्रतिपद्यमानक इति, अत्र व्यवहारनिश्चयाभ्यां विचार इति, तत्र व्यवहारनय आह—सम्यग्दृष्टि पूर्वप्रतिपन्नो न प्रतिपद्यमानकः आभिनिबोध्किाज्ञानलाभस्य, सम्यग्दर्शनमतिश्रुतानां युगपल्लाभात्, आभिनि-बोधिकप्रतिपत्त्यनवस्थाप्रसङ्गाच्च । निश्चयनयस्त्वाह—सम्यग्दृष्टिः पूर्वप्रतिपन्नः प्रतिपद्यमानश्च आभिनिबोधिकज्ञानलाभस्य, सम्यग्दर्शनसहायत्वात्, क्रियाकालनिष्ठाकालयोरभेदात्, भेदे च क्रियाऽभावाविशेषात् पूर्ववद्वस्तु नोऽनुत्पत्तिप्रसङ्गात्, न चेत्थं तत्प्रतिपत्त्यनवस्थेति ८ । तथा 'ज्ञानद्वारं' तत्र ज्ञानं पञ्चप्रकारं, मतिश्रुतावधिमनः पर्यायकेवलभेदभिन्नं इति, अत्रापि व्यवहार-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निश्चयनयाभ्यां विचार इति, तत्र व्यवहारनयमतं-मतश्रिुतावधिमनः पर्यायज्ञानिनः पूर्वप्रतिपन्ना न तु प्रतिपद्यमानका इति, मत्यादिलाभस्य सम्यग्दर्शनसहचरितत्वात्, केवली तु न पूर्वप्रतिपन्नो नापि प्रतिपद्यमानकः, तस्य क्षायोपशमिकज्ञानातीतत्वात्, तथा मत्यज्ञानश्रुताज्ञानविभङ्गज्ञान वन्तस्तु विवक्षितकाले प्रतिपद्यमाना भवन्ति, न तु पूर्वप्रतिपन्ना इति । निश्चयनयमतं तु मतिश्रुतावधिज्ञानिनः पूर्वप्रतिपन्ना नियमतः सन्ति, प्रतिपद्यमाना अपि सम्यग्दर्शनसहचरितत्वात् मत्यादिलाभस्य संभवन्तीति, क्रियाकालनिष्ठा-कालयोरभेदात्, मनः पर्यायज्ञानिनस्तु पूर्वप्रतिपन्ना एव, न प्रतिपद्यमानकाः, तस्य च भावयतेरेवोत्पत्तेः, केवलिनां तूभयाभाव इति । मत्याद्यज्ञान-वन्तस्तु न पूर्वप्रतिपन्ना नापि प्रतिपद्यमानकाः, प्रतिपत्तिक्रियाकाले मत्याद्यज्ञानाभावात्, क्रियाकालनिष्ठाकालयोश्चाभेदात्, अज्ञानभावे च प्रतिपत्तिक्रियाऽभावात् ९ ।

इदानीं 'दर्शन', तद्दर्शन चतुर्विधं, चक्षुरचक्षुरवधिकेवलभेदभिन्न, तत्र चक्षुर्दर्शनिनः अचक्षुर्दर्शनिनश्च, किमुक्तं भवति ? –दर्शनलब्धिसम्पन्ना न तु दर्शनोपयोगिन इति 'सव्वाओ लद्धीओ सागारोवओगोवउत्तस्स उप्पज्जइ' इति वचनात्; पूर्वप्रतिपन्ना नियमतः सन्ति, प्रतिपद्यमानास्तु विवक्षितकाले भाज्याः, अवधिदर्शनिनस्तु पूर्वप्रतिपन्ना एव, न तु प्रतिपद्य-मानकाः, केवलदर्शनिनस्तूभयविकला इति १० । 'संयत इति द्वारं', संयतः पूर्वप्रतिपन्नो न प्रतिपद्यमान इति ११ । 'उपयोगद्वार' स च द्विधा-साकारोऽनाकारश्च, तत्र साकारोपयोगिनः पूर्वप्रतिपन्ना नियमतः सन्ति, प्रतिपद्यमानास्तु विवक्षितकाले भाज्या इति, अनाकारो पयोगिनस्तु पूर्वप्रतिपन्ना इव न प्रतिपद्यमानकाः १२ ।

अधुना 'आहारकद्वार', आहारकाः पूर्वप्रतिपन्ना नियमतः सन्ति, प्रतिपद्यमानास्तु विकल्प-नीया विवक्षितकाल इति, अनाहारकास्तु अपान्तरालगतौ पूर्वप्रतिपन्नाः संभवन्ति, न तु प्रति-पद्यमानका इति १३ । तथा 'भाषक इति द्वारं', तत्र भाषालब्धिसंपन्ना भाषकाः, ते भाषमाणा अभाषमाणा वा पूर्वप्रतिपन्ना नियमतः सन्ति, प्रतिपद्यमानास्तु विवक्षितकाले भजनीया इति, तल्लब्धिशून्याश्चोभयविकला इति १४ । 'परीत्त इति द्वारं', तत्र परीत्ताः प्रत्येकशरीरिणः, ते पूर्वप्रतिपन्ना नियमतः सन्ति, प्रतिपद्यमासास्तु विवक्षितकाले भाज्या इति, साधारणास्तु उभयविकला इति १५ । 'पर्याप्तक इति द्वारं', तत्र षड्भिराहादिपर्याप्तिभिर्ये पर्याप्तास्ते पर्याप्तकाः, ते पूर्वप्रतिपन्ना नियमतो विद्यन्ते, विवक्षितकाले प्रतिपद्यमानास्तु भजनीया इति, अपर्याप्तकास्तु षट्पर्याप्तपेक्षया पूर्वप्रतिपन्नाः संभवन्ति, न त्वितरे १६ । 'सूक्ष्म इति द्वारं', तत्र सूक्ष्माः खलूभयविकलाः, बादरास्तु पूर्वप्रतिपन्ना नियमतः सन्ति, इतरे तु विवक्षितकाले भाज्या इति १७ । तथा 'संज्ञिद्वारं' तत्रेह दीर्घकालिक्युपदेशेन संज्ञिनः प्रतिगृह्यन्ते, ते च बादरवद्वक्तव्याः, असंज्ञिनस्तु पूर्वप्रतिपन्नाः संभवन्ति, न त्वितर इति १८ । 'भव इति द्वार', तत्र भवसिद्धिकाः संज्ञिवद्वक्तव्याः, अभवसिद्धिकास्तूभयशून्या इति १९ । 'चरम इति द्वारं', चरमो भवो भविष्यति यस्यासौ अभेदोपचाराच्चरम इति, तत्र इत्थंभूताः चरमाः पूर्वप्रतिपन्ना नियमतः सन्ति, इतरे तु भाज्याः, अचरमास्तूभयविकलाः, उत्तरार्धं तु व्याख्या तमेव । कृता सत्पदप्ररूपणेति, साम्प्रतं आभिनिबोधिकजीवद्रव्यप्रमाणमुच्यते –

तत्र प्रतिपत्तिमङ्गीकृत्य विवक्षितकाले कदाचिद् भवन्ति कदाचिन्नेति, यदि भवन्ति जघन्यत

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

एको द्वौ त्रयो वा, उत्कृष्टतस्तु क्षेत्रपल्योपमासंख्येयभागप्रदेशराशितुल्या इति, पूर्वप्रतिपन्नास्तु जघन्यतः क्षेत्रपल्योपमासंख्येयभागप्रदेशराशिपरिमाणा एव, उत्कृष्टातस्तु एभ्यो विशेषाधिका इति। उक्तं द्रव्यप्रमाण, इदानीं 'क्षेत्रद्वारं', तत्र नानाजीवान् एकजीवं चङ्गीकृत्य क्षेत्रमुच्यते, तत्र सर्व एवाभिनिबोधिकज्ञानिनो लोकस्य असंख्येयभागे वर्त्तन्ते, एकजीवस्तु ईलिकागत्या गच्छन्नूर्ध्वं अनुत्तरसुरेषु सप्तसु चतुर्दशभागेषु वर्त्तते, तेभ्यो वाऽऽगच्छन्निति, अधस्तु षष्ठी पृथ्वी गच्छँस्ततो वा प्रत्यागच्छन् पञ्चसु सप्तभागेषु इति, नातः परमधः क्षेत्रमस्ति, यस्मात् सम्यग्दृष्टेः अधः सप्तमनरकगमनं प्रतिषिद्धमिति, आह–अधः सप्तमनरकपृथिव्यामपि सम्यग्दर्शनलाभस्य प्रतिपादितत्वात् आगच्छतः पञ्चसप्तभागाधिकक्षेत्रसंभव इति, अत्रोच्यते, एतदप्ययुक्तं, सप्तमनरकात् सम्यग्दृष्टेरागमनस्याप्यभावात्, कथम्?, यस्मात् तत उद्धृतास्तिर्यक्ष्वेवागच्छन्तीति प्रतिपादितं, अमरनारकाश्च सम्यग्दृष्टयो मनुष्येष्वेव, इत्यलं प्रसङ्गेन प्रकृतं प्रस्तुमः। 'स्पर्शनाद्वारं' इदानीं, इह यत्रावगाहस्तत् क्षेत्रमुच्यते, स्पर्शना तु ततोऽतिरिक्ता अवगन्तव्या, यथेह परमाणोरेकप्रदेशं क्षेत्रं सप्तप्रदेशो च स्पर्शनेति।

तथा 'कालद्वारं', तत्रापयोगमङ्गीकृत्य एकस्यानेकेषां चान्तर्मुहूर्त्तमात्र एव कालो भवति जघन्यत उत्कृष्टतश्च, तथा तल्लब्धिमङ्गीकृत्य एकस्य जघन्येनान्तर्मुहूर्त्तमेव, उत्कृष्टतस्तु षट्षष्टिसागरोपमाण्यधिकानीति, वारद्वयं विजयादिषु गतस्य अच्युते वा वारत्रमिति, नरभवकालाभ्यधिक इति, तत ऊर्ध्वमप्रच्युतेनापवर्गप्राप्तिरेव भवतीति भावार्थः, नानाजीवापेक्षया तु सर्वकाल एवेति, न यस्मादाभिनिबोधिकलब्धिमच्छून्यो लोक इति। इदानीं 'अन्तरद्वारं', तत्रैकजीवमङ्गीकृत्य आभिनिबोधिकस्यान्तरं जघन्येनान्तर्मुहूर्त्तं, कथम्?, इह कस्यचित् सम्यक्त्वं प्रतिपन्नस्य पुनस्तत्परित्यागे सति पुनस्तदावरणकर्मक्षयोपशमाद् अन्तर्मुहूर्तमात्रेणैव प्रतिपद्यमानस्येति, उत्कृष्टतस्तु आशतनाप्रचुरस्य परित्यागे सति अपार्धपुद्गलपरावर्त्त इति, उक्तं च-

"तित्थगरपवयणसुयं, आयरियं गणहरं महिड्डीयं ?
आसादिंतो बहुसो, अनंतसंसारिओ होइ॥"

तथा नानाजीवानपेक्ष्य अन्तराऽभावा इति। 'भाग इति द्वारं' तत्र मतिज्ञानिनः शेषज्ञानिनामज्ञानिनां चानन्तभागे वर्त्तन्ते इति। "भावद्वार' इदानीं, तत्र मतिज्ञानिनः क्षायोपशमिके भावे वर्त्तन्ते, मत्यादिज्ञानचतुष्टयस्य क्षायोपशमिकत्वात्। तथा 'अल्पबहुत्वद्वारं', तत्राभिनिबोधिकज्ञानिनां प्रतिपद्यमानपूर्वप्रतिपन्नपेक्षया अल्पबहुत्वविभागोऽयमि ति, तत्र सद्भावे सति सर्वस्तोकाः प्रतिपद्यमानकाः, पूर्वप्रतिपन्नास्तु जघन्यपदिनस्तेभ्योऽसंख्येयगुणाः, तथोत्कृष्टपदिनस्तु एतेभ्योऽपि विशेषाधिका इति गाथावयवार्थः॥

साम्प्रतं यथाव्यावर्णितमतिभेद-संख्याप्रदर्शनद्वारेणोपसंहारमाह–

नि. (१६/१) आभिनिबोहियनाणे, अट्ठावीसइ हवंति पयडीओ।

वृ- अस्य गमनिका–'आभिनिबोधिकज्ञाने अष्टाविंशतिः भवन्ति प्रकृतयः' प्रकृतयो भेदा इत्यनर्थान्तरं, कथम्?, इह व्यञ्जनावग्रहः चतुर्विधः, तस्य मनोनयनवर्जेन्द्रियसंभवात्, अर्थावग्रहस्तु षोढा, तस्य सर्वेन्द्रियेषु संभवात्, एवं ईहावायधारणा अपि प्रत्येकं षड्भेदा एव मन्तव्या इति, एवं संकलिता अष्टाविंशतिर्भेदा भवन्ति। आह–प्राग् अवग्रहादिनिरूपणायां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अत्थाणं उग्गहणं' इत्यादावेताः प्रकृतयः प्रदर्शिता एव, किमिति पुनः प्रदर्शन्ते ?, उच्यते, तत्र सूत्रे संखयानियमेन नोक्ताः, इह तु संख्यानियमेन प्रतिपादनादविरोध इति । इदं च मतिज्ञानं चतुर्विधं-द्रव्यतः क्षेत्रतः कालतो भावतश्च, तत्र द्रव्यतः सामान्यादेशेन मतिज्ञानी सर्वद्रव्याणि धर्मास्तिकायादीनि जानीते, न विशेषादेशत इति, एवं क्षेत्रतो लोकालोकं, कालतः सर्वकालं, भावतस्तु औदयिकादीन् पञ्च भावानिति, सर्वभावानां चानन्तभागमिति । उक्तं मतिज्ञानं, इदानीं अवसरप्राप्तं श्रुतज्ञानं प्रतिपिपादयिषुराह-

नि. (१६/२) सुयनाणे पयडीओ, वित्थरओ आवि वोच्छामि ॥

वृ- श्रुतज्ञानं पूर्वं व्युत्पादितं तस्मिन्, प्रकृतयो भेदा अंशा इति पर्यायाः, ताः, 'विस्तरतः' प्रपञ्चेन, चशब्दात् संक्षेपतश्च, अपिशब्दः संभावने, अवधिप्रकृतीश्च 'वक्ष्ये' अभिधास्ये ॥

इदानीं ता एव श्रुतप्रकृतीः प्रदर्शयन्नाह-

नि. (१७) पत्तेयमक्खराइं, अक्खरसंजोग जत्तिआ लोए
एवइया पयडीओ, सुयनाणे हुंति नायव्वा ॥

वृ- एकमेकं प्रति प्रत्येकं, अक्षराण्यकारादीनि अनेकभेदानि, यथा अकारः सानुनासिको निरनुनासिकश्च, पुनरेकैकस्त्रिधा-ह्रस्वः दीर्घः प्लुतश्च, पुनरेकैकस्त्रिधैव-उदात्तः अनुदात्तः स्वरितश्च, इत्येवमकारः अष्टादशभेदः, इत्येवमन्येष्वपि इकारादिषु यथासंभेवं भेदजालं वक्तव्यमिति । तथा अक्षराणां संयोगा अक्षरसंयोगाः संयोगाश्च द्व्यादयः यावन्तो लोके यथा घटपट' इति 'व्याघ्रस्त्री' इत्येवमादयः एते चानन्ता इति, तत्रापि एकैकः अनन्तपर्यायः, स्वपरपर्यायापेक्षया इति । आह-संख्येयानां अकारादीनां कथं पुनरनन्ताः संयोगा इति, अत्रोच्यते, अभिधेयस्य पुद्गलास्तिकायादेरनन्तत्वात् भिन्नत्वाच्च, अभिधेयभेदे च अभिधानभेदसिद्धया अनन्त-संयोगसिद्धिरिति, अभिधेयभेदानन्त्यं च यथा-परमाणुः, द्विप्रदेशिको, यावाद् अनन्तप्रदेशिक इत्यादि, तथैकत्रापि च अनेकाभिधानप्रवृत्तेः अभिधेयधर्मभेदा यथा-परमाणुः, निरंशो, निष्प्रदेशः, निर्भेदः, निरवयव इत्यादि, न चैते सर्वथैकाभिधेयवाचका ध्वनय इति, सर्वशब्दानां भिन्नप्रवृत्तिनिमित्तत्वात्, इत्येवं सर्वद्रव्यपर्यायेषु आयोजनीयमिति, तथा च सूत्रेऽप्युक्तं-"अनंता गमा अनंता पज्जवा" अमुमेवार्थं चेतस्यारोप्याह-'एतावत्यः' इयत्परिमाणाः प्रवृत्तिनिमित्तत्वात् इत्येवं सर्वप्रकृतयः श्रुतज्ञाने भवन्ति ज्ञातव्या इति गाथार्थः ॥ इदानीं सामान्यतयोपदर्शितानां अनन्तानां श्रुतज्ञानप्रकृतीनां यथावद्भेदेन प्रतिपादनसामर्थ्य आत्मनः खलु अपश्यन्नाह-

नि. (१८) कत्तो मे वण्णेउं, सत्ती सुयनाणसव्वपयडीओ ?।
चउदसविहनिक्खेवं, सुयनाणे आवि वोच्छामि ॥

वृ- कुतो ? नैव प्रतिपादयितुं, 'मे' मम 'वर्णयितुं' प्रतिपादयितुं 'शक्तिः' सामर्थ्यं, काः?-प्रकृतीः, तत्र प्रकृतयो भेदाः, सर्वाश्च ताः प्रकृतयश्च सर्वप्रकृतयः, श्रुतज्ञानस्य सर्वप्रकृतयः श्रुतज्ञानसर्वप्रकृतय इति समासः, ताः कुतो मे वर्णयितुं शक्तिः ?, कथं न शक्तिः ?, इह ये श्रुतग्रन्थानुसारिणो मतिविशेषास्तेऽपि श्रुतमिति प्रतिपादिताः, उक्तं च-"तेऽविय मईविसेसे, सुयनाणब्भंतरे जाण" ताँश्चोत्कृष्टतः श्रुतधरोऽपि अभिलाप्यानपि सर्वान् न भाषते, तेषाम-नन्तत्वात् आयुषः परिमितत्वात् वाचः क्रमवृत्तित्वाच्चेति, अतोऽशक्तिः, ततः 'चतुर्दशविधनिक्षेपं'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निक्षेपणं निक्षेपो–नामादिविन्यासः, चतुर्दशविधश्चासौ निक्षेपश्चेति विग्रहस्तं 'श्रुतज्ञाने' श्रुतज्ञानविषयं, चशब्दात् श्रुताज्ञानविषयं च, अपिशब्दात् उभयविषयं च, तत्र श्रुतज्ञाने सम्यक्श्रुते, श्रुताज्ञाने असंज्ञिमिथ्याश्रुते, उभयश्रुते दर्शनविशेषपरिग्रहात् अक्षरानक्षरश्रुते इति, 'वक्ष्ये' अभिधास्ये इति गाथार्थः ॥ साम्प्रतं चतुर्दशविधश्रुतनिक्षेपस्वरूपोपदर्शनायाह–

नि. (१९) अक्खर सण्णी सम्मं, साईयं खलु सपज्जवसिअं च ।
गमियं अंगपविट्ठं, सत्तवि एए सपडिवक्खा ॥

वृ- तत्र 'अक्षर श्रुतद्वारं' इह 'सूचनात्सूत्रं' इतिकृत्वा सर्वद्वारेषु श्रुतशब्दो द्रष्टव्य इति । तत्र अक्षरमिति, किमुक्तं भवति ?–'क्षर संचलने' न क्षरतीत्यक्षरं, तच्च ज्ञानं चेतनेत्यर्थः, न यस्मादिदमनुपयोगेऽपि प्रच्यवत इति भावार्थः, इत्थंभूतभावाक्षर कारणत्वाद् अकारादिकमप्यक्षरमभिधीयते, अथवा अर्थान् क्षरति न च क्षीयते इत्यक्षरं, तच्च समासतस्त्रिविधं, तद्यथा-संज्ञाक्षरं व्यञ्जनाक्षरं लब्ध्यक्षरं चेति, संज्ञाक्षरं तत्र अक्षराकारविशेषः, यथा घटिकासंस्थानो घकारः, कुरुण्टिकासंस्थानश्चकार इत्यादि, तच्च ब्राह्यादिलिपीविधानादनेकविधं । तथा व्यञ्जनाक्षरं, व्यज्यतेऽनेनार्थः प्रदीपेनेव घट इति व्यञ्जनं, व्यञ्जनं च तदक्षरं चेति व्यञ्जनाक्षरं,तच्चेह सर्वमेव भाष्यमाणं अकारादि हकारान्तं, अर्थाभिव्यञ्जकत्वाच्छब्दस्य, तथा योऽक्षरोपलम्भः तत् लब्ध्यक्षरं, तच्च ज्ञानं इन्द्रियमनोनिमित्तं श्रुतग्रन्थानुसारि तदावरणक्षयोपशमो वा । अत्र च संज्ञाक्षरं व्यञ्जनाक्षरं च द्रव्याक्षरमुक्तं, श्रुतज्ञानाख्यभावाक्षरकारणत्वात्,लब्ध्यक्षरं तु भावाक्षरं, विज्ञानात्मकत्वादिति । तत्र अक्षरश्रुतमिति अक्षरात्मकं श्रुतं अक्षरश्रुतं, द्रव्याक्षराण्यधिकृत्य, अथवा अक्षरं च तत् श्रुतं च अक्षरश्रुतं, भावाक्षरमङ्गीकृत्य ॥ उक्तमक्षरश्रुतं, इदानीमनक्षरश्रुतस्वरूपमाह–

नि. (२०) ऊससिअं नीससिअं, निच्छूढं खासिअं च छीअं च ।
नीसिंधियमणुसारं, अनक्खरं छेलियाईअं ॥

वृ- उच्छ्वसनं उच्छ्वसितं, भावे निष्ठाप्रत्ययः, तथा निःश्सनं निःश्वसितं, निष्ठीवनं निष्ठयूतं, काशनं काशितं, चशब्दः समुच्चयार्थः, क्षवणं क्षुतं, चशब्दः समुच्चयार्थ एव, अस्य च व्यवहितः संबन्धः, कथम् ! सेण्टितं चानक्षरश्रुतमिति वक्ष्यामः, निःसिङ्घनं निःसिङ्घितं, अनुस्वारवदनुस्वारं, अनक्षरमपि यदनुस्वारवदुच्चार्यते हुङ्कारकरणादिवत् तत् 'अनक्षरमिति' एतदुच्छ्वसितादि अनक्षरश्रुतमिति, सेण्टनं सेण्टितं तत्सेण्टितं च अनक्षरश्रुतमिति । इह चोच्छ्वसितादि द्रव्यश्रुतमात्रं, ध्वनिमात्रत्वात्, अथवा श्रुतविज्ञानोपयुक्तस्य जन्तोः सर्व एव व्यापारः श्रुतं, तस्य तद्भावेन परिणतत्वात् । आह– यद्येवं किमित्युपयुक्तस्य चेष्टापि श्रुतं नोच्यते, ? येनोच्छूसिताद्येवोच्यते इति, अत्रोच्यते, रूढ्या, अथवा श्रूयत इति श्रुतं, अन्वर्थसंज्ञामधिकृत्य उच्छ्वसिताद्येव श्रुतमुच्यते, न चेष्टा, तदभावादिति, अनुस्वारादयस्तु अर्थगमकत्वादेव श्रुतमिति गाथार्थः ॥

उक्तमनक्षरश्रुतद्वारं, इदानीं 'संज्ञिद्वार' तत्र संज्ञीति कः शब्दार्थः !, संज्ञानं संज्ञा, संज्ञाऽस्यास्तीति संज्ञी, स च त्रिविधः-दीर्घकालिकहेतुवाददृष्टिवादोपदेशाद् , यथा नन्द्यध्ययने तथैव द्रष्टव्यः, ततश्च संज्ञिनः श्रुतं संज्ञिश्रुतं, तथा असंज्ञिनः श्रुतं असंज्ञिश्रुतमिति । तथा 'सम्यक्श्रुतं' अङ्गानङ्गप्रविष्टं आचारावश्यकादि । तथा 'मिथ्याश्रुतं' पुराणरामायणभारतादि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वमेव वा दर्शनपरिग्रहविशेषात् सम्यक्श्रुतमितरद्वा इति । तथा 'साद्यमनाद्यं सपर्यवसितमपर्यवसितं च नयानुसारतोऽवसेयं, तत्र द्रव्यास्तिकनयादेशाद् अनाद्यपर्यवसितं च, नित्यत्वात्, अस्तिकायवत् । पर्यायास्तिकनयादेशात् सादि सपर्यवसितं च, अनित्यत्वात्, नारकादिपर्यायवत्। अथवा द्रव्यादिचतुष्टयात् साद्यनाद्यादि अवगन्तव्यं, यथा नन्द्यध्ययने इति, खलुशब्द एवकारार्थः, स चावधारणे, तस्य च व्यवहितः संबन्धः, सप्तैव 'एते' श्रुतपक्षाः सप्रतिपक्षाः, न पक्षान्तरमस्ति, सतोऽत्रैवान्तर्भावात् । तथा गमा अस्य विद्यन्ते इति गमिकं, तच्च प्रायोवृत्त्या दृष्टिवादः । तथा गाथाद्यसमानग्रन्थं अगमिकं, तच्च प्रायः कालिकं । तथा अङ्गप्रविष्टं गणधरकृतं आचारादि, अनङ्गप्रविष्टं तु स्थविरकृतं आवश्यकादि, गाथाशेषमवधारणप्रयोगं दर्शयता व्याख्यातमेवेति गाथार्थः ॥ सत्पदप्ररूपणादि मतिज्ञानवदायोज्यं । प्रतिपादितं श्रुतज्ञानमर्थतः, साम्प्रतं विषयद्वारेण निरूप्यते, तच्चतुर्विधं-द्रव्यतः क्षेत्रत्: कालतो भावतश्च, तत्र द्रव्यत्:, श्रुतज्ञानी सर्वद्रव्याणि जानीते न तु पश्यति, एवं क्षेत्रादिष्वपि द्रष्टव्यं । इदं पुनः श्रुतज्ञानं सर्वातिशयरत्नसमुद्रकल्पं, तथा प्रायो गुर्वायत्तत्वात् पराधीनं यतः अतः विनेयानुग्रहार्थं यो यथा चास्य लाभः तं तथा दर्शयन्नाह–

नि. (२१) आगमसत्थग्गहणं, जं बुद्धिगुणेहि अट्ठहिं दिट्ठं ।
बिंति सुयनाणलंभं, तं पुव्वविसारया धीरा ॥

वृ- आगमनं आगमः, आङः अभिविधिमर्यादार्थत्वाद् अभिविधिना मर्यादया वा गमः-परिच्छेद आगमः, स च केवलमत्यवधिमनः पर्यायलक्षणोऽपि भवति अतस्तद्यवच्छित्त्यर्थमाह–शिष्यतेऽनेनेति शास्त्रं-श्रुतं, आगमग्रहणं तु षष्टितन्त्रादिकुशास्त्राव्यवच्छेदार्थं, तेषामनागमत्वात्, सम्यक्परिच्छेदात्मकत्वाभावादित्यर्थः, शास्त्रतया च रूढत्वात्, ततश्च आगमश्चासौ शास्त्रं च आगमशास्त्रं तस्य ग्रहणमिति समासः, गृहीतिर्ग्रहणं, यद्बुद्धिगुणैः वक्ष्यमाणलक्षणैः करणभूतैः अष्टभिः, दृष्टं, ब्रुवते, श्रुतज्ञानस्य लाभः श्रुतज्ञानलाभस्तं, तदेव ग्रहणं, ब्रुवते, के ?, पूर्वेषु विशारदाः पूर्वविशारदाः, विशारदा विपश्चितः, धीरा व्रतानुपालने स्थिरा इत्ययं गाथार्थः ॥ बुद्धिगुणैरष्टभिरित्युक्तं, ते चामी–

नि. (२२) सुस्सूसइ पडिपुच्छइ, सुणेइ गिण्हइ य ईहए वावि ।
तत्तो अपोहएया, धारेइ करेइ वा सम्मं ॥

वृ- विनययुक्तो गुरुमुखात् श्रोतुमिच्छति शुश्रूषति, पुनः पृच्छति प्रतिपृच्छति तच्छ्रुतमशङ्कितं करोतीति भावार्थः, पुनः कथितं तच्छृणोति, श्रुत्वा गृह्णाति, गृहीत्वा चेहते पर्यालोचयति किमिदमित्थं उत अन्यथेति, चशब्दः समुच्चयार्थः, अपिशब्दात् पर्यालोचयन् किञ्चित् स्वबुद्ध्याऽपि उत्प्रेक्षते, 'ततः' तदनन्तरं 'अपोहते च' एवमेतत् यदादिष्टमाचार्येणेति, पुनस्तमर्थमागृहीतं धारयति, करोति च सम्यक् तदुक्तमनुष्ठानमिति, तदुक्तानुष्ठानमपि च श्रुतप्राप्तिहेतुर्भवत्येव, तदावरणकर्मक्षयोपशमादिनिमित्तत्वात्तस्येति । अथवा यद्यदाज्ञापयति गुरुः तत् सम्यगनुग्रहं मन्यमानः श्रोतुमिच्छति शुश्रूषति, पूर्वसंदिष्टश्च सर्वकार्याणि कुर्वन् पुनः पृच्छति प्रतिपृच्छति, पुनरादिष्टः तत् सम्यक् शृणोति, शेषं पूर्ववदिति गाथार्थः ॥ बुद्धिगुणा व्याख्याताः, तत्र शुश्रूषतीत्युक्तं, इदानीं श्रवणविधिप्रतिपादनायाह–

नि. (२३) मूअं हुंकारं वा, बाढकारपडिपुच्छवीमंसा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्तो पसंगपारायणं च परिनिट्ठ सत्तमए ॥

वृ- 'मूकमिति' मूकं शृणुयात्, एतदुक्तं भवति–प्रथमश्रवणे संयतगात्रः तूष्णीं खल्वासीत, तथा द्वितीये हुङ्कारं च दद्यात्, वन्दनं कुर्यादित्यर्थः, तृतीये बाढल्कारं कुर्यात्, बाढमेवमेतत् नान्यथेति, चतुर्थश्रवणे तु गृहीतपूर्वा-परसूत्राभिप्रायो मनाक् प्रतिपृच्छां कुर्यात् कथमेतदिति, पञ्चमे तु मीमांसां कुर्यात्, मातुमिच्छा मीमांसा प्रमाणजिज्ञासेतियावत्, ततः षष्ठे श्रवणे तदुत्तरोत्तरगुणप्रसङ्गः पारगमनं चास्य भवति, परिनिष्ठा सप्तमे श्रवणे भवति, एतदुक्तं भवति- गुरुवदनुभाषत् एव सप्तमश्रवण इत्ययं गाथार्थः ॥

एवं तावच्छ्रवणविधिरुक्तः, इदानीं व्याख्यानविधिमभिधित्सुराह–

नि. (२४) सुत्तत्थो खलु पढमो, बीओ निज्जुत्तिमीसओ भणिओ ।
तइओ य निरवसेसो, एस विही भणिअ अनुओगे ॥

वृ- सूत्रस्यार्थः सूत्रार्थः सूत्रार्थ एव केवलः प्रतिपाद्यते यस्मिन्ननुयोगे असौ सूत्रार्थ इत्युच्यते, सूत्रार्थमात्रप्रतिपादनप्रधानो वा सूत्रार्थः, खलुशब्दस्त्वेवकारार्थः, स चावधारणे, एतदुक्तं भवति- गुरुणा सूत्रार्थमात्राभिधानलक्षण एव प्रथमोऽनुयोगः कार्यः, मा भूत् प्राथमिकविनेयानां मतिसंमोहः, 'द्वितीयः' अनुयोगः सूत्रस्पर्शिकनिर्युक्तिमिश्रकः कार्य इत्येवंभूतो भणितो जिनैश्चतुर्दशपूर्वधरैश्च 'तृतीयश्च निरवशेषः' प्रसक्तानुप्रसक्तमप्युच्यते युस्मिन् स एवं-लक्षणो निरवशेषः, कार्य इति, स 'एष' उक्तलक्षणो विधानं विधिः प्रकार इत्यर्थः, भणितः प्रतिपादिः जिनादिभिः, क्व? सूत्रस्य निजेन अभिधेयेन सार्धं अनुकूलेयोगः अनुयोगः सूत्रव्याक्यानमित्यर्थः, तस्मिन्ननुयोगऽनुयोगविषय इति, अयं गाथार्थः ॥ समाप्तं श्रुतज्ञानम् ॥ उक्तप्रकारेण श्रुतज्ञान- स्वरूपमभिहितं, साम्प्रतं प्रागभिहितप्रस्तावमवधिज्ञानमुपदर्शयन्नाह–

नि. (२५) संखाईआओ खलु, ओहीनाणस्स सव्वपयडीओ ।
काओ भवपच्चइया, खओवसमिआओ काओवि ॥

वृ- संखानं संख्या तामतीताः संखयातीता असंख्येया इत्यर्थः, तथा संख्यातीतमनन्तमपि भवति, ततश्चानन्ता अपि, तथा च खलुशब्दो विशेषणार्थः, किं विशिनष्टि ?–क्षेत्रकाल- ाख्यप्रमेयापेक्षयैव संख्यातीताः, द्रव्यभावाख्यज्ञेयापक्षया चानन्ता इति, 'अवधिज्ञानस्य' प्राग्निरूपितशब्दार्थस्य, सर्वाश्च ताः प्रकृतयश्च सर्वप्रकृतयः, प्रकृतयो भेदा अंशा इति पर्यायाः, एतदुक्तं भवति-यस्मादवधेः लोकक्षेत्रासंखयेयभागादारभ्य प्रदेशवृद्धया असंख्येयलोकपरिमाणं उत्कृष्टं आलम्बनतया क्षेत्रमुक्तं, कालश्चावलिकाऽसंख्येयभागादारभ्य समयवृद्धया खल्व- संख्येयोत्सर्पिण्यवसर्पिणीप्रमाण उक्तः, ज्ञेयभेदाच्च ज्ञानभेद इत्यतः संख्यातीताः तत्प्रकृतयः इति, तथ तैजसवाग्द्रव्यापान्तरालवर्त्यनन्तप्रदेशकाद् द्रव्यादारभ्य विचित्रवृद्धया सर्वमूर्त्तद्रव्याणि उत्कृष्टं विषयपरिमाणमुक्तं, प्रतिवस्तुगतासंख्येयपर्यायविषयमानं च इति, अतः पुद्गलास्तिकायं तत्पर्यायांश्चाङ्गीकृत्य ज्ञेयभेदेन ज्ञानभेदादनन्ताः प्रकृतय इति, आसां च मध्ये 'काश्चन' अन्यतमाः 'भवप्रत्यया' भवन्ति अस्मिन् कर्मवशवर्त्तिनः प्राणिन इति भवः, स च नारकादिलक्षणः, स एव प्रत्ययः - कारणं यासां ताः भवप्रत्ययाः, पक्षिणां गगनगमनवत्, ताश्च नारकामराणामेव, तथा गुणपरिणामप्रत्ययाः क्षयोपशमनिर्वृत्ताः क्षायोपशमिकाः काश्चन, ताश्च तिर्यङ्नराणामिति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कोबा (गांधीनगर) पि ३८२००९

आह–क्षायोपशमिके भावेऽवधिज्ञानं प्रतिपादितं, नारकादिभवश्च औदयिकः, स कथं तासां प्रत्ययो भवतीति, अत्रोच्यते, ता अपि क्षयोपशमनिबन्धना एव, किं तु असावेव क्षयोपशमः तस्मिन्नारकामरभवे सति अवश्यं भवतीतिकृत्वा भवप्रत्ययास्ता इति गाथार्थः ॥ साम्प्रतं सामान्यरूपतया उद्दिष्टानां अवधिप्रकृतीना वाचः क्रमवर्त्तित्वाद् आयुषश्चाल्पत्वात् यथावद्भेदेन प्रतिपादनसामर्थ्यमात्मनोऽपश्यन्नाह सूत्रकारः–

नि. (२६) कत्तो मे वण्णेउं, सत्ती ओहिस्स सव्वपयडीओ ?।
चउदसविहनिक्खेवं, इड्ढीपत्ते य वोच्छामि ॥

वृ- कुतो ? 'मे' मम, वर्णयितुं शक्तिः अवधेः सर्वप्रकृति : आयुषः परिमितत्वाद् वाचः क्रमवृत्तित्वाच्च, तथापि विनेयगणानुग्रहार्थं, चतुर्दशविधश्चासौ निक्षेपश्चेति समासः, तं अवधेः संबन्धिनं, आमर्षौषध्यादिलक्षणा प्राप्ता ऋद्धिर्यैस्ते प्राप्तर्धयः तांश्च, इह गाथाभङ्गभयाद्व्यत्ययः, अन्यथा निष्ठान्तस्य पूर्वनिपात एव भवति बहुव्रीहाविति, चशब्दः समुच्चयार्थः, 'वक्ष्ये' अभिधास्य इति गाथार्थः ॥ यदुक्तं 'चतुर्दशविधनिक्षेपं वक्ष्ये' इति, तं प्रतिपादयनाह–

नि. (२७) ओही १ खित्तपरिमाणे, २ संठाणे ३ आनुगामिए ४।
अवट्ठिए ५ चले ६ तिव्वमन्द ७ पडिवाउत्पयाइ ८ अ ॥

वृ- तत्र अवध्यादीनि गतिपर्यन्तानि चतुर्दश द्वाराणि, ऋद्धिस्तु चसमुच्चितत्वात् पञ्चदशं। अन्ये त्वाचार्या अवधिरित्येतत्पदं परत्यज्य आनुगामुकमनानुगामुकसहितं अर्थतोऽभिगृह्य चतुर्दश द्वाराणि व्याचक्षते, यस्मात् नावधिः प्रकृतिः, किं तर्हि !, अवधेरेव प्रकृतयः चिन्त्यन्ते, यतश्च प्रकृतीनामेव चतुर्दशधा निक्षेप उक्त इति। पक्षद्वयेऽपि अविरोध इति। तत्र 'अवधिरिति' अवर्धर्नामादिभेदभिन्नस्य स्वरूपमभिधातव्यं, तथा अवधिशब्दो द्विरावर्त्त्यते इति व्याख्यातमिति। तथा 'क्षेत्रपरिमाण' इति क्षेत्रपरिमाणविषयोऽवधिर्वक्तव्यः, एवं संस्थानविषय इति। अथवा 'अर्थाद्विभक्तिपरिणाम' इति द्वितीयैवेयं, ततश्च अवधेर्जधन्यमध्यमोत्कृष्टभेदभिन्नं क्षेत्रप्रमाणं वक्तव्यं। तथा संस्थानमवधेर्वक्तव्यम्। 'आनुगामुक इति द्वारं' अनुगमनशील आनुगामुकः, सविपक्षोऽवधिर्वक्तव्यः, एकारान्तः शब्दः प्रथमान्त इतिकृत्वा, यथा 'कयरे आगच्छइ' इत्यादि तथा अवस्थितोऽवधिर्वक्तव्यः, द्रव्यादिषु कियन्तं कालं अप्रतिपतितः सन्नुपयोगतो लब्धितश्चावस्थितो भवति। तथा चलोऽवधिर्वक्तव्यः, चलोऽनवस्थितः, स च वर्धमानः क्षीयमाणो वा भवति। तथा 'तीव्रमन्दाविति द्वारं' तीव्रो मन्दो मध्यमश्चावधिर्वक्तव्यः, तत्र तीव्रो विशुद्धः, मन्दश्चाविशुद्धः, तीव्रमन्दस्तूभयप्रकृतिरिति। 'प्रतिपातोत्पादाविति द्वारं' एककाले द्रव्याद्यपेक्षया प्रतिपातोत्पादाववधेर्वक्तवयौ ॥

नि. (२८) नाण ९ दंसण १० विब्भंगे ११, देसे १२ खित्ते १३ गई १४ इअ।
इड्ढीपत्तानुओगे य, एमेआ पडिवत्तिओ ॥

वृ- तथा 'ज्ञानदर्शनविभङ्गा' वक्तव्याः, किमत्र ज्ञानं ? किं वा दर्शनं ? को वा विभङ्गः? परस्परतश्चामीषां अल्पबहुत्वं चिन्त्यमिति। तथा 'देशद्वारं' कस्य देशविषयः सर्वविषयो वाऽवधिर्भवतीति वक्तव्यम्। 'क्षेत्रद्वारं' क्षेत्रविषयोऽवधिर्वक्यतव्यः, संबद्धासंबद्धसंख्येया संख्येयापान्तराललक्षणाक्षेत्रावधिद्वारेणेत्यथः। 'गतिरिति च' अत्र इतिशब्द आद्यर्थे द्रष्टव्यः,

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

ततश्च गत्यादि च द्वारजालमवधौ वक्तव्यमिति । तथा प्राप्तर्द्धर्यनुयोगश्च कर्त्तव्यः, अनुयोगोऽन्वाख्यानं, एवमनेन प्रकारेण 'एता' अनन्तरोक्ताः 'प्रतिपत्तयः' प्रतिपादनानि, प्रतिपत्तयः परिच्छित्तय इत्यर्थः, ततश्चावधिप्रकृतय एव प्रतिपत्तिहेतुत्वात् प्रतिपत्तय इत्युच्यन्त इति गाथाद्वयसमुदायार्थः ।। साम्प्रतमनन्तरोक्तद्वारगाथाद्वयाद्यद्वारव्याचिख्यासयेदमाह-

नि. (२९) नामं ठवणादविए, खित्ते काले भवे य भावे य ।
एसो खलु निक्खेवो ओहिस्सा होइ सत्तविहो ।।

वृ- तत्र नाम पूर्वं निरूपितं, नाम च तदवधिश्च नामावधिः, यस्यावधिरिति नाम क्रियते, यथा मर्यादायाः । तथा स्थापना चासाववधिश्च स्थापनावधिः, अक्षादिविन्यासः । अथवा अवधिरेव च यदभिधानं वचनपर्यायः स नामावधिः, स्थापनावधिर्यः खलु आकारविशेषः तत्तद्रव्यक्षेत्रस्वामिनामिति । तथा द्रव्येऽवधिर्द्रव्यावधिः, द्रव्यालम्बन इत्यर्थः । अथवाऽयं एकारान्तः शब्दः प्रथमान्त इतिकृत्वा द्रव्यमेवावधिर्द्रव्यावधिः, भावावधिकारणं द्रव्यमित्यर्थः, यद्वोत्पद्यमानस्योपकारकं शरीरादि तदवधिकारणत्वाद् द्रव्यावधिः । तथा क्षेत्रेऽवधिः क्षेत्रावधिः, अथवा यत्र क्षेत्रेऽवधिरुत्पद्यते तदेवावधेः कारणत्वात् क्षेत्रावधिः, प्रतिपाद्यते वा । तथा कालेऽवधिः, कालावधिः, अथवा यस्मिन् काले अवधिरुत्पद्यते कथ्यते वा स कालावधिः, भवनं भवः, स च नारकादिलक्षणः, तस्मिन् भवेऽवधिर्भवावधिः । भावः क्षायोपशमिकादिः द्रव्यंपर्यायो वा, तस्मिन्नवधिः भावावधिः, चशब्दौ समुच्चयार्थौ, 'एषः' अनन्तरव्यावर्णितः, खलुशब्दः एवकारार्थः, स चावधारणे, एष एव, नान्यः, निक्षेपणं निक्षेपः, अवधेर्भवति 'सप्तविधः' सप्तप्रकार इति गाथार्थः ।। इदानीं क्षेत्रपरिमाणाख्यद्वितीयद्वारावयवार्थमाह-

नि. (३०) जावइया तिसमयाहारगस्स सुहुमस्स पणगजीवस्स ।
ओगाहणा जहन्ना, ओहीखित्तं जहन्नं तु ।।

वृ- तत्र क्षेत्रपरिमाणं जघन्यमादौ अतस्तदेव तावत्प्रतिपाद्यते-'यावती' यत्परिमाणा, त्रीन्समयान् आहारयतीति त्रिसमयाहारकस्तस्य, सूक्ष्मनामकर्मोदयात् सूक्ष्मः तस्य, पनकश्चासौ जीवश्च पनकजीवः वनस्पतिविशेष इत्यर्थः, तस्य, अवगाहन्ति यस्यां प्राणिनः सा अवगाहना तनुरित्यर्थः, 'जघन्या' सर्वस्तोका, अवधेः क्षेत्रं अवधिक्षेत्रं, 'जघन्यं' सर्वस्तोकं, तुशब्द एवकारार्थः, स चावधारणे, तस्य चैवं प्रयोगः-अवधेः क्षेत्रं जघन्यमेतावदेवेति गाथाक्षरार्थः ।

अत्र च संप्रदायसमधिगम्योऽयमर्थः-

योजनसहस्रमानो मत्स्यो मृत्वा स्वकायदेशे यः ।
उत्पद्यते हि सूक्ष्मः, पनकत्वेनेह स ग्राह्यः ।।
संहृत्य चाद्यसमे, स ह्यायामं करोति च प्रतरम् ।
संख्यातीताख्याङ्गुलभागबाहुल्यमानं तु ।।
खकतनुपृथुत्वमात्रं, दीर्घत्वेनापि जीवसामर्थ्यात् ।
तमपि द्वितीयसमये, संहृत्य करोत्यसौ सूचिम् ।।
संख्यातीताख्याङ्गुलविभागविष्कम्भमाननिर्दिष्टाम् ।
निजतनुपृथुत्वदैर्ध्या, तृतीयसमये तु संहृत्य ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्पद्यते च पनकः, खदेहदेशे स सूक्ष्मपरिणामः ।
समयत्रयेण तस्यावगाहना यावती भवति ॥
तावज्जघन्यमवधेरालम्बन्वस्तुभाजनं क्षेत्रम् ।
इदमित्थमेव मुनिगणसुसंप्रदायात् समवसेयम् ॥

अत्र कश्चिदाह–किमिति महामत्स्यः ? किं वा तस्य तृतीयसमये निजदेहदेशे समुत्पादः ? त्रिसमयाहारकत्वं वा कल्प्यत इति ?, अत्रोच्यते, स एव हि महामत्स्यः त्रिभिः समयैरात्मानं संक्षिपन् प्रयत्नविशेषात् सूक्ष्मावगाहनो भवति, नान्यः, प्रथमद्वितीयसमययोश्च अतिसूक्ष्मः चतुर्थादिषु चातिस्थूरः त्रिसमयाहारक एव च तद्योग्य इत्यतस्तद्ग्रहणमिति । अन्ये तु व्याचक्षते-त्रिसमाहारक इति, आयामविष्कम्भसंहारसमयद्वयं सूचिसंहरणोत्पादसमयश्चेत्येते त्रयः समयाः, विग्रहाभावाच्चाहारक एतेषु, इत्यत उत्पादसमय एव त्रिसमयाहारकः सूक्ष्मः पनकजीवो जघन्यावगाहनश्च, अतस्तत्प्रमाण जघन्यमवधिक्षेत्रमिति, एतच्चायुक्तं, त्रिसमयाहारकत्वस्य पनकजीवविशेषणत्वात्, मत्स्यायायविष्कम्भ-संहरणसमयद्वयस्य च पनकसमयायोगात्, त्रिसमयाहारकत्वाख्यविशेषणानुपपक्तिप्रसङ्गात् इति, अलं प्रसङ्गेनेति गाथार्थः ॥

एवं तावत् जघन्यमवधिक्षेत्रमुक्तं, इदानीं उत्कृष्टमभिधातुकाम आह–

नि. (३१) सव्वबहुअगनिजीवा, निरंतरं जत्तियं भरिज्ञासु ।
खित्तं सव्वदिसागं, परमोही खित्त निद्दिट्ठो ॥

वृ- सर्वेभ्यो विवक्षितकालावस्थायिभ्योऽनलजीवेभ्य एव बहवः सर्वबहवः, न भूतभविष्यद्भ्यः, नापि शेषजीवेभ्यः, कुतः !, असंभवात्, अग्नयश्च ते जीवाश्च अग्निजीवाः, सर्वबहवश्च तेऽग्निजीवाश्च सर्वबह्वग्निजीवाः, 'निरन्तरं' इति क्रिया विशेषणं 'यावत्' यावत्परिमाणं 'भृतवन्तो' व्याप्तवन्तः 'क्षेत्रं' आकाशं, एतदुक्तं भवति-नैरन्तर्येण विशिष्टसूचीरचनया यावत् भृतवन्त इति । भूतकालनिर्देशश्च अजितस्वामिकाल एव प्रायः सर्वबहवोऽनलजीवा भवन्ति अस्यामवसर्पिण्यां इत्यस्यार्थस्य ख्यापनार्थः, इदं चानन्तरोदितिविशेषणं क्षेत्रमेकदिक्कमपि भवति, अत आह–'सर्वदिक्कं' अनेन सूचीपरिभ्रमणप्रमितमेवाह, परमश्चासाववधिश्च परमावधिः, 'क्षेत्रं' अनन्तरव्यावर्णितं प्रभूतानलजीवमितमङ्गीकृत्य निर्दिष्टः क्षेत्रनिर्दिष्टः, प्रतिपादितो गणधरादिभिरिति, ततश्च पर्यायेण परमावधेरेतावत्क्षेत्रमित्युक्तं भवति । अथवा सर्वबह्वग्निजीवा निरन्तरं यावद् भृतवन्तः क्षेत्रं सर्वदित्तक्क एतावति क्षेत्रे यान्यवस्थितानि द्रव्याणितत् परिच्छेदसामर्थ्ययुक्तः परमावधिः क्षेत्रमङ्गीकृत्य निर्दिष्टो, भावार्थस्तु पूर्ववदेव, अयमक्षरार्थः । इदानीं साम्प्रदायिकः प्रतिपाद्यते-तत्र सर्वबह्वग्निजील बादराः प्रायोऽजितस्वामितीर्थकरकाले भवन्ति, तदारम्भकपुरुषबाहुल्यात्, सूक्ष्मोश्चोत्कृष्टपदिनस्तत्रैवावरुध्यन्ते, ततश्च सर्वबहवो भवन्ति । तेषां च स्वबुद्धया षोढाऽवस्थानं कल्प्यते–एकैकक्षेत्रप्रदेश एकैकजीवावगाहनया सर्वतश्चतुरस्त्रो धनः प्रथमं, स एव जीवः स्वावगाहनया द्वितीयं, एवं प्रतरोऽपि द्विभेदः, श्रेण्यपि द्विभेदा, तत्र आद्याः पञ्च प्रकारा अनादेशाः, क्षेत्रस्याल्पत्वात् क्वचित्समयविरोधाच्च, षष्ठः प्रकारस्तु सूत्रादेश इति, ततश्चासौ श्रेणी अवधिज्ञानिनः सर्वासु दिक्षु शरीरपर्यन्तेन भ्राम्यते, सा च असंख्येयान् अलोके लोकमात्रान् क्षेत्रविभागान् व्याप्नोति, एतावदवधिक्षेत्रं उत्कृष्टमिति, सामर्थ्यमङ्गीकृत्यैवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्ररूप्यते, एतावति क्षेत्रे यदि द्रष्टव्यं भवति तदा पश्यति न त्वलोके द्रष्टव्यमस्ति इति गाथार्थः।

एवं तावज्ञधन्यमुत्कृष्टं चावधिक्षेत्रमभिहितिं, इदानीं विमध्यमप्रतिपिपादयिषया एतावत्क्षेत्रोपलम्भे चैतावत्कालोपलम्भः, तथा एतावत्कालोपलम्भे चैतावत्क्षेत्रोपलम्भ इत्यस्यार्थस्य प्रदर्शनाय चेदं गाथाचतुष्टयं शास्त्रकार :-

नि. (३२) अंगुलमावलियाणं, भागमसंखिज्ज दोसु संखिज्जा।
अंगुलमावलिअंतो, आवलिआ अंगुलपुहुत्तं ॥

वृ- 'अङ्गुल' क्षेत्राधिकारात् प्रमाणाङ्गुलं गृह्यते, अवध्यधिकाराच्च उच्छ्रयाङ्गुलमित्येके, 'आवलिका' असंख्येयसयमसंघातोपलक्षितः कालः, उक्तं च -

"असंखिज्जाणं समयाणं समुदयसमितिसमागमेणं सा एका आवलियत्ति वुच्चति"

अङ्गुलं चावलिका च अङ्गुलावलिके तयोरङ्गुलावलिकयोः, 'भागं' अंशं असंख्येयं पश्यति अवधिज्ञानी, एतदुक्तं भवति-क्षेत्रमङ्गुलासंख्येयभागमात्रं पश्यन् कालतः आवलिकाया असंख्येयमेव भागं पश्यत्यतीतमनागतं चेति, क्षेत्रकालदर्शनं चोपचारेणोच्यते, अन्यथा हि क्षेत्रव्यवस्थितानि दर्शनयोग्यानि द्रव्याणि तत्पर्यायांश्च विवक्षितकालान्तरवर्त्तिनः पश्यति, न तु क्षेत्रकालौ, मूर्त्तद्रव्यालम्बनत्वात्तस्येति। एवं सर्वत्र भावना द्रष्टव्या, क्रिया च गाथाचतुष्टयेऽप्यध्याहार्या, तथा 'द्वयोः' अङ्गुलावलिकयोः संख्येयौ भागौ पश्यति, अङ्गुलसंख्येयभागमात्रं क्षेत्रं पश्यन्नावलिकायाः संख्येयमेव भागं पश्यतीत्यर्थः, तथा अङ्गुलं पश्यन् क्षेत्रतः आवलिकान्तः पश्यति, भिन्नामावलिकामित्यर्थः, तथा कालतः आवलिकां पश्यन् क्षेत्रतोऽङ्गुलपृथक्त्वं पश्यति, पृथक्त्वं हि द्विप्रभृतिरा नवभ्यः इति प्रथमगाथार्थः ॥

नि. (३३) हत्थंमि मुहुत्तंतो, दिवसंतो गाउयंमि बोद्धव्वो।
जोयण दिवसपुहुत्तं, पक्खंतो पन्नवीसाओ ॥

वृ- 'हस्ते' इति हस्तविषयः क्षेत्रतोऽवधिः कालतो मुहूर्त्तान्तः पश्यति, भिन्नं मुहूर्त्तमित्यर्थः, अवध्यवधिमतोरभेदोपचाराद् अवधिः पश्यतीत्युच्यते, तथा कालतो 'दिवसान्तो' भिन्नं दिवसं पश्यन् क्षेत्रतो 'गव्यूतं' इति गव्यूतविषयो बोद्धव्यः, तथा योजनविषयः क्षेत्रतोऽवधिः कालतो दिवसपृथक्त्वं पश्यति, तथा, 'पक्षान्तो' भिन्न पक्षं पश्यन् कालतः क्षेत्रतः पञ्चविंशति योजनानि पश्यतीति द्वितीयगाथार्थः ॥

नि. (३४) भरहंमि अद्धमासो, जंबूदीवंमि साहिओ मासो।
वासं च मनुअलोए, वासपुहुत्तं च रुयगंमि ॥

वृ- 'भरते' इति भरतक्षेत्रविषये अवधौ कालतोऽर्धमास उक्तः, एवं जम्बूद्वीपविषये चावधौ साधिको मासः, वर्ष च मनुष्यलोकविषयेऽवधौ इति, मनुष्यलोकः खल्वर्धतृतीयद्वीपसमुद्रपरिमाणः, वर्षपृथक्त्वं चरुचकाख्यबाह्यद्वीपविषयेऽवधाववगन्तव्यमिति तृतीयगाथार्थः ॥

नि. (३५) संखिज्जंमि उ काले, दीवसमुद्दावि हुंति संखिज्जा।
कालंमि असंखिज्जे, दीवसमुद्दा उ भइयव्वा ॥

वृ- संख्यायत इति संख्येयः, स च संवत्सरलक्षणोऽपि भवति, तुशब्दो विशेषणार्थः, किं विशिनष्टि ? -संख्येयो वर्षसहस्त्रात्परतोऽश्वभिगृह्यते इति, तस्मिन् संख्येये, 'काले' कलनं कालः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्मिन् काले अवधिगोचरे सति क्षेत्रतस्तस्यैवावधेर्गोचरतया, द्वीपाश्च समुद्राश्च द्वीपसमुद्रा अपि भवन्ति संख्येयाः, अपिशब्दान्महानेकोऽपि तदेकदेशोऽपीति, तथा काले असंख्येये पल्योपमादिलक्षणेऽवधिविषये सति, तस्यैव असंख्येयकालपरिच्छेदकस्यावधेः क्षेत्रतः परिच्छेद्यतया द्वीपसमुद्राश्च 'भक्तव्या' विकल्पयितव्याः, कदाचिदसंख्येया एव, यदा इह कस्यचिन्मनुष्यस्य असंख्येयद्वीपसमुद्रविषयोऽवधिरुत्पद्यते इति, कदाचिन्महान्तः संख्येयाः कदाचिद् एकः, कदाचिदेकदेशः स्वयम्भूरमणतिरश्चोऽवधेः विज्ञेयः स्वयम्भूरमणविषय-मनुष्यबाह्यावधेर्वा, योजनापेक्षया च सर्वपक्षेषु असंख्येयमेव क्षेत्रमिति गाथार्थः ॥

एवं तावत् परिस्थूरन्यायमङ्गीकृत्य क्षेत्रवृद्धया कालवृद्धिरनियता कालवृद्धया च क्षेत्रवृद्धिः प्रतिपादिता, साम्प्रतं द्रव्यक्षेत्रकालभावापेक्षया यद्वृद्धौ यस्य वृद्धिर्भवति यस्य वा न भवति अमुमर्थमभिधित्सुराह–

नि. (३६)　काले चउण्ह वुड्ढी, कालो भइयव्वु खित्तवुड्ढीए ।
वुड्ढीइ दव्वपज्जव, भइयव्वा खित्तकाला उ ॥

वृ- 'काले' अवधिज्ञानगोचरे, वर्धमान इति गम्यते, 'चतुर्णां' द्रव्यादीनां वृद्धिर्भवति, सामान्याभिधानात्, कालस्तु 'भक्तव्यः' विकल्पयितव्यः, क्षेत्रस्य वृद्धिः क्षेत्रवृद्धिः तस्यां क्षेत्रवृद्धौ सत्यां, कदाचिद्वर्धते कदाचिन्नेति, कुतः ? क्षेत्रस्य सूक्ष्मत्वात् कालस्य च परिस्थूरत्वा-दिति, द्रव्यपर्यायौ तु वर्धेते, सप्तम्यन्तता चास्य –

"ए होति अयारंते, पयंमि बिइयाए बहुसु पुंलिङ्गे ।
तइयाइसु छट्ठीसत्तमीण एगंमि महिलत्थे ॥"

अस्माल्लक्षणात् सिध्यंति, एवमन्यत्रापि प्राकृतशैल्या इष्टविभक्त्यन्तता पदानामवगन्तव्येति, तथा वृद्धौ च द्रव्यं च पर्यायश्च द्रव्यपर्यायौ तयोः वृद्धौ सत्यां 'भक्तव्यौ' विकल्पनीयौ क्षेत्रकालावेव, तुशब्दस्य एवकारार्थत्वात्, कदाचिदनयोर्वृद्धिर्भवति कदाचिन्नेति, द्रव्यपर्याययोः सकाशात् परिस्थूरत्वात् क्षेत्रकालयोरिति भावार्थः, द्रव्यवृद्धौ तु पर्याया वर्द्धन्त एव, पर्यायवृद्धौ च द्रव्यं भाज्यं, द्रव्यात् पर्यायाणां सूक्ष्मतरत्वात् अक्रमवर्त्तिनामपि च वृद्धिसंभवात् कालवृद्धय-भावो भावनीय इति गाथाथः ॥

अत्र कश्चिदाह–जघन्यमध्यमोत्कृष्टभेदभिन्नयोः अवधिज्ञानसंबन्धिनोः क्षेत्रकालयोः अङ्गुलावलिकाऽसंख्येयभागोपलक्षितयोः परस्परतः प्रदेशसमयसंख्यया परिस्थूरसूक्ष्मत्वे सति कियता भागेन हीनाधिकत्वमिति, अत्रोच्यते, सर्वत्र प्रतियोगिनः खल्वावलिकाऽसंख्येयभागादेः कालाद् असंख्येयगुणं क्षेत्रं, कुत एतत् ?, अत आह–

नि. (३७)　सुहुमो य होइ कालो, तत्तो सुहुमयरं हवइ खित्तं ।
अङ्गुलसेढीमित्ते, ओसप्पिणीओ असंखेज्जा ॥

वृ- 'सूक्ष्मः' श्लक्ष्णश्च, भवति कालः, यस्माद् उत्पलपत्रशतभेदे समयाः प्रतिपत्रमसंख्येयाः प्रतिपादिताः, तथापि 'ततः' कालात्, सूक्ष्मतरं भवति क्षेत्रं, कुतः ?, यस्मात् अङ्गुलश्रेणिमात्रे क्षेत्रे प्रदेशपरिमाणं प्रतिप्रदेशं समयगणनया अवसर्पिण्यः असंख्येयाः, तीर्थकृद्भिः प्रतिपादिताः, एतदुक्तं भवति–अङ्गुलश्रेणिमात्रे क्षेत्रे प्रदेशाग्रं असंख्येयावसर्पिणीसमयराशिपरिमाणमिति

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

गाथार्थः ॥ उक्तमवधेर्जन्यादिभेदभिन्नं क्षेत्रपरिमाणं, क्षेत्रं चावधिगोचरद्रव्याधारद्वारेणैवावधेरिति व्यपदिश्यते, अतः क्षेत्रस्य द्रव्यावधिकत्वात् तदभिधनानन्तरमेव अवधिपरिच्छेदयोग्यद्रव्याभिधित्सयाऽऽह–

नि. (३८) तेआभासादव्वाण, अंतरा इत्थ लहइ पट्ठवओ ।
गुरुलहुअअगुरुलअं, तंपि अ तेनेव निट्ठाइ ॥

वृ- अवधिश्च जघन्यमध्यमोत्कृष्टभेदभिन्नः, तत्र तावज्जधन्यावधिपरिच्छेदयोग्यमेवादावभिधीयते-तैजसं च भाषा च तैजसभाषे तयोर्द्रव्याणि तैजसभाषाद्रव्याणि तेषामिति समासः, 'अन्तरात्' इति 'अर्थाद्विभक्तिपरिणामः' अन्तरे, अथवा 'अन्तरे' इति पाठान्तरमेव, एतदुक्तं भवति–तैजसवाग्द्रव्याणामन्तर इत्यन्तराले अत्र तदयोग्यमन्यदेव द्रव्यं 'लभते' पश्यति, कोऽसावित्यत आह–'प्रस्थापकः' प्रस्थापको नाम अवधिज्ञानप्रारम्भकः, किंविशिष्टं तदिति, अत आह–'गुरुलध्वगुरुलघु' गुरु च लघु च गुरुलघु तथा न गुरुलघु अगुरुलघु, एतदुक्तं भवति–गुरुलघुपर्यायोपेतं गुरुलघु अगुरुलघुपर्यायोपेतं चागुरुलघु इति । तत्र यत्तैजसद्रव्यासन्नं तद्गुरुलघु, यत्पुनर्भाषाद्रव्यासन्नं तदगुरुलघु, 'तदपि च' अवधिज्ञानं प्रच्यवमानं सत्पुनः तेनैव द्रव्येणोपलब्धेन सता निष्ठां याति, प्रच्यवतीत्यर्थः । तत्र अपिशब्दात् यत्प्रतिपाति तत्रायं क्रमो, न पुनरवधिज्ञानं प्रतिपात्येव भवतीत्यर्थः, चशब्दस्त्वेवकारार्थः, स चावधारणे, तस्य चैवं प्रयोगः-तदेवावधिज्ञानमेवं प्रच्यवते, न शेषज्ञानानीति गाथार्थः ॥

आह–कियत्प्रदेशं तद् द्रव्यं, यत् तैजस-भाषाद्रव्याणामपान्तरालवर्त्ति जघन्यावधिप्रमेयमित्याशङ्क्य तद्धि परमाण्वादिक्रमोपचयाद् औदारिकादिवर्गणानुक्रमतः प्रतिपाद्यमिति, अतस्तत्स्वरूपाभिधित्सया गाथाद्वयमाह–

नि. (३९) ओरालविउव्वाहारतेअभासाणपानमनकम्मे ।
अह दव्ववग्गणाणं, कमो विवज्रासओ खित्ते ॥

वृ- आह-औदारिकादिशरीरप्रायोग्यद्रव्यवर्गणाः किमर्थं प्ररूप्यन्ते इति, उच्यते, विनेयानामव्यामोहार्थं, तथा चोदाहरणमत्र-इह भरतक्षेत्रे मगधाजनपदे प्रभूतगोमण्डलस्वामी कुचिकर्णो नाम धनपतिरभूत्, स च तासां गवमतिबाहुल्यात् सहस्त्रादिसंख्यामितानां पृथक् पृथगनुपालनार्थं प्रभूतान् गोपांश्चके, तेऽपि च परस्परसंमिलितासु तासु गोष्वात्मीयाः सम्यगजानानाः सन्तोऽकलहयन्, तांश्च परस्परतो विवदमानानुपलभ्य असौ तेषामव्यामोहार्थं अधिकरणव्यवच्छित्तये च रक्तशुक्लकृष्णकर्बुरादिभेदभिन्नानां गवां प्रतिगोपं विभिन्ना वर्गणाः खल्ववस्थापितवान् इत्येष द्दष्टान्तः, अयमर्थोपनयः–इह गोपपतिकल्पस्तीर्थकृत् गोपकल्पेभ्यः शिष्येभ्यो गोरूपसद्दशं पुद्गलास्तिकायं परमाण्वाविर्गणावि-भागेन निरूपितवानिति अलं प्रसङ्गन, पदार्थः प्रतिपाद्यते–तत्र औदारिकग्रहणाद् औदारिकशरीरग्रहणयोग्या वर्गणाः परिगृहीताः, ताश्चैवमवगन्तव्याः- इह वर्गणाः सामान्यतश्चतुर्विधा भवन्ति, तद्यथा-

द्रव्यतः क्षेत्रतः कालतः भावतश्च, तत्र द्रव्यत एकप्रदेशिकानां यावदनन्तप्रदेशिकानां, क्षेत्रत एकप्रदेशावगाढानां यावदसंख्येयप्रदेशावगाढानां, कालत एकसमयस्थितीनां यावदसंख्येयसमयस्थितीनां, भावतस्तावत् परिस्थूरन्यायमङ्गीकृत्य कृष्णानां यावत् शुक्लानां सुरभिगन्धानां

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

दुरभिगन्धानां चर, तिक्तरसानां यावन्मधुररसानां ५, मृदूनां यावद्रूक्षाणां ८ गुरुलधूनामगुरुलधूनां च, एवमेता द्रव्यवर्गणाद्या वर्गणाश्चतुर्विधा भवन्ति, प्रकृतोपयोगः प्रदर्श्यते-तत्र परमाणूनामेका वर्गणा, एवं द्विप्रदेशिकानामप्येका, एवमेकैकपरमाणुवृद्ध्या संख्येयप्रदेशिकानां संख्येया वर्गणा असंख्येयप्रदेशिकानां चासंख्येयाः ततोऽनन्त प्रदेशिकानां अनन्ताः खल्वग्रहणयोग्या विलङ्घ्य ततश्च विशिष्टपरिणामयुक्ता औदारिकशरीरग्रहणयोग्याः खल्वनन्ता एवेति, ता अपि चोल्लङ्घ्य प्रदेशवृद्ध्या प्रवर्धमानास्ततस्तस्यैवाग्रहणयोग्या अनन्ता इति, ताश्च प्रभूतद्रव्यनिर्वृत्तत्वात् सूक्ष्मपरिणामोपेतत्वाच्च औदारिकस्याग्रहणयोग्या इति, वैक्रियस्यापि चाल्पपरमाणुनिर्वृत्तत्वाद् बादरपरिणामयुक्तत्वाच्चा-ग्रहणयोग्या एव ता इति, पुनः प्रदेशवृद्धया प्रवर्धमानाः खल्वनन्ता एवोल्लङ्घ्य तथापरिणामयुक्ता वैक्रियग्रहणयोग्या भवन्ति, ता अपिच प्रदेशवृद्ध्या प्रवर्धमाना अनन्ता एवेति तावद् यावद् एकादिप्रचुरपरमाणुनिर्वृत्तत्वात् सूक्ष्मपरिणाम-युक्तत्वाच्च वैक्रियस्याग्रहणयोग्या भवन्ति, एवं प्रदेशवृद्ध्या प्रवर्धमानाः खल्वग्रहणयोग्या अप्यनन्ता एवेति, ताश्चाहारकस्य अल्पपरमाणुनिर्वृत्तत्वाद् बादरपरिणामोपेतत्वाच्च अग्रहणयोग्या एवेति, एवमाहारकस्य तैजसस्य भाषायाः आनापानयोर्मनसः कर्मणश्च अयोग्ययोग्यायोग्यानां वर्गणानां प्रदेशवृद्ध्युपेतानामनन्तानां त्रयं त्रयमायोजनीयं ।

आह-कथं पुनरिदं एकैकस्यौदारिकादेस्त्रयं त्रयं गम्यत इति, उच्यते, तैजसभाषाद्रव्यान्तर-वर्त्युभयायोग्यद्रव्यावधिगोचराभिधानात् । 'अथ' अयं द्रव्यवर्गणानां क्रमः, तत्र वर्गणा वर्गो राशिरिति पर्यायाः, तथा विपर्यासेन 'क्षेत्रे' इति क्षेत्रविषयो वर्गणाक्रमो वेदितव्यः, एतदुक्तं भवति-एकप्रदेशवगाहिनां परमाणूनां स्कन्धानां चैका वर्गणा, तथा द्विप्रदेशावगाहिनां स्कन्धानामेव द्वितीया वर्गणा, एवमेकैकप्रदेशवृद्ध्या संख्येयप्रदेशावगाहिनां संख्येयां असंख्येय-प्रदेशावगाहिनां चासंख्येयाः, ताश्च प्रदेशप्रदेशोत्तराः खल्वसंख्येया विलङ्घ्य कर्मणो योग्याना-मसंख्येया वर्गणा भवन्ति, पुनः प्रदेशवृद्ध्या तस्यैवायोग्यानां असंख्येया इति, अयोग्यत्वं चाल्पपरमाणुनिर्वृत्तत्वात् प्रभूतप्रदेशावगाहित्वाच्च, मनोद्रव्यादीनामप्येवमेवायोग्ययोग्यायोग्य-लक्षणं त्रयं त्रयमायोजनीयमिति । एवं सर्वत्र भावना कार्या, 'परं परं सूक्ष्मं' 'प्रदेशतोऽसंख्येयगुणं' इति वचनात्, कालतो भावतश्च वर्गणा दिग्मात्रतो दर्शिता एवेति गाथार्थः ॥

नि. (४०) कम्मोवरिं धुवेयरसुण्णेयरवग्गणा अनंताओ ।
चउधुवनंतरतनुवग्गणा य मीसो तहाऽचित्तो ॥

वृ- तत्रानन्तरगाथायां कर्मद्रव्यवर्गणाः प्रतिपादिताः, साम्प्रतं प्रदेशोत्तरवृद्ध्या तदग्रहण-प्रायोग्याः प्रदेर्श्यन्ते-क्रियत इति कर्म, कर्मण उपरि कर्मोपरि, ध्रुवेति-ध्रुववर्गणा अनन्ता भवन्ति, ध्रुववर्गणा इति ध्रुवा नित्याः सर्वकालावस्थायिन्य इति भावार्थः, 'इतरा' इति प्रदेशवृद्ध्या ततोऽनन्ता एवाध्रुववगणा अनन्ता, 'अध्रुवा' इति अशाश्वत्यः, कदाचिन्न सन्त्यपीत्यर्थः, ततः 'शून्या' इति सूचनात्सूत्रमितिकृत्वा शून्यान्तरवर्गणाः परिगृह्यन्ते, शून्यान्यन्तराणि यासां ताः शून्यान्तराः शून्यान्तराश्च ता वर्गणाश्चेति समासः, एतदुक्तं भवति-एकोत्तरवृद्ध्या व्यवहितान्तरा इति, ता अपि चानन्ता एव, तथा 'इतरेति' इतरग्रहणादशून्यान्तराः परिगृह्यन्ते, न शून्यानि अन्तराणि यासां ता अशून्यान्तराः, अशून्यान्तराश्च ता वर्गणाश्चेति विग्रहः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अशून्यान्तरवर्गणा अव्यवहितान्तरा इत्यर्थः, ता अपि च प्रदेशोत्तरवृद्ध्या खल्वनन्ता एव भवन्ति, ततः 'चतुरिति' चतस्रः ध्रुवाश्वता अनन्तराश्च ध्रुवानन्तराः प्रदेशोत्तरा एव वर्गणा भवन्ति, ततः 'तनुवर्गणाश्च' तनुवर्गणा इति, किमुक्तं भवति !-भेदाभेदपरिणामाभ्यमौदारिकादियोग्यताऽभिमुखा इति, अथवा मिश्राचित्तस्कन्धद्वययोग्यास्ताश्चतस्र एव भवन्ति, ततो 'मिश्र' इति मिश्रस्कन्धो भवति, सूक्ष्म एवेषद्बादरपरणामाभिमुखो मिश्रः, 'तथा' इति आनन्तर्ये 'अचित्त' इति अचित्तमहास्कन्धः, स च विश्रसापरिणामविशेषात् केवलिसमुद्घातगत्या लोकमापूरयन्नुपसंहरंश्च भवतीति । आह-अचित्तत्वाव्यभिचारात्तस्याचित्तविशेषणानर्थक्यमिति, न, केवलिसमुद्घातसचित्तकर्मपुद्गललोककव्यापिमहास्कन्धव्यवच्छेदपरत्वात् विशेषणस्येति, अयमेव सर्वोत्कृष्टप्रदेश इति केचिद् व्याचक्षते, न चैतदुपपत्तिक्षमं, यस्मादुत्कृष्टप्रदेशोऽवगाहनास्थितिभ्यां असंख्येयभागहीनादिभेदाद् चतुः स्थानपतित उक्तः, तथा चोक्तं- "उक्कोसपएसिआणं भंते ! केवइआ पज्जवा पण्णत्ता ?, गोयमा अनन्ता, से केणट्ठेणं भंते ! एवं वुच्चइ ?, गोयमा ! उक्कोसपएसिए उक्कोसपएसिअस्स दव्वट्ठयाए तुल्ले, पएसट्ठयाएवि तुल्ले, ओगाहणट्ठयाए चउट्ठाणवडिए, ठितीएवि ४, वण्णरसगन्ध अट्ठहि अ फासेहि छट्ठाणवडिए" । अयं पुनस्तुल्य एव, अष्टस्पर्शश्चासौ पठ्यते, चतुःस्पर्शश्च अयमिति, अतोऽन्येऽपि सन्तीति प्रतिपत्तव्यं, इत्यलं प्रसङ्गेनेति गाथार्थः ॥

प्राक् 'तैजसभाषाद्रव्याणामन्तराले गुरुलघ्वगुरुलघु च जघन्यावधिप्रमेयं द्रव्यं' इत्युक्तं, नौदारिकादिद्रव्याणि, साम्प्रतमौदारिकादीनां द्रव्याणां यानि गुरुलघूनि यानि चागुरुलघूनि तानि दर्शयन्नाह-

नि. (४१) ओरालिअवेउव्विअआहारगतेअ गुरुलहू दव्वा ।
कम्मगमनभासाई, एआइ अगुरुलहुआइं ॥

वृ- पदार्थस्तु औदारिकवैक्रियाहारकतैजसद्रव्याणि गुरुलघूनि, तथ कार्मणमनोभाषादिद्रव्याणि च अगुरुलघूनि निश्चयनयापेक्षयेति गाथार्थः ॥ वक्ष्यमाणगाथाद्वयसंबन्धः-पूर्वे क्षेत्रकालयोरवधिज्ञानसंबन्धिनोः केवलयोः अङ्गुलावलिकाऽसंख्येयादिविभागकल्पनया परस्परोपनिबन्ध उक्तः, साम्प्रतं तयोरेवोक्तलक्षणेन द्रव्येण सह परस्परोपनिबन्धमुपदर्शयन्नाह-

नि. (४२) संखिज्ज मनोदव्वे, भागो लोगपलियस्स बोद्धव्वो ।
संखिज्ज कम्मदव्वे, लोए थोवूणगं पलियं ॥

वृ- संख्यायत इति संख्येयः, मनसः संबन्धि योग्यं वा द्रव्यं मनोद्रव्यं तस्मिन् मनोद्रव्ये इति मनोद्रव्यपरिच्छेदके अवधौ, क्षेत्रतः संख्येयो लोकभागः, कालतोऽपि संख्येय एव, 'पलियस्स' पल्योपमस्य 'बोद्धव्वो' विज्ञेयः, प्रमेयत्वेनेति, एतदुक्तं भवति-अवधिज्ञानी मनोद्रव्यं पश्यन् क्षेत्रतो लोकस्य संख्येयभागं कालतश्च पल्योपमस्य जानीते इति, तथा संख्येया लोकपल्योपमभागाः 'कर्मद्रव्ये' इति कर्मद्रव्यपरिच्छेदकेऽवधौ प्रमेयत्वेन बोद्धव्या इति वर्त्तते, अयं भावार्थः - कर्मद्रव्यं पश्यन् लोकपल्योपमयोः पृथक् पृथक् संख्येयान् भागान् जानीते, 'लोके' इति चतुदर्शशरज्ज्वात्मकलोकविषयोऽवधौ क्षेत्रतः कालतः स्तोकन्यूनं पल्योपमं प्रमेयत्वेन बोद्धव्यं इति वर्त्तते, इदमत्र हृदयं-समस्तं लोकं पश्यन् क्षेत्रतः कालतः देशोनं पल्योपमं पश्यति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्योपनिबन्धनक्षेत्रकालाधिकारे प्रक्रान्ते केवलयोर्लोकपल्योपमक्षेत्रकाल्योर्ग्रहणं अनर्थकमिति चेत्, न इहापि सामर्थ्यप्रापितत्वाद् द्रव्योपनिबन्धनस्य, अत एव च तदुपर्यपि ध्रुववर्गणादि द्रव्यं पश्यतः क्षेत्रकालवृद्धिरनुमेयेति गाथार्थः ॥

नि. (४३) तेयाकम्मसरीरे, तेआदव्वे अ भासदव्वे अ ।
बोद्धव्वमसंखिज्जा, दीवसमुद्दा य कालो अ ॥

वृ- तेजोमयं तैजसं, शरीरशब्दः प्रत्येकमभिसंबध्यते, 'तैजसशरीरे'' तैजसशरीरविषयेश्चवधौ क्षेत्रतोऽसंख्येया द्वीपसमुद्राः प्रमेयत्वेन बोद्धव्या इति, कालश्च असंख्येय एव, मिथ्यादर्शनादिभिः क्रियत इति कर्म –ज्ञानावरणीयादि तेन निर्वृत्तं तन्मयं वा कार्मणं, शीर्यते इति शरीर, कार्मणं च तच्छरीरं चेति विग्रहः तस्मिन्नपि तैजसवद्वक्तव्यं, एवं तैजसद्रव्यविषये चावधौ भाषद्रव्यविषये च क्षेत्रतो 'बोद्धव्या' विज्ञेयाः, संख्यायन्त इति संख्येया न संख्येया असंख्येयाः, द्वीपाश्च समुद्राश्चद्वीपसमुद्राः, प्रमेयत्वेनेति, कालश्चासंख्येय एव, स च पल्योपमासंख्येय भागसमुदायमानो विज्ञेय इति, अत्र चासंख्येयत्वे सत्यपि यथायोगं द्वीपाद्यल्पबहुत्वं सूक्ष्मेतरद्रव्यद्वारेण विज्ञेयमिति। आह–एवं सति 'तेयाभासादव्वाण अंतरा एत्थ लहइ पट्ठवओ' इत्याद्युक्तं तस्य च तैजसभाषान्तरालद्रव्यदर्शिनोऽप्यङ्गुलावलिकाऽसंख्येयभागादि क्षेत्रकालप्रमाणमुक्तं तद्विरुध्यते, तैजसभाषाद्रव्ययोरसंख्येयक्षेत्रकालाभिधानात्, न, प्रारम्भकस्योभयायोग्यद्रव्यग्रहणात्, द्रव्याणां च विचित्रपरिणामत्वाद् यथोक्तं क्षेत्रकालप्रमाणमविरुद्धमेव, अल्पद्रव्याणि वाऽधिकृत्य तदुक्तं, प्रचुरतैजसभाषाद्रव्याणि पुनरङ्गीकृत्येदं, अलं विस्तरेणेति गाथार्थः ॥

आह–जघन्यावधिप्रमेयं प्रतिपादयता गुरुलघु अगुरुलघु वा द्रव्यं पश्यतीत्युक्तं, न सर्वमेव, विमध्यमावधिप्रमेयमपि चाङ्गुलावलिकासंख्येयभागाद्यभिधानात् न सर्वद्रव्यरूपं, तत्रस्थानामेव दर्शनात्, अत उत्कृष्टावधेरपि किमसर्वद्रव्यरूपमेवालम्बनं आहोस्विन्नेति, इत्यत्रोच्यते–

नि. (४४) एगपएसोगाढं परमोही लहइ कम्मगसरीरं ।
लहइ य अगुरुयलघुअं, तेयसरीरे भवपुहुत्तं ॥

वृ- प्रकृष्टो देशः प्रदेशः एकश्चासौ प्रदेशश्चैकप्रदेशः तस्मिन् अवगाढं, अवगाढमिति व्यवस्थितं एकप्रदेशावगाढं परमाणुचणुकादि द्रव्यं, परमश्चासाववधिश्च परमावधिः उत्कृष्टावधिरित्यर्थः, 'लभते' पश्यति, अवध्यवधिमतोरभेदोपचारादवधिः पश्यतीत्युक्तं, तथा कार्मणशरीरं च लभते, आह–परमाणुचणुकादि द्रव्यमनुक्तं कथं गम्यते तदालम्बनत्वेनेति, ततश्चोपात्तमेव कार्मणमिदं भविष्यति, न, तस्यैकप्रदेशावगाहित्वानुपपत्तेः, 'लभते चागुरुलघु' चशब्दात् गुरुलघु, जात्यपेक्ष चैकवचनं, अन्यथा हि सर्वाणि सर्वप्रदेशावगाढानि द्रव्याणि पश्यतीत्युक्तं भवति, तथा तैजसशरीरद्रव्यविषये अवधौ कालतो भवपृथक्त्वं परिच्छेद्यतयाऽवगन्तव्यमिति, एतदुक्तं भवति–यस्तैजसशरीरं पश्यति स कालतो भवपृथक्त्वं पश्यति इति, इह च य एव हि प्राक् तैजसं पश्यतः असंख्येयः काल उक्तः, स एव भवपृथक्त्वेन विशेष्यत इति । आह–नन्वेकप्रदेशावगाढस्यातिसूक्ष्मत्वात् तस्य च परिच्छेद्यतयाऽभिहितत्वात् कार्मणशरीरादीनामपि दर्शनं गम्यत एवेत्यतः तदुपन्यासवैयर्थ्यं, तथैकप्रदेशावगाढमित्यपि न वक्तव्यं, 'रूवगयं लभइ सव्वं'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यस्य वक्ष्यमाणत्वादिति, अत्रोच्यते, न सूक्ष्मं पश्यतीति नियमतो बादरमपि द्रष्टव्यं, बादरं वा पश्यता सूक्ष्ममिति, यस्मादुत्पत्तौ अगुरुलघु पश्यन्नपि न गुरुलघु उपलभते, घटादि वा अतिस्थूरमपि, तथ मनोद्रव्यविदस्तेष्वेव दर्शनं नान्येष्वंतिस्थूरेष्वपि, एवं विज्ञानविषय-वैचित्र्यसंभवे सति संशयापनोदार्थमेकप्रदेशावगाहिग्रहणे सत्यपि शेषविशेषोपदर्शनमदोषायैवेति। अथवा एकप्रदेशावगाहिग्रहणात् परमाण्वादिग्रहणं कार्मणं यावत्, तदुत्तरेषां चागुरुलघ्व-भिधानात्, चशब्दात् गुरुलघुनां चौदारिकादीनामित्येवं सर्वपुद्गलविशेषविषयत्वमाविष्कृतं भवति, तथा चास्यैव नियमार्थं 'रूपगतं लभते सर्वं' इत्येतद् वक्ष्यमाणलक्षणमदुष्टमेवेति, एतदेव हि सर्वं रूपगतं, नान्यद् इति, अलं प्रसङ्गेनेति गाथार्थः ॥ एवं परमावधेर्द्रव्यमङ्गीकृत्य विषय उक्तः, साम्प्रतं क्षेत्रकालावधिकृत्योपदर्शयन्नाह–

नि. (४५) परमोहि असंखिज्ञा, लोगमित्ता समा असंखिज्ञा ।
रूवगयं लहइ सव्वं, खित्तोवमिअं अगनिजीवा ॥

वृ- परमश्चासाववधिश्च परमावधिः, अवध्यवध्मितोरभेदोपचाराद् असौ परमावधिः क्षेत्रतः 'असंख्येयानि लोकमात्राणि, खण्डानीति गम्यते, लभत इति संबन्धः, कालतस्तु 'समाः' उत्सर्पिण्यवसर्पिणीरसंख्येया एव लभते, तथा द्रव्यतो 'रूपगतं' मूर्त्तद्रव्यजातमित्यर्थः, 'लभते' पश्यति 'सर्वं' परमाण्वादिभेदभिन्नं पुद्गलास्तिकायमेवेति, भावतस्तु वक्ष्यमाणाँस्तत्पर्यायान् इति । यदुक्तं 'असंख्येयानि लोकमात्राणि खण्डानि परमावधिः पश्यतीति तत्क्षेत्रनियमना याह–उपमानं उपमितं, भावे निष्ठाप्रत्ययः, क्षेत्रस्योपमितं क्षेत्रोपमितं, एतदुक्तं भवति-उत्कृष्टावधिक्षेत्रोपमानं, 'अग्निजीवाः' प्रागभिहिता एवेति, आह–'रूपगतं लभते सर्वं' इत्येतदनन्तरगाथायामर्थतोऽभिहितत्वात् किमर्थं पुनरुक्तमिति, अत्रोच्यते, उक्तः परिहारः, अथवा अनन्तरगाथायां 'एकप्रदेशावगाढं' इत्यादि परमावधेर्दव्यपरिमाणमुक्तं, इह तु 'रूपगतं लभते सर्वं' इति क्षेत्रकालद्वयविशेषणं, एतदुक्तं भवति–रूपिद्रव्यानुगतं लोकमात्रासंख्येय-खण्डोत्सर्पिण्यवसर्पिणी-लक्षणं क्षेत्रकालद्वयं लभते, न केवलं, अरूपित्वात्तस्य, रूपिद्रव्यनिबन्ध-नत्वाद्यावधिज्ञानस्येति गाथार्थः ॥ एवं तावत् पुरुषानधिकृत्य क्षायोपशमिकः खलु अनेक-प्रकारोऽवधिरुक्तः, साम्प्रतं तिरश्चोऽधिकृत्य प्रतिपिपादयिषुराह–

नि. (४६) आहारतेयलंभो, उक्कोसेणं तिरिक्खजोणीसु ।
गाउय जहन्नमोही, नरएसु उ जोयणुक्कोसो ॥

वृ- तत्राहारतेजोग्रहणाद् औदारिकवैक्रियाहारकतेजोद्रव्याणि गृह्यन्ते, ततश्चाहाराश्च तेजश्च आहारतेजसी तयोर्लभ इति समासः, लाभः प्राप्तिः परिच्छित्तिरित्यनर्थान्तरं, इदमत्र हृदयं - तिर्यग्योनिषु योनियोनिमतामभेदोपचारात् तिर्यग्योनिकसत्त्वविषयो योऽवधिः तस्य द्रव्यतः खलु आहारतेजोद्रव्यपरिच्छेद उत्कृष्टत उक्तः, इत्थं द्रव्यानुसारेणैव क्षेत्रकालभावाः परच्छेद्यतया विज्ञेया इति । इदानीं भवप्रत्ययावधिस्वरूपमुच्यते, स च सुरनारकाणामेव भवति, तत्र प्रथममल्प इतिकृत्वा नारकाणां प्रतिपाद्यत इति, अत आह–क्षेत्रतो 'गव्यूतं' परिच्छिनत्ति जघन्येनावधिः, क्व? नरान् कायन्तीति नरकाः, कै गै रै शब्दे इतिधातुपाठात् नरान् शब्दयन्तीत्यर्थः, इह च नरका आश्रयाः, आश्रयाश्रयिणोरभेदोपचारात्, नरकेषु तु योजनमुत्कृष्ट इत्याह, एतदुक्तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवति–नारकाधारो योऽवधिः असौ उत्कृष्टो योजनं परिच्छिनत्ति क्षेत्रतः, इत्थं क्षेत्रानुसारेण द्रव्यादयस्तु अवसेया इति गाथार्थः ॥ एवं नारकजातिमधिकृत्य जघन्येतरभेदोऽवधिः प्रतिपादितः, साम्प्रतं रत्नप्रभादिपृथिव्यपेक्षया उत्कृष्टेतरभेदमभिधित्सुराह–

नि. (४७) चत्तारि गाउयाइं, अद्धुट्ठाइं तिगाउया चेव ।
अड्ढाइज्ञा दुन्नि य, दिवड्ढमेगं च निरएसु ॥

वृ- तत्र नरका इति नारकालयाः, ते च सप्तपृथिव्याधारत्वेन सप्तधा भिद्यन्ते, तत्र रत्नप्रभाद्याधारनरकेषु यथासंख्यमुत्कृष्टेतरभेदभिन्नावधेः क्षेत्रपरिमाणमिदं–'नरकेषु' इति सामर्थ्यात् तन्निवासिनो नारकाः परिगृह्यन्ते, तत्र रत्नप्रभाधारनरके उत्कृष्टावधिक्षेत्रं चत्वारि गव्यूतानि, जघन्यावधेरर्धचतुर्थनि, अर्धं चतुर्थस्य येषु तान्यर्धचतुर्थानि, एवं शर्कराप्रभाधारनरके परमावधिक्षेत्रमानं अर्धचतुर्थानि, इतरावधिक्षेत्रमानं तु त्रिगव्यूतं, त्रीणि गव्यूतानि त्रिगव्यूतं, एवं सर्वत्र योज्यं यावन्महातमः प्रभाधारनरके उत्कृष्टावधिक्षेत्रं गव्यूतं, जघन्यावधिक्षेत्रं चार्धगव्यूतमिति, रत्नप्रभाधारनरक इत्यादौ जात्यपेक्षमेकवचनं, अनिर्दिष्टस्यापि नवरं पदार्थ-गमनिका, अर्धं तृतीयस्य अर्धतृतीयानि, द्वे च, अधिकमर्ध यस्मिन् तद् अध्यर्धम् । आह–कुतः पुनरिदं ?, सामान्येन प्रतिपृथिव्याधारनरकं उत्कृष्टमवधिक्षेत्रमुक्तं 'चत्वारि गव्यूतानि' इत्यादि, अर्धगव्यूतोनं जघन्यमित्यवसीयते ? उच्यते, "रयणप्पभापुढविनेरइयाणं भंते ! केवइयं खित्तं ओहिणा जाणति पासंति ? गोयमा ! जहन्नेणं अद्धुट्ठाइं गाउयाइं उक्कोसेणं चत्तारि, एवं जाव महातमपुढविनेरइयाणं ? जहन्नेणं अद्धगाउयं उक्कोसेणं गाउयं", आह–यद्येवं 'गाऊ जहन्नमोही नरएसु तु' इत्येतद्याहन्यते, अत्रोच्यते, उत्कृष्टजघन्यापेक्षया तदभिधानाददोषः, इदमत्र हृदयम्-उत्कृष्टानामेव सप्तानामपि रत्नप्रभाद्यवधीनां गव्यूतक्षेत्रपरिच्छित्तिकृत् अवधिर्जघन्य इत्यलं प्रसङ्गेनेति गाथार्थः ॥ एवं नारकसंबन्धिनो भवप्रत्ययावधेः स्वरूपमभिधायेदानीं विबुधसंबन्धिनः प्रतिपिपादयिषुरिदं गाथा त्रयं जगाद–

नि. (४८) सक्कीसाणा पढमं, दुच्चं च सणंकुमारमाहिंदा ।
तच्चं च बंभलंतग, सुक्कसहसारय चउत्थीं ॥

वृ- शक्रश्चेशानश्च शक्रशानौ तत्र 'शक्रेशानाविति' शक्रेशानोपलक्षिताः सौधर्मेशानकल्प-निवासिनो देवाः सामानिकादयः परिगृह्यन्ते, ते ह्यवधिना प्रथमां रत्नप्रभाभिधानां पृथिवीं 'पश्यन्ति' इति क्रियां द्वितीयगाथायां वक्ष्यति, तथा 'द्वितीयां च' पृथिवीमित्यनुवर्त्तते, 'सनत्कुमारमाहेन्द्राविति' सनत्कुमारमाहेन्द्रदेवाधिपोपलक्षिताः तत्कल्पनिवासिनस्त्रिदशा एव सामानिकादयो गृह्यन्ते,ते हि द्वितीयां पृथिवीमवधिना पश्यन्ति, तथा तृतीयां च पृथिवीं ब्रह्म-लोकलान्तकदेवेशोपलक्षिताः तत्कल्पनिवासिनो विबुधाः सामानिकादयः पश्यन्ति, तथा शुक्रसहस्रा-रसुरनाथोपलक्षिताः खल्पवन्येऽपि तत्कल्पनिवासिनो देवाश्चतुर्थी पृथिवीं पश्यन्तीति गाथार्थः।

नि. (४९) आनयपानयकप्पो, देवा पासंति पंचमिं पुढवीं ।
तं चेव आरणच्चुय ओहीनाणेण पासंति ॥

वृ- आनतप्राणतयोः कल्पयोः संबन्धिनो देवाः पश्यन्ति पञ्चमीं पृथ्वीं, तामेव आरणाच्युतयोः सम्बन्धिनो देवा अवधिज्ञानेन पश्यन्ति, स्वरूपकथनमेवेदं, विमलतरा बहुतरां चेति गाथार्थः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (५०) छट्ठिं हिट्ठिममज्झिमगेविज्जा सत्तमिं च उवरिल्ला ।
संभिन्नलोगनालिं, पासंति अनुत्तरा देवा ॥

वृ- लोकपुरुषग्रीवास्थाने भवाानि ग्रैवेयकानि विमानानि, तत्र अधस्त्यमध्य-मग्रैवेयक-निवासिनो देवा अधस्त्यमध्यमग्रैवेयकाः, ते हि षष्ठीं पृथिवीं तमोऽभिधानामवधिना पश्यन्तीति योगः, तथा सप्तमी च पृथिवीमुपरितनग्रैवयकनिवासिन इति, तथा 'संभिन्नलोकनाडीं' चतुर्दशरज्ज्वात्मिकां कन्यकाचोलकसंस्थानामवधिना पश्यन्ति, अनुत्तरविमानवासिनोऽनुत्तराः, तत्र एकेन्द्रियादयोऽपि भवन्ति तद्व्यवच्छेदार्थमाह-'देवाः' । एवं क्षेत्रानुसारतो द्रव्याद-योऽप्यवसेयाः इति गाथार्थः ॥

एवमधो वैमानिकावधिक्षेत्रप्रमाणं प्रतिपाद्य साम्प्रतं तिर्यगूर्ध्वं च तदेव दर्शयन्नाह-

नि. (५१) एएसिमसंखिज्जा, तिरियं दीवा य सागरा चेव ।
बहुअरं उवरिमगा, उड्ढं सगकप्पथूभाई ॥

वृ- 'एतेषां' शक्रादीना, संख्यायन्त इति संख्येयाः न संख्येया असंख्येयाः, तिर्यग्, द्वीपाश्च-जम्बूद्वीपादयः, सागराश्च लवणसागरादयः क्षेत्रतोऽवधिपरिच्छेद्यतया अवसेयाः इति वाक्यशेषः, तथा उक्तलक्षणात्-असंख्येयद्वीपोदधिमानात् क्षेत्रात् बहुतरं, उपरिमा एव उपरिमका उपर्युपरिवासिनो देवाः, खल्ववधिना क्षेत्रं पश्यन्तीति वाक्यशेषः, तथा ऊर्ध्वं स्वकल्पस्तूपाद्येव यावत् क्षेत्रं पश्यन्ति, आदिशब्दाद् ध्वजादिपरिग्रहः इति गाथार्थः ॥ इत्थं वैमानिकानां अवधिक्षेत्रमानमभिधाय इदानीं सामान्यतो देवानां प्रतिपादयन्नाह-

नि. (५२) संखेज्जजोयणा खलु, देवाणं अद्धसागरे ऊने ।
तेन परमसंखेज्जा, जहन्नयं पंचवीसं तु ॥

वृ- संख्येयानि च तानि योजनानि चेति विग्रहः, खलुशब्दस्त्वेवकारार्थः, स चावधारणे, अस्य चोभयथा संबन्धमुपदर्शयिष्यामः 'देवानां' 'अर्धसागरे' इति अर्धसागरोपमे न्यूने आयुषि सति संख्येययोजनान्येव अवधिक्षेत्रमिति । अर्धसारोपमन्यून एव आयुष सति, 'ततः परं' अर्धसागरोपमादावायुषि सति असंख्येयानि योजनानि अवधिक्षेत्रं वैमानिकवर्जदेवानां सामान्यत इति । विशेषतस्तु ऊर्ध्वमधस्तिर्यक् च संस्थानविशेषादवसेयमिति । तथा जघन्यकमवधिक्षेत्रं देवानामिति वर्त्तते, 'पञ्चविंशतिः' तुशब्दस्यैवकारार्थत्वात् पञ्चविंशतिरेव योजनानि, एतच्च दशवर्षसहस्रस्थितीनामवसेयं, भवनपतिव्यन्तराणामिति, ज्योतिष्काणां त्वसंख्येयस्थितित्वात् संख्येययोजनान्येव जघन्येतरभेदमवधिक्षेत्रमवसेयमिति, वैमानिकानां तु जघन्यमङ्गुला-संख्येयभागमात्रमवधिक्षेत्रं, तच्चोपपातकाले परभवसंबन्धिनमवधिमधिकृत्येति, उत्कृष्टमुक्तमेव 'संभिन्नअलोगनालिं, पासंति अनुत्तरा देवा' इत्यलमतिविस्तरेणेति गाथार्थः ॥

साम्प्रतमयमेवावधिः येषां सर्वोत्कृष्टादिभेदभिन्नो भवति, तान्प्रदर्शयन्नाह-

नि. (५३) उक्कोसो मनुएसुं, मनुस्सतिरिएसु य जहन्नो य ।
उक्कोस लोगमित्तो, पडिवाइ परं अपडिवाई ॥

वृ- द्रव्यतः क्षेत्रतः कालतो भावतश्चोत्कृष्टोऽवधिः मनुष्येषु एव, नामरादिषु, तथा मनुसयाश्च तिर्यञ्चश्च मनुष्यतिर्यञ्चः तेषु मनुष्यतिर्यक्षु च जघन्यः, चशब्द एवकारार्थः, तस्य चैवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रयोगः-मनुष्यतिर्यक्ष्वेव जघन्यो, न नारकसुरेषु, तत्र उत्कृष्टो लोकमात्र एव अवधिः, प्रतिपतितुं शीलमस्येति प्रतिपाती, ततः परमप्रतिपात्येव लोकमात्रादाववधिमाने प्रतिपादिते प्रसङ्गतः प्रतिपात्यप्रतिपातिस्वरूपाभिधानमदोषायैवेति गाथार्थः ।

उक्तं क्षेत्रपरिमाणद्वारं, साम्प्रतं संस्थानद्वारं व्याचिख्यासयेदमाह-

नि. (५४) थिबुयायार जहन्नो, वट्टो उक्कोसमायओ किंची ।
अजहन्नमनुक्कोसो य खित्तओ नेगसंठाणो ॥

वृ- 'स्तिबुक' उदकबिन्दुः तस्येवाकारो यस्यासौ स्तिबुकाकारः, जघन्योऽवधिः । तमेव स्पष्टयन्नाह-'वृत्तः' सर्वतो वृत्त इत्यर्थः, पनकक्षेत्रस्य वर्त्तुलत्वात् । तथा उत्कृष्ट आयतः प्रदीर्घः 'किञ्चित्' मनाक् वह्निजीवश्रेणिपरिक्षेपस्य स्वदेहानुवृत्तित्वात्, तथा 'अजघन्योत्कृष्टश्च' न जघन्यो नाप्युत्कृष्टः अजघन्योत्कृष्ट इति । चशब्दोऽवधारणे, अजघन्योत्कृष्ट एव, 'क्षेत्रतोऽनेकसंस्थानः' अनेकानि संस्थानानि यस्यासावनेकसंस्थान इति गाथार्थः ॥ एवं तावज्जघन्येतरावधिसंस्थानमभिहितं, साम्प्रतं विमध्यमावधिसंस्थानाभिधित्सयाऽऽह-

नि. (५५)तप्पागारे १ पल्लग २ पडहग ३ झल्लरि ४ मुइंग ५ पुप्फ ६ जवे ७ ।
तिरियमनुएसु ओही, नाणाविहसंठिओ भणिओ ॥

वृ- 'तप्रः' उडुपकः तस्येवाकारो यस्यासौ तप्राकारः, तथा पल्लको नाम लाटदेशे धान्यालयः, आकारग्रहणमनुवर्त्तते, तस्येवाकारो यस्यासौ पल्लकाकारः, एवमाकारशब्दः प्रत्येकमभिसंबन्धनीयः इति, पटह एव पटहकः-आतोद्यविशेषः, तथा चर्मावनद्धा विस्तीर्णवलयाकारा झल्लरी आतोद्यविशेषः एव, तथा ऊर्ध्वायतोऽधो विस्तीर्ण उपरि च तनुः, मृदङ्गः आतोद्यविशेष एव । 'पुप्फेति' 'सूनात्सूत्रं' इतिकृत्वा पुष्पशिखावलिरचिता चङ्गेरी पुष्पचङ्गेरी परिगृह्यते, 'यव' इति यवनालकः, स च कन्याचोलकोऽभिधीयते, अयं भावार्थः-तप्राकारादिरवधिर्यवनालकाकारपर्यन्तो यथासंख्यं नारकभवनपतिव्यजन्तरज्योतिष्ककल्पोपपन्नकल्पातीतग्रैवेयकानुत्तरसुराणां सर्वकालनियतोऽवसेयः, तिर्यग्नराणां भेदेन नानाविधाभिधानाद्, आह च-तिर्यञ्चश्च मनुष्याश्च तिर्यग्मनुष्याः तेषामवधिः नानाविधसंस्थानसंस्थितो-नानाविधसंस्थितः, संस्थानशब्दलोपात्, स्वयंभूरमणजलधिनिवासिमत्स्यगणवत्, अपितु तत्रापि वलयं निषिद्धं मत्स्यसंस्थानतया, अवधिस्तु तदाकारोऽपीति 'भणितः'उक्तः अर्थतस्तीर्थकरैः सूत्रतोगणधरैरिति, अयं च भवनव्यन्तराणां ऊर्ध्वं बहुर्भवति, अवशेषाणां तु साराणामधो, ज्योतिष्कनारकाणां तु तिर्यक्, विचित्रस्तु नरतिरश्चामिति गाथार्थः ॥

उक्तं संस्थानद्वारं, साम्प्रतमानुगामुकद्वारार्थप्रचिकटयिषयेदमाह-

नि. (५६) अनुगामिओ उ ओही, नेरइयाणं तहेव देवाणं ।
अनुगामी अननुगामी, मीसो य मनुस्सतेरिच्छे ॥

वृ- अनुगमनशील आनुगामुकः, लोचनवद्, तुशब्दस्त्वेवकारार्थः, स चावधारणे, आनुगामुक एव अवधिः, केषामित्यत आह-नरान् कायन्तीति नरकाः-नारकाश्रयाः तेषु भवा नारका इति, तेषां नारकाणां, 'तथैव' आनुगामुक एव, दीव्यन्तीति देवास्तेषामिति । तथा आनुगामुकः, अननुगमनशीलोऽननुगामुकः स्थितप्रदीपवत्; तथा एकदेशानुगमनशीलो मिश्रः, देशान्तरगत-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुरुषैकलोचनोपघातवत्, चशब्दः समुच्चयार्थः, मिश्रश्च मनुष्याश्च तिर्यञ्चश्च मनुष्यतिर्यञ्चस्तेषु मनुष्यतिर्यक्षु योऽवधिः स एवंविवधस्त्रिविध इति गाथार्थः ॥

व्याख्यातमानुगामुकद्वारं, इदानीमवस्थितद्वारावयवार्थप्रतिपादनाय गाथाद्वयमाह—

नि. (५७) खित्तस्स अवट्ठाणं, तित्तीसं सागरा उ कालेणं ।
दव्वे भिन्नमुहुत्तो, पज्जवलंभे य सत्तट्ठ ॥

वृ- अवस्थितिरवस्थानं तद् अवधेराधारोपयोगलब्धितश्चिन्त्यते, तत्र क्षेत्रमस्याधार इतिकृत्वा क्षेत्रस्य संबन्धि तावदवस्थानमुच्यते—तत्राविचलितः सन् 'त्रयसिंशत्सागराः' इति त्रयस्त्रिंशत्सागरोपमाण्यवतिष्ठते अनुत्तरसुराणां, तुशब्दस्त्वेवकारार्थः, स चावधारणे, त्रयस्त्रिंशदेव, 'कालेनेति' कालतः कालमधिकृत्य 'अर्थाद्विभक्तिपरिणामः' । तथा 'दव्वे' इति द्रवति गच्छति ताँस्तान् पर्यायानिति द्रव्यं तस्मिन् द्रव्ये-द्रव्यविषयं उपयोगावस्थानमवधेः, भिन्नश्चासौ मुहूर्त्तश्चेति समासः, अवनं अवः परि अवः पर्यवः तस्य लाभः पर्यवलाभः तस्मिंश्च पर्यवलाभे च-पर्यवप्राप्तौ चावधेरुपयोगावस्थानं सप्ताष्टौ वा समया इति । अन्ये तु व्याचक्षते-पर्यायेषु सप्त, गुणेषु अष्टेति, सहवर्त्तिनो गुणाः शुक्लत्वादयः, क्रमवर्त्तिनः पर्याया नवपुराणादयः, यथोत्तरं च द्रव्य गुणपर्यायाणां सक्ष्मत्वात् स्तोकोपयोगता इति गाथार्थः ॥

नि. (५८) अद्धाइ अवट्ठाणं, छावट्ठी सागरा उ कालेणं ।
उक्कोसगं तु एयं, इक्को समओ जहन्नेणं ॥

वृ- इह लब्धितोऽवस्थानं चिन्त्यते-अद्धा-अवधिलब्धिकालः अत्र अद्धायाः—कालतोऽवस्थानं अवधेर्लब्धिमङ्गीकृत्य तत्र चान्यत्र क्षेत्रादौ 'षट्षष्टिसागरा' इति षट्षष्टिसागरोपमाणि, तुशब्दस्य विशेषणार्थत्वात् मनागधिकानि 'कालेनेति' कालतः उत्कृष्टमेवेदं कालतोऽवस्थानमिति । जघन्यमवस्थानमाह—तत्र द्रव्यादावप्येकः समयो जघन्येनावस्थानमिति, तत्र मनुष्यतिरश्चोऽधिकृत्य सप्रतिपातोपयोग तोऽविरुद्धमेव, देवनारकाणामपि चरमसमयसम्यक्त्वप्रतिपत्तौ सत्यां विभङ्गस्यैवावधिरूपापत्तेः, तदनन्तरं च्यवनाच्चाविरोध इति गाथार्थः ॥

एवं तावदवस्थितद्वारमभिधाय इदानीं चलद्वाराभिधित्सयाऽऽह—

नि. (५९) वुड्ढी वा हानी वा, चउव्विहा होइ खित्तकालाणं ।
दव्वेसु होइ दुविहा, छव्विह पुन पज्जवे होइ ॥

वृ- तत्र चले ह्यवधिः वर्धमानः क्षीयमाणो वा भवति, सा च वृद्धिर्हानिर्वा चतुर्विधा भवति क्षेत्रकालयोः, तथा चाभ्यधायि परमगुरुणा —"असंखेज्जभागवुड्ढी वा संखेज्जभागवुड्ढी वा असंखेज्जगुणवुड्ढी वा," एवं हानिरपि, न तु अनन्तभागवृद्धिरनन्तगुणवृद्धिर्वा, एवं हानिरपि, क्षेत्रकालयोरनन्तयोरदर्शनात्, तथा द्रव्येषु भवति द्विधा वृद्धिर्हानिर्वा, कथम्?—अनन्तभागवृद्धिर्वा अनन्तगुणवृद्धिर्वा, एवं हानिरपि, द्रव्यानन्त्यादिति भावार्थः । तथा षड्विधा 'पर्याये' इति जात्यपेक्षमेकवचनं पर्यायेषु भवति, वृद्धिर्वा हानिर्वेति वर्त्तते, पर्यायानन्त्यात्, कथम्? अनन्त भागवृद्धिः असंख्येयभागवृद्धिः संख्येयभागवृद्धिः संख्येयगुणवृद्धिः असंख्येयगुणवृद्धिः अनन्तगुणवृद्धिरिति, एवं हानिरपि । आह—क्षेत्रस्यासंख्येयभागादिवृद्धौ तदाधेयद्रव्याणामपि तन्निबन्धनत्वादसंख्येयभागादिवृद्धिरेवास्तु, तथा द्रव्यस्यानन्तभागादिवृद्धौ सत्यां तत्पर्याया-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णामपि अनन्तभागादिवृद्धिरिति षट्स्थानकमनुपपन्नमिति, अत्रोच्यते, सामान्यन्यायमङ्गीकृत्य इदमित्थमेव, यदा क्षेत्रानुवृत्त्या पुद्गलाः परिसंख्यायन्ते, पुद्गलानुवृत्त्या च तत्पर्यायाः, न चात्रैवं, कथम् ? -यस्मात्स्वक्षेत्रादनन्तगुणाः पुद्गलाः, तेभ्योऽपि पर्याया इति, अतो यस्य यथैवोक्ता वृद्धिर्हानिर्वा तस्य तथैवाविरुद्धेति, प्रतिनियतविषयत्वात्, विचित्रावधिनिबन्धनाच्चेति गाथार्थः ॥ एवं तावच्चलद्वारं; इदानीं तीव्रमन्दद्वारावयवार्थे व्याचिख्यासुरिदमाह–

नि. (६०) फड्डा य असंखिज्ज, संखेज्जा यावि एगजीवस्स ।
एकप्फड्डुवओगे, नियमा सव्वत्थ उवउत्तो ॥

वृ- इह फड्डकानि अवधिज्ञाननिर्गमद्वाराणि अथवा गवाक्षजालादिव्यवहितप्रदीपप्रभा-फड्डुकानीव फड्डकानि, तानि चासंख्येयानि संख्येयानि चैकजीवस्य, तत्रैकफड्डकोपयोगे सति नियमात् 'सर्वत्र' सर्वैः फड्डकैरुपयुक्ता भवन्ति, एकोपयोगत्वाज्जीवस्य, लोचनद्वयोपयोगवद्, प्रकाशमयत्वाद्वा प्रदीपोपयोगवदिति । आह–तीव्रमन्दद्वारं प्रकान्तं विहाय फड्डकावधिस्वरूपं प्रतिपादयतः प्रक्रमविरोध इति, अत्रोच्यते, प्रायोऽनुगामुकाप्रतिपातिलक्षणौ फड्डकौ तीव्रौ, तथेतरौ मन्दौ, उभयस्वभावता च मिश्रस्येति गाथार्थः ॥

नि. (६१) फड्डा य आणुगामी, अणाणुगामी य मीसगा चेव ।
पडिवाइ अपडिवाई, मीसो य मणुस्सतेरिच्छे ॥

वृ- फड्डुकानि-पूर्वोक्तानि, तानि च अनुगमनशीलानि आनुगामुकानि, एतद्विपरीतानि अनानुगामुकानि, उभस्वरूपाणि मिश्रकाणि च, एवकारः अवधारणे, तान्येकैकशः प्रतिपतन-शीलानि प्रतिपातीनि, एवमप्रतिपातीनि मिश्रकाणि च भवन्ति, तानि च मनुष्यतिर्यक्षु योऽवधिस्तस्मिन्नेव भवन्तीति । आह–आनुगामुकाप्रतिपातिफड्डकयोः कः प्रतिविशेषः ?, अनानुगामुकप्रतिपातिफड्डकयोर्वेति, अत्रोच्यते, अप्रतिपात्यानुगामुकमेव, आनुगामु कं तु प्रतिपात्यप्रतिपाति च भवतीति शेषः । तथा प्रतिपतत्येव प्रतिपाति, प्रतिपतितमपि च सत् पुनर्देशान्तरे जायत एव, नेत्थमनानुगामुकमिति गाथार्थः ॥

व्याख्यातं तीव्रमन्दद्वारं, इदानीं प्रतिपातोत्पादद्वारं विवृण्वन् गाथाद्वयमाह–

नि. (६२) बाहिरलंभे भज्जे, दव्वे खित्ते य कालभावे य ।
उप्पा पडिवाओऽविय, तं उभयं एगसमएणं ॥

वृ- तत्र द्रष्टुर्बहिर्योऽवधिस्तस्यैव एकस्यां दिशि अनेकासु वा विच्छिन्नः स बाह्यः तस्य लाभो बाह्यलाभः, अवधिः पक्रमात् गम्यते, अस्मिन् बाह्यलाभे सति--बाह्यावधिप्राप्तौ सत्यां 'भाज्यो' विकल्पनीयः, कोऽसौ ? –उत्पादः प्रतिपात तदुभयगुणश्च एकसमयेनेति सम्बन्धः, किंविषय इति ?, आह–'द्रव्य' इति द्रव्यविषयः, एवं क्षेत्रकालभावविषय इति, अपिचशब्दाः पूरणसमुच्चयार्थाः । अयं भावार्थः-एकस्मिन् समये द्रव्यादौ विषये बह्यावधेः कदाचिदुत्पादो भवति कदाचिद्व्ययः कदाचिदुभयं, दावानलदृष्टान्तेन, यथा हि दावानलः खल्वेककाल एवैकतो दीप्यतेऽन्यतश्च ध्वंसत इति, तथा अवधिरपि एकदेशे जायते अन्यत्र प्रच्यवत इति गाथार्थः

नि. (६३) अब्भिंतरलद्धीए, उ तदुभयं नत्थि एगसमएणं ।
उप्पा पडिवओऽविय, एगयरो एगसमएणं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- इह द्रष्टुः सर्वतः संबद्धः प्रदीपप्रभानिकरवदवधिरभ्यन्तरोऽभिधीयते तस्य लब्धिरभ्यन्त-रलब्धिः तस्यामभ्यन्तरलब्धौ तु सत्यां अभ्यन्तरावधिप्राप्तावित्यर्थः । तुशब्दो विशेषणार्थः, किं विशिनष्टि ? - तच्च तदुभयं च तदुभयं, उत्पातप्रतिपातोभयं नास्त्येकसमयेन, 'द्रव्यादौ विषये' इत्यनुवर्त्तते, किं तर्हि ?—उत्पादः प्रतिपातो वा एकतर एव एकसमयेन, अपिशब्दस्यैव-कारर्थत्वात् । अयं भावार्थः—प्रदीपस्येवोत्पाद एव प्रतिपातो वा एकसमयेन भवति 'भ्यन्तरावधेर्न तूभयं, अप्रदेशावधित्वादेव, न ह्येकस्य एकपर्यायेणोत्पादव्ययौ युगपत्स्यातां अङ्गुल्याकुञ्चन-प्रसारणवदिति गाथार्थः ।। प्रतिपादितं प्रतिपातोत्पादद्वारं, इदानीं यदुक्तं 'संखेज्ज मनोदव्वे, भागो लोगपलियस्स' इत्यादि, तत्र द्रव्यादित्रयस्य परस्परोपनिबन्ध उक्तः, इदानीं द्रव्यपर्याययोः प्रसङ्गत एवोत्पादप्रतिपाताधिकारे प्रतिपादयन्नाह—

नि. (६४) दव्वाओ असंखिज्जे, संखेज्जे आवि पज्जवे लहइ ।
दो पज्जवे दुगुणिए, लहइ य एगाउ दव्वाउ ।।

वृ- परमाण्वादिद्रव्यमेकं पश्यन् द्रव्यात्सकाशात् तत्पर्यायान् उत्कृष्टतोऽसंख्येयान् संख्येयाश्चापि मध्यमतो लभते प्राप्नोतिपश्यती त्यनर्थान्तरं, तथा जघन्यतस्तु द्वौ पर्यायौ द्विगुणितौ 'लभते च' पश्यति च एकस्माद् द्रव्यात्, एतदुक्तं भवति-वर्णगन्धरसस्पर्शानेव प्रतिद्रव्यं पश्यति, न त्वनन्तान्, सामान्यतस्तु द्रव्यानन्तत्वादेव अनन्तान् पश्यतीति गाथार्थः ।।

साम्प्रतं युगपज्ज्ञानदर्शनविभङ्गद्वारावयवार्थाभिधित्सयाऽऽह—

नि. (६५) सागारमनागारा, ओहिविभंगा जहन्नगा तुल्ला ।
उवरिमगेवेज्जेसु उ, परेण ओही असंखिज्जे ।।

वृ- तत्र यो विशेषग्राहकः स साकारः, स च ज्ञानमित्युच्यते,यः पुनः सामान्यग्राहकोऽ-वधिर्विभङ्गो वा सोऽनाकारः, स च दर्शनं गीयते, तत्र साकारानाकाराववधिविभङ्गौ जघन्यकौ तुल्यावेव भवतः, सम्यग्दृष्टेरवधिः, मिथ्यादृष्टेस्तु स एव विभङ्गः, लोकपुरुषग्रीवासंस्थानीयानि ग्रैवेयकाणि विमानानि, उपरिमाणि च तानि ग्रैवेयकाणि चेति समासः, तुशब्दोऽपिशब्दस्यार्थे द्रष्टवयः, भवनपतिदेवेभ्यः खल्वारभ्य उपरिमग्रैवेयकेष्वपि अयमेव न्यायो यदुत-साकारानाकारौ अवधिविभङ्गौ जघन्यादारभ्य तुल्याविति, न तूत्कृष्टौ, ततः 'परेण' इति परतः अवधिरेव भवति, मिथ्यादृष्टीनां तत्रोपपाताभावात्, स च क्षेत्रतः असंख्येयो भवति, योजनापेक्षयेति गाथार्थः ।। इदानीं देशद्वारावयार्थं प्रचिकटयिषुरिदमाह—

नि. (६६) नेरइयदेवतित्थंकरा य ओहिस्सऽबाहिरा हुंति ।
पासंति सव्वओ खलु, सेसा देसेन पासंति ।।

वृ- 'नारकाः' प्राग्निरूपितशब्दार्थाः देवा अपि तीर्थकरणशीलास्तीर्थकराः, नारकाश्च देवाश्च तीर्थकराश्चेति विग्रहः, चशब्द एवकारार्थः, स चावधारणे, अस्य च व्यवहितः सम्बन्ध इति दर्शयिष्यामः, एते नारकादयः 'अवधेः' अवधिज्ञानस्य न बाह्या अबाह्या भवन्ति, इदमत्र हृदयं-अवध्युपलब्धस्य क्षेत्रस्यान्तर्वर्तन्ते, सर्वतोऽवभासकत्वात्, प्रदीपवत्, ततश्चार्थादबाह्यावधय एव भवन्ति, नैषां बाह्यावधिर्भवतीत्यर्थः । तथा पश्यन्ति 'सर्वतः' सर्वासु दिक्षु विदिक्षु च, खलुशब्दोऽप्येवकारार्थः, स चावधारण एव, सर्वास्वेव दिग्विदिक्ष्विति, सर्वत एवेत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आह–अवधेरबाह्या भवनतीत्यस्मादेव पश्यन्ति सर्वत इत्यस्य सिद्धत्वात् 'पश्यनित सर्वतः' इत्येतदतिरिच्यते इति, अत्रोच्यते, नैतदेवं, अवधेरबाह्यत्वे सत्यपि अभ्यन्तरावधित्वे सत्यपीति-भावः, न सर्वे सर्वतः पश्यन्ति, दिगन्तरालादर्शनात्, अवधेर्विचित्रत्वाद्, अतो नातिरिच्यत् इति, 'शेषाः' तिर्यङ्नरा 'देशेन' इत्येकदेशेन पश्यन्ति, अत्रेष्टतोऽवधारणविधिः शेषा एव देशतः पश्यन्ति, न तु शेषा एवेति गाथार्थः ॥ अथवा अन्यथा व्याख्यायते–

नारकदेवतीर्थंकरा अवधेरबाह्या भवन्तीति, किमुक्तं भवति ? –नियतावधय एव भवन्ति, नियमेनैषामवधिर्भवतीत्यर्थः, अतः संशयः किं ते तेन सर्वतः पश्यन्ति आहोश्विद्देशत इति, अतस्तद्व्यवच्छेदार्थमाह–पश्यन्ति सर्वत एव । आह–यद्येवं 'पश्यन्ति सर्वतः' इत्येतावदेवास्तु, अवधेरबाह्या भवन्तीति नियतावधित्वख्यापनार्थमनर्थकं, न, नियतावधित्वस्यैव विशेषणार्थत्वा-दस्य, अवधेरबाह्या भवन्तीति सदाऽवधिज्ञानवन्तो भवन्तीतिज्ञापनार्थत्वाददुष्टं । आह–ननु नाकरदेवानां भवप्रत्ययावधिग्रहणात् तीर्थकृतामपि प्रसिद्धतरपारभविकावधिसमन्वागमादेव नियतावधित्वं सिद्धमिति, अत्रोच्यते, नियतावधित्वे सिद्धेऽपि न सर्वकालावस्थायित्वसिद्धि-रित्यतस्तत्प्रदर्शनार्थमवघेरबाह्या भवन्तीति सदाऽवधिज्ञानवन्तो भवन्तीति ज्ञापनार्थत्वाददुष्टं। आह–यद्येवं तीर्थकृतां सर्वकालावस्थायित्वं विरुध्यत् इति, न, तेषां केवलोत्पत्तावपि वस्तुतस्तत्परिच्छेदस्य निष्ठत्वात्, केवलेन सुतरां संपूर्णानन्तधर्मकवस्तुपरिच्छित्तेः, छद्मस्थकालस्य वा विवक्षितत्वाददोष इति, अलं विस्तरेण, शेषं पूर्ववदिति गाथार्थः ॥

एवं देशद्वारावयवार्थम-भिधायेदानीं क्षेत्रद्वारं विवुवूर्षुराह–

नि. (६७) संखिज्ञमसंखिज्ञे, पुरिसमबाहाइ खित्तओ ओही ।
संबद्धमसंबद्धो, लोगमलोगे य संबद्धो ॥

वृ- तत्र संबद्धश्चसंबद्धश्च अवधिर्भवति, किमुक्तं भवति ? –कश्चिद् द्दष्टरि संबद्धो भवति, प्रदीपप्रभावत्, कश्चिच्च असंबद्धो भवति, विप्रकृष्टतमोव्याकुलदेशप्रदीपदर्शनवत् । तत्र यस्तावदसंबद्धः असौ संख्येयः असंख्येयो वा । पूर्णः सुखदुःखानामिति पुरुषः, पुरि शयनाद्वा पुरुष इति । पुरुषादबाधा, अबाधनमबाधा अन्तरालमित्यर्थः, पुरुषस्याबाधा पुरुषाबाधा तया पुरुषाबाधया हेतुभूतया सह वा क्षेत्रतः अवधिर्भवति, अयं भावार्थः - असंबद्धोऽवधिः क्षेत्रतः संख्येयो भवति असंख्येयो वा, योजनापेक्षयेति, एवं संबद्धोऽपि । एवमवधिः स्वतन्त्रः पर्यालोचितः, इदानीमबाध्या चिन्त्यते–अत्र चतुर्भङ्गिका, तत्र संख्येयमन्तरं संख्येयोऽवधिः, संख्येयमन्तरं असंख्येयोऽवधिः, असंख्येयमन्तरं संख्येयोऽवधिः, असंख्येयमन्तरमसंख्येययोऽ-वधिरिति चत्वाराऽपि विकल्पाः संभवन्ति, संबद्धे तु विकल्पाभावः । तथा 'लोके' चतुर्दशरज्ज्वात्मके पञ्चास्तिकायवति, 'अलोके च' केवलाकाशास्तिकाये, चशब्दः समुच्चयार्थः, लोकेअलोके च संबद्धः, कथम् ? -पुरुषे संबद्धो लोके च-लोकप्रमाणावधिः, पुरुषे न लोके-देशतोऽभ्यन्तरावधिः, न पुरुषे लोके-शून्यो भङ्गः, न लोके न पुरुषे–बाह्यावधिः, इयं भावना-लोकाभ्यन्तरः पुरुषे संबद्धोऽसंबद्धो वा भवति, यस्तु लोके संबद्धः स नियमात्पुरुषे संबद्ध इति, अतो भङ्गचतुष्टयं तृतीयभङ्गशून्यमिति, अलोकसंबद्धस्त्वात्मसंबद्ध एव भवतीति गाथार्थः ॥ इदानीं गतिद्वारा-वयवार्थप्रतिपिपादयिषयाऽऽह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (६८) गइनेरइयाईया, हिट्ठा जह वण्णिया तहेव इहं ।
इड्ढी एसा वण्णिज्जइत्ति तो सेसियाओऽवि ॥

वृ- तत्र गत्युपलक्षिताः सर्व एवेन्द्रियादयो द्वारविशेषाः परगृह्यन्ते, ततश्च ये गत्यादयः सत्पदप्ररूपणाविधयः द्रव्यप्रमाणादयश्च, ते यथा अधस्तान्मतिश्रुतयोः 'वर्णिताः' उपदिष्टाः तथैवेहापि द्रष्टव्या इति, विशेषस्त्वयम्-इह ये मति प्रतिपद्यन्ते तेऽवधिमपि, किन्त्ववेदकास्तथा अकषायिणोऽप्यवधेः प्रतिपद्यमानका भवन्ति क्षपकश्रेण्यन्तर्गताः सन्त इति, तथा मनःपर्यायज्ञानिनश्च तथा अनाहारका अपर्याप्तकाश्च पूर्वसम्यग्दष्टयः सुरनारका अप्यपान्तरालगत्यादाविति, शक्तिमधिकृत्येति भावार्थः । पूर्वप्रतिपन्नास्तु त एव ये मते, विकलेन्द्रियासंज्ञिशून्या इति, उक्तमवधिज्ञानमिति । तत्र अवधिज्ञानी उत्कृष्टतो द्रव्यतः सर्वमूर्त्तद्रव्याणि जानाति पश्यति, क्षेत्रतस्त्वादेशेना संख्येयं क्षेत्रं, एवं कालमपि, भावतस्त्वनन्तान् भावानिति । तत्र ऋद्धिविशेष 'एषः' अवधिः 'व्यावर्ण्यते' गीयते अतः तत्सामान्यात् शेषर्द्धयोऽपि वर्ण्यन्त इति गाथार्थः।

तत्र शेषर्द्धिविशेषस्वरूपप्रतिपादनायाह–

नि. (६९) आमोसहि विप्पोसहि खेलोसहि जल्लमोसही चेव ।
संभिन्नसो उज्जुमइ, सव्वोसहि चेव बोद्धव्वो ॥

वृ- आमर्शनमामर्शः संस्पर्शनमित्यर्थः, स एवौषधिर्यस्यासावामर्शौषधिः–साधुरेव संस्पर्शनमात्रादेव व्याध्यपनयनसमर्थ इत्यर्थः लब्धिलब्धिमतोरभेदात् स एवामर्शलब्धिरिति, एवं विट्खेलजल्लेष्वपि योजना कर्त्तव्येति, तत्र 'विड्' उच्चारः 'खेलः' श्लेष्मा 'जल्लो' मल इति, भावार्थः पूर्ववत्, सुगन्धाश्चैते भवन्ति । तथा यः सर्वतः शृणोति स संभिन्नश्रोता, अथवा श्रोतांसि इन्द्रियाणि संभिन्नान्येकैकशः सर्वविषयैरस्य परस्परतो वेति संभिन्नश्रोताः, संभिन्नान् वा परस्परतो लक्षणतोऽभिधानतश्च सुबहूनपि शब्दान् शृणोति संभिन्नश्रोता, एवं संभिन्नश्रोतृत्वमपि लब्धिरेव । तथा ऋज्वी मतिः ऋजुमतिः सामान्यग्राहिकेत्यर्थः, मनःपर्यायज्ञानविशेषः, अयमपि च लब्धिविशेष एव, लब्धिलब्धिमतोश्चाभेदात् ऋजुमतिः साधुरेव । तथा सर्व एव विण्मूत्रकेशनखादया विशेषाः खल्वौषध्यो यस्य, व्याध्युपशमहेतव इत्यर्थः, असौ सर्वौषधिश्च, एवमेते ऋद्धिविशेषा बोद्धव्या इति गाथार्थः ॥

नि. (७०) चारणआसीसविस केवली य मननाणिणो य पुव्वधरा ।
अरहंत चक्कवट्टी, बलदेवा वासुदेवा य ॥

वृ- अतिशयचरणाच्चारणाः, अतिशयगमनादित्यर्थः, ते च द्विभेदाः-विद्याचारणा जङ्घाचारणाश्च, तत्र जङ्घाचारणः शक्तिः किल रुचकवरद्वीपगमनशक्तिमान् भवति, स च किलैयोत्पातेनैव रूचकवरद्वीपं गच्छति, आगच्छश्चोत्पातद्वयेनागच्छति, प्रथमेन नन्दीश्वरं द्वितीयेन यो गतः, एवमूर्ध्वमपि एकोत्पातेनैवाचलेन्द्रमूर्ध्नि स्थितं पाण्डुकवनं गच्छति, आगच्छश्चोत्पातद्वयेनागच्छति, प्रथमेन नन्दनवनं द्वितीयेन यतो गतः । विद्याचारणस्तु नन्दीश्वरद्वीपगमनशक्तिमान् भवति, स त्वेकोत्पातेन मानुषोत्तरं गच्छति, द्वितीयेन नन्दीश्वरं, तृतीयेन त्वेकेनैवाऽऽगच्छति यतो गतः, एवमूर्ध्वमपि व्यत्ययो वक्तव्य इति । अन्ये तु शक्तित एव रुचकवरादिद्वीपमनयोर्गोचरतया व्याचक्षत इति । तथा आस्यो-दंष्ट्राः तासु विषमेषामस्तीति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आसीविषाः, ते च द्विप्रकारा भवन्ति-जातितः कर्मतश्च, तत्र जातितो वृश्चिकमण्डूकोरग-मनुष्यजातयः, कर्मतस्तु तिर्यग्योनयः मनुष्या देवाश्चासहस्त्रारादिति, एते हि तपश्चरणानुष्ठानतोऽन्यतो वा गुणतः खल्वासीविषा भवन्ति, देवा अपि तच्छक्तियुक्ता भवन्ति, शापप्रदानेनैव व्यापादयन्तीत्यर्थः । तथा केवलिनश्च प्रसिद्धा एव । तथा मनोज्ञानिनो विपुलमनः पर्यायज्ञानिनः परिगृह्यन्ते । पूर्वाणि धारयन्तीति पूर्वधराः, दशचतुर्दशपूर्वविदः । अशोकाद्यष्ट-महाप्रातिहार्यादिरूपां पूजामर्हन्तीत्यर्हन्तः तीर्थकरा इत्यर्थः । 'चक्रवर्त्तिनः' चतुर्दशरत्नाधिपाः षट्खण्डभरतेश्वराः । 'बलदेवाः' प्रसिद्धा एव । 'वासुदेवाः' सप्तरत्नाधिपा अर्धभरतप्रभव इत्यर्थः । एते हि सर्व एव चारणादयो लब्धिविशेषा वर्त्तन्ते इति गाथार्थः ॥

इह वासुदेवत्वं चक्रवर्त्तित्वं तीर्थकरत्वं च ऋद्धयः प्रतिपादिताः, तत्र तदतिशयप्रतिपादनायेदं गाथापञ्चकं जगाद निर्युक्तिकारः-

नि. (७१) सोलस रायसहस्सा सव्वबलेणं तु संकलनिबद्धं ।
अंछंति वासुदेवं अगडतडंमी ठियं संतं ॥

नि. (७२) धित्तूण संकलं सो वामगहत्थेण अंछमाणाणं ।
भुंजिज्ज व लिंपिज्ज व महुमहणं ते न चायंति ॥

नि. (७३) दोसोला बत्तीसा, सव्वबलेणं तु संकलनिबद्धं ।
अंछंति चक्कवट्टिं, अगडतडंमी ठियं संतं ॥

नि. (७४) धित्तूणं संकलं सो, वामगहत्थेण अंछमाणाणं ।
भुंजिज्ज वा लिपिज्ज व, चक्कहरं ते न चायंति ॥

नि. (७५) जं केसवस्स उ बलं, तं दुगुणं होइ चक्कवट्टिस्स ।
तत्तो बला बलवगा, अपरिमियबला जिनवरिंदा ॥

वृ- आसां गमनिका-इह वीर्यान्तरायकर्मक्षयोपशमविशेषाद्बलातिशयो वासुदेवस्य संप्रदर्श्यते-षोडश राजसहस्त्राणि 'सर्वबलेन' हस्त्यश्वरथपदातिसंकुलेन सह शृङ्खलानिबद्धं 'अंछंति' देशीवचनात् आकर्षन्ति वासुदेवं 'अगडतटे' कूपतटे स्थितं सन्तं, ततश्च गृहीत्वा शृङ्खलामसौ वामहस्तेन 'अंछमाणाणं' ति आकर्षतां भुञ्जीत विलिम्पेत वा अवज्ञया हृष्टः सन् मधुमथनं तेन शक्नुवन्ति, आक्रष्टुमिति वाक्यशेषः । चक्रवर्त्तिनस्त्विदं बलं-द्वौ षोडशकौ, द्वात्रिंशदित्येतावति वाच्ये द्वौ षोडशकावित्यभिधानं चक्रवर्त्तिनो वासुदेवाद् द्विगुणर्द्धिख्यापनार्थं, राजसहस्त्राणीति गम्यते, सर्वबलेन सह शृङ्खलानिबद्धं आकर्षन्ति चक्रवर्त्तिनं अगडतटे स्थितं सन्तं गृहीत्वा शृङ्खलामसौ वामहस्तेन आकर्षतां भुञ्जीत विलिम्पेत वा, चक्रधरं ते न शक्नुवन्ति आक्रष्टुमिति वाक्यशेषः । यत् केशवस्य तु बलं तद्विगुणं भवति चक्रवर्त्तिनः, 'ततः' शेषलोकबलाद् 'बला' बलदेवा बलवन्तः, तथा निरवशेषवीर्यान्तरायक्षयाद् अपरिमितं बलं येषां तेऽपरिमितबलाः, क एते ? -जिनवरेन्द्राः, अथवा ततः-चक्रवर्त्तिबलाद् बलवन्तो जिनवरेन्द्राः, कियता बलेनेति, आह-अपरिमितबला इति । एता हि कर्मोदयक्षयक्षयोपशमसव्यपेक्षाः प्राणिनां लब्धयोऽवसेया इति । इदानीं मनः पर्यायज्ञानं, लब्धिनिरूपणायां तत् सामान्यतो व्यपदिष्टमपि विषयस्वाम्यादि-विशेषोपदर्शनाय ज्ञानपञ्चक-क्रमायातमभिधित्सुराह

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (७६) मनपज्ञवनाणं पुन जनमनपरिचिंतियत्थपायडणं ।
मानुसखित्तनिबद्धं गुणपच्चइयं चरित्तवओ ॥

वृ- 'मनः पर्यायज्ञानं' प्राक्निरूपितशब्दार्थं, पुनः शब्दो विशेषणार्थः, इदं हि रूपिनिबन्धन-क्षायोपशमिक-प्रत्यक्षादिसाम्येऽपि सति अवधिज्ञानात् स्वाम्यादिभेदेन विशिष्टमिति स्वरूपतः प्रतिपादयन्नाह–जायन्त इति जनाः, तेषां मनांसि जनमनांसि, जनमनोभिः परिचिन्तितः जनमनः परिचिन्तितः जनमनः परिचिन्तितश्चासावर्थश्चेति समासः, तं प्रकटयति प्रकाशयति जनमनः परिचिन्तितार्थप्रकटनं, मानुषक्षेत्रं–अर्धतृतीयद्वीपसमुद्रपरिमाणं तन्निबद्धं, न तद्बहिर्व्य-वस्थितप्राणिमनः परिचिन्तितार्थविषयं प्रवर्त्तत इत्यर्थः । गुणाः-क्षान्त्यादयः त एव प्रत्ययाः-कारणानि यस्य नद्गुणप्रत्ययं, चारित्रमस्यास्तीति चारित्रवान् तस्य चारित्रवत एवेदं भवति, एतदुक्तं भवति-अप्रमत्तसंयतस्य आमर्शौषध्यादिऋद्धि प्राप्तस्यैवेति गाथार्थः ॥ इदं द्रव्यादिभि-र्निरूप्यते–तत्र द्रव्यतो मनः पर्यायज्ञानी अर्धतृतीयद्वीपसमुद्रान्तर्गतप्राणिमनो-भावपरिणतद्रव्याणि जानाति पश्यति च, अवधिज्ञानसंपन्नमनः पर्यायज्ञानिनमधिकृत्यैवं, अन्यथा जानात्येव न पश्यति, अथवा यतः साकारं तदतो ज्ञानं यतश्च पश्यति तेन अतो दर्शनमिति, एवं सूत्रे संभवमधिकृत्योक्तमिति, अन्यथा चक्षुरचक्षुरवधिकेवलदर्शनं तत्रोक्तं चतुर्धा विरुध्यते, क्षेत्रतः अर्धतृतीयेष्वेव द्वीपसमुद्रेषु, कालतस्तु पल्योपमासंख्येयभागं रूष्यमतीतं वा कालं जानाति, भावतस्तु मनोद्रव्यपर्यायान् अनन्तानिति, तत्र साक्षान्मनोद्रव्यपर्यायानेव पश्यति, बाह्यास्तु तद्विषयभावापन्नाननुमानतो विजानाति, कुतः ?, मनसो मूर्त्तामूर्त्तद्रव्यालम्बनत्वात्, छद्मस्थस्य चामूर्त्तदर्शनविरोधादिति . सत्पदप्ररूपणादयस्तु अवधिज्ञानवदवगन्तव्याः । नानात्वं चानाहारका-पर्याप्तकौ प्रतिपद्यमानौ न भवतः, नापीतरौ ।

उक्तं मनःपर्यायज्ञानं, इदानीमवसरप्राप्तं केवलज्ञानं प्रतिपादयन्नाह–

नि. (७७) अह सव्वदव्वपरिणामभावविण्णत्तिकारणमनंतं ।
सासयमप्पडिवाइ एगविहं केवलन्नाणं ॥

वृ- इह मनः पर्यायज्ञानानन्तरं सूत्रक्रमोद्देशतः शुद्धितो लाभतश्च प्राक् केवलज्ञानमुपन्यस्तं, अतस्तदर्थोपदर्शनार्थमथशब्द इति, उक्तं च-"अथ प्रक्रियाप्रश्नानन्तर्यमङ्गलोपन्यासप्रति-वचनसमुच्चयेषु" । सर्वाणि च तानि द्रव्याणि च सर्वद्रव्याणि-जीवादिलक्षणानि तेषां परिणामाः-प्रयोगविस्त्रसोभयजन्या उत्पादादयः सर्वद्रव्यपरिणामाः तेषां भावः सत्ता स्वलक्षणमित्यनर्थान्तरं तस्य विशेषण ज्ञपनं विज्ञप्तिः, विज्ञानं वा विज्ञप्तिः-परिच्छित्तिः, तत्र भेदोपचारात्, तस्या विज्ञप्तेः कारणं विज्ञप्तिकारणं, अत एव सर्वद्रव्यज्ञेत्रकालभावविषयं तत्, क्षेत्रादीनामपि द्रव्यत्वात्, तच्च ज्ञेयानन्तत्वादनन्तं, शश्वद्भवतीति शाश्वतं, तच्च व्यवहारनयादेशादुपचारतः प्रतिपात्यपि भवति, अत आह–प्रतिपतनशीलं प्रतिपाति न प्रतिपाति अप्रतिपाति, सदाऽवस्थि-तमित्यर्थः । आह–अप्रतिपात्येतावदेवास्तु, शश्वतमित्येतदयुक्तं, न, अप्रतिपातिनोऽप्य-वधिज्ञानस्य शाश्वतत्वानुपपत्तेः, तस्मादुभयमपि युक्तमिति । 'एकविधं' एकप्रकारं, आवरणा-भावात् क्षयस्यैकरूपत्वात्, 'केवलं' मत्यादिनिरपेक्षं 'ज्ञानं' संवेदनं, केवलं च तत् ज्ञानं चेति समास इति गाथार्थः ॥ इह तीर्थकृत् समुपजातकेवलः सत्त्वानुग्रहार्थे देशनां करोति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तीर्थकरनामकर्मोदयात्, ततश्च ध्वनेः श्रुतरूपत्वात् तस्य च भावश्रुतपूर्वकत्वात् श्रुतज्ञानसंभवादनिष्टापत्तिरिति मा भून्यतिमोहोऽव्युत्पन्नबुद्धीनानामित्यतस्तद्विनिवृत्त्यर्थमाह–

नि. (७८) केवलनाणेणत्थे नाउं जे तत्थ पन्नवणजोगे ।
ते भासइ तित्थयरो वयजोग सुयं हवइ सेसं ॥

वृ- इह तीर्थकरः केवलज्ञानेन 'अर्थान्' धर्मास्तिकायादीन् मूर्त्तामूर्त्तान् अभिलाप्यानभिलाप्यान् 'ज्ञात्वा' विनिश्चित्य, केवलज्ञानेनैव ज्ञात्वा न तु श्रुतज्ञानेन, तस्य क्षायोपशमिकत्वात्, केवलिनश्च तद्भावात्, सर्वसुद्धौ देशशुद्ध्यभावादित्यर्थः । ये 'तत्र' तेषामर्थानां मध्ये, प्रज्ञापनं प्रज्ञापना तस्या योग्याः प्रज्ञापनायोग्याः 'तान् भाषते' तानेव वक्ति नेतरानिति, प्रज्ञापनीयानपि न सर्वानेव भाषते, अनन्तत्वात्, आयुषः परिमितत्वात्, वाचः क्रमवर्त्तिवाच्च, किं तर्हि ?, योग्यानेव गृहीतृशक्तयपेक्षया यो हि यावतां योग्य इति । तत्र केवलज्ञानोपलब्धार्थाभिधायकः शब्दराशिः प्रोच्यमानस्तस्य भगवतो वाग्योग एव भवति, न श्रुतं, नामकर्मोदयनिबन्धनत्वात्, श्रुतस्य च क्षायोपशमिकत्वात्, स च श्रुतं भवति शेषं, शेषमित्यप्रधानं, एतदुक्तं भवति-श्रोतुणां श्रुतग्रन्थानुसारिभावश्रुतज्ञाननिबन्धनत्वाच्छेषमप्रधानं द्रव्यश्रुतमित्यर्थः । अन्ये त्वेवं पठन्ति– 'वयजोगसुयं हवइ तेसिं' स वाग्योगः श्रुतं भवति 'तेषां' श्रोतृणां, भावश्रुतकारणत्वादित्यभिप्रायः। अथवा 'वाग्योगश्रुतं' द्रव्यश्रुतमेवेति गाथार्थः ॥

सत्पदप्ररूपणायां च गतिमङ्गीकृत्य सिद्धगतौ मनुष्यगतौ च, इन्द्रियद्वारमधिकृत्य नोइन्द्रियातीन्द्रियेषु, एवं त्रसकायाकाययोः सयोगायोगयोः अवेदकेषु अकषायिषु शुक्लेश्यालेश्ययोः सम्यग्दृष्टिषु केवलज्ञानिषु केवलदर्शिषु संयतनोसंयतयोः साकारानाकारोपयोगयोः आहारकानाहारकयोः भाषकाभाषकयोः परीत्तनोपरीत्तयोः पर्याप्तनोपर्याप्तयोः बादरनोबादरयोः, संज्ञिषु नोसंज्ञिषु, भव्यनोभव्ययोः, मोक्षप्राप्ति प्रति भवस्थकेवलिनो भव्यता; चरमाचरमयोः, चरमः-केवली अचरमः-सिद्धः भवान्तरप्राप्त्यभावात्, केवलं द्रष्टव्यमिति । पूर्वप्रतिपन्नप्रतिपद्यमानयोजना च स्वबुद्ध्या कर्त्तव्येति । 'द्रव्यप्रमाणं' तु प्रतिपद्यमानानधिकृत्य उत्कृष्टतोऽष्टशतं, पूर्वप्रतिपन्नाः केवलिनस्तु अनन्ताः, 'क्षेत्रं' जघन्यतो लोकस्यासंख्येयभागः, उत्कृष्टतो लोक एवं, केवलिसमुद्घातमधिकृत्य, एवं स्पर्शनाऽपि, 'कालतः' साद्यमपर्यन्तं, 'अन्तरं' नास्त्येव, प्रतिपाताभावात्, 'भागद्वारं' मतिज्ञानवद् द्रष्टव्यं, 'भाव' इति क्षायिके भावे 'अल्पाहुत्वं' मतिज्ञानवदेव । उक्तं केवलज्ञानं, तद्भिधानाच्च नन्दी, तदभिधानान्मङ्गलमिति । एवं तावन्मङ्गलस्वरूपाभिधानद्वारेण ज्ञानपञ्चकमुक्तं, इह तु प्रकृते श्रुतज्ञानेनाधिकारः,

नि. (७९) इत्थं पुन अहिगारो सुयनाणेणं जओ सुएणं तु ।
सेसाणमप्पणोऽविअ अनुओग पईवदिट्ठंतो ॥

वृ- अत्र पुनः पकृते अधिकारः श्रुतज्ञानेन, यतः श्रुतेनैव 'शेषाणां' मत्यादिज्ञानानां आत्मनोऽपि च 'अनुयोगः' अन्वाख्यानं, क्रियत इति वाक्यशेषः, स्वपरप्रकाशकत्वात्तस्य, प्रदीपदृष्टान्तश्चात्र द्रष्टव्य इति गाथार्थः ॥

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता आवश्यकसूत्रे पीठिकायाः निर्युक्तिः एवं हारिभद्रीय टीका परिसमाप्ता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आवश्यक सूत्रे - उपोद्घातः

वृ- साम्प्रतं मङ्गलसाध्यः प्रकृतोऽनुयोगः प्रदर्श्यत इति, स च स्वपरप्रकाशकत्वात् गुर्वायत्तत्वाच्च श्रुतज्ञानस्येति, तथा चोक्तं-'अत्र पुनरधिकारः श्रुतज्ञानेनेत्यादि'। आह–नन्वावश्यकस्यानुयोगः प्रकृत एव, पुनः श्रुतज्ञानस्येत्ययुक्तमिति, अत्रोच्यते, आवश्यकस्य श्रुतान्तर्गतत्वप्रदर्शनार्थत्वाददोषः। आह–य द्यावश्यकस्यानुयोगः, तदावश्यकं किमङ्गमङ्गानि ? श्रुतस्कन्धः श्रुतस्कन्धाः ? अध्ययनमध्ययनानि ? उद्देशक उद्देशकाः इति, अत्रोच्यते, आवश्यकं श्रुतस्कन्धस्तथाऽध्ययनानि च, शेषास्त्वनादेशा विकल्पा इति। आह–ननु नन्दीव्याख्याने अङ्गानङ्गप्रविष्टश्रुतनिरूपणायामनङ्गताऽस्याभिहितैव, ततश्च किमङ्गमङ्गानीत्याद्याशङ्कानुपपत्तिरिति, अत्रोच्यते, तद्व्याख्याऽनियमप्रदर्शनार्थत्वाददोषः, नावश्यं शास्त्रादौ नन्द्यध्ययनार्थकथनं कर्त्तव्यं, अकृते चाशङ्का संभवति। आह–मङ्गलार्थं शास्त्रादाववश्यमेव नन्द्यभिधानात् कथमनियम इति, अत्रोच्यते, ज्ञानभिधानमात्रष्यैव मङ्गलत्वात् नावश्यमवयवार्थाभिधानं कर्त्तव्यमिति, तदकरणे चाशङ्का भवति। किं च-आवश्यकव्याख्यानारम्भे शास्त्रान्तरव्याख्यानारम्भोऽयुक्त एव, शास्त्रान्तरं च नन्दी, पृथक् श्रुतस्कन्धत्वात्। आह–यद्येवमिह आवश्यकश्रुतस्कन्धानुयोगारम्भे किमिति तदनुयोगं इति, उच्यते, शिष्यानुग्रहार्थं त्वयं नियम इत्यपवादप्रदर्शनार्थं वा, एतदुक्तं भवति–कदाचित्पुरुषाद्यपेक्षया उत्क्रमेणापि अन्यारम्भेऽपि चान्यद् व्याख्यायत इति, अलं प्रसङ्गेन, तत्र शास्त्राभिधानं 'आवश्यकश्रुतस्कन्धः', तद्भेदाश्च अध्ययनानि यतः तस्माद् आवश्यकं निक्षेप्तव्यं श्रुतं स्कन्धश्चेति। किं च-किमिदं शास्त्राभिधानं प्रदीपाभिधानवद् यथार्थं आहोश्चित् पलाशभिधानवद् अयथार्थं उत डित्थाद्यभिधानवद् अनर्थकमेवेति परीक्ष्यं, यदि च यथार्थं ततस्तदुपादेयं, तत्रैव समुदायार्थपरिसमाप्तेरित्यतः शास्त्राभिधानमेव तावदालोच्यत इति।

तत्र 'आवश्यकं' इति कः शब्दार्थः ?, अवश्यं कर्त्तव्यमावश्यकं, अथवा गुणानामावश्यमात्मानं करोतीत्यावश्यकं, यथा अन्तं करोतीत्यन्तकः, अथवा 'वस निवासे' इति गुणशून्यमात्मानमावासयति गुणैरित्यावासकं, गुणसान्निध्यमात्मनः करोतीति भावार्थः। इदं च मङ्गलवन्नामादिचतुर्भेदभिन्नं, इदं च प्रपञ्चतः सूत्रादवसेयमिति, उद्देशस्तु तदनुसारेणैव शिष्यानुग्रहायाभिधीयते इति, तत्र नामस्थापने सुज्ञाने एव, द्रव्यावश्कं द्विधा–आगमतो नोआगमतश्च, तत्रागमतो ज्ञाताऽनुपयुक्तः 'अनुपयोगो द्रव्य' मितिकृत्वा, नोआगमतो द्रव्यावश्यकं त्रिविधं–ज्ञशरीरं भव्यशरीरं ज्ञशरीरभव्यशरीरव्यतिरिक्तं च, तदपि त्रिविधं-लौकिकलोकोत्तरकुप्रावचनिकभेदभिन्नं यथाऽनुयोगद्वारेषु, नवरं लोकोत्तरेणात्राधिकारः, तच्च ज्ञानादिश्रमणगुणमुक्तयोगस्य प्रतिक्रमणं भावशून्यत्वाद् अभिप्रेतफलभावाच्च, एत्थ उदाहरणं–

वसंतपुरं नगरं, तत्थ गच्छो अगीतत्थसंविग्गो विहरति, तत्थ य एगो संविग्गो समणगुणमुक्कजोगी, सो दिवसदेवसियं उदउल्लादिअणेसणाओ पडिगाहेत्ता महया संवेगेणं आलोएइ, तस्स पुण गणी अगीयत्थत्तणओ पायच्छित्तं देंतो भणति 'अहो इमो धम्मसद्धिओ साहू !, सुहं पडिसेविउं, दुक्खं आलोएउं, एवं नाम एस आलोएइ अगूहंतो, अतो असढत्तणओ सुद्धोत्ति'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एयं च दट्ठूण अन्ने अगीयत्थसमयणा पसंसंति, चिंतेंति य-नवरं आलोएयव्वं नत्थित्थ किंची पडिसेविएणं ति । अन्नदा कदाई गीयत्थे संविग्गो विहरमाणो आगओ, सो तं दिवसदेवसियं अविहिं दट्ठूण उदाहरणं दाएति–गिरिणनरे नगरे रयणवाणियओ रत्तरयणाणं घरं भरेऊणं पलीवेइ, तं पासित्ता सव्वलोगो पसंसति-अहो इमो धन्नो भगवन्तं अग्गिं तप्पेति, अन्नया कयाई तेन पलीवितं, वाओ य पबलो जाओ, सव्वं नगरं दड्ढं, पच्छा रन्ना पडिहणिओ निव्विसओ य कओ । अन्नहिंपि नगरे एगो एवं चेव करेइ, सो राइणा सुओ जहा एवं करेइत्ति, सो सव्वस्सहरणो काऊण विसज्जिओ, अडवीए कीस न पलीवेसि ?। जहा तेन वाणिअगेण अवसेसावि दड्ढा, एवं तुमंपि एतं पसंसित्ता एते साहुणो सव्वे परिच्चयसि, जाहे न ठाति ताहे साहुणो भणिआएस महाणिद्धम्मो अगीयत्थो अलं एयस्स आणाए, जदि एयस्स निग्गहो न कीरइ, तो अन्नेवि विनस्संति । इदानीं भावावश्यकं, तदपि द्विविधमेव–आगमतो नोआगमतश्च, तत्रागमतो भावावश्यकं ज्ञाता उपयुक्तः, तदुपयोगानन्यत्वात्, अथवाऽऽवश्यकार्थोपयोगपरिणाम एवेति । नोआगमतस्तु ज्ञानक्रियोभयपरिणामो भावावश्यकं, उपयुक्तस्य क्रियेति भावार्थः, मिश्रवचनश्च नोशब्दः, इदमपि च लौकिकादित्रिविधं सूत्रादवसेयं, इह तु लोकोत्तरेणाधिकार इति । उक्तमावश्यकं, अस्य चामूनि अव्यामोहार्थमेकार्थिकानि द्रष्टव्यानि–

आवस्सयं १ अवस्सकरणिज्जं २ धुव ३ निग्गहो ४ विसोही ५ य ।
अज्झयणछक्क ६ वग्गो ७णाओ ८ आराहणा ९ मग्गो १० ॥
समणेण सावएण य अवस्सकायव्वयं हवइ जम्हा ।
अहोनिसस्स य तम्हा आवस्सयं नाम ॥

एवं श्रुतस्कन्धयोरपि निक्षेपश्चतुर्विध एव द्रष्टव्यः, यथाऽनुयोगद्वारेषु, स्थानाशून्यार्थे तु किञ्चिदुच्यते - इह नोआगमतो ज्ञशरीरभव्यशरीरव्यतिरिक्तं द्रव्यश्रुतं पुस्तकपत्रकन्यस्तं, अथवा सूत्रमण्डजादि, भावश्रुतं त्वागमतो ज्ञाता उपयुक्तंः, नोआगमतस्तिवदमेवावश्यकं, नोशब्दस्य देवावचनत्वात् । एवं नोआगमतो ज्ञशरीरभव्यशरीरव्यतिरिक्तो द्रव्यस्कन्धः सचेतनादिः, तत्र सचित्तो द्विपदातिः अचित्तो द्विप्रदेशिकादिः मिश्रः सेनादिदेशादिरिति, तथा भावस्कन्धस्त्वागमतस्तदर्थोपयोगपरिणाम एव, नोआगमतस्त्वावश्यकश्रुतस्कन्ध एवेति, नोशब्दस्य देशवचनत्वात्, अथवा ज्ञानक्रियागुणसमूहात्मकः सामायिकादीनामध्ययनानां समावेशात्, ज्ञानदर्शनक्रियोपयोग इत्यर्थः, नोशब्दस्तु मिश्र वचनः । सर्वपदैकवाच्यता सामाकिकादि श्रुतविशेषाणां षण्णां स्कन्धः श्रुतस्कन्धः, आवश्यकं च तत् श्रुतस्कन्धश्चेति समासः । आह–किमिदं आवश्यकं षडध्ययनात्मकमिति, अत्रोच्यते, षडर्थाधिकारात्मकत्वात्, ते चामी सामायिकादीनां यथायोगमवसेया इति–

सावज्जजोगविरई १ उक्कित्तण २ गुणवओ य पडिवत्ती ३ ।
खलियस्स निंदन ४ वणतिगिच्छ गुणधारणा ६ चेव ॥

अवद्यं पापं, युज्यन्त इति योगाः व्यापाराः, सहावद्येन वर्त्तन्त इति सावद्याः, सावद्याश्च ते योगाश्चेति समासः, तेषां विरमणं विरतिः सामायिकार्थाधिकार इति १ उत्कीर्त्तनमुत्कीर्त्तना, तत्र गुणोत्कीर्त्तना अर्हतां चतुर्विंशतिस्तवस्य २ । गुणा ज्ञानादयः मूलोत्तराख्या वा, तेऽस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विद्यन्त इति गुणवान् तस्य गुणवतः प्रतिपत्तिर्वन्दनाध्ययनस्य ३ । चशब्दः समुच्चये, 'स्खलितस्येति' श्रुतशीलस्खलितस्य निन्दना प्रतिक्रमणस्य ४ । तथा चारित्रात्मनो व्रणचिकित्सा-अपराधव्रणसंरोहणं कायोत्सर्गस्य ५ । अपगतव्रतातिचारेतरोपचितकर्मविशरणार्थमनशनदि-गुणसंधारणा प्रत्याख्यानस्य ६ इत्यर्थाधिकाराः । एषां च प्रत्यध्ययनमर्थाधिकारद्वार एवावसरः प्रत्येतव्यः, इह तु प्रसङ्गतः स्कन्धोपदर्शनद्वारेणोक्ता इति ।

इदानीं अध्ययनन्यासप्रस्तावः, तं चानुयोगद्वारक्रमायातं प्रत्यध्ययनं ओघनिष्पन्ननिक्षेपे' लाघवार्थं वक्ष्यामः । एष आवश्यकस्य समुदायार्थः, इदानीमवयवार्थप्रदर्शनाय एकैकमध्ययनं वक्ष्यामः, तत्र प्रथममध्ययनं सामायिकं-समभावलक्षणत्वात्, चतुविशतिस्तवादीनां च तद्भेदत्वात् प्राथम्यमस्येति । अस्य च महापुरस्येव चत्वार्यनुयोगद्वाराणि भवन्ति । अनुयोगद्वाराणीति कः शब्दार्थः ? अनुयोगोऽध्ययनार्थः, द्वाराणि तत्प्रवेशमुखानीति, यथा हि अकृतद्वारं नगरमनगरमेव भवति, कृतैकद्वारमपि च दुरधिगमं कार्यातिपत्तये च, कृतचतर्मूलद्वारं प्रतिद्वारानुगतं सुखाधिगमं कार्यानतिपत्तये च, एवं सामायिकपुरमपि अर्थाधिगमोपायद्वारशून्यमशक्याधिगमं भवति, एकद्वारानुगतमपि च दुरधिगमं भवति, सप्रभेदचतुर्द्वारानुगतं तु सुखाधिगमं इत्यंतः फलवान् द्वारोन्यासः । तानि च अमूनि–उपक्रमो १ निक्षेपो २ ऽनुगमो ३ नय ४ इति । तत्र शास्त्रस्य उपक्रमणं उपक्रम्यतेऽनेनास्मादस्मिन्निति वा उपक्रमः, शास्त्रस्य न्यासदेशानयनमित्यर्थः । तथा निक्षेपणं निक्षिप्यतेऽनेनास्मादस्मिन्निति वा निक्षेपः न्यासः स्थापनेति पर्यायाः । एवमनुगमनं अनुगमः अनुगम्यते वाऽनेनास्मादस्मिन्निति वाऽनुगमः, सूत्रस्यानुकूलः परिच्छेद इत्यर्थः । एवं नयनं नीयते वाऽनेनास्मादस्मिन्निति वा नयः, वस्तुनः पर्यायाणां संभवतोऽधिगम इत्यर्थः।

आह–एषामुपक्रमादिद्वाराणां किमित्येवं क्रम इति, अत्रोच्यते, न ह्यनुपक्रान्तं सद् असमीपीभूतं निक्षिप्यते, न चानिक्षिप्तं नामादिभिरर्थतोऽनुगम्यते, न चार्थतोऽननुगतं नयैर्विचायते इत्यतोऽयमेव क्रम इति । तत्रोपक्रमो द्विविधः-शास्त्रीय इतरश्च, तत्र इतरः षट्प्रकारः, नामस्था-पनाद्रव्यक्षेत्र-कालभावभेदभिन्न इति, तत्र नामस्थपने सुज्ञाने, द्रव्योपक्रमो द्विविधः-आगमतो नोआगमतश्च, आगमतो ज्ञाताऽनुपयुक्तः, नोआगमतो ज्ञशरीरभव्यशरीरतद्व्यतिरिक्तश्च, स च त्रिविध–सचित्ताचित्तमिश्रद्रव्योपक्रम इति, तत्र सचित्तद्रव्योपक्रमः द्विपदचतुष्पदा-पदोपाधिभेदभिन्नः, पुनरेकैको द्विविधः- परिकर्मणि वस्तुविनाशे च, तत्र परिकर्म–द्रव्यस्य गुणविशेषपरिणामकरणं तस्मिन्सति, तद्यथा-घृताद्युपभोगेन पुरुस्य वर्णादिकरणमिति, अथवा कर्णस्कन्धवर्धनादिक्रियेति, अन्ये तु शास्त्रगन्धर्वनृत्यादिकलासंपादनमपि द्रव्योपक्रम व्याचक्षते, इदं पुनरसाधु, विज्ञानविशेषात्मकत्वात् शास्त्रादिपरिज्ञानस्य, तस्य च भावत्वादिति, किन्तु आत्मद्रव्यसंस्कारविवक्षापेक्षया शरीरवर्णादिकरणवत् स्यादपीति । एवं शुकसारिकादीनां शिक्षागुणविशेषकरणं, तथा चतुष्पदानां हस्त्यादीनां, अपदानां च वृक्षादीनां वृक्षायुर्वेदोपदेशाद् वार्धक्यादि गुणापादनमिति, आह–यत्स्वयं कालान्तरभाव्युपक्रम्यते यथा तरोर्वार्धक्यादि तत्र परिकर्मणि द्रव्योपक्रमता युक्ता, वर्णकरणकलादिसंपदानस्य तु कालान्तरेऽपि विवक्षितहेतु-जालमन्तरेणानुपपत्तेः कथं परिकर्मणि द्रव्योपक्रमतेति, अत्रोच्यते, विवक्षितहेतुजालमन्तरेणा-नुपपत्तेरित्यसिद्धं, कथं ? वर्णस्य तावन्नामकर्मविपाकित्वात् स्वयमपि भावात्, कालादीनां च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षायोपशमिकत्वात्, तस्य च कालान्तरेऽपि स्वयमपि संभवात्, विभ्रमविलासादीनां च युवावस्थायां दर्शनात् । तथा वस्तुविनाशे च पुरुषादीनां खङ्गादिभिर्विनाश एवोपक्रम्यते इति, आह–

परिकर्मवस्तुविनाशोपक्रमयोरभेद एव, उभयत्रापि पूर्वरूपपरित्यागेनोत्तरावस्थापत्तेरिति, अत्रोच्यते, परिकर्मोपक्रमजनितोत्तररूपापत्तावपि अविशेषेण प्राणिनां प्रत्यभिज्ञानादिदर्शनात् वस्तुविनाशोपक्रमसंपादितोत्तरधर्मरूपे तु वस्तुन्यदर्शनात् विशेषसिद्धिरिति, अथवैकत्र विनाशस्यैव विवक्षितत्वाददोषः । एवमचित्तद्रव्योपक्रमः पद्मरागमणेः क्षारमृत्पुटपाकादिना वैमल्यापादनविनाशादीति । मिश्रद्रव्योपक्रमस्तु कटकादिविभूषितपुरुषादिद्रव्यस्यैवेति । विवक्षातश्च कारकयोजना द्रष्टव्या–द्रव्यस्य द्रव्येण द्रव्यात् द्रव्ये वोक्रमो द्रव्योपक्रम इति । तथा क्षेत्रस्योपक्रमः क्षेत्रोपक्रमः, आह–क्षेत्रममूर्त्तं नित्यं च, अतस्तस्य कथं करणविनाशविति, उच्यते, तद्व्यवस्थितद्रव्यकरणविनाशभावादुपचारतः खल्वदोषः, तथा च तात्स्थ्यात्तद्व्यपदेशो युक्त एव, मञ्चाः क्रोशन्तीति यथा । तथा कालस्य वर्त्तनादिरूपत्वात् द्रव्यपर्यायरूपत्वात् द्रव्योपक्रम एवोपचारात् कालोपक्रम इति, चन्द्रोपरागादिपरिज्ञानलक्षणो वा । भावोपक्रमो द्विधा-आगमतो नाओगमतश्च, आगमतो ज्ञाता उपयुक्तः, नोआगमतस्तु प्रशस्तोऽप्रशस्तश्चेति, तत्राप्रशस्तो डोण्डिणिगणिकाऽमात्यादीनां, एत्थोदाहरणाणि-एगे नगरे एगा मरुगिणी, सा चितेति–कहं धूयाओ सुहियाओ होज्जत्ति, ताए जेट्ठिया धूआ सिक्खाविआ जहा वरं इंतं मत्थए पण्हियाए आहणिज्जसि, ताए आहतो, सो तुट्ठो, पादं मद्दिउमारद्धो, ननु दुक्खविअत्ति, तीए मायाए कहियं, ताए भण्णति-जं करेहि तं करेहि, न एस तुज्झ किंची अवरज्झइत्ति । बीया सिक्खविआ, तीएवि आहतो, सो झिंखित्ता उवसंतो, सा भणति–तुमंपि वीसत्था विहराहि, नवरं झिंखणओ एसुत्ति । तईया सिक्खविआ, तीएवि आहतो, सो रुट्ठो, तेन दढं पिट्टिता धाडिया य, तं अकुलपुत्ती जा एवं करेसि, तीए मायाए कथितं, पच्छा कहवि अनुगमिओ, एस अम्ह कुलधम्मोत्ति, धूओ य भणिआ जहा देवतस्स तस्स तहा वट्टिज्जासि, मा छड्डेहित्ति। एगम्मि नगरे चउसट्ठिकलाकुसला गणिया, तीए परभावोवक्कमणनिमित्तं रतिघरंमि सव्वाओ पगईओ नियनियवावारं करेमाणीओ आलिहावियाओ, तत्थ य जो जो वट्टइमाई, सो सो निययसिप्पं पसंसति, नाय भावो य सुअनुयत्तो भवइ, अनुयत्तिओ य उवयारं गाहिओ खद्धं खद्धं दव्वजातं वियरेइत्ति एसविअ अपसत्थो भावोवक्कमो ॥

एगंमि नगरे कोई राया अस्सवाहणियाए सहामच्चेणं निग्गओ, तत्थ से आसेन वच्चंतेणं खलिणे काईया वोसिरिआ, खिल्लरं बद्धं, तं च पुढवीए थिरत्तणओ तहट्ठियं चेव रन्ना पडिनियत्तमाणेन सुइरं निज्झाइयं, चिंतियं च नेन-इह तलागं सोहणं हवइत्ति, न उन वुत्तं, अमच्चेन इंगियागारकुसलेन रायाणमनापुच्छिय महासरं खणाविअं चेव, पालीए आरामा से पवरा कया, तेणं कालेणं रन्ना पुनरवि अस्सवाहिणआए गच्छंतेण दिट्ठं, भणियं च नेनकेण इमं खणाविअं ? अमच्चेण भणिअं-राय ! तुब्भेहिं चेव, कहिं चिअ ?, अवलोयणाए, अहियपरितुट्ठेणं संवड्ढणा कया । एसविअ अप्पसत्थभावोवत्तक्कमोत्ति ॥ उक्तः अप्रशस्तः, इदानीं प्रशस्त उच्यते-तत्र श्रुतादिनिमित्तं आचार्यभावोपक्रमः प्रशस्त इति, आह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याख्याङ्गप्रतिपादनाधिकारे गुरुभावोपक्रमाभिधानमनर्थकमिति, न, तस्यापि व्याख्याङ्गत्वात्,–

"गुर्वायत्ता, यस्माच्छास्त्रारम्भा भवन्ति सर्वेऽपि ।
तस्माद्गुर्वाराधनपरेण हितकाङ्क्षिणा भाव्यम् ॥"

तथा च भाष्यकारेणाभ्यधायि–

"गुरुचित्तायत्ताइं वक्खाणंगाइं जेन सव्वाइं ।
जेन पुण सप्पसण्णं होइ तयं तं तहा कज्जं ॥
आगारिंगियकुसलं जदि सेयं वायसं वए पुज्जा ।
तहविय सिं नवि कूडे विरहंमि अ कारणं पुच्छे ॥
निवपुच्छिएण भणिओ गुरुणा गंगा कओमुही वहइ ?।
संपाइयवं सीसो जह तह सव्वत्थ कायव्वं ॥

इत्यादि । आह–यद्येवं गुरुभावोपक्रम एवाभिधातव्यो न शेषाः, निष्प्रयोजनत्वात्, न, गुरुचित्तप्रसादनार्थमेव तेषामुपयोगित्वात्; तथ च देशकालावपेक्ष्य परिकर्मनाशौ द्रव्याणां उदकौदनादीनां आहारदिकार्येषु कुर्वन् विनेयो गुरोहैरति चेत इति । अथवोपक्रमस्य साम्यात् प्रकृते निरुपयोगिनोऽपि अन्यत्र उपयोक्ष्यन्त इत्युपन्यस्तत्वाददोष इत्यलं विस्तरेणं । उक्तं इतरः, इदानीं शास्त्रीय उच्यते–असावपि षडिध एव, तद्यथा-आनुपूर्वी १ नाम २ प्रमाणं ३ वक्तव्यता ४ अर्थाधिकारः ५ समवतार ६ इति । तत्रानुपूर्वी नामस्थापनाद्रव्यक्षेत्रकाल-गणनोत्कीर्त्तनसंस्थानसामाचारीभावभेदभिन्ना दशप्रकारा, तस्यां यथासंभवतः समवतारणीयमिदं, विशेषतस्तूत्कीर्त्तनगणनानुपूर्वीद्वय इति, उत्कीर्त्तना-संशब्दना यथा-सामायिकं चतुर्विंशतिस्तव इत्यादि, गणनं परिसंख्यानं-एकं द्वे त्रीणि चत्वारीत्यादि, सा च गणनानुपूर्वी त्रिप्रकारा पूर्वपश्चादनानुपूर्वीभेदभिन्ना, तत्र सामायिकं पूर्वानुपूर्व्या प्रथमं, पश्चानुपूर्व्या षष्ठं, अनानुपूर्व्या त्वनियतं क्वचित्प्रथमं क्वचिद्वितीयं इत्यादि । तत्रानानुपूर्वीणामयं करणोपायः–एकाद्येकोत्तरा विवक्षितपदानां स्थापना क्रियते, तत्र पदत्रयस्थापनैव तावत्संक्षेपतः प्रदर्श्यते–सामायिकं चतुर्विंशतिस्तवः वन्दनाध्ययनमिति । अत्र

पुव्वानुपुव्वि हेट्ठा, समयाभेएण कुण जहाजेट्ठं ।
उवरिमतुल्लं पुरओ नसेज्ज पुव्वक्कमो से से ॥
जहितंमिउनिक्खित्ते पुरओ सो चेव अंकविन्नासो ।
सो होइ समयभेदो वज्जेयव्वो पयत्तेणं ॥

भावना क्षुण्णत्वान्न प्रतन्यते, नवरमागतंत्रयाणामेतेषां षड्भङ्गा भवन्ति, अतश्चतस्त्रः खलु अनानुपूर्व्य इति । षण्णां तु पदानां सप्तविंशत्युत्तराणि भङ्गकशतानि, अत्रापि सप्ताष्टादशोत्तराणि अनानुपूर्व्य इति । इदानीं नाम–प्रतिवस्तु नमनान्नाम, तच्चैकादि दशान्तं यथाऽनुयोगद्वारेषु तथा च वक्तव्यं, षड्नाम्नि त्ववतारः, तत्र षड् भावा औदयिकादयो निरूप्यन्ते, तत्र क्षायोप-शमिक एव सर्वश्रुतावतारः, तस्य क्षायोपशमिकत्वादिति । तथ प्रमाणं–द्रव्याणि प्रमीयतेऽनेनेति प्रमाणं, तच्च प्रमेयभेदादेव चतूरूपं, तद्यथा–द्रव्यप्रमाणं क्षेत्रप्रमाणं २ कालप्रमाणं ३ भावप्रमाणं च ३, तत्र सामायिकं भावात्मकत्वाद् भावप्रमाणविषयं, तच्च भावप्रमाणं त्रिधा-गुणनय

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संख्याभेदभिन्नं, तत्र गुणप्रमाणमपि द्विधा-जीवगुणप्रमाणमजीवगुणप्रमाणं च, तत्र जीवादपृथग्भूतत्वात् सामायिकस्य जीवगुणप्रमाणे समवतारः, तदपि ज्ञानदर्शनचारित्रभेदभिन्नं, तत्र बोधात्मकत्वात्सामायिकस्य ज्ञानगुणप्रमाणे समवतारः, तदपि प्रत्यक्षानुमानोपमानागमभेदभिन्नं, तत्र सामायिकस्य प्रायः परोपदेशसव्यपेक्षत्वादागमे समवतारः, स च लौकिकलोकोत्तर-सूत्रार्थोभयात्मानन्तरपरम्पराभेदभिन्न इति, तत्र सामायिकस्य परमर्षिप्रणीतगणिपिटकान्तर्गतत्वात् लोकोत्तरे समवतारः, सूत्रार्थरूपत्वाच्च तदुभय इति, तथेदं गौतमादीनां सूत्रत आत्मागमः, तच्छिष्याणां जम्बूस्वामिप्रभृतीनां अनन्तरागमः, प्रशिष्याणां तु प्रभवादीनां परम्परागम इति, एवमर्थतोऽर्हतामात्मागमः गणधराणामनन्तरागमः तच्छिष्याणां तु परम्परागम इति ।

नयप्रमाणे तु मूढनयत्वात्तस्य नाधूनाऽवतार इति, वक्ष्यति च-"मूढणइयं सुयं कालियं तु' इत्यादि संख्या नामस्थापनाद्रव्यक्षेत्रकालौपम्यपरिमाणभावभेदभिन्ना, यथाऽनुयोगद्वारेषु तथा वक्तव्या, तत्रोत्कालिकादिश्रुतपरिमाणसंख्यायां समवतारः, तत्र सूत्रतः सामायिकं परिमितपरिमाणं, अर्थतोऽनन्तपर्यायत्वादपरिमितपरिमाणमिति । इदानीं वक्तव्यता-सा च त्रिविधा-स्वसमयवक्तव्यता १ परसमयवक्तव्यता २ उभयसमयवक्तव्यता ३ चेति । स्वसमयः-स्वसिद्धान्तः, वक्तक्यता-पदार्थविचारः, तत्र स्वसमयवक्तव्यतायामस्य समवतारः, एवं परोभयसमयप्रतिपादकाध्ययनानामपि, यतः सर्वमेव सम्यग्दृष्टिपरिगृहीतं परसमयसंबन्ध्यपि सम्यक्श्रुतमेव, तस्य स्वसमयोपकारकत्वादिति । इदानीमर्थाधिकारः, स चाध्ययनसमुदायार्थः, स्वसमयवक्तव्यतैकदेशः, स च सर्वसावद्ययोगविरतिरूपः । इदानीं समवतारः, स च लाघवार्थं प्रतिद्वारं समवतारणाद्वारेण प्रदर्शित एव । उक्त उपक्रम ।

इदानीं निक्षेपः, स च त्रिधा-ओघनिष्पन्नो १ नामनिष्पन्नः २ सूत्रालापकनिष्पन्नश्चेति ३ । तत्र ओघो नाम यत् सामान्यं शास्त्राभिधानं, तच्चेह चतुर्विधमध्ययनादि, पुनः प्रत्येकं नामादि-चतुर्भेदमनुयोगद्वारासारतः प्रपञ्चेनाभिधाय भावाध्ययनाक्षीणादिषु सामायिकमायोज्यं । नामनिष्पन्ने निक्षेपे सामायिकं, तच्च नामादिचतुर्विधं, इदं च निरुक्तिद्वारे सूत्रस्पर्शिकनिर्युक्तौ च प्रपञ्चेन वक्ष्यामः, आह-यदि तदिह नाम अवसरप्राप्तं किमिति निरुक्तयादावस्य स्वरू-प्रतिपादनं, तत्र चेत्स्वरूपाभिधानमष्य हन्त इहोपन्यासः किमिति, अत्रोच्यते, इह निक्षेपद्वारे निक्षेपमात्रस्यैवावसरः, निरुक्तौ तु तदन्वाख्यानस्येति, आह-इत्थमपि निरुक्तिद्वार एव सामायिकव्याख्यानत् किं पुनः सूत्रेऽभिधीयते इति, उच्यते, अलं प्रपञ्चेन, उक्तो नामनिष्पन्नो निक्षेपः, इदानीं सूत्रालापनिष्पन्नस्य निक्षेपस्यावसरः, स च प्राप्तलक्षणोऽपि न निक्षिप्यते, कस्मात् ? सूत्राभावात्, असति च सूत्रे कस्यालापकनिक्षेप इति, अतोऽस्ति इतः तृतीय मनु-योगद्वारमनुगमाख्यं, तत्रैव निक्षेप्स्यामः । आह-

यदि प्राप्तावसरोऽप्यसाविह न निक्षिप्यते किमित्युपन्यस्य ते इति, उच्यते, निक्षेपसामान्यात् इह प्रदर्श्यत एव, न तु प्रतन्यते इति । इदानीमनुगमावसरः, स च द्विधा-निर्युक्तयनुगमः सूत्रानुगमश्च, निर्युक्तयनुगमस्त्रिप्रकारः, तद्यथा-निक्षेपनिर्युक्तयनुगम उपोद्घातनिर्युक्त्यनुगमः सूत्रस्पर्शिक-निर्युक्तयनुगमश्चेति, तत्र निक्षेपनिर्युक्तयनुगमोऽनुगत एव, यदधो नामादिन्या-सान्वाख्यानमुक्तमिति । इदानीमुपोद्घात-निर्युक्तनुगमप्रस्तावः, स च उद्देशादिद्वारलक्षण इति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्य च महार्थत्वान्मा भूद्विघ्न इति आरम्भे मङ्गलमुच्यते। आह–ननु मङ्गलं प्रागेवोक्तं, भूयः किं तेन ?, अथ कृतमङ्गलैरपि पुनरभिधीयते, इत्थं तर्हि प्रतिद्वारं प्रत्यध्ययनं प्रतिसूत्रं च वक्तव्यमिति। अत्राह कश्चित्–मङ्गलं हि शास्त्रस्यादौ मध्येऽवसाने चेति प्रतिपादितं, तत्रातिमङ्गलमुक्तं, इदानीं मध्यमङ्गलमुच्यते, तत्र, अनारब्ध एव शास्त्रे कुतो मध्यावकाश इति, स्यादेतत्, चतुरनुयोगद्वारात्मकं यतः शास्त्रं, अतोऽनुयोगद्वारद्वये ह्यतिक्रान्ते मध्यमङ्गलं, अत एव चानुयोगद्वाराणां शास्त्राङ्गतेति, नन्वेवमपि इदं शास्त्रमध्यं न भवति, अध्ययनमध्यत्वात्, शास्त्रमध्यो च मध्यमङ्गलावसर इति, तस्माद् यत्किञ्चिदेतत्; ततश्चायं स्थितपक्षः–इह यदादौ मङ्गलं प्रतिपादितं तदावश्यकादिमङ्गलं, इदं तु नावश्यकमात्रस्य, सर्वानुयोगोपोद्घतिनिर्युक्तित्वात् प्रक्रान्तोपोद्घातस्य, वक्ष्यति च-

"आवस्सगस्स दसकालियस्स तह उत्तरज्झमायारे।
सूयगडे निज्जुत्ती, वोच्छामि तहा दसाणं च ॥

इत्यादि, तथा "सेसेसुवि अज्झयणेसु, होइ एसेव निज्जुत्ती" चतुर्विंशतिस्तवादिष्विति वक्ष्यति, अतो महार्थत्वात् कथञ्चित् शास्त्रान्तरत्वाच्चास्यारम्भे मङ्गलोपन्यासो युक्त एवेति, आह–सामायिकान्वाख्यानेऽधिकृते को हि दशवैकालिकादीनां प्रस्ताव इति, अत्रोच्यते, उपोद्घातसामान्यात्, यतस्तेषामपि प्रायः खल्पवयमेवोपोद्घात इति, अलं प्रपञ्चेन।

तच्चेदं मङ्गलम् –

नि. (८०) तित्थयरे भगवंते, अनुत्तरपरक्कमे अमियनाणी।
तिण्णे सुगइगइगए, सिद्धिपहपदेसए वंदे ॥

वृ- गमनिका–तीर्थकरणशीलास्तीर्थकराः तान् वन्द इति योगः, तत्र 'तु प्लवनतरणयोः' इत्यस्य 'पातृतुदिवचिसिचिरिचिभ्यस्थग् इति थकूप्रत्ययेऽनुबन्धलोपे च कृते 'ऋत इद्वा धातोः इति इत्त्वे रपरत्वे हलि चेति दीर्घत्वे परगमे च तीर्थ इति स्थिते 'डुकृञ् करणे' इत्यस्य 'चरेष्टः' इत्यस्मात् सूत्रात् टप्रत्ययाधिकारेऽनुवर्त्तमाने 'कृञो हेतुताच्छील्यानुलोम्येषु' इतिटप्रत्ययेऽनुबन्धलोपे च कृते गुणे रपरत्वे परगमने च तीर्थकर इति भवति। तत्र तीर्यतेऽनेनेति तीर्थं, तच्च नामादिचतुर्भेदभिन्नं, तत्र नोआगमतो द्रव्यतीर्थं नद्यादीनां समो भूभागोऽनपायश्च, तत्सिद्धौ तरिता तरणं तरणीयं च सिद्धं पुरुषबाहूडुपनद्यादि, द्रव्यता चस्येत्थं तीर्णस्यापि पुनस्तरणीयभावात्, अनेकान्तिकत्वात्, स्नानविवक्षायां च बाह्यमलापनयनात् आन्तरस्य प्राणातिपातादिकारणपूर्वकत्वात्, तस्यं च तद्विनिवृत्तिमन्तरेणोत्पत्तिनिरोधाभावात्, प्रागुपात्तस्य च विशिष्टक्रियासव्यपेक्षाध्यवसायजन्यस्य तत्प्रत्यनीकक्रियासहगताध्यवसायतः क्षयोपपत्तेः, तत्क्षयाभावे च भावतो भवतरणानुपपत्तेरिति। भावतीर्थं तु नोआगमतः संघः, सम्यग्दर्शनादिपरिणामानन्यत्वात्, यत उक्तं–"तित्थं भंते ! तित्थं ? तित्थकरे तित्थं ? गोयमा ! अरिहा ताव नियमा तित्थयरे, तित्थं पुण चाउव्वण्णो समणसंघो, पढमगणहरो वा" ॥ तरिता तु तद्विशेष एव साधुः, तथा सम्यग्दर्शनादित्रयं करणभावापन्नं तरणं, तरणीयो भवोदधिरिति। अथवा-पङ्कदाहपिपासानामपहारं करोति यत्। तद्धर्मसाधनं तथ्यं, तीर्थमित्युच्यते बुधैः ॥ पङ्कस्तावत् पापं, दाहः कषायाः, पिपासा विषयेच्छा, एतेषामपहरणसमर्थं यदित्यर्थः, अथवा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुखावतारं सुखोत्तारं १ सुखावतारं दुरुत्तारं २ दुःखावतारं सुखोत्तारं ३ दुःखावतारं दुरुत्तार ४ मिति द्रव्यभावतीर्थं द्रष्टव्यं, तच्च सरजस्कशाक्यबोटिकसाधुसंबन्धि विज्ञेयं, अलं प्रसङ्गेन। तथ भगः–समग्रैश्वर्यादिलक्षणः, उक्तं च–

"ऐश्वर्यस्य समग्रस्य, रूपस्य यशसः श्रियः ।
धर्मस्याथ प्रयत्नस्य, षण्णां भग इतीङ्गना ॥"

ततश्च समग्रैश्वर्यादिभगयोगाद्भगवन्तोऽर्हन्त इति तान् भगवतः । आह–तीर्थकरानित्यनेनैव 'भगवत' इत्यस्य गतार्थत्वात् तीर्थकृतामुक्तलक्षणभगाव्यभिचारात् नार्थोऽनेनेति, न, नयमतान्तरावलम्बि-परिकल्पिततीर्थकरतिरस्कारपरत्वादस्येति, तथा च न तेऽविकलभगवन्तः, तान् भगवतो, वन्द इति क्रिया सर्वत्र योज्या । तथा परे-शत्रवः, ते च क्रोधाद्याः, आक्रमणमाक्रमः-पराजयः तदुच्छेद इतियावत्, परेषामाक्रमः पराक्रमः, सोऽनुत्तरः-अनन्यसदृशो येषां ते तथाविधाः । आह–ये खलु ऐश्वर्यादिभगवन्तः तेऽनुत्तरपराक्रमा एव, तमन्तरेण विवक्षितभगयोगाभावात्, ततश्च 'अनुत्तरपाक्रमान्' इत्येतदतिरिच्यते इति, अत्रोच्यते, अनादिशुद्धैश्वर्यादिसमन्वितपर-मपुरुषप्रतिपादनपरनयवादनिराकरणार्थत्वाद् न दोषः, तथा चानुत्तरपराक्रमत्वामन्तरेणैव कैश्चित् हिरण्यगर्भादीनामनादिविवक्षितभगयोगोऽभ्युपगम्यत इति, उक्तं च–

"ज्ञानमप्रतिघं यस्य, वैराग्यं च जगत्पतेः । ऐश्वर्यं चैव धर्मश्च, सहसिद्धं चतुष्टयम् ॥"

इत्यादि, अकर्त्रात्मवादव्यवच्छेदार्थं वा । अमितं-अपरिमितं ज्ञेयानन्तत्वात् केवलं, अमितं ज्ञानं एषामित्यमितज्ञानिनः । आह–येऽनुत्तरपराक्रमास्तेऽमितज्ञानिन एव नियमेन, क्रोधादिपरिक्षयोत्तरकालभावित्वाद् अमितज्ञानस्येति, उच्यते, सत्यमेतत्, किं तु क्लेशक्षयेऽप्यमितज्ञानानभ्युपगमप्रधाननयवादनिरासार्थत्वाद् उपन्यास इति, तथा चाहुरेके –

"सर्वं पश्यतु वा मा वा, इष्टमर्थं तु पश्यतु ।
कीटसङ्ख्यापरिज्ञानं, तस्य नः क्वोपयुज्यते ? ॥ इत्यादि"

स्वसिद्धान्तप्रसिद्धच्छद्मस्थवीतरागवयवच्छेदार्थं वा । तथा तरन्ति स्म भवार्णवमिति तीर्णास्तान् तीर्णान्, तीर्त्वा च भवौघं 'सुगतिगतिगतान्' तत्र सर्वज्ञत्वात्सर्वदर्शित्वाच्च निरुपमसुखभागिनः सुगतयः–सिद्धाः, तेषां गतिः सुगतिगतिः, अनेन तिर्यङ्नरनारकामरगतिव्यवच्छेदेन पञ्चमीमोक्षगतिमाह, तां गताः–प्राप्ताः तान्, अनेन चावाप्ताणिमाद्यष्टविडधैश्वर्यस्वेच्छाविलसनशीलपुरुषतीर्णत्वप्रतिपादनपरनयवादव्यवच्छेदमाह, तथा च केचिदाहुः

"अणिमाद्यष्टविधं प्राप्यैश्वर्य कृतिः सदा ।
मोदन्ते सर्वभावज्ञास्तीर्णाः परमदुस्तरम् ॥

इत्यादि" तथा सिद्धेः तस्या एव सुगतेः पन्थाः सिद्धिपथः तस्य प्रधाना देशकाः तद्बीजभूतसामायिकादिप्रतिपादकत्वात् प्रदेशकाः, अनेनत्वनवद्यानेकसत्त्वोपकारकतीर्थकरनामकर्मविपाकपरिणामवत् तत्स्वरूपमेवाह, तान् 'वन्दे' अभिवादये इति गाथार्थः ॥ एव तावदविशेषेण ऋषभादीनां मङ्गलार्थं वन्दनमुक्तं, इदानीं आसन्नोपकारित्वात् वर्त्तमानतीर्थाधिपतेः अखिलश्रुतज्ञार्थप्रदर्शकस्य वर्धमानस्वामिनो वन्दमाह–

नि. (८१) वंदामि महाभागं, महामुनिं महायसं महावीरं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अमरनररायमहिअं, तित्थयरमिमस्स तित्थस्स ॥

वृ- तत्र वन्दामीत्यादि दीपकं अशेषोत्तरपदानुयायि द्रष्टव्यं । तत्र भागः–अचिन्त्या शक्तिः, महान् भागोऽस्येति महाभागः तं, मनुते मन्यते वा जगतस्त्रिकालावस्थामिति मुनिः सर्वज्ञत्वात्, महाँश्चासौ मुनिश्च महामुनिः तं, त्रैलोक्यव्यापित्वात् महद्यशोऽस्येति महायशाः तं, 'महावीरं' इत्यभिधानं, अथवा 'शूर वीर विक्रान्तौ' इति कषायादिशत्रुजयान्महाविक्रान्तो महावीरः, अत्यन्तानुरक्तकेवलामलश्रिया विराजत इति वा वीरः, उक्तं च-"विदारयति यत्कर्म, तपसा च विराजते । तपोवीर्येण युक्तश्च, तस्माद्वीर इति स्मृतः ॥" अमराश्च नराश्च अमरनरास्तेषां राजानः इन्द्रचक्रवर्त्तिप्रभृतयः तैर्महितः-पूजितः तं, तीथर्करं 'अस्य' वर्त्तमानकालावस्थायिनः तीर्थस्य इति गाथार्थः ॥ एवं तावदर्थवक्तुर्मङ्गलार्थं वन्दनमभिहित, इदानीं सूत्रकर्त्तृप्रभृतीनामपि पूज्यत्वात् वन्दनमाह–

नि. (८२) इक्कारसवि गणहरे पवायए पवयणस्स वंदामि ।
सव्वं गणहरणवंसं वायगवंसं पवयणं च ॥

वृ- 'एकादश'इति संख्यावाचयः शब्द, 'अपिः' समुच्चये, अनुत्तरज्ञानदर्शनादिधर्मगणं धारयन्तीति गणधरास्तान्, प्रकर्षेण प्रधाना आदौ वा वाचकाः प्रवाचकाः तान्; कस्य ?– 'प्रवचनस्य' आगमस्येत्यर्थः, किं ?–वंदामि, एवं तावन्मूलगणधरवन्दनं, तथा 'सर्वं' निरवशेषं, गणधराः-आचार्यास्तेषां वंशः-प्रवाहस्त, तथा वाचका-उपाध्यायास्तेषां वंशस्तं, तथा 'प्रवचनं च' आगमं च, वन्द इति योगः । आह–इह वंशद्वयस्य प्रवचनस्य च कथं वन्द्यतेति, उच्यते, यथा अर्थवक्ता अर्हन् वन्द्यः, सूत्रवक्तारश्च गणधराः, एवं यैरिदमर्थसूत्ररूपं प्रवचनं आचार्योपाध्यायैरानीतं, तद्वंशोऽप्यानयनद्वारेणोपकारित्वात् वन्द्य एवेति, प्रवचनं तु साक्षाद्वृत्त्यैवोपकारित्वादेव वन्द्यमिति गाथार्थः ॥ इदानीं प्रकृतमुपदर्शयन्नाह–

नि. (८३) ते वंदिऊण सिरसा अत्थपुहुत्तस्स तेहि कहियस्स ।
सुयनाणस्स भगवओ निज्जुत्तिं कित्तइस्सामि ॥

वृ- 'तान्' अनन्तरोक्तान् तीर्थकरादीनं 'वन्दित्वा' प्रणम्य 'शिरसा' उत्तमाङ्गेन, किम् ? निर्युक्ति कीर्त्तयिष्ये, कस्य ?–'अर्थपृथक्त्वस्य' तत्र श्रुताभिधेयोऽर्थः तस्मात् सूत्रं पृथक् तद्भावः पृथक्त्वं च अर्थश्च पृथक्त्वं चेति एकवद्भावः, अर्थेन वा पृथु अर्थपृथु तद्भावः अर्थपृथुत्थं श्रुतविशेषणमेव तस्य, 'तैः' तीर्थकरगणधरदिभिः 'कथितस्य' प्रतिपादितस्य, कस्य ? –श्रुतज्ञानस्य भगवतः, स्वरूपाभिधानमेतत्, सूत्रार्थयोः परस्परं निर्योजनं निर्युक्तिः तां 'कीर्त्तयिष्ये' प्रतिपादयिष्ये इति गाथार्थः ॥ आह–किमशेषश्रुतज्ञानस्य ?, न, किं तर्हि ?, श्रुतविशेषाणामावश्यकादीनामिति, अत एवाह–

नि. (८४) आवस्सगस्स दसकालिअस्स तह उत्तरज्झमायारे ।
सूयगडे निज्जुत्तिं वुच्छामि तहा दसाणं च ॥

वृ- आसां गमनिका-आवश्यकस्य दशवैकालिकस्य तथोत्तराध्ययनाचारयोः समुदायशब्दानामवयवे वृत्तिदर्शनाद् यथा भीमसेनः सेन इति उत्तराध्य इति उत्तराध्ययनमवसेयं, अथवा-अध्ययनमध्यायः, उत्तराध्यायाचारयोः, सूत्रकृतविषयां निर्युक्ति वक्ष्ये, तथा दशानां च संबन्धि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नीमिति गाथार्थः ।

नि. (८५) कप्पस्स य निज्जुत्ति ववहारस्सेव परमणिउणस्स ।
सूरिअपन्नत्तीए वुच्छं इसिभासिआणं च ।

वृ- तथा कल्पस्य च निर्युक्ति व्यवहारस्य च परमनिपणस्य, तत्र परमग्रहणं मोक्षाङ्गत्वात् निपुणग्रहणं त्वव्यंसकत्वात्, तथा च न मन्वादिप्रणीतव्यवहारवव्यंसंकोऽयं, "सच्चपइण्णा खु ववहारा" इति वचनात्, तथा सूर्यप्रज्ञप्तेः वक्ष्ये, ऋषिभाषितानां च देवेन्द्रस्तवादीनां निर्युक्ति, क्रियाभिधानं चानेकशः ग्रन्थान्तरविषयत्वात् समासव्यासरूपत्वाच्च शास्त्रारम्भस्य अदुष्टमेवेति गाथार्थः ॥

नि. (८६) एतेसिं निज्जुत्तिं वुच्छामि अहं जिनोवएसेणं ।
आहरणहेउकारणपयनिवहमिणं समासेणं ॥

वृ- 'एतेषां' श्रुतविशेषाणां, निर्युक्तिं वक्ष्ये अहं जिनोपदेशेन, न तु स्वमनीषिकयैव, आहरणहेतुकारणपदनिवहां एतां समासेन, तत्र साध्यसाधनान्वयव्यतिरेकप्रदर्शनमाहरणं दृष्टान्त इतियावत्, साध्यधर्मान्वयव्यतिरेकलक्षणो हेतुः, हेतुमुल्लङ्घ्य प्रथमं दृष्टान्ताभिधानं न्याय-प्रदर्शनार्थं-कृचिद्धेतुमनभिधाय दृष्टान्त एवोच्यते इति, यथा गतिपरिणामपरिणतानां जीवपुद्गलानां गत्युपष्टम्भको धर्मास्तिकायः, मत्स्यादीनां सलिलवत्, तथा क्वचिद्धेतुरेव केवलोऽभिधीयते, न दृष्टान्तः, यथा मदीयोऽयमश्वः विशिष्टचिह्नोपलब्ध्यन्यथानुपपत्तेः, तथा चाभ्यधायि निर्युक्तिकारेण–

"जिनवयणं सिद्धं चेव भण्णई कत्थवी उदाहरणं ।
आसज्ज उ सोयारं हेऊवि कहंचिय भणेज्ञा ।। इत्यादि"

कारणमुपपत्तिमात्रं, यथा निरुपमसुखः सिद्धः, ज्ञानानाबाधप्रकर्षात्; नात्र आविद्वदङ्गना-दिलोकप्रतीतः साध्यसाधनधर्मानुगतो दृष्टान्तोऽस्ति, तत्राहरणार्थाभिधायकं पदमाहरणपदं, एवमन्यत्रापि भावनीयं । आहरणं च हेतुश्च कारणं च आहरणहेतुकारणानि तेषां पदानि आहरणहेतुकारणपदानि तेषां निवहः-संघातो यस्यां निर्युक्तौ सा तथाविधा तां 'एतां' वक्ष्यमाणलक्षणां अथवा प्रस्तुतां 'समासेन' संक्षेपेणेति व्याख्यातं गाथात्रयमिति ॥

तत्र 'यथोद्देशस्तथा निर्देश' इति न्यायात् आदावधिकृताऽऽवश्यकाद्या ध्ययनसामायि-काख्योपोद्घातनिर्युक्तिमभिधित्सुराह–

नि. (८७) सामाइयनिज्जुत्तिं वुच्छं उवएसियं गुरुजनेनं ।
आयरियपरंपरएण आगयं आनुपुव्वीए ॥

वृ- सामायिकस्य निर्युक्तिः सामायिकनिर्युक्तिः तां 'वक्ष्ये' अभिधास्ये, उप-सामीप्येन देशिता उपदेशिता तां, केन ? - 'गुरुजनेन' तीर्थकरगणधरलक्षणेन, पुनरुपदेशनकालारभ्य आचार्यपारम्पर्येण आगतां, स च परम्परको द्विधा-द्रव्यतो भावतश्च, द्रव्यपरम्परक इष्टकानां पुरुषपारम्पर्येणानयनं, अत्र चासंमोहार्थं कथानकं गाथाविवरणसमाप्तौ वक्ष्यामः, भावपरम्पर-कस्त्वियमेव उपोद्घातनिर्युक्तिरेव आचार्यपारम्पर्येणागतेति, कथम् ?, 'आनुपुर्व्या' परिपाट्या जम्बूस्वामिनः प्रभवेनानीता, ततोऽपि शय्यम्भवादिभिरिति, अथवा आचार्यपारम्पर्येण आगतां

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

स्वगुरुभिरुपदेशितामिति । आह–द्रव्यस्य इष्टकालक्षणस्य युक्तं पारम्पर्येण आगमनं, भावस्य तु श्रुतपर्यायत्वात् वष्त्वन्तरसंक्रमणाभावात् पारम्पर्येणागमनानुपपत्तिरिति, न च तद्बीजभूतस्य अर्हद्गणधरशब्दस्यागमनमस्ति, तस्य श्रुत्यनन्तरमेवोपरमादिति, अत्रोच्यते, उपचाराददोषः, यथा कार्षापणाद् घृतमागतं घटादिभ्यो वा रूपादिविज्ञानमिति । एवमियमाचार्यपारम्पर्यहेतुत्वात् तत आगतेत्युच्यते, आगतेवागता, बोधवचनश्चायमागतशब्दो न गमि क्रियावचन इति, अलं विस्तरेण । दव्वपरंपरए इमं उदाहरणं–

साकेयं नगरं, तस्स उत्तरपुरच्छिमे दिसिभागे सुरप्पिए नाम जक्खायतणे, सो य सुरप्पिओ जक्खो सन्निहियपाडिहेरो, सो वरिसे वरिसे चित्तिज्जइ, महो य से परमो कीरइ, सो य चित्तिओ समाणो तं चेव चिऽाकरं मारेइ, अह न चित्तिज्जइ तओ जनमारिं करेइ, ततो चित्तगरा सव्वे पलाइउमारद्धा, पच्छा रन्ना नायं, जदि सव्वे पलायंति, तो एस जक्खो अचित्तिज्जंतो अम्ह वहाए भविस्सइ, तेणं चित्तगरा एक्कसंकलितबद्धा पाडुहुएहिं कया, तेसिं नामाइं पत्तए लिहिऊण घडए छूढाणि, ततो वरिसे वरिसे जस्स नामं उट्ठाति, तेन चित्तेयव्वो, एवं काले वच्चति । अन्नया कयाई कोसंवीओ चित्तगरदारओ घराओ पलाइओ तत्थागओ सिक्खगो, सो भमंतो साके तस्स चित्तगरस्स घरं अल्लीणो, सोवि एगपुत्तगो थेरीपुत्तो, सो से तस्स मित्तो जातो, एवं तस्स तत्थ अच्छंतस्स अह तंमि वरिसे तस्स थेरीपुत्तस्स वारओ जातो, पच्छा सा थेरी बहुप्पगारं रुवति, तं रुवमाणीं थेरीं दट्ठूण कोसंबको भणति-किं अम्मो ! रुदसि ?, ताए सिट्ठं, सो भणति-मा रुयह, अहं एयं जक्खं चित्तिस्सामि, ताहे सा भणति–तुमं मे पुत्तो किं न भवसि?, तोवि अहं चित्तेमि, अच्छह तुब्भे असोगाओ, ततो छट्ठभत्तं काऊण अहतं वत्थजुअलं परिहित्ता अट्ठगुणाए पो त्तीए मुहं बंधिऊण चोक्खेण य पत्तेण सुइभूएण नवएहिं कलसएइह ण्हाणेत्ता नवएहिं कुच्चएहिं नवएहिं मल्ल संपुडेहिं अल्लेसेहिं वण्णेहिं च ॥

चित्तेऊण पायवडिओ भणइ – खमह जं मए अवरद्धं ति ?, ततो तुट्ठो जक्खे भणति–वरेहि वरं, सो भणति-ए यं चेव ममं वरं देहि, मा लोगं मारेह, भणति–एतं ताव ठितमेव, जं तुमं न मारिओ, एवं अन्नेवि न मारेमिऽ, अन्नं भण, जस्स एगदे समवि पासे मि दुपयस्स वा चउप्पयस्स वा अपयस्स वा तस्स तदाणुरूवं रूवं निव्वत्तेमि, एवं होउत्ति दिन्नो वरो, ततो सो लद्धवरो रन्ना सक्कारितो समाणो गओ कोसंबी अत्थि, तेन भणिअं-चित्तसभा नत्थि, मनसा देवाणं वायाए पत्थिवाणं, तक्खणमेत्तमेव आणत्ता चित्तगरा, तेहिं सभाओवासा विभइत्ता पचित्तिता, तस्स धरदिण्णगस्स जो रन्नो अंतेपुरकिड्डापदेसो सो दिन्नो, तेणं तत्थ तदानुरूवेसु निम्मिएसु कदाइ मिगावतीए जालकिड्ड गंतरेण पादंगुट्ठओ दिट्ठो, उवमाणेणं नायं जहा मिगावती एसत्ति, तेन पादंगुट्ठगाणुसारेण देवीए रूवं निव्वंत्तिअं, तीसे चक्खुंमि उम्मिल्लिज्जंते एगो मसिबिन्दू ऊरुयंतरे पडिओ, तेन फुसिओ, पुणोऽवि जातो, एवं तिन्नि वारा, पच्छा तेन नायं, एतेन एवं होयव्वमेव, ततो चित्तसभा निम्मि ता, राया चित्तसभं पलोएंतो तं पदेसं पत्तो जत्थ सा देवी, तं निव्वण्णंतेण सो बिन्दु दिट्ठो, विरुट्ठो, एतेन मम पत्ती धरिसियत्तिकाऊण वज्झो आनत्तो, चित्तगरसेणी उवट्ठिता, सामि ! एस वरलद्धोत्ति, ततो से खुज्जाए मुहं दाइयं, तेन तदानुरूवं निव्वत्तितं, तथावि तेन संडासओ छिंदाविओ चेव, निव्विसओ य आणत्तो, सो

पुणो जक्खस्स उववासेण ठितो, भणिओ य- वामेण चित्तिहिसि, सयाणियस्स पदोसं गतो, तेन चिंयितं-पज्ञोओ एयस्स अप्पीतिं वहेज्ञा, ततो नेन मिगावईए चित्तफलए रूवं चित्तेऊण, पज्ञोयस्स उवट्ठविअं, तेन दिट्ठं, पुच्छिओ, सिट्ठं, तेन दूओ पयट्टितो, जदि मिया वइं न पट्ठवेसि तो एमि, तेन असक्कारिओ निद्धमणेण निच्छूढो, तेन सिट्ठं, इमोवि तेन दूयवयणेण रुट्ठो, सव्वबलेण कोसंबि एइ, तं आगच्छंतं सोउं सयाणिओ अप्पबलो अतिसारेण मओ, ताहे मिगावईए चिन्तिअं–

मा इमो बालो मम पुत्तो विनस्सिहिति, एस खरेणं न सक्कति, पच्छा दूतो पट्ठविओ, भणिओएस कुमारो बालो, अम्हेहिं गएहिं मा सामंतराइणा केणइ अन्नेणं पेल्लिज्ञिहिइ, सो भणति-को ममं धारेमाणे पेल्लिहिति, सा भणति-ओसीसए सप्पो, जोयणसए विज्ञो किं करेहिति ?, तो नगरिं दढं करेहि, सो भणति-आमं करेमि, ताए भण्णति-उज्ञेणिगाओ इट्टगाओ बलिआओ, ताहि कीरउ, आमंति, तस्स य चोद्दस राइणो वसवत्तिणो, तेणं तेषिं बला ठविता, पुरिसपरंपरएण तेहिं आणिआओ इट्टगाओ, कयं नगरं दढं, ताहे ताए भण्णति-इयाणिं धनस्स भरेहि नगरिं, ता नेन भरिया, जा हे नगरी रोहगअसज्झा जाया, ताहे सा विसंवइया, चिन्तियं च नाए–धन्ना णं ते गामागरनगर जाव सण्णिवेसा, जत्थ सामी विहरति, पव्वएज्ञामि जइ सामी एज्ञ, ततो भगवं समोसढो, तत्थ सव्ववेरा पसमंति, मिगावती निग्गता, धम्मे कहिज्ञमाणे एगे पुरिसे एस सव्वण्णुत्ति काउं पच्छण्णं मनसा पुच्छति, ताहे सामणिा भणिओ-वायाए पुच्छ देवानुपिआ !, वरं बहवे सत्ता संबुज्झंतित्ति, एवमावि भणिते तेन भण्णति–

भगवं ! जा सा सा सा ?, तत्थ भगवता आमंति भणितं, गोयमसामिणा भणिअं-किं एतेण जा सा सा सा भणितं ?, एत्थ तीसे उट्ठाणपरियावणिअं सव्वं भगवं परिकहेति-तेणं कालेणं तेणं समएणं चंपानाम नयरी, तत्थेगो सुवण्णगारो इत्थीलोलो, सो पंच पंच सुवण्णसयाणि दाऊण जा पहाणा कण्णा तं परिणेति, एवं तेणं पंचसया पिंडिता, एक्केक्काए तिलगचोद्दसगं अलंकारं करेइ, जद्दिवसं जाए समं भोगे भुंजइ तद्दिवसं देति अलंकारं, सेसकालं न देति, सो ईसालुओ तं घरं न कयाई मुयइ, नवा अन्नस्स अल्लियंतुं देति, सो अन्नदा मित्तपगते वाहितो, अनिच्छंतो बला नीओ जेमेतुं, सो तहिं गतोत्ति नाऊणं ताहिं चिंतिअं-किं एतेणं अम्हं सुवण्ण-एणति ?, अज्ञ पतिरिक्कं ण्हामो समालभामो आविद्धामो अ, ण्हाआओ पइरिक्कमज्ञितव्वयविहीए तिलयचोद्दसएणं अलंकारेण अलंकरेऊणं अद्दायं गहाय पेहमाणीओ चिट्ठंति, सो अ ततो आगतो, तं दट्ठूण आसुरुत्तो, तेन एक्का गहिया, ताव पिट्टिया जाव मयत्ति, ता अन्नाओ भणंति एवं अम्ह वि एक्केक्का उ एएण हंतव्व त्ति, तम्हा एयं एत्थेव अद्दागपुंजं करेमो, तत्थेगुणेहिं पंचहिं महिलासएहिं पंच एगूणाइं अद्दागसयाइं जमगसमगं पक्खित्ताइं, तत्थ सो अद्दागपुंजो जातो, पच्छा पुणोवि तासिं पच्छातावो जाओ-का गती अम्ह पतिमारियाणं भविस्सति ?, लोए अ उद्धंसणाओ सहेयव्वाओ, ताहे ताहिं घनकवाडनिरंतरं निच्छिड्डाइं दाराइं ठवेऊण अग्गी दिन्नो सव्वओ समंतओ, तेन पच्छाणुतावेण साणुक्कोसयाए अ ताए अकामनिज्ञराए मनूसेसूववण्णा पचंवि सया चोरा जाया, एगंमि पव्वए परिवसंति, सोवि कालगतो तिरिक्खे-सूव वण्णो, तत्थ जा सा पढमं मारिया, सा एक्कं भवं तिरिएसु पच्छा एगंमि बंभणकुले चेडो आयाओ, सो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अ पंचवरिसो, सो अ सुवण्णकारो तिरिक्खेसु उववट्टिऊण तंमि कुले चेवदारिया जाया,

सो चेडो तीसे बालग्गाहो, सा य निच्चमेव रोयति, तेन उदरपोप्पयं करेंतेणं कहवि सा जोणिद्दारे हत्थेन आहता, तहा ववट्ठिता रोवितुं, तेन नायं-लद्धो मए उवाओत्ति, एवं सो निच्चकालं करेति, सो तेहिं मायपितीहिं नाओ, ताहे हणिऊणं धाडिओ, साविय पडुप्पन्ना चेव विद्दाया, सो य चेडो पलायमाणो चिरं नगरविणट्ठदुसीलायारो जाओ, गतो एगं चोरपल्लीं, जत्थ तानि एगूणगाणि पंच चोरसयाणि परिवसंति, सावि पइरिक्कं हिंडंती एगं गामं गता, सो गामो तेहिं चोरेहिं पेल्लितो, सा य णेहिं गहिया, सा तेसिं पंचहिवि चोरसएहिं परिभुत्ता, तेसिं चिंता जाया –अहो इमा वराई एत्तिआणं सहति, जइ अन्ना से बिइज्जिआ लभेज्ञा तो से विस्सामो होज्ञा, ततो तेहिं अन्नया कयाई तीसे बिइज्जिआ आनीआ, जद्दिवसं चेव आनीआ तद्दिवसं चेव सा तीसे छिड्डाइं मग्गइ, केन उवाएण मारेज्ञा ?, ते अन्नया कयाइ ओहाइया, ताअ सा भणिआ, पेच्छ कूवे किंपि दीसए, सा दट्ठुमारद्धा, ताए तत्थेव छूढा, ते आगता पुच्छंति, ताए भण्णति अप्पणो महिलं कीस न सारेह ?, तेहिं नायं जहा एयाए मारिया, तओ तस्स बंभणचेडगस्स हिदए ठिअं जहा एसा मम पावकम्मा भगिणित्ति, सुव्वइ य भगवं महावीरो सव्वण्णू सव्वदरिसी, ततो एस समोसरणा पुच्छति ! ताहे सामी भणति–सा चेव सा तव भगिनी,

एत्थ संवेगमावन्नो सो पव्वइओ, एवं सोऊण सव्वा सा परिसा पतनुरागसंजुत्ता जाया। ततो मिगावती देवी जेणेव समणे भगवं महावीरे तेणेव उवागच्छति, उवागच्छित्ता समणं भगवं महावीरं वंदित्ता एवं वयासी-जं णवरं पज्ञोअं आपुच्छामि, ततो तुज्झ सगासे पव्वयामित्ति भणिऊण पज्ञोअं आपुच्छति, ततो पज्ञोओ तीसे महतीमहालियाए सदेवमणुयासुराए परिसाए लज्ञाए न तरति वारेउं, ताहे विसज्ञेइ, ततो मिगावती पज्ञोयस उदयनकुमारं निक्खेवगणिनिक्खत्तं काऊण पव्वइआ, पज्ञोअस्सवि अट्ठ अंगारवईपमुहाओ देवीओ पव्वइयाओ, तानिवि पंच चोरसयाणि तेणं गंतूण संबोहियाणि, एतं पसंगेण भणिअं, एत्थ इट्ठगपरंपरएण अहियारो, एस दव्वपरंपरओ ॥ साम्प्रतं निर्युक्तिशब्दस्वरूपाभिधानायेदमाह–

नि. (८८) निज्ञुत्ता ते अत्था जं बद्धा तेन होइ निज्ञुत्ती।
तहविय इच्छावेइ विभासिउं सुत्तपरिवाडी ॥

वृ- निश्चयेन सर्वाधिक्येन आदौ वा युक्ता निर्युक्ताः, अर्यन्त इत्यर्थाः जीवादयः श्रुतविषयाः, ते ह्यर्था निर्युक्ता एव सूत्रे, 'यद्' यस्मात् 'बद्धाः' सम्यग् अवस्थापिता योजिता इतियावत्, तेनेयं 'निर्युक्तिः' निर्युक्तानां युक्तिनिर्युक्तयुक्तिरिति प्राप्ते युक्तशब्दस्य लोपः क्रियते, उष्ट्रमुखी कन्येति यथा, निर्युक्तार्थव्याख्या निर्युक्तिरितिहृदयं। आह–सूत्रे सम्यक् निर्युक्ता एवार्थाः पुनश्चेहैषां योजनं किमर्थं ?, उच्यते, सूत्रे निर्युक्तानप्यर्थान् न सर्व एवाशेषान् अवबुध्यन्ते यतः, अतः। तथापि च सूत्रे निर्युक्तानपि सतः एषयति–इषु इच्छायामित्यस्य ण्यन्तस्य लट् इति तिप्–शप्–गुणायादेशेषु कृतेषु एषयति, विविधं भाषितुं विभाषितुं, का ?-'सूत्रपरिपाटी' सूत्रपद्धतिरिति, एतदुक्तं भवति-अप्रतिबुध्यमाने श्रोतारि गुरुं तदनुग्रहार्थं सूत्रपरिपाट्येव विभाषितुमेषयति–इच्छत इच्छत मां प्रतिपादयितुमित्थं प्रयोजयतीवेति, सूत्रपरिपाटीमिति पाठान्तरं, शिष्य एव गुरुं सूत्रपद्धतिमनव बुध्यमानः प्रवर्तयति–इच्छत इच्छत मम व्याख्यातुं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रपरिपाटीमिति, व्याख्या च निर्युक्तिरिति, अतः पुनर्योजनमित्थमदोषायैवेति, अलं विस्तरेण, गमनिकामात्रमेवैतदिति गाथार्थः ॥ यदुक्तं 'अर्थपृथक्त्वस्य तैः कथितस्येति' तीर्थकरगणधरैः, इदानीं तेषामेव शीलादिसंपत्समन्वितत्वप्रतिपादनायाह—

नि. (८९) तवनियमनाणरुक्खं आरूढो केवली अमियनाणी ।
तो मुयइ नाणवुट्ठिं भवियजनविबोहणट्ठाए ॥

वृ- रूपकमिदं द्रष्टव्यं, तत्र वृक्षो द्विधा-द्रव्यतो भावतश्च, द्रव्यवृक्षः कल्पतरुः, यथा तमारुह्य कश्चित् तत्कुसुमानां गन्धादिगुणसमन्वितानां संचयं कृत्वा तदधोभागसेविनां पुरुषाणां तदारोहणासमर्थानां अनुकम्पया कुसुमानि विसृजति, तेऽपिच भूपातरजोगुण्डनभयात् विमलविस्तीर्णपटेषु प्रतीच्छन्ति, पुनर्यथोपयोगमुपभुञ्जानाः सुखमाप्नुवन्ति, एवं भाववृक्षेऽप्या-योज्यं । तपश्च नियमश्च ज्ञानं च तपोनियमज्ञानानि तान्येव वृक्षस्तं, तत्र अनशनादिबाह्या-भ्यन्तरभेदभिन्नं तपः, नियमस्तु इन्द्रियनोइन्द्रियभेदभिन्नः, तत्र श्रोत्रादीनां संयमनमिन्द्रियनियमः क्रोधादीनां तु नोइन्द्रियनियम इति, ज्ञानं-केवलं संपूर्णं गृह्यते, इत्थंरूपं वृक्षं आरूढः, तत्र ज्ञानस्य संपूर्णासंपूर्णरूपत्वात् संपूर्णताख्यापनायाह—संपूर्णं केवलं अस्यास्तीति केवली, असावपि चतुर्विधः—श्रुतसम्यक्त्वचारित्रक्षायिकज्ञानभेदात्, अथवा श्रुतावधिमनः पर्यायकेवलज्ञानभेदात्, अतः श्रुतादिकेवलव्यवच्छित्तये सर्वज्ञावरोधार्थमाह—अमितज्ञानी, 'ततो' वृक्षात् मुञ्चति 'ज्ञानवृष्टिं' इति कारणे कार्योपचारात् शब्दवृष्टिं, किमर्थं ?—भव्याश्च त जनाश्च भव्यजनाः तेषां विबोधन तदर्थं तन्निमित्तमितियावत् । आह—कृतकृत्यस्य सतस्तत्त्वकथनमनर्थकं, प्रयोजनविरहात्; सति च तस्मिन् कृतकृत्यत्वानुपपत्तेः, तथा सर्वज्ञत्वाद्वीतरागत्वाच्च भव्यानामेव विबोध्नमनुपपन्नं, अभव्यविबोधने असर्वज्ञत्वावीतरागत्वप्रसङ्गादिति, अत्रोच्यते, प्रथमपक्षे तावत् सर्वथा कृतकृत्यत्वं नाभ्युपगम्यते, भगवतः तीर्थकरनामकर्मविपाकानुभावात्; तस्य च धर्मदेशनादिप्रकारेणैवानुभूतेः, द्वितीयपक्षे तु त्रैलोक्यगुरोधर्ममदेशनक्रिया विभिन्नस्वभावेषु प्राणिषु तत्स्वाभाव्यात् विबोधाविबोधकारिणी पुरुषोलूककमलकुमुदादिषु आदित्यप्रका-शनक्रियावत्, उक्तं च वादिमुख्येन—

त्वाद्वाक्यतोऽपि केषाञ्चिदबोध इति मेऽद्भुतम् ।
भानोर्ममरीचयः कस्य, नाम नालोकहेतवः ? ॥
न चाद्भुतमुलूकस्य, प्रकृत्या क्लिष्टचेतसः ।
स्वच्छा अपि तमस्त्वेन, भासन्ते भास्वतः कराः ॥ इत्यादि"

यथा वा सुवैद्यः साध्यमसाध्यं व्याधिं चिकित्समानः प्रत्याचक्षाणश्च नातज्ज्ञः न च रागद्वेषवान्, एवं साध्यमसाध्यं भव्याभव्यकर्मरोगमपनयन्ननपनयंश्च भगवान्नातज्ज्ञो न च रागद्वेषवानिति अलं प्रसङ्गेनेति गाथार्थः ॥

नि. (९०) तं बुद्धिमएण पडेण गणहरा गिण्हिउं निरवसेसं ।
तित्थयरभासियाइं गंथंति तओ पवयणट्ठा ॥

वृ- 'तां' इति तां ज्ञानकुसुमवृष्टिं, बुद्धिमयेन-बुद्ध्यात्मकेन, बुद्धिरेवात्मा यस्यासौ बुद्ध्यात्मकस्तेन, केन ?-पटेन, 'गणधराः' प्रागुक्ताः 'ग्रहीतुं' आदातुं 'निरवशेषां' संपूर्णां

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

ज्ञानकुसुमवृष्टिं, बीजादिबुद्धित्वाद्गणधराणां, ततः किं कुर्वन्ति ?–भाषणानि भाषितानि, भावे निष्ठाप्रत्ययः, तीर्थकरस्य भाषितानि तीर्थकरभाषितानि इति समासः, कुसुमकल्पानि, ग्रथ्नन्ति विचित्रकुसुममालावत्, किमर्थमित्याह–प्रगटं प्रशस्तं प्रधानमादौ वा वचनं प्रवचनं–द्वादशाङ्गं गणिपिटकं तदर्थं, कथमिदं भवेदितियावत्, प्रवक्तीति वा प्रवचनं सङ्घस्तदर्थमिति गाथार्थः ॥ प्रयोजनान्तरप्रतिपिपादयिषयेदमाह–

नि. (९१) घित्तुं च सुहं सुहगणणधारणा दाउं पुच्छिउं चेव ।
एएहिं कारणेहिं जीयंति कयं गणहरेहिं ॥

वृ- 'ग्रहीतुं च' आदातुं च ग्रथितं सत्सूत्रीकृतं सुखं भवति अर्हद्वचनवृन्दं, कुसुमसंघातवत्; 'चः' समुच्चये, एतदुक्तं भवति–पदवाक्यप्रकरणाध्यायप्राभृतादिनियतक्रमस्थापितं जिनवचनं अयत्नेनोपादातुं शक्यते, तथा गणनं च धारणा च गणनधारणे ते अपि सुखं भवतः ग्रथिते सति, तत्र गणनं-एतावदधीतं एतावच्चाध्येतव्यमिति, धारणा अप्रच्युतिः अविस्मृतिरित्यर्थः, तथा दातुं प्रष्टुं च, 'सुखं' इत्यनुवर्त्तते, 'चः' समुच्चय एव, एवकारस्य तु व्यवहितः संटङ्कः, ग्रहीतुं सुखमेव भवतीत्थं योजनीयं, तत्र दानं-शिष्येभ्यो निसर्गः, प्रश्नः-संशयापत्तौ असंशयार्थं विद्वत्सन्निधौ स्वविवक्षासूचकं वाक्यमिति, 'एभिः कारणैः' अनन्तरोक्तैर्हेतुभूतैः 'जीवितं' इति अव्यवच्छित्तिनयाभिप्रायतः सूत्रमेव 'जीयं' ति प्राकृतशैल्या 'कृतं' रचितं गणधरैः, अथवा जीतमिति अवश्यं गणधरैः कर्त्तव्यमेवेति, तन्नामकर्मोदयादिति गाथार्थः ॥ आह–

तीर्थकरभाषितान्येव सूत्रं, गणधरसूत्रीकरणे तु को विशेष इति, उच्यते, स हि भगवान् विशिष्टमतिसंपन्नगणधरापेक्षया प्रभूतार्थमर्थमात्रं स्वल्पमेव अभिधत्ते, न त्वितरजनसाधारणं ग्रन्थराशिमिति, अत आह–

नि. (९२) अत्थं भासइ अरहा सुत्तं गंथंति गणहरा निउणं ।
सासणस्स हियट्ठाए तओ सुत्तं पवत्तइ ॥

वृ- गाथेयं प्रायो निगदसिद्धैव, चालना प्रत्यवस्थानमात्रं त्वभिधीयत– कश्चिदाह– अर्थोऽनभिलाप्यः, तस्य अशब्दरूपत्वात्; अतस्तं कथमसौ भाषत इति, उच्यते, शब्द एव अर्थप्रत्यायनकार्यत्वाद् उपचारतः खलु अर्थ इति, यथा आचारवचनत्वाद् आचार इत्यादि, 'निपुण' सूक्ष्मं बह्वर्थं च, नियतगुणं वा निगुणं, सन्निहिताशेषसूत्रगुणमितियावत्, पाठान्तरं वा 'गणहरा निपुणा निगुणा वा' ॥ आह–शब्दमर्थप्रत्यायकं अर्हन् भाषते, न तु साक्षादर्थं, गणभृतोऽपिच शब्दात्मकमेव ग्रन्थन्ति, कः खल्वत्र विशेष इति, उच्यते, गाथा संबन्धाभिधान एव विहितोत्तरत्वात् यत्किञ्चिदेतत् । आह–तत्पुनः सूत्रं किमादि किंपर्यन्तं कियत्परिमाणं को वाऽस्य सार इति, उच्यते –

नि. (९३) सामाइयमाईयं सुयनाणं जाव बिंदुसाराओ ।
तस्सवि सारो चरण सारो चरणस्स निव्वाणं ॥

वृ- सामायिकमादौ यस्य तत्सामायिकादि, श्रुतं च तज्ज्ञानं च श्रुतज्ञानं 'यावद्बिन्दुसाराद्' इति बिन्दुसारं यावत् बिन्दुसारपयर्यन्तमित्यर्थः, यावच्छब्दादेव तु द्व्यकद्वादशभेदं, 'तस्यापि' श्रुतज्ञानस्य 'सारः' फलं प्रधानतरं वा, चारश्चरणं भावे ल्युट्प्रत्ययः, चर्यते वा अनेनेति

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

चरणं, परमपदं गम्यत इत्यर्थः, सारशब्दः प्रधानफलपर्यायो वर्त्तते, अपिशब्दात् सम्यक्त्वस्यापि सारश्चरणमेव, अथवा व्यवहितो योगः, तस्य श्रुतज्ञानस्य सारश्चरणमपि, अपिशब्दात् निर्वाणमपि, अन्यथा ज्ञानस्य निर्वाणहेतुत्वं न स्यात्, चरणस्यैव ज्ञानरहितस्यापि स्याद्, अनिष्टं चैतत्, 'सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः इति वचनात्, इह त्वनन्तरफलत्वाच्चरणस्य तदुपलब्धिनिमित्तत्वाच्च श्रुतस्य निर्वाणहेतुत्वसामान्ये सत्यपि ज्ञानचरणयोर्गुणप्रधानभावादित्थमुपन्यास इति, अलं विस्तरेण, 'सारः' फलं 'चरणस्य' संयमतपोरूपस्य, निर्वृतिनिर्वाणं– अशेषकर्मरोगापगमेन जीवस्य स्वरूपेऽवस्थानं मुक्तिपदमितियावत्, इहापि नियमतः शैलेश्यवस्थानन्तरमेव निर्वाणभावात् क्षीणघनघातिकर्मचतुष्कस्यापि च निरतिशयज्ञानसमन्वितस्य तामन्तरेणाभावात्, अत उक्तं-सारश्चरणस्य निर्वाणं इति, अन्यथा हि तस्यामपि शैलेश्यवस्थायां क्षायिके ज्ञानदर्शने न न स्त इति, अतः सम्यग्दर्शनादित्रयस्यापि समुदितस्य सतो निर्वाणहेतुत्वं न व्यस्तस्येति गाथार्थः ।। तथा चाह निर्युक्तिकारः –

नि. (९४) सुअनाणंमिवि जीवो वट्टंतो सो न पाउणइ मोक्खं ।
जो तवसंजममइए जोए न चएइ वोढुं जे ।।

वृ- गमनिका–'श्रुतज्ञाने अपि' इति अपिशब्दान्मत्यादिष्वपि जीवो वर्त्तमानः सन् न प्राप्नोति मोक्षमिति, अनेन प्रतिज्ञार्थः सूचितः, यः किंविशिष्ट इति, आह–यस्तपः संयमात्मकान् योगान्न शक्नोति वोढुं इति, अनेन हेत्वर्थ इति, दृष्टान्तस्त्वभ्यूह्यो वक्ष्यति वा, प्रयोगश्च– 'न ज्ञानमेव ईप्सितार्थप्रापकं, सत्क्रियाविरहात्, स्वदेशप्राप्त्यभिलाषिगमनक्रिया-शून्यमार्गज्ञज्ञानवत्, सौत्रो वा दृष्टान्तः मार्गज्ञनिर्यामकाधिष्ठितेप्सितदिक्संप्रापकपवनक्रियाशून्यपोतवत्, 'जे' इति पादपूरणे, 'इ जेराः पादपूरणे' इति वचनात् ।। तथा चाह–

नि. (९५) जह छेयलद्धनिज्ञामओवि वाणियगइच्छियं भूमिं ।
वाएण विना पोओ न चएइ महण्णवं तरिउं ।।

वृ- येन प्रकारेण यथा, 'छेको' दक्षः, लब्धः–प्राप्तो निर्यामको येन पोतेन स तथाविधः, अपिशब्दात् सुकर्णधाराधिष्ठितोऽपि, वणिज्ञ इष्टा वणिगिष्टा तां भूमिं, महार्णवं तरितुं वातेन विना पोतो न शक्नोति, प्राप्तुमिति वाक्यशेषः ।।

नि. (९६) तह नाणलद्धनिज्ञामओवि सिद्धिवसहिं न पाउणइ ।
निउणोवि जीवपोओ तवसंजममारुअविहूणो ।।

वृ- तथा श्रुतज्ञानमेव लब्धो निर्यामको येन-जीवपोतेनेति समासः, अपिशब्दात्सुनिपुणमतिज्ञानकर्णधारधिष्ठितोऽपि, शेषं निगदसिद्धं, किन्तु 'निपुणोऽपि' पण्डितोऽपि, श्रुतज्ञानसामान्याभिधाने सत्यपि तदतिशयख्यापनार्थं निपुणग्रहणं, तस्मात् तपः संयमानुष्ठाने खल्प्रमादवता भवितव्यमिति गाथाद्वयार्थः ।। तथा चेहौपदेशिकमेव गाथासूत्रमाह निर्युक्तिकारः

नि. (९७) संसारसागराओ उब्बुड्डो मा पुणो निबुड्डिज्ञा ।
चरणगुणिवप्पहीणो बुड्डइ सुबहुंपि जाणंतो ।।।

वृ- पदार्थस्तु दृष्टन्ताभिधानद्वारेणोच्यते–यथा नाम कश्चित्कच्छपः प्रचुरतृणपत्रात्मकनिरिछद्रपटलाच्छादितोदकान्ध-कारमहाह्रदान्तर्गतानेकजलचरक्षोभादिव्यसनव्यथितमानसः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिभ्रमन्कथञ्चिदेव पटलरन्ध्रमासाद्य विनिर्गत्य च ततः शरदि निशानाथकरस्पर्शसुखमनुभूय भूयोऽपि तत्रैव निमग्नः, अथ समासादितबन्धुः तद्रन्ध्रोपलब्ध्यर्थं पर्यटन् अपश्यंश्च कष्टतरं व्यसनमनुभवति स्म । एवमयमपि जीवकच्छपोऽनादिकर्मसन्तानपटलसभाच्छादितान्मिथ्या-दर्शनादितमोऽनुगतात् विविध-शारीरमानसाक्षिवेदनज्वरकुष्ठभगन्दरेष्टवियोगानिष्टसंप्रयोगादि-दुःखजलचरानुगतात्, संसरणं संसारः, भावे घञ्प्रत्ययः, स एव सागरस्तस्मात्, परिभ्रमन् कथञ्चिदेव मनुष्यभवसंवर्त्तनीयकर्मरन्ध्रमासाद्य मानुषत्वप्राप्त्या उन्मग्नः सन् जिनचन्द्रवचन-किरणावबोधमासाद्य दुष्प्रापोऽयमिति जानानः स्वजनस्नेहविषयातुरचित्ततया मा पुनः कूर्मवत् तत्रैव निमज्ञेत् । आह–अज्ञानी कूर्मो निमज्ञत्येव, इतरस्तु ज्ञानी हिताहितप्राप्तिपरिहारज्ञः कथं निमज्ञति इति, उच्यते, चरणगुणैः विविधम्–अनेकधा प्रकर्षेण हीनः चरणगुणविप्रहीणः निमज्ञति बह्वपि जानन्, अपिशब्दात् अल्पमपि अथवा निश्चयनयदर्शनेन अज्ञ एवासौ, ज्ञानफल-शून्यत्वात् इति, अलं विस्तरेणेति गाथार्थः ॥ प्रक्रान्तमेवार्थं समर्थयन्नाह–

नि. (९८) सुबहुंपि सुय महीयं किं काही ? चरणविप्पहीनस्स ।
अंधस्स जह पलित्ता दीवसयसहस्सकोडीवि ॥

नि. (९९) अप्पंपि सुयमहीयं पयासयं होइ चरणजुत्तस्स ।
इक्कोवि जह पईवो सचक्खुअस्सा पयासेइ ॥

वृ- गाथाद्वयमपि निगदसिद्धमेव, नवरं दीपानां शतसहस्त्राणि दीपशतसहस्राणि लक्षा इत्यर्थः, तेषां कोटी, अपिशब्दाद्वेअपि ॥ आह–इत्थं सति चरणरहितानां ज्ञानसंपत् सुगतिफलापेक्षया निरर्थिका प्राप्नोति, उच्यते, इष्यत् एव, यत आह–

नि. (१००) जहा खरो चंदनभारवाही, भारस्स भागी नहु चंदनस्स ।
एवं खु नाणी चरणेण हीनो, नाणस्स भागी नहु साग्गईए ॥

वृ- गमनिका–यथा खरः चन्दनभारवाही भारस्य भागी न तु चन्दनस्य, एवमेव ज्ञानी चरणेन हीनः ज्ञानस्य भागी 'न तु' नैव 'सुगतेः' सिद्धिदयितायाः इति गाथार्थः ॥ इदानीं विनेयस्य मा भूदेकान्तेनैव ज्ञानेऽनादरः, क्रियायां च तच्छून्यायामपि पक्षपात इति, अतो द्वयोरपि केवलयोरिष्टफलासाधकत्वमुपर्शयन्नाह–

नि. (१०१) हयं नाणं कियाहीणं, हया अन्नाणओ किया ।
पासंतो पंगुलो दड्ढो, धावमाणो अ अंधओ ॥

वृ- इयं निगदसिद्धैव, नवरं उदाहरणं-एगंमि महानगरे पलीवणं संवुत्तं, तंपि य अनाहा दुवे जना-पंगलो य अंधलो य, ते नगरलोए जलणसंभमब्भंतलोयणे पलाय माणे पासंतो पंगुलओ गमनकिरियाऽभावाओ जाणओऽवि पलायणमग्गं कमागएण अगनिना दड्ढो, अंधोऽवि गमनकिरियाजुत्तो पलायणमग्गमजाणंतो तुरितं जलणंतेण गंतुं अगनिभरियाए खाणीए पडिऊण दड्ढो । एस दिट्ठंतो, अयमत्थोवणओ–एव नाणीवि किरियारहितो न कम्मग्गिणो पलाइउं समत्थो, इतरोऽवि नाणरहियत्तणओ त्ति । अत्र प्रयोगौ भवतः-ज्ञानमेव विशिष्टफलसाऽधकं न भवति, सक्रियायोगशून्यत्वात्, नगरदाहे पङ्गुलोचनविज्ञानवद्, नापि क्रियैव विशिष्टफल साधिका, संज्ञा नसंटङ्करहितत्वात्, नगरदाह एव अन्धस्य पलायनक्रियावत् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आह–एवं ज्ञानक्रिययोः समुदितयोरपि निर्वाणप्रसाधकमासर्थ्यानुपपत्तिः प्रसज्यते, प्रत्येकभावात्, सिकतातैलवत्, अनिष्टं चैतदिति, अत्रोच्यते, समुदायसामर्थ्य हि प्रत्यक्षसिद्धं, यतो ज्ञानक्रियाभ्यां कटादिकार्यसिद्धय उपलभ्यन्ते एव, न तु सिकतासु तैलं, न च दृष्टमपह्नोतुं शक्यते, एवमाभ्यामष्टकार्यसिद्धिरप्यविरुद्धैव, तस्माद्यत्किञ्चिदेतत् । तथा किञ्च-न सर्वथैवानयोः साधनत्वं नेष्यते, देशोपकारित्वात्, देशोपकारित्वमभ्युपगम्यत एव, यत आह–

नि. (१०२) संजोगसिद्धीइ फलं वयंति, नहु एगचक्केण रहो पयाइ ।
अंधो य पंगू य वने समिच्चा, ते संपउत्ता नगरं पविट्ठा ॥

वृ- किंतु तदेव समुदायं समग्रत्वादिष्टफलसाधकं, केवलं तु विकलत्वात् इतरसापेक्षत्वादसाधकमिति, अतः केवलयोरसाधकत्वं प्रतिपादितमिति, अलं विस्तरेण, उक्तसंबन्धगाथाव्याख्यानं प्रकटार्थत्वान्न वितन्यते, नवरं 'समेत्ये'-त्युक्तेऽपि 'तौ संप्रयुक्ता' विति पुनरभिधानमात्यन्तिकसंयोगोपदर्शनार्थमिति । एत्थं उदाहरणं-एगंमि रण्णे रायभएण नगराओ उव्वसिय लोगो ठितो, पुणोवि धाडिभयेण य वहनानि उज्झिअ पलाओ, तत्थ दुवे अनाहप्पाओ, अंधो पंगू य, उज्झिया, गयाए धाडीए लोगग्गिणा वातेन वनदवो लग्गो, ते य भीया, अंधो छुट्ट कच्छो अग्गितेण पलायइ, पंगुणा भणितं-अंध ! मा इतो नास णं, इतो चेव अग्गी, तेन भणितं-कुतो पुण गच्छामि ? पंगुणा भणितं-अहंपि पुरतो अतिदूरे मग्गदेसणाऽसमत्थो पंगू, ता मं खंधे करेहि, जेण अहिकंटकजलणादि अवाए परिहरावेंतो सुहं ते नगरं पावेमि, तेणं तहत्ति पडिवज्जिय अनुट्ठितं पंगुवयणं, गया य खेमेण दोवि नगरं ति । एस दिट्ठंतो, अयमत्थोवणओ–णाणकिरियाहिं सिद्धिपुरं पाविज्जइत्ति । प्रयोगश्च–विशिष्टकारणसंयोगोऽभिलषितकार्यप्रसाधकः, सम्यक्रियोपलब्धिरुपत्वात्, अन्धपङ्ग्वोरिव नगरावाप्तिरिति । यः पुनरभिलषितफलसाधको न भवति, स सम्यक्रियोपलब्धिरूपोऽपि न भवति, इष्ट गमनक्रियावकलविधटितैकचक्ररथवदिति व्यतिरेकः ॥ आह–ज्ञानक्रिययोः सहकारित्वे सति किं केन स्वभावेनोपकुरुते ? किमविशेषण शिबिकोद्वाहकवद्, उत भिन्नस्वभावतया गमनक्रियायां नयनचरणादिव्रातवद् इति, अत्रोच्यते, भिन्नस्वभावतया, यत आह–

नि. (१०३) नाणं पयासगं सोहओ तवो संजमो य गुत्तिकरो ।
तिण्हंपि समाजोगे मोक्खो जिनसासने भणिओ ॥

वृ- तत्र कचवरसमन्वितमहागृहशोधनप्रदीपपुरुषादिव्यापारवद् इह जीवगृहकर्मकचवरभृतशोधनालम्बनो ज्ञानादीनां स्वभावभेदेन व्यापारोऽवसेय इति समुदायार्थः । तत्र ज्ञायतेऽनेनेति ज्ञानं, तच्च प्रकाशयतीति प्रकाशकं, तच्च ज्ञानं प्रकाशकत्वेनैवोपकुरुते, तत्स्वभावत्वात्, गृहमलापनयने प्रदीपवत्, क्रिया तु तपः संयमरूपत्वाद् इत्थमुपकुरुते– शोधयतीति शोधकं, किं तदिति, आह–तापयत्यनेकभवोपात्तमष्टविधं कर्मेति तपः, तच्च शोधकत्वेनैवोपकुरुते, तत्स्वभावत्वाद्, गृहकचवरोज्झनक्रियया तच्छोधने कर्मकरपुरुषवत्, तथा संयमनं संयमः, भावे अप्प्रत्ययः, आश्रवद्वारविरमणमितियावत्, चशब्दः पृथग् ज्ञानादीनां प्रक्रान्तफलसिद्धौ भिन्नोपकारकर्त्तुत्वावधारणार्थः, गोपनं गुप्तिः, स्त्रियां क्तिन् आगन्तुककर्म-कचवरनिरोध इतिहृदयं, गुप्तिकरणशीलो गुप्तिकरः, ततश्च संयमोऽपि अपूर्वकर्मकचवरा गमनिरोध-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तयैवोपकुरुते, तत्स्वभावत्वात्; गृहशोधने पवनप्रेरितकचवरागमनिरोधेन वातायनादि-स्थगनवत्, एवं त्रयाणामेव, अपिशब्दोऽवधारणार्थः, अथवा संभावने, किं संभावयति ?-'त्रयाणामपि' ज्ञानादीनां, किंविशिष्टानां ?-निश्चयतः क्षायिकानां, न तु क्षायिकोपशमिकानामिति, 'समायोगे' संयोगे 'मोक्षः' सर्वथाऽष्टविधकर्ममलवियोगलक्षणः, जिनानां शासनं जिनशासनं तस्मिन्; 'भणितः' उक्तः । आह– 'सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः' इत्यागमो विरुध्यते, सम्यग्दर्शनमन्तरेण उक्तलक्षणज्ञानादित्रयादेव मोक्षप्रतिपादनादिति, उच्यते, सम्यग्दर्शनस्य ज्ञानविशेषत्वाद् रुचिरूपत्वात् ज्ञानान्तर्भावाद् अदोष इति गाथार्थः ॥

इह यत् प्राक् निर्युक्तिकृताऽभ्यधायि 'श्रुतज्ञानेऽपि जीवो वर्त्तमानः सन्न प्राप्नोति मोक्षं' इत्यादि प्रतिज्ञागाथासूत्रं, तत्रैव सूत्रसूचितः खल्वयं हेतुरवगन्तव्यः, कुतः ?–तस्य क्षायोपशमिकत्वात्, अवधिज्ञानवत् इति, क्षायिकज्ञानाद्यवाप्तौ च मोक्षप्राप्तिरिति तत्त्वं, अतः श्रुतस्यैव क्षायोपशमिकत्वमुपदर्शयन्नाह–

नि. (१०४) भावे खओवसमिए दुवालसंगंपि होइ सुयनाणं ।
केवलियनाणलंभो नन्नत्थ खए कसायाणं ॥

वृ- भवनं भावः तस्मिन्, स चौदयिाद्यनेकभेदः, अत आह–'क्षायोपशमिके' द्वादश अङ्गानि यस्मिंस्तत् द्वादशाङ्गं भवति श्रुतज्ञानं, अपिशब्दाद् अङ्गबाह्यमपि, तथा मत्यादिज्ञानत्रयमपि, तथा सामायिकचतुष्टयमपि, तथा केवलस्य भावः कैवल्यं घातिकर्मवियोग इत्यर्थः, तस्मिन् ज्ञानं कैवल्यज्ञानं, 'कैवल्ये सति' अनेन ज्ञानग्रहणेनाज्ञानिप्रकृतिक्तपुरुषप्रतिपादनपरनयमतव्यवच्छेदमाह, तत्र 'बुद्ध्यध्यवसितमर्थं पुरुषन्नेतयते' इति वचनात् प्रकृतिमुक्तस्य च बुद्ध्यभावात् ज्ञानाभाव इति, तस्य लाभः–प्राप्तिः, कथं ?–'कषायाणां' क्रोधादीनां क्षये सति 'नान्यत्र' नान्येन प्रकारेण, इह च छद्मस्थवीतरागावस्थायां प्राधान्यख्यापनार्थमिति, कषायक्षय एव सति निर्वाणं भवति, तद्भावे त्रयणामपि सम्यक्त्वादीनां क्षायिकत्वसिद्धेः । आह–एवं तर्हि यदादावुक्तं 'श्रुतज्ञानेऽपि जीवो वर्त्तमानः सन्न प्राप्नोति मोक्षं, यस्तपः संयमात्मकयोगशून्यः' इति, तद्विशेषणमनर्थकं, श्रुते तपः संयमात्मकयोगसहिष्णोरपि मोक्षाभावादिति, अत्रोच्यते, सत्यमेतत्, किंतु क्षायोपशमिकसम्यक्त्वश्रुतचारित्राणामपि समुदितानां क्षायिकसम्यक्त्वादि-निबन्धनत्वेन पारम्पर्येण मोक्षहेतुत्वाददोषः ॥ आह–इष्ट मस्माभिः मोक्षकारणकारणं श्रुतादि, तस्यैव कथमलाभो लाभो वेति, अत्रोच्यते,

नि. (१०५) अट्ठण्हं पयडीणं उक्कोसठिइइ वट्टमाणो उ ।
जीवो न लहइ सामाइयं चउण्हंपि एगयरं ॥

वृ- 'अष्टानां' इति संख्या, कासां ? - ज्ञानावरणीयादिकर्मप्रकृतीनां, उत्कृष्टा चासौ स्थितिः चोत्कृष्टस्थितिः तस्यां 'वर्त्तमानो' भवन् 'जीवः' आत्मा 'न लभते' न प्राप्नोति, किं तत ?– 'सामायिकं' पूर्वव्याख्यातं, किंविशिष्ट ?-'चतुर्णामपि' सम्यक्त्वश्रुतदेशविरति-सर्वविरतिरूपाणां 'एक तरम्' अन्यतमत् इतियावत्, अपिशब्दात् मत्यादि च, न केवलं न लभते, पूर्वप्रतिपन्नोऽपि न भवति, यतोऽवाप्तसम्यक्त्वो हि न पुनस्तत्परित्यागेऽपि ग्रन्थिमुल्लङ्घ्य उत्कृष्टस्थितीः कर्मप्रकृतीः बध्नोति, आयुष्कोत्कृष्टस्थितौ पुनर्वर्त्तमानः पूर्वप्रतिपन्नको भवति, अनुत्तरविमानोप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पातकाले देवो, न तु प्रतिपद्यामानक इति, तुशब्दाज्ञघन्र्यस्थितौ च वर्त्तमानः पूर्वप्रतिपन्नत्वान्न लभते, आयुष्कजघन्यस्थितौ च वर्तमानो न पूर्वप्रतिपन्नो नापि प्रतिद्यमानकः, जघन्यायुष्कस्य क्षुल्लकभवग्रहणाधारत्वात्, तस्य च वनस्पतिषु भावात्; तत्र च पूर्वप्रतिपन्नप्रतिपद्यमानकाभावात्, प्रकृतीनां च उत्कृष्टेतरभेदभिन्ना खल्वियं स्थितिः–आदितस्तिसृणामन्तरायस्य च त्रिंशत्सागरोपमकोटीकोट्यः परा स्थितिः, सप्ततिर्मोहनीयस्य, नामगोत्रयोविंशतिः, त्रयस्त्रिंशत्साग-रोपमाण्यायुष्कस्य, इति, जघन्या तु द्वादश मुहूर्त्ता वेदनीयस्य, नामगोत्रयोरष्टौ, शेषाणान्तर्मुहूर्त्तं इति गाथार्थः ॥

नि. (१०६) सत्तण्हं पयडीणं अब्भिंतरओ उ कोडिकोडीणं ।
काऊण सागराणं जइ लहइ चउण्हमन्नयरं ॥

वृ- आह–किमेता युगपदेव उत्कृष्टां स्थितिमासादयन्ति उत एकस्यां उत्कृष्टस्थितिरूपायां संजातायां अन्या अपि नियमतो भवन्ति आहोस्विदन्यथा वा वैचित्र्यमत्रेति, उच्यते अत्र विधिरिति, मोहनीयस्य उत्कृष्टस्थितौ शेषाणामपि षण्णामुत्कृष्टैव, आयुष्कप्रकृतेष्ठु उत्कृष्टा वा मध्यमा वा, न तु जघन्येति, मोहनीयरहितानां तु शेषप्रकृतीनां अन्यतमाया उत्कृस्थितेः सद्भावे मोहनीयस्य शेषाणां च उत्कृष्टा वा मध्यमा वा, न तु जघन्येति प्रासङ्गिकं । द्वितीयगाथाख्या–सप्तानामायुष्करहितानां कर्मप्रकृतीनां या पर्यन्तवर्तिनी स्थितिस्तामङ्गीकृत्य सागरोपमाणां कोटीकोटी तस्याः कोटीकोट्या अभ्यन्त रत एव, तुशब्दोऽवधारणार्थः, कृत्वाऽऽत्मानमिति गम्यते 'यदि लभते' यदि प्राप्नोति, चतुर्णो श्रुतसामायिकादीनामन्यतरत्, तत एव लभते नान्यथेति, पाठान्तरं वा 'कृत्वा सागरोपमाणां स्थितिं लभते चतुर्णामन्यतरत्' इत्यक्षरगमनिका । अवयवार्थोऽभिधीयते–सप्तानां प्रकृतीनां यदा पर्यन्तवर्त्तिनी सागरोपमकोटीकोटी पल्योमासंख्येयभागहीना भवति, तदा घनरागद्वेषपरिणामोऽत्यन्तदुर्भेद्यदारुग्रन्थिवत् कर्मग्रन्थिर्भवतीति, आह च भाष्यकारः-

"गंठित्ति सुदुब्भेओ कक्खडघणरूढगूढगंठिव्व ।
जीवस्स कम्मजणिओ घनरागद्दोसपरिणामो ॥ इत्यादि"

तस्मिन् भिन्ने सम्यक्त्वादिलाभ उपजायते, नान्यथेति, तद्भेदश्च मनोविघातपरिश्रमादिभिः दुस्साध्यो वर्त्तते, तथाहि-स जीवः कर्मरिपुमध्यगतः तं प्राप्य अतीव परिश्राम्यति, प्रभूतकर्मारातिसैन्यान्तकृत्त्वेन संजातखेदत्वात्, संग्रामशिरसीव दुर्जयापाकृतानेकशत्रुननरनरेद्रभटवत् । अपरस्त्वाह–किं तेन भिन्नेन ? किं वा सम्यक्त्वादिनाऽवाप्तेन !, यथाऽतिदीर्घा कर्मस्थितिः सम्यक्त्वादिगुणरहितेनैव क्षपिता, एवं कर्मशेषमपि गुणरहित एव क्षपयित्वा विवक्षितफलभाग् भवतु, अत्रोच्यते, स हि तस्यामवस्थायां वर्त्तमानोऽनासादितगुणान्तरो न शेषक्षपणया विशिष्टफलप्रसाधनयालं, चित्तविधातादिप्रचुरविघ्नत्वात् विशिष्टाप्राप्तपूर्वफलप्राप्त्यासन्नत्वात् प्रागभ्यस्तक्रियया तस्यावाप्तुमशक्यत्वाच्च, अनेकसंवत्सरानुपालिताचाम्लादिपुरश्चरणक्रियासादितगुणान्तरोऽरस हायक्रियारहितविद्यासाधकवत्, तथा चाह भाष्यकारः–

"पाएण पुव्वसेवा परिमउई साहणंमि गुरुतरिआ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

होति महाविज्ञाए किरिया पायं सविग्घा य ॥
तह कम्मठितीखवणे परिमउई मोक्खसाहणे गरुई ।
इह दंसणादिकिरिया दुलभा पायं सविग्घा य ॥"

अथवा यत एव बह्वी कर्मस्थितिरनेन उन्मूलिता, अत एवापचीयमानदोषस्य सम्यक्त्वाद-गुणलाभः संजायते, निरशेषकर्मपरिक्षये सिद्धत्ववत, तत एव च मोक्ष इति, अतो न शेषमपि कर्म गुणरहित एवापाकृत्य मोक्षं प्रसाधयतीति स्थितम् । इदानीं सम्यक्त्वादिगुणप्राप्ति-विधिरुच्यते–जीवा द्विधा भवन्ति-भव्याश्चाभव्याश्च, तत्र भव्यानां करणत्रयं भवति, करणमिति परिणामविशेषः, तद्यथा-यथाप्रवृत्तकरणं अपूर्वकरणं अनिवृत्तिकरणं च । तत्र यथैव प्रवृत्तं यथाप्रवृत्तं तद्यानादि, अप्राप्तपूर्वमपूर्वं, निवर्त्तनशीलं निवर्त्ति न निवर्त्ति अनिवर्ति, आ सम्यग्दर्शनलाभात् न निवर्त्तते, तत्राभव्यानां आद्यमेव भवति, तत्र यावद्ग्रन्थिस्थानं तावदाद्यं भवति, तमतिक्रामतो द्वितीयं, सम्यग्दर्शनलाभाभिमुखस्य तृतीयमिति ॥

इदानीं करणत्रयमङ्गीकृत्य सामायिकलाभदृष्टान्तानभिधित्सुराह–

नि. (१०७) पल्लय गिरिसरिउवला पिवीलिया पुरिस पह जरग्गहिया ।
कुद्दव जल वत्थाणि य सामाइयलोभदिट्ठंता ॥

वृ- तत्र पल्लकदृष्टान्तः-पल्लको लाटदेशे धान्यधाम भवति, तत्र यथा नाम कश्चिन्महति पल्ये धान्यं प्रक्षिपति स्वल्पं स्वल्पतरं, प्रचुरं प्रचुरतरं त्वादत्ते, तच्च कालान्तरेण क्षीयते, एवं कर्मधान्यपल्ये जीवोऽनाभोगतः यथाप्रवृत्तकरणेन स्वल्प तरमुपचिन्वन् बहुतरमपचिन्वंश्च ग्रन्थिमासादयति, पुनस्तमतिक्रामतोऽपूर्वकरणं भवति, सम्यग्दर्शनलाभाभिमुस्वस्य तु अनि-वर्त्तीति, एष पल्यकदृष्टान्तः । आह–अयं दृष्टान्त एवानुपपन्नः, यतः संसारिणो योगवतः प्रतिसमयं कर्मणश्चयापचयावुक्तौ, तत्र चासंयतस्य बहुतरस्य चयः अल्पतरस्य चापचयः, यत आगमः–

"पल्ले महइ-महल्ले कुंभं पक्खिवइ सोहए नालिं ।
असंजए अविरए बहु बंधइ निज्ञरइ थोवं ॥
पल्ले महइमहल्ले कुंभं पक्खिवइ सोहए नालिं ।
असंजए अविरए बहु बंधइ निज्ञरइ थोवं ॥
पल्ले महइमहल्ले कुंभं सोहेइ पक्खिवे न किं चि ।
जे संजए अपमत्ते बहु निज्ञरे बंधइ न किंची ॥"

ततश्च एवं पूर्वमसंयतस्य मिथ्यादृष्टेः प्रभूततरबन्धकस्यकस्य कुतो ग्रन्थिदेशप्राप्तिरिति, अत्रोच्यते, ननु मुग्ध ! बाहुल्यमङ्गीकृत्य इदमुक्तं यद्–असंयतस्य बहुतरस्योपचयोऽल्पतरस्य चापचयः, अन्यथाऽनवरतप्रभूततरबन्धाङ्गीकरणे खल्वपचयानवस्थानात् अशेषकर्मपुद्गलानामेव ग्रहणं प्राप्नोति, अनिष्टं चैतत्, सम्यग्दर्शनादिप्राप्तिश्च अनुभवसिद्धा विरुध्यते, तस्मात् प्रायोवृत्तिगोचरमिदं पल्येत्यादि द्रष्टव्यमिति । कथं पुनरनाभोगतः प्रचुरतरकर्मक्षय इति आह–गिरेः सरिद् गिरिसरित् तस्यां उपलाः–पाषाणाः गिरिसरिदुपलाः तद्वत्, एतदुक्तं भवति–यथा गिरिसरिदुपलाः परस्परसन्निघर्षेण उपोगशून्या अपि विचित्राकृतयो जायन्ते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं यथाप्रवृत्तिकरणतो जीवास्तथाविधकर्मस्थितिविचित्ररूपाश्चित्रा इति । पिपीलिकाश्र-कीटिकाः, यथा तासां क्षितौ स्वाभावगमनं भवति १ तथा स्थाण्वारोहण २ संजातपक्षाणां च तस्मादप्युत्पतनं ३ स्थाणुमूर्धनि चावस्थानं ४ कासाञ्चित् स्थाणुशिरसः प्रत्यवसर्पणं ५ एवमिहापि जीवानां कीटिकास्वभावगमनवत् यथाप्रवृत्तकरणं, स्थाण्वारोहणकल्पं त्वपूर्वकरणं, उत्पतनतुल्यं त्वनिवर्त्तिकरणमिति, स्थाणुपर्यन्तावस्थानसदृशं तु ग्रन्थ्यवस्थानमिति, स्थाणुशिरसः प्रत्यवसर्पण-समानं तु पुनः कर्मस्थितिवर्धनमिति ३ ।

पुरुषदृष्टान्तो यथा-केचन त्रयः पुरुषा महानगरयियासया महाटवीं प्रपन्नाः, सुदीर्घमध्वानं अतिक्रामन्तः कालातिपातभीरवो भयस्थानमाढौकमानाः शीघ्रतरगतयो गच्छन्तः पुरस्तात् उभयतः समुत्खातकरवालपाणितस्करद्वयमालोक्य तत्रैकः प्रतीपमनुप्रयातः अपरस्तु ताभ्यामेव गृहीतः तथाऽपरस्तावतिक्रम्य इष्टं नगरमनुप्राप्त इति । एष दृष्टान्तोऽयमर्थोपनयः—एवमिह संसाराटव्यां पुरुषाः संसारिणस्त्रयः कल्प्यन्ते, पन्थाः कर्मस्थितिरतिदीर्घा, भयस्थानं तु ग्रन्थिदेशः, तस्करद्वयं पुना रागद्वेषौ, तत्र प्रतीपगामी यो यथाप्रवृत्तकरणेन ग्रन्थिदेशमासाद्य पुनः अनिष्ट-परिणामः सन् कर्मस्थितिमुत्कृष्टामासादयति, तस्करद्वयावरुद्धस्तु प्रबलरागद्वेषोदयो ग्रन्थिकसत्त्व इत्यर्थः, अभिलषितनगरमनुप्राप्तोऽपूर्वकरणतो रागद्वेषचौरौ अपाकृत्य अनिवर्त्ति-करणेनावाप्त-सम्यग्दर्शन इति ४ । आह—स हि सम्यग्दर्शनमुपदेशतो लभते उतानुपदेशत एवेति, अत्रोच्यते, उभयथापि लभते, कथम् ?, पथः परिभ्रष्टपुरुषत्रयवत्; यथा हि कश्चित् पथि परिभ्रष्टः उपदेशमन्तरेणैव परिभ्रमन् स्वयमेव पन्थानमासादयति, कश्चित्तु परोपदेशेन, अपरस्तु नासादयत्येव, एवमिहाप्यत्यन्तापनष्टसत्पथो जीवो यथाप्रवृत्तकरणतः संसाराटव्यां परिभ्रमन् कश्चिद्ग्रन्थिमासाद्य अपूर्वकरणेन च तमतिक्रम्य अनिवर्त्तिकरणमनुप्राप्य स्वयमेव सम्यग्दर्शनादि निर्वाणपुरस्य पन्थानं लभते, कश्चित्परोपदेशात्, अपरस्तु प्रतीपगामी ग्रन्थिकसत्त्वो वा नैव लभते इति ५ ।

इदानीं ज्वरदृष्टान्तो-यथा हि ज्वरः कश्चित् स्वयमेवापैति कश्चिद्भेषजोपयोगेन कश्चित्तु नैवापैति, एवमिह मिथ्यादर्शनमहाज्वरोऽपि कश्चित्स्वमेवापैति कश्चित् अर्हद्वचनभेषजोपयोगात् अपरस्तु तदोषधोपयोगेऽपि नापैति, करणत्रययोजना स्वयमेव कार्या ६ । कोद्रवदृष्टान्तः-यथा इह केषाञ्चित् कोद्रवाणां मदनभावः स्वयमेव कालान्तरतोऽपैति तथा केषाञ्चित् गोमयादिपरिकर्मतः तथा परेषां नापैति, एवं मिथ्यादर्शनभावोऽपि कश्चित्स्वमेवापैति कश्चिदुपदेशपरिकर्मणा अपरस्तु नापैति, इह च भावार्थः-स हि जीवोऽपूर्वकरणेन मदनार्धशुद्ध-शुद्धकोद्रवानिव दर्शनं मिथ्यादर्शनसम्यग्मिथ्यादर्शनसम्यग्दर्शनभेदेन त्रिधा विभजति, ततोऽनिवर्त्तिकरणविशेषात्सम्यक्त्वं प्राप्नोति, एवं करणत्रययोगवतो भव्यस्य सम्यग्दर्शनप्राप्तिः, अभव्यस्यापि कस्यचिद् यथाप्रवृत्तकरणतो ग्रन्थिमासाद्य अर्हदादिविभूतिसंदर्शनतः प्रयोज-नान्तरतो वा प्रवर्त्तमानस्य श्रुतसामायिकलाभो भवति, न शेषलाभ इति ७ । इदानीं जलदृष्टान्तः-यथा हि जलं मलिनार्धशुद्धशुद्धभेदेन त्रिधा भवति, एवं दर्शनमपि मिथ्यादर्शनादिभेदेन अपूर्वकरणतस्त्रिधा करोतीति, भावार्थस्तु पूर्ववदेव ८ । वस्त्रदृष्टान्तेऽप्यायोजनीयमिति गाथार्थः।

प्रासङ्गिकमुच्यते-एवं सम्यग्दर्शनलाभोत्तरकालमवशेषकर्मणः पल्योपमपृथक्त्वमि तिस्थिति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिक्षयोत्तरकालं देशविरतिरवाप्यते, पुनः शेषायाः संख्येयेषु सागरोपमेषु स्थितेरपगतेषु सर्वविरतिरिति, पुनरवशेषस्थितेरपि संख्येयेष्वेव सागरोपमेषु क्षीणेषु उपशामकश्रेणी, अनेनैव न्यायेन क्षपकश्रेणीति, इयं च देशविरत्यादिप्राप्तिरेतावत्कालतो देवमनुष्येषु उत्पद्यमानस्य अप्रतिपतितसम्यक्त्वस्य नियमेनोत्कृष्टतो द्रष्टव्येति, अन्यथा अन्यतरश्रेणिरहितसम्यक्त्वादिगुणप्राप्तिरेकभवेनाप्यविरुद्धेति, उक्तं च भाष्यकारेण –

"सम्मत्तंमि उ लद्धे पलियपुहुत्तेण सावओ होज्जा ।
चरणोवसमखयाणं सागर संखंतरा हुंति ॥
एवं अप्परिवडिए सम्मत्ते देवमनुयजम्मेसु ।
अन्नतरसेढिवज्जं एगभवेणं च सव्वाइं ॥"

अभिहितं आनुषङ्गिकं, इदानीं यदुदयात् सम्यक्त्वसामायिकादिलाभो न भवति, संजातो वाऽपैति, तानिहावरणरूपान् कषायान् प्रतिपादयन्नाह–पढमिल्लु० । अथवा यदुक्तं 'कैवल्यज्ञानलाभो नान्यत्र कषायक्षयात्' इति, इदानीं ते कषायाः के ? कियन्तः ? को वा कस्य सम्यक्त्वादिसामायिकस्यावरणं ? को वा खलु उपशमनादिक्रमः कस्य इत्यमुमर्थमभिधित्सुराह–

नि. (१०८) पढमिल्लुयाण उदए नियमा संजोयणा कसायाणं ।
सम्मद्दंसणलंभं भवसिद्धीयावि न लहंति ॥

वृ- उत्तरगाथा अपि प्रायः कियत्योऽपि उक्तसंबन्धा एवेति, तत्र व्याख्या-प्रथमा एव प्रथमिल्लुकाः, देशीवचनतो जहा 'पढमिल्ला एत्थ घरा' इत्यादि, तेषां प्रथमिल्लुकानां - अनन्तानुबन्धिनां क्रोधादीनामित्युक्तं भवति, प्राथम्यं चैषां सम्यक्त्वाख्यप्रथमगुणविधातित्वात् क्षपणक्रमाद्वेति, उदयः–उदीरणावलिकागततत्पुद्गलोद्भूतसामर्थ्यता तस्मिन् उदये, किम् ?– 'नियमात्' नियमेनेति, अस्य व्यवहितपदेन सार्धं संबन्धः, तं च दर्शयिष्यामः, इदानीं पुनः प्रथमिल्लुका एव विशिष्यन्ते–किंविशिष्टानां प्रथमिल्लुकानां ?-कर्मणा तत्फलभूतेन संसारेण वा संयोजयन्तीति संयोजनाः, संयोजनाश्च ते कषायाश्चेति विग्रहः तेषामुदये, किम् ?–नियमेन सम्यक्–अविपरीतं दर्शनं सम्यग्दर्शनं तस्य लाभः-प्राप्तिः सम्यग्दर्शनलाभः तं, भवे सिद्धियेषां ते भवसिद्धिकाः । आह–सर्वेषामेव भवे सति सिद्धिर्भवति ?, उच्यते, एवमेतत्; किंतु इह प्रकरणात् तद्भवो गृह्यते, तद्भवसिद्धिका अपि 'न लभन्ते' न प्राप्नुवन्ति, अपिशब्दाद् अभव्यास्तु नैव, अथवा परीतसंसारिणोऽपि नैवेति गाथार्थः ॥

नि. (१०९) बिइयकसायानुदए अपच्चक्खाणनामधेज्जाणं ।
सम्मद्दंसणलंभं विरयाविरइं न उ लहंति ॥

वृ- 'द्वितीया' इति देशविरतिलक्षणद्वितीयगुणघातित्वात् क्षपणक्रमाद्वा, 'कषाया' इति 'कष गतौ' इति कषशब्देन, कर्माभिधीयते, भवो वा, कषस्य आया लाभाः प्राप्तयः कषायाः क्रोधादयः, द्वितीयाश्च ते कषायाश्चेति समासः, तेषां, 'उदयः' इति अस्य पूर्ववदर्थः, किंविशिष्टानां ?-'अप्रत्याख्याननामधेयानां' न विद्यते देशविरतिसर्वविरतिरूपं प्रत्याख्यानं येषु उदयप्राप्तेषु सत्सु ते अप्रत्याख्यानाः, सर्वनिषेधवचनोऽयं नञ् द्रष्टव्यः, अप्रत्याख्याना एव नामधेयं येषां ते तथाविधाः तेषामुदये सति, किम् ?-सम्यग्दर्शनलाभं, भव्या लभन्ते इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शेषः, अयं च वाक्यशेषो विरताविरतिविशेषणे तुशब्दसंसूचितो द्रष्टव्यः, तथा चाह-विरमणं विरतं तथा न विरतिः अविरतिः विरतं चाविरतिश्च यस्यां निवृत्तौ सा तथोच्यते, देशविरतिरित्यर्थः, तां विरताविरतिं न तु लभन्ते, तुशब्दात् सम्यग्दर्शनं तु लभन्ते इति गाथार्थः ।

नि. (११०) तइयकसायानुदए पच्चक्खाणावरणनामधिज्जाणं ।
देसिक्कदेसविरइं चरित्तलंभं न उ लहंति ॥

वृ- सर्वविरतिलक्षणतृतीयगुणघातित्वात् क्षपणक्रमाद्वा तृतीयाः, 'कषायाः' पूर्ववत्, तृतीयाश्च ते कषायाश्चेति समासः, कषायाः क्रोधादय एव चत्वारस्तेषां 'उदय' इति पूर्ववत्, किंविशिष्टानां ?-आवृण्वन्तीत्यावरणाः, प्रत्याख्यानं सर्वविरतिलक्षणं तस्यावरणाः प्रत्याख्यानावरणाः प्रत्याख्यानावरणा एव नामधेयं येषां ते तथाविधास्तेषां । आह-नन्वप्रत्याख्याननामधेयानामुदये न प्रत्याख्यानमस्तीत्युक्तं, नञा प्रतिषिद्धत्वात्, इहापिच आवरणशब्देन प्रत्याख्यानप्रतिषेधात् क एषां प्रतिविशेष इति, उच्यते, तत्र नञ् सर्वनिषेधवचनो वर्त्तते, इह पुनः आङो मर्यादषदर्थवचनत्वात् ईषन्र्यादया वाऽऽवृण्वन्तीत्यावरणाः, ततश्च सर्वविरतिनिषेधार्थ एवायं वर्त्तते न देशविरतिर्निषेधे खल्वावरणशब्द इति, तथा चाह-देशश्चैकदेशश्च देशैकदेशौ, तत्र देशः-स्थूरप्राणातिपातः, एकदेशः तस्यैव यथाश्यवनस्पतिकायातिपातः, तयोः विरतिः-निवृत्तिः तां, लभन्ते इति वाक्यशेषः, अत्रापि वाक्यशेषः, चारित्रविशेषणे तुशब्दाक्षिप्त एव द्रष्टव्यः, यत आह-'चारित्रं' इति 'चर गतिभक्षणयो' रिति, अस्य 'अर्त्तिलूधूसूखनिसहिचर इत्रः' इतीत्रप्रत्ययान्तस्य चरित्रमिति भवति, चरन्त्यनिन्दितमनेन इति चरित्रं क्षयोपशमरूपं तस्य भावश्चारित्रं, एतदुक्तं भवति-इहान्यजन्मोपात्ताष्टविधकर्मसंचयापचयाय चरणं चारित्रं, सर्वसावद्ययोगनिवृत्तिरूपा क्रियोत्यर्थः, तस्य लाभश्चारित्रलाभस्तं न तु लभन्ते, तुशब्दाद्देशैकदेशविरतिं तु लभन्त एवेति गाथार्थः ॥ इदानीममुमेवार्थमुपसंहरन्नाह-

नि. (१११) मूलगुणाणं लंभं न लहइ मूलगुणघाइणं उदए ।
उदए संजलणाणं न लहइ चरणं अहक्खायं ॥

वृ- मूलभूता गुणा मूलगुणा उत्तरगुणाधारा इत्यर्थः, ते च सम्यक्त्वमहाव्रताणुव्रतरूपाः तेषां मूलगुणानां लाभं 'न लभते' न प्राप्नोति, कदेति आह-मूलगुणान् घातयितुं शीलं येषां ते मूलगुणघातिनः तेषां मूलगुणघातिनां -अनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानावरणानां द्वादशानां कषायाणामुदये, तथा ईषद् ज्वलनात् संज्वलनाः सपदि परीषहादिसंघातज्वलनाद्वा संज्वलनाः क्रोधादय एव चत्वारः कषायाः तेषां संज्वलनानामुदये न लभते चारश्चरणं, भावे ल्युट्प्रत्ययः, लब्धं वा त्यजति, किं सर्वम् ?-नेत्याह-यथैवाख्यातं यथाख्यातं इति अकषायं, सकषायं तु लभते एवेति ॥ न च यथाख्यातचारित्रमात्रोपधातिन एव संज्वलनाः, किंतु शेषचारित्रदेशोपघातिनोऽपि, तदुदये शेषचारित्रदेशातिचारसिद्धेः, तथा आह-

नि. (११२) सव्वेविअ अइयारा संजलणाणं तु उदयओ हुंति ।
मूलच्छिज्जं पुन होइ बारसण्हं कसायाणं ॥

वृ- 'सर्वे' आलोचनादिच्छेदपर्यन्तप्रायश्चित्तशोध्याः, अपिशब्दात् कियन्तोऽपिच, अतिचरणान्यतिचाराः चारित्रस्खलनाविशेषाः, संज्वलनानमेवोदयतो भवन्ति, तुशब्दस्य एवकारार्थत्वात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वादशानां पुनः कषायाणां उदयतः, किम् ? -मूलच्छेद्यं भवति, एवं पदयोगः कर्त्तव्यः, 'मूलेन' अष्टमप्रायश्चित्तेन 'छिद्यते' विदार्यते यद्दोषजातं तन्मूलच्छेद्यं, अशेषचारित्रच्छेदकारीति भावार्थः, पुनः शब्दस्तु प्रत्र्यन्तार्थविशेषणार्थ एवेति, 'भवति' संजायते 'द्वादशनां' अनन्तानुबन्धिप्रभृतीनां कषायाणां, उदयेनेति संबध्यते, अथवा मूलच्छेद्यं यथासंभवतः खल्वायोजनीयं, प्रत्याख्यानावरणकषायोदयतस्तावत् मूलच्छेद्यं-सर्वचारित्रविनाशः, एवमप्रत्याख्यानकषायानन्तानुबन्ध्युदयतस्तु देशविरतिसम्यक्त्वं मूलच्छेद्यं यथायोगमिति गाथार्थः ॥ यतश्चैवमतः-

नि. (११३) बारसविहे कसाए खइए उवसामिए व जोगेहिं ।
लब्भइ चरित्तलंभो तस्स विसेसा इमे पंच ॥

वृ- 'द्वादशविधे' द्वादशप्रकारे अनन्तानुबन्ध्यादिभेदभिन्ने 'कषाये' क्रोधादिलक्षणे, 'क्षपिते सति' प्रशस्तयोगैः-निर्वाणहुतभुकूतुल्यतां नीते 'उपशमिते' भस्मच्छन्नाग्निकल्पतां प्रापिते, वाशब्दात् क्षयोपशमं वा-अर्धविध्यातानलोद्घट्टनसमतां नीते 'योगैः' मनोवाक्कायलक्षणैः प्रशस्तैर्हेतुभूतैरिति, किम् ? लभ्यते चारित्रलाभः 'तस्य' चारित्रलाभस्य सामान्यस्य न तु द्वादशविधकषायक्षयादिजन्यस्यैवेति, 'विशेषा' भेदा 'एते' वक्ष्यमाणलक्षणाः 'पञ्च' पञ्चेति संख्या, (इति) गाथाक्षरार्थः ॥ अनन्तरगाथासूचितपञ्चचारित्रभेदप्रदर्शनायाह—

नि. (११४) सामाइयं च पढमं छेओवठावणं भवे बीयं ।
परिहारविसुद्धीयं सुहुमं तह संपरायं च ॥

वृ- 'सामायिकं' इति समानां-ज्ञानदर्शनचारित्राणां आयः—समायः, समाय एव सामायिकं, विनयादिपाठात् स्वार्थे ठक्, आह-समयशब्दस्तत्र पठ्यते, तत्कथं समाये प्रत्ययः ?, उच्यते, 'एकदेशविकृतमनन्यवद्भवती' तिन्यायात्, तच्च सावद्ययोगविरतिरूपं, ततश्च सर्वमप्येतच्चारित्रं अविशेषतः सामायिकं, छेदादिविशेषैस्तु विशेष्यमाणं अर्थतः शब्दान्तरतश्च नानात्वं भजते, तत्र प्रथमं विशेषणाभावात् सामान्य शब्द एवावतिष्ठते सामायिकमिति, तच्च द्विधा-इत्वरं यावत्कथिकं च, तत्र स्वल्पकालमित्वरं, तच्च भरतैरवतेषु प्रथमपश्चिमर्तीकरतीर्थेषु अनारोपितव्रतस्य शिक्षकस्य विज्ञेयमिति, यावत्कथिकं तु यावत्कथा आत्मनः तावत्कालं यावत्कथं प्रथमपश्चिमतीर्थकरतीर्थेषु अनारोपितव्रतस्य शिक्षकस्य विज्ञेयमिति, यावत्कथिकं तु यावत्कथा आत्मनः तावत्कालं यावत्कथं यावत्कथमेव यावत्कथिकं आभववर्त्तीतियावत्; तच्च मध्यमविदेहतीर्थकरतीर्थान्तर्गतसाधूनामवसेयमिति, तेषामुपस्थापनाऽभावात्, अत्र प्रसङ्गतो मध्यमविदेहपुरिमपश्चिमतीर्थकरतीर्थवर्त्तिसाधुस्थितास्थितकल्पः प्रदर्श्यते—तत्र ग्रथान्तरे विवक्षितार्थप्रतिपादिकेयं गाथा—

"आचेलक्क १ द्देसिय २ सेज्ञायर ३ रायपिड ४ किइकम्मे ५ ।
वय ६ जिट्ठ ७ पडिक्कमणे ८ मासं ९ पज्ञोसवणकप्पो १० ॥"

अस्या गमनिका-चउसु ठिआ छसु अट्ठिआ, केषु चतुर्षु इति, आह—

सिज्ञायरपिंडे या चाउज्ञामे य पुरिसजिट्ठे य ।
किइकम्मस्स य करणे चत्तारि अवट्ठिआ कप्पा ॥

नास्य चेलं विद्यते इत्यचेलकः तद्भावः अचेलकत्वं अचेलकत्वे स्थिताः, एतदुक्तं भवति—न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वैदेहमध्यमतीर्थकरतीर्थसाधवः पुरिमपश्चिमतीर्थवर्त्तिसाधुवत् अचेलत्वे स्थिताः, कुतः ?-तेषां ऋजुप्रज्ञत्वात् महाधनमूल्यविचित्रादिवस्त्राणामपि परिभोगात्, पुरिमपश्चिमतीर्थकर-तीर्थवर्त्तिसाधूनां तु ऋजुवक्रजडत्वात् महाधनमूल्यादिवस्त्रापरिभोगाज्जीर्णादिपरिभोगाच्च अचेलकत्वमिति । आह–जीर्णादिवस्त्रसद्भावे, कथमचेलकत्वम् ? उच्यते, तेषां जीर्णत्वात् असारत्वात् अल्पत्वात् विशिष्टार्थक्रियाऽप्रसाधकत्वात् असत्त्वाविशेषात् इति, तथा चेत्थंभूत-वस्त्रसद्भावेऽपि लोकेऽचेलकत्वव्यपदेशप्रवृत्तिश्यते, यथा-काचिदङ्गना जीर्णवस्त्रपरिधाना अन्याभावे सति तद्भावेऽपि च समर्पितसाटकं कुविन्दं तन्निष्पादनमन्थरं प्रति आह–'त्वर कोलिक ! नग्निकाऽहमिति' १ । तथा औद्देशिकेऽप्यस्थिता एव, कथम् ? -इह पुरिमपश्चिम-तीर्थकरसाधुं उद्दिश्य कृतमशनादि सर्वेषामकल्पनीयं, तेषां तु यमुद्दिश्य कृतं तस्यैवाकल्पनीयं न शेषाणामिति २ । तथा शय्यातरराजपिण्डद्वारम्, - पिण्डग्रहणमुभयत्र संबध्यते, तत्र शय्यातरपिण्डे स्थिता एव, शय्यातरपिण्डोहि यथा पुरिमपश्चिमतीर्थकरसाधूनां अकल्पनीयः, एवं मध्यमतीर्थकरसाधूनामपि ३ । राजपिण्डे चास्थिताः, कथम् !-स हि पुरिमपश्चिमतीर्थ-करसाधूनामग्राह्य एव, मध्यमानां तु दोषाभावात् गृह्यते ४ । तथा कृतिकर्म वन्दनमाख्यायते, तत्रापि स्थिताः, कथम् ? यथा पुरिमपश्चिमतीर्थकरसाधूनां प्रभूतकालप्रव्रजिता अपि संयत्यः पूर्वं वन्दनं कुर्वन्ति, एवं तेषामपि, यथा वा क्षुल्लका ज्येष्ठार्याणां कुर्वन्ति, एवं तेषामपि ५ । व्रतानि प्राणातिपातादिनिवृत्तिलक्षणानि तेष्वपि स्थिता एव, यथा पुरिमपश्चिमतीर्थकरसाधवः व्रतानुपालनं कुर्वन्ति, एवं तेऽपीति, आह–तेषां हि मैथुनविरतिवर्ज्यानि चत्वारि व्रतानि, ततश्च कथं स्थिता इति, उच्यते, तस्यापि परिग्रहेऽन्तर्भावात् स्थिता एव, तथाच नापरिगृहीता योषित् उपभोक्युतं पार्यते ६ । तथा प्रतिक्रमणे अस्थिताः, पुरिमपश्चिमसाधूनां,-तत्र मासकल्पेऽप्यस्थिताः, कथम् ? -पुरिमपश्चिमतीर्थकरसाधूनां नियमतो मासकल्पविहारः, मध्यमतीर्थकर-साधूनां तु दोषाभावे न विद्यते, एवं पर्युषणाकल्पोऽपि वक्तव्यः, एतदुक्तं भवति-तस्मिन्नपि अस्थिता एव ९-१०-इति समुदायार्थः,

विस्तरार्थस्तु कल्पादवगन्तव्यः । अभिहितमानुषङ्गिकं, इदानीं प्रकृतमुच्यते–आह-पुरिमपश्चिमतीर्थकरसाधूनामपि यदित्वरं सामायिकं तत्रापि 'करोमि भदन्त ! सामायिकं यावज्जीवं' इतीत्वरस्याप्याभवग्रहणात् तस्यैव उपस्थापनायां परित्यागात् कथं न प्रतिज्ञालोप इति, अत्रोच्यते,-अतिचाराभावात्, तस्यैव सामान्यतः सावद्ययोगविनिवृत्तिरूपेणावस्थितस्य शुद्ध्यन्तरापादनेन संज्ञामात्रविशेषात् इति । चशब्दो वाक्यालङ्कारे, 'प्रथमं' आद्यं चारित्रमिति, इदानीं 'छेदोपस्थापनं' छेदश्चोपस्थापनं च यस्मिंस्तच्छेदोपस्थापनं, एतदुक्तं भवति–पूर्वपर्यायस्य छेदो महाव्रतेषु चोपस्थापनमात्मनो यत्र तच्छेदोपस्थापनं, तच्च सातिचारमनतिचारं च, तत्रानतिचारं यदित्वर-सामायिकस्य शिक्षकस्य आरोप्यत इति, तीर्थान्तरसंक्रान्तौ वा, यथा पार्श्वनाथतीर्थात् वर्धमान-स्वामितीर्थं संक्रामतः पञ्चयामधर्मप्रतिपत्ताविति, सातिचारं तु मूलगुणघातिनो यत् पुनर्व्रतो-च्चारणमिति, उक्तं छेदोपस्थापनं, इदानीं परिहारविशुद्धिकं-तत्र परिहरणं परिहारः-तपोविशेषः तेन विशुद्धिर्यस्मिस्तत्परिहारविशुद्धिकं, तच्च द्विभेदं-निर्विशमानकं निर्विष्टकायिकं च, तत्र निर्विशमानकात्सदासेवकाः तदव्यतिरेकात् तदपि चारित्रं निर्विशमानकमिति, आसेवितवि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वक्षितचारित्रकायास्तु निर्विष्टकायाः त एव स्वार्थिकप्रत्ययोपादानात् निर्विष्टकायिकाः तदव्यतिरेकाच्चारित्रमपि निर्विष्टकायिकमिति, इह च नवको गणो भवति, तत्र चत्वारः परिहारिका भवन्ति, अपरे तु तद्वैयावृत्त्यकराश्चत्वार एवानुपरिहारिकाः, एकस्तु कल्पस्थितो वाचनाचार्यो गुरुभूत इत्यर्थः, एतेषां च निर्विशमानकानामयं परिहारः –

परिहारियाण उ तवो जहन्न मज्झो तहेव उक्कोसो ।
सीउण्हवासकाले भणिओ धीरेहिं पत्तेयं ॥
तत्थ जहन्ने गिम्हे चउत्थ छट्ठं तु होइ मज्झिमओ ।
अट्ठममिहमुक्कोसो एत्तो सिसिरे पवक्खामि ॥
सिसिरे तु जहन्नादी छट्ठादी दसमचरिमगो होति ।
वासासु अट्ठमादी बारसपज्जंतगो नेओ ॥
पारणगे आयामं पंचसु गहो दोसभिग्गहो भिक्खे ।
कप्पट्ठियादि पइदिण करेंति एमेव आयामं ॥
एवं छम्मासतवं चरित्तु परिहारिया अनुचरंति ।
अनुचरगे परिहारियपदट्ठिते जाव छम्मासा ॥
कप्पट्ठितोवि एवं छम्मासतवं करेंति सेसा उ ।
अनुपरिहारिगभावं वयंति कप्पट्ठिगत्तं च ॥
एवेसो अट्ठारससमाणापमाणो उ वण्णिओ कप्पो ।
संखेवओ विसेसा विसेससुत्ताओ नायव्वो ॥
कप्पसमत्तीए तयं जिनकप्पं वा उविंति गच्छं वा ।
पडिवज्जमाणगा पुन जिनस्स पासे पवज्जंति ॥
तित्थयरसमीवासेवगस्स पासे व नो उ अन्नस्स ।
एतेसिं जं चरणं परिहारविसुद्धिगं तं तु ॥

'तथा' इत्यानन्तर्यार्थे, गाथाभङ्गभयाव्यवहितस्योपन्यासः, 'सूक्ष्मसंपरायं' इति संपर्येति एभिः-संसारमिति संपरायाः कषायाः, सूक्ष्मा लोभांशावशेषत्वात् संपराया यत्र तत् सूक्ष्मसंपरायं, तच्च द्विधा–विशुध्यमानकं संक्लिश्यमानकं च, तत्र विशुध्यमानकं क्षपकोपशमकश्रेणिद्वयमारोहतो भवति, संक्लिश्यमानकं तूपशमश्रेणितः प्रच्यवमानस्येति, 'चः' समुच्चये इति गाथार्थः ॥

नि. (११५) तत्तो य अहक्खायं खायं सव्वंमि जीवलोगंमि ।
जं चरिऊण सुविहिआ वच्चंतयरामरं ठाणं ॥

वृ- 'ततश्च' सूक्ष्मसंपरायानन्तरं यथैवाख्यातं यथाख्यातं अकषायचारित्रमिति यथाख्यातं-प्रसिद्धं सर्वस्मिन् जीवलोके, तच्च छद्मस्थवीतरागस्य केवलिनश्च भवति, तत्र च छद्मस्थस्य उपशामकस्य क्षपकस्य वा, केवलिनस्तु सयोगिनोऽयोगिनो वेति, शेषं निगदसिद्धं, नवरं मरणं मरः जरा च मरश्च जरामरौ तौ अविद्यमानौ यस्मिन् तदजरामरमिति गाथार्थः ॥

तत्रैतेषां पञ्चानां चारित्राणां आद्यं चारित्रत्रयं क्षयोपशमलभ्यं चरमचारित्रद्वयं तूपशमक्षय-लभ्यमेव, तंत्र तत्कर्मोपशमक्रमप्रदर्शनायाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (११६) अण दंसनपुंसित्थी वेयछक्कं च पुरुसवेयं च ।
दो दो एगंतरिए सरिसे सरिसं उवसमेइ ॥

वृ- अथवा चरमचारित्रद्वयं श्रेण्यन्तर्भाविनस्तद्विनिर्गतस्य च भवति, अतः श्रेणिद्वयावसरः, तत्र उभयश्रेणिलाभे चादावुपशमश्रेणिर्भवतीत्यतस्तत्स्वरूपाभिधित्सयैवाह-अणदंस० । गाथाव्याख्या-तत्रोपशमश्रेणिप्रारम्भको भवत्यप्रमत्तसंयत एव, अन्ये तु प्रतिपादयन्ति-अविरत-देशविरतप्रमत्ताप्रमत्तसंयतानामन्यतम इति, श्रेणिपरिसमाप्तौ प्रमत्ताप्रमत्तसंयता-नामन्यतमो भवति, स चैवमारभते-अण रणेति दण्डकधातुः अस्याच्प्रत्ययान्तस्य अण इति भवति, शब्दार्थस्तु अणन्तीत्यणाः, अणन्ति-शब्दयन्ति अविकलहेतुत्वेन असातवेद्यं नारकाद्या-युष्कं इत्यणाः-आद्याः क्रोधादयः, अथवा अनन्तानुबन्धिनः क्रोधादयः अनाः, समुदायशब्दाय-नामवयवे वृत्तिदर्शनात् भीमसेनः सेन इति यथा, तत्रासौ प्रतिपत्ता प्रशस्तेष्वध्यवसाय स्थानेषु वर्त्तमानः प्रथमं युगपदन्तर्मुहूर्त्तमात्रेण कालेन अनन्तानुबन्धिनः क्रोधादीन् उपशमयति, एवं सर्वत्र युगपदुपशमककालोऽन्तर्मुहूर्त्तप्रमाण एव द्रष्टव्यः, ततो दर्शनं दर्शस्तं,

दर्शनं त्रिविधं-मिथ्या सम्यग्मिथ्या सम्यग्दर्शनं युगपदेवेति, ततोऽनुदीर्णमपि नपुंसकवेदं युगपदेव यदि पुरुषः प्रारम्भकः, पश्चात्स्त्रीवेदमेककालमेवेति, ततो हास्यादिषट्कं-हास्यरत्यरति-शोकभयजुगुप्साषट्कं, पुनः पुरुषवेदं । अथ स्त्री प्रारम्भिका ततः प्रथमं नपुंसकवेदमुपशमयति पश्चात्पुरुषवेदं ततः षट्कं ततः स्त्रीवेदमिति । अथ नपुंसक एव प्रारम्भकः ततोऽसौ अनुदीर्णमपि प्रथमं स्त्रीवेदमुपशमयति पश्चात्पुरुषवेदं ततः षट्कं ततो नपुंसकवेदमिति, पुनः 'द्वौ द्वौ' क्रोधाद्यौ 'एकान्तरितौ' संज्वलनविशेषक्रोधाद्यन्तरितौ 'स शौ' तुल्यौ 'सशं' युगपदुपशमयति, एतदुक्तं भवति-अप्रत्याख्यानप्रत्याख्यानावरणक्रोधौ सशौ क्रोधत्वेन युगपदुपशमयति, ततः संज्वलनं क्रोधमेकाकिनमेव, ततः अप्रत्याख्यानप्रत्याख्यानावरणमानौ युगपदेव ततः संजवलन-मानमिति, एवं मायाद्वयं सशं पुनः संज्वलनां मायां, एवं लोभद्वयमपि पुनः संज्वलनं लोभमिति, तं चोपशमयंस्त्रिधा करोति, द्वौ भागौ युगपदुपशमयति, तृतीयभागं संख्येयानि खण्डानि करोति, तान्यपि पृथक् कालभेदेनोपशमयति, पुनः संख्येयखण्डानां चरमखण्डं असंख्येयानि खण्डानि करोति, सूक्ष्मसंपरायस्ततः समये समये एकैकं खण्डं उपशमयतीति, इह च दर्शनसप्तके उपशान्ते निवृत्तिबादरोऽभिधीयते, तत ऊर्ध्वमनिवृत्तिबादरो यावत् संख्येयान्तिमद्विचरमखण्डं ।

आह-संज्वलनादीनां युक्त इत्थमुपशमः, अनन्तानुबन्धिनां तु दर्शनप्रतिपत्तावेवोपशमितत्वान्न युज्यत इति, उच्यते, दर्शनप्रतिपत्तौ तेषां क्षयोपशमात् इह चोपशमादविरोध इति, आह-क्षयोप-शमोपशमयोरेव कः प्रतिविशेषः ?, उच्यते, क्षयोपशमो ह्युदीर्णस्य क्षयः अनुदीर्णस्य च विपाकानुभवापेक्षया उपशमः, प्रदेशानुभवतस्तु उदयोऽस्त्येव, उपशमे तु प्रदेशानुभवोऽपि नास्तीति, उक्तं च भाष्यकारेण -

"वेदेइ संतकम्मं खओवसमिएसु नाणुभावं सो ।
उवसंतकसाओ उन वेएइ न संतकम्मंपि ॥"

आह-संयतस्यानन्तानुबन्धिनामुदयो निषिद्धस्तत् कथमुपशम इति, उच्यते, स ह्यनुभाव-कर्माङ्गीकृत्य न तु प्रदेशकर्मेति, तथा चोक्तमार्षे-"जीवे णं भंते ! सयंकडं वेदेइ ?, गोयमा!

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्थेगइअं वेइए अत्थेगइअं नो वेएइ, से केणट्ठेणं ? भन्ते ! पुच्छा, गोयमा ! दुविहे कम्मे पन्नत्ते, तं जहा-पएसकम्मे अ अनुभावकम्मे अ, तत्थ णं जं तं पएसकम्मं तं नियमा वेएइ, तत्थ णं जं तं अनुभावकम्मं तं अत्थेगइअं वेएइ, अत्थे गइयं नो वेएइ" इत्यादि, ततश्च प्रदेशकर्मानुभावोदयस्येहोपशमो द्रष्टव्यः । आह-यद्येवं संयतस्य अनन्तानुबन्ध्यदयतः कथं दर्शनविघातो न भवति ? उच्यते, प्रदेशकर्मणो मन्दानुभावत्वात्, तथा कस्यचिदनुभावकर्मानुभवोऽपि नात्यन्तमपकाराया भवन्नुपलभ्यते, यथा संपूर्णमत्यादिचतुर्ज्ञानिनः तदावरणोदय इत्यलं विस्तरेण ॥ इह च संख्येयलोभखण्डान्युपशमयन् बादरसंपरायः, चरमसंख्येण्डासंख्येयखण्डान्युप-शमयन् सूक्ष्मसंपराय इति, तथा चाह निर्युक्तिकारः-

नि. (११७) लोभाणुं वेअंतो जो खलु उवसामओ व खवगो वा ।
सो सुहुमसंपराओ अहखाया ऊणओ किंची ॥

वृ- गाथेयं गतार्थत्वात् न विव्रियते, नवरं यथाख्यातात् किञ्चिन्न्यून इति, ततः सूक्ष्मसंपरायावस्थामन्तर्मुहूर्त्तमात्रकालमानामनुभूयोपशमकनिर्ग्रंन्थो यथाख्यातचारित्रीभवति ॥ स च यदि बद्धायुः प्रतिपद्यते तदवस्थश्च म्रियते, ततो नियमतोऽनुऽाविमानवासिषु उत्पद्यते, श्रेणिप्रच्युतस्य त्वनियमः, अथाबद्धायुः अतोऽन्तर्मुहूर्त्तमात्रं उपशामकनिर्ग्रन्थो भूत्वा नियमतः पुनरपि उदितकषायः कार्त्स्येन श्रेणिप्रतिलोममावर्तते, तथा चामुमेवार्थमभिधित्सुराह-

नि. (११८) उवसामं उवनीआ गुणमहया जिनचरित्तसरिसंपि ।
पडिवायंति कसाया किं पुण सेसे सरागत्थे ॥

वृ- 'उपशमः' शान्तावस्था तमुपशमं, अपिशब्दात् क्षयोपशममपि, उपनीताः गुणैर्महान् गुणमहान् तेन गुणमहता-उपशमकेन, किम् ?-प्रतिपातयन्ति कषायाः, संयमाद् भवे वा, कम् ?-जिनचारित्रतुल्यमपि उपशमकं, किं पुनः शेषान् सरागस्थानिति । यथेह भस्मच्छन्नानलः पवनाद्यासादितसहकारिकारणान्तरः पुनः स्वरूपमुपदर्शयति, एवमसावप्युदितकषायानलो जघन्यतस्तद्भव एव मुक्तिं लभते, उत्कृष्टतस्तु देशोनमर्धपुद्गलपरावर्त्तमपि संसारमनुबघ्नातीति। यतश्चैवं तीर्थकरोपदेशः अत औपदेशिकं गाथाद्वयमाह निर्युक्तिकारः-

नि. (११९) जइ उवसंतकसाओ लहइ अनंतं पुणोऽवि पडिवायं ।
न हु भे वीससियव्वं थेवे य कसायसेसंमि ॥

नि. (१२०) अणथोवं वणथोवं अग्गीथोवं कसायथोवं च ।
नहु भे वीससियव्वं थेवंपि हु तं बहुं होइ ॥

वृ- प्रथमगाथा प्रकटार्थत्वान्न वितयन्ते, ऋणस्य स्तोकं ऋणस्तोकं तथाच स्वल्पादपि ऋणात् दासत्वं प्राप्ता वणिग्दुहितेति, उक्तं च भाष्यकारेण-

"दासत्तं देइ अनं अचिरा मरणं वनो विसप्पंतो ।
सव्वस्स दाहमग्गी देंति कसाया भवमनंतं ॥"

अपिचशब्दनिपातसाफल्यं पूर्वोक्तानुसारेण स्वबुद्ध्या वक्तव्यमिति गाथार्थः ॥ इत्थमौपशमिकं चारित्रमुक्तं, इदानीं क्षायिकमुच्यते, अथवा सूक्ष्मसंपराययथाख्यातचारित्रद्वयं उपशमश्रेण्यङ्गीकरणेनोक्तं, इदानीं क्षपकश्रेण्यङ्गीकरणतः प्रतिपादयन्नाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (१२१) अण मिच्छ मीस सम्मं अट्ठ नपुंसित्थीवेय छक्कं च ।
पुंवेयं च खवेइ कोहाइए य संजलणे ॥

वृ- इह क्षपकश्रेणिप्रतिपत्ताऽसंयतादीनामन्यतमोऽत्यन्तविशुद्धपरिणामो भवति, स च उत्तमसंहननः, तत्र पूर्वविदप्रमत्तः शुक्लध्यानोपगतोऽपि प्रतिपद्यते, अपरे तु धर्मध्यानोपगत एवेति, प्रतिपत्तिक्रमश्चायम्–प्रथममन्तर्मुहूर्तेन अनन्तानुबन्धिनः क्रोधादीन् युगपत्क्षपयति, तदनन्तभागं तु मिथ्यात्वे प्रक्षिप्य ततो मिथ्यात्वं सहैव तदंशेन युगपत् क्षपयति, यथा हि अतिसंभृतो दावानलः खलु अर्धदग्धेन्धन एव इन्धनान्तरमासाद्य उभयमपि दहति, एवमसावपि क्षपकः तीव्रशुभपरिणामत्वात् सावशेषं अन्यत्र प्रक्षिप्य क्षपयति, एवं पुनः सम्यग्मिथ्यात्वं ततः सम्यक्त्वमिति, इह च यदि बद्धायुः प्रतिपद्यते अनन्तानुबन्धिक्षये च व्युपरमति, ततः कदाचित् मिथ्यादर्शनोदयतस्तानपि पुनरुपचिनोति, मिथ्यात्वे तद्बीजसंभवात्, क्षीणमिथ्यात्वस्तु नोपचिनोति, मूलाभावात्, तदवस्थश्च मृतोऽवश्यमेव त्रिदशेषु उत्पद्यते, क्षीणसप्तकोऽपि तदप्रतिपतितपरिणाम इति, प्रतिपतितपरिणामस्तु नानामतित्वात् सर्वगतिभाग् भवति, आह–मिथ्यादर्शनादिक्षये किमसौ अदर्शनो जायते उत नेति, उच्यते, सम्यग्दृष्टिरेवासौ, आह–ननु सम्यग्दर्शनपरिक्षये कुतः सम्यग्दृष्टित्वम् ?, उच्यते, निर्मदनीकृतकोद्रवकल्पा अपनीतमिथ्यात्वभावा मिथ्यात्वपुद्गला एव सम्यग्दर्शनं, तत्परिक्षये च तत्त्वश्रद्धानलक्षण-परिणामाप्रतिपातात् प्रत्युत श्लक्ष्णाभ्रपटलापगमे चक्षुर्दर्शनवत् शुद्धतरोपपत्तेरिति अलं प्रपञ्चेन। स च यदि बद्धायुः प्रतिपद्यते ततो नियमात् सप्तके क्षीणे अवतिष्ठत एव, स च सम्यग्दर्शन-मशेषमेव क्षपयति, अबद्धायुस्तु अनुपरत एव समस्तां श्रेणिं समापयति इति, स च स्वल्पसम्यग्दर्शनावशेष एव अप्रत्याख्यानप्रत्याख्यानावरणकषायाष्टकं युगपत् आरभते ॥ एतेषां च मध्यभागं क्षपयन् एताः सप्तदश प्रकृतीः क्षपयति, तत्प्रतिपादकमिदं गाथाद्वयम् –

नि. (१२२) गइआनुपुव्वी दो दो जाइनामं च जाव चउरिंदी ।
आयावं उज्जोयं थावरनामं च सुहुमं च ॥

वृ- गतिश्चनुपूर्वी च गत्यानुपूर्व्यौ 'दो दो' इति द्वे द्वे तन्नामनी, जातिनाम चेत्यस्मात् नामग्रहणं अभिसंबध्यते, एतदुक्तं भवति–नरकगतिनाम नरकानुपूर्वीनाम च, आनुपूर्वी-वृषभनासिकान्य-स्तरज्जूसंस्थानीया, यया कर्मपुद्गलसंहत्या विशिष्टं स्थानं प्राप्यतेऽसौ, यया वोर्ध्वोत्तमाङ्ग-धरणादिरूपो नियमतः शरीरविशेषो भवति साऽऽनुपूर्वीति, तथा तिर्यग्गतिनाम तिर्यगानुपूर्वीनाम च, एवं गत्यानुपूर्वीनामनी द्वे द्वे, तथा 'जातिनाम' एकेन्द्रियादिजातिनाम यावच्चतुरिन्द्रियाः, एतदुक्तं भवति-एकेन्द्रियजातिनाम द्वीन्द्रियजातिनाम एवं शेषयोजनाऽपि कार्येति । आह–एकेन्द्रियाद्यानुपूर्वीनाम कस्मान्नोच्यते, आचार्य आह–तस्य तिर्यगानुपूर्वीनामक्षपणप्रति-पादनेनोक्तार्थत्वात्, 'चः' समुच्चये, तथा 'आतपं' इति आतपनाम, यदुदयात् आतपवान् भवति, 'उद्योतं' इति उद्योतनाम, यदुदयादुद्योतवान् भवति, स्थावराः-पृथिव्यादयः तन्नाम च पूर्ववत्, 'सूक्ष्मं' इति सूक्ष्मनाम च,

नि. (१२३) साहारणमज्जत्तं निद्दानिद्दं च पयलपयलं च ।
थीणं खवेइ ताहे अवसेसं जं च अट्ठण्हं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- 'साधारणं' इति साधारणनाम, अनन्तवनस्पतिनामत्यर्थः, 'अपर्याप्तं' इति अपर्याप्तकनाम, तथा निद्रानिद्रा च इत्यादि प्रकटार्थत्वान्न विव्रियते, नवरं स्त्याना चैतन्यऋद्धिर्यस्यां सास्त्यानर्धिः, स्त्यानर्ध्युत्तरकालमवशेषं यदष्टानां कषायाणां तत् क्षपयति, सर्वमिदमन्तर्मुहूर्त्तमात्रेणेति, ततो नपुंसकवेदं, ततःस्त्रीवेदं, ततो हास्यादिषट्कं, ततः पुरुषवेदं च खण्डत्रयं कृत्वा खण्डद्वयं युगपत् क्षपयति, तृतीयखण्डं तु संज्वलनक्रोधे प्रक्षिपति, पुरुषे प्रतिपत्तर्ययं क्रमः, नपुंसकादिप्रतिपत्तरि तु उपशमश्रेणिन्यायो वक्तव्यः, ततः क्रोधादींश्च संज्वलनान् प्रत्येकमन्तर्मुहूर्त्तमात्रकालेनोक्तेनैव न्यायेन क्षपयति, श्रेणिपरिसमाप्तिकालोऽप्यन्तर्मुहूर्त्तमेव, अन्तर्मुहूर्त्तानामसंख्येयत्वात्, लोभचरमखण्डं तु संख्येयानि खण्डानि कृत्वा पृथक् पृथक् कालभेदेन क्षपयति, चरमखण्डं पुनरसंखयेयानि खण्डानि करोति, तान्यपि समये समये एकैकं क्षपयति, इह च क्षीणदर्शनसप्तको निवृत्तिबादर उच्यते, तत उर्ध्वमनिवृत्तिबादरो यावत् चरमलोभखण्डमिति, तत ऊर्ध्वमसंख्येयखण्डानि क्षपयन् सूक्ष्मसंपरायो यावच्चरमलोभाणुक्षयः, तत ऊर्ध्वं यथाख्यातचारित्रीभवति ॥ स च महासमुद्रप्रतरणपरिश्रान्तवत् मोहसागरं तीर्त्वा विश्राम्यति, ततश्छद्मस्थवीतरागत्वद्विचरमसमययोः प्रथमे निद्रादि क्षपयति तथा चाह निर्युक्तिकारः-

नि. (१२४) वीसमिऊण नियंठो दोहि ऊ समएहि केवले सेसे ।
पढमे निद्दं पयलं नामस्स इमाओ पयडीओ ॥

नि. (१२५) देवगइआनुपुव्वीविउव्विसंघयण पढमवज्जाइ ।
अन्नयरं संठाणं तित्थयराहारनामं च ॥

वृ- अर्थस्तु प्रायः सुगमत्वात् न वितन्यते, नवरं वैकुर्विकं च संहननानि चेति समासः, तानि प्रथमसंहननवर्जानि क्षपयति, तानि च षड् भवन्ति, तथा चोक्तम्–

"वज्जरिसहनारायं पढमं बिइयं च रिसहनारायं ।
नारायमद्धनाराय कीलिया तह य छेवट्ठं ॥"

तथा अन्यतरसंस्थानं मुक्त्वा यस्मिन्व्यवस्थितः शेषाणि क्षपयति, तानि चामूनि–

"चउरंसे नग्गोहे मंडले साति वामणे खुज्जे ।
हुंडेवि अ संठाणे जीवाणं छ मुणेयव्वा ॥
तुल्लं वित्थडबहुलं उस्सेहबहुं च मडहकोट्ठं च ।
हेट्ठिल्लकायमडहं सव्वत्थासंठियं हुंडं ॥"

तथा तीर्थकरनाम आहारकनाम च क्षपयति, यद्यतीर्थकरः प्रतिपत्तेति, अथ तीर्थकरस्ततः खल्वाहारकनामैवेति, 'चः' समुच्चये ॥

नि. (१२६) चरमे नाणावरणं पंचविहं दंसणं चउवियप्पं ।
पंचविहमंतरायं खवइत्ता केवली होइ ॥

वृ- चरमे समये ज्ञानावरणं पञ्चविधं मतिज्ञानावरणादि, दर्शनं चतुर्विकल्पं पञ्चविधमन्तरायं च दानलाभभोगोपभोगवीर्यान्तरायाख्यं क्षपयित्वा केवली भवतीति गाथार्थः ॥ ततः–

नि. (१२७) संभिन्नं पासंतो लोगमलोगं च सव्वओ सव्वं ।
तं नत्थि जं न पासइ भूयं भव्वं भविस्स च ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- समेकीभावेन भिन्नं संभिन्नं, यथा बहिस्तथा मध्येऽपीत्यर्थः, अथवा संभिन्नमितिद्रव्यं गृह्यते, कथम् ? –कालभावौ हि तत्पर्यायौ, ताभ्यां समस्ताभ्यां समन्ताद्वा भिन्नं संभिन्नं 'पश्यन्' उपलभमानो, लोक्यत् इति लोकः, केवलज्ञानभास्वतोपलभ्यत इति भावार्थः, 'लोकोऽप्युपलभ्यत एव, तथापि धर्मादीनां वृत्तिर्द्रव्याणां यत्र स लोकः इति तं, अलोकं च इत्यनेन क्षेत्रं प्रतिपादितं भवति, द्रव्याद्येतावदेव विज्ञेयमिति, किमेकया दिशा ? –नेत्याह– 'सर्वतः' सर्वासु दिक्षु, तास्वपि किं कियदपि द्रव्यादि उत नेत्याह– 'सर्वं' निरवशेषं, अमुमेवार्थं स्पष्टयन्नाह–तन्नास्ति किञ्चित् ज्ञेयं यन्न पश्यति 'भूतं' अतीतं, भवतीति भव्यं, वर्त्तमानमित्यर्थः, भावकर्मणोः प्राप्तयोः 'भव्यगेयेत्यादिनिपातनात्' कर्त्तरि सिद्धं, 'भविष्यद्' भावि वा, 'चः' समुच्चये इति गाथार्थः।

इत्थं तावदुपोद्घातनिर्युक्तौ प्रस्तुतायां प्रसङ्गतो यदुक्तं— 'तपोनियमज्ञानवृक्षमारूढः केवली' इति अयमसौ केवली निदर्शितः, एतस्मात् सामायिकादिश्रुतं आचार्यपारम्पर्येण आयातं, एतस्माच्च जिनप्रवचनप्रसूतिः, सर्वमिदं प्रासङ्गिकं निर्युक्तिसमुत्थानप्रसङ्गेनोक्तं, इदानीमपि केयं जिनप्रवचनोत्पत्तिः कियदभिधानं चेदं जिनप्रवचनं को वाऽस्य अभिधानविभाग इत्येतत् प्रासङ्गिकशेषं शेषद्वारसङ्ग्रहं वाऽभिधातुकाम आह–

नि. (१२८) जिनपवयणउप्पत्ती पवयणएगट्ठिया विभागो य।
दारविही य नयविही वक्खाणविही य अनुओगो ॥

वृ- इह 'जिनप्रवचनोत्पत्तिः प्रवचनैकार्थिकानि एकार्थिकविभागश्च' एतत् त्रितयमपि प्रसङ्गशेषं, द्वाराणां विधिःद्वारविधिः, विधानं विधिः, स ह्युपोद्घातोऽभिधीयते, नयविधिस्तु चतुर्थं अनुयोगद्वारमिति, शिष्याचार्यपरीक्षाऽभिधानं तु व्याख्यानविधिरिति, अनुयोगस्तु सूत्रस्पर्शकर्निुक्तिः सूत्रानुगमश्चेति समुच्चयार्थः। आह–चतुर्थमनुयोगद्वारं नयविधिमभिधाय पुनस्तृतीयानुयोगद्वाराख्यानुयोगाभिधानं किमर्थम् ? उच्यते, नयानुगमयोः सहचरभावप्रदर्शनार्थं, तथाहि–नयानुगमौ प्रतिसूत्रं युगपद् अनुधावतः, नयमतशून्यस्य अनुगमस्याभावात्, अनुयोग-द्वारचतुष्टयोपन्यासे तु नयानामन्तेऽभिधानं युगपद्वक्तुं अशक्यत्वात्। आह–चतुरनुयोग-द्वारातिरिक्तव्याख्यानविधेरुपन्यासो अनर्थकः, न, अनुगमाङ्गत्वात्, व्याख्याऽङ्गत्वाच्चानुगमाङ्गता इत्यलं विस्तरेणेति गाथार्थः ॥ तत्र जिनप्रवचनोत्पत्तिनिर्युक्ति-समुत्थानप्रसङ्गतोऽभिहिता, अर्हद्वचनत्वात् प्रवचनस्य, इदानीं प्रवचनैकार्थिकानि तद्विभागं च प्रदर्शयन्नाह–

नि. (१२९) एगट्ठियाणि तिन्नि उ पवयण सुत्तं तहेव अत्थो अ।
इक्किक्कस्स य इत्तो नामा एगट्ठिआ पंच ॥

वृ- एकोऽर्थो येषां तान्येकार्थिकानि, त्रीण्येव, प्रवचनं पूर्वव्याख्यातं, सूचनात् सूत्रं, अर्यंत इत्यर्थः, 'चः' समुच्चये, इह च प्रवचनं सामान्यश्रुतज्ञानं, सूत्रार्थौ तु तद्विशेषाविति, आह–सूत्रार्थयोः प्रवचनेन सहैकार्थता युक्ता, तद्विशेषत्वात्, सूत्रार्थयोस्तु परस्परविभिन्नत्वात् न युज्यते, तथा च सूत्रं व्याख्येयं अर्थस्तु तद्व्याख्यानमिति, अथवा त्रयाणामप्येषां भिन्नार्थतैव युज्यते, प्रत्येकमेकार्थिकविभागसद्भावात्; अन्यथा एकार्थिकत्वे सति भेदेनैकार्थिकाभि-धानमयुक्तमिति, अत्रोच्यते, यथा हि मुकुलविकसितयोः पद्मविशेषयोः संकोचविकास-पर्यायभेदेऽपि कमलसामान्यतयाऽभेदः, एवं सूत्रार्थयोरपि प्रवचनापेक्षया परस्परतश्चेति, तथाहि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अविवृतं मुकुलतुल्यं सूत्रं, तदेव विवृतं प्रबोधितं विकचकल्पमर्थः, प्रवचनं चोभयमपीति, यथा चैषामेकार्थिकविभाग उपलभ्यते-कमलमरविन्दं पङ्कजमित्यादि पद्मैकार्थिकानि, तथा कुडूमलं वृन्दं संकुचितमित्यादि मुकलैकार्थिकानि, तथा विकचं फुल्लं विबुद्धमित्यादि विकसितैकार्थिकानि, तथा प्रवचनसूत्रार्थानामपि पद्ममुकुलविकसितकल्पानामेकार्थिकविभागोऽविरुद्धः। अथवा व्याख्यायते-

एकार्थिकानि त्रीण्येवाश्रित्य वक्तक्यानि, प्रवचनमेकार्थगोचरः तथा सूत्रमर्थश्चेति, शेषं पूर्ववत् । आह-द्वारगाथायां यदुक्तं 'प्रवचनैकार्थिकानि वक्तव्यानि' तद्व्याहन्यते, न, सामान्यविशेषरूपत्वात्प्रवचनस्य, सूत्रार्थयोरपि प्रवचनविशेषरूपत्वेन प्रवचनत्वोपपत्तेः । आह-यद्येवं विभागश्चेति द्वारोपन्यासानर्थक्यं, न, विभागश्चेति किमुक्तं भवति ? नाविशेषेणैकार्थिकानि वक्तव्यनि सामान्यविशेषरूपस्यापि प्रवचनस्य-पञ्चदशेति, किं तर्हि ?-विभागश्च वक्तव्यः, विशेषगोचराभिधानपर्यायाणां सामान्यगोचराभिधानपर्यायत्वानुपपत्तेः, न हि चूतसहकारादयो वृक्षादिशब्दपर्याया भवन्ति, लोके तथाऽदृष्टत्वाद् इति गाथार्थः ॥

नि. (१३०) सुय धम्म तित्थ मग्गो पावयणं पवयणं च एगट्ठा ।
सुत्तं तंतं गंथो पाढो सत्थं च एगट्ठा ॥

वृ- श्रुतस्य धर्मः-स्वभावः श्रुतधर्मः बोधस्वभावत्वात् श्रुतस्य धर्मो बोधोऽभिधीयते, अथवा जीवपर्यायत्वात् श्रुतस्य श्रुतं च तद्धर्मश्चेति समासः, सुगतिधारणाद्वा श्रुतं धर्मोऽभिधीयते, 'तीर्थं' प्राक्निरूपितशब्दार्थं, तच्च संघ इत्युक्तं, इह तु तदुपयोगानन्यत्वात् पवचनं तीर्थमुच्यते, तथा मृज्यते-शोध्यते अनेनात्मेति मार्गः, मार्गणं वा मार्गो, अन्वेषणं शिवस्येति, तथा प्रगतं अभिविधिना जीवादिषु पदार्थेषु वचनं प्रावचनं, प्रवचनं तु पूर्ववत् उक्तः प्रवचनविभागः, इदानीं सूत्रविभागोऽभिधीयते-तत्र सूचनात् सूत्रं, तन्यतेऽनेनास्मादस्मिन्निति वा अर्थ इति तन्त्रं, तथा ग्रथ्यतेऽनेनास्मादस्मिन्निति वाऽर्थ इति ग्रन्थः, पठनं पाठः पठ्यते वा तदिति पाठः पठ्यते वाऽनेनास्मादस्मिन्निति या अभिधेयमिति पाठः, व्यक्तीक्रियत इति भावार्थः, तथा शास्यतेऽनेनास्मादस्मिन्निति वा ज्ञेयमात्मनेति वा शास्त्रं, एकार्थिकानीति पुनरभिधानं सामान्यविशेषयोः कथञ्चिद्भेदख्यायापनार्थमिति गाथार्थः ॥

नि. (१३१) अनुओगो य नियोगो भास विभासा य वत्तियं चेव ।
अनुओगस्स उ एए नामा एगट्ठिआ पंच ॥

वृ- सूत्रस्यार्थेन अनुयोजनमनुयोगः, अथवा अभिधेयो व्यापारः सूत्रस्य योगः, अनुकूलोऽनुरूपो वा योगोऽनुयोगः, यथा घटशब्देन घटोऽभिधीयते, तथा नियतो निश्चितो वा योगो नियोगः, यथा घटशब्देन घट एवोच्यते न पटादिरिति, तथा भाषणात् भाषा, व्यक्तीकरणमित्यर्थः, यथा घटनात् घटः, चेष्टावानर्थो घट इति, विविधा भाषा विभाषा, पर्यायशब्दैः तत्स्वरूपकथनं, यथा घटः कुटः कुम्भ इति, वार्तिकं त्वशेषपर्यायकथनमिति शेषं सुबोधं, अयं गाथा समुदायार्थः, अवयवार्थं तु प्रतिद्वारं वक्ष्यति, तत्र प्रवचनादीनामविशेषेणैकार्थिकाभिधानप्रक्रमे सति एकार्थिकानुयोगादेर्भेदनोपन्यासान्वाख्यानं अर्थगरीयस्त्वख्यापनार्थं, उक्तं च-'सुत्तधरा अत्थधरो इत्यादि' ॥ तत्र अनुयोगाख्यप्रथमद्वारस्वरूपव्याचिख्यासयाऽऽह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (१३२) नामं ठवणा दविए खित्ते काले य वयण भावे य ।
एसो अनुओगस्स उ निक्खेवो होइ सत्तविहो ॥

वृ- गमनिका-'नाम' प्राक् निरूपितं, तत्र नामानुयोगो-यस्य जीवादेरनुयोग इति नाम क्रिते, नाम्नो वा अनुयोगो नामानुयोगः, नामव्याख्येत्यर्थः, 'स्थापना' अक्षनिक्षेपादिरूपा, तत्र अनुयोगं कुर्वन् कश्चित् स्थाप्यते, स्थापनायामनुयोगः स्थापनानुयोग इति समासः, स्थापना चासौ अनुयोगश्चेति वा, 'द्रव्ये' इति द्रव्यविषयोऽनुयोगो द्रव्यानुयोगः, स च आगमनो-आगमज्ञशरीरेतरव्यतिरिक्तः द्रव्यस्य द्रव्याणां द्रव्येण द्रव्यैः द्रव्ये द्रव्येषु वाऽनुयोगो द्रव्यानुयोगः, एवं क्षेत्रादिष्वपि षड्भेदयोजना कार्येति, तत्र द्रव्यानुयोगो द्विविधः-जीवद्रव्यानुयोगः अजीवद्रव्यानुयोगश्च, एकैकः स चतुर्धा-द्रव्यतः क्षेत्रतः कालतो भावतश्च, तत्र द्रव्यतो जीव एकं द्रव्यं क्षेत्रतोऽसंख्ययेयप्रदेशावगाढः कालतोऽनाद्यपर्यवसितः भावतोऽनन्तज्ञानदर्शन-चारित्राचारित्रदेशचारित्र अगुरुलधुपर्यायवान् इति, अजीवद्रव्याणि परमाण्वादीनि, तत्र परमाणुर्द्रव्यत एकं द्रव्यं क्षेत्रत एकप्रदेशावगाढः कालतो जघन्येन समयमेकं द्वौ वा उत्कृष्टतस्तु असंख्येया उत्सर्पिण्यवसर्पिण्यः, भावतस्तु एकरस एकवर्णः द्विस्पर्श एकगन्ध इति, एतेषां च स्वस्थानेऽनन्ता रसादिपर्याया एकगुणनितक्तादिभेदेन द्रष्टव्याः, एवं दूव्यणुका-दीनामप्यनन्ता-णुस्कन्धावसानानां स्वरूपं द्रष्टव्यं, उक्तो द्रव्यानुयोगः, इदानीं द्रव्याणां-स च जीवाजीव-भेदभिन्नानां अवसेयः, यथा प्रज्ञापनायां समुदितानां जीवानामजीवानां च विचारः, तथा चोक्तं-"जीवपज्जवाणं भंते ! किं संखेज्ञा असंखेज्ञा अणंता ?, गोयमा ! नो संखेज्ञा नो असंखेज्ञा अणंता, एवं अजीवपज्जवाणं पुच्छा उत्तरं च दट्ठव्वं" अलं विस्तरेण ! द्रव्येणानुयोगः प्रलेपाक्षादिना, द्रव्यैस्तैरेव अक्षादिभिः प्रभूतैरिति, द्रव्ये फलकादौ द्रव्येषु प्रभूतासु निषद्यासु अवस्थितोऽनुयोग करोतीति । एवं क्षेत्रानुयोगेऽपि क्षेत्रस्य भरतक्षेत्रादेः क्षेत्राणां जम्बूद्वीपादीनां यथा द्वी पसागरप्रज्ञप्त्या मिति, क्षेत्रेण यथा पृथिवीकायादिसंख्याव्याख्यानं, उक्तं च-

"जंबुद्दीपमाणं, पुढविजिआणं तु पत्थयं काउं ।
एवं मविज्ञमाणा हवंति लोगा असंखिज्ञा ॥"

क्षेत्रैरनुयोगो यथा "बहुहिं दीवसमुद्देहिं पुढविजिआणमित्यादि" क्षेत्रे तिर्यग्लोकेऽनुयोगो भरतादौ वा क्षेत्रेषु अनुयोगः अर्धतृतीयेषु द्वीपसमुद्रेषु । कालस्य अनुयोगः समयादिप्ररूपणा, कालानां प्रभूतानां समयादीनां, कालेनानुयोगो यथा-बादरवायुकायिकानां वैक्रियशरीरण्यद्धा-पल्योपमस्य असंख्यभागमात्रेणापह्रियन्ते, कालैरनुयोगो यथा प्रत्युत्पन्नत्रसकायिका असंख्येया-भिरुत्सर्पिण्यवसर्पिणी भिरपह्रियन्ते प्रतिसमयापहारेण, कालेऽनुयोगो द्वितीयपौरुष्यां, कालेषु अवसर्पिण्यां त्रिषु कालेषु-सुषमदुष्षमायां चरमभागो दुष्षमसुषमायां दुष्षमायां चेति, उत्सर्पिण्यां कालद्वये-दुष्षमसुषमायां सुषमदुष्षमायां च । वचनस्यानुयोगो यथा इत्थंभूतं एकवचनं, वचनानां द्विवचनबहुवचनानां षोडशानां वा, वचनेनानुयोगो यथा-कश्चिदाचार्यः साध्वादिभिरभ्यर्थित एकवचनेन करोति, वचनैः-स एव बहुभिः असकृद् अभ्यर्थितो वेति, वचनेऽनुयोगः क्षायोपशमिके, वचनेषु तेष्वेव बहुषु, अन्ये तु प्रतिपादयन्ति-वचनेषु नास्त्यनुयोगः, तस्य क्षायोपशमिकत्वात्, तस्य चैकत्वादिति भावार्थः । भावानुयोगो द्विधा-आगमतो नोआगमतश्च,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आगमतो ज्ञाता उपयुक्तः, नोआगमत औदयिकादेरन्यतमस्येति, भावानां औदयिकादीनां, भावेन संग्रहादिना, उक्तं च-"पंचहिं ठाणेहिं सुत्तं वाएज्जा, तंजहा-संगहट्ठयाए १ उवग्गहट्ठयाए २ निज्जरट्ठयाए ३ सुयपज्जवजातेणं ४ अव्वोच्छित्तीए ५" भावैरेभिरेव समुदितैरनुयोगः, भावे क्षायोपशमिके, भावेषु आचारादिषु, अथवा प्रतिक्षणपरिणामत्वात् क्षयोपशमस्य भावषु अनुयोगः, अथवा भावेषु नास्त्येव, क्षयोपशमस्यैकत्वात् । एतेषां च द्रव्याद्यनुयोगानां परस्परसमावेशः स्वबुद्धया वक्तव्यः, उक्तं च भाष्यकारेण –

"दव्वे नियमा भावो न विना ते यावि खित्तकालेहिं
खित्ते तिण्हवि भयणा काले भयणाए तीसुंपि।। इत्यादि"

उक्तोऽनुयोगः, एतद्विपरीतस्तु अननुयोग इति गाथार्थः।। साम्प्रतं तत्प्रतिपादकदृष्टान्तान् प्रतिपादयन्नाह–

नि. (१३३) वच्छगगोणी १ खुज्जा २ सज्झाए ३ चेव बहिरउल्लावो ४ ।
गामल्लिए ५ य वयणे सत्तेव य हुंति भावंमि ।।

वृ- तत्र प्रथममुदाहरणं द्रवननुयोगानुयोगयोः वत्सकगौरिति–गोदोहओ जदि जं पाडलाए वच्छयं तं बहुलाए मुयइ बाहुलेरं वा पाडलाए मुयइ, ततो अननुओगो भवति, तस्स य दुद्धकज्जस्स अपसिद्धी भवति, जदि पुण जं जाए तं ताए मुयइ, तो अनुओगो, तस्स य दुद्धकज्जस्स पसिद्धी भवति । एवं इहावि जदि जीवलक्खणेण अजीवं परूवेइ अजीवलक्खणेण वा जीवं, तो अननुओगो भवति । तं भावं अन्नहा गेण्हति, तेन अत्थो विसंवदति, अत्थेण विसंवयंतेण चरणं, चरणेण मोक्खो, मोक्खभावो दिक्खा निरत्थिआ । अह पुण जीवलक्खणेण जीवं परूवेइ, अजीवलक्खणेणं अजीवं, तो अनुओगो, तस्स य कज्जसिद्धी भवतित्ति, अविगलो अत्थवगमो, ततो चरणवुड्ढी, ततो मोक्खोत्ति । एस पढमदिट्ठंतो ।।

क्षेत्राननुयोगानुयोगयोः कुब्जोदाहरणम्–पइट्ठाणे नगरे सालिवाहणो राया, सो वरिसे वरिसे भरुयच्छे नरवाहणं रोहेति, जाहे य वरिसारत्तो पत्तो ताहे सयं नगरं पडिजाति, एवं कालो वच्चति, अन्नया तेणं रन्ना रोहएणं गएल्ल एणं अत्थाणमंडवियाए निच्छूढं, तस्स य पडिग्गह-धारिणी खुज्जा, अपरिभोगा एसा भूमी, नूणं राया जातुकामो, तीसे य राउलओ जाणसालिओ परिचिओ, ताए तस्स सिट्ठं, सो पए जाणगाणि पमक्खित्ता पयट्टावियाणि य, तं दट्ठूण सेसओ खंधावारो पट्ठिओ, राया रहंमि एकल्लो धूलादिभया गच्छिस्सामित्ति पए पयट्टो, जाव सव्वोऽवि खंधावारो पट्ठितओ दिट्ठो, राया चिंतेति-न मया कस्सवि कथितं, कहमेतेहिं नायं ?, गविट्ठ परंपरएण जाव खुज्जत्ति, खुज्जा पुच्छिता, ताए तह चेव अक्खायं, एस अननुओगो, तीसे मंडवियाए खेत्तं चेव चिन्तिज्जति, विवरीओ अनुओगो, एवं निप्पदेसमेगन्तनिच्चमेगमागासं पडिवज्जावेंतस्स अननुओगो, सप्पएसादि पुन पडिवज्जावेंतस्स अनुओगोत्ति ।।

कालाननुयोगानुयोगयोः स्वाध्यायोदाहरणं-एक्को साधू पादोसियं परियट्टंतो रहसेणं कालं न याणति, सम्मद्दिट्ठिगा य देवया तं हितट्ठयाए बोधेति मिच्छादिट्ठियाए भएणं, सा तक्कस्स घडियं भरेउं महया महया सद्देणं घोसेति-महितं महितंति, सा तीसे कण्णरोडयं असहंतो भणति-अहो तक्कवेलत्ति, सा पडिभणति–जहा तुज्झं सज्झायवेलत्ति, ततो साहू उववंजिऊण

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

मिच्छामिदुक्कडं भणति, देवताए अनुसासिओ–मा पुणो एवं काहिसि, मा मिच्छादिट्ठियाए छलिहिज्झिसि, एस अननुओगों, काले पढियव्वं तो अनुओगो भवति ॥

इदानीं वचनविषयं दृष्टान्तद्वयमननुयोगानुयोगयोः प्रदर्श्यते-तत्र प्रथमं बधिरोल्लापोदाहरणम्–एगंमि गामे बहिरकुडुबयं परिवसति, थेरो थेरी य, ताणं पुत्तो तस्स भज्ञा, सो पुत्तो हलं वाहेति, पथिएहिं पंथं पुच्छितो भणति-धरजायगा मज्झ एते बइल्ला, भज्ञाए य से भत्तं आणीयं, तीसे कथेति जहा-बइल्ला सिंगिया, सा भणति-लोणितमलोणितं वा, माताए ते सिद्धयं, सासूए कहियं, सा भणति–थूल्लं वा बरडं वा वा थेरस्स पोत्तं होहिइ, थेरं सद्दावेइ,' थेरो भणइ-पिउं ते जीएणं, एगंपि तिलं न खामि, एवं जदि एगवयणे परूवितव्वे दुवयणं परूवेति, दुवयणे वा एगवयणं तो अननुओगो, अह तहेव परूवेति, अनुओगो ॥

ग्रामेयकोदाहरणं द्वितीयं वचन एव, प्रस्तुतानुयोगप्राधान्यख्यापनार्थमिति । एगंमि नयरे एगा महिला, सा भत्तारे मए कट्ठादीणिवि ताव अक्कीयाणि, घोच्छामोत्ति अजीवमाणी खुड्डयं घेत्तुं गामे पवुत्था, सो दारओ वड्ढंतो मायरं पुच्छति-कहिं मम पिता ?, मओ त्ति, सो केणं जीविताइतो ?, भणति-ओलग्गाए, तो भगइ–अहंपि ओलग्गामि, सा भणति-न जाणिहिसि ओलग्गिउं, तो कहं ओलिग्गिज्जइ ?, भणिओ-विणयं करिज्ञासि, केरिसो विणओ ?, जोक्कारो कायव्वो नीयं चंकमियव्वं छंदानुवत्तिणा होयव्वं, सो नगरं पधाविओ, अंतरा नेन वाहा मिगाणं निलुक्का दिट्ठा, वड्डेणं सद्देणं जोक्कारोत्ति भणितं, तेणं सद्देणं मआ पलाणा, तेहिं घेत्तुं पहतो, सब्भावो नेन कहिओ, भणितो तेहिं–जदा एरिसं पेच्छेज्ञासि, तदा निलुक्कंतेहिं नीयं आगंतव्वं, न य उल्लविज्ञति, सणिअं वा, ततो नेन रयगा दिट्ठा, ततो निलुक्कंतो सणिअं एति, तेसिं च रयगाणं पोत्ता हीरंति, थाणयं बद्धं, रक्खंति, एस चोरोत्ति बंधिओ पिट्टिओ सब्भावे कहिए मुक्को, तेहिं भणितं-सुद्धं भवतु, एगत्थ बीयाणि वाविज्ञंति, तेन भणिअं-सुद्धं भवतु, तेहिवि पिट्टिओ, सब्भावे कहिए मुक्को, एरिसे-बहुं भवतु भंडं (डिं) भरेह एयस्स, अन्नत्थ मडयं नीणिज्ञंतं दट्ठुं भणति–बहु भवतु एरिसं, तत्थवि हतो, सब्भावे कहिए मुक्को भणितो एरिसे वुच्चति-अच्चंतविओगो भवतु एरिसेणं, अन्नत्थ विवाहे भणइ-अच्चंतविओगो भवतु एरिसेणं, तत्थवि हतो, सब्भावे कहिए भणितो-एरिसे (सा) णं निच्चं पिच्छया होह सासयं च भवतु एयं, अन्नत्थ णिअलबद्धयं दंडिअं दट्ठूण भणति-निच्चं एयारिसाण पेच्छंतओ होहि, सासतं च ते भवतु, तत्थवि हतो सब्भावे कहिए मुक्को-एयाओ भे लहुं मोक्खो भवतु, एयं भणिज्ञसि, अन्नत्थ मित्ते संघाडं करेंति, तत्थ भणति–एयाओ भेलहु मोक्खो भवतु, तत्थवि हतो सब्भावे कहिते मुक्को एगस्स दंडगकुलपुत्तगस्स अल्लीणो, तत्थ सेवंतो अच्छति । अन्नया दुब्भिक्खे तस्स कुलपुत्तगस्स अंबिलजवागू सिद्धेल्लिया, भज्ञाए से सो भणति–जाहि महायणमज्झाओ सद्देहि जो भुंजति सीतला अजोग्गाह तेन गंतुं सो भणिओ-एहि किराइं सीतलीहोति अंबेल्ली, सो लज्जितो, घरंगएण अंबाडिओ, भणितो-एरिसे कज्ज़े णीअं कण्णे कहिज्ञइ, अन्नया घरं पलित्तं, ताहे गंतुं सणिअं कण्णे कहेति, जाव सो तहिं अक्खाउं गतो ताव घरं सव्वं झामिअं, तत्थावि अंबाडिओ भणिओ य-एरिसे कज्ज़े नवि गम्मति अक्खायएहिं, अप्पणा चेव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पाणीयाइं काउं गोरसंपि छुब्भइ जहा तहा विज्झाउत्ति, अन्नया धुवंतस्स गोभत्तं छूढं । एवं जो अन्नंमि कहेयव्वे अन्नं कहेइ ताहे अननुओगो भवति, सम्मं कहिज्ञमाणे अनुओगो भवति। सप्तैव च भवन्ति 'भावे' भावविषये, अननुयोगानुयोगयोः प्रतिपादकानि सप्तोदाहरणानि भवन्तीति गाथार्थः ।। तानि चामूनि–

नि. (१३४) सावगभज्ञा १ सत्तवइए २ अ कुंकणगदारए ३ नउले ४ ।
कमलामेला ५ संबस्स साहंस ६ सेणिए कोवो ७ ।।

वृ- तत्र श्रावकभार्योदाहरणं-सावगेन निययभज्ञाए वयंसिया विउव्विया दिट्ठा, अज्झोववण्णो, दुब्बलो भवति, महिलाए पुच्छिते निब्बंधे कए सिट्ठं, ताए भणितं-आनेमि, तेहिं चेव वत्थाभरणेहिं अप्पाणं नेवत्थित्ता अंधयारे अल्लीणा, अच्छितो, पच्छा बिइयदिवसे अधितिं पगतो वयं खंडियंति, ताए साभिण्णाणं पत्तियावितो । एवं जो ससमयवत्तव्वयं परसमयवत्तव्वयं भणति, उदइयभावलक्खणेणं उवसमियलक्खणं परूवेति, ताहे अननुओगो भवति, सम्मं परूविज्ञमाणे अनुओगोत्ति १ ।

सप्तभिः पदैर्व्यवहरतीति साप्तपदिकः-सत्तपदिगो एगंमि पच्चंतगामे एगो ओलग्गयमनूसो, साधूमाहणादीणं न सुणेति, न वा अल्लीणति, न वा सेज्ञं देति, मा मम धम्मं कहेहिन्ति, ताहे मा सदओ होहामित्ति । अन्नया कया तं गामं साहुणो आगता, पडिस्सयं मग्गंति, ताहे गोट्ठिलएहिं एसो न देतित्ति सोवि एतेहिं पवंचिओ होउत्ति तस्स घरं चिंधिअं, जहा एरिसो तारिसो सावगोत्ति तस्स घरं जाह, तं गता पुच्छंता, दिट्ठो, जाव न चेव आढाति, तत्थेक्केण साहुणा भणिअं-जदि वा न चेव सो एसो अहवा पवंचिता मोत्ति, तं सोऊण पुच्छिता तेन, कथितं जहा ! अम्ह कथितं एरिसो तारिसो सावगोत्ति, सो भणति-अहो अकज्ञं, ममं ताव पवंचतु, ता किं साधुणो पवंचितेन्ति, ताहे मा सारत्ता तेसिं होउत्ति भणति-देमि पडिस्सयं एक्काए ववत्थाए–जदि मम धम्मं न कहेह, साहूहिं कहियं-एवं होउत्ति, दिन्नं घरं, वरिसारत्ते वित्ते आपुच्छंतेहिं धम्मो कहिओ, तत्थ न किंचि तरइ घेत्तुं मूलगुणउत्तरगुणाणं मधुमज्ञमंसविरतिं वा, पच्छा सत्तपदिवयं दिन्नं-मारेउकामेणं जावइएणं कालेणं सत्त पदा ओसक्किज्ञंति एवइअं कालं पडिक्खित्तुं मारेयव्वं, संबुज्झिस्सतित्तिकाउं, गता । अन्नया चोरो (रओ) गतो, अवसउणेणं निअत्तो, रत्तिं सणिअं घरं एति, तद्दिवसं च तस्स भगिनी आगएल्लिआ, सा पुरिसणेवत्थिआ भाउज्ञायाए समं गोज्झपेक्खिया गया, ततो चिरेण आगया, निद्दक्कंताओ तहेव एक्कंमि चेव सयणे सइयाआ, इअरो अ आगओ, ततो पेच्छति, परपुरिसोत्ति असिं करिसित्ता आहणेमित्ति, वतं सुमरियं, ठितो सत्तपदंतरं, एअंमि अंतरे भगिनीअ से बाहा भज्ञाए अक्कंतिआ, ताए दुक्खाविज्ञंतियाए भणिअं हला ! अवणेहि बाहाओ मे सीसं, तेन सरेण णाया भगिनी एसा मे पुरिसणेवत्थत्ति लज्ञितो जातो, अहो मणागं मए अकज्ञं न कयंति । उवणओ जहा सावगभज्ञाए, संबुद्धो, विभासा, पव्वइओ २ ।

इदानीं कोङ्कणकदारकोदाहरणम्–कोंकणगविसए एक्को दारगो, तस्स माया मुया, पिता से अन्नमहिलिअं न लभति सवत्तिपुत्तो अत्थित्ति । अन्नदा सपुत्तो कट्ठाणं गतो, ताहेणेण चिंतिअं-एअस्स तणएण महिल न लभामि, मारेमित्ति कंडं खित्तं, आणत्तो-वच्च कंडं आनेहि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सो पहावितो, अन्नेणं कंडेणं विद्धो, चेडेण भणियं-किं ते कंडं खित्तं, विद्धो मित्ति, पुणोवि खित्तं, रडन्तो मारिओ, पुव्वं अजाणंतेण विद्धोमित्ति अननुओगो, मारिज्ञामित्ति एवं नाते अनुओगो, अहवा सारक्खणिज्ञं मारेमित्ति अननुओगो, सारक्खंतस्स अनुओगो । जहा सारक्खणिज्ञं मारेंतो विपरीतं करेति, एवं अन्नं परूवेयव्वं अन्नं परूवेमाणस्स विपरीतत्वात् अननुओगो भवति, जहाभूतं परूवेमाणस्स अनुओगो भवति ३ ।

नउले उदाहरणं-एगा चारगभडिया गब्भिणी जाया, अन्नावि नउलिया गब्भिणी चेव, तत्थ एगाए राईए ताओ सरिसिआओ पसूआओ, ताए चिंतिअं-मम पुत्तस्स रमणओ भविस्सइ, तस्स पीहयं खीरं च देति । अन्नआ तीसे अविरतिआए खंडंतीए जत्थ मंचुल्लिआए सो डिक्करओ उत्तारितो, तत्थ सप्पेणं चडित्ता खइतो मतो, इतरेण णउलेण ओयरंतो दिट्ठो मंचुल्लिआओ सप्पो, ततो नेनं खंडाखंडिं कतो, ताहे सो तेन रुहिरलित्तेणं तुंडेणं तीसे अविरतियाए मूलं गंतूण चाडूणि करेइ, ताए नायं-एतेण मम पुत्तो खइओ, मुसलेण आहणित्ता मारितो, ताहे धावंती गया पुत्तस्स मूलं, जाव सप्पं खंडाखंडीकयं पासति, ताहे दिगुणतरं अधितिं पगता । तीसे अविरइआए पुव्विं अननुओगो पच्छा अनुओगो, एवं जो अन्नं परूवेयव्वं अन्नं परूवेति सो अन्नुओगो, जो तं चेव परूवेति तस्स अनुओगो ४ ।

कमलामेलाउदाहरणं-बारवईए बलदेवपुत्तस्स निसढस्स पुत्तो सागरचंदो रूवेणं उक्किट्ठो, सव्वेसिं संबादीणं इट्ठो, तत्थ य बारवईए वत्थव्वस्स चेव अन्नस्स रन्नो कमलामेलानाम धूओ उक्किट्ठसरीरा, सा य उग्गसेणपुत्तस्स नभसेनस्स वरेल्लिया, इतो य नारदो सागरचंदस्स कुमारस्स सगासं आगतो, अब्भुट्ठिओ, उवविट्ठे समाणे पुच्छति-भगवं ! किंचि अच्छेरयं दिट्ठं ?, आमं दिट्ठं, कहिं ? कहेह, इहेव बारवईए कमलामेलानाम दारिया, कस्सइ दिण्णिआ ?, आमं, कथं मम ताए समं संपओगो भवेज्ञा ?, न याणामित्ति भणित्ता गतो । सो य सागरचंदो तं सोऊण नवि आसने नवि सयने धितिं लभति, तं दारियं फलए लिहंतो णामं च गिण्हंतो अच्छति, नारदोऽवि कमलामेलाए अंतिअं गतो, ताएवि पुच्छिओ-किंचि अच्छेरयं दिट्ठपुव्वंति, सो भणति-दुवे दिट्ठाणि, रूवेण सागरचंदो विरूवत्तणेण नभसेनओ, सागरचंदे मुच्छिता नहसेनए विरत्ता, नारएण समासासिता, तेन गंतुं आइक्खितं-जहा इच्छतित्ति । ताहे सागरचंदस्स माता अन्ने अ कुमारा आदण्णा मअइत्ति, संबो आगतो जाव पेच्छति सागरचंदं विलवमाणं, ताहे नेन पच्छतो ठाइऊण अच्छीणि दोहिवि हत्थेहि छादिताणि, सागरचंदेण भणितं-कमलामेलत्ति, संबेण भणितं-णाहं कमलामेला, कमलामेलोऽहं, सागरचंदेण भणितं-आमं तुमं चेव ममं मिवमलकमलदलल्लोअणिं कमलामेलं मेलिहिसि, ताहे तेहिं कुमारेहिं संबो मज्ञं पाएत्ता अब्भुवगच्छाविओ, विगतमदो चिंतेति-अहो मए आलो अब्भुवगओ, इदानीं किं सक्कमण्णहाकाउं ?, निव्वहियव्वंति पज्ञण्णं पन्नत्ति मग्गिऊण जंदिवसं तस्स नभसेनस्स विवाहदिवसो तद्दिवसं ते सागरचंदसंबप्पमुहा कुमारा उज्ञाणं गंतुं नारदस्स सरहस्सं दारिया सुरंगाए उज्ञाणं नेत्तुं सागरचंदो परिणाविओ, ते तत्थ किड्डंता अच्छंति । इतरे य तं दारियं न पेच्छंति, मग्गंतेहिं उज्ञाणे दिट्ठा, विज्ञाहररूवा विउव्विया, नारायणो सबलो निग्गओ, जाव अपच्छिमं संबरूवेणं पाएसु पडिओ, सागरचंदस्स चेव दिन्ना, णभसेण तणया अ खमाविया । एत्थ सागरचंदस्स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संब कमलामेलं अननुओगो नाहं कमलामेलेति भणिते अनुओगो, एवं जो विवरीयं परूवेति तस्स अननुओगो जहाभावं परूवेमाणस्स अनुओगो ५।

संबस्स साहसोदाहरणं–जंबूवई नारायणं भणति–एक्कावि मए पुत्तस्स अनाडिया न दिट्ठा, नारायणेण भणितं–अज्ज दाएमि, ताहे नारायणेण जंबूवतीअ आभीरीरूवं कयं, दोवि तक्कं घेत्तुं बारवईमोइण्णाणि, महियं विक्किणंति, संबेण दिट्ठाणि, आभीरी भणिता–एहि महिअं कीणामित्ति, सा अनुगच्छति, आभीरो मग्गेण एति, सो एक्कं देउलिअं पविसइ, सा आभीरी भणति-नाहं पविसामि किंतु मोल्लं देहि तो एत्थ चेव ठितो तक्कं गेण्हाहि, सो भणति-अवस्स पविसितव्वं, सा नेच्छति, ताहे हत्थे लग्गो, आभीरो उद्धाइऊण लग्गो समं, संबो आवट्टितो, आभीरो वासुदेवो जातो इतरी जंबूवती, अंगुट्ठीकाऊण पलातो, बिईयदिवसे मड्डाए आनिज्जंतो खीलयं घडंतो एइ, जोक्कारे कए वासुदेवेण पुच्छिओ–किं एयं घडिज्जतित्ति, भणति–जो पारिओसियं बोल्लं काहिति तस्स मुहे खोट्टिज्जिहित्ति। पढमं अननुओगो नोत अनुओगो, एवं जो विवरीयं परूवेति तस्स अननुओगो इतरस्स अनुओगो ६।

श्रेणिकविषयकोपोदाहरणं–रायगिहे नगरे सेणिओ राया, चेल्लणा तस्स भज्जा, सा वद्धमाणसामिमपच्छिमतित्थगरं वंदित्ता वेयालियं माहमासे पविसति, पच्छा साहू दिट्ठो पडिमापडिवण्णओ, तीए रत्तिं सुत्तिआए हत्थो किहवि विलंबिओ, जया सीतेण गहिओ तदा चेतितं, पवेसितो हत्थो, तस्स हत्थस्स तणएणं सव्वं सरीरं सीतेण गहिअं, तीए भणिअं-स तवस्सी किं करिस्सति संपयं ?। पच्छा सेणिएण चिंतियं-संगारदिण्णओ से कोई, रुट्ठेण कल्लं अभओ भणिओ–सिग्घं अंतेउरं पलीवेहि, सेष्िओ गतो सामिसगासं, अभएन हत्थिसाला पलीविया, सेणिओ सामिं पुच्छति-चेल्लणा किं एगपत्ती अणेगपत्ती ?, सामिणा भणिअं-एगपत्ती, ताहे मा डज्झिहितिथि तुरितं निग्गओ, अभओ निष्फिडति, सेणिएणं भणिअं-पलीवितं ?, सो भणति-आमं, तुमं किं न पविट्ठो ?, भणति–अहं पव्वइस्सामि किं मे अग्गिणा ?, पच्छा नेन चिंतिअं-मा छड्डिज्जिहितित्ति भणितं-न डज्झत्ति। सेणियस्स चेल्लणाए पुव्विं अननुओगो पुच्छिए अनुओगो, एवं विवरीए परूविए अननुओगो जहाभावे परूविए अनुओगो ७॥

इत्थं तावदनुयोगः सप्रतिपक्षः प्रपञ्चेनोक्तः, नियोगोऽपि पूर्वप्रतिपादितस्वरूपमात्रः सोदाहरणोऽनुयोगवदवसेयः, साम्प्रतं प्रागुपन्यस्तभाषादिस्वरूपप्रतिपादनायाह–

नि. (१३५) कट्ठे १ पुत्थे २ चित्ते ३ सिरिधरिए ४ पुंड ५ देसिए ६ चेव।
भासगविभासए वा वत्तीकरणे अ आहरणा॥

वृ- तत्र 'काष्ठ' इति काष्ठविषयो दृष्टान्तः, यथा काष्ठे कश्चित् तद्रूपकारः खल्वाकारमात्रं करोति, कश्चित्स्थूलावयवनिष्पत्ति, कश्चित् पुनरशेषाङ्गोपाङ्गाद्यवयवनिष्पत्तिमिति, एवं काष्ठकल्पं सामायिकादिसूत्रं, तत्र भाषकः परिस्थूरमर्थमात्रमभिधत्ते-यथा समभावः सामायिकमिति, विभाषकस्तु तस्यैवानेकधाऽर्थमभिधत्ते-यथा समभावः सामायिकं, समानां वा आयः समायः स एव स्वार्थिकप्रत्ययविधानात्सामायिकमित्यादि, व्यक्तीकरणशीलो व्यक्तिकरः, यः खलु निरवशेषव्युत्पत्त्यतिचारानतिचारफलादिभेदभिन्नमर्थं भाषते स व्यक्तिकर इति, स निश्चयतश्चतुर्दशपूर्वविदेश, इह च भाषकादिस्वरूपव्याख्यानात् भाषादय एव प्रतिपादिता द्रष्टव्याः, कुतः?,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भाषादीनां तत्प्रभवत्वात् १। इदानीं पुस्तविषयो दृष्टान्तः-यथा पुस्ते कश्चिदाकारमात्रं करोति, कश्चित् स्थूरावयवनिष्पत्ति, कश्चित्त्वशेषावयवनिष्पत्तिमिति, दार्ष्टान्तिकयोजना पूर्ववत् २। इदानीं चित्रविषयो दृष्टान्तः-यथा चित्रकर्मणि कश्चित् वर्त्तिकाभिराकारमात्रिं करोति, कश्चित्तु हरितालादिवर्णोद्भेदं, कश्चित्त्वशेष्पर्यायैर्निष्पादयति, दार्ष्टान्तिकयोजना पूर्ववत् ३। श्रीगृहिकोदाहरणं–श्रीगृहं-भाण्डागारं तदस्यास्तीति 'अत इनिठनौ' इति ठनीकादेशे च कृते श्रीगृहिक इति भवति, तद्दृष्टान्तः-तत्र कश्चिद् रत्नानां भाजनमेव वेत्ति-इह भाजने रत्नानीति, कश्चित्तुं जातिमाने अपि, कश्चित्पुनर्गुणानपि, एवं प्रथमद्वितीयतृतीयकल्पा भाषकायदो द्रष्टव्याः ४। तथा 'पोंडं' इति पुण्डरीकं पद्मं तद् यथेषद्भिन्नार्धभिन्नविकसितरूपं त्रिधा भवति, एवं भाषादि विज्ञेयं ५। इदानीं देशिकविषयमुदाहरणं-देशनं देशः कथनमित्यर्थः, तदस्यास्तीति देशिकः-यथा कश्चिद्देशिकः पन्थानं पृष्टः दिडमात्रमेव कथयति, कश्चित् तद्व्यवस्थिगतग्रामनगरादिभेदेन, कश्चित् पुनस्तदुत्थगुणदोषभेदेन कथयतीति, दार्ष्टान्तिकयोजना पूर्ववत् ज्ञेया ६। एवमेतानि भाषकविभाषकव्यक्तिकरविषयाण्युदाहरणानि प्रतिपादितानि इति गाथार्थः ॥ इत्थं तावद्विभाग उक्तः, इदानीं द्वारविधिमवसरप्राप्तं विहाय व्याख्यानविधिं प्रतिपादयन्नाह–

नि. (१३६)गोणी १ चंदनकंथा २ चेडीओ ३ सावए ४ बहिर ५ गोहे ६।
टंकणओ ववहारो ७, पडिवक्खो आयरियसीसे ॥

वृ- आह–चतुरनुयोगद्वारानधिकृतो व्याख्यानविधिः किमर्थं प्रतिपाद्यत इति, उच्यते, शिष्याचार्ययोः सुखश्रवण-सुखव्याख्यानप्रवृत्त्या शास्त्रोपकारार्थः, अथवा अधिकृत एव वेदितव्यः, कुतः ? अनुगमान्तर्भावात्, अन्तर्भावस्तु व्याख्याङ्गत्वात् इति। आह–यद्यसावनुगमाङ्गं ततः किमित्ययं द्वारविधेः पूर्वं प्रतिपाद्यते ?, उच्यते, द्वारविधेरपि बहुवक्तव्यत्वात् मा भूदहापि व्याख्याविधेर्विपर्ययः, अतोऽत्रैव आचार्यशिष्ययोर्गुणदोषाः प्रतिपाद्यन्ते, येन आचार्यो गुणवते शिष्यायानुयोगं करोति, शिष्योऽपि गुणवदाचार्यसन्निधावेव शृणोतीति। आह–यद्येवं व्याख्यानविधिरनुगमाङ्गं इहावतार्योच्यते तत्कथं द्वारगाथायामप्येवं नोपन्यस्त इति, उच्यते, सूत्रव्याख्यानस्य गुरुत्वख्यापनार्थं, विशेषेण सूत्रक्याख्यायां आचार्यः शिष्यो वा गुणवानन्वेष्टव्य इत्यलं विस्तरेण, प्रकृतं प्रस्तुमः–प्रक्रान्तगाथाव्याख्या–तत्र गोदृष्टान्तः, एते चाचार्यशिष्ययोः संयुक्ता दृष्टान्ताः, एक आचार्यस्य एकः शिष्यस्येति द्वौ वा एकस्मिन्नेवावतार्याविति।

एगंमि नगरे एगेन कस्सइ धुत्तस्स सगासाओ गावी रोगिता उट्ठितुंपि असमत्था निविट्ठा चेव किणिता, सो तं पडिविक्किणति, कायगा भणंति-पेच्छामो से गतिपयारं तो किणीहामो, सो भणति–मएवि उवविट्ठा चेव गहिया, जदि पडिहाति ता तुम्हेवि एवमेव गिण्हह। एवं जो आयरिओ पुच्छितो परिहारंतरं दाउमसमत्थो भणति–मएवि एवं सुयं तुम्हेवि एवं सुणहत्ति, तस्स सगासे न सोअव्वं, संसइयपयत्थंमि मिच्छत्तसंभवा, जो पुन अविकलगोविक्किणगो इव अक्खेवणिण्णयपसंगपारगो तस्स सगासे सोयव्वं, सीसोऽवि जो अवियारियगाही पढमगोविक्कणगोव्व सो अजोग्गो इतरो जोग्गोत्ति १।

चंदणनकंथोदाहरणं–बारवईए वासुदेवस्स तिन्नि भेरीओ, तं जहा-संगामिआ उब्भुतिया कोमुतिया, तिन्निवि गोसीसचंदनमइयाआ देवयापरिग्गहियाओ, तस्स चउत्थी भेरी असिवुव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समणी, तीसे उप्पत्ती कहिज्जइ–सक्को सुरमज्झे वासुदेवस्स गुणकित्तणं करेति-अहो उत्तमपुरिसाणं गुणा, एते अवगुणं न गेण्हंति नीएण य न जुज्झंति, तत्थेगो देवो असद्दहंतो आगतो, वासुदेवोऽवि जिणसगासं वंदओ पट्ठिओ, सो अंतराले कालसुणयरूवं मययं विउव्वेति वावण्णं दुब्भिगंधं, तस्स गंधेण सव्वो लोगो पराभग्गो, वासुदेवेण दिट्ठो, भणितं चनेन-अहो कालसुणगस्सेतस्स पंडुरा दंता सोहंति, देवो चिंतितो-सच्चं सच्चं गुणग्गाही । ततो वासुदेवस्स आसरयणं गहाय पधावितो, सो वंडुरापालएण नाओ, तेन कुवितं, कुमारा रायाणो य निग्गया, तेन देवेन हयविहया काऊण धाडिओ, वासुदेवोऽवि निग्गओ, भणति–मम कीस आसरयणं हरसि ?, देवो भणति-मं जुज्झे पराजिणिऊण गेण्ह, वासुदेवेण भणियं-बाढं, किह जुज्झामो ? तुमं भूमीए अहं रहेण, ता रहं गिण्ह, देवो भणति–अलं रहेणंति, एवं आसहत्थीवि पडिसिद्धा, बाहुजुद्धादियाइं सव्वाइं पडिसेहेइ, भणइ य-अहिट्ठाणजुद्धं देहि, वासुदेवेण भणिअं-पराजिओऽहं, नेहि आसरयणं, नाहं नीयजुज्झेण जुज्झामि, ततो देवो तुट्ठो भणितादिओ–वरेहि वरं, किं ते देमि ?, वासुदेवेणं भणिअं-असिवोवसमणीं भेरीं देहि, तेन दिन्ना, एसुप्पत्ती भेरीए । तहिं सा छण्हं छण्हं मासाणं वज्जति, पच्चुप्पण्णा रोगा वाही वा उवसमंति, नवगा वि छम्मासे न उप्पज्जंति, जो सद्दं सुणेति । तत्थऽन्नदा आगंतुओ वाणिअओ, सो अतीव दाहज्जरेण अभिभूतो भेरीपालयं भणइ-गेण्ह तुमं सयसहस्सं, मम एत्तो पलमेत्तं देहि, तेन लोभेन दिन्नं, तत्थ अन्ना चंदनथिग्गलिआ दिन्ना, एवं अन्नेणवि अन्नेणवि मग्गितो दिन्नं च, सा चंदनकंथा जाता, अन्नदा असिवे वासुदेवेन ताडाविया, जाव तं चेव सभं न पूरेति, तेन भणिअं-जोएह भेरिं, दिट्ठा कंथीकता, सो भेरिवालो ववरोविओ, अन्ना भेरी अट्ठमभत्तेणाराहइत्ता लद्धा, अन्नो भेरिवालो कओ, सो आयरक्खेण रक्खति, सो पूइतो–

जो सीसो सुत्तत्थं चंदणकंथव्व परमतादीहिं ।
मीसेति गलितमहवा सिक्खितमाणी न सो जोग्गो ।।
कंथीकतसुत्तत्थो गुरूवि जोग्गो न भासितव्वस्स ।
अविनासियसुत्तत्था सीसायरिया विनिद्दिट्ठा ।।

इदानीं चेट्युदाहरणम्–वसंतपुरे जुण्णसेट्ठिधूता, णवगस्स य सेट्ठिस्स धूओ, तासिं पीई, तहवि से अत्थि वेरो अम्हे एएहिं उव्वट्टिताणि, ताओ अन्नआ कयावि मज्जितुं गताओ, तत्थ जा सा नवगस्स धूआ, सा तिलगचोद्दसगेणं अलंकारेण अलंकिआ, सा आहरणाणि तडे ठवेत्ता उत्तिण्णा, जुण्णसेट्ठिधूआ ताणि गहाय पधाविता, सा वारेति, इतरी अक्कोसंती गता, ताए मातापितीणं सिट्ठं, ताणि भणंति-तुण्हिक्का अच्छाहि, णवगस्स धूआ ण्हाइत्ता नियगधरं गया, अम्मापिईहिंसाहइ, तेहिं मग्गियं, न देंति, राउले ववहारो, तत्थ नत्थि सक्खी, तत्थ कारणिया भणंति-चेडीओ वाहिज्जंतु, तेहिं वाहित्ता भणिता-जति तुज्झच्चयं ता आविंध, ताहे सा जुण्णसेट्ठिचेडी जं हत्थे तं पाए, न जाणति, तं च से असिलिट्ठं, ताहे तेहिं नाअं-जहा एयाइं इमीसे न होंति, ताहे इतरी भणिआ-तुमे आविंध, ताए कमेण आविद्धं, सिलिट्ठं च से जायं, भणिया य-मेल्लाहि, ताए तहेव निच्चं आमुंचंतीए पडिवाडीए आमुक्कं ताहे सो जुण्णसेट्ठी डंडितो। जहा सो एगभविअं मरणं पत्तो, एवायरिओवि जं अन्नत्थ तं अन्नहिं संघाडेति, अन्नवत्तव्वाओ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्नत्थ परूवेति उस्सग्गादिआओ, एवं सो संसारदंडेण दंडिज्जति, तारिसस्स पासे न सोतव्वं, जहा सा चेडी जसं पत्ता, एवं चेवायरिओ जो न विसंवाएति, तेन अरिहंताणं आणा कता भवति, तारिसस्स पासे सोयव्वं । एत्थ गाथा–

अत्थाणत्थनिउत्ताऽऽभरणाणं जुण्णसेट्ठिधूअव्व ।
न गुरू विधिभणिते वा विवरीयनिओअओ सीसो ॥
सत्थाणत्थनिउत्ता ईसरधूआ सभूसणाणं व ।
होइ गूरू सीसोऽविअ विनिओअं तो जहा भणितं ॥

श्रावकोदाहरणं पूर्ववत्–नवरमुपंसहारः

चिरपरिचितंपि न सरति सुत्तत्थं सावगो सभज्जं व ।
जो न सो जोग्गो सीसो गुरुत्तणं तस्स दूरेणं ॥

बधिरगोदाहरणं पूर्ववदेव, उपसंहारस्तु गाथयोच्यते–

अन्नं पुट्ठो अन्नं जो साहइ सो गुरू न बहिरो व्व ।
न य सीसो जो अन्नं सुणेति अनुभासए अन्नं ॥

एवं गोधोदाहरणोपसंहारोऽपि वक्तव्यः ६ ।

इदानीं टङ्कणकोदाहरणं-उत्तरावहे टंकणा नाम मेच्छा, ते सुवण्णेणं दक्खिणावहाइं भंडाइं गेण्हंति, ते य परोप्परं भासं न जाणंति, पच्छा पुंजं करेंति, हत्थेण उ छाएंति, जाव इच्छा न पूरति ताव न अवणेंति, पुण्णे अवनेंति, एवं तेसिं इच्छियपडिच्छियववहारो एवं-अक्खेव-निण्णयपसंगदाणग्गहणाणुवत्तिणो दोवि । जोग्गा सीसायरिआ टंकणवणिओवमा एसा ॥

इत्थमुक्तप्रकारेण गवादिषु द्वारेषु साक्षादभिहितार्थविपर्ययः-प्रतिपक्षः आचार्यशिष्ययोर्यथायोगं योजनीयः, स च योजित एवेति गाथार्थः ॥ इदानीं विशेषतः शिष्यदोषगुणान् प्रतिपादयन्नाह–

नि. (१३७) कस्स न होही वेसो अनब्भुवगओअ निरूवगारी अ ।
अप्पच्छंदमईओ पट्ठिअओ गंतुकामो अ ॥

वृ- आह–शिष्यदोषगुणानां विशेषाभिधानं किमर्थम् ? उच्यते, कालान्तरेण तस्यैव गुरुत्वभवनात्; अयोग्याय च गुरुपदनिबन्धनविधाने तीर्थकराज्ञादिलोपप्रसङ्गात् । कस्या न भविष्यति द्वेष्यः–अप्रीतिकरः, यः किम्भूतः ?-न अभ्युपगतः अनभ्युपगतः-श्रुतोपसंपदाऽनुपसंपन्न इति भावार्थः, उपसंपन्नोऽपि न सर्व एवाद्वेष्यो भवतीत्यत आह–'निरुपकारी च' निरुपकर्त्तुं शीलमस्येति निरुपकारी, गुरोरकृत्यकारीत्यर्थः, उपकार्यपि न सर्व एवाद्वेष्य इत्यत् आह–आत्मच्छन्दा आत्मायत्ता मतिर्यस्य कार्येषु असावात्मच्छन्दमतिः, स्वाभिप्रायकार्यकारीत्यर्थः, गुर्वायत्तमतिरपि न सर्व एवाद्वेष्यः अत आह–'प्रस्थितएः' संप्रस्थितद्वितीय इति, गन्तुकामश्च गन्तुकामोऽभिधीयते यो हि सदैव गन्तुमना व्यवतिष्ठते, वक्ति च-श्रुतस्कन्धादिप-रिसमाप्तावश्यमहं यास्यामि, क इहावतिष्ठते इति, अयमयोग्यः शिष्य इति गाथार्थः ॥

नि. (१३८) विणओणएहिं कयपंजलीहि छंदमनुअत्तमाणेहिं ।
आराहिओ गुरुजणो सुयं बहुविहं लहुं देइ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- इदानीं दोषपरि-ज्ञानपूर्वकत्वात् गुणाः प्रतिपाद्यन्ते–विनयः-अभिवन्दना-दिलक्षणः तेन अवनताः विनयावनताः तैरित्थंभूतैः सद्भिः, तथा पृच्छादिषु कृताः प्राञ्जलयो यैस्ते कृतप्राञ्जलयः तैः, तथा छन्दो–गुर्वभिप्रायः तं सूत्रोक्तश्रद्धानसमर्थ-नकरणकारणादिनाऽनुवर्त्तयद्भिः आराधितो गुरुजनः, 'श्रुतं' सूत्रार्थोभयरूपं 'बहुविधं' अनेकप्रकारं 'लघु' शीघ्रं 'ददाति' प्रयच्छतीति गाथार्थः ॥ इदानीं प्रकारान्तरेण शिष्यपरीक्षां प्रतिपादयन्नाह–

नि. (१३९) सेलधण कुडग चालनि परिपूणगं हंस महिस मेसे अ ।
मसग जलूग बिराली जाहग गो भेरि आभीरी ॥

वृ- एतानि शिष्ययोग्यायोग्यत्वप्रतिपादकान्युदाहरणानीति । किंच-

चरियं च कप्पितं वा आहरणं दुविहमेव नायव्वं ।
अत्थस्स साहणट्ठा इंधणमिव ओदणट्ठाए ॥

तत्थ इमं कप्पिअं जहा–मुग्गसेलो पुक्खलसंवट्टओ अ महामेहो जंबूदीवप्पमाणो, तत्थ नारयत्थाणीओ कलहं आलाएति–मुग्गसेलं भणति–तुज्झ नामग्गहणे कए पुक्खलसंवट्टओ भणति-जहा णं एगाए धाराए विराएमि, सेलो उप्पासितो भणति–जदि मे तिलतुसमितभागंपि उल्ले ति तो नामं न वहामि, पच्छा मेहस्स मूले भणति मुग्गसेलवयणाइं, सो रुट्ठो, सव्वादरेण वरिसिउमारद्धो जुगप्पहाणाहि धाराहिं, सत्तरत्ते वुट्ठे चिंतेति–विराओ होहित्ति ठिओ, पाणिए ओसरिए इतरो मिसिमिसिंतो उज्जलतरो जातो भणति-जोहारोत्ति, ताहे मेहो लज्जितो गतो । एवं चेव कोइ सीसो मुग्गसेलसमाणो एगमवि पदं न लग्गति, अन्नो आयरिओ गज्जंतो आगतो, अहं णं गाहेमित्ति, आह–

आचार्यस्यैव तज्जाड्यं, यच्छिष्यो नावबुध्यते ।
गावो गोपालकेनेव, कुतीर्थेनावतारिताः ॥

ताहे पढावेउमारद्धो, न सक्किओ, लज्जिओ गओ, एरिसस्स न दायव्वं, किं कारणं ?–

आयरिए सुत्तंमि अ परिवादो सुत्तअत्थपलिमंथो ।
अन्नेसिंपिय हानी पुट्ठावि न दुद्धया वंझा ॥

पडिवक्खा कण्ह भूमी–

वुट्ठेवि दोणमेहे न कण्हभोमाओ लोट्टए उदयं ।
गहणधरणासमत्थे इअ देयमछित्तिकारंमि ॥

इदानीं कुटोदाहरणम्– कुटा घटा उच्यन्ते, ते दुविहा–नवा जुण्णा य, जुण्णा दुविहा–भाविया अभाविया य, भाविआ दुविहा–पसत्थभाविआ अपसत्थभाविआ य, पसत्था-अगुरुतुरुक्कादीहिं, अपसत्था–पलंडुलसुणमादीहिं, पसत्थभाविया वम्मा अवम्मा य, एवं अपसत्थावि, जे अपसत्था अवम्मा जे य पसत्था वम्मा ते न सुंदरा, इतरे सुंदरा, अभाविता न केणइ भाविता–नवगा आवागातो उत्तारितमेत्तगा, एवं चेव सीसगा नवगा-जे मिच्छद्दिट्ठी तप्पढमयाए गाहिज्जंति, जुण्णावि जे अभाविता ते सुंदरा–

कुप्पवयणपासत्थेहिं भाविता एवमेव भावकुडा ।
संविग्गेहिं पसत्था वम्माऽवम्मा य तह चेव ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जे अपसत्था वम्मा जे य पसत्था संविग्गा य अवम्मा एते लङ्गा, इतरेवि अवम्मा । अहवा कूडा चउव्विहा—छिड्डकुडे १ बोडकुडे २ खंडकुडे ३ संपुण्णकुडे ४ इति, छिड्डो जो मूले छिड्डो, बोडओ जस्स ओट्ठा नत्थि, खंडो एगं ओट्ठपुडं नत्थि, संपुण्णो सव्वंगो चेव, छिड्डे जं छूढं तं गलति, बोडे तावतिअं ठाति, खंडे एगेण पासेण छड्डिज्जइ, जदि इच्छा थोवेणवि रुब्भइ, एस विसेसो बोडखंडाणं, संपुण्णो सव्वं धरेति, एवं चेव सीसा चत्तारि समोतारेयव्वा ।

चालन्युदाहरणम्—चालनी-लोकप्रसिद्धा यया कणिक्कादि चाल्यते,

जह चालनीए उदयं छुब्भंतं तक्खण अधोनीति ।
तह सुत्तत्थपयाइं जस्स तु सो चालणिसमाणो ॥

तथा च शैलच्छिद्रकुटचालनीभेदप्रदर्शनार्थमुक्तमेव भाष्यकृता—

सेलेयछिद्दचालणि मिहो कहा सोउ उट्ठियाणं तु ।
छिड्डाह तत्थ बेट्ठो सुमरिंसु सरामि नेयाणी ॥
एगेन विसति बितिएण नीति कण्नेन चालण आह ।
धन्नु त्थ आह सेलो जं पविसइ नीइ वा तुब्भण ॥

तावसखउरकढिणयं चालणिपडिवक्खु न सवइ दवंपि ।

इदानीं परिपूणकोदाहरणम्—तत्र परिपूर्णकः घृतपूर्णक्षीरकगालनकं चिटिकावासो वा, तेन ह्याभीर्यः किल घृतं गालयन्ति, स च कचवरं धारयति घृतमुज्झति, एवं

वक्खाणादिसु दोसे हिययंमि ठवेति मुअति गुणजालं ।
सीसो सो उ अजोग्गो भणिओ परिपूणगसमाणो ॥

आह—सर्वज्ञमतेऽपि दोषसंभव इत्ययुक्तं, सत्यमुक्तमेव भाष्यकृता—

सव्वन्नुपमाणाओ दोसा न हुं संति जिनमए किं चि ।
जं अनुवउत्तकहणं अपत्तमासज्ज व भवंति ॥

इदानीं हंसोदाहरणम् -

अंबत्तणेण जीहाइ कूइआ होइ खीरमुदगंमि ।
हंसो मोत्तूण जलं आपियइ पयं तह सुसीसो ॥
मोत्तूण दढं दोसे गुरुणोऽणुवउत्तभासितादीए ।
गिण्हइ गुणे उ जो सो जोग्गो समयत्थसारस्स ॥

इदानीं महिषोदाहरणम् -

सयमवि न पियइ महिसो न य जूहं पियइ लोलियं उदयं ।
विग्गहविगहाहि तहा अथक्कपुच्छाहि य कुसीसो ॥

मेषोदाहरणम् –

अवि गोप्पदंमिवि पिवे सुढिओ तणुअत्तणेण तुंडस्स ।
न करेति कलुसमुदगं मेसो एवं सुसीसोऽवि ॥

मशकोदाहरणम् –

मसगो व्व तुदं जच्चादिएहि निच्छुब्भते कुसीसोऽवि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जलुकोदाहरणम् – जलूगा व अदूमंतो पिबति सुसीसोऽवि सुयनाणं ।

बिराल्युदाहरणम् –

छड्डेउं भूमीए जह खीरं पिबति दुट्ठमज्जारी ।
परिसुद्धियाण पासे सिक्खति एवं विनयभंसी ॥

जाहकस्तिर्यग्विशेषः, तदुदाहरणम् –

पातुं थोवं खीरं पासाणि जाहओ लिहइ ।
एमेव जितं काउं पुच्छति मतिमं न खेदेति ॥

गोउदाहरणम् –एगेन धम्मट्ठितेण चाउव्वेज्जाण गावी दिन्ना, ते भणंति-परिवाडीए दुज्झउ, तहा कतं, पढमपरिवाडीदोहगो चिंतेति -अज्ज चेव मज्झ दुद्धं, कल्लं अन्नस्स होहिति, ता किं मम तणपाणिएण इह हारवितेण ?, न दिन्नं, एवं सेसेहि वि, गावी मता, अवण्णवादो य धिज्जाइयाणं, तद्दव्वण्णदव्ववोच्छेदो, उक्तं च–

अन्नो दोज्झति कल्लं निरत्थयं से वहामि किं चारिं ?।
चउचरणगवी उ मता अवण्णहानी उ बडुआणं ॥

प्रतिपक्षगौः-मा मे होज्ज अवण्णो गोवज्झा मा पुणो व न लभेज्जा । वयमवि दोज्झामो पुण अनुग्गहो अन्नदूहेऽवि । दार्ष्टान्तिकयोजना –

सीसा पडिच्छगाणं भरोत्ति तेवि य सीसगभरोत्ति ।
न करेंति सुत्तहानी अन्नत्थवि दुल्लहं तेसिं ॥ अविनीयत्तणओ ।

भेर्युदाहरणं पूर्ववत् । आभीर्युदाहरणम् – आभीराणि धयं गड्डीए धेत्तूण पट्टणं विक्किणाणि गयाणि, आढत्ते मप्पे आभीरी हेट्ठओ ठिता पडिच्छति, आभीरोऽवि वारगेण अप्पिणति, कथमवि अनुवउत्तं प्पिणा णे गहणे वा अंतरे वारगो भग्गो, आभीरी भणति - आ सच्च गामेल्लग ! किं ते कडं ?, इतरोऽवि आह–तुमं उम्मत्ता अन्नं पलोएसि अन्नं गेण्हसि, ताणं कलहो, पिट्टापिट्टी जाता, सेसंपि घयं पडियं, उसूरए जंताणं सेसधयरूवगा बलद्दा य तेणेहिं हडा, अणाभागिणो संवुत्ताणि । एवं जो सीसो पच्चुच्चारादि करेंतो अन्नहा परूवेतो पढंतो वा सिक्खावितो भणति-तुमे चेव एवं वक्खाणिअं कहअिं वा –

मा निण्हवेहि दाउं उवजुंजिअ देहि किंचि चितेहि ।
वच्चामेलियदाणे किलिस्ससि तं चऽहं चेव ॥

पडिवक्खे कहाणगं पूर्ववत्; नानात्वं प्रदर्श्यते, भग्गे वा रगे उत्तिण्णो, दोहिवि तुरितं तुरितं कप्परेहिं घतं लइअं, थेवं नट्ठं, सो आभीरो भणत्तिमए छण सुट्ठु पणामितं, सावि भणति -मए न सुट्ठु गहियं । एवं आयरिएण आलावगे दिन्ने विनासितो, पच्छा आयरिओ भणति-मा एवं कुट्टेहि, मया अनुवउत्तेण दिण्णो त्ति, सीसो भणति-मए न सुट्ठु गहितोत्ति । अहवा जहा आभीरो जाणति-एवड्डा धारा धडे माइत्ति, एवं आयरिओऽवि जाणति-एवड्डं आलावगं सक्केहिति गेण्हिउंति गाथार्थः ॥

इत्थमाचार्यशिष्यदोषगुणकथनलक्षणो व्याख्यानविधिः प्रतिपादितः, इदानीं कृतमङ्गलोपचारो व्यावर्णितप्रसङ्गविस्तरः प्रदर्शितव्याख्यानविधिरूपोद्घातदर्शनायाह–

Jain Education International		For Private & Personal Use Only		www.jainelibrary.org

नि. (१४०)उद्देसे १ निद्देसे २ निग्गमे ३ खित्त ४ काल ५ पुरिसे ६ अ ।
कारण ७ पच्चय ८ लक्खण ९ नए १० समोआरणा ११ ऽनुमए १२ ॥

नि. (१४१) किं १३ कइविहं १४ कस्स १५ कहिं १६
केसु १७ कहं १८ केच्चिरं १९ हवइ कालं ।
कइ २० संतर २१ मविरहिअं २२ भवा २३ गरिस २४ फासण २५ निरुत्ती २६ ॥

वृ-उद्देसो वक्तव्यः, एवं सर्वेषु क्रिया योज्या, उद्देशन मुद्देशः-सामान्याभिधानं अध्ययनमिति, निर्देशनं निर्देशः-विशेषाभिधानं सामायिकमिति, तथा निर्गमणं निर्गमः, कुतोऽस्य निर्गमणमिति वाच्यं, क्षेत्रं वक्तव्यं कस्मिन् क्षेत्रे ?, कालो वक्तव्यः कस्मिन् काले ?, पुरुषश्च वक्तव्यः कुतः पुरुषात् ?, कारणं वक्तव्यं किं कारणं गौतमादयः शृण्वन्ति ?, तथा प्रत्याययतीति प्रत्ययः स च वक्तव्यः, केन प्रत्ययेन भगवतेदमुपदिष्टं ? को वा गणधराणां श्रवण इति, तथ लक्षणं वक्तव्यं श्रद्धानादि, तथा नया-नैगमादयः, तथा तेषामेव सववंतरणं वक्तव्यं यत्र संभवति, वक्ष्यति च 'मूढणइयं सुयं कालियं तु' इत्यादि, 'अनुमतं' इति कस्य व्यवहारादेः किमनुमतं सामायिकमिति, वक्ष्यति-'तवसंजमो अनुमओ' इत्यादि, किं सामायिकम् ? 'जीवो गुणपडिवण्णो' इत्यादि वक्ष्यति, कतिविधं सामायिकं ? 'सामाइयं च तिविहं सम्मत्तं सुयं तहा चरित्तं च' इत्यादि प्रतिपादयिष्या ते, कस्य सामायिकमिति, वक्ष्यति-'जस्स सामाणिओ अप्पा' इत्यादि, क्व सामायिकं, क्षेत्रादाविति, वक्ष्यति - 'खेत्तकाल दिसि गति भविय' इत्यादि, केषु सामायिकमिति, सर्वद्रव्येषु, वक्ष्यति-'सव्वगतं सम्मत्तं सुए चरित्ते न पज्जवा सव्वे' इत्यादि, कथमवाप्यते ?, वक्ष्यति-'माणुस्सखित्तजाइ' इत्यादि, कियच्चिरं भवति ? कालमिति, वक्ष्यति -'सम्मत्तस्स सुयस्स य छावट्ठी सागरोवमाइ ठिती' इत्यादि, 'कति' इति कियन्तः प्रतिपद्यन्ते? पूर्वप्रतिपन्ना वेति वक्तव्यं, वक्ष्यति च-'सम्मत्तदेसविरया पलियस्स असंखभागमित्ता उ' इत्यादि, 'सान्तरं' इति सह अन्तरेण वर्त्तते इति सान्तरं, किं सान्तरं निरंतरं वा ?, यदि सान्तरं किमन्तरं भवति ?, वक्ष्यति–

'कालमनंतं च सुते अद्धापरियट्टगो य देसूणो' इत्यादि, 'अविरहितं' इति अविरहितं कियन्तं कालं प्रतिपद्यन्त इति, वक्ष्यति -'सुतसम्मअगारीणं आवलियासणखभाग' इत्यादि, तथा 'भवा' इति कियतो भवान्तुत्कृष्टतः खल्ववाप्यन्ते 'सम्मत्तदेसविरता पलियस्स असंखभागमित्ता उ । अट्ठभवा उ चरित्ते' इत्यादि, आकर्षणमाकर्षः, एकानेकभवेषु ग्रहणानीति भावार्थः, 'तिण्ह सहस्सपुहुत्तं सयपुहुत्तं च होंति विरईए । एगभवे आगरिसा' इत्यादि, स्पर्शना वक्तव्या, कियत्क्षेत्रं सामायिकवन्तः स्पृशन्तीति, वक्ष्यति-'सम्मत्तचरणसहिआ सव्वं लोगं फुसे निरवसेसस' इत्यादि, निश्चिता उक्तिर्निरुक्तिर्वक्तव्या-'सम्मद्दिट्ठी अमोहो सोही सब्भाव दंसणे बाही' इत्यादि वक्ष्यति । अयं तावद्गाथाद्वयसमुदायार्थः, अवयवार्थं तु प्रतिद्वारं प्रपञ्चेन वक्ष्यामः । अत्र कश्चिदाह-पूर्वमध्ययनं सामायिकं तस्यानुयोगद्वारचतुष्टयमुपन्यस्तं, अतस्तदुपन्यास एव उद्देशनिर्देशावुक्तौ, तथौधनामनिष्पन्ननिक्षेपद्वये च, अतः पुनरनयोरभिधानमयुक्तमिति, अत्रोच्यते, तत्र हि अत्र द्वारद्वयोक्तयोरनागतग्रहणं द्रष्टव्यं, अन्यथा तद्भहणमन्तरेण द्वारोपन्यासादय एवं न स्युः, अथवा द्वारोपन्यासादिविहितयोस्तत्राभिधानमात्रं इह त्वर्थानुगम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वाराधिकारे विधानतो लक्षणतश्च व्याख्या क्रियत इति।

आह–यद्येव निर्गमो न वक्तव्यः, तस्यागमद्वार एवाभिहितत्वात्, तथा च 'आत्मागम' इत्याद्युक्तं, ततश्च तीर्थकरगणधरेभ्य एव निर्गतमिति गम्यते इति, उच्यते, सत्यं किंतु इह तीर्थकरगणधराणामेव निर्गमोऽभिधीयते, कोऽसौ तीर्थकरो गणधराश्चेति, वक्ष्यते-वर्धमानो गौतमादयश्चेति, यथा च तेभ्यो निर्गतं तथा क्षेत्रकालपुरुषकारणप्रत्ययविशिष्टमित्यतोऽदोष इति। आह–यद्येव लक्षणं न वक्तव्यं, उपक्रम एव नामद्वारे क्षायोपशमिकभावेऽवतारितत्वात्, प्रमाणद्वारे च जीवगुणप्रमाणे आगमे इति, उच्यते, तत्र निर्देशमात्रत्वात्, इह तु प्रपञ्चतोऽभिधानाददोषः, अथवा तत्र श्रुतसामायिकत्यैवोक्तं, इह तु चतुर्णामपि लक्षणाभिधानाददोषः। आह–नयाः प्रमाणद्वार एवोक्ताः किमिहोच्यन्ते ?, स्वस्थाने च मूलद्वारे वक्ष्यमाणा एवेति, उच्यते, प्रमाणद्वारोक्ता एवेह व्याख्यायन्ते, अथवा प्रमाणद्वाराधिकारात्तत्र प्रमाणभावमात्रमुक्तं, इह तु स्वरूपावधारणमवतारो वाऽऽरभ्यते, एते च सर्व एव सामायिकसमुदायार्थमात्रविषयाः प्रमाणोक्ता उपोद्घातोक्ताश्च नयाः 'सूत्रविनियोगिनः, मूलद्वारोपन्यस्तनयास्तु सूत्रव्याख्योपयोगिन एवेति। आह–प्रमाणद्वारे जीवगुणः सामायिकं ज्ञानं चेति प्रतिपादितमेव, ततश्च किं सामायिक-मित्याशङ्कानुपपत्तिः, उच्यते, जीवगुणत्वे ज्ञानत्वे च सत्मपि किं तज्जीव एव आहोस्विद् जीवादन्यदिति संशयः, तदुच्छित्त्यर्थमुपन्यासाददोषः।

आह–नामद्वारे क्षायोपशमिकं सामायिकमुक्तं तत्तदावरणक्षोपशमाल्लभ्यत इति गम्यत एव, अतः कथं लभ्यत इत्यतिरिच्यते, न, क्षयोपशमलाभस्यैवेह शेषाङ्गलाभचिन्तनादिति। एवं यदुपक्रमनिक्षेपद्वारद्वयाभिहित मपि पुनः प्रतिपादयति अनुगमद्वारावसरे तदशेषं निर्दिष्टनिक्षिप्तप्रपञ्चव्याख्यानार्थमिति। आह–उपक्रमः प्रायः शास्त्रसमुत्थानार्थ उक्तः, अयमप्युपोद्घातः शास्त्रसमुद्घातप्रयोजन एवेति कोऽनयोर्भेदः ? उच्यते, उपक्रमो ह्युद्देशमात्रनियतः, तदुद्दिष्ट-वस्तुप्रबोधनफलस्तु प्रायोणोपोद्घातः, अर्थानुगमत्वात् इत्यलं विस्तरेण, प्रकृतमुच्यते। तत्रोद्देशद्वारावयवार्थप्रतिपादनायेदमाह–

नि. (१४२) नामं ठवणा दविए खेत्ते काले समास उद्देसे।
उद्देसुद्देसंमि अ भावंमि अहोइ अट्ठमओ ॥

वृ- तत्र नामोद्देसः-यस्या जीवादेरुद्देश इति नाम क्रियते, नाम्नो वा उद्देशः नामोद्देशः, स्थापनोद्देशः-स्थापनाभिधानं उद्देशन्यासो वा, 'द्रव्य' इति द्रव्यविषय उद्देशो द्रव्योद्देशः, स च आगमनोआगमज्ञशरीरेतरव्यतिरिक्तः द्रव्यस्य द्रव्येण द्रव्ये वा उद्देशो द्रव्योद्देशः, द्रव्यस्य-द्रव्यमिदमिति, द्रव्येण-द्रव्यपतिरयमिति, द्रव्ये-सिहासने राजा चूते कोकिलः गिरौ मयूर इति, एवं क्षेत्रविषयोद्देशेऽपि वक्तव्यः, एवं कालविषयोऽपीति, 'समासः' संक्षेपस्तद्विषय उद्देशः समासोद्देशः, स च अङ्गश्रुतस्कन्धाध्ययनेषु द्रष्टव्यः, तत्र अङ्गसमासोद्देशः-अङ्गं अङ्गी तदध्येता तदर्थज्ञ इत्येवमन्यत्रापि योजना कार्या, उद्देशः-अध्ययनविशेषः तस्य उद्देश उद्देशोद्देशः, तद्विषयश्च उद्देशी इति, स चोद्देशोद्देशोऽभिधीयते–उद्देशवान् तदध्येता तदर्थज्ञो वेति, भावविषयश्च भवति उद्देशः अष्टमक इति, स चायं-भावः भावी भावज्ञो वेति गाथार्थः ॥ अयमेव ह्युद्देशोऽष्टविधविशिष्टनामसहितो निर्देश इत्यवसेयः, तथा चाह निर्युक्तिकारः-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (१४३) एमेव य निद्देसो अट्ठविहो सोऽवि होइ नायव्वो ।
अविसेसिअमुद्देसो विसेसिओ होइ निद्देसो ॥

वृ- 'एवमेव च' यथा उद्देश उक्तस्तथा, निर्देशोऽप्यष्टविध एव भवति ज्ञातव्यः, सर्वथा साम्यप्राप्त्यतिप्रसङ्गविनिवृत्त्यर्थमाह-किंतु 'अविशेषितः' सामान्याभिधानादिगोचरः उद्देशः, विशेषितस्तु भवति निर्देशः, यथा नामनिर्देशे जिनभद्र इत्याद्यभिधानविशेषनिर्देशः, स्थापनानिर्देशः स्थापनाविशेषाभिधानं निर्देशस्थापना वा, विशिष्टद्रव्याभिधानं द्रव्यनिर्देशः यथा-गौः, तेन वा-अश्ववानित्यादि, एवं क्षेत्रविशेषाभिधानं क्षेत्रनिर्देशः यथा-भरतं, क्षेत्रेण-सौराष्ट्र इत्यादि, कालविशेषाभिधानं कालनिर्देशः यथा-समय इत्यादि, तेन वा-वासन्तिक इत्यादि, समासनिर्देशः-आचाराङ्गं आवश्यक-श्रुतस्कन्धः सामायिकं चेति, उद्देशनिर्देशः-शस्त्रपरिज्ञादेः प्रथमो द्वितीयो वेति, भगवत्यां वा पुद्गलोद्देशो वेति, भावव्यक्तयभिधानं भावनिर्देशः यथा-औदयिक इत्यादि, तेन-औदयिकवान् क्रोधीत्यादि वेति अलं विस्तरेणेति गाथार्थः ॥ इह समासोद्देशनिर्देशाभ्यामधिकारः, कथं ?, अध्ययनमिति समासोद्देशः सामायिकमिति समासनिर्देशः, इदं च सामायिकं नपुंसकम्, अस्य च निर्देष्टा त्रिविधः-स्त्री पुमान् नपुंसकं चेति, तत्र को नयो नैगमादिः कं निर्देशमिच्छतीत्यमुं अर्थमभिधित्सुराह-

नि. (१४४) दुविहंपि नेगमनओ निद्देसं संगहो य ववहारो ।
निद्देसगमुज्जुसुओ उभयसरित्थं च सद्दस्स ॥

वृ- 'द्विविधमपि' निर्देश्यवशात् निर्देशकवशाच्च नैगमनयो निर्देशमिच्छति, कुतः ?, लोकसंव्यवहारप्रवणत्वात् नैकगमत्वाच्चास्येति, लोके च निर्देश्यवशात् निर्देशकवशाच्च निर्देशप्रवृत्तिरुपलभ्यते, निर्देश्यवशात् यथा-वासवदत्ता प्रियदर्शनेति, निर्देशकवशाच्च यथा-मनुना प्रोक्तौ ग्रन्थो मनुः, अक्षपादप्रोक्तोऽक्षपाद इत्यादि, लोकोत्तरेऽपि निर्देश्यवशात् यथा-षड्जीवनिका, तत्र हि षड् जीवनिकाया निर्देश्या इति, एवमाचारक्रियाऽभिधायकत्वाादाचार इत्यादि, तथा निर्देशकवशात् जिनवचनं कापिलीयं नन्दसंहितेत्येवमादि, एवं सामायिकमर्थरूपं रूढितो नपुंसकमितिकृत्वाा नैगमस्य निर्देश्यवशान्नपुंसकनिर्देश एव, तथा सामायिकवतः स्त्रीपुन्नपुंसकलिङ्गत्वात् तत्परिणामानन्यत्वाच्च सामायिकार्थरूपस्य स्त्रीपुंनपुंसकलिङ्गत्वाविरोधमपि मन्यते, तथा निर्देष्टुस्त्रिलिङ्गसंभवात् निर्देशकवशादपि त्रिलिङ्गतामनुमन्यते नैगमः । आह- 'द्विविधमपि नैगमनयः' इत्येतावत्युक्ते निर्देश्यवशात् निर्देशकवशाच्च निर्देशमिच्छतीति क्रियाऽध्याहारः कुतोऽवसीयते इति, उच्यते, यत आह-

'निर्दिष्टं' वस्त्वङ्गीकृत्य, संग्रहो व्यवहारः, चशब्दस्य व्यवहितः संबन्धो, निर्देशमिच्छतीति वाक्यशेषः अत्र भावना-वचनं ह्यर्थप्रकाशकमेवोपजायते, प्रदीपवत्, यथा हि प्रदीपः प्रकाश्यं प्रकाशयन्नेव आत्मरूपं प्रतिपद्यते, एवं ध्वनिरप्यर्थं प्रतिपादयन्नेव, ततस्तत्प्रत्ययोपलब्धेः, तस्मान्निर्दिष्टवशात् निर्देशप्रवृत्तिरिति, ततश्च सामायिकमर्थरूपं रूढितो नपुंसकमतस्तदधिकृत्य संग्रहो व्यवहारश्च निर्देशमिच्छतीति, अथवा सामायिकवतः स्त्रीपुंनपुंसकलिङ्गत्वात् तत्परिणामानन्यत्वाच्च सामायिकार्थस्य त्रिलिङ्गतामपि मन्यत इति । तथा निर्देशकसत्त्वमङ्गीकृत्य सामायिकनिर्देशं ऋजुसूत्रो मन्यते, वचनस्य वक्तुरधीनत्वात् तत्पर्यायत्वात् तद्भावभावित्वादिति । ततश्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदा पुरुषो निर्देष्टा तदा पुंल्लिङ्गता, एवं स्त्रीनपुंसकयोजनाऽपि कार्या, तथा 'उभयसदृशं' निर्देश्यनिर्देशसदृशं, समानलिङ्गमेव वस्त्वङ्गीकृत्य, शब्दस्य निर्देशप्रवृत्तिरिति वाक्यशेषः, एतदुक्तं भवति-उपयुक्तो हि निर्देष्टा निर्देश्याभिन्न एव, तदुपयोगानन्यत्वात्, ततश्च पुंसः पुमांसमभिदधतः पुन्निर्देश एव, एवं स्त्रियाः स्त्रियं प्रतिपादयन्त्याः स्त्रीनिर्देश एवं, एवं नपुंसकस्य नपुंसकमभिदधानस्य नपुंसकनिर्देश एव, यदा तु पुमान् स्त्रियमभिधत्ते, तदा स्त्र्युपयोगानन्यत्वात् स्त्रीरूप एवासौ, निर्देश्यनिर्देशकयोः समानलिङ्गतैव, एवं सर्वत्र योज्यं, असमानलिङ्गनिर्देष्टाऽस्य अवस्त्वेव, यदा पुमान् पुमांसं स्त्रियं चाहेति, कुतः ?, तस्य पुरुषयोषिद्विज्ञानोपयोगभेदाभेदविकल्पद्वारेण पुरुषयोषिदापत्तेः, अन्यथा वस्त्वभावप्रसङ्गात्, तस्मादुपयुक्तो यमर्थमाह स तद्विज्ञानानन्यत्वात्तन्मय एव, तन्मयत्वाच्च तत्समानलिङ्गनिर्देशः, ततश्च सामायिकवक्ता तदुपयोगानन्यत्वात् सामायिकं प्रतिपादयन्नात्मानमेवाह यतःतस्मात्तत्समानलिङ्गाभिधान एवासौ, रूढितश्च सामायिकार्थरूपस्य नपुंसकत्वात्स्त्रियाः पुंसो नपुंसकस्य वा प्रतिपादयतः सामायिकं नपुंसकलिङ्गनिर्देश एवेति गाथासमासार्थः । व्यासार्थस्तु विशेषविवरणादवगन्तव्य इति । सर्वनयमतान्यपि चामूनि पृथग्विपरीतविषयत्वात् न प्रमाणं, समुदितानि त्वन्तर्बाह्यनिमित्तसामग्रीमयत्वात् प्रमाणमिति अलं विस्तरेण, गमनिकामात्रप्रधानत्वात् प्रस्तुतप्रयासस्य ॥

इदानीं निर्गमविशेषस्वरूपप्रतिपादनायाह–

नि. (१४५) नामं ठवणा दविए खित्ते काले तहेव भावे अ।
एसो उ निग्गमस्सा निक्खेवो छव्विहो होइ ॥

वृ- गमनिका–नामस्थापने पूर्ववत्; द्रव्य निर्गमः-आगमनोआगमज्ञशरीरेतरव्यतिरिक्तः, स च त्रिधा-सचित्ताचित्तमिश्रभेदभिन्नः, तत्र सचित्तात्सचित्तस्य यथा पृथिव्या अङ्कुरस्य, सचित्तान्मिश्रस्य यथा-भूमेः पतङ्गस्य, सचित्तादचित्तस्य यथा-भूमेर्बाष्पस्य, तथा मिश्रात्सचित्तस्य यथा-देहात्कृमिकस्य, मिश्रान्मिश्रस्य यथा-स्त्रीदेहाद्गर्भस्य, मिश्रादचित्तस्य यथा-देहाद् विष्ठायाः, अचित्तात्सचित्तस्य यथा–काष्ठात्कृमिकस्य, अचित्तान्मिश्रस्य यथा–काष्ठाद् धुणस्य, अचित्तादचित्तस्य यथा-काष्ठाद् धूणचूर्णस्य । अथवा द्रव्यात् द्रव्यस्य द्रव्यात् द्रव्याणां द्रव्येभ्यो द्रव्यस्य द्रव्येभ्यो द्रव्याणामिति, तत्र द्रव्याद् द्रव्यस्य यथा–रूपकात् रूपकस्य निर्गमः, एकस्मादेव कलान्तरप्रयुक्तादिति भावार्थः, एकस्मादेव कलान्तरतः प्रभूतनिर्गमो द्वितीयभङ्गभावना, प्रभूतेभ्यः स्वल्पकालेनैकस्य निर्गमो भवति तृतीयभङ्गभावना, प्रभूतेभ्यः प्रभूतानां कलान्तरतश्चतुर्थभङ्गभावनेति, 'क्षेत्रे' इति क्षेत्रविषयो निर्गमः प्रतिपाद्यते, एवं सर्वत्र अक्षरगमनिका कार्या, तत्र कालनिर्गमः-कालोह्यमूर्त्तस्तथापि उपचारतो वसन्तस्य निर्गमः दुर्भिक्षाद्वा निर्गतो देवदत्ता बालकालाद्वेति, अथवा कालो द्रव्यधर्म एव, तस्य द्रव्यादेव निर्गमः, तत्प्रभवत्वादिति, एवं भावनिर्गमः तत्र पुद्गलाद्वर्णादिनिर्गमः, जीवोत्क्रोधादिनिर्गमः इति, तयोर्वा पुद्गलजीवयोर्वर्णविशेषत्क्रोधादिभ्यो निर्गम इति, एष एव निर्गमस्य निक्षेपः षड्विध इति गाथार्थः ॥

एवं शिष्यमतिविकाशार्थं प्रसङ्गत उक्तोऽनेकधा निर्गमः, इह च प्रशस्तभावनिर्गममात्रेण अप्रशस्तापगमेन वाऽधिकारः, शेषैरपि तदङ्गत्वाद्, इह च द्रव्यं वीरः क्षेत्रं महासेनवनं कालः प्रमाणकालः भावश्च भावपुरुषः, एवं च निर्गमाङ्गानि द्रष्टव्यानीति एतानि च द्रव्याधीनानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यतः अतः प्रथमं जिनस्यैव मिथ्यात्वादिभ्यो निर्गममभिधित्सुराह–

नि. (१४६) पंथं किर देसित्ता साहूणं अडविविप्पणट्ठाणं ।
सम्मत्तपढमलंभो बोद्धव्वो वद्धमाणस्स ॥

वृ- गमनिका-पन्थानं किल देशयित्वा साधूनां अटवीविप्रनष्टानां पुनस्तेभ्य एव देशनां श्रुत्वा सम्यक्त्वं प्राप्तः, एवं सम्यक्त्वप्रथमलाभो बोद्धव्यो वर्धमानस्येति समुदायार्थः ॥ अवयवार्थः कथानकादवसेयः, तच्चेदम्-अवरविदेहे एगंमि गामे बलाहिओ, सो य रायादेसेन सगडाणि गहाय दारुनिमित्तं महाडविं पविट्ठो, इओ य साहुणो मग्गपवण्णा सत्थेण समं वच्चंति, सत्थे आवासिए भिक्खट्ठं पविट्ठाणं गतो सत्थो, पहावितो, अयाणंता विभुल्ला, मूढदिसा पंथं अयाणमाणा तेन अडविपंथेण मज्झण्हदेसकाले तण्हाए छुहाए अप रद्धा तं देसं गया जत्थ सो सगडसण्णिवेसो, सो यं ते पासित्ता महंतं संवेगमावण्णो भणति-अहो इमे साहुणो अदेसिया तवस्सिणो अडविमनुविट्ठा, तेसिं सो अनुकंपाए विपुलं असनपानं दाऊणं आह–एह भगवं ! जेन पथे नमवयारेमि, पुरतो संपत्थिओ, ताहे तेऽवि साहुणो तस्सेव मग्गेण अनुगच्छंति, ततो गुरू तस्स धम्मं कहेदुमारद्धो, तस्स सो अवगतो, ते पंथं समोयारेत्ता नियत्तो, ते पत्ता सदेस, सो पुन अविरयसम्मद्दिट्ठी कालं काऊण सोहम्मे कप्पे पलिओवमठिइओ देवो जाओ ।

अस्यैवार्थस्योपदशकमिदं गाथाद्वयमाह भाष्यकारः-

[भा.१] अवरविदेहे गामस्स चितओ रायदारुरूवणगमनं ।
साहूभिक्खनिमित्तं सत्था हीने तहिं पासे ॥

[भा.२] दाणन्न पंथनयनं अनुकंप गुरू कहण सम्मत्तं ।
सोहम्मे उववण्णो पलियाउ सुरो महिड्ढीओ ॥

वृ- गमनिका–अवरविदेहे ग्रामस्य चिन्तको राजदारुवनगमनं, निमित्तशब्दलेपोऽत्र द्रष्टव्यः, राजदारुनिमित्तं वनगमनं, साधून् भिक्षानिमित्तं सार्थाद्भ्रष्टाँस्तत्र दृष्टवान्, दानमन्नपानस्य, नयनं पथि अनुकम्पया गुरोः कथनं सम्यक्त्वं प्राप्तः मृत्वा सौधर्म उपपन्नः पल्योपमायुः सुरो महर्द्धिक इति गाथाद्वयार्थः ।

नि. (१४७) लद्धूण य सम्मत्तं अनुकंपाए उ सो सुविहियाणं ।
भासुरवरबोंदिधरो देवो वेमाणिओ जाओ ॥

वृ- लब्ध्वा च सम्यक्त्वं अनुकम्पयाऽसौ सुविहितेभ्यः भास्वरां-दीप्तिमती वरां-प्रधानां 'बोंदि' तनुं धारयतीति समासः, देवो वैमानिको जात इति निर्युक्तिगाथार्थः ॥ तथा च–

नि. (१४८) चइऊण देवलोगा इह चेव य भारहंमि वासंमि ।
इक्खागकुले जाओ उसभसुअसुओ मरीइत्ति ॥

वृ- ततः स्वायुष्कक्षये सति च्युत्वा देवलोकादिहैव भारते वर्षे इक्ष्वाकुकुले 'जातः' उत्पन्नः ऋषभसुतसुतो मरीचिः सामान्येन ऋषभपौत्र इति गाथार्थः ॥ यतश्चैवमतः –

नि. (१४९) इक्खागकुले जाओ इक्खागकुलस्स होइ उप्पत्ती ।
कुलगरवंसेऽईए भरहस्स सुओ मरीइत्ति ॥

वृ- इक्ष्वाकूणां कुलं इक्ष्वाकुकुलं तस्मिन्, 'जातः' उत्पन्नः, भरतस्य सुतो मरीचिरिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योगः, तत्र सामान्यऋषभपौत्रत्वाभिधाने सति इदं विशेषाभिधानमदुष्टमेव, स च कुलकरवंशेऽतीते जातः, तत्र कुलकरा वक्ष्यमाणलक्षणास्तेषां वंशः कुलकरवंशः प्रवाह इति समासः, तस्मिन्नतीते-अतिक्रान्ते इति, यतश्चैवमत इक्ष्वाकुकुलस्य भवति उत्पत्तिः, वाच्येति, यत्र यस्मिन्काले क्षेत्रे च तत्प्रभवस्तन्निदर्शनाय चेदमाह–

नि. (१५०) ओसप्पिणी इमीसे तइयाएँ समाएँ पच्छिमे भागे ।
पलिओवमट्ठभाए सेसंमि उ कुलगुरुप्पत्ती ॥

वृ- गमनिका–अवसर्पिण्यामस्यां वर्त्तमानायां या तृतीया समा-सुषमदुष्षमासमा, तस्याः पश्चिमो भागस्तस्मिन् कियन्मात्रे पल्योपमाष्टभाग एव शेषे तिष्ठति सति कुवकरोत्पत्तिः संजातेति इति गाथार्थः ॥

नि. (१५१) अद्धभरहमज्झिल्लुतिभागे गंगासिंधुमज्झंमि ।
इत्थ बहुमज्झदेसे उप्पन्ना कुलगरा सत्त ॥

वृ- गमनिका–अर्धभरतमध्यमत्रिभागे, कस्मिन् ?-गङ्गासिन्धुमध्ये, अत्र बहुमध्यदेशे न पर्यन्तेषु, उत्पन्नाः कुलकराः सप्त, अर्धं भरतं विद्याधरालयवैताढ्यपर्वतादारतो गृह्यत इति गाथार्थः ॥ इदानीं कुलकरवक्तव्यताभिधायिकां द्वारगाथां प्रतिपादयन्नाह–

नि. (१५२) पुव्वभवजम्मनामं पमाण संघयणमेव संठाणं ।
वण्णित्थियाउ भागा भवणोवाओ य नीई य ॥

वृ- गमनिका–कुलकराणां पूर्वभवा वक्तव्याः, जन्म वक्तव्यंः तथा नामानि प्रमाणानि तथा संहननं वक्तव्यं, एवशब्दः पूरणार्थः, तथा संस्थानं वक्तव्यं तथ वर्णाः प्रतिपादयितव्याः तथा स्त्रियो वक्तव्याः तथा आयुर्वक्तव्यं भागा वक्तव्याः-कस्मिन् वयोभागे कुलकराः संवृत्ता इति, भवनेषु उपपातः भवनोपपातः वक्तव्यः, भवनग्रहणं भवनपतिनिकायोपपात-प्रदर्शनार्थं, तथ नीतिश्च या यस्य हकारादिलक्षणा सा वक्तव्येति गाथासमुदायार्थः, अवयवार्थं तु प्रतिद्वारं वक्ष्यति ॥ तत्र प्रथमद्वारावयवार्थाभिधित्सयेदमाह–

नि. (१५३) अवरविदेहे दो वणिय वयंसा माइ उज्जुए चेव ।
कालगया इह भरहे हत्थी मनुओ अ आयाया ॥

नि. (१५४) दट्ठुं सिनेहकरणं गयमारुहणं च नामनिप्फत्ती ।
परिहानि गेहि कलहो सामत्थण विन्नवण हत्ति ॥

वृ- गमनिका–अपरविदेहे द्वौ वणिग्वयस्यौ मायी ऋजुश्चैव कालगतौ इह भरते हस्ती मनुष्यश्च आयातौ, दृष्ट्वा स्नेहकरणं गजारोहण च नामनिर्वृत्तिः परिहाणिः गृद्धिः कलहः, 'सामत्थणं' देशीवचनतः पर्यालोचनं भण्यते, विज्ञापनाह इति गाथार्थः ॥

भावार्थस्तु कथानकादवसेयः, अध्याहार्यक्रियायोजना च स्वबुद्ध्या प्रतिपदं कार्या, यथा-अपरविदेहे द्वौ वणिग्वयस्यौ अभूतामिति, नवरं हस्ती मनुष्यश्च आयाताविति, अनेन जन्म प्रतिपादितं वेदितव्यं, अवरविदेहे दो मित्ता वाणिअया, तत्थेगो मायी एगो उज्जुगो, ते पुन एगओ चेव ववहरंति, तत्थेगो जो मायी सो तं उज्जुअं अतिसंधेइ, इतरो सव्वमगूहंतो सम्मं सम्मेण ववहरति, दोवि पुन दाणरुई, ततो सो उज्जुगो कालं काऊण इहेव दाहिणड्ढे मिहुणगो

जाओ, वंको पुन तंमि चेव पदेसे हत्थिरयणं जातो, सो य सेतो वण्णेणं चउद्दंतो य, जाहे ते पडिपुण्णा ताहे तेन हत्थिणा हिंडंतेण सो दिट्ठो मिहुणगो, दट्ठूण य से पीती उप्पन्ना, तं च से आभिओगजणिअं कम्ममुदिण्णं, ताहे तेन मिहुणगं खंधे विलइयं, तं दट्ठूणं य तेन सव्वेण लोएण अब्भहियमणूसो एसो इमं च से विमलं वाहणंति तेन से विमल-वाहणोत्ति नामं कयं, तेसिं च जातीसरणं जायं, ताहे कालदोसेणं ते रुक्खा परिहायंति–

मत्तंगा भिंगंगा तुडियं च चित्तगा चित्तरसा ।
गेहागारा अनियणा सत्तमया कप्परुक्खत्ति ॥

तेसु परिहायंतेसु कसाया उप्पन्ना-इमं मम, मा एत्थ कोइ अन्नो अल्लियउत्ति भणितुं पयत्ता, जो ममीकयं अल्लियइ तेन कसाइज्जंति, गेण्हणे अ संखडंति, ततो तेहिं चिंतितं - किंचि अधिपतिं ठवेमो जो ववत्थाओ ठवेति, ताहे तेहिं सो विमलवाहणो एस अम्हेहिंतो अहितोत्ति ठवितो, ताहे तेन तेसिं रुक्खा विरिक्का, भणिया य-जो तुब्भं एयं मेरं अतिक्कमति तं मम कहिज्जाहत्ति, अहं से दंडं करिहामि, सोऽवि किह जाणति ?, जाइस्सरो तं वणियत्तं सरति, ताहे तेसिं जो कोइ अवरज्झइ सो तस्स कहिज्जइ, ताहे सो तेसिं दंडं ठवेति, को पुन दंडो ?, हक्कारो, हा तुमे दुट्ठु कयं, ताहे सो जाणति-अहं सव्वस्सहरणो कतो, तं वरं किर हतो मे सीसं छिन्नं, न य एरिसं विडंबणं पावितोत्ति, एवं बहुकालं हक्कारदंडो अनुवत्तिओ । तस्स य चंदजसा भारिया, तीए समं भोगे भुंजंतस्स अवरं मिथुनं जायं, तस्सवि कालंतरेण अवरं, एवं ते एगवंसंमि सत्त कुलगरा उप्पन्ना । पूर्वभवाः खल्वमीषां प्रथमानुयोगतोऽवसेयाः, जन्म पुनरिहैव सर्वेषां द्रष्टव्यम् । व्याख्यातं पूर्वभवजन्मद्वारद्वयमिति,

इदानीं कुलकरनामप्रतिपादनायाह–

नि. (१५५) पढमित्थ विमलवाहन चक्खुम जसमं चउत्थमभिचंदे ।
तत्तो अ पसेणइए मरुदेवे चेव नाभी य ॥

वृ- गमनिका–प्रथमोऽत्र विमलवाहनश्चक्षुष्मान् यशस्वी चतुर्थोऽभिचन्द्रः ततश्च प्रसेनजित् मरुदेवश्चैव नाभिश्चेति, भावार्थः सुगम एवेति गाथार्थः ॥ गतं नामद्वारम्, अधुना प्रमाणद्वाराव-यवार्थाभिधित्सयाऽऽह–

नि. (१५६) नव धनुसया य पढमो अट्ठ य सत्तद्धसत्तमाइं च ।
छच्चेव अद्धछट्ठा पंचसया पन्नवीसं तु ॥

वृ- नव धनुःशतानि प्रथमः अष्टौ च सप्त अर्धसप्तमानि षड् च अर्धषष्ठानि पञ्च शतानि पञ्चविंशति, अन्ये पठन्ति-पञ्चशतानि विंशत्यधिकानि, यथासंख्यं विमलवाहनादीनामिदं प्रमाणं द्रष्टव्यं इति गाथार्थः ॥ गतं प्रमाणद्वारं, इदानीं कुलकरसंहन्नसंस्थानप्रतिपादनायाह–

नि. (१५७) वज्जरिसहसंघयणा समचउरंसा य हुंति संठाणे ।
वण्णंपि य वुच्छामि पत्तेयं जस्स जो आसी ॥

वृ- गमनिका–वज्रऋषभसंहननाः सर्व एव समचतुरस्राश्च भवन्ति 'संस्थाने' इति संस्थानविषये निरूप्यमाणा इति, वर्णद्वारसंबन्धाभिधानायाह–वर्णमपि च वक्ष्ये प्रत्येकं य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आसीदिति गाथार्थः ॥

नि. (१५८) चक्खूम जसमं च पसेणइअं एए पिअंगुवण्णाभा ।
अभिचंदो ससिगोरो निम्मलकणगप्पभा सेसा ॥

वृ- गमनिका–चक्षुष्मान् यशस्वा च प्रसेनजिच्चैते प्रियङ्गुवर्णाभाः अभिचन्द्रः शशिगौरः निर्मलकनकप्रभाः शेषाः-विमलवाहनादयः, भावार्थः सुगम एव, नवरं निर्मलकनकवत् प्रभा-छाया येषां ते तथाविधा इति गाथार्थः ॥ गतं वर्णद्वारं, स्त्रीद्वारव्याचिख्यासयाऽऽह–

नि. (१५९) चंदजसचंदकंता सरूव पडिरूव चक्खुकंता य ।
सिरिकंता मरुदेवी कुलगरपत्तीण नामाइं ॥

वृ- चन्द्रयशाः चन्द्रकान्ता सुरूपा प्रतिरूपा चक्षुःकान्ता च श्रीकान्ता मरुदेवी कुलकरपत्नीनां नामानीति गाथार्थः ॥ एताश्च संहननादिभिः कुलकरतुल्या एव द्रष्टव्याः, यत आह–

नि. (१६०) संघयणं संठाणं उच्चत्तं चेव कुलगरेहि समं ।
वण्णेण एगवण्णा सव्वाओ पियंगुवण्णाओ ॥

वृ- गमनिका–संहननं संस्थानं उच्चैस्त्वं चैव कुलकरैः-आत्मीयैः, समं-अनुरूपं आसां प्रस्तुतस्त्रीणामिति, किंतु प्रमाणेन ईषन्न्युना इति संप्रदायः, तथापि ईषन्न्यूनत्वान्न भेदाभिधानमिति, वर्णेन एकवर्णाः सर्वाः प्रियङ्गुवर्णा इति गाथार्थः ॥ स्त्रीद्वारं गतं, इदानीं आयुर्द्वारम् –

नि. (१६१) पलिओवमदसमाए पढमस्साउं तओ असंखिज्जा ।
ते आनुपुव्विहीणा पुव्वा नाभिस्स संखेज्जा ॥

वृ- पल्योपमदशभागः, 'प्रथमस्य' विमलवाहनस्य आयुरिति, ततः अन्येषां चक्षुष्मदादीनां असंख्येयानि, पूर्वाणीति योगः, तान्येवानुपूर्वीहीनानि नाभेः संख्येयान्यायुष्कमित्ययं गाथार्थः। अन्ये तु व्याचक्षते-पल्योपमदशभाग एव प्रथमस्यायुः ततो द्वितीयस्य असंख्येयाः-पल्योपमा-सख्येयभागा इति वाक्यशेषः, त एव चानुपूर्वीहीनाः शेषाणामायुष्कं द्रष्टव्याः तावद् यावत्पूर्वाणि नाभेः संख्येयानि इति, अविरुद्धा चेयं व्याख्येति । अन्ये तु व्याचक्षते–पल्योपमदशभागः प्रथमस्य आयुष्कं, ततः शेषाणां 'असंखेज्जा' इति समुदितानां पल्योपमासंख्येयभागाः, एतदुक्तं भवति-द्वितीयस्य पल्योपमासंख्ययभागः, शेषाणां तत एवासंख्येयभागोऽसंख्येयभागः पात्यते तावद्यावन्नाभेः असंख्येयानि पूर्वाणि । इदं पुनरपव्याख्यानं, कुतः ?, पञ्चानामसंख्येयभागानां पल्योपम-चत्वारिंशत्तमभागानुपपत्तेः, कथम् ?, पल्योपमंविंशति भागाः क्रियते तदष्टभागे कुलकरोत्पत्तिः, प्रथमस्य दशभाग आयुः, शेषाणां पञ्चानामर्धरूपाच्चत्वारिंशत्तमभागाद् असंख्या-तोऽसंख्यातो भाग आयुः तथाऽप्यर्धं किञ्चिन्न्यूनं चत्वारिंशत्तमो भागोऽवशिष्यते, यतः कृतविंशतिभागपल्योपमस्य अष्टभागे अष्टभागे इदं भवति, ततोऽपि दशभागे द्वौ जातौ, गताः असंख्याताः पञ्चभागाः, अर्धाद् यदर्ध किञ्चिन्न्युनं स चत्वारिंत्तमो भाग इति, उक्तं च-'पलिओवमट्ठभागे सेसंमि उ कुलगरुप्पत्ती', तत्रापि प्रथमस्य दशमभाग आयुष्कमुक्तं, तस्मिंश्चाप-गते विंशतितमभागद्वयस्य व्यपगमाच्छेषश्चत्वारिंशद्भागोऽवतिष्ठते, स च संख्येय-तमः, ततश्च कालो न गच्छति, आह– अत एव नाभेरसंख्येयानि पूर्वाणि आयुष्कमिष्टं, उच्यते, इष्टमिदं, अयुक्तं चैतत्, मरुदेव्या, संख्येयवर्षायुष्कत्वात्, न हि केवलज्ञानमसंख्येयवर्षायुषां भवतीति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः किमिति चेद्, उच्यते, ततश्च नाभेरपि संख्येयवर्षायुष्कत्वम् ।। यत आह–

नि. (१६२) जं चेव कुलगराण तं चेव होइ तासिंपि ।
जं पढमगस्स आउं तावइयं चेव हत्थिस्स ।।

वृ- गमनिका–यदेव आयुष्कं कुलकराणां तदेव भवति तासामपि–कुलकराङ्गनानां, संख्यासाम्याच्च तदेवेत्यभिधयीते, तथा यत्तु प्रथमस्यायुः कुलकरस्य, तावदेव भवति हस्तिनः, एवं शेषकुलकरहस्तिनामपि कुलकरतुल्यं द्रष्टव्यमिति गाथार्थः ।।

इदानीं भागद्वारं-कः कस्य सर्वायुष्कात् कुलकरभाग इति-

नि. (१६३) जं जस्स आउयं खलु तं दसभागे समं विभइऊणं ।
मज्झिल्लट्ठति भागे कुलगरकालं वियाणाहि ।।

वृ- यद्यस्यायुष्कं खलु तद् दशभागान् समं विभज्य मध्यमाष्टत्रिभागे कुलकरकालं विजानीहीति गाथार्थः ।। अमुमेवार्थं प्रचिकटयिषुराह–

नि. (१६४) पढमो य कुमारत्ते भागो चरमो य वुड्ढभावंमि ।
ते पयणुपिज्जदोसा सव्वे देवेसु उववन्ना ।।

वृ- गमनिका–तेषां दशानां भागानां प्रथमः कुमारत्वे गृह्यते,भागः चरमश्च वृद्धभाग इति, शेषा मध्यमा अष्टौ भागाः कुलकरभागा इति, अत एवोक्तं 'मध्यमाष्टत्रिभागे' इति, मध्यमाश्च ते अष्टौ च मध्यमाष्टौ त एव च त्रिभागस्तस्मिन् कुलकरकालं विजानीहि, गतं भागद्वारं, उपपातद्वारमुच्यते–ते प्रतनुप्रेमद्वेषाः, प्रेम रागे वर्त्तते, द्वेषस्तु प्रसिद्ध एव, सर्वे विमलवाहनादयो देवेषु उपपन्ना इति गाथार्थः ।। न ज्ञायते केषु देवेषु उपपन्ना इति, अत आह–

नि. (१६५) दो चेव सुवण्णेसु उदहिकुमारेसु हुंति दो चेव ।
दो दीवकुमारेसुं एगो नागेसु उववन्नो ।।

वृ- गमनिका–द्वावेव सुपर्णेषु देवेषु उदधिकुमारेषु भवतः द्वावेव द्वौ द्वीपकुमारेषु एको नागेषु उपपन्नः, यथासंख्यमयं विमलवाहनादीनामुपपात इति गाथार्थः ।। इदानीं तत्स्त्रीणां हस्तिनां चोपपातमभिधित्सुराह–

नि. (१६६) हत्थी छच्चित्थीओ नागकुमारेसु हुंति उववन्ना ।
एगा सिद्धिं पत्ता मरुदेवी नाभिणो पत्ती ।।

वृ- गमनिका–हस्तिनः षट् स्त्रियश्चन्द्रयशाद्या नागकुमारेषु भवन्ति उपपन्नाः, अन्ये तु प्रतिपादयन्ति–एक एव हस्ती षट् स्त्रियो नागेषु उपपन्नाः, शेषैर्नाधिकार इति, एका सप्तमी सिद्धिं प्राप्ता मरुदेवी नाभेः पत्नीति गाथार्थः ।। उक्तमुपपातद्वारं, अधुना नीतिद्वारप्रतिपादनायाह–

नि. (१६७) हक्कारे मक्कारे धिक्कारे चेव दंडनीईओ ।
वुच्छं तासि विसेसं जहक्कमं आनुपुव्वीए ।।

वृ- गमनिका–हक्कारः मक्कारः धिक्कारश्चैवं दण्डनीतयो वर्त्तन्ते, वक्ष्ये तासां विशेषं यथाक्रमं-या यस्येति, आनुपूर्व्या-परिपाट्येति गाथार्थः ।।

नि. (१६८) पढमबीयाण पढमा तइयचउत्थाण अभिनवा बीया ।
पंचमछट्ठस्स य सत्तमस्स तइया अभिनवा उ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- गमनिका—प्रथमद्वितीययोः-कुलकरयोः प्रथमा दण्डनीतिः-हक्काराख्या, तृतीयचतुर्थयोरभिनवा द्वितीया, एतदुक्तं भवति—स्वल्पापराधिनः प्रथमया दण्डः क्रियते, महदपराधिनो द्वितीययेत्यतोऽभिनवा सेति, सा च मकाराख्या, तथा पञ्चमषष्ठयोः, सप्तमस्य तृतीयैव अभिनवाधिक्काराख्या, एताश्च लघुमध्यमोत्कृष्टापराधगोचराः खल्ववसेय इति गाथार्थः ॥

नि. (१६९) सेसा उ दंडनीई मानवगनिहीओ होति भरहस्स ।
उसभस्स गिहावासे असक्कओ आसि आहारो ॥

वृ- गमनिका—शेष तु दण्डनीतिः माणवकनिधेर्भवति भरतस्य, वर्त्तमानक्रियाभिधानं इह क्षेत्रे सर्वावसर्पिणीस्थिति-प्रदर्शनार्थं, अन्यास्वप्यतीतासु एष्यासु चावसर्पिणीषु अयमेव न्यायः प्रायो नीत्युत्पाद इति, तस्य च भरतस्य पिता ऋषभनाथः, तस्य च ऋषभस्य गृहवासे असंस्कृत आसीदाहारः-स्वभावसंपन्न एवेति, तस्य हि देवेन्द्रादेशाद्देवाः देवकुरूत्तरकुरूक्षेत्रयोः स्वादूनि फलानि क्षीरोदाच्चोदकमुपनीतवन्त इति गाथार्थः ॥

इयं मूलनिर्युक्तिगाथा, एनामेव भाष्यकृद् व्याख्यानयन्नाह—

[भा.३] परिभासणा उ पढमा मंडलिबंधंमि होइ बीया उ ।
चारग छविछेआई भरहस्स चउव्विहा नीई ॥

वृ- यदुक्तं 'शेषा तु दण्डनीतिर्माणवकनिधेर्भवति भरतस्य' सेयं-परभाषणातु प्रथमा, मण्डलीबन्धश्च भवति द्वितीया तु, चारकः छविच्छेदश्च भरतस्य चतुर्विधा नीतिः, तत्र परिभाषणं परिभाषा—कोपाविष्करणेन मा यास्यसीत्यपराधिनोऽभिधानं, तथा मण्डलीबन्धः-नास्मात्प्रदेशाद् गन्तव्यं, चारको—बन्धनगृहं, छविच्छेदः-हस्तपादनासिकादिच्छेद इति, इयं भरतस्य चतुर्विधा दण्डनीतिरिति । अन्ये त्वेवं प्रतिपादयन्ति—किल परिभाषणामण्डलिबन्धौ ऋषभनाथेनैवोतदिताविति, चारकच्छविच्छेदौ तु माणवकनिधेरुत्पन्नौ इति, भरतस्य-चक्रवर्त्तिन एवं चतुर्विधा नीतिरिति गाथार्थः ॥ अथ कोऽयं भरत इत्याह-ऋषभनाथपुत्रः, अथ कोऽयं ऋषभनाथ इति तद्वक्तव्यताऽभिधित्सयाऽऽह—नाभी गाहा । अथवा प्रतिपादितः कुलकरवंशः, इदानीं प्राक्सूचितेक्ष्वाकुवंशः प्रतिपाद्यते-स च ऋषभनाथप्रभव इत्यतस्तद्वक्तव्यताऽभिधित्सयाऽऽह—

नि (१७०) नाभी विनीअभूमी मरुदेवी उत्तरा य साढा य ।
राया य वइरणाहो विमाणसव्वट्ठसिद्धाओ ॥

वृ- गमनिका—इयं हि निर्युक्तिगाथा प्रभूतार्थप्रतिपादिका, अस्यां च प्रतिपदं क्रियाऽध्याहारः, स चेत्थम्—नाभिरिति नाभिर्नाम कुलकरो बभूव, विनीता भूमिरिति-तस्य विनीताभूमौ प्रायः अवस्थानमासीद्, मरुदेवीति तस्य भार्या, राजा च प्राग्भवे वैरनाभः सन् प्रवज्यां गृहीत्वा तीर्थकरनामगोत्रं कर्म बद्धा मृत्वा सर्वार्थसिद्धिमवाप्य ततस्तस्याः मरुदेव्याः तस्यां विनीतभूमौ सर्वार्थसिद्धाद्विमानादवतीर्य ऋषभनाथः संजातः, तस्योत्तराषाढानक्षत्रमासीत् इति गाथार्थः । इदानीं यः प्रागृभवे वैरनाभः यथा च तेन सम्यक्त्वमवाप्तं यावतो वा भवान् अवाप्तसम्यक्त्वः संसारं पर्यटितः यथा च तेन तीर्थकरनामगोत्रं कर्म बद्धमित्यमुमर्थमभिधित्सुराह—

नि. (१७१) धनसत्थवाह धोसण जइगमन अडविवासठाणं च ।
बहुवोलीणे वासे चिंता घयदानमासि तया ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्र. (१) उत्तरकुरु सोहम्मे महाविदेहे महब्बलो राया ।
ईसाने ललियंगो महाविदेहे वइरजंघो ॥

नि. (१७२) उत्तरकुरु सोहम्मे विदेहि तेगिच्छियस्स तत्थ सुओ ।
रायसुय सेट्ठिमच्चासत्थाहसुया वयंसा से ॥

वृ- अन्या अपि उक्तसंबन्धा एव द्रष्टव्याः तावत् यावत् 'पढमेण पच्छिमेण' गाहा, किंतु यथाऽवसरमसंमोहनिमित्तमुपन्यासं करिष्यामः । प्रथमगाथागमनिका—धनः सार्थवाहो धोषणं यतिगमनं अटवी वर्षस्थानं च वहुवोलीने वर्षे चिन्ता घृतदानमासीत्तदा । द्वितीयगाथा-गमनिका—उत्तरकुरौ सौधर्मे महाविदेहे महाबलो राजा ईशाने ललिताङ्गो महाविदेहे च वैरजङ्घः। इयमन्यकर्त्तुकी गाथा सोपयोगा च । तृतीयगाथा—उत्तरकुरौ सौधर्मे महाविदेहे चिकित्सकस्य तत्र सुतः राजसुतश्रेष्ठ्यमात्यसार्थवाहसुता वयस्याः 'से' तस्य । आसां भावार्थः कथानकाद-वसेयः, प्रतिपदं च अनुरूपः क्रियाऽध्याहारः कार्य इति, यथा—धनः सार्थवाह इति धनो नाम सार्थवाह आसीत्, स हि देशान्तरं गन्तुमना धोषणं कारितवानित्यादि । कथानकम्—

तेणं कालेणं तेणं समएणं अवरविदेशे वासे धनो नाम सत्थवाहो होत्था, सो खितिपतिट्ठिआओ नयराओ वसंतपुरं पट्ठिओ वणिज्जेणं, घोसणयं कारेइ-'जो मए सद्धिं जाइ तस्साहमुदंतं वहामित्ति,' तं जहा-खाणेन वा पाणेन वा वत्थेन वा पत्तेन वा ओसहेन वा भेसज्जेन वा अन्नेन वा केणई जो जेण विसूरइत्ति तं' च सोऊण बहवे तडियकप्पडियादओ पयट्टंति, विभासा, जाव तेन समं गच्छो साहूणं संपट्ठितो, को पुन कालो ?, चरमनिदाघो, सो य सत्थो जाहे अडविमज्झे संपत्तो ताहे वासरत्तो जाओ, ताहे सो सत्थवाहो अइदुग्गमा पंथत्तिकाउं तत्थेव सत्थनिवेसं काउं वासावासं ठितो, तंमि य ठिते सव्वो ठितो, जाहे य तेसिं सत्थिल्लियाणं भोयणं निट्ठियं ताहे कंदमूलफलाणि समुद्दिसिउमारद्धा, तत्थ साहुणो दुक्खिया जदि कहवि अहापवत्ताणि लभंति ताहे गेण्हंति, एवं काले वच्चंते थोवावसेसे वासारत्ते ताहे तस्स धनस्स चिंता जाता-को एत्थ सत्थे दुक्खिओत्ति ?, ताहे सरिअं जहा मए समं साहुणो आगया, तेसिं च कंदाइ न कप्पंति, ते दुक्खिता तवस्सिणो, कल्लं देमित्ति पभाए निमन्तिता भणंति-जं परं अम्ह कप्पिअं होज्जा तं गेण्हेज्जामो, किं पुन तुब्भं कप्पति ?, जं अकयमकारियं भिक्खामेत्तं, जं वा सिणेहादि, तो तेन साहूण घयं फासुयं विउलं दाणं दिण्णं, सो य अहाउयं पालेत्ता कालमासे कालं किच्चा तेन दानफलेन उत्तरकुराए मनसो जाओ, तओ आउक्खएणं सोहम्मे कप्पे देवो उववन्नो,

ततो चइऊण इहेव जंबूदीवे दीवे अवरविदेहे गंधिलावतीविजए वेयड्ढपव्वए गंधारजनवए गंधसमिद्धे विज्जाहरणगरे अतिबलरन्नो नत्ता सयबलराइणो पुत्तो महाबलो नाम राया जाओ, तत्थ सुबुद्धिणा अमच्चेण सावगेण पिअवयस्सेण नाडयपेक्खअक्खित्तमणो संबोहिओ, मासाव-सेसाऊ बावीसदिने भत्तपच्चक्खाणं काउं मरिऊण ईसानकप्पे सिरिप्पभे विमाने ललियंगओ नाम देवो जाओ, ततो चइऊण इहेव जंबूदीवे दीवे पुक्खलावइविजए लोहग्गलणगरसामी वइरजंघो नाम राजा जाओ, तत सभारिओ पच्छिमे वए पव्वयामित्ति चिंतंतो पुत्तेण वासघरे जोगधूवधूविए मारिओ, मरिऊण उत्तरकुराए सभारिओ मिहुणगो जाओ, तओ सोहम्मे कप्पे देवो जाओ, ततो चइऊण महाविदेहे वासे खिइपइट्ठिए नगरे वेज्जपुत्तो आयाओ, जद्दिवसं च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जातो तद्दिवसमेगाहजातगा से इमे चत्तारि वयंसगा तं जहा-रायपुत्ते सेट्ठिपुत्ते अमच्चपुत्ते सत्थाहपुत्तेत्ति, संवड्ढिआ ते, अन्नया कयाइ तस्स वेज्ञस्स घरे एगओ सव्वे सन्निसण्णा अच्छंति, तत्थ साहू महप्पा सो किमिकुट्ठेण गहिओ अइगतो भिक्खस्स, तेहिं सप्पणयं सहासं सो भण्णति-सुब्भेहिं नाम सव्वो लोगो खायव्वो, न तुब्भेहिं तवस्सिस्स वा अनाहस्स वा किरिया कायव्वा, सो भणति-करेज्ञामि, किं पुन ? ममोसहाणि नत्थि, ते भणंति-अम्हे मोल्लं देमो, किं ओसहं जाइज्ञइ ?, सो भणति-कवलरयणं गोसीसचंदणं च, तइयं सहस्सपागं तिल्लं तं मम अत्थि, ताहे मग्गिउं पवत्ता, आगमियं च नेहिं जहा-अमुगस्स वाणियगस्स अत्थि देवि एयाणि, ते गया तस्स सगासं दो लक्खाणि घेत्तुं, वाणिअओ संभंतो भणति-किं देमि ?, ते भणंति-कंवलरयणं गोसीसचंदनं च देहि, तेन भण्णति-किं एतेहिं कज्ञं ?, भणंति-साहुस्स किरिया कायव्वा, तेन भणितं-अलाहि मम मोल्लेण, इहरहा एव गेण्हह, करेह किरियं, ममवि धम्मो होउत्ति, सो वाणियगो चिंतेइ-जइ ताव एतेसिं वालाणं एरिसा सद्धा धम्मस्सुवरिं, मम णाम मंदपुण्णस्स इहलोगपडिबद्धस्स नत्थि, सो संवेगमावण्णो तहारूवाणं थेराणं अंतिए पव्वइओ सिद्धो। अमुमेवार्थं उपसंहरन् गाथाद्वयमाह–

नि. (१७३) विज्ञसुअस्स य गेहे किमिकुट्ठोवद्दुअं जइं दट्ठुं।
बिंति य ते विज्ञसुयं करेहि एअस्स तेगिच्छं ॥

नि. (१७४) तिल्लं तेगिच्छसुओ कंबलगं चंदनं च वाणियओ।
दाउं अभिनिक्खंतो तेनेव भवेन अंतगडो ॥

वृ- वैद्यसुतस्य च गेहे कृमिकुष्ठोपद्रुतं मुनिं दृष्ट्वा वदन्ति च ते वैद्यसुतं-कुरु अस्य चिकित्सां, तैलं चिकित्सकसुतः कम्बलकं चन्दनं च वणिग् दत्त्वा अभिनिष्क्रान्तः, तेनैव भवेन अन्तकृत्, भावार्थः स्पष्ट एव, क्वचित् क्रियाध्याहारः स्वबुद्ध्या कार्य इति गाथाद्वयार्थः ॥

कथानकशेषमुच्यते–इमेवि घेत्तूण तानि ओसहानि गता तस्स साहुणो पासं जत्थ सो उज्ञाणे पडिमं ठिओ, ते तं पडिमं ठिअं वंदिऊण अनुण्णवेंति -अनुजाणह भगवं ! अम्हे तुम्हं धम्मविग्घं काउं उवट्ठिआ, ताहे तेन तेल्लेण सो साहू अब्भंगिओ, तं च तिल्लं रोमकूवेहिं सव्वं अइगतं, तंमि य अइगए किमिओ सव्वे संखुद्धा, तेहिं चलंतेहिं तस्स साहुणो अतीव वेयणा पाउब्भूया, ताहे ते निग्गते दट्ठूण कंबलरयणेण सो पाउओ साहू, तं सीतलं, तं चेव तेल्लं उण्हवीरियं, किमिया तत्थ लग्गा, ताहे पुव्वाणीयगोकडेवरे पप्फोडेंति, ते सव्वे पडिया, ताहे सो साहू चंदनेन लित्तो, ततो समासत्थो, एवेक्कसिं दो तिन्नि वारे अब्भंगेऊण सो साहू तेहिं नीरोगो कओ, पढमं मक्खिज्ञति, पच्छा आलिपति गोसीसचंदणेणं पुणो मक्खिज्ञइ, एवेताए परिवाडीए पढमब्भंगे तयागया णिग्गया बिइयाए मंसगया तइयाए अट्ठिगया बेंदिया निग्गया, ततो संरोहणीए ओसहीए कनगवण्णो जाओ, ताहे खामित्तो पडिगता, ते पच्छा साहू जाता, अहाउयं पालइत्ता तम्मूलागं पंचवि जना अच्चूए उववन्ना, ततो चइऊण इहेव जंबूदीवे पुव्वविदेहे पुक्खलावइविजए पुंडरगिणीए नयरीए वेरसेनस्स रन्नो धारिणीए देवीए उयरे पढमो वइरनाभो णाम पुत्तो जाओ, जो से वेज्ञपुत्तो चक्कवट्टी आगतो, अवसेसा कमेण बाहुसुबाहुपीढमहापीढत्ति, वइरसेणो पव्वइओ, सो य तित्थंकरो जाओ, इयरेवि संवड्ढिया पंचलक्खणे भोए भुंजंति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जद्दिवसं वइरसेणस्स केवलनाणं उप्पन्नं,

त द्दिवसं वइरनाभस्स चक्करयणं समुप्पन्नं, वइरो चक्की जाओ, तेणं साहुवेयावच्चेण चक्कवट्टीभोया उदिन्ना, अवसेसा चत्तारि मंडलिया रायाणो, तत्थ वइरणाभचक्कवट्टिस्स चउरासीति पुव्वलक्खा सव्वउगं, तत्थ कुमारो तीसं मंडलिओ सोलस चउव्वीस महाराया चोद्दस सामण्णपरिआओ, एवं चउरासीइ सव्वाउयं, भोगे भुंजंता विहरंति, इओ य तित्थयर-समोसरणं, सो पिउपायमूले चउहिवि सहोदरेहिं सहिओ पव्वइओ, तत्थ वइरनाभेण चउद्दस पुव्वा अहिज्जिया, सेसा एक्कारसंगवी चउरो, तत्थ बाहू तेसिं वेयावच्चं करेति, जो सुबाहू सो साहुणो वीसामेति, एवं ते करेंते वइरणाभो भगवं अनुवूहइ-अहो सुलद्धं जम्मजीविअफलं, जं साहूणं वेयावच्चं कीरइ, परिस्संता वा साहुणो वीसामिज्जंति, एवं पसंसइ, एवं पसंसिज्जंतेसु तेसु तेसिं दोण्हं पच्छिमाणं अप्पत्तिअं भवइ, अम्हे सज्झायंता न पसंसिज्जामो, जो करेइ सो पसंसिज्जइ, सव्वो लोगववहारोत्ति, वइरनाभेण य विसुद्धपरिनणामेण तित्थगरनामगोत्तं कम्मं बद्धंति ।

अमुमेवार्थमुपसंहरन्निदं गाथाचतुष्टयमाह–

नि. (१७५) साहुं तिगिच्छिऊणं सामण्णं देवलोगगमनं च ।
पुंडरगिणिए उ चुया तओ सुया वइरसेनस्स ॥

नि. (१७६) पढमित्थ वइरनाभो बाहु सुबाहू य पीढमहपीढे ।
तेसि पिआ तित्थअरो निक्खंता तेऽवि तत्थेव ॥

नि. (१७८) पढमो चउदसपुव्वी सेसा इक्कारसंगविउ चउरो ।
बीओ वेयावच्चं किइकम्मं तइअओ कासी ॥

नि. (१७९) भोगफलं बाहुबलं पसंसणा जिट्ठ इयर अचियत्तं ।
पढमो तित्थयरत्तं वीसहि ठाणेहि कासी य ॥

वृ- आसामक्षरगमनिका–साधुं चिकित्सित्वा श्रामण्यं देवलोकमगनं च पौण्डरीकिण्यां च च्युताः, ततः सुता वैरसेनस्य जाता इति वाक्यशेषः, प्रथमोऽत्र वैरनाभः बाहुः सुबाहुश्च पीठमहापीठौ, तेषां पिता तीर्थकरो निष्क्रान्तास्तेऽपि तत्रैव-पितुः सकाशे इत्यर्थः, प्रथमश्चतुर्दश-पूर्वी शेषा एकादशाङ्गविदश्चत्वारः, तेषां चतुर्णां बाहुप्रभृतीनां मध्ये द्वितीयो वैयावृत्त्यं कृतिकर्म तृतीयोऽकार्षीत्; भोगफलं बाहुबलं प्रशंसनं ज्येष्ठ इतरयोरिचयत्तं, प्रथमस्तीर्थकरत्वं विंशतिभिः स्थानैरकार्षीत्, भावार्थस्तु उक्त एव, क्रियाऽध्याहारोऽपि स्वबुद्धया कार्यः, इह च विष्तरभया-न्नोक्त इति गाथाचतुष्टयार्थः ॥ यदुक्तं 'प्रथमस्तीर्थकरत्वं विंशतिभिः स्थानैरकार्षीत्,' तानि स्थानानि प्रतिपादयन्निदं गाथात्रयमाह–

नि. (१७९) अरिहंत सिद्ध पवयणं गुरु थेर बहुस्सुए तवस्सीसुं ।
वच्छल्लया एएसिं अभिक्खनाणोवओगे य ॥

नि. (१८०) दंसण विनए आवस्सए य सीलव्वए निरइआरो ।
खणलव तवच्चियाए वेयावच्चे समाही य ॥

नि. (१८१) अप्पुव्वनाणगहणे सुयभत्ती पवयणे पभावणया ।
एएहिं कारणेहिं तित्थयरत्तं लहइ जीवो ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- तत्र अशोकाद्यष्टमहाप्रातिहार्यादिरूपां पूजामर्हन्तीति अर्हन्तः-शास्तार इति भावार्थः १। सिद्धास्तु अशेषनिष्ठितकर्मांशाः परमसुखिनः कृतकृत्या इति भावार्थः २। प्रवचनं - श्रुतज्ञानं तदुपयोगानन्यत्वाद्वा सङ्घ इति ३। गृणन्ति शास्त्रार्थमिति गुरवः-धर्मोपदेशादिदातार इत्यर्थः ४। स्थविराः -जातिश्रुतपर्यायभेदभिन्नाः, तत्र जातिस्थविरः षष्टिवर्षः श्रुतस्थविरः-समवायधरः पर्यायस्थविरो विंशतिवर्षपर्यायः ५। बहु श्रुतं येषां ते बहुश्रुताः, आपेक्षिकं बहुश्रुतत्वं, एवमर्थेऽपि संयोज्यं, किंतु सूत्रधरेभ्योऽर्थधराः प्रधानाः तेभ्योऽप्युभयधरा इति ६। विचित्रं अनशनदिलक्षणं तपो विद्यते येषां ते तपस्विनः सामान्यसाधवो वा ७। अरहन्तश्च सिद्धाश्च प्रवचनं च गुरवश्च स्थविराश्च बहुश्रुताश्च तपस्विनश्च अर्हत्सिद्धप्रवचनगुरुस्थविरबहुश्रुततपस्विनः। वत्सलभावो वत्सलता, सा चानुरागयथावस्थितगुणोत्कीर्त्तनायथानुरूपोपचारलक्षणा तया, एतेषामर्हदादीनामिति, प्राक् षष्ठ्यर्थे सप्तमी 'बहुस्सुए तवस्सीणं' वा पाठान्तरं, तीर्थकरनामगोत्रं कर्म बध्यत् इति, अभीक्ष्णं-अनवरतं ज्ञानोपयोगे च सति बध्यते ८। दर्शनं-सम्यक्त्वं, विनयो-ज्ञानादिविनयः, स च दशवैकालिकादवसेयः, दर्शनं च विनयश्च दर्शनविनयौ तयोर्निरतिचारः तीर्थकरनामगोत्रं कर्म बध्नाति ९-१० आवश्यकम्-अवश्यकर्त्तव्यं संयमव्यापारनिष्पन्नं तस्मिंश्च निरतिचारः सन्निति ११। शीलानि च व्रतानि च शीलव्रतानि शीलानि-उत्तरगुणाः व्रतानि-मूलगुणाः तेषु च अनतिचार इति १२। क्षणलवग्रहणं कालोपलक्षणं, क्षणलवादिषु संवेग-भावनाध्यानासेवनतश्च बध्यते १३। तथा तपस्त्यागयोर्बध्यते, यो हि यथाशक्त्या तपः आसेवते त्यागं च यतिजने विधिना करोति १५-१६। व्यावृतभावो वैयावृत्त्यं, तच्च दशधा, तस्मिन्सति बध्यते १७। समाधिः-गुर्वादीनां कार्यकरणेन स्वस्थतापादनं समाधौ च सति बध्यते १८। तथा अपूर्वज्ञानग्रहणे सति श्रुतभक्तिः श्रुतबहुमानः, स च विवक्षितकर्मबन्धकारणमिति १९। तथा प्रवचनप्रभावनता च, सा च यथाशक्त्या मार्गदेशनेति २०। एवमेभिः कारणैः अनन्तरोक्तैः तीर्थकरत्वं लभते जीव इति गाथात्रयार्थः ॥

नि. (१८२) पुरिमेण पच्छिमेण य एए सव्वेऽवि फासिया ठाणा।
मज्झिमएहिं जिनेहिं एक्कं दो तिन्नि सव्वे वा ॥

वृ- गमनिका-पुरिमेण पश्चिमेन च एतानि-अनन्तरोक्तानि सर्वाणि स्पृष्टानि स्थानानि, मध्यमैर्जिनैः एकं द्वे त्रीणि सर्वाणि चेति गाथार्थः ॥ आह-

नि. (१८३) तं च कहं वेइज्जइ ? अगिलाए धम्मदेसणाईहिं।
बज्झइ तं तु भगवओ तइयभवोसक्कइत्ताणं ॥

वृ- तच्च तीर्थकरनामगोत्रं कर्म कथं वेद्यत इति, अग्लान्या धर्मदेशनादिभिः, बध्यते तत्तु भगवतो यो भवस्तस्मात् तृतीयं भवमवसर्प्य, अथवा बध्यते तत्तु भगवतस्तृतीयं भवं प्राप्य, ओसक्कइत्ताणंति - तत्स्थितिं संसारं वाऽवसर्प्येति, तस्य ह्युत्कृष्टा सागरोपमकोटीकोटि-र्बन्धस्थितिः, तच्च प्रारम्भबन्धसमयादारभ्य सततमुपचिनोति, यावदपूर्वकरणसंख्येयभागैरिति, केवलिकाले तु तस्योदय इति गाथार्थः ॥ तत्कस्यां गतौ बध्यत् इत्याह-

नि. (१८४) नियमा मनुयगईए इत्थी पुरिसेयरो य सुहलेसो।
आसेवियबहुलेहिं वीसाए अन्नयरएहिं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- गमनिका—नियमात् मनुष्यगतौ बन्ध्यते, कस्तस्यां बध्नातीत्याशङ्कयाह—स्त्री पुरुष इतरो वेति-नपुंसकः, किं सर्व एव ?, नेत्याह—शुभ लेश्या यस्यासौ शुभलेश्यः, स 'आसेवित-बहुलेहिं' बहुलासेवितैः - अनेकधाऽऽसेवितैरित्यर्थः, प्राकृतशैल्या पूर्वापरनिपातोऽ-तन्त्रिं, विंशत्या अन्यतरैः स्थानैर्बध्नातीति गाथार्थः ।।

कथानकशेषमिदानीम्—बाहुणा वेयावच्चकरणेण चक्किभोगा निव्वत्तिया, सुबाहुणा वीसामणाए बाहुबलं निव्वत्तिअं, पच्छिमेहिं दोहिं ताए मायाए इत्थिनामगोत्तं कम्ममज्झितंति, ततो अहाउअमनुपालेत्ता पंचवि कालं काऊण सव्वट्ठसिद्धे विमाणे तित्तीससागरोवमठिइया देवा उववन्ना, तत्थवि अहाउयं अनुपालेत्ता पढमं वइरनाभो चइऊण इमीसे ओसप्पिणीए सुसमसुसमाए वीइक्कंताए सुसमाएवि सुसमदुसमाएवि बहुवीइक्कंताए चउरासीइए पुव्वसय-सहस्सेसु एगुणनउए य पक्खेहि सेसेहिं आसाढबहुलपक्खचउत्थीअ उत्तरासाढजोगजुत्ते मियंके इक्खागभूमीए नाभिस्स कुलगरस्स मरुदेवीए भारियाए कुच्छिसि गब्भत्ताए उववन्नो, चोद्दस सुमिणा उसभगयाईआ पासिय पडिबुद्धा, नाभिस्स कुलगरस्स कहेइ, तेन भणियं-तुब्भं पुत्तो महाकुलकरो भविस्सइ, सक्कस्स य आसनं चलियं, सिग्घं आगमनं, भणइ-देवाणुपिए ! तव पुत्तो सयलभुवणमंगलालओ पढमराया पढमधम्मचक्कवट्टी भविस्सइ, केई भणंति-वत्तीसंपि इंदा आगंतूणं वागरेंतिं, ततो मरूदेवा हट्ठतुट्ठा गब्भं वहइत्ति । अमुमेवार्थमुपसंहरन्नाह—

नि. (१८५) उववाओ सव्वट्ठे सव्वेसिं पढमओ चुओ उसभो ।
रिक्खेण असाढाहिं असाढबहुले चउत्थीए ।।

वृ- गमनिका—उपपातः सर्वार्थे सर्वेषां संजातः, ततश्च आयुष्कपरिक्षये सति प्रथमश्च्युतो ऋषभ ऋक्षेण-नक्षत्रेण आषाढाभिः आषाढबहुले चतुर्थ्यामिति गाथार्थः ।।

इदानीं तद्वक्तव्यताऽभिधित्सया एनां द्वारगाथामाह निर्युक्तिकारः-

नि. (१८६) जम्मणे नाम वुड्डी अ, जाईए सरणे इअ ।
वीवाहे अ अवच्चे अभिसेए रज्जसंगहे ।।

वृ- गमनिका—'जंमण' इति जन्मविषयो विधिर्वक्तव्यः, वक्ष्यति च 'चित्तबहुलट्ठमीए' इत्यादि, नाम इति-नामविषयो विधिर्वक्तव्यः, वक्ष्यति 'देसूणगं च' इत्यादि, 'वुड्डी यत्ति' वृद्धिश्च भगवतो वाच्या, वक्ष्यति च 'अह सो वड्ढति भगवमित्यादि', 'जातीसरणेतियत्ति' जातिस्मरणे च विधिर्वक्तव्यः, वक्ष्यति च 'जाईसरो य' इत्यादि, 'वीवाहे यत्ति' वीवाहे च विधिर्वक्तव्यः, वक्ष्यति च 'भोगसमत्थं' इत्यादि,'अवच्चेत्ति' अपत्येषु क्रमो वाच्यः, वक्ष्यति च 'तो भरहबंभिसुंदरीत्यादि' 'अभिसेगत्ति' राज्याभिषेके विधिर्वाच्यः 'आभोएउं सक्को उवागओ' इत्यादि वक्ष्यति, 'रज्जसंगहेत्ति' राज्यसंग्रहविषयो विधिर्वाच्यः, 'आसा हत्थी गावो' इत्यादि। अयं समुदायार्थः, अवयवार्थं तु प्रतिद्वारं यथावसरं वक्ष्यामः ।

तत्र प्रथमद्वारावयवार्था-भिधित्सयाऽऽह—

नि. (१८७) चित्तबहुलट्ठमीए जाओ उसभो असाढनक्खत्ते ।
जम्मणमहो अ सव्वो नेयव्वो जाव घोसणयं ।।

वृ- गमनिका—चैत्रबहुलाष्टम्यां जातो ऋषभ आषाढानक्षत्रे जन्महश्च सर्वो नेतव्यो यावद्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घोषणमिति गाथार्थः ॥ भावार्थस्तु कथानकादवसेयः, तच्चेदम्-सा य मरुदेवा नवण्हं मासाणं बहुपडिपुण्णाणं अद्धट्ठमाणय राइंदियाणं बहुवीइक्कंताणं अद्धरत्तकालसमयंसि चित्तबहुलट्ठमीए उत्तरसाढानक्खत्ते आरोग्गा आरोग्गं दारयं पयाया, जायमाणेसु य तित्थयरेसु सव्वलोए उज्जोओ भवति, तित्थयरमायरो य पच्छण्णगब्भाओ भवंति जराउहिरकलमलाणि य न हवंति, ततो जाते तिलोयणाहे अहोलोयवत्थव्वाओ अट्ठ दिसाकुमारीओ, तं जहा–

भोगंकरा भोगवती, सुभोगा भोगमालिनी ।
सुवच्छा वच्छमित्ता य, पुप्फमाला अनिंदिया ॥

एयासिं आसनानि चलंति, ततो भगवं उसहसामिं ओहिणा जायं आभोएऊण दिव्वेण जाणविमाणेण सिग्घमागंतूण तित्थयरं तित्थयरजननिं च मरुदेविं अभिवंदिऊण संलवंति-नमोऽत्थु ते जगप्पईवदाईए !, अम्हे णं देवाणुप्पिए ! अहोलोयवत्थव्वाओ अट्ठ दिसाकुमारीओ भगवओ तित्थगरस्स जम्मणमहिमं करेमो तं तुब्भेहि न भाइयव्वंति, ततो तंमि पदेसे अनेगखंभसयसंनिविट्ठं जम्मणभवणं विउव्विऊण संवट्टगपवणं विउव्वंति, ततो तस्स भगवंतस्स जम्मणभवणस्स आ जोयणं सव्वतो समंता तणकट्ठकंटककक्करसक्कराइ तमाहुणिय आहुणिय एगंते पक्खिवंति, ततो खिप्पमेव पच्चुवसमंति, ततो भगवतो तित्थगरस्स जननीसहिअस्स पणामं काऊण नाइदूरे निविट्ठाओ परिगायमाणीओ चिट्ठंति । तओ उड्ढलोगवत्थव्वाओ अट्ठ दिसाकुमारीओ, तं जहा –

मेघंकरा मेघवती, सुमेघा मेघमालिनी ।
तोयधारा विचित्ता य, वारिसेना वलाहया ॥

एयाओऽवि तेनेव विहिणा आगंतूण अब्भवद्दलयं विउव्वित्ता आजोयणं भगवओ जम्मणभवणस्स णच्चोदयं णाइमट्टियं पफुसियपविरलं रयरेणुविनासणं सुरभिगंधोदयवासं वासित्ता पुप्फवद्दलयं विउव्वित्ता जलथलयभासरप्पभूयस्स बिंटट्ठाइस्स दसद्धवण्णस्स कुसुमस्स जाणुस्से-धपमामेत्तं पुप्फवासं वासंति, तं चेव जाव आगायमाणीओ चिट्ठंति। तओ पुरच्छिमरुय-गवत्थव्वाओ अट्ठ दिसाकुमारिसामिणीओ, तं जहा-

नंदुत्तरा य नंदा आनंदा नंदिबद्धणा चेव ।
विजया य वेजयंती जयंति अवराजिया चेव ॥

तहेवागंतूण जाव न तुब्भेहिं बीहियव्वंति भणिऊण भगवओ तित्थगरस्स जननिसहिअस्स पुरिच्छिमेणं आदंसगहत्थिआओ आगायमाणीओ चिट्ठंति । एवं दाहिणरुयगवत्थव्वाओ अट्ठ, तं जहा–

समाहारा सुप्पदिन्ना, सुप्पबुद्धा जसोहरा ।
लच्छिमती भोगवती, चित्तगुत्ता वसुंधरा ॥

तहेवागंतूण जाव भुवगणाणदजणणस्स जणणिसहिअस्स दाहिणेणं भिंगारहत्थगयाओ आगायमाणीओ चिट्ठंति । एवं पच्छिमरुयगवत्थव्वाओऽवि अट्ठ, तं जहा–

इलादेवी सुरादेवी, पुहवी पउमावती ।
एगनासा नवमिआ, सीया भद्दा य अट्ठमा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एयाओऽवि तित्थयरस्स जननिसहिअस्स पच्चत्थिमेणं तालियंटहत्थगयाओ आगायमाणीओ चिट्ठंति । एवं उत्तररुयगवत्थव्वाओऽवि अट्ठ, तं जहा –

अलंबुसा मिस्सकेसी, पुंडरिगिणी य वारुणी ।
हासा सव्वप्पभा चेव, सिरिहिरी चेव उत्तरओ ॥

तहेवागंतूण तित्थगरस्स जननिसहिअस्स उत्तरेण नातिदूरे चामरहत्थगयाओ आगायमाणीओ चिट्ठंति । ततो विदिसिरुयगवत्थव्वाओ चत्तारि विज्जुकुमारीसामिणीओ, तं जहा-चित्ता य चित्तकणगा, सत्तेरा सोसायमणी ॥ तहेवागंतूणं तिहुअणबंधुणो जननिसहिअस्स चउसु विदिसासु दीवियाहत्थगयाओ नाइदूरे आगायमाणीओ चिट्ठंति । ततो मज्झरुयगवत्थव्वाओ चत्तारि दिसाकुमारिपहाणाओ, तं जहा-रूयया रूययंसा, सुरूया रुयगावती ॥ तहेवागंतूण जाव ण उवरोहं गंतव्वंतिकट्टु भगवओ भवियजणकुमुयसंडमंडणस्स चउरंगुलवज्जं नाभिं कप्पेंति, वियरयं खणंति, नाभिं वियरए निहणंति, रयणाणं वैराण य पूरेंति, हरियालियाए य पीढं बंधेंति, भगवओ तित्थयरस्स जम्मणभवणस्स पुरच्छिमदाहिण-उत्तरेण तओ कदीलीहरए विउव्वंति, तेसिं बहुमज्झदेसे तओ चंदसाले विउव्वंति, तेसिं बहुमज्झदेसे तओ सीहासणे विउव्वंति, भगवं तित्थयरं करयलपरिग्गहिअं तित्थगरजणणिं च बाहाअ गिण्हिऊण दाहिणिल्ले कदलीघरचाउस्साले सीहासंणे निवेसिऊण सयपागसहस्सपागेहिं तिल्लेहिं अब्भंगेंति, सुरभिणा गंधवट्टएण उव्वट्टिंति, ततो भगवं तित्थयरं करकमलजुअलरुद्धं काऊण तिहुयणनिव्वुइयरस्स जणणिं च सुइरं बाहाहिं गहाय पुरच्छिमिल्ले कदलीघरचाउस्सालसीहासणे सन्निवेसावेंति, ततो मज्जणविहीए मज्जंति, गंधकासाइएहि अंगयाइं लूहेंति, सरसेणं गोसीसचंदनेनं समालहेंति, दिव्वाइं देव दूसजुअलाइं नियंसंति, सव्वालंकारविभूसियाइं करेंति, तओ उत्तरिल्ले कदलीघरचाउस्सालसीहासणे निसीयाविंति, तओ आभिओगेहिं चुल्लहिमवंताओ सरसाइण गोसीसचंदनकट्ठाइं आणावेऊण अरणीए अग्गिं उप्पाएंति, तेहिं गोसीसचंदणकट्ठेहिं अग्गिं उज्जालेंति, अग्गिहोमं करेंति, भूइकम्मं करेंति, रक्खापोट्टलिअं करेंति, भगवओ तित्थंकरस्स कण्णमूलंसि दुवे पाहाणवट्टए टिटियावेंति, भवउ २ भवं पव्वयाउएत्तिकट्टु भगवंतं तित्थकरं करतलपुडेण तित्थगरमातरं च वाहाए गहाय जेनेव भगवओ जम्मणभवणे जेनेव सयणिज्जे तेनेव उवागच्छंति, तित्थयरजननिं सयणिज्जे निसियावेंति, भगवं तित्थयरं पासं ठवेंति, तित्थकरस्स जननिसहिअस्स नाइदूरे आगायमाणीओ चिट्ठंति ॥ अमुमेवार्थमुपसंहरन्नाह–

नि. (१८८)　संवट्ट मेह आयंसगा य भिंगार तालियंटा य ।
चामर जोई रक्खं करेंति एयं कुमारीओ ॥

वृ- गतार्था, द्वारयोजनामात्रं प्रदर्श्यते-'संवट्ट मेहे' ति संवर्त्तकं मेघम् उक्तप्रयोजनं विकुर्वन्ति, आदर्शकांश्च गृहीत्वा तिष्ठन्ति, भृङ्गारांस्तालवृत्तांश्चेति, तथा चामरं ज्योतिः रक्षां कुर्वन्ति, एतत् सर्वं दिक्कुमार्य इति गाथार्थ ॥ ततो सक्कस्स देविंदस्स नानामणिकिरणसहस्सरंजिअं सीहासनं चलिअं, भगवं तित्थगरं ओहिणा आभोएति, सिग्घं पालएण विमाणेणं एइ, भगवं तित्थयरं जननिं च तिक्खुत्तो आयाहिणपयाहिणं करेइ, वंदइ नमंसइ वंदित्ता नमंसित्ता एवं वयासी-नमोऽत्थु ते रयणकुच्छिधारिए ।, अहं णं सक्के देविंदे भगवओ आदितित्थगरस्स

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

जम्मणमहिमं करेमि, तं णं तुमे ण उवरुज्झियव्वंतिकट्टु ओसोयणिं दलयति, तित्थगरपडिरूवगं विउव्वति, तित्थयरमाउए पासे ठवेति, भगवं तित्थयरं करयलपुडेण गेण्हति, अप्पाणं च पंचधा विउव्वति-

गहियजिणिंदो एक्को दोन्नि य पासंमि चामराहत्था ।
गहिउज्झलायवत्तो एक्को एक्कोऽथ वज्जधरो ।।

ततो सक्को चउव्विहदेवनिकायसहिओ सिग्घं तुरियं मंदरे पव्वए पंडगवने मंदरचूलियाए दाहिणेणं अइपंडुकंबलसिलाए अभिसेयसीहासणे तेनेव उवागच्छाइ, उवागगिच्छत्ता सीहासने पुरच्छाभिमुहे निसीयति एत्थ बत्तीसंपि इंदा भगवओ पादसमीवं आगच्छंति, पढमं अच्चुयइंदोऽभिसेयं करेति, ततो अनु परिवाडीए जाव सक्को ततो चमरादीया जाव चंदसूरत्ति, ततो सक्को भगवओ जम्मणाभिसेयमहिमाए निव्वत्ताए ताए सव्विड्डीए चउव्विहदेवनिकायसहिओ तित्थंकरं घेत्तूण पडियागओ, तित्थगरपडिरूवं पडिसाहरइ, भगवं तित्थयरं जणणीए पासे ठवेइ, ओसोवणि पडिसंहरइ, दिव्वं खोमजुअलं कुंडलजुअलं च भगवओ तित्थगरस्स ऊसीसयमूले ठवेति, एगं सिरिदामगंडं तवणिज्जुज्झललंबूसगं सुवण्णपयरगमंडियं नानामणिरयणहारद्धहारउवसोहियसमुदयं भगवओ तित्थगरस्स उप्पिं उल्लोयगंसि निक्खिवति, जे णं भगवं तित्थगरे अनिमिसाए दिट्ठीए पेहमाणे सुहं सुहेणं अभिरममाणे चिट्ठति, ततो वेसमणो सक्कवयणेणं बत्तीसं हिरण्ण-कोडीओ बत्तीसं सुवण्णकोडीओ बत्तीसं नंदाइं बत्तीसं भद्दाइं सुभगसोभग्गरूवजोव्वणगुणलावण्णं भगवतो तित्थकरस्स जम्मणभवणंभि साहरति, ततो सक्को अभिओगिएहिं देवेहिं महया महया सद्देणं उग्घोसावेइहंदि ! सुणंतु बहवे भवणवइवाणमंतरजोइसिअवेमाअिा देवा य वीओ य जे णं देवाणुप्पिआ ! भगवओ तित्थगरस्स तित्थगरमाऊए वा असुभं मणं संपधारेति, तस्स णं अज्जयमंजरीविव सत्तहा मुद्धाणं फुट्टउत्तिकट्टु घोसणं घोसावेइ; ततो णं भवणवइवाण-मंतरजोइसियवेमाणिआ देवा भगवओ तित्थगरस्स जम्मणमहिमं काऊण गता नंदीसरवरदीवं, तत्थ अट्ठाहिआमहिमाओ काऊण सए सए आलए पडिगतत्ति । जंमणेत्ति गयं, इदानीं नामद्वारं, तत्र भगवतो नामनिबन्धनं चतुर्विंशतिस्तवे वक्ष्यमाणं 'ऊरुसु उसभलंछण उसभं सुमिणंमि तेन उसभजिणो' इत्यादि, इह तु वंशनामनिबन्धनमभिधातुमकाम आह–

नि. (१८९) देसूनगं च वरिसं सक्कागमनं च वंसठवणा य ।
आहारमंगुलीए ठवंति देवा मणुण्णं तु ।।

वृ- देशोनं च वर्षं भगवतो जातस्य तावत् पुनः शक्रागमनं च संजातं, तेन वंशस्थापना च कृता भगवता इति, सोऽयं ऋषभनाथः, अस्य गृहावासे असंस्कृत आसीदाहार इति । किं च-सर्वतीर्थकरा एव बालभावे वर्त्तमाना न स्तन्योपयोगं कुर्वन्ति, किन्त्वाहाराभिलाषे सति स्वामेवाङ्गुलिं वदने प्रक्षिपन्ति, तस्यां च आहारमङ्गुल्यां नानारससमा युक्तं स्थापयन्ति वा 'मनोज्ञं' मनोऽनुकूलम् । एवमतिक्रान्तबालभावास्तु अग्निपक्वं गृह्णन्ति, ऋषभनाथस्तु प्रव्रज्याम-प्रतिपन्नो देवोपनीतमेवाहारमुपभुक्तवान् इत्यभिहितमानुषङ्गिकमिति गाथार्थः ।। प्रकृतमुच्यते–आह-इन्द्रेण वंशस्थापना कृता इत्यभिहितं, सा किं यथाकथञ्चित् कृता आहोस्वित् प्रवृत्तिनिमित्त-पूर्विकेति, उच्यते, प्रवृत्तिनिमित्तपूर्विका, न याद्दच्छिकीय, कथम् ? –

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (१९०) सक्को वंसट्ठवणे इक्खु अगूतेण हुंति इक्खागा ।
जं च जहा जंमि वए जोगं कासी य तं सव्वं ॥

वृ- कथानकमशेषम्-जीतमेतं अतीतपच्चुप्पन्नमनागयाणं सक्काणं देविंदाणं पढमतित्थगराणं वंसट्ठवणं करेत्तएत्ति, ततो तिदसजनसंपरिवुडो आगओ, कहं रित्तहत्थो पविसामित्ति महंतं इक्खुलट्ठिं गहाय आगतो । इओ य नाभिकुलकरो उसभसामिणा अंकगतेण अच्छइ, सक्केण उवागतेण भगवया इक्खुलट्ठीए दिट्ठी पाडियत्ति, ताहे सक्केण भणियं-भयवं ! किं इक्खू अगू-भक्षयसि ?, ताहे सामिणा हत्थो पसारिओ हरिसिओ य, ततो सक्केण चिंयितं-जम्हा तित्थगरो इक्खू अहिलसइ, तम्हा इक्खागवंसो भवउ, पुव्वगा य भगवओ इक्खुरसं पिवियाइया तेन गोत्तं कासवंति । एवं सक्को वंसं ठाविऊणगओ, पुणोवि-'जं च जहा जंमि वए जोग्गं कासी य तं सव्वं'ति । गाथा गतार्था, तथाऽप्यक्षरगमनिका क्रियते-तत्र 'शक्रो' देवराडिति 'वंशस्थापने' प्रस्तुते इक्षुं गृहीत्वा आगमतः, भगवता करे प्रसारिते सत्याह-भगवन् ! किं इक्खु अकुभक्षयसि?, अकुशब्दः भक्षणार्थे वर्त्तते, भगवता गृहीतं, तेन भवन्ति इक्ष्वाकाः-इक्षुभोजिनः, इक्ष्वाकात्रृष-भनाथवंशजा इति । एवं 'यच्च' वस्तु 'यथा' येन प्रकारेण 'यस्मिन्' वयसि योग्यं शक्रः कृतवांश्च तत्सर्वमिति, पश्चार्धपाठान्तरं वा 'तालफलाहयभणिणी होही पत्तीति सारवणा' 'तालफलाहतभगिनी भविष्यति पत्नीति सारवणा' किल भगवओ नन्दायाश्च तुल्यवयःख्याप-नार्थमेव पाठ इति, तदेव तालफलाहत भगिनी भगवतो बालभाव एव मिथुन कैर्नाभिसकाश-मनीता, तेन च भविष्यति पत्नीति सारवणा-संगोपना कृतेति, तथा चानन्तरं वक्ष्यति ''नंदाय सुमंगला सहिओ'' । अन्ये तु प्रतिपादयन्ति-सर्वैवेयं जन्मद्वारवक्तव्यता, द्वारगाथाऽपि किलैवं पठ्यते-'जम्मणे य विवड्ढीय' त्ति, अलं प्रसङ्गेन । इदानीं वृद्धिद्वारमधिकृत्याह-

नि. (१९१) अह वड्ढइ सो भयवं दियलोयचुओ अनोवमसिरीओ ।
देवगणसंपरिवुडो नंदाइ सुमंगला सहिओ ॥

नि. (१९२) असिअसिरओ सुनयणो बिंवुट्ठो धवलदंतपंतीओ ।
वरपउमगब्भगोरो फुल्लुप्पलगंधनीसासो ॥

वृ- प्रथमगाथा निगदसिद्धैव, द्वितीयगाथागमनिका-न सिता असिताः-कृष्णा इत्यर्थः, शिरसि जाताः शिरोजाः-केशाः असिताः शिरोजा यस्य स तथाविधः, शोभने नयने यस्यासौ सुनयनः, बिल्वं (म्बं)-गोल्हाफलं बिल्व (म्ब) वदोष्ठौ यस्यासौ बिल्वो (म्बो) ष्ठः, धवले दन्तपङ्क्ती यस्य स धवलदन्तपङ्क्तिकः, वरपद्मगर्भवद् गौरः पुष्पोत्पलगन्धवन्निः श्वासो यस्येति गाथार्थः ॥ इदानीं जातिस्मरणद्वारावयवार्थं विवरिषुराह-

नि. (१९३) जाइस्सरो अ भयवं अप्परिवडिएहि तिहि उ नाणेहिं ।
कंतीहि य बुद्धीहि य अब्भहिओ तेहि मनुएहिं ॥

वृ- गमनिका-जातिस्मरणश्च भगवान् अप्रतिपतितैरेव त्रिभिर्ज्ञानैः-मतिश्रुतावधिभिः, अवधिज्ञानं हि देवलौकिकमेव अप्रच्युतं भगवतो भवति, तथा कान्त्या च बुद्ध्या च अभ्यधिकस्तेभ्यो मिथुनकमनुष्येभ्य इति गाथार्थः ॥ इदानीं विवाहद्वारव्यचिख्यासयेदमाह-

नि. (१९४) पढमो अकालमच्चू तहिं तालफलेन दारओ पहओ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कण्णा य कुलगरेणं सिट्ठे गहिआ उसहपत्ती ॥

वृ- भगवतो देशोनवर्षकाल एव किञ्चन मिथुनकं संजातापत्यं सद् अपत्यमिथुनकं तालवृक्षाधो विमुच्य रिरंसया क्रीडागृहकमगमत्, तस्माच्च तालवृक्षात् पवनप्रेरितमेकं तालफलमपतत्, तेन दारकोव्यापादितः, तदपि मिथुनकं तां दारिकां संवर्धयित्वा प्रनुकषायं मृत्वा सुरलोक उत्पन्न, सा चोद्यानदेवतेवोत्कृष्टरूपा एकाकिन्येव वने विचचार, दृष्ट्वा च तां त्रिदशवधू-समानरूपां मिथुनकनरा विस्मयोत्फुल्लनयना नाभिकुलकराय न्यवेदयन्; शिष्टे च तैः कन्या कुलकरेण गृहीता ऋषभपत्नी भविष्यतीतिकृत्वा, अयं गाथार्थः ॥ भगवांश्च तेन कन्याद्वयेन सार्धं विहरन् यौवनमनुप्राप्तः, अत्रान्तरे देवराजस्य चिन्ता जाता-कृत्यमेतदतीतप्रत्युत्पन्नानागताा शक्राणां प्रथमतीर्थकराणां विवाहकर्म क्रियत इति संचिन्त्य अनेकत्रिदशसुरवधूवृन्दसमन्वितोऽवतीर्णवान्; अवतीर्य च भगवत्ः स्वयमेव वरकर्म चकार, पत्न्योरपि देव्यो वधूकर्मेति ॥

अमुमेवार्थमुपसंहरन्नाह–

नि. (१९५) भोगसमत्थं नाउं वरकम्मं तस्स कासि देविंदो ।
दुण्हं वरमहिलाणं वहुकम्मं कासि देवीओ ॥

वृ- गमनिका–भोगसमर्थं ज्ञात्वा वरकर्म तस्य कृतवान् देवेन्द्रः, द्वयोः वरमहिलयोर्वधूकर्म कृतवत्यो देव्य इति गाथार्थः, भावार्थस्तूक्त एव ॥ इदानीमपत्यद्वारमभिधित्सुहार–

नि. (१९६) छप्पुव्वसयसहस्सा पुव्विं जायस्स जिनवरिंदस्स ।
तो भरहबंभिसुंदरिबाहुबली चेव जायाइं ॥

वृ- निगदसिद्धैवेयं, नवरमनुत्तरविमानादवतीर्य सुमङ्गलाया बाहुः पीठश्च भरतब्राह्मीमिथुनकं जातं, तथा सुबाहुर्महापीठश्च सुनन्दाया बाहुबली सुन्दरी च मिथुनकमिति ॥

अमुमेवार्थं प्रतिपादयन्नाह मूलभाष्यकारः-

[भा.४] देवी सुमंगलाए भरहो बंभी य मिहुनयं जायं ।
देवीइ सुनंदाए बाहुबली सुंदरी चेव ॥

वृ- सुगमत्वान्न विव्रियते । आह–किमेतावन्त्येव भगवतोऽपत्यानि उत नेति, उच्यते,

नि. (१९७) अउणापन्नं जुअले पुत्ताण सुमंगला पुणो पसवे ।
नीईणमइक्कमणे निवेअणं उसभसामिस्स ॥

वृ- गमनिका–एकोनपञ्चाशत् युग्मानि पुत्राणां सुमङ्गला पुनः प्रसूतवती, अत्रानतरे प्राक् निरूपितानां हक्कारादिप्रभृतानां दण्डनीतीनां ते लोकाः प्रचरतरकसायसंभवाद् अतिक्रमणं कृतवन्तः, ततश्च नीतीनामतिक्रमणे सति ते लोका अभ्यधिकक्षानादिगुणसमन्वितं भगवन्तं विज्ञाय 'निवेदनं' कथनं 'ऋषभस्वामिने' आदितीर्थकराय कृतवन्त इति क्रिया, अयं गाथार्थः।

एवं निवेदिते सति भगवानाह–

नि. (१९८) राया करेइ दंडं सिट्ठे ते बिंति अम्हवि स होउ ।
मग्गह य कुलगरंसो अ बेइ उसभो य भेराया ॥

वृ- गमनिका–मिथुनकैर्निवेदिते सति भगवानाह–नीत्यतिक्रमणकारिणां 'राजा' सर्वनरेश्वरः करोति दण्डं, स च अमात्यारक्षकादिबलयुक्तः कृताभिषेकः अनतिक्रमणीयाज्ञश्च भवति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं 'शिष्टे' कथिते सति भगवता 'ते' मिथुनका 'ब्रुवते' भणन्ति–अस्माकमपि 'स' राजा भवतु, वर्त्तमानकालनिर्देशः खल्वन्यास्वपि अवसर्पिणीषु प्रायः समानन्यायप्रदर्शनार्थः त्रिकालगोचरसूत्रप्रदर्शनार्थो वा, अथवा प्राकृतशैल्या छान्दसत्वाच्च बेंति इति-उक्तवन्तः, भगवानाह–यद्येव 'मग्गह य कुलगरं' ति याचध्वं कुलकरं राजानं, स च कुलकरस्तैर्याचितः सन् 'बेइ' त्ति पूर्ववदुक्तवान्-ऋषभो 'भे' भवतां राजेति गाथार्थः ।। ततश्च ते मिथुनका राज्याभिषेकनिवर्त्तनार्थमुदकानयनाय पद्मिनीसरो गतवन्तः, अत्रान्तरे देवराजयस्य खल्वासनकम्पो बभूव, विभाषा पूर्ववत् यावदिहागतयाभिषेकं कृतवानिति ।

अमुमेवार्थमुपसंहरन् अनुक्तं च प्रतिपादयन्निदमाह–

नि. (१९९) आभोएउं सक्को उवागओ तस्स कुणइ अभिसेअं ।
मउडाइअलंकारं नरिंदजोग्गं च से कुणइ ।।

वृ- गमनिका–'आभोगयित्वा' उपयोगपूर्वकेन अवधिना विज्ञाय 'शक्रो' देवराज उपागतः, 'तस्य' भगवतः करोति 'अभिषेकं' राज्याभिषेकमिति, तथा मुकुटाद्यलङ्कारं च, आदिशब्दात् कटककुण्डलकेयुरादिपरिग्रहः, चशब्दस्य व्यवहितः संबन्धः, नरेन्द्रयोग्यं च 'से' तस्य करोति, अत्रापि वर्त्तमानकालनिर्देशप्रयोजनं पूर्ववदवसेयं, पाठान्तरं वा 'आभोएउं सक्को आगंतु तस्स कासि अभिसेयं । मउडाइअलंकारं नरेंदजोग्गं च से कासी ।।' भावार्थः पूर्ववदेवेति गाथार्थः। अत्रान्तरे ते मिथुनकनरास्तस्मात् पद्मसरसः खलु नलिनीपत्रैरुदकमादाय भगवत्समीपमागत्य तं चालङ्कृतविभूषितं दृष्ट्वा विस्मयोत्फुल्लनयनाः किंकर्त्तव्यताव्याकुलीकृतचेतसः कियन्तमपि कालं स्थित्वा भगवत्पादयोः तदुदकं निक्षिप्तवन्त इति, तानेवंविधक्रियोपेतान् दृष्ट्वा देवराट् अचिन्तयत्–अहो खलु विनीता एते पुरुषा इति वैश्रवणं यक्षराजमाज्ञापितवात् –इह द्वादशयोजनदीर्घां नवयोजनविष्कम्भां विनीतानगरी निष्पादयेति, स चाज्ञासमनन्तरमेव दिव्यभवनप्राकारमालोपशोभितां नगरीं चक्रे । अमुमेवार्थमुहसंहरन्नाह–अत्रान्तरे

नि. (२००) भिसिणीपत्तेहिअरे उदयं घित्तुं छुहंति ।
साहु विनीआ पुरिसा विनीअनयरी अह निविट्ठा ।।

वृ- गमनिका–मिसिनीपत्रैरितरे उदकं गृहीत्वा 'छुभंतित्ति' प्रक्षिपन्ति, वर्त्तमाननिर्देशः प्राग्वत्, पादयोः, देवराजोऽभिहितवान्-साधु विनीताः पुरुषा विनीतनगरी अथ निविष्टेति गाथार्थः ।। गतमभिषेकद्वारम्, इदानीं संग्रहद्वाराभिधित्सयाऽऽह–

नि. (२०१) आसा हत्थी गावो गहिआइं रज्जसंगहनिमित्तं ।
धित्तूण एवमाई चउव्विहं संगहं कुणइ ।।

वृ- गमनिका–अश्वा हस्तिनो गाव एतानि चतुष्पदानि तदा गृहीतानि भगवता राज्ये संग्रहः राज्यसंग्रहस्तन्निमित्तं, गृहीत्वा एवमादि चतुष्पदजातमसौ भगवान् 'चतुर्विधं' वक्ष्यमाणलक्षणं संग्रहं करोति, वर्त्तमाननिर्देशप्रयोजनं पूर्ववत्, पाठान्तरं वा 'चउव्विहं संगहं कासी' इति अयं गाथार्थः ।। स चायम् –

नि. (२०२) उग्गा १ भोगा २ रायण्ण ३ खत्तिआ ४ संगहो भवे चउहा ।
आरक्खि १ गुरु २ वयंसा ३ सेसा जे खत्तिआ ४ ते उ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- गमनिका–उग्रा भोगा राजन्याः क्षत्रिया एषां समुदायरूपः संग्रहो भवेच्चतुर्धा, एतेषामेव यथासंख्यं स्वरूपमाह–आरक्खीत्यादि, आरक्षका उग्रदण्डकारित्वात् उग्राः, गुर्विति गुरुस्थानीया भोगाः, वयस्या इति राजन्याः समानवयस इतिकृत्वा वयस्याः, शेषा उक्तव्यतिरिक्ता ये क्षत्रियाः 'ते तु' तुशब्द पुनः शब्दार्थः ते पुनः क्षत्रिया इति गाथार्थः ॥

इदानीं लोकस्थितिवैचित्र्य-निबन्धनप्रतिपादनमाह–

नि. (२०३)आहारे १ सिप्प २ कम्मे ३ अ, मामणा ४ अ विभूसणा ६ ।
लेहे ६ गणिए ७ अ रूवे ८ अ, लक्खणे ९ माण १० पोअए ११ ॥

वृ- एताश्चतस्त्रोऽपि द्वारगाथाः, एताश्च भाष्यकारः प्रतिद्वारं व्याख्यास्यत्येव, तथाप्यक्षर-गमनिकामात्रमुच्यते, तत्रापि प्रथमगाथामधिकृत्याह–तत्र 'आहार' इति आहारविषयो विधिव-क्तव्यः, कथं कल्पतरुफलाहारासंभवः संवृत्तः ? कथं वा पक्वाहारः संवृत्त इति, तथा 'शिल्प' इति शिल्पविषयो विधिर्वक्तव्यः, कुतः कदा कथं कियन्ति वा शिल्पानि उपजातानि ?, 'कर्मणि' इति कर्मविषयो विधिर्वाच्यः, यथा कृषिवाणिज्यादि कर्म संजातमिति, तच्चाग्नौ उत्पन्ने संजातमिति, 'चः' समुच्चये 'मामणत्ति' ममीकारार्थे देशीवचनं, ततश्च परिग्रहममीकारो वक्तव्यः, स च तत्काल एव प्रवृत्तः, 'चः' पूर्ववत्, विभूषणं विभूषणा मण्डनमित्यर्थः, सा च वक्तव्या, सा च भगवतः प्रथमं देवेन्द्रैः कृता, पश्चाल्लोकेऽपि प्रवृत्ता, 'लेख' इति लेखनं लेखः-लिपीविधानमित्यर्थः, तद्विषयो विधिर्वक्तव्यः, तच्च जिनेन ब्राह्मया दक्षिणकरेण प्रदर्शितमिति, गणित विषयो विधिर्वाच्यः, एवमन्यत्रापि क्रिया योज्या, गणितं-संख्यानं, तच्च भगवता सुन्दर्या वामकरेणोपदिष्टमिति, 'चः' समुच्चये, रूपं-काष्ठकर्मादि, तच्च भगवता भरतस्य कथितमिति, 'चः' पूर्ववत्, 'लक्षणं' पुरुषलक्षणादि, तच्च भगवतैव बाहुबलिनः कथितमिति, 'मानमिति' मानोन्मानावमानगणिमप्रतिमानलक्षणं, 'पोत' इति बोहित्थः प्रोतं वा अनयोर्मान-पोतयोर्विधिर्वाच्यः, तत्र मानं द्विधा-धान्यमानं रसमानं च, तत्र धान्यमानमुक्तम्-'दो असतीओ पसती' इत्यादि, रसमानं तु 'चउसट्ठीया बत्तीसिआ' एवमादि १, उन्मानं-येनोन्मीयते यद्वोन्मीयते तद्यथा-कर्ष इत्यादि २, अवमानं येनावमीयते यद्वाऽवमीयते तद्यथा–हस्तेन दण्डेन वा हस्तो वेत्यादि ३, गणिमं-यद्गण्यते एकादिसंख्ययेति ४, प्रतिमानं-गुञ्जादि ५, एतत्सर्व तदा प्रवृत्तमिति, पोता अपि तदैव प्रवृत्ताः, अथवा प्रकर्षेण उतनं प्रोतः-मुक्ताफलादीनां प्रोतनं तदैव प्रवृत्तमिति प्रथमद्वारगाथासमासार्थः ।

नि. (२०४)ववहारे १२ नीइ १३ जुद्धे १४ अ, ईसत्थे १५ अ उवासना १६ ।
तिगिच्छा १७ अत्थसत्थे १८ अ, बंधे १९ २० अ मारणा २१ ॥

वृ- 'ववहारे' त्ति व्यवहारविषयो विधिर्वाच्यः, राजकुलकरणभाषाप्रदानदिलक्षणो व्यवहारः, स च तदा प्रवृत्तो, लोकानां प्रायः स्वस्वभावापगमात्, 'नीतित्ति' नीतौ विधिर्वक्तव्यः, नीतिः-हक्कारादिलक्षणा सामाद्युपायलक्षणा वा तदैव जातेति, 'जुद्धे यत्ति' युद्धविषयो विधिर्वाच्यः, तत्र युद्धं-बाहुयुद्धादिकं लावकादीनां वा तदैवेति, 'ईसत्थे यत्ति' प्राकृतशैल्या सुकारलोपात् इषुशास्त्रं-धनुर्वेदः तद्विषयश्च विधिर्वाच्य इति, तदपि तदैव जातं राजधर्मे सति, अथवा एकारान्ताः सर्वत्र प्रथमान्ता एव द्रष्टव्याः, व्यवहार इति-व्यवहारस्तदा जातः, एवं सर्वत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योज्यं, यथा–'कयरे आगच्छति दित्तरूवे इत्यादि' 'उवासणेति' उपासना-नापितकर्म तदपि तदैव जातं, प्राग्व्यवस्थितनखलोमान एव प्राणिन आसन् इति, गुरुनरेन्द्रादीना वोपासनेति, 'चिकित्सा' रोगहरणलक्षणा सा तदैव जाता एवं सर्वत्र क्रियाध्याहारः कार्यः, 'अत्थसत्थे य' त्ति अर्थशास्त्रं, 'बंधे धाते य मारणे ति' बन्धो–निगडादिजन्यः घातो-दण्डादिताडना जीवितादृव्यपरोपणं मारणेति, सर्वाणि तदैव जातानीति द्वितीयद्वारगाथासमासार्थः ।

नि. (२०५)जण्णू २२ सव २३ समवाए २४, मंगले २५ कोउगे २६ इअ ।
वत्थे २७ गंधे २८ अ मल्ले २९ अ, अलंकारे ३० तहेव य ॥

वृ- एकारान्ताः प्रथमद्वितीयान्ताः प्राकृते भवन्त्येव, तत्र यज्ञाः-नागादिपूजारूपा उत्सवाः-शक्रोत्सवादयः समवायाः-गोष्ठ्यादिमेलकाः, एते तदा प्रवृत्ताः, मङ्गलानि-स्वस्तिकसिद्धार्थकादीनि कौतुकानि-रक्षादीनि मङ्गलानि च कौतुकानि चेति समासः, मंगलेत्ति एकारः अलाक्षणिको मुखसुखोच्चारणार्थः, एतानि भगवत्‌ः प्राग् देवैः कृतानि, पुनस्तदैव लोके प्रवृत्तानि, तथा 'वस्त्रं' चीनांशुकादि 'गन्धः' कोष्ठपुटादिलक्षणः 'माल्यं' पुष्पदाम 'अलङ्कारः' केशभूषणादिलक्षणः, एतान्यपि वस्त्रादीनि तदैव जातानीति तृतीयद्वारगाथासमासार्थः ।

नि. (२०६)चोलो ३१ वण ३२ विवाहे ३३ अ, दत्तिआ ३४ मडयपूअणा ३५ ।
झावणा ३६ थूभ सद्दे ३८ अ, छेलावणय ३९ पुच्छणा ४० ॥

वृ- तत्र 'चूलेति' बालानां चूडाकर्म, तेषामेव कलाग्रहणार्थं नयनमुपनयनं धर्मश्रवणनिमित्तं वा साधूसकाशं नयनमुपनयनं, 'वीवाहः' प्रतीत एव, एते चूडादयः तदैव प्रवृत्ताः, दत्ता च कन्या पित्रादिना परिणीयत इत्येतत्तदैव संजातं, भिक्षादानं वा, मृतकस्य पूजना मरुदेव्यास्तदैव प्रथमसिद्ध इतिकृत्वा देवैः कृतेति लोको च रूढा, 'ध्यापना' अग्निसंस्कारः, स च भगवतो निर्वाणप्राप्तस्य प्रथमं त्रिदशैः कृतः, पश्चाल्लोकेऽपि संजातः, भगवदादिदग्धस्थानेषु स्तूपाः तदैव कृता लोके च प्रवृत्ताः, शब्दश्च-रुदितशब्दो भगवत्येवापवर्गं गते भरतदुःखमसाधारणं ज्ञात्वा शक्रेण कृतः, लोकेऽपि रूढ एव, 'छेलापनकमिति' देशीवचनमुत्कृष्टबालक्रीडापनं सेण्टिताद्यर्थवाचकमिति, तथा पृच्छनं पृच्छा, सा इङ्खिणिकादिलक्षणा इङ्खिणिकाः कर्णमूले घण्टिका चालयन्ति, पुनर्यक्षाः खल्वागत्य कर्णे कथयन्ति किमपित प्रष्टुर्विवक्षितमिति, अथवा निमित्तादिप्रच्छना सुखशयितादिप्रच्छना वेति चतुर्थद्वारगाथासमासार्थः ॥

इदानीं प्रथमद्वारगाथाऽऽद्यद्वारावयवार्थाभिधित्सया मूलभाष्यकृदाह–

[भा.५]　　आसी अ कंदहारा मूलाहार य पत्तहारा य ।
पुप्फफलभोइणोऽवि अ जइआ किर कुलगरो उसभो ॥

वृ- गमनिका–आसंश्च कन्दाहारा मूलाहाराश्च पत्राहाराश्च पुष्पफलभोजिनोऽपि च, कदा?, यदा किल कुलकर ऋषभः । भावार्थः स्पष्ट एव । नवरं ते मिथुनका एवंभूता आसन्; किलशब्दस्तु परोक्षाप्ताऽऽगमवादसंसूचक इति गाथार्थः ॥ तथा

[भा.६]　　आसी अ इक्खुभोई इक्खागा तेन खत्तिआ हुंति ।
सणसत्तरसं धण्णं आभं ओमं च भुंजीआ ॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

वृ- गमनिका—आसंश्च इक्षुभोजिन इक्ष्वाकवस्तेन क्षत्रिया भवन्ति, तथा च शणः सप्तदशो यस्य तत् शणसप्तदशं 'धान्यं' शाल्यादि 'आमं' अपक्कं 'ओमं' न्यूनं च 'भुंजीआ' इति भुक्तवन्त इति गाथार्थः ॥ तथापि तु कालदोषात्तदपि न जीर्णवन्तः, ततश्च भगवन्तं पृष्टवन्तः, भगवाँश्चाह—हस्ताभ्यां घृष्ट्वाऽऽहारयध्वमिति । अमुमेवार्थं प्रतिपादयन्नाह मूलभाष्यकृत्—

[भा.७] ओमंपाहारंता अजीरमाणंमि ते जिणमुविंति ।
हत्थेहिं घंसिऊणं आहारेहत्ति ते भणिआ ॥

वृ- गमनिका—ओममप्याहारयन्तः अजीर्यमाणे 'ते' मिथुनका 'जिनं' प्रथमतीर्थकरं उपयान्ति, सर्वावसर्पिणीस्थितिप्रदर्शनार्थो वर्त्तमाननिर्देशो, भगवता च हस्ताभ्यां घृष्ट्वा आहारयध्वमिति ते भणिताः सन्तः । किम् ?–

[भा.८] आसी अपाणिघंसी तिम्मिअतंदुलपवालपुडभोई ।
हत्थलपुडाहारा जइआ किर कुलकरो उसहो ॥

वृ- आसँश्च ते मिथुनका भगवदुपदेशात् पाणिभ्यां घर्ष्टु शीलं येषां ते पाणिघर्षिणः, एतदुक्तां भवति-ता एवौषधीः हस्ताभ्यां घृष्ट्वा त्वचं चापनीय भुक्तवन्तः, एवमपि कालदोषात् कियत्यपि गते काले ता अपि न जीर्णवन्तः, पुनर्भगवदुपदेशत एव तीमिततन्दुलप्रवालपुटभोजिनो बभूवुः, तीमिततन्दुलान् प्रवालपुटे भोक्तुं शीलं येषां ते तथाविधाः, तन्दुलशब्देन औषध्य एवोच्यन्ते। पुनः कियताऽपि कालेन गच्छता अजरणदोषादेव भगवदुपदेशेन हस्ततलपुटाहारा आसन्; हस्ततलपुटेषु आहारो विहितो येषामिति समासः, हस्ततलपुटेषु कियन्तमपि कालमौषधीः स्थापयित्वोपभुक्तवन्त इत्यर्थः । तथा कक्षासु स्वेदयित्वेति, यदा किल कुलकरो वृषभः, किलशब्दः परोक्षाप्तागमवादसंसूचकः, तदा ते मिथुनका एवंभूता आसन्निति गाथार्थः ॥ पुनरभिहित-प्रकारद्व्यादिसंयोगैराहारितवन्तः, तद्यथा—पाणिभ्यां घृष्ट्वा पत्रपुटेषु च मुहूर्त्त तीमित्वा तथा हस्ताभ्यां घृष्ट्वा हस्तपुटेषु च मुहूर्त्तं घृत्वा पुनर्हस्ताभयां घृष्ट्वा कक्षास्वेदं च कृत्वा पुनस्तीमित्वा हस्तपुटेषु च मुहूर्त्तं घृत्वेत्यादिभङ्गकयोजना, केचित् प्रदर्शयन्ति घृष्ट्वापदं विहाय, तच्चायुक्तं, त्वगपनयनमन्तरेण तीमितस्यापि हस्तपुटघृतस्य सौकुमार्यत्वानुपपत्तेः, श्लक्ष्णत्वग्भावत्वाद्वा अदोष इति, द्वितीययोजना पुनः-हस्ताभ्यां घृष्ट्वा पत्रपुटेषु च तीमित्वा हस्तपुटेषु च धृत्वा कक्षासु स्वेदयित्वेति ॥ अमुमेवार्थमुपसंहरन्नाह—

[भा.९] घंसेऊणं तिम्मण घंसणतिम्मणपवालपुडभोई ।
घंसणतिम्मपवाले हत्थउडे कक्खसेए य ॥

वृ- भावार्थ उक्त एव, नवरम् उक्तार्थक्षरयोजना-घृष्ट्वा तीमनं कृतवन्त इत्यनेन प्रागभिहितप्रत्येकभङ्गकाक्षेपः कृतो वेदितव्य, 'घृष्टप्रवालपुटतीमितभोजिन' इत्यनेन द्वितीय-योजनाक्षेपः, 'घृष्ट्वेति' तिमनं 'प्रवाल' इति प्रवाले तिमित्वा हस्तपुटे कियन्तमपि कालं विधाय भुक्तवन्त इति शेषः, इत्यनेन तृतीययोजनाक्षेपः, तथा कक्षास्वेदे च कृते सति भुक्तवन्त इत्यनेन अनन्तराभिहितत्रययुक्त चतुर्भङ्गकयोजनाक्षेप इति गाथार्थः ॥ अत्रान्तरे—

[भा.१०] अगनिस्स य उट्ठाणं दुमघंसा दट्ठू भीअपरिकहणं ।
पासेसुं परिछिंदह गिण्हइ पागं च तो कुणह ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- आह–सर्वं तीमनादि ते मिथुनकास्तीर्थकरोपदेशात्कृतवन्तः, स च भगवान् जातिस्मरः, स किमित्यग्न्युत्पादोपदेशं न दत्तवानिति, उच्यते, तदा कालस्यैकान्तस्निग्धत्वात् सत्यपि यत्ने वह्न्यनुत्पत्तेरिति । स च भगवान् विजानाति-न ह्येकान्तस्निग्धरूक्षयोः कालयोर्वह्न्युत्पादः किंतु अनतिस्निग्धरूक्षकाल इत्यतो नादिष्टवानिति, ते च चतुर्थभङ्गविकल्पितपप्याहारं कालदोषान्न जीर्णवन्त इत्यस्मिन्प्रस्तावे अग्नेश्चोत्थानं संवृत्तमिति, कुतः ?, द्रुमघर्षात्, तं चोत्थितं प्रवृद्धज्वालावलीसनाथं भूप्राप्तं तृणादि दहन्तं दृष्ट्वा अपूर्वरत्नबुद्ध्या ग्रहणं प्रति प्रवृत्तवन्तः, दह्यमानास्तु भीतपरिकथनं ऋषभाय कृतवन्त इति, भीतानां परिकथनं भीतपरिकथनं, भीत्या वा परिकथनं भीतिपरिकथनं पाठान्तरमिति । भगवानाह–'पार्श्वे'त्यादि, सुगमं, ते ह्यजानाना वह्नावेवौषधीः प्रक्षिप्तवन्तः, ताश्च दाहमापुः, पुनस्ते भगवतो हस्तिस्कन्धगतस्य न्यवेदयन्–स हि स्वयमेवौषधीर्भक्षयतीति, भगवानाह–न तत्रातिरोहितानां प्रक्षेपः क्रियते, किन्तु मृत्पिण्डमानयध्वमिति, तैरानीतः, भगवान् हस्तिकुम्भे पिण्डं निधाय पत्रकाकारं निदर्श्येद्दशानि कृत्वा इहैव पक्त्वा एतेषु पाकं निवर्त्तयध्वमित्युक्तवानिती, ते तथैव कृतवन्तः, इत्थं तावत्प्रथमं कुम्भकारशिल्पमुत्पन्ननम् ।। अमुमेवार्थमुपसंहरन्नाह–

[भा.११] पक्खेव डहणमोसहि कहणं निग्गमण हत्थिसीसंमि ।
पयणारंभपवित्ती ताहे कासी अ ते मनुआ ।।

वृ- भावार्थ उक्त एव, किन्तु क्रियाऽध्याहारकरणेन अक्षरगमनिका स्वबुद्ध्या कार्या, यथा-प्रक्षेपं कृतवन्तो दहनमौषधीनां बभूवेत्यादि ।। उक्तमाहारद्वारं, शिल्पद्वारावयवार्थाभिधित्सयाऽऽह–

नि. (२०७) पंचेव य सिप्पाइं घड १ लोहे २ चित्त ३ नंत ४ कासवए ५ ।
इक्किक्कस्स य इत्तो वीसं वीसं भवे भेया ।।

वृ- पञ्चैव 'शिल्पानि' मूलशिल्पानि, तद्यथा-घडलोहे चित्तनंतकासवए, तत्र घट इति-कुम्भकारशिल्पोपलक्षणं, लोहमिति–लोहकारशिल्पस्य चित्रमिति-चित्रकरशिल्पस्य नंतमिति–देशीवचनं वस्त्रशिल्पस्य काश्यप इति-नापितशिल्पस्य, एकैकस्य च एभ्यो विंशतिविंशतिः भवन्ति भेदा इति गाथार्थः ।। साम्प्रतं शेषद्वारावयवार्थप्रतिपादनायाऽऽह भाष्यकारः–

[भा.१२] कम्मं किसिवाणिज्जाइ ३ मामणा जा परिग्गहे ममया ४ ।
पुव्विं देवेहिं कया विभूसणा मंडणा गुरुणो ५ ।।

[भा.१३] लेहं लिवीविहाणं जिनेन बंभीइ दाहिणकरेणं ६ ।
गणिअं संखाणं सुंदरीइ वामेण उवइट्ठं ७ ।।

[भा.१४] भरहस्स रूवकम्मं ८ नराइलक्खणमहोइअं बलिणो ९ ।
मानुम्मानवमाणप्पमाणगणिमाइवत्थूणं १० ।।

[भा.१५] मणिआई दोराइसु पोआ तह सागरंमि वहणाइं ११ ।
ववहारो लेहवणं कज्जपरिच्छेदणत्थं वा १२ ।।

[भा.१६] नीई हक्काराई सत्तविहा अहव सामभेआई १३ ।
जुद्धाइ बाहुजुद्धाइआइ वट्टाइआणं वा १४ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१७] ईसत्थं धनुवेओ १५ उवासणा मंसुकम्ममाईआ १६ ।
गुरुरायाईणं वा उवासणा पज्जुवासणया ॥
[भा.१८] रोगहरणं तिगिच्छा १७ अत्थागमसत्थमत्थसत्थंति १८ ।
निअलाइजमो बंधो १९ घाओ दंडाइताडणया २० ॥
[भा.१९] मारणया जीववहो २१ जण्णा नागाइआण पूआओ २२ ।
इणदाइमहा पायं पइनिअया ऊसवा हुंति २३ ॥
[भा.२०] समवाओ गोट्ठीणं गामाईणं च संपसारो वा २४ ।
तह मंगलाइं सत्थिअसुवण्णसिद्धत्थयाईणि २५ ॥
[भा.२१] पुव्विं कयाइ पहुणो सुरेहि रक्खाइ कोउगाइं च २६ ।
तह वत्थगंधमल्लालंकारा केसभूसाईं २७-२८-२९-३० ॥
[भा.२२] तं दट्ठूण पवत्तोऽलंकारेउं जनोऽवि सेसोऽवि ।
विहिणा चूलाकम्मं बालाणं चोलया नाम ३१ ॥
[भा.२३] उवनयनं तु कलाणं गुरुमूलं साहुणो तओ धम्मं ।
धित्तुं हवंति सड्डा केई दिक्खं पवज्जंति ३२ ॥
[भा.२४] दट्ठुं कयं विवाहं जिनस्स लोगोऽवि काउमारद्धो ३३ ।
गुरुदत्तिआ य कण्णा परिणिज्जंते तओ पायं ॥
[भा.२५] दत्तिव्व दानमुसभं दितं दट्ठूं जनंमिवि पवत्तं ।
जिनभिक्खादानंपि हु, दट्ठूं भिक्खा पवत्ताओ ३४ ॥
[भा.२६] मडयं मयस्स देहो तं मरूदेवीइ पढमसिद्धुत्ति ।
देवेहि पुरा महिअं ३५ झावणया अग्गिसक्कारो ॥
[भा.२७] सो जिनदेहाईणं देवेहि कओ ३६ चिआसु थूभाईं ३७ ।
सद्दो अरुण्णसद्दो लोगोऽवि तओ तहा पगओ ३८ ॥
[भा.२८] छेलावणमुक्किट्ठाइ बालकीलावणं व सेंटाई ३९ ।
इंखिणिआइ रुअं वा पुच्छा पुन किं कहं कज्जं ?॥
[भा.२९] अहव निमित्ताईणं सुहसइआइ सुहदुक्खपुच्छा वा ४० ।
इच्चेवमाइ पाएणुप्पन्नं उसभकालंमि ॥
[भा.३०] किंचिच्च (त्थ) भरहकाले कुलगरकालेऽवि किंचि उप्पन्नं ।
पहुणा य देसिआइं सव्वकलासिप्पकम्माइं ॥

वृ- एताश्च स्पष्टत्वात् प्रायो द्वारगाथाव्याख्यान एव च व्याख्यातत्वात् न प्रतन्यन्ते ॥

नि. (२०८) उसभचरिआहिगारे सव्वेसिं जिनवराण सामण्णं ।
संबोहणाइ वुत्तुं वुच्छं पत्तेअमुसभस्स ॥

वृ- ऋषभचरिताधिकारे 'सर्वेषाम्' अजितादीनां जिनवराणां 'सामान्यं' साधारणं संबोधनादि, आदिशब्दात् परित्यागादिपरिग्रहः, वक्तुं, किम् ?, वक्ष्यति निर्युक्तिकारः प्रत्येकं केवलस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऋषभस्य वक्तव्यतामिति गाथार्थः ॥

नि. (२०९) संबोहण १ परिच्चाए २, पत्तेअं ३ उवहिंमि अ ४ ।
अन्नलिगे कुलिगे अ ५, गामायार ६ पीरसहे ७ ॥

वृ- स्वयंबुद्धाः सर्व एव तीर्थकृतस्तथकिप तु कल्प इतिकृत्वा लोकान्तिका देवाः सर्वतीर्थकृतां संबोधनं कुर्वन्ति । परित्याग इति–परित्यागविषयो विधिर्वक्तव्यः, किं भगवन्तश्चारित्रप्रतिपत्तौ परित्यजन्तीति । प्रत्येकमिति–कः कियत्परिवारो निष्क्रान्तः । उपधाविति-उपधिविषयो विधिर्वक्तव्यः, कः केनोपधिरासेवितः, को वा विनेयानामनुज्ञात इति । 'अन्यलिङ्गं' साधुलिङ्गं 'कुलिङ्गं' तापसादिलिङ्गं, तत्र न ते अन्यलिङ्गे निष्क्रान्ता नापि कुलिङ्गे, किंतु तीर्थकरलिङ्ग एवेति, ग्राम्याचाराः-विषयाः परीषहाः-क्षुत्पिपासादयः, तत्र ग्राम्याचारपरीषहयोर्विधिर्वाच्यः, कुमारप्रव्रजितैर्विषया न भुक्ताः शेषैमुक्ताः, परीषहाः पुनः सर्वैर्निर्जिता एवेति प्रथमद्वारगाथा-समासार्थः ।

नि. (२१०)जीवोवलंभ ८ सुयलंभे ९, पच्चक्खाणे १० अ संजमे ११।
छउमत्थ १२ तवोकम्मे १३, उप्पायिा नाण १४ संगहे १५ ॥

वृ- तत्र जीवोपलम्भः-सर्वैरेव तीर्थकरैर्नव जीवादिपदार्था उपलब्धा इति । श्रुतलाभः-पूर्वभवे प्रथमस्य द्वादशाङ्गानि खल्वासन् शेषाणामेकादशेति । प्रत्याख्यानं च पञ्चमहाव्रतरूपं पुरिमपश्चिमयोः मध्यमानां तु चतुर्महाव्रतरूपमिति, मैथुनस्य परिग्रहेऽन्तर्भावात् । संयमोऽपि पुरमपश्चिमयोः सामायिकच्छेदोपस्थापनाभ्यां द्विभेदः, मध्यमानां सामायिकरूप एव, सप्तदश-प्रकारो वा सर्वेषामिति । छादयतीति छद्म-कर्माभिधीयते, छद्मनि तिष्ठन्ति इति छद्मस्थाः, कः कियन्तं कालं छद्मस्थः खल्वासीदिति । तथा तपःकर्म–किं कस्येति वक्तवयं । तथा ज्ञानोत्पादो वक्तव्यो, यस्य यस्मिन्नहनि केवलमुत्पन्नमिति । तथा संग्रहो वक्तव्यः, शिष्यादिसंग्रह इति द्वितीयद्वारगाथासमासार्थः ।

नि. (२११)तित्थं १६ गणो १७ गणहरो १८, धम्मोवायस्स देसगा १९ ।
परिआअ २० अंतकिरिआ, कस्स तेन तवेण वा २१ ?॥

वृ- तत्र तीर्थमिति-कथं कस्य कदा तीर्थमुत्पन्नमित्यादि वक्तव्यं, तीर्थ–प्रागुक्तशब्दार्थं तच्च चातुर्वर्णः श्रमणसङ्घः, तच्च ऋषभादीनां प्रथमसमवसरण एवोत्पन्नं, वीरस्य तु द्वितीय इति द्वारं गण इति-एकवाचनाचारक्रियास्थानां समुदायो न कुलसमुदाय इति, ते च ऋषभादीनां कस्य कियन्त इति वक्तव्यं । तथा गणधराः-सूत्रकर्त्तारः, ते च कस्य कियन्त इति वक्तव्यम्। तथा धर्मोपायस्य देशका वक्तव्याः, तत्र दुर्गतौ प्रपतन्तमात्मानं धारयतीति धर्मः, तस्य उपायो-द्वादशाङ्गं प्रवचनम् अथवा पूर्वाणि धर्मोपायस्तस्य देशकाः-देशयन्तीति देशकाः, ते च सर्वतीर्थकृतां गणधरा एव, अथवा अन्येऽपि यस्य यावन्तश्चतुर्दशपूर्वविदः । तथा पर्याय इति-कः कस्य प्रव्रज्यादिपर्याय इलोतद्वक्तवयं । तथा अन्ते क्रिया अन्तक्रिया सा च निर्वाणलक्षणा, सा च कस्य केन तपसा संजाता ? वाशब्दात् कस्मिन् वा संजाता कियत्परिवृतस्य चेति वक्तव्यमिति तृतीयद्वारगाथासमासार्थः ॥ इदानीं प्रथमद्वारगाथाऽऽद्यदलावयवार्थं प्रतिपादनायाह–

नि. (२१२) सव्वेऽवि सयंबुद्धा लोगंतिअबोहिआ य जीएणं १ ।

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

सव्वेसिं परिच्चाओ संवच्छरिअं महादानं ॥

वृ- सर्व एव तीर्थकृतः स्वयंबुद्धा वर्त्तन्ते, गर्भस्थानामपि ज्ञानत्रयोपेतत्वात्, लोकान्तिकाः- सारस्वतादयः तद्बोधिताश्च जीतामितिकृत्वा-कल्प इतिकृत्वा, तथा च स्थितिरियं तेषां यदुत- स्वयंबुद्धानपि भगवतो बोधयन्तीति । सर्वेषां परित्यागः सांवत्सरिकं महादानं-वक्ष्यमाणलक्षणमिति गाथार्थः ॥

नि. (२१३) रज्जाइच्चाओऽवि य २ पत्तेअं को व कत्तिअसमग्गो ३ ।
को कस्सुवही ? कोवाऽणुन्नाओ केण सीसाणं ४ ॥

वृ- राज्यादित्यागोऽपि च परित्याग एव, 'प्रत्येकम्' एकैकः को वा कियत्समग्र इति वाच्यं, कः कस्योपधिरिति, को वाऽनुज्ञातः केन शिष्याणामिति गाथार्थः ॥ इदं च गाथाद्वयमपि समासव्याख्यारूपमवगन्तव्यम् । साम्प्रतं प्रपञ्चेन प्रथमद्वारगाथाऽऽद्यावयवार्थप्रतिपादनायाह–

नि. (२१४) सारस्सय १ माइच्चा २ वण्ही ३ वरुणा ४ य गद्दतोया ५ य ।
तुसिआ ६ अव्वाबाहा ७ अग्गिच्चा ८ चेव रिट्ठा ९ य ॥

वृ- गमनिका–'सारस्सयमादिछात्ति' सारस्वतादित्याः, अनुस्वारस्त्वलाक्षणिकः, 'वण्ही वरुणा यत्ति' प्राकृतशैल्या वकारलोपात् वह्न्यरुणाश्च, गर्दतोयाश्च तुषिता अवयाबाधः 'अग्गिच्चा चेव रिट्ठा यत्ति' अग्नश्चैव रिष्ठाश्च, अग्नयश्च संज्ञान्तरतो मरुतोऽप्यभिधीयन्ते, रिष्ठाश्चेति 'तात्स्थ्यात्तद्व्यपदेशः' ब्रह्मलोकस्थरिष्ठप्रस्तटाधाराष्टकृष्णराजिनिवासिन इत्यर्थः । अष्टकृष्ण- राजीस्थापना त्वेवम् । उक्तं च भगवत्याम् –"कहिं णं भंते ! कण्हराईओ पन्नत्ताओ ?, गोयमा ! उप्पि सणंकुमार-माहिंदाणं कप्पाणं हेट्ठि बंभलोए कप्पे रिट्ठे विमाणपत्थडे, एत्थ णं अक्खाडगसमचउरंससंठाणसंठियाओ अट्ठ कण्हराईओ पन्नत्ताओ" एताश्च स्वाभावत् एवात्यन्तकृष्णा वर्त्तन्त इति, अलं प्रपञ्चकथयेति गाथार्थः ॥

नि. (२१५) एए देवनिकाया भयवं बोहिंति जिनवरिंदं तु ।
सव्वजगज्जीवहिअं भयवं ! तित्थं पवत्तेहिं ॥

वृ- गमनिका–एते देवनिकायाः स्वयंबुद्धमपि भगवन्तं बोध्यन्ति जिनवरेन्द्रं तु, कल्प इतिकृत्वा, कथम् ?, सर्वे च ते जगज्जीवाश्च सर्वजगज्जीवाः तेषां हितं हे भगवन् ! तीर्थं प्रवर्त्तयस्वेति गाथार्थः ॥ उक्तं संबोधनद्वारम्, इदानीं परित्यागद्वारमाह–

नि. (२१६) संवच्छरेण होही अभिनिक्खमणं तु जिनवरिंदाणं ।
तो अत्थसंपयाणं पवत्तए पुव्वसूरंमि ॥

वृ- भावार्थः स्पष्ट एव, नवरं पूर्वसूर्ये-पूर्वाह्ने इत्यर्थः, इति गाथार्थः ॥

कियत्प्रतिदिनं दीयत इत्याह–

नि. (२१७) एगा हिरण्णकोडी अट्ठेव अनूनगा सयसहस्सा ।
सूरोदयमाईअं दिज्जइ जा पायरासाओ ॥

वृ- गमनिका–पूर्वार्धं सुगमं, कथं दीयत इत्याह–सूर्योदय आदौ यस्य दानस्य तत् सूर्योदयादि, सूर्योदयादारभ्य दीयत इत्यर्थः, कियन्तं कालं यावत् ?-प्रातरशनं प्रातराशः प्रातर्भोजनकालं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यावत् इति गाथार्थः ॥ यथा दीयते तथा प्रतिपादयन्नाह–

नि. (२१८) सिंघाडगतिगचउक्कचच्चरचउमुहमहापहपहेसुं ।
दारेसुं पुरवराणं रत्थामुहमज्झयारेसुं ॥

नि. (२१९) वरवरिआ घोसिज्जइ किमिच्छअं दिज्जए बहुविहीअं ।
सुरअसुरदेवदानवनरिंदमहिआण निक्खमणे ॥

वृ- तत्र शृङ्गाटकं त्रिकं चतुष्कं चत्वरं चतुर्मुखं 'महापथो' राजमार्गः, पथशब्दः प्रत्येकमभिसंबध्यते, सिङ्गाटकं च त्रिकं चेत्यादिद्वन्द्वः क्रियते, तथा द्वारेषु पुरवराणां प्रतोलिषु इति भावार्थः, 'रथ्यामुखानि' रथ्याप्रवेशा 'मध्यकारा' मध्या एव तेषु रथ्यामुखमध्यकारेष्विति गाथार्थः ॥ किं ?, वरवरिका घोष्यते-वरं याचध्वं वरं याचध्वमित्येवं घोषणा समयपरिभाषया वरवरिकोच्यते, किमिच्छकं दीयत इति-कः किमिच्छति ? यो यदिच्छति तस्य तद्दानं समयत एव किमिच्छकमित्युच्यते । एकमपि वस्त्वङ्गीकृत्यैतत्परिसमाप्त्या भवति, अतः बहवो विधयो मुक्ताफलप्रदानादिलक्षणा यस्मिंस्तद्बहुविधिकं । 'सुरअसुरेत्यादि' सुरअसुरग्रहणात् चतुष्प्रकारदेवनिकायग्रहणं, देवदानवनरग्रहणेन तदुपलक्षितेन्द्रग्रहणं वेदितव्यमिति गाथार्थः ॥

इदानीमेकैकेन तीर्थकृता कियद्द्रव्यजातं संवत्सरेण दत्तमिति प्रतिपादयन्नाह–

नि. (२२०) तिन्नेव य कोडिसया अट्ठासीइं च हुंति कोडीओ ।
असिइं च सयसहस्सा एअं संवच्छरे दिन्नं ॥

वृ- भावार्थः सुगम एव, प्रतिदिनदेयं त्रिभिः षष्ठाधिकैर्वासरशतैः गुणितं यथावर्णितं भवति इति गाथार्थः ॥ साम्प्रतमधिकृतद्वारार्थानुपात्येव वस्तु प्रतिपादयन्नाह–

नि. (२२१) वीरं अरिट्ठनेमिं पासं मल्लिं च वासुपुज्जं च ।
एए मुत्तूण जिने अवसेसा आसि रायाणो ॥

नि. (२२२) रायकुलेसुऽवि जाया विसुद्धवंसेसु खत्तिअकुलेसुं ।
न य इत्थिआभिसेआ कुमारवासंमि पव्वइआ ॥

नि. (२२३) संती कुंथू अ अरो अरिहंता चेव चक्कवट्टी अ ।
अवसेसा तित्थयरा मंडलिआ आसि रायाणो ॥

वृ- एताः तिस्त्रोऽपि निगदसिद्धा एव, परित्यागद्वारानुपातिता तु राज्यं चोक्तलक्षणं विहाय प्रव्रजिता इत्येवं भावनीया ॥ गतं परित्यागद्वारं, साम्प्रतं प्रत्येकद्वारं व्यचिख्यासुराह–

नि. (२२४) एगो भगवं वीरो पासो मल्ली अ तिहि तिहि सएहिं ।
भयवं च वासुपुज्जो छहि पुरिससएहि निक्खंतो ॥

नि. (२२५) उग्गाणं भोगाणं रायण्णाणं च खत्तिआणं च ।
चउहि सहस्सेहुसभो सेसा उ सहस्सपरिवारा ॥

वृ- एको भगवान् वीरः-चरमतीर्थकरः प्रव्रजितः, तथा पार्श्वो मल्लिश्च त्रिभिस्त्रिभिः शतैः सह, तथा भगवाश्च वासुपूज्यः षड्भिः पुरुषशतैः सह निष्क्रान्तः-प्रव्रजितः । तथा उग्राणां भोगानां राजन्यानां च क्षत्रियाणां च चतुर्भिः सहस्त्रैः सह ऋषभः, किम् ?, निष्क्रान्त इति वर्त्तते, शेषास्तु-अजितादयः सहस्त्रपरिवारा निष्क्रान्ता इति, उग्रादीनां च स्वरूपमधः प्रतिपादित-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मेवेति गाथार्थः ।। साम्प्रतं प्रसङ्गतोऽत्रैव ये यस्मिन् वयसि निष्क्रान्ता इत्येतदभिधित्सुराह–

नि. (२२६) वीरो अरिट्ठनेमी पासो मल्ली अ वासुपुज्जो अ ।
पढमवए पव्वइआ सेसा पुन पच्छिमवयंमि ।।

वृ- निगदसिद्धैव । गतं प्रत्येकद्वारं, साम्प्रतमुपधिद्वारप्रतिपादनायाह–

नि. (२२७) सव्वेऽपि एगदूसेन निग्गया जिनवरा चउव्वीसं ।
न य नाम अन्नलिंगे नो गिहिलिंगे कुलिंगे वा ५ ।।

वृ- सर्वेऽपि 'एकदूष्येण' एकवस्त्रेण निर्गताः जिनवराश्चतुर्विंशतिः, अपिशब्दस्य व्यवहितः संबन्धः, 'सर्वे' यावन्तः खल्वतीता जिनवरा अपि एकदूष्येण निर्गताः, किं पुनस्तन्मतानुसारिणः न सोपधयः ? ततश्च य उपधिरासेवितो भगवद्भिः स साक्षादेवोक्तः, यः पुनर्विनेभ्यः स्थविरकल्पिकादिभेदभिन्नेन्योऽनुज्ञातःस खलु अपिशब्दात् ज्ञेय इति, चतुर्विंशतीति संख्या भेदेन वर्त्तमानावसर्पिणीतीर्थकरप्रतिपादिकेति । गतमुपधिद्वारम्, इदानीं लिङ्गद्वारं–सर्वे तीर्थकृतः तीर्थकरलिङ्ग एव निष्क्रान्ताः, न च नाम अन्यलिङ्गे न गृहस्थलिङ्गे कुलिङ्गे वा, अन्यलिङ्गाद्यर्थ उक्त एवेति गाथार्थः ।। इदानीं यो येन तपसा निष्क्रान्तस्तदभिधित्सुराह–

नि. (२२८) सुमई थ निच्चभत्तेण निग्गओ वासुपुज्ज जिनो चउत्थेणं ।
पासो मल्लीवि अ अट्ठमेन सेसा उ छट्ठेणं ।।

वृ- सुमतिः तीर्थकरः, थेति निपातः, 'नित्यभक्तेन' अनवरतभक्तेन 'निर्गतो' निष्क्रान्तः, तथा वासुपूज्यो जिनश्चतुर्थेन, निर्गत इति वर्त्तते, तथा पार्श्वो मल्ल्यपि चाष्टमेन, 'शेषास्तु' ऋषभादयः षष्ठेनेति गाथार्थः ।। साम्प्रतमिहैव निर्गमनाधिकाराद्यो यत्र येषूद्यानादिषु निष्क्रान्त इत्येतत्प्रतिपाद्यते–

नि. (२२९) उसभो अ विनीआए बारवईए अरिट्ठवरनेमी ।
अवसेसा तित्थयरा निक्खंता जम्मभूमीसुं ।।

नि. (२३०) उसभो सिद्धत्थवणंमि वासुपुज्जे विहारगेहंमि ।
धम्मो अ वप्पगाए नीलगुहाए अ मुनिनामा ।।

नि. (२३१) आसमपयंमि पासो वीरजिणिंदो अ नायसंडंमि ।
अवसेसा निक्खंता, सहसंबवणंमि उज्झाने ।।

वृ- एतास्तिस्त्रोऽपि निगदसिद्धा एव ।। इदानीं प्रसङ्गत एव निर्गमनकालं प्रतिपादयन्नाह–

नि. (२३२) पासो अरिट्ठनेमी सिज्जंसो सुमइ मल्लिनामो अ ।
पुव्वण्हे निक्खंता सेसा पुन पच्छिमण्हंमि ।।

वृ- निगदसिद्धा इत्यलं विस्तरेण । गतमुपधिद्वारं, तत्प्रसङ्गत एव चान्यलिङ्गकुलिङ्गार्थोऽपि व्याख्यात एव । इदानीं ग्राम्याचारद्वारावयवार्थं प्रतिपादयन्नाह–

नि. (२३३) गामायारा विसया निसेविआ ते कुमारवज्जेहिं ६ ।
गामागराइएसु व केसु विहारो भवे कस्स ?।।

वृ. ग्राम्याचारा विषया उच्यन्ते, निषेवितास्ते कुमारवर्जैस्तीर्थकृद्भिः, ग्रामाकरादिषु वा केषु विहारो भवेत् कस्येति वाच्यमिति गाथार्थः ।। तत्र–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (२३४) मगहारायगिहाइसु मुणओ खित्तारिएसु विहरिंसु ।
उसभो नेमी पासो वीरो अ अनारिएसुंपि ॥

वृ- सूत्रसिद्धा ॥ गतां ग्राम्याचारद्वारं, साम्प्रतं परीषहद्वारं व्याचिख्यासयाऽऽह-

नि. (२३५) उदिआ परीसहा सिं पराइआ ते अ जिनवरिंदेहि ७ ।
नव जीवाइपयत्थे उवलभिऊणं च निक्खंता ८ ॥

वृ- उदिताः परीषहाः-शीतोष्णादयः अमीषां पराजितास्ते च जिनवरेन्द्रैः सर्वैरेवेति ॥ गतं परीषहद्वारं, व्याख्याता च प्रथमद्वारगाथेति ॥ साम्प्रतं च द्वितीया व्याख्यायते -तत्रापि प्रथम-द्वारम्, आह च नव जीवादिपदार्थान् उपलभ्य च निष्क्रान्ताः, आदिशब्दाद् अजीवाश्रवबन्ध-संवरपुण्यपापनिर्जरामोक्षग्रह इति गाथार्थः ॥

गतं जीवोपलम्भद्वारम्, अधुना श्रुतोपलम्भादिद्वारार्थप्रतिपादनायाह-

नि. (२३६) पढमस्स बारसंगं सेसाणिक्कारसंग सुयलंभो ९ ।
पंच जमा पढमंतिमजिणाण सेसाण चत्तारि ॥

नि. (२३७) पच्चक्खाणमिणं १० संजमो अ पढमंतिमाण दुविगप्पो ।
सेसाणं सामइओ सत्तरसंगो अ सव्वेसिं ११ ॥

वृ- गाथाद्वयं निगदसिद्धमेव, नवरं 'पढमंतिमाण दुविगप्पो' त्ति सामायिकच्छेदोपस्थाप-नाविकल्पः ॥ साम्प्रतं छद्मस्थकालतपः कर्मद्वारावयवार्थव्याचिख्यासयाऽऽह-

नि. (२३८)वाससहस्सं १ बारस २ चउदस ३ अट्ठार ४ वीस ५ वरिसाइं ।
मासा छ ६ न्नव ७ तिन्नि अ ८ चउ ९ तिग १० दुग ११ मिक्कग १२ दुगं च १३ ॥

नि. (२३९)तिग १४ दुग १६ मिक्कग १६ सोलस वासा १७ तिन्नि अ १८ तहेवऽहोरत्तं।
मासिक्कारस २० नवगं २१ चउपन्न दिणाइ २२ चुलसीई २३ ॥

नि. (२४०) तह बारस वासाइं, जिनान छउमत्थकालपरिमाणं १२ ।
उग्गं च तवोकम्मं विसेसओ वद्धमाणस्स १३ ॥

वृ- एतास्तिस्रोऽपि निगदसिद्धा एव ॥ इदानीं ज्ञानोत्पादद्वारं विवृण्वन्नाह-

नि. (२४१) फग्गुणबहुलिक्कारसि उत्तरसाढाहि नाणमुसभस्स १ ।
पोसिक्कारसि सुद्धे रोहिणिजोएण अजिअस्स २ ॥

नि. (२४२) कत्तिअबहुले पंचमि मिगसिरजोगेण संभवजिनस्स ३ ।
पोसे सुद्धचउद्दसि अभीइ अभिनंदनजिनस्स ४ ॥

नि. (२४३) चित्ते सुद्धिक्कारसि महाहि सुमइस्स नाणमुप्पन्नं ५ ।
चित्तस्स पुण्णिमाए पउमाभजिनस्स चित्ताहिं ६ ।

नि. (२४४) फग्गुणबहुले छट्ठी विसाहजोगे सुपासनामस्स ७ ।
फग्गुणबहुले सत्तमि अनुराह ससिप्पहजिनस्स ८ ॥

नि. (२४५) कत्तिअसुद्धे तइया मूले सुविहिस्स पुप्फदंतस्स ९ ।
पोसे बहुलचउद्दसि पुव्वासाढाहि सीअलजिनस्स १० ॥

नि. (२४६) पन्नरसि माहबहुले सिज्जंसजिनस्स सवणजोएणं ११ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सयभिय वासुपुज्ने बीयाए माहसुद्धस्स १२ ॥

नि. (२४७) पोसस्स सुद्धछट्ठी उत्तरभद्दवय विमलनामस्स १२ ।
वइसाह बहुलचउदसि रेवइजोएणऽनंतस्स १४ ॥

नि. (२४८) पोसस्स पुण्णिमाए नाणं धम्मस्स पुस्सजोएणं १५ ।
पोसस्स सुद्धनवमी भरणीजोगेण संतिस्स १६ ॥

नि. (२४९) चित्तस्स सुद्धतइआ कित्तिअजोगेण नाण कुंथुस्स १७ ।
कत्तिअसुद्धे बारसि अरस्स नाणं तु रेवइहिं १८ ॥

नि. (२५०) मग्गसिरसुद्धइक्कारसीइ मल्लिस्स अस्सिणीजोगे १९ ।
फग्गुणबहुले बारसि सवणेणं सुव्वयजिनस्स २० ॥

नि. (२५१) मगसिरसुद्धिक्कारसि अस्सिणिजोगण नमिजिणिंदस्स २१ ।
आसोअमावसाए नेमिजिणिंदस्स चित्ताहिं २२ ॥

नि. (२५२) चित्ते बहुलचउत्थी विसाहजोएण पासनामस्स २३ ।
वइसाहसुद्धदसमी हत्थुत्तरजोगि वीरस्स २४ ॥

नि. (२५३) तेवीसाए नाणं उप्पन्न जिनवराण पुव्वण्हे ।
वीरस्स पच्छिमण्हे पमाणपत्ताए चरिमाए ॥

वृ- एताश्च त्रयोदश गाथा निगदसिद्धाः । साम्प्रतमधिकृतद्वार एव येषु क्षेत्रेषूत्पन्नं तदेतदभिधित्सुराह-

नि. (२५४) उसभस्स पुरिमताले वीरस्सुजुवालिआनईतीरे ।
सेसाण केवलाइं जेसुज्ञाणेसु पव्वइआ ॥

वृ- निगदसिद्धा । साम्प्रतमिहैव यस्य येन तपसोत्पन्नं तत्तपः प्रतिपादयन्नाह-

नि. (२५५) अट्ठमभत्तंतमी पासोसहमल्लिरिट्ठनेमीणं ।
वसुपुज्ञस्स चउत्थेण छट्ठभत्तेण सेसाणं ॥

वृ- निगदसिद्धा । गतं ज्ञानोत्पादद्वारं, इदानीं संग्रहद्वारं विवरीपुराह-

नि. (२५६) चुलसीइं च सहस्सा १ एगं च २ दुवे अ ३ तिन्नि ४ लक्खाइं ।
तिन्नि अ वीसहिआइं ५ तीसहिआइं च तिन्नेव ६ ॥

नि. (२५७) तिन्नि अ ७ अड्ढाइज्ञा ८ दुवे अ ९ एगं च १० सयसहस्साइं ।
चुलसीइं च सहस्सा ११ विसत्तरि १२ अट्ठसट्ठिं च १३ ॥

नि. (२५८) छावट्ठिं १४ चउसट्ठिं १५ बावट्ठिं १६ सट्ठिमेव १७ पन्नासं १८ ।
चत्ता १९ तीसा २० वीसा २१ अट्ठारस २२ सोलस २३ सहस्सा ॥

नि. (२५९) चउदस य सहस्साइं २४ जिणाण जइसीससंगहपमाणं ।
अज्ञासंगहमाणं उसभाईणं अओ वुच्छं ॥

नि. (२६०) तिन्नेव य लक्खाइं १ तिन्नि य तीसा य २ तिन्नि छत्तीसा ३ ।
तीसा य छच्च ४ पंच य तीसा ५ चउरो अ वीसा अ ॥

नि. (२६१) चत्तारि अ तीसाइं ७ तिन्नि अ असिआइ ८ तिण्हमेत्तो अ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वीसुत्तरं ९ छलहिअं १० तिसहस्सहिअं च लक्खं च ११ ॥

नि. (२६२)लक्खं १२ अट्ठसयाणि अ १३ बावट्ठिसहस्स १४ चउसयसमग्गा १५ ।
एगट्ठी छच्च सया १६ सट्ठिसहस्सा सया छच्च १७ ॥

नि. (२६३)सट्ठि १८ पणपन्न १९ वण्णे २० गचत्त २१ चत्ता २२ तहट्ठीतीसं च २३ ।
छत्तीसं च सहस्सा २४ अज्जाणं संगहो एसो ॥

नि. (२६४) पढमानुओगसिद्धो पत्तेअं सावयाइआणंपि ।
नेओ सव्वजिणाणं सीसाण परिग्गहो (संगहो) कमसो १५ ॥

वृ- एता अपि नवा गाथाः स्पष्टा एवेति न प्रतन्यन्ते ॥ गतं संग्रहद्वारं, व्याख्याता च द्वितीयद्वारगाथेति । साम्प्रतं तृतीयाद्यद्वारप्रतिपादनाय आह–

नि. (२६५) तित्थं चाउव्वण्णो संघो सो पढमए समोसरणे ।
उप्पन्नो अ जिणाणं वीरजिणिंदस्स बीअंमि १६ ॥

वृ- निगदसिद्धैव, नवरं वीरजिनेन्द्रस्य 'द्वितीये' इति अत्र यत्र केवलमुत्पन्नं कल्पात्तत्र कृतसमवरसरणापेक्षया मध्यमायां द्वितीयमुच्यत इति ॥

गतं तीर्थद्वारं, साम्प्रतं गणद्वारं व्याचिख्यासुराह–

नि. (२६६)चुलसीइ १ पंचनउई २ बिउत्तरं ३ सोलसुत्तर ४ सयं च ५ ।
सत्तहिअं ६ पणनउई ७ तेनउई ८ अट्ठसीई अ ९ ॥

नि. (२६७)इक्कासीइ १० बावत्तीरी अ ११ छावट्ठि १२ सत्तवण्णा य १३ ।
पन्ना १४ तेयालीसा १५ छत्तीसा १६ चेव पणतीसा १७ ॥

नि. (२६८)तित्तीस १८ अट्ठवीसा १९ अट्ठारस २० चेव तहय सत्तरस २१ ।
इक्कारस २२ दस २३ नवगं २४ गणाण माणं जिणिंदाणं १७ ॥

वृ- एतास्तिस्त्रोऽपि निगदसिद्धा एव, नवरमेकवाचनाचारक्रियास्थानां समुदायो गणो न कुलसमुदाय इति पूज्या व्याचक्षते ॥ गतं गणद्वारम्, अधुना गणधरद्वारवयाचिख्यासयाऽऽह–

नि. (२६९) एक्कारस उ गणहरा जिणस्स वीरस्स सेसयाणं तु ।
जावइआ जस्स गणा तावइआ गणहरा तस्स १८ ॥

वृ- निगदसिद्धैव, नवरं मूलसूत्रकर्त्तारो गणधरा उच्यन्ते ॥ गतं गणधरद्वारम्, इदानीं धर्मोपायस्य देशका इत्येतद्व्याचिख्यासुराह–

नि. (२७०) धम्मोवाओ पवयणमहवा पुव्वाइँ देसगा तस्स ।
सव्वजिणाण गणहरा चउदसपुव्वी व जे जस्स ॥

नि. (२७१) सामाइयाइया वा वयजीवणिकायभावणा पढमं ।
एसो धम्मोवाओ जिनेहि सव्वेहि उवइट्ठो १९ ॥

वृ- गाथाद्वयमपीदं सूत्रसिद्धमेव ॥ गतं धर्मोपायस्य देशका इति द्वारम्, इदानीं पर्यायद्वार-प्रतिपादनायाह–

नि. (२७२) उसभस्स पुव्वलक्खं पुव्वंगूणमजिअस्स तं चेव ।
चउरंगूणं लक्खं पुणो पुणो जाव सुविहित्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (२७३) पणवीसं तु सहस्सा पुव्वाणं सीअलस्स परिआओ ।
लक्खाइं इक्कवीसं सिज्ञंसजिनस्स वासाणं ॥
नि. (२७४)चउपन्नं १२ पन्नारस १३ तत्तो अद्धट्ठमाइ लक्खाइं १४ ।
अड्ढाइज्ञाइं १५ तआ वाससहस्साइं पणवीसं १६ ॥
नि. (२७५) तेवीसं च सहस्सा सयाणि अद्धट्ठमाणि अहवंति १७ ।
इगवीसं च सहस्सा १८ वाससउणा य पणपन्ना १९ ॥
नि. (२७६)अद्धट्ठमा सहस्सा २० अड्ढाइज्ञा य २१ सत्त य सयाइं २२ ।
सयरी २३ बिचत्तवासा २४ दिक्खाकालो जिणिंदाणं ॥

एताः पञ्च निगदसिद्धा एव ॥ एवं तावत्सामान्येन प्रव्रज्यापर्यायः प्रतिपादितः, साम्प्रतमत्रैव भेदेन भगवतां कुमारादिपर्यायं प्रतिपादयन्नाह–

नि. (२७७) उसभस्स कुमारत्तं पुव्वाणं वीसई सयसहस्सा ।
तेवट्ठी रज्ञंमी अनुपालेऊण निक्खंतो ॥
नि. (२७८) अजिअस्स कुमारत्तं अड्ढारस पुव्वसयसहस्साइं ।
तेवण्णं रज्ञंमी पुव्वंगं चेव बोद्धव्वं ॥
नि. (२७९) पन्नरस सयसहस्सा कुमारवासो अ संभवजिनस्स ।
चोआलीसं रज्ञे चउरंगं चेव बोद्धव्वं ॥
नि. (२८०) अद्धत्तेरस लक्खा पुव्वाणऽभिनंदने कुमारत्तं ।
छत्तीसा अद्धं चिय अट्ठंगा चेव रज्ञंमि ॥
नि. (२८१) सुमइस्स कुमारत्तं हवंति दस पुव्वसयसहस्साइं ।
अउणातीसं रज्ञे बारस अंगा य बोद्धव्वा ॥
नि. (२८२) पउमस्स कुमारत्तं पुव्वाणऽद्धट्ठमा सयसहस्सा ।
अद्धं च एगवीसा सोलस अंगा य रज्ञंमि ॥
नि. (२८३) पुव्वसयसहस्साइं पंच सुपासे कुमारवासो उ ।
चउदस पुन रज्ञंमी वीसं अंगा य बोद्धव्वा ॥
नि. (२८४)अड्ढाइज्ञा (अद्धुट्ठा उ) लक्खा कुमारवासो ससिप्पहे होइ ।
अद्धं छ च्चिय रज्ञे चउवीसंगा य बोद्धव्वा ॥
नि. (२८५) पन्नं पुव्वसहस्सा कुमारवासो उ पुप्फदंतस्स ।
तावइअं रज्ञंमी अड्ढावीसं च पुव्वंगा ॥
नि. (२८६) पणवीससहस्साइं पुव्वाणं सीअले कुमारत्तं ।
तावइअं परिआओ पन्नासं चेव रज्ञंमि ॥
नि. (२८७) वासाण कुमारत्तं इगवीसं लक्खं हुंति सिज्ञंसे ।
तावइअं परिआओ बायालीसं च रज्ञंमि ॥
नि. (२८८) गिहवासे अड्ढारस वासाणं सयसहस्स निअमेणं ।
चउपन्न सयसहस्सा परिआओ होइ वसुपुज्ञे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (२८९) पन्नरस सयसहस्सा कुमारवासो अ तीसई रज्जे ।
पन्नरस सयसहस्सा परिआओ होइ विमलस्स ॥

नि. (२९०) अद्धट्ठमलक्खाइं वासाणमनंतई कुमारत्ते ।
तावइअं परिआओ रज्जंमी हुंति पन्नरस ॥

नि. (२९१) धम्मस्स कुमारत्तं वासाणड्ढाइआइं लक्खाइं ।
तावइअं परिआओ रज्जे पुन हुंति पंचेव ॥

नि. (२९२) संतिस्स कुमारत्तं मंडलियचक्किपरिआअ चउसुंपि ।
पत्तेअं पत्तेअं वाससहस्साइं पणवीसं ॥

नि. (२९३) एमेव य कुंथुस्सवि चउसुवि ठाणेसु हुंति पत्तेअं ।
तेवीससहस्साइं वरिसाणद्धट्ठमसया य ॥

नि. (२९४) एमेव अरजिणिंदस्स चउसुवि ठाणेसु हुंति पत्तेअं ।
इगवीस सहस्साइं वासाणं हुंति नायव्वा ॥

नि. (२९५) मल्लिस्सवि वाससयं गिहवासे सेसअं तु परिआओ ।
चउपन्न सहस्साइं नव चेव सयाइ पुण्णाइं ॥

नि. (२९६) अद्धट्ठमा सहस्सा कुमारवासो उ सुव्वयजिनस्स ।
तावइअं परिआओ पन्नरससहस्स रज्जंमि ॥

नि. (२९७) नमिणो कुमारवासो वाससहस्साइ दुन्नि अद्धं च ।
तावइअं परिआओ पंच सहस्साइं रज्जंमि ॥

नि. (२९८) तिन्नेव य वाससया कुमारवासो अरिट्ठनेमिस्स ।
सत्त य वाससयाइं सामण्णे होइ परिआओ ॥

नि. (२९९) पासस्स कुमारत्तं तीसं परिआओ सत्तरीहोइ ।
तीसा य वद्धमाणे बायालीसाउ परिआओ ॥

वृ- आद्यानां सुविधियपर्यन्तानामनुपरिपाट्येयं श्रामण्यपर्यायगाथा –तद्यथा–

नि. (३००) उसभस्स पुव्वलक्खं पुव्वंगूणमजिअस्स तं चेव ।
चउरंगूणं लक्खं पुणो पुणो जाव सुविहित्ति ॥

नि. (३०१) सेसाणं परिआओ कुमारवासेन सहिअओ भणिओ ।
पत्तेअंपि अपुव्वं सीसाणमणुग्गहट्ठाए ॥

नि. (३०२) छउमत्थकालमित्तो सोहेउं सेसओ उ जिनकालो ।
सव्वाउअंपि इत्तो उसभाईणं निसामेह ॥

नि. (३०३)चउरासीइ १ बिसत्तरि २ सट्ठी ३ पन्नासमेव ४ लक्खाइं ।
चत्ता ५ तीसा ६ वीसा ७ दस ८ दो ९ एगं १० च पुव्वाणं ॥

नि. (३०४)चउरासीईं ११ बावत्तीरी १२ अ सट्ठी १३ अ होइ वासाणं ।
तीसा १४ य दस १५ य एगं १६ च एवमेए सयसहस्सा ॥

नि. (३०५)पंचानउइ सहस्सा १७ चउरासीई अ १८ पंचवण्णा १९ य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तीसा २० य दस २१ य एगं २२ सयं २३ च बावत्तीरी २४ चेव २० ॥

वृ- एताश्च एकोनत्रिंशदपि गाथाः सूत्रसिद्धा एव द्रष्टव्या इति । गतं पर्यायद्वारम्, इदानीमन्तक्रियाद्वारावसर इति, तत्रान्ते क्रिया अन्तक्रिया-निर्वाणलक्षणा, सा कस्य केन तपसा क्व जाता ?, वाशब्दात्कियत्परिवृतस्य चेत्येतत्प्रतिपादयन्नाह-

नि. (३०६) निव्वाणमंतकिरिआ सा चउदसमेण पढमनाहस्स ।
सेसाण मासिएणं वीरजिणिंदस्स छट्ठेणं ॥

नि. (३०७) अट्ठावयचंपुज्जिंतपावासम्मेअसेलसिहरेसुं ।
उसभ वसुपुज्ज नेमी वीरो सेसा य सिद्धिगया ॥

नि. (३०८) एगो भयवं वीरो तित्तीसाइ सह निव्वुओ पासो ।
छत्तीसएहिं पंचहिं सएहिं नेमी उ सिद्धिगओ ॥

नि. (३०९) पंचहि समणसएहिं मल्ली संती उ नवसएहिं तु ।
अट्ठसएणं धम्मो सएहिं छहि वासुपुज्जजिनो ॥

नि. (३१०) सत्तसहस्सानंतइजिणस्स विमलस्स छस्सहस्साइं ।
पंचसयाइ सुपासे पउमाभे तिन्नि अट्ठ सया ॥

नि. (३११) दसहि सहस्सेहि उसभो सेसा उ सहस्सपरिवुडा सिद्धा ।
कालाइं जं न भणिअं पढमनुओगाउ तं नेअं ॥

नि. (३१२) इच्चेवमाइ सव्वं जिणाण पढमाणुओगओ नेअं ।
ठाणासुण्णत्थं पुन भणिअं २१ पगयं अओ वुच्छं ॥

नि. (३१३) उसभजिनसमुट्ठाणं उट्ठाणं जं तओ मरीइस्स ।
सामाइअस्स एसो ज पुव्वं निग्गमोऽहिगओ ॥

वृ- एता अप्यष्टौ निगदसिद्धा एव ।

नि. (३१४) चित्तबहुलट्ठमीए चउहि सहस्सेहि सो उ अवरण्हे ।
सीओ सुदंसणाए सिद्धत्थवणंमि छट्ठेणं ॥

वृ- गमनिका-चैत्रबहुलाष्टम्यां चतुर्भिः सहस्त्रैः समन्वितः सन् अपराह्णे शिबिकायां सुदर्शनायां व्यवस्थितः सिद्धार्थवने षष्ठेन भक्तेन निष्क्रान्त इति वाक्यशेषः, अलङ्करणकं परित्यज्य चतुर्मुष्टिकं च लोचं कृत्वेति ॥ आह-चतुर्भिः सहस्त्रैः समन्वित इत्युक्तं, तत्र तेषां दीक्षां किं भगवान् प्रयच्छति उत नेति, नेत्याह-

नि. (३१५) चउरो साहस्सीओ लोअं काऊण अप्पणा चेव ।
जं एस जहा काही तं तह अम्हेऽवि काहामो ॥

वृ- गमनिका-प्राकृतशैल्या चत्वारि सहस्त्राणि लोचं पञ्चमुष्टिकं कृत्वा आत्मना चैव इत्थं प्रतिज्ञां कृतवन्तः-'यत्' क्रियाऽनुष्ठानं 'एष' भगवान् 'यथा' येन प्रकारेण करिष्यति तत्तथा 'अम्हेऽवि काहामोत्ति' वयमपि करिष्याम इति गाथार्थः ॥ भगवानपि भुवनगुरुत्वात्स्वयमेव सामायिकं प्रतिपद्य विजहार । तथा चाह-

नि. (३१६) उसभो वरवसभगइ घित्तूणमभिग्गहं परमघोरं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वोसट्ठचत्तदेहो विहरइ गामानुगामं तु ॥

वृ- गमनिका–ऋषभो वृषभसमगतिर्गृहीत्वा अभिग्रहं 'परमघोरं' परमः-परमसुखहेतुभूतत्वात् घोरः-प्राकृतपुरुषैः कर्त्तुमशक्यत्वात् तं, 'व्युत्सृष्टत्यक्तदेहो विहरति ग्रामानुग्रामं तु' व्युत्सृष्टो-निष्प्रतिकर्मशरीरतया, तथा चोक्तम्-अच्छिंपि नो पमज्जिज्जा, नोऽवि य कंडुविया मुनी गायं' त्यक्तः-खलु दिव्याद्युपसर्गसहिष्णुतया, शेषं सुगममिति गाथार्थः ॥ स एवं भगवांस्तैरात्मीयैः परिवृतो विजहार, न च तदाऽद्यापि भिक्षादानं प्रवर्त्तते, लोकस्य परिपूर्णत्वादर्थ्यभावाच्च, तथा चाह मूलभाष्यकारः-

[भा.३१] नवि ताव जनो जाणइ का भिक्खा ? केरिसा व भिक्खयरा ?!
ते भिक्खमलभमाणा वणमज्झे तावसा जाया ॥

वृ- गमनिका–नापि तावज्जनो जानाति-का भिक्षा ? कीदृशा वा भिक्षाचरा इति, अतस्ते भगवत्परिकरभूता भिक्षामलभमानाः क्षुत्परीषहार्त्ता भगवतो मौनव्रतावस्थिताद् उपदेशमलभमानाः कच्छमहाकच्छावेवोक्तवन्तः-अस्माकमनाथानां भवन्तौ नेताराविति, अतः कियन्तं कालमस्माभिरेवं क्षुत्पिपासोपगतैरासितव्यं ?, तावाहतुः-वयमपि न विद्मः, यदि भगवान् अनागतमेव पृष्टो भवेत्-किमस्माभिः कर्त्तव्यं ? किं वा नेति, ततः शोभनं भवेत्, इदानीं तु एतावद्युज्यते-भरतलज्जया गृहगमनमयुक्तमाहारमन्तरेण चासितुं न शक्यत इत्यतो वनवासो नः श्रेयान्, तत्रोपवासरताः परिशटितपरिणतपत्राद्युपभोगिनो भगवन्तमेव ध्यायन्तस्तिष्ठाम इति संप्रधार्य सर्वसंमतेनैव गङ्गानदीदक्षिणकूले रम्यवनेषु वल्कल चीरधारिणः खल्वाश्रमिणः संवृत्ता इति, आह च 'वनमध्ये तापसा जाताः' इति गाथार्थः ॥ तयोश्च कच्छमहाकच्छयोः सुतौ नमिविनमिनौ पित्रनुरागात् ताभ्यामेव सह विहृदवन्तौ, तौ च वनाश्रयणकाले ताभ्यामुक्तौ–दारुणः खल्विदानीमस्माभिर्वनवासविधिरङ्गीकृतः तद्याथ यूयं स्वगृहाणीति, अथवा भगवन्तमेव उपसर्पथः, स वोऽनुकम्पयाऽभिलषित-फलतो भविष्यति, तावपि च पित्रोः प्रणामं कृत्वा पित्रादेशं तथैव कृतवन्तौ, भगवत्समीपमागत्य प्रतिमास्थिते भगवति जलाशयेभ्यो नलिनीपत्रेषु उदकमानीय सर्वतः प्रवर्षणं कृत्वा आजानूच्छ्रयमानं सुगन्धिकुसुमप्रकरं च अवनतोत्तमाङ्गक्षितिनिहितजानुकरतलौ प्रतिदिनमुभयसन्ध्यं राज्यसंविभागप्रदानेन भगवन्तं विज्ञाप्य पुनस्तदुभयपार्श्वे खड्गव्यग्रहस्तौ तस्थतुः ॥ तथा चाह निर्युक्तिकारः–

नि. (३१७) नमिविनमीणं जायण नागिंदो विज्जदाण वेअड्ढे ।
उत्तरदाहिणसेढी सट्ठीपन्नासनगराइं ॥

वृ- नमिविनमिनोर्याचना, नागेन्द्रो भगवद्वन्दनायागतः, तेन विद्यादानमनुष्ठितं, वैताढ्ये पर्वते उत्तरदक्षिणश्रेण्योः यथायोगं षष्टिपञ्चाशन्नगराणि निविष्टानीति गाथाक्षरार्थः ॥ भावार्थः कथानकादवसेयः, तच्चेदम्–अन्नया धरणो नागराया भगवंतं वंदओ आगओ, इमेहि य विन्नविअं, तओ सो ते तहा जायमाणे भणति-भगवं चत्तसंगो, ण एयस्स अत्थि किंचि दायव्वं, मा एयं जाएह, अहं तुब्भं भगवओ भत्तीए देमि, सामिस्स सेवा अफला मा भवउत्तिकाउं पढियसिद्धाणं गंधव्वपन्नगाणं अडयालीसं विज्जासहस्साइं गिण्हइ, ताण इमाओ महाविज्जाओ चत्तारि, तं जहा-गोरी गंधारी रोहिणी पन्नत्तित्ति, तं गच्छइ तुब्भे विज्जाहररिद्धीए सयणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जनवयं च उवलोभेऊण दाहिणिल्लाए उत्तरिल्लाए य विज्ञाहरसेढीए रहनेउरचक्कवालपामोक्खे गगनवल्लभपामोक्खे य पन्नासं सट्ठिं च विज्ञाहरणगरे निवेसिऊण विहरह । तओ ते लद्धप्पसाया कामियं पुप्फयविमाणं विउव्विऊण भगवंतं तित्थयरं नागरायं च वंदिऊणं पुप्फयविमाणारूढा कच्छमहाकच्छाणं भगवप्पसायं उवदंसेमाणा विनीयनगरिमुवगम्म भरहस्स रन्नो तमत्थं निवेदित्ता सयणं परियणं गहाय वेयड्ढे पव्वए नमी दाहिणिल्लाए विज्ञाहरसेढीए विनमी उत्तरिल्लाए पन्नासं सट्ठिं च विज्ञाहरनगराइ निवेसिऊण विहरंति । अत्रान्तरे–

नि. (३१८) भगवं अदीनमनसो संवच्छरमणसिओ विहरमाणो ।
कण्णाहि निमंतिज्जइ वत्थाभरणासणेहिं च ॥

वृ- भगः खल्वैश्वर्यादिलक्षणः सोऽस्यास्तीति भगवान् असावपि अदीनं मनो यस्यासौ अदीनमनाः निष्प्रकम्पचित्त इत्यर्थः । 'संवत्सर' वर्षं न अशितः अनशितः विहरन् भिक्षाप्रदानानभिज्ञेन लोकेनाभ्यर्हितश्च कृत्वा कन्याभिर्निमन्यते, वस्त्राणि-पट्टांशुकानि आभरणानि-कटककेयूरादीनि आसनानि-सिंहासनादीनि एतैश्च निमन्यत इति । वर्त्तमाननिर्देशप्रयोजनं पूर्ववदिति गाथार्थः ॥ एवं विहरता भगवता कियता कालेन भिक्षा लब्धेत्येतत्प्रतिपादनायाह–

नि. (३१९) संवच्छरेण भिक्खा लद्धा उसभेन लोगनाहेन ।
सेसेहि बीयदिवसे लद्धाओ पढमभिक्खाओ ॥

वृ- गमनिका–संवत्सरेण भिक्षा लब्धाः ऋषभेन लोकनाथेन-प्रथमतीर्थकृता, शेषैः-अजितादिभिः भरतक्षेत्रतीर्थकृद्भिः द्वितीयदिवसे लब्धाः प्रथमभिक्षा इति गाथार्थः ॥ तीर्थकृतां प्रथमपारणकेषु यद्यस्य पारणकमासीत तदभिधित्सुराह–

नि. (३२०) उसभस्स उ पारणए इक्खुरसो आसि लोगनाहस्स ।
सेसाणं परमन्नं अमयरसरसोवमं आसी ॥

वृ- गमनिका–ऋषभ्यस्य तु इक्षुरसः प्रथमपारणके आसील्लोकनाथस्य, शेषाणाम्-अजितादीनां परमं च तदन्नं च परमान्नं-पायसलक्षणं, किंविशिष्टामित्याह–अमृतरसवद् रसोपमा यस तद् अमृतसरसोपममासीदिति गाथार्थः । तीर्थकृतां प्रथमपारणकेषु यद्वृत्तं तदभिधित्सुराह–

नि. (३२१) घुट्ठं च अहोदानं दिव्वाणि अ आहयाणि तूराणि ।
देवा य संनिवइआ वसुहारा चेव वुट्ठा य ॥

वृ- गमनिका–देवैराकाशयगतैः घुष्टं च अहोदानीमिति-अहोशब्दो विस्मये अहो दानमहो दानमित्येवं दीयते, सुदत्तं भवतामित्यर्थः, तथा दिव्यानि च आहतानि तूराणि तदा त्रिदशैरिति देवाश्च सन्निपतिताः, तदैव वसुधारा चैव वृष्टा, वसु द्रव्यमुच्यत इति गाथार्थः ॥ एवं सामान्येन पारणककालभाव्युक्तम्, इदानीं यत्र यथा च यच्च आदितीर्थकरस्य पारणकमासीत् तथाऽभिधित्सुराह–

नि. (३२२) गयउर सिज्जंसिक्खुरसदान वसुहार पीढ गुरुपूआ ।
तक्खसिलायलगमणं बाहुबलिनिवेअणं चेव ॥

वृ- अस्या भावार्थः कथानकादवबोद्धव्यः । तच्चेदम्–कुरुजनपदे गयपुरणगरे बाहुबलिपुत्तो सोमप्पभो, तस्स पुत्तो सेज्जंसो जुवराया, सो सुमिणे मंदरं पव्वयं सामवण्णं पासति, ततो तेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अमयकलसेन अभिसित्तो अब्भहिअं सोभितुमाढत्तो, नगरसेट्ठी सुबुद्धिनामो, सो सूरस्स रस्सी-सहस्सं ठाणाओ चलियं पासति, नवरं सिज्जंसेण हक्खुत्तं, सो य अहिअयरं तेयसंपुण्णो जाओ, राइणा सुमिणे एक्को पुरिसो महप्पमाणो महया रिउबलेण सह जुज्झंतो दिट्ठो, सिज्जंसेन साहज्जं दिन्नं, ततो नेन तं बलं भग्गंति, ततो अत्थाणीए एगओ मिलिया, सुमिणे साहंति, न पुन जाणंति-किं भविस्सइत्ति, नवरं राया भणइ–कुमारस्स महंतो कोऽवि लाभो भविस्सइत्ति भणिऊण उट्ठिओ अत्थाणीओ, सिज्जंसोऽवि गओ नियगभवणं, तत्थ य ओलोयणट्ठिओ पेच्छति सामिं पविसमाणं, सो चिंतेइ–कहिं मया एरिसं नेवत्थं दिट्ठपुव्वं ? जारिसं पपितामहस्सत्ति, जाती संभरिता-सो पुव्वभवे भगवओ सारही आसि, तत्थ तेन वइरसेणतित्थगरो तित्थयरलिंगेन दिट्ठोत्ति, वइरनाभे य पव्वयंते सोऽवि अनुपव्वइओ, तेन तत्थ सुयं जहा-एस वइरनाभो भरहे पढमतित्थयरो भविस्सइत्ति, तं एसो सो भगवंति । तस्स य मनुस्सो खोयरसघडएण सह अतीओ, तं गहाय भगवंतमुवट्ठिओ, कप्पइत्ति सामिणा पाणी पसारिओ, सव्वो निसिट्ठो पाणीसु, अच्छिद्दपाणी भगवं, उपरि सिहा वड्ढइ, न य छड्डिज्जइ, भगवओ एस लद्धी, भगवया सो पारिओ, तत्थ दिव्वाणि पाउब्भूयाणि, तं जहा-वसुहारा वुट्ठा १ चेलुक्खेवो कओ २ आहयाओ देवदुंदुहीओ ३ गंधोदककुसुमवरिसं मुक्कं ४ आगासे य अहोदानं घुट्ठंति ५ ।

तओ तं देवसंनिवाअं पासिऊण लोगो सेज्जंसघरमुवगओ, ते तावसा अन्ने य रायाणो, ताहे सेज्जंसो ते पन्नवेइ-एवं भिक्खा दिज्जइ, एएसिं च दिन्ने सोग्गती गम्मइ, ततो ते सव्वेऽवि पुच्छति-कहं तुमे जाणियं ? जहा-सामिस्स भिक्खा दायव्वत्ति, भणइ-जाइसरणेन, अहं सामिणा सह अट्ठ भवग्गहणाइं अहेसि, तओ ते संजायकोउहल्ला भणंति-इच्छामो नाउं अट्ठसु भवग्गहणेसु को को तुमं सामिणो आसित्ति, ततो सो तेसिं पुच्छंताणं अप्पणो सामिस्स य अट्ठभवसंबद्धं कहं कहेइ जहा "वसुदेवहिंडीए", तानि पुन संखेवओ इमाणि, तं जहा-ईसाणे सिरिप्पभे विमाने भगवं ललिअंगओ अहेसि, सेज्जंसो से सयंपभादेवी पुव्वभवनिन्नामिआ १ पुव्वविदेहे पुक्खलावइविजए लोहग्गले नयरे भगवं वइरजंधो आसि, सिज्जंसो से सिरिमती भारिया २ तत्तो उत्तरकुराए भगवं मिहुणगो सेज्जंसोऽवि मिहुणिआ अहेसि ३ ततो सोहम्मे कप्पे दुवेऽवि देवा अहेसि ४ ततो भगवं अवरविदेहे विज्जपुत्तो सेज्जंसो पुन जुण्णसेट्ठिपुत्तो केसवो नाम छट्ठो मित्तो अहेसि ५ ततो अच्चुए कप्पे देवा ६ ततो भगवं पुंडरीगिणीए नगरीए वइरणाहो संज्जंसो सारही ७ ततो सव्वट्ठसिद्धे विमाणे देवा ८ इह पुन भगवओ पपोत्तो जाओ सेज्जंसोत्ति ।

तेसिं च तिण्हवि सुमिणाण एतदेव फलं-जं भगवओ भिक्खा दिन्नत्ति । ततो जनवओ एवं सोऊण सेज्जंसं अभिनंदिऊण सट्ठाणाणि गतो, सेज्जंसोऽवि भगवं जत्थ ठिओ पडिलाभिओ तानि पयाणि मा पाएहिं अक्कमिहामित्ति भत्तीए तत्थ रयणामयं पेढं करेइ, तिसंझं च अच्चिणइ, विसेसेण य पव्वदेसकाले अच्चिणेऊण भुंजइ, लोगो पुच्छइ-किमेयंति, सेज्जंसो भणति-आदिगरमंडलागंति, ततो लोगेनवि जत्थ जत्थ भगवं ठितो तत्थ पेढं कयं, तं च कालेन आइच्चपेढं संजायंति गाथार्थः ॥ एवं भगवतः खल्वादिकरस्य पारणकविधिरुक्तः, साम्प्रतं प्रसङ्गतः शेषतीर्थकराणामजितादीनां येषु स्थानेषु प्रथमपारणकान्यासन् यैश्च कारितानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्गतिश्चेत्यादि प्रतिपाद्यते, तत्र विवक्षितार्थप्रतिपादिकाः खल्वेता गाथा इति ।

नि. (३२३)हत्थिनउरं १ असोज्झा २ सावत्थी ३ तहय चेव साकेअं ४ ।
विजयपुर ५ बंभथलयं ६ पाडलिसंडं ७ पउमसंडं ८ ॥

नि. (३२४) सेयपुरं ९ रिट्ठपुरं १० सिद्धत्थपुरं ११ महापुरं १२ चेव ।
धन्नकड १३ वद्धमाणं १४ सोमनसं १५ मंदिरं १६ चेव ॥

नि. (३२५)चक्कपुरं १७ रायपुरं १८ मिहिला १९ रायगिहमेव २० बोद्धव्वं ।
वीरपुरं २१ बारवई २२ कोअगडं २३ कोल्लयग्गामो २४ ॥

नि. (३२६) एएसु पढमभिख्खा लद्धाओ जिनवरेहि सव्वेहिं ।
दिन्नाउ जेहि पढमं तेसिं नामानि वोच्छामि ॥

नि. (३२७) सिज्जंस १ बंभदत्ते २ सुरेंददत्ते ३ य इंददत्ते ४ अ ।
पउमे ५ अ सोमदेवे ६ महिंद ७ तह सोमदत्ते ८ अ ॥

नि. (३२८)पुस्से ९ पुनव्वसू १० पुणनंद ११ सुनंदे १२ जए १३ अ विजए १४ य ।
तत्तो अ धम्मसीहे १५ सुमित्त १६ तह वग्घसीहे १७ अ ॥

नि. (३२९)अपराजिअ १८ विस्ससेणे १९ वीसइमे होइ बंभदत्ते २० अ ।
दिन्ने २१ वरदिन्ने २२ पुन धन्ने २३ बहुले २४ अ बोद्धव्वे ॥

नि. (३३०) एए कयंजलिउडा भत्तीबहुमानसुक्कलेसागा ।
तक्कालपहट्ठमणा पडिलाभेसुं जिनवरिंदे ॥

नि. (३३१) सव्वेहिंपि जिनेहिं जहिअं लद्धाओ पढमभिक्खओ ।
तहिअं वसुहाराओ वुट्ठाओ पुप्फवुट्ठीओ ॥

नि. (३३२) अद्धत्तेरसकोडी उक्कोसा तत्थ होइ वसुहारा ।
अद्धत्तेरस लक्खा जहन्निआ होइ वसुहारा ॥

नि. (३३३) सव्वेसिंपि जिणाणं जेहिं दिन्नाउ पढमभिक्खाओ ।
ते पयणुपिज्जदोसा दिव्ववरपरक्कमा जाया ॥

नि. (३३४) केई तेनेव भवेन निव्वुआ सव्वकम्मउम्मुक्का ।
अन्ने तइअभवेणं सिज्झिस्संति जिनसगासे ॥

वृ- अक्षरगमनिका तु क्रियाऽध्याहारतः कार्या, यथा-गजपुरं नगरमासीत्, श्रेयांसस्तत्र राजा, तेनेक्षुरसदानं भगवन्तमधिकृत्य प्रवर्त्तितं, तत्रार्धत्रयोदशहिरण्यकोटीपरिमाणा वसुधारा निपतिता, पीठमिति-श्रेयांसेन यत्र भगवता पारितं तत्र तत्पादयोर्मा कश्चिदाक्रमणं करिष्यतीति-भक्त्या रत्नमयं पीठं कारितं । गुरुपूजेति–तदर्चनं चक्रे इति । अत्रान्तरे भगवतः तक्षशिलातले गमनं बभूव, भगवत्प्रवृत्तिनियुक्तपुरुषैर्वाहुबलेर्निवेदनं च कृतमित्यक्षरगमनिका । एवमन्यासामपि संग्रहगाथानां स्वबुद्धया गमनिका कार्येति गाथार्थः ॥ इदानीं कथानकशेषम् –बाहुबलिना चिंतिअं-कल्ले सव्विड्ढीए वंदिस्सामिति निग्गतो पभाए, सामी गतो विहरमाणो, अदिट्ठे अद्धितिं काऊण जहिं भगवं वुत्थो तत्थ धम्मचक्क चिंधं कारियं, तं सव्वरयणामयं जोयणपरिमंडलं पंचजोयणूसियदंडं । सामीवि बहलीयडंबइल्लाजोणगविसयाइएसु निरुवसग्ग विहरंतो विनी-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनगरीए उज्ञानत्थाणं पुरिमतालं नगरं संपत्तो । तत्थ य उत्तरपुरच्छिमे दिसिभागे सगडमुहं नाम उज्ञाणं, तंमि निग्गोहपायवस्स हेट्ठा अट्ठमेणं भत्तेणं पुव्वण्हदेसकाले फग्गुणबहुलेक्कारसीए उत्तरासाढणक्खत्ते पव्वज्ञादिवसाओ आरब्भ वाससहस्संमि अतीते भगवओ तिहुअणेक्कबंधवस्स दिव्वमनंतं केवलनाणमुप्पन्नति ।

अमुमेवार्थमुपसंहरन् गाथाषट्कमाह–

नि. (३३५) कल्लं सव्विड्ढीए पूएमहऽदट्ठु धम्मचक्कं तु ।
विहरइ सहस्समेगं छउमत्थो भारहे वासे ॥

नि. (३३६) बहलीअडंबइल्लाजोणगविसओ सुवण्णभूमी अ ।
आहिंडिआ भगवआ उसभेन तवं चरंतेणं ॥

नि. (३३७) बहली अ जोणगा पल्हगा य जे भगवया समणुसिट्ठा ।
अन्ने य मिच्छजाई ते तइआ भद्दया जाया ॥

नि. (३३८) तित्थयराणं पढमो उसभरिसी विहरिओ निरुवसग्गो ।
अट्ठावओ नगवरो अग्ग (य) भूमी जिनवरस्स ॥

नि. (३३९) छउमत्थप्परिआओ वाससहस्सं तओ पुरिमताले ।
नग्गोहस्स य हेट्ठा उप्पन्नं केवलं नाणं ॥

नि. (३४०) फग्गुणबहुले एक्कारसीइ अह अट्ठमेण भत्तेणं ।
उप्पन्नंमि अनंते महव्वया पंच पन्नवए ॥

वृ- आसां भावार्थः सुगम एव, नवरम्–अनुरूपक्रियाऽध्याहारः कार्यः, यथा–कल्लं-प्रत्यूषसि सर्वर्ध्या पूजयामि भगवन्तम्-आदिकर्त्तारं अहमिति-आत्मनिर्देशः, अदृष्ट्वा भगवन्तं धर्मचक्र तु चकारेत्यादि गाथाषट्काक्षरार्थः ॥ महाव्रतानि पञ्च प्रज्ञापयतीत्युक्तं, तानि च त्रिदशकृत-समवसरणावस्थित एव, तथा चाह–

नि. (३४१) उप्पन्नंमि अनंते नाणे जरमरणविप्पमुक्कस्स ।
तो देवदानविंदा करिंति महिमं जिणिंदस्स ॥

वृ- गमनिका–उत्पन्ने-धातिकर्मचतुष्टयक्षयात् संजाते अनन्ते ज्ञाने केवल इत्यर्थः, जरा-वयोहानिलक्षणा मरणं-प्रतीतं जरामरणाभ्यां विप्रमुक्त इति समासः तस्य, विप्रमुक्तवप्रिमुक्त इति, ततो देवदानवेन्द्राः कुर्वन्ति महिमां-ज्ञानपूजां जिनवरेन्द्रस्य । देवेन्द्रग्रहणात् वैमानिक-ज्योतिष्टकग्रहः, दानवेन्द्रग्रहणात् भवनवासिव्यन्तरेन्द्रग्रहणं । सर्वतीर्थकराणां च देवा अवस्थितानि नखलोमानि कुर्वन्ति, भगवतस्तु कनकावदाते शरीरे जटा एवाञ्जनरेखा इव राजन्त्य उपलभ्य धृता इति गाथार्थः ॥ इदानीमुक्तानुक्तार्थसंग्रहपरां संग्रहगाथामाह–

नि. (३४२) उज्ञानपुरिमताले पुरी (इ) विणीआइ तत्थ नाणवरं ।
चक्कुप्पाया य भरहे निवेअवं चेव दोण्हंपि ॥

वृ- उद्यानं च तत्पुरिमतालं च उद्यानपुरिमतालं तस्मिन्, पुर्यां विनीतायां तत्र ज्ञानवरं भगवत उत्पन्नमिति वाक्यशेषः । तथा तस्मिन्नेवाहनि भरतस्य नृपतेरायुधशालायां चक्रोत्पादश्च बभूव ।'भरहे निवेअणं चेव दोण्हंपि' त्ति भरताय निवेदनं च द्वयोरपि-ज्ञानरत्नचक्ररत्नयोः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तन्नियुक्तपुरुषैः कृतमित्यध्याहार इति गाथार्थः ।। अत्रान्तरे भरतश्चिन्तयामास-पूजा तावद्वयोरपि कार्या, कस्य प्रथमं कर्तुं युज्यते ? किं चक्ररत्नस्य उत तातस्येति, तत्र–

नि. (३४३) तायंमि पूइए चक्क पूइअं पूअणारिहो ताओ ।
इहलोइअं तु चक्कं परलोअसुहावहो ताओ ।।

वृ- गमनिका–'ताते'-त्रैलोक्यगुरौ पूजिते सति चक्रं पूजितमेव, तत्पूजानिबन्धनत्वाच्चक्रस्य। तथा पूजामर्हतीति पूजार्हः तातो वर्त्तते, देवेन्द्रादिनुतत्वात् । तथा इह लोके भवं चैहलौकिकं तुं चक्रं, तुरेवकारार्थः, स चावधारणे, किमवधारयति ? ऐहिकमेव चक्रं, सांसारिकसुखहेतुत्वात्। परलोक सुखावहः परलोकसुखावहस्तातः, शिवसुखहेतुत्वाद् इति गाथार्थः ।। तस्मात् 'तिष्ठतु तावच्चक्रं तातस्य पूजा कर्त्तुं युज्यते' इति संप्रधार्य तत्पूजाकरप्पसंदेशव्यापृतो बभूव । इदानीं कथानकम्–भरहो सव्विड्ढीए भगवंतं वंदिउं पयट्टो, मरुदेवीसामिणी य भगवंते पव्वइए भरहरज्जसिरिं पासिऊण भणियाइआ–मम पुत्तस्स एरिसी रज्जसिरी आसि, संपयं सो खुहापिवासापरिगओ नग्गओ हिंडइत्ति उव्वेयं करियाइआ, भरहस्स तित्थकरविभूइं वण्णेंतस्सवि न पत्तिज्जियाइआ, पुत्तसोगेण य से किल झामलं चक्खुं जायं रुयंतीए, तो भरहेण गच्छंतेण विन्नत्ता-अम्मो ! एहि, जेन भगवओ विभूइं दंसेमि । ताहे भरहो हत्थिखंधे पुरओ काऊण निग्गओ, समवसरणदेसे य गणयमंडलं सुरसमूहेण विमानारूढेणोत्तरंतेण विरायंतधयवडं पहयदेवदुंदहिनिनायपूरियदिसामंडलं पासिऊण भरहो भणियाइओ –पेच्छ जइ एरिसी रिद्धी मम कोडिसयसहस्सभागेणवि, ततो तीए भगवओ छत्ताइच्छत्तं पासंतीए चेव केवलमुप्पन्नं । अन्ने भणंति-भगवओ धम्मकहासद्दं सुणंतीए । तक्कालं च से खुट्टमाउगं, ततो सिद्धा, इह भारहोसप्पिणीए पढमसिद्धोत्तिकाऊण देवेहिं पूजा कया, सरीरं च खीरोदे छूढं, भगवं च समवरसरणमज्झत्थो सदेवमनुयासुराए सभाए धम्मं कहेइ, तत्थ उसभसेनो नाम भरहपुत्तो पुव्वबद्धगणहरनामगोत्तो जायसंवेगो पव्वइओ, बंभी य पव्वइआ, भरहो सावगो जाओ, सुंदरी पव्वयंती भरहेण इत्थीरयणं भविस्सइत्ति निरुद्धा, सावि साविआ जाया, एस चउव्विहो समणसंघो । ते य तावसा भगवओ नाणमुप्पन्नंति कच्छमहाकच्छवज्जा भगवओ सगासमागंतूण भवणवइवाणमंतर जोइसियवेमाणियदेवाइण्णं परिसं दट्ठूण भगवओ सगासे पव्वइआ, इत्थ समोसरणे मरीइमाइआ बहवे कुमारा पव्वइआ । साम्प्रतमभिहितार्थसंग्रहपरमिदं गाथाचतुष्टयमाह–

नि. (३४४) सह मरुदेवाइ निग्गओ कहणं पव्वज्ज उसभसेनस्स ।
बंभीमरीइदिक्खा सुंदरी ओरोहसुअदिक्खा ।

नि. (३४५) पंच य पुत्तसयाइं भरहस्स य सत्त नत्तूअसयाइं ।
सयराहं पव्वइआ तंमि कुमारा समोसरणे ।।

नि. (३४६) भवणवइवाणमंतरजोइसवासी विमानवासी अ ।
सव्विड्ढिइ सपरिसा कासी नाणुप्पयामहिमं ।।

नि. (३४७) दट्ठूण कीरमाणिं महिमं देवेहि खत्तिओ मरिई ।
सम्मत्तलद्धबुद्धी धम्मं सोऊण पव्वइओ ।।

वृ- 'कथनं' धर्मकथा परिगृह्यते, मरुदेव्यै भगवद्विभूतिकथनं वा । तथा 'नप्तृशतानीति'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पौत्रकशतानि। तथा 'सयराहमिति' देशीवचनं युगपदर्थाभिधायकं त्वरितार्थाभिधायकं वेति। 'मरीचिरिति' जातमात्रो मरीचीन्मुक्तवान् इत्यतो मरीचिमान् मरीचिः, अभेदोपचारान्मतुब्लोपाद्वेति, अस्य च प्रकृतोपयोगित्वात्कुमारसामान्यभिधाने सत्यपि भेदेनोपन्यासः। सम्यक्त्वेन लब्धा-प्राप्ता बुद्धिर्यस्य स तथाविधः। शेषं सुगममिति। कथानकम्-भरहोऽवि भगवओ पूअं काऊण चक्करयणस्स अट्ठाहिआमहिमं करियाइओ, निव्वत्ताए अट्ठाहिआए तं चक्करयणं पुव्वाहिमुहं पहाविअं, भरहो सव्वबलेन तमनुगच्छिआइओ, तं जोयणं गंतूण ठिअं, ततो सा जोअणसंखा जाआ, पुव्वेण य मागहत्थिं पाविऊण अट्ठमभत्तोसितो रहेण समुद्दमवगाहिता चक्कनाभिं जाव, ततो नामंकं सरं विसज्जियाइओ, सो दुवालसजोयणाणि गंतूण मागहतित्थकुमारस्स भवणे पडिओ, सो तं दट्ठूण परिकुविओ भणइ-केस णं एस अपत्थिअपत्थिए ?, अह नामयं पासइ, नायं जहा उप्पन्नो चक्कवट्टित्ति, सरं चूडामणिं च घेत्तूण उवट्ठिओ भणति-अहं ते पुव्विल्लो अंतेवालो, ताहे तस्स अट्ठाहिअं महामहिमं करेइ।

एवं एएण कमेण दाहिणेण वरदामं, अवरेण पभासं, ताहे सिंधुदेविं ओयवेइ, ततो वेयड्ढगिरिकुमारं देवं, ततो तमिसगुहाए कयमालयं, तओ सुसेणो अद्धबलेण दाहिणिल्लं सिंधुनिक्खूडं ओयवेइ, ततो सुसेणो तिमिसगुहं समुग्घाडेइ, ततो तिमिसगुहाए मणिरयणेन उज्जोअं काऊण उभओ पासिं पंचधणुसयायामविक्खंभाणि एगूनपन्नासं मंडलानि आलिहमाणे उज्जोअकरणा उम्मुग्गनिमुग्गाओ अ संकमेण उत्तरिऊण निग्गओ तिमिसगुहाओ, आवडिअं चिलातेहिं समं जुद्धं, ते पराजिआ मेहमुहे नाम कुमारे कुलदेवए आराहेंति, ते सत्तरत्ति वासं, वासेंति, भरहोऽवि चम्मरयणे ठवेऊण उवरिं छत्तरयणं ठवेइ, मणिरयणं छत्तरयणस्स पडिच्छाभाए ठवेति, ततोपभिइ लोगेन अंडसंभवं जगं पणीअंति, तं ब्रह्माण्डपुराणं, तत्थ पुव्वण्हे सालीवुप्पइ; अवरण्हे जिम्मइ, एवं सत्त दिवसे अच्छत्ति, ततो मेहमुहा आभिओगिएहिं धाडिओ, चिलाया तेसिं वयणेन उवणया भरहस्स, ततो चुल्लहिमवंतगिरिकुमारं देवं ओयवेति, तत्थ बावत्तरि जोयणाणि सरो उवरिहुत्तो गच्छति,

ततो उसभकूडए नामं लिहइ, ततो सुसेनो उत्तरिल्लं सिंधुनिक्खूडं ओयवेइ, ततो भरहो गंगं ओयवेइ, पच्छा सेनावती उत्तरिल्लं गंगानिक्खूडं ओयवेइ, भरहोऽवि गंगाए सद्धिं वाससहस्सं भोगे भुंजइ, ततो वेयड्ढे पव्वए नमिविनमिहिं समं बारस संवच्छराणि जुद्धं, ते पराजिआ समाणा विनमी इत्थीरयणं नमी रयणाणि गहाय उवट्ठिया, पच्छा खंडगप्पवायगुहाए नट्टमालयं देवं ओयवेइ, ततो खंडगप्पवायगुहाए नीति, गंगाकूलए नव निहओ उवागच्छंति, पच्छा दक्खिणिल्लं गंगानिक्खूडं सेनावई ओयवेइ, एतेन कमेण सट्ठीए वाससहस्सेहिं भारहं वासं अभिजिणऊण अतिगओ विनीयं रायहाणिंति, बारस वासाणि महारायाभिसेओ, जाहे बारस वासाणि महारायभिसेओ वत्तो राइणो विसज्जिआ ताहे निययवग्गं सरिउमारद्धो, ताहे दाइज्जंति सव्वे निइल्लिआ, एवं परिवाडीए सुंदरी दाइआ, सा पंडुल्लंगितमुही, सा य जद्दिवसं रुद्धा तद्दिवसमारद्धा आयंबिलाणि करेति, तं पासित्ता रुट्ठो ते कुडुंबिए भणइ-किं मम नत्थि भोयणं?, जं एसा एरिसीरूवेण जाय, विज्जा वा नत्थि ?, तेहिं सिट्ठं जहा-आयंबिलानि करेति, ताहे तस्स तस्सोवरिं पयणुओ रागो जाओ,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सा य भणिया-जइ रुच्चइ तो मए समं भोगे भुंजाहि, नवि तो पव्वयाहित्ति, ताहे पाएसु पडिया विसज्जिया पव्वइआ। अन्नया भरहो तेसिं भाउयाणं दूयं पट्ठवेइ-जहा मम रज्जं आयणह, ते भणंति-अम्हवि रज्जं ताएण दिन्नं, तुज्झवि, एतु ताव ताओ पुच्छिज्जिहित्ति, जं भणिहिति तं करिहामो। ते णं समए णं भगवं अट्ठावयमागओ विहरमाणो, एत्थ सव्वे समोसरिआ कुमारा, ताहे भणंति-तुब्भेहिं दिन्नाइं रज्जाइं हरति भाया, ता किं करेमो ? किं जुज्झामो उयाहु आयाणामो ?, ताहे सामी भोगेसु निव्वत्तावेमाणो तेसिं धम्मं कहेइ-न मुत्तिसमं सुहमत्थि, ताहे इंगालदाहकदिट्ठंतं कहेइ-जहा एगो इंगालदाहओ एगं भाणं पाणिअस्स भरेऊणं गओ, तं तेन उदगं निट्ठविअं, उवरिं आइच्चो पासे अग्गी पुणो परिस्समो दारुगाणि कुट्टंतस्स, घरं गतो पाणं पीअं, मुच्छिओ सुमिणं पासइ, एवं असब्भावपट्ठवणाए कूवतलागनदिदहसमुद्दा य सव्वे पीआ, न य छिज्जइ तण्हा, ताहे एगंमि जिण्णकूवे तणपूलिअं गहाय उस्सिचइ, जं पडियसेसं तं जीहाए लिहइ। एवं तुब्भेहिंपि अनुत्तरा सव्वलोगे सद्दफरिसा सव्वट्ठसिद्धे अनुभूआ, तहवि तत्तिं न गया। एवं वियालिअं नाम अज्झयणं भासइ 'संबुज्झह किं न बुज्झहा ?' एवं अट्ठानउए वित्तेहिं अट्ठानउइ कुमारा पव्वइआ, कोइ पढमिल्लुएण संबुद्धो कोइ बितिएण कोइ ततिएण जाहे ते पव्वइआ। अमुमेवार्थमुपसंहरन्नाह–

नि. (३४८) मागहमाई विजयो सुंदरिपव्वज्ज बारसभिसेओ।
आणवण भाउगाणं समुसरणे पुच्छ दिट्ठंतो ॥

वृ- गमनिका–मागधमादौ यस्य स मागधादिः, कोऽसौ ? विजयो भरतेन कृत इति। पुनरागतेन सुन्दर्यवरोधस्थिता दृष्टा, क्षीणत्वान्मुक्ता चेति। द्वादश वर्षाणि अभिषेकः कृतो भरताय, आज्ञापनं भ्रातृणा चकार, तेऽपि च समवसरणे भगवनतं पृष्टवन्तः, भगवता चाङ्गारदाहकदृष्टान्तो गदित इति गाथाक्षरार्थः ॥ इदानीं कथानकशेषम् – कुमारेसु पव्वइएसु भरहेण बाहुबलिणो दूओ पेसिओ, सो ते पव्वइए सोउं आसुरुत्तो, ते बाला तुमए पव्वविआ, अहं पुन जुद्ध समत्थो, ता एहि, किं वा ममंमि अजिए भरहे तुमे जिअंति। ततो सव्वबलेण दोवि मिलिआ देसंते, बाहुबलिणा भणिअं-किं अनवराहिणा लोगेन मारिएणं ?, तुमं च अहं च दुवेऽवि जुज्झामो, एवं होउत्ति, तेसिं पढमं दिट्ठिजुद्धं जायं, तत्थ भरहो पराजिओ, पच्छावायाए, तत्थवि भरहो पराइओ, एवं बाहाजुद्धेण पराजिओ मुट्ठिजुद्धेऽवि पराजिओ दंडजुद्धेऽवि जिप्पमाणो भरहो चितियाइओ–किं एसेव चक्की ? जेनाहं दुब्बलोत्ति, तस्स एवं चिंतंतस्स देवयाए आउहं दिन्नं चक्करयणं, ताहे सो तेणं गहिएण पहाविओ। इओ बाहुबलिना दिट्ठो गहियदिव्वरयणो आगओ, सगव्वं चिंतियं चानेन–सममेएण भंजामि एयं, किं पुन तुच्छाण कामभोगान कारणा भट्ठनियपइण्णं एयं मम वावाइउं न जुत्तं, सोहणं मे भाउगेहिं अनुट्ठिअं, अहमवि तमनुट्ठामित्ति चिंतिऊण भणियं चाणेण-धिसि धिसि पुरिसत्तणं ते अहम्मजुद्धपवत्तस्स, अलं मे भोगेहिं, गेण्हाहि रज्जं, पव्वयामित्ति, मुक्कदंडो पव्वइओ, भरहेन बाहुबलिस्स पुत्तो रज्जे ठविओ।

बाहुबली विचिंतेइ-तायसमीवे भाउणो मे लहुयरा समुप्पन्ननाणाइसया, ते किह निरइसओ पिच्छामि ?, एत्थेव जाव अच्छामि जाव केवलनाणं समुप्पन्नंति, एवं सो पडिमं ठिओ,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

माणपव्वयसिहरे, जाणइ सामी तहवि न पट्ठवेइ, अमूढलक्खा तित्थयरा, ताहे संवच्छरं अच्छइ काउस्सग्गेणं, वल्लीविताणेणं वेढिओ, पाया य वम्मीयनिग्गएहिं भुयंगेहिं, पुण्णे य संवच्छरे भगवं बंभीसुंदरीओ पट्ठवेइ, पुव्विं न पट्ठविआ, जेन तया सम्मं न पडिवज्जइत्ति, ताहिं सो मग्गंतीहिं वल्लीतणवेढिओ दिट्ठो, परूढेणं महल्लेणं कुच्चेणंति, तं दट्ठूणं वंदिओ, इमं च भणियं-ताओ आनवेइ-न किर हत्थिविलग्गस्स केवलनाणं समुप्पज्जइत्ति भणिऊणं गयाओ, ताहे पचिंतितो-कहिं एत्थ हत्थी ?, ताओ अअलियं न भणति, ततो चिंतंतेण णायं-जहा माणहत्थित्ति, को य मम मानो ?, वच्चामि भगवंतं वंदामि ते य साहुणोत्ति पादे उक्खित्ते केवलनाणं समुप्पन्नं, ताहे गंतूण केवलिपरिसाए ठिओ। ताहे भरहोऽवि रज्जं भुंजइ। मरीईवि सामाइयादि एक्कारस अंगाणि अहिज्जिओ। साम्प्रतमभिहितार्थोपसंहारायेदं गाथासप्तकमाह–

नि. (३४९) बाहुबलिकोवकरणं निवेअणं चक्कि देवया कहणं।
नाहम्मेणं जुज्झे दिक्खा पडिमा पइण्णा य ॥

वृ- आसामभिहितार्थानामपि असंमोहार्थमक्षरगमनिका प्रदर्श्यते – भरतसंदेशाकर्णने सति बाहुबलिनः कोपकरणं, तन्निवेदनं चक्रवर्त्तिभरताय दूतेन कृतं, 'देवयत्ति' युद्धे जीयमानेन भरतेन किमयं चक्रवर्त्ती न त्वहमिति चिन्तिते देवता आगतेति, 'कहणंति' बाहुबलिना परिणामदारुणान् भोगान् पर्यालोच्य कथनं कृतं-अलं मम राज्येनेति, तथा चाह-नाधर्मेण युध्यामीति, दीक्षा तेन गृहीता, अनुत्पन्नज्ञानः कथमहं ज्यायान् लघीयसो द्रक्ष्यामीत्यभिसंधानात् प्रतिमा अङ्गीकृता प्रतिज्ञा च कृता-नास्मादनुत्पन्नज्ञानो यास्यामीति निर्युक्तिगाथा, शेषास्तु भाष्यगाथाः ॥

[भा.३२] पढमं दिट्ठीजुद्धं वायाजुद्धं तहेव बाहाहिं।
मुट्ठीहि अ दंडेहि अ सव्वत्थवि जिप्पए भरहो ॥

[भा.३३] सो एव जिप्पमाणो विहुरो अह नरवई विचिंतेइ।
किं मन्नि एस चक्की ? जह दानि दुब्बलो अहयं ॥

[भा.३४] संवच्छरेण धूअं अमूढलक्खो उ पेसए अरिहा।
हत्थीओ ओयरत्ति अ वुत्ते चिंता पए नाणं ॥

[भा.३५] उप्पन्ननाणरयणो तिन्नपइण्णो जिनस्स पामूले।
गंतुं तित्थं नमिउं केवलिपरिसाइ आसीणो ॥

[भा.३६] काऊण एगछत्तं भरहोऽवि अभुंजऊविउलभोए।
मरिईवि सामिपासे विहरइ तवसंजमसमग्गो ॥

[भा.३७] सामाइअमाईअं इक्कारसमाउ जाव अंगाउ।
उज्जुत्तो भत्तिगतो अहिज्जिओ सो गुरुसगासे ॥

वृ- तयोश्च भरतबाहुबलिनोः प्रथमं दृष्टियुद्धं पुनर्वाग्युद्धं तथैव बाहुभ्यां मुष्टिभिश्च दण्डैश्च, 'सर्वत्रापि' सर्वेषु युद्धेषु जीयते भरतः ॥ स एवं जीयमानो विधुरोऽथ नरपतिर्विचिन्तितवान्–किं मन्ये एष चक्रवर्त्ती ? यथेदानीं दुर्बलोऽहमिति ॥ कायोत्सर्गावस्थिते भगवति बाहुबलिनि संवत्सरेण 'धूतां' दुहितरं अमूढलक्षस्तु प्रेषितवान् 'अर्हन्' आदितीर्थकरः, 'हस्तिनः अवतर'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति चोक्तो चिन्ता तस्य जाता, यामीति संप्रधार्य 'पदे' इति पादोत्क्षेपे ज्ञानमुत्पन्नमिति ॥ उत्पन्नज्ञानरत्नस्तीर्ण-प्रतिज्ञो जिनस्य पादमूले केवलिपर्षदं गत्वातीर्थं नत्वा आसीनः ॥ अत्रान्तरे कृत्वा एकच्छत्रं भुवनमिति वाक्यशेषः, भरतोऽपि च भुङ्क्ते विपुलभोगान् । मरीचिरपि स्वामिपार्श्वे विहरति तपः संयमसमग्रः ॥ स च सामायिकादिकमेकादशमङ्गं यावत् उद्युक्तः क्रियायां, भक्तिगतो भगवति श्रुते वा, अधीतवान् स गुरुसकाश इत्युपन्यस्तगाथार्थः ॥

नि. (३५०) अह अन्नया कयाई गिम्हे उण्हेण परिगयसरीरो ।
अण्हाणएण चइओ इमं कुलिंगं विचिंतेइ ॥

वृ- 'अथ' इत्यानन्तर्यो 'कदाचिद्' एकस्मिन्काले ग्रीष्मे उष्णेन परिगतशरीरः 'अस्नानेनेति' अस्नानपरीषहेण त्याजितः संयमात् 'एतत्कुलिङ्गं' वक्ष्यमाणं विचिन्तयतीति गाथार्थः ॥

नि. (३५१) मेरुगिरीसमभारे न हुमि समत्थो मुहुत्तमवि वोढुं ।
सामण्णए गुणे गुणरहिओ संसारमनुकंखी ॥

वृ- गमनिका-मेरुगिरिणा समो भारो येषां ते तथाविधास्तान् नैव समर्थो मुहूर्त्तमपि वोढुं, कान् ?, श्रमणानामेते श्रामणाः, के ते ?, गुणाः विशिष्टक्षान्त्यादयस्यान्, कुतो ?, यतो धृत्यादिगुणरहितोऽहं संसारानुकाङ्क्षीति गाथार्थः ॥ ततश्च किं मम युज्यते ?, गृहस्थत्व तावदनुचितं, श्रमणगुणानुपालनमप्यशक्यं-

नि. (३५२) एवमनुचिंतंतस्स तस्स निअगा मई समुप्पन्ना ।
लद्धो मए उवाओ जाया मे सासया बुद्धी ॥

वृ- 'एवं' उक्तेन प्रकारेण अनुचिन्तयतस्य निजा मतिः समुत्पन्ना, न परोपदेशेन, स ह्येवं चिन्तयामास-लब्धो मया वर्त्तमानकालोचितः खलुपायः, जाता मल शाश्वता बुद्धिः, शाश्वतेति आकालिकी प्रायो निरवद्यजीविकाहेतुत्वात् इति गाथार्थः ॥

यदुक्तं 'इदं कुलिङ्गं अचिन्तयत्' तत्प्रदर्शनायाह-

नि. (३५३) समणा तिदंडगविरया भगवंतो निहुअसंकुइअअंगा ।
अजिइंदिअदंडस्स उ होउ तिदंडं महं चिंधं ॥

वृ- गमनिका-श्रमणाः मनोवाक्कायलक्षणत्रिदण्डविरताः, पाश्वर्यादिभगयोगाद्भगवन्तः, निभृतानि-अन्तः करणाशुभव्या-पारचिन्तनपरित्यागात् संकुचितानि-अशुभकायव्यापार-परित्यागात् अङ्गानि येषां ते तथोच्यन्ते, अहं तु नैवंविधो यतोऽतः-'अजितेन्दियेत्यादि' न जितानि इन्द्रियाणि-चक्षुर दीनि दण्डाश्च-मनोवाक्कायलक्षणा येन स तथोच्यते, तस्य अजितेन्द्रिय-दण्डस्य तु भवतु त्रिदण्डं मम चिह्नं, अविस्मरणामिति गाथार्थः ॥

नि. (३५४) लोइंदिअमुंडा संजया उ अहयं खुरेण ससिहो अ ।
थूलगपाणिवहाओ वेरमणं मे सया होइ ॥

वृ- गमनिका-मुण्डो हि द्विविधो भवति-द्रव्यतो भावतश्च, तत्रैतेशमणा द्रव्यभावमुण्डाः, कथम् ?, लोचेन इन्द्रिययैश्च मुण्डाः संयतास्तुः अहं पुनर्नेन्द्रियमुण्डो यतः अतः अलं द्रव्यमुण्डतया, तस्मादहं क्षुरेण मुण्डः सशिखश्च भवामि, तथा सर्वप्राणिवधविरताः श्रमणा वर्त्तन्ते अहं तु नैवंविधो यतः अतः स्थूलप्राणातिपाताद्विरमणं मे सदा भवत्विति गाथार्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (३५५) निक्किंचणा य समणा अकिंचणा मज्झ किंचणं होउ ।
सीलसुगंधा समणा 'हयं सीलेण दुग्गंधो ॥

वृ- गमनिका–निर्गतं किञ्चनं-हिरण्यादि येभ्यस्ते निष्किञ्चनाश्च श्रमणाः तथा अविद्यमानं किञ्चनम्–अल्पमपि येषां तेऽकिञ्चना-जिनकल्पिकादायः, अहं तु नैवंविधो यतः अतो मार्गाविस्मृत्यर्थं मम किञ्चनं भवतु पवित्रिकादि । तथा शीलेन शोभनो गन्धो येषां ते तथाविधाः, अहं तु शीलेन दुर्गन्धः अतो गन्धचन्दनग्रहणं मे युक्तमिति गाथार्थः ॥ तथा–

नि. (३५६) ववगयमोहा समणा मोहच्छन्नस्स छत्तयं होउ ।
अनुवाहणा य समणा मज्झं तु उवाहणा होंतु ॥

वृ- व्यपगतो मोहो येषां ते व्यपगतमोहाः श्रमणाः, अहं तु नेत्थं यतः अतो मोहाच्छादितस्य छत्रकं भवतु । अनुपानत्काश्च श्रमणाः मम चोपानहौ भवत इति गाथाक्षरार्थः ॥ तथा–

नि. (३५७) सुक्कंबरा य समणा निरंबरा मज्झ धाउरत्ताइं ।
हुंतु इमे वत्थाइं अरिहो मि कसायकलुसमई ॥

वृ- गमनिका–शुक्लान्यम्बराणि येषां ते शुक्लाम्बराः श्रमणाः, तथा निर्गतमम्बरं येषां ते निरम्बरा जिनकल्पिकादायः 'मज्झन्ति' मम च, एते श्रमणा इत्यनेन तत्कालोत्पन्नतापसश्रमणव्युदासः, धातुरक्तानि भवन्तु मम वस्त्राणि किमिति ?, 'अर्होऽस्मि' योग्योऽस्मि तेषामेव, कषायैः कलुषा मतिर्यस्य सोऽहं कषायकलुषमतिरिति गाथार्थः ॥ तथा–

नि. (३५८) वज्जंतऽवज्जभीरू बहुजीवसमाउलं जलारंभं ।
होउ मम परिमिएणं जलेण ण्हाणं च पिअणं च ॥

वृ- गमनिका–वर्जयन्ति अवद्यभीरवो बहुजीवसमाकुलं जलारम्भं, तत्रैव वनस्पतेरस्थानात्, अवद्यं-पापं, अहं तु नेत्थं यतः अतो भवतु मे परिमितेन जलेन स्नानं च पानं चेति गाथार्थः।

नि. (३५९) एवं सो रुइअमई निअगमइविगप्पिअं इमं लिंगं ।
तद्धितहेउसुजुत्तं पारिव्वज्जं पवत्तेइ ॥

वृ- गमनिका–स्थूलमृषावादादिनिवृत्तः, एवमसौ रुचिता मतिर्यस्य असौ रुचितमतिः, अतो निजमत्या विकल्पितं निजमतिविकल्पितं, इदं लिङ्गं, किंविशिष्टम् ?-तस्य हितास्तद्धिताः तद्धिताश्च ते हेतवश्चेति समासः, तैः सुष्ठु युक्तं-श्लिष्टमित्यर्थः, परिव्राजामिदं पारिव्रज्यं, प्रवर्त्तयति, शास्त्रकारवचनात् वर्त्तमाननिर्देशोऽप्यविरुद्ध एवं, पाठान्तरं वा 'पारिव्वज्जं ततो कासी' त्ति पारिव्राजं ततः कृतवानिति गाथार्थः ॥ भगवता च सह विजहार, तं च साधुमध्ये विजातीयं दृष्ट्वा कौतुकाल्लोकः पृष्टवान्, तथा चाह–

नि. (३६०) अह तं पागडरूवं दट्ठुं पुच्छेइ बहुजनो धम्मं ।
कहइ जईणं तो सो विआलणे तस्स परिकहणा ॥

वृ- गमनिका–अथ तं प्रकटरूपं-विजातीयत्वात् दृष्ट्वा पृच्छति बहुर्जनो धर्मं, कथयति यतीनां संबन्धिभूतं क्षान्त्यादि लक्षणं ततोऽसाविति लोका भणन्ति-यद्ययं श्रेष्ठो भवता किं नाङ्गीकृत इति विचारणे तस्य परि-समन्तात् कथना परिकथना 'श्रमणास्त्रिदण्डविरता इत्यादिलक्षणा', पृच्छतीति त्रिकालगोचरसूत्रप्रदर्शनार्थत्वादेवं निर्देशः, पाठान्तरं वा 'अह तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पागडरूवं दट्टुं पुच्छिसु बहुजणो धम्मं । कहतीसु जतीणं सो वियालणे तस्स परिकहणा ॥' प्रवर्त्तत इति गाथार्थः ॥

नि. (३६१) धम्मकहाअक्खित्ते उवट्ठिए देइ भगवओ सीसे ।
गामनगराइआइण विहरइ सो सामिणा सद्धिं ॥

वृ- गमनिका-धर्मकथाक्षिप्तान् उपस्थितान् ददाति भगवतः शिष्यान्, ग्रामनगरादीन् विहरति स स्वामिना सार्धं, भावार्थः सुगमः, इत्थं निर्देशप्रयोजनं पूर्ववत्, ग्रन्थकारवचनत्वाद्वाऽदोष इति गाथार्थः ॥ अन्यदा भगवान् विहरमाणोऽष्टापदमनुप्राप्तवान्, तत्र च समवसृतः, भरतोऽपि भ्रातृप्रव्रज्याकर्णनात् संजातमनस्तापोऽधृतिं चक्रे, कदाचिद्वद्भोगान् दीयमानान् पुनरपि गृह्णन्तीत्यालोच्य भगवत्समीपं चागम्य निमन्त्रयंश्च तान् भोगैः निराकृतश्च चिन्तयामास-एतेषामेवेदानी परित्यक्तसङ्गानां आहारदानेनापि तावद्धर्मानुष्ठानं करोमीति पञ्चभिः शकटश-तैर्विचित्रमाहारमानाय्योपनिमन्त्र्य आधाकर्माहृतं च न कल्पते यतीनामिति प्रतिषिद्धः अकृताकारितेनान्नेन निमन्त्रितवान्, राजपिण्डोऽप्यकल्पनीय इति प्रतिषिद्धः सर्वप्रकारैरहं भगवता परित्यक्त इति सुतरामुन्माथितो बभूव, तमुन्माथितं विज्ञाय देवराट् तच्छोकोपशान्त्येय भगवनतमवग्रहं पप्रच्छ-कतिविधोऽवग्रह इति, भगवानाह-पञ्चविधोऽवग्रहः, तद्यथा-देवेन्द्रावग्रहः राजावग्रहः गृहपत्यवग्रहः सागारिकावग्रहः साधर्मिकावग्रहश्च, राजा-भरताधिपो गृह्यते, गृहपतिः-माण्डलिको राजा, सागारिकः-शय्यातरः, साधर्मिकः-संयत इति, एतेषां चोत्तरोत्तरेण पूर्वः पूर्वो वाधितो द्रष्टव्य इति, यथा राजाऽवग्रहेण देवेन्द्रावग्रहो बाधित इत्यादि प्ररूपिते देवराडाह-भगवन् ! य एते श्रमणा मदीयावग्रहे विहरन्ति, तेषां मयाऽवग्रहोऽनुज्ञात इत्येवमभिधाय अभिवन्द्य च भगवन्तं तस्थौ, भरतोऽचिन्तयत्-अहमपि स्वमवग्रहमनुजानामीति, एतावताऽपि नः कृतार्थता भवतु, भगवत्समीपेऽनुज्ञातावग्रहः शक्रं पृष्टवान्-भक्तपानमिदमानीतं अनेन किं कार्यमिति, देवराडाह-गुणोत्तरान् पूजयस्व, सोऽचिन्तयत्-के मम साधुव्यतिरेकेण जात्यादिभिरुत्तराः ?, पर्यालोचयता ज्ञातं-श्रावका विरताविरतत्वाद्गुणोत्तराः, तेभ्यो दत्तमिति। पुनर्भरतो देवेन्द्ररूपं भास्वरमाकृतिमद् दृष्ट्वा पृष्टवान्-किं यूयमेवंभूतेन रूपेण देवलोके तिष्ठत उत नेति, देवराज आह-नेति, तत् मानुषैर्द्रष्टुमपि न पार्यते, भास्वरत्वात्, पुनरप्याह भरतः-तस्याकृति-मात्रेणापि अस्माकं कौतुकं, तन्निदर्श्यतां, देवराज आह-त्वमुत्तमपुरुष इतिकृत्वा एकमङ्गावयवं दर्शयामीत्यभिधाय योग्यालङ्कारविभूषितां अङ्गुलीमत्यन्तभास्वराम-दर्शयत्, दृष्ट्वा च तां भरतोऽतीव मुमुदे,

शक्राङ्गुलीं च स्थापयित्वा महिमामष्टाहिकां चक्रे, ततः पभृति शक्रोत्सवप्रवृत्त इति । भरतश्च श्रावकानाहूय उक्तवान्-भवद्भिः प्रतिदिनं महीयं भोक्तव्यं, कृष्यादि च न कार्यं, स्वाध्यायादि-परैरासितव्यं, भुक्ते च मदीयगृहद्वारासन्नव्यवस्थितैः वक्तव्यम्-जितो भवान् वर्धते भयं तस्मान्मा हन मा हनेति, ते तथैव कृतवन्तः, भरतश्च रतिसागराव-गाढत्वात् तच्छब्दाकर्णनोऽरकालमेव केनाहं जित इति, आः ज्ञातं-कषायैः, तेभ्य एव च वर्धते भयमित्यालोचनापूर्वं संवेगं यातवान् इति । अत्रान्तरे लोकबाहुलयात् सूपकाराः पाकं कर्त्तुमशक्नुवन्तो भरताय निवेदितवन्तः-नेह ज्ञायते-कः श्रावकः को वा नेति, लोकस्य प्रचुरत्वात्, आह भरतः-पृच्छापूर्वकं देयमिति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततस्तान् पृष्टवन्तस्ते-को भवान् ?, श्रावकः, श्रावकाणां कति व्रतानि ?, स आह—श्रावकाणां न सन्ति व्रतानि, किन्त्वस्माकं पञ्चाणुव्रतानि, कति शिक्षाव्रतानि ?, ते उक्तवन्तः-सप्त शिक्षाव्रतानि, य एवंभूतास्ते राज्ञो निवेदिताः, स च काकिणीरत्नेन तान् लाञ्छितवान्; पुनः षण्मासेन येऽन्ये भवन्ति तानपि लाञ्छितवान्, षण्मासकालादनुयोगं कृतवान्, एवं ब्राह्मणाः संजाता इति । ते च स्वसुतान् साधुभ्यो दत्तवन्तः, ते च प्रव्रज्यां चक्रुः, परीषहभीरवस्तु श्रावका एवासन्निति । इयं च भरतराज्यस्थितिः, आदित्ययशसस्तु काकिणीरत्नं नासीत्, सुवर्णमयानि यज्ञोपवीतानि कृतवान्, महायशः प्रभृतयस्तु केचन रुप्यमयानि, केचन विचित्रपट्टसूत्रमयानि, इत्येवं यज्ञोपवीतप्रसिद्धिः । अमुमेवार्थं समोसरणेत्यादिगाथया प्रतिपादयति—

नि. (३६२) समुसरण भत्त उग्गह अंगुलि झय सक्क सावया अहिआ ।
जेआ वड्ढइ कागिणिलंछन अनुसज्जणा अट्ठ ॥

वृ- गमनिका—समवसरणं भगवतोऽष्टापदे खल्वासीत्, भक्तं भरतेनानीतं, तदग्रहणोन्माथिते सति भरते देवेशो भगवन्तमवग्रहं पृष्टवान्; भगवांश्च तस्मै प्रतिपादितवान् । 'अंगलि झय' त्ति भरतनृपतिना देवलोकनिवासिरूपपृच्छायां कृतायां इन्द्रेण अङ्गुलिः प्रदर्शिता, तत एवारभ्य ध्वजोत्सवः प्रवृत्तः । 'सक्क'त्ति भरतनृपतिना किमनेनाहारेण कार्यमिति पृष्टः शक्रोऽभिहितवान्-त्वदधिकेभ्यो दीयतामिति, पर्यालोचयता ज्ञातं-श्रावका अधिका इति । 'जेया वड्ढइत्ति' प्राकृत-शैल्या 'जितो भवान् वर्धते भयं' भुक्तोत्तरकालं ते उक्तवन्तः, 'कागिणिलंछणत्ति' प्रचुरत्वात् काकिणीरत्नेन लाञ्छनं-चिह्नं तेषां कृतमासीत् 'अनुसज्जणा अट्ठ'त्ति अष्टौ पुरुषान् यावदयं धर्मः प्रवृत्तः, अष्टौ वा तीथकरान् यावदिति गाथार्थः ॥ तत ऊर्ध्वं मिथ्यात्वमुपगता इति ॥

नि. (३६३) राया आइच्चजसो महाजसे अइबले अ बलभद्दे ।
बलविरिए कत्तविरिए जलविरिए दंडविरिए य ॥

नि. (३६४) एएहिं अद्धभरहं सयलं भुत्तं सिरेण धरिओअ ।
पवरो जिणिंदमउडो सेसेहिं न चाइओ वोढुं ॥

वृ- गमनिका—एभिरर्धभरतं सकलं भुक्तं, शिरसा धृतश्च, कोऽसावित्याह-प्रवरो जिनेन्द्रमुकुटो देवेन्द्रोपनीतः शेषैः-नरपतिभिः न शकितो वोढुं, महाप्रमाणत्वादिति गाथार्थः ॥

नि. (३६५) अस्सावगपडिसेहे छट्ठे छट्ठे अमासि अनुओगो ।
कालेन य मिच्छत्तं जिनंतरे साहुवोच्छेओ ॥

वृ- गमनिका—अश्रावकाणां प्रतिषेधः कृतः, ऊर्ध्वमपि षष्ठे षष्ठे मासे अनुयोगो बभूव, अनुयोगः-परीक्षा, कालेन गच्छता मिथ्यात्वमुपगताः, कदा ?, नवमजिनान्तरे, किमिति ?, यतस्तत्र साधुव्यवच्छेद आसीदिति गाथार्थः ॥

साम्प्रतमुक्तानुक्तार्थप्रतिपादनाय संग्रहगाथामाह—

नि. (३६६) दानं च माहणाणं १ वेए कासी अ २ पुच्छ निव्वाणं ४ ।
कुंडा ५ थूभ ६ जिणहरे ७ कविलो ८ भरहस्स दिक्खा य ९ ॥

वृ- गमनिका—दानं च माहनानां लोको दादुं प्रवृत्तो, भरतपूजितत्वात् । 'वेदे कासी अ'त्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आर्यान् वेदान् कृतवांश्च भरत एव, तत्स्वाध्यायनिमित्तमिति, तीर्थकृत्स्तुतिरूपान् श्रावकधर्मप्रतिपादकांश्च, अनार्यास्तु पश्चात् सुलसायाज्ञवल्क्यादिभिः कृता इति । 'पुच्छ' त्ति भरतो भगवन्तमष्टापदसमवसृतमेव पृष्टवान्-यादृग्भूता यूयं एवंविधास्तीर्थकृतः कियन्तः खल्विह भविष्यन्तीत्यादि । 'निव्वाणं' ति भगवानष्टापदे निर्वाणं प्राप्तः, देवैरग्निकुण्डानि कृतानि, स्तूपाः कृताः, जिनगृहं भरतश्चकार, कपिलो मरीचिसकाशे निष्क्रान्तः, भरतस्य दीक्षा च संवृत्तेति समुदायार्थः ।। अवयवार्थ उच्यते–आद्यावयवद्वयं व्याख्यातमेव, पृच्छावयवार्थं तुआह–

नि. (३६७) पुनरवि अ समोसरणे पुच्छीअ जिनं तु चक्किणो भरहे ।
अप्पुट्ठो अ दसारे तित्थयरो कोइहं भरहे ।।

वृ- गमनिका–पुनरपि च समवसरणे पृष्टवांश्च जिनं तु चक्रवर्त्तिनः भरतः, चक्रवर्त्तिन इत्युपलक्षणं तीर्थकृतश्चेति, भरतविशेषणं वा चक्री भरतस्तीर्थकरादीनं पृष्टवान् । पाठान्तरं वा 'पुच्छीय जिने य चक्किणो भरहे' पृष्टवान् जिनान् चक्रवर्त्तिनश्च भरतः, चशब्दस्य व्यवहितः सम्बन्धः, भगवानपि तान् कथितवान्, तथा अपृष्टश्च दशारान्, तथा तीर्थकरः क इह भरतेऽस्यां परिषदीति पृष्टवान्, भगवानपि मरीचिं कथितवान् इति गाथाक्षरार्थः ।। तथा चाह –

नि. (३६८)जिनचक्किदसाराणं वण्ण १ पमाणाइं २ नाम ३ गोत्ताइं ४ ।
आऊ ५ पुर ६ माइ ७ पियरो ८ परियाय ९ गइं च १० साहीअ ।।

वृ- गमनिका–'जिनचक्रिदशाराणां' जिनचक्रवर्त्तिवासुदेवानमित्यर्थः, वर्णप्रमाणानि तथा नामगोत्राणि तथा आयुः-पुराणि मातापितारै यथासंभवं पर्यायं गतिं च, चशब्दात् जिनानामन्तराणि च शिष्टवान् इति द्वारगाथासमासार्थः ।। अवयवार्थे तु वक्ष्यामः । तत्र प्रश्नावयवमधिकृत्य तावदाह भाष्यकारः–

[भा.३८] जारिसया लोअगुरू भरहे वासंमि केवली तुब्भे ।
एरिसया कइ अन्ने ताया ! होहिंति तित्थरा ? ।।

वृ- यादृशा लोकगुरवो भारते वर्षे केवलिनो यूयं, ईदृशाः कियन्तोऽन्येऽत्रैव तात ! भवियन्ति तीर्थकराः ? इति गाथार्थः ।।

नि. (३६९) अह भणइ जिनवरिंदो भरहे वासंभि जारिसो अहयं ।
एरिसया तेवीसं अन्ने होहिंति तित्थयरा ।।

नि. (३७०) होही अजिओ संभव अभिनंदन सुमइ सुप्पभ सुपासो ।
ससि पुप्फदंत सीअल सिज्जंसो वासुपुज्जे अ ।।

नि. (३७१) विमलमनंतइ धम्मो संती कुंथू अरो अ मल्ली अ ।
मुनिसुव्वय नमि नेमी पासो तह वद्धमाणो अ ।।

नि. (३७२) अह भणइ नरवरिंदो भरहे वासंमि जारिसो उ अहं ।
तारिसया कइ अन्ने ताया होहिंति रायाणो ।।

वृ- गमनिका–अथ भणति नरवरेन्द्रो-भरतः, भारते वर्षे यादृशस्त्वहं तादृशाः कत्यन्ये तात ! भविष्यन्ति राजान इति गाथार्थः ।।

नि. (३७३) अह भणइ जिनवरिंदो जारिसओ तं नरिंदसद्दूलो ।

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

एरिसया एक्कारस अन्ने होहिंति रायाणो ॥

वृ- गमनिका—अथ भणति जिनवरेन्द्रो—यादृशस्त्वं नरेन्द्रशार्दूलः, शार्दूलः-सिंहपर्यायः, ईदृशा एकादश अन्ये भविष्यन्ति राजानः ॥ ते चैते—

नि. (३७४) होही सगरो मघवं सणंकुमारो य रायसद्दूलो ।
संती कुंथू अ अरो होइ सुभूमो य कोरव्वो ।

नि. (३७५) नवमो अ महापउमो हरिसेनो चेव रायसद्दूलो ।
जयनामोअे नरवई बारसमो बंभदत्तो अ ॥

वृ- गाथाद्वयं निगदसिद्धमेव । यदुक्तम् 'अपृष्टश्च दशारान् कथितवान' तदभिधित्सुराह भाष्यकारः—

[भा.३९] होहिंति वासुदेवा नव अन्ने नीलपीअकोसिज्ञा ।
हलमुसलचक्कजोही सतालगरुडज्झया दो दो ॥

वृ- भविष्यन्ति वासुदेवा नव बलदेवाश्चानुक्ता अप्यत्र तत्सहचरत्वात् द्रष्टव्याः, यतो वक्ष्यति 'सतालगरुडज्झया दो दो', ते च सर्वे बलदेववासुदेवा यथासंख्यं नीलानि च पीतानि च कौशेयानि—वस्त्राणि येषां ते तथाविधाः, यथासंख्यमेव हलमुशलचक्रयोधिनः-हलमुशलयोधिनो बलदेवाः चक्रयोधिनो वासुदेवा इति, सह तालगरुडध्वजाभ्यां वर्त्तन्त इति सतालगरुडध्वजाः। एते च भवन्तो युगपद् द्वौ द्वौ भविष्यतिः, बलदेववासुदेवाविति गाथार्थः ॥

वासुदेवाभिधानप्रतिपादनायाह—

[भा.४०] तिविट्ठू अ १ दिविट्ठू २ सयंभु ३ पुरिसुत्तमे ४ पुरिससीहे ५ ।
तह पुरिसपुंडरीए ६ दत्ते ७ नारायणे ८ कण्हे ९ ॥

वृ- निगदसिद्धा ॥ अधुना बलदेवानामभिधानप्रतिपादनायाह—

[भा.४१] अयले १ विजए २ भद्दे ३, सुप्पभे ४ अ सुदंसणे ५ ।
आनंदे ६ नंदने ७ पउमे ८, रामे ९ आवि अपच्छिमे ॥

वृ- निगदसिद्धा ॥ वासुदेवशत्रुप्रतिपादनायाह—

[भा.४२] आसग्गीवे १ तारय २ मेरय ३ महुकेढवे ४ निसुंभे ५ अ ।
बलि ६ पहराए ७ तह रावणे ८ अ नवमे जरासिंधू ॥

निगदसिद्धा एव ॥

[भा.४३] एए खलु पडिसत्तू कित्तीपुरिसाण वासुदेवाणं ।
सव्वे अ चक्कजोही सव्वे अ हया सचक्केहिं ॥

वृ- गमनिका—एते खलु प्रतिशत्रवः-एते एव खलुशब्दस्य अवधारणार्थत्वात् नान्ये, कीर्त्तिपुरुषाणां वासुदेवानां, सर्वे चक्रयोधिनः, सर्वे च हताः स्वचक्रैरिति—यतस्तान्येव तच्चक्राणि वासुदेवव्यापत्तये क्षिप्तानि तैः, पुण्योदयात् वासुदेवं प्रणम्य तानेव व्यापादयन्ति इति गाथार्थः। एवं तावत्प्रागुपन्यस्तगाथायां वर्णादिद्वारोपन्यासं परित्यज्य असंमोहार्थमुत्क्रमेण जिनादीनां नामद्वारमुक्तं, पारभविकं चैषां वर्णनामनगरमातृपितृपुरादिकं प्रथमानुयोगतोऽवसेयं, इह विस्तरभयान्नोक्तमिति ॥ साम्प्रतं तीर्थकरवर्णप्रतिपादनायाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (३७६) पउमाभवासुपुज्जा रत्ता ससिपुप्फदंत ससिगोरा।
सुव्वयनेमी काला पासो मल्ली पियंगाभा।

नि. (३७७) वरकणगतविअगोरा सोलस तित्थंकरा मुनेयव्वा।
एसो वण्णविभागो चउवीसाए जिनवराणं ॥

वृ- गाथाद्वयं सूत्रसिद्धमेव ॥ साम्प्रतं तीर्थकराणामेव प्रमाणाभिधित्सयाह–

नि. (३७८)पंचेव १ अद्धपंचम २ चत्तार ३ द्धुट्ठ ४ तह तिगं ५ चेव।
अड्डाइज्ञा ६ दुन्नि ७ अ दिवड्ढ ८ मेगं धनुसयं ९ च ॥

नि. (३७९)नउई १० असीइ ११ सत्तरि १२ सट्ठी १३ पन्नास १४ होइ नायव्वा।
पणयाल १५ चत्त १६ पणतीस १७ तीसा १८ पणवीस १९ वीसा २० य ॥

नि. (३८०)पन्नरस २१ दस धनूनि य २२, नव पासो २३ सत्तरयणिओ वीरो।
नामा पुव्वुत्ता खलु तित्थयराणं मुनेयव्वा ॥

वृ- एतास्तिस्रोऽपि पाठसिद्धा एव ॥ साम्प्रतं भगवतामेव गोत्राणि प्रतिपादयन्नाह–

नि. (३८१) मुनिसुव्वओ अ अरिहा अरिट्ठनेमी अ गोअमसगुत्ता।
सेसा तित्थयरा खलु कासवगुत्ता मुनेयव्वा ॥

वृ- निगदसिद्धा ॥ आयुष्कानि तु प्राक्प्रतिपादितान्येवेति न प्रतन्यन्ते, भगवतामेव पुरप्रतिपादनाय गाथात्रितयमाह–

नि. (३८२)इक्खाग भूमि १ उज्झा २ सावत्थि ३ विनिअ ४ कोसलपरं ५ च।
कोसंबी ६ ६ वाणारसी ७ चंदानन८ तह य काकंदी ९ ॥

नि. (३८३)भद्दिलपुर १० सीहपुरं ११ चंपा १२ कंपल्लि १३ उज्झ १४ रयणपुरं १५।
तिन्नेव गयपुरंमी १८ मिहिला १९ तह चेव रायगिहं २० ॥

नि. (३८४)मिहिला २१ सोरिअनयरं २२ वाणारसि २३ तह य होइ कुंडपुरं।
उसभाईण जिणाणं जम्मणभूमी जहासंखं ॥

वृ- निगदसिद्धाः ॥ भगवतामेव मातृप्रतिपादनायाह–

नि. (३८५)मरुदेवि १ विजय २ सेना ३ सिद्धत्था ४ मंगला ५ सुसीमा ६ य।
पुहवी ७ लक्खण ८ सामा ९ नंदा १० विण्हू ११ जया १२ रामा १३ ॥

नि. (३८६)सुजसा १४ सुव्वया १५ अइरा १६, सिरी १७ देवी १८ पभावई १९।
पउमावई २० अ वप्पा २१ अ, सिव २२ वम्मा २३ तिसला २४ इअ ॥

वृ- गाथाद्वयं निगदसिद्धमेव ॥ भगवतामेव पितृप्रतिपादनायाह–

नि. (३८७) नाभी १ जिअसत्तू २ आ, जियारी ३ संवारे ४ इअ।
मेहे ५ धरे ६ पइट्ठे ७ अ, महसेने ८ अखत्तिए ॥

नि. (३८८)सुग्गीवे ९ दढरहे १० विण्हू ११, वसुपूज्जे १२ अ अखत्तिए।
कयवम्मा १३ सीहसेने १४ अ, भानू १५ विससेने १६ इअ ॥

नि. (३८९)सूरे १७ सुदंसणे १८ कुंभे १९ सुमित्तु २० विजए २१ समुद्दविजए २२ आ।
राया अ अस्ससेने २३ सिद्धत्थेऽवि य २४ खत्तिए ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- निगदसिद्धाः ।। पर्यायो-गृहस्थदिपर्यायोभगवतामुक्त एव तथैव द्रष्टव्यः । साम्प्रतं भगवतामेव गतिप्रतिपादनायाह–

नि. (३९०) सव्वेऽवि गया मुक्खं जाइजरामरणबंधणविमुक्का ।
तित्थयरा भगवंतो सासयसुक्खं निराबाहं ।।

वृ- निगदसिद्धा ।। एवं तावत्तीर्थकरान् अङ्गीकृत्य प्रतिद्वारगाथा व्याख्याता, इदानीं चक्रवर्त्तिनः अङ्गीकृत्य व्याख्यायते–एतेषामपि पूर्वभववक्तव्यतानिबद्धं च्यवनादि प्रथमानुयोगादवसेयं, साम्प्रतं चक्रवर्त्तिवर्णप्रमाणप्रतिपादनायाह–

नि. (३९१) सव्वेऽवि एगवण्णा निम्मलकणगप्पभा मुणेयव्वा ।
छक्खंडभरहसामी तेसि पमाणं अओ वुच्छं ।।

नि. (३९२) पंचसय १ अद्धपंचम २ बायालीसा य अद्धधनुअं च ३ ।
इगयाल धनुस्सद्धं ४ च चउत्थे पंचमे चत्ता ५ ।।

नि. (३९३)पणतीसा ६ तीसा ७ पुन अट्ठावीसा ८ य वीसइ ९ धनूनि ।
पन्नरस १० बारसेव य ११ अपच्छिमो सत्त य धनूनि १२ ।।

निगदसिद्धाः ।।नामानि प्राक्प्रतिपादितान्येव, साम्प्रतं चक्रबर्त्तिगोत्रप्रतिपादनानाह–

नि. (३९४) कासवगुत्ता सव्वे चउदसरयणाहिवा समक्खाया ।
देविंदवंदिएहिं जिनेहिं जिअरागदोसेहिं ।।

वृ- सूत्रसिद्धा ।। साम्प्रतं चक्रवर्त्यायुष्कप्रतिपादनायाह–

नि. (३९५) चउरासीई १ बावत्तरी अ पुव्वाण सयसहस्साइं २ ।
पंच ३ य तिन्नि अ ४ एगं च ५ सयसहस्सा च वासाणं ।

नि. (३९६) पंचानउइ सहस्सा ६ चउरासीई अ ७ अट्ठमे लट्ठी ८ ।
लीसा ९ य दस १० य तिन्नि ११ अ अपच्छिमे सत्तवाससया १२ ।।

वृ- गाथाद्वयं पठितसिद्धम् ।। इदानीं चक्रवर्त्तिनां पुरप्रतिपादनायाह–

नि. (३९७)जम्मण विनीअ १ उज्झा २ सावत्थी ३ पंच हत्थिणपुरंमि ८ ।
वाणारसि ९ कंपिल्ले १० रायगिहे ११ चेव कंपिल्ले १२ ।।

वृ- निगदसिद्धा एव ।। साम्प्रतं चक्रवर्त्तिमातृप्रतिपादनायाह–

नि. (३९८)सुमंगला १ जसवई २ भद्दा सहदेवि ४ अइर ५ सिरि ६ देवी ७ ।
तारा ८ जाला ९ मेरा १० य वप्पगा ११ तह य चूलनी अ ।।

वृ- निगदसिद्धा ।। साम्प्रतं चक्रवर्त्तिपितृप्रतिपादनायाह–

नि. (३९९)उसभे १ सुमित्तविजए २ समुद्दविजए ३ अ अस्ससेने अ ४ ।
तइ वीससेण ५ सूरे ६ सुदंसणे ७ कत्तविरिए ८ अ ।।

नि. (४००)पउमुत्तरे ९ महाहरि १० विजए राया ११ तहेव बंभे १२ अ ।
ओसप्पिणी इमीसे पिउनामा चक्कवट्टीणं ।।

वृ- गाथाद्वयं निगदसिद्धमेव ।। पर्यायः केषाञ्चित् प्रथमानुयोगतोऽवसेयः, केषाञ्चित् प्रव्रज्याऽभावात् न विद्यत एवेति ।। साम्प्रतं चक्रवर्त्तिगतिप्रतिपादनायाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (४०१) अट्ठेव गया मोक्खं सुभुमो बंभो अ सत्तमिं पुठविं ।
मघवं सणंकुमारो सणंकुमारं गया कप्पं ॥

वृ- निगदसिद्धा ॥ एवं तावच्चक्रवर्त्तिनोऽप्यधिकृत्य व्याख्याता प्रतिद्वारगाथा, इदानीं वासुदेवबलदेवाङ्गीकरणतो व्याख्यायते-एतेषामपि च पूर्वभववक्तव्यतानिबद्धं च्यवनादि प्रथमानुयोगत एवावसेयं, साम्प्रतं वासुदेवादीनां वर्णप्रमाणप्रतिपादनायाह-

नि. (४०२) वण्णेण वासुदेवा सव्वे नीला बला य सुक्किलया ।
एएसि देहमानं वुच्छामि अहानुपुव्वीए ॥

नि. (४०३) पढमो धनूनसीई १ सत्तरि २ सट्ठी ३ अ पन्न ४ पणपाला ५ ।
अउनत्तीसं च धनू ६ छव्वीसा ७ सोलस ८ दसेव ९ ॥

गाथाद्वयं निगदसिद्धं ॥ नामानि प्रागभिहितान्येव । साम्प्रतं वासुदेवादीनां गोत्रप्रतिपादनायाह-

नि. (४०४) बलदेववासुदेवा अट्ठेव हवंति गोयमसगुत्ता ।
नारायणपउमा पुन कासवगुत्ता मुणेअव्वा ॥

वृ- निगदसिद्धा ॥ वासुदेवबलदेवानां यथोपन्यासमायुः प्रतिपादनायाह-

नि. (४०५) चउरासीई १ बिसत्तरि २ सट्ठी ३ तीसा य ४ दस ५ य लक्खाइं ।
पन्नट्ठि सहस्साइं ६ छप्पन्ना ७ बारसे ८ गं च ९ ॥

नि. (४०६) पंचासीई १ पन्नत्तरी अ २ पन्नट्ठि ३ पंचवण्णा ४ य ।
सत्तरस सयसहस्सा ५ पंचमए आउअं होइ ॥

नि. (४०७) पंचासीइ सहस्सा ६ पन्नट्ठी ७ तह य चेव पन्नरस ८ ।
बारस सयाइं ९ आउं बलदेवाणं जहासंखं ॥

वृ- निगदसिद्धाः ॥ साम्प्रतममीषामेव पुराणि प्रतिपाद्यन्ते-तत्र-

नि. (४०८) पोअण १ बारवइतिगं ४ अस्सपुरं ५ तह य होइ चक्कपुरं ६ ।
वाणारसि ७ रायगिहं ८ अपच्छिमो जाओ महुराए ९ ॥

वृ- निगदसिद्धा ॥ एतेषां मातापितृप्रतिपादनायाह-

नि. (४०९) मिगावई १ उमा चेव २, पुहवी ३ सीआ य ४ अम्मया ५ ।
लच्छीमई ६ सेसमई ७, केगमई ८ देवई ९ इअ ॥

नि. (४१०) भद्द १ सुभद्दा २ सुप्पभ ३ सुदंसणा ४ विजय ५ वेजयंती ६ अ ।
तह य जयंती ७ अपराजिआ ८ य तह रोहिणी ९ चेव ॥

नि. (४११) हवइ पयावइ १ बंभो २ रुद्दो ३ सोमो ४ सिवो ५ महसिवो ६ अ ।
अग्गिसिहे ७ अ दसरहे ८ नवमे भणिए अ वसुदेवे ९ ॥

वृ- निगदसिद्धाः ॥ एतेषामेव पर्यायवक्तव्यतामभिधित्सुराह-

नि. (४१२) परिआओ पव्वज्जाऽभावाओ नत्थि वासुदेवाणं ।
होइ बलाणं सो पुन पढमऽनुओगाओ नायव्वो ॥

वृ- निगदसिद्धा एव ॥ एतेषामेव गतिं प्रतिपादयन्नाह-

नि. (४१३) एगो अ सत्तमाए पंच य छट्ठीए पंचमी एगो ।

एगो अ चउत्थीए कण्हो पुन तच्चपुढवीए ॥

वृ- गमनिका—एकश्च सप्तम्यां पञ्च च षष्ठ्यां पञ्चम्यामेकः एकश्च चतुर्थ्यां कृष्णः पुन-स्तृतीयपृथिव्यां यास्यति गतो वेति सर्वत्र क्रियाध्याहारः कार्यः, भावार्थः स्पष्ट एव ॥

बलदेवगतिप्रतिपिपादयिषयाऽऽह—

नि. (४१४) अट्ठंतगडा रामा एगो पुन बंभलोगकप्पंभि ।
उववण्णु तओ चइउं सिज्झिस्सइ भारहे वासे ।

वृ- गमनिका—अष्ट अन्तकृतो रामाः, अन्तकृत इति ज्ञानावरणीयादिकर्मान्तकृतः, सिद्धिं गता इत्यर्थः । एकः पुनः ब्रह्मलोककल्पे उत्पत्स्यते उत्पन्नो वेति क्रिया । ततश्च ब्रह्मलोकाच्युत्वा सेत्स्यति मोक्षं यास्यति भारते वर्ष इति गाथार्थः ॥ आह—किमिति सर्वे वासुदेवाः खल्वधोगामिनो रामाश्चोर्ध्वगामिन इति ?, आह—

नि. (४१५) अणिआणकडा रामा सव्वेऽवि अ केसवा निआणकडा ।
अड्ढंगामी रामा केसव सव्वे अहोगामी ॥

वृ- गमनिका—अनिदानकृतो रामाः, सर्वे अपि च केशवा निदानकृतः, ऊर्ध्वगामिनो रामाः, केशवाः सर्वे अधोगामिनः । भावार्थः सुगमो, नवरं प्राकृतशैल्या पूर्वापरनिपातः 'अनिदानकृता रामाः' इति, अन्यथा अकृतनिदाना रामा इति द्रष्टव्यं, केशवास्तु कृतनिदाना इति गाथार्थः। एवं तावदधिकृतद्वारगाथा 'जिनचक्रिदसाराण' मित्यादिलक्षणा प्रपञ्चतो व्याख्यातेति । साम्प्रतं यश्चक्रवर्त्ती वासुदेवो वा यस्मिन् जिने जिनान्तरे वाऽऽसीत् स प्रतिपाद्यत इत्यनेन सम्बन्धेन जिनान्तरागमनं, तत्रापि तावत्प्रासङ्गत एव कालतो जिनान्तराणि निर्दिश्यन्ते –

उसभो वरवसभगई ततिअसमापच्छिमंमि कालंमि ।
उप्पन्नो पढमजिनो भरहपिआ भारहे वासे ॥
पन्नासा लक्खेहिं कोडीणं सागराण उसभाओ ।
उप्पन्नो अजिअजिनो ततिओ तीसाएँ लक्खेहिं ॥
जिनवसइसंभवाओ दसहि उ लक्खेहिं अयरकोडीणं ।
अभिनंदनो उ भगवं एवइकालेण उप्पन्नो ॥
अभिनंदाउ सुमती नवहि उ लक्खेहि अयरकोडीणं ।
उप्पन्नो सुहपन्नो सुप्पभनामस्स वोच्छामि ॥
नउई य सहस्सेहिं कोडीणं सागराण पुण्णाणं ।
सुमइजिणाउ पउमो एवतिकालेन उप्पन्नो ॥
पउमप्पहनामाओ नवहि सहस्सेहि अयरकोडीणं ।
कालेनेवइएणं सुपासनामो समुप्पन्नो ॥
कोडीसएहि नवहि उ सुपासनामा जिनो समुप्पन्नो ।
चंदप्पभो पभाए पभासयंतो उ तेलोक्कं ॥
नउईए कोडीहिं ससीउ सुविहीजिनो समुप्पन्नो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुविहिजिनाओ नवहि उ कोडीहिं सीअलो जाओ ॥
सीअलजिणाउ भयवं सिज्जंसो सागराण कोडीए ।
सागरसयऊणाए बरिसेहिं तहा इमेहिं तु ॥
छव्वीसाएँ सहस्सेहिं चेव छावट्ठि सयसहस्सेहिं ।
एतेहिं ऊणिआ खलु कोडी मग्गिल्लिआ होइ ॥
चउपन्ना अयराणं सिज्जंसाओ जिनो उ वसुपुज्जो ।
वसुपुज्जासो विमलो तीसहि अयरेहि उप्पन्नो ॥
विमलजिना उप्पन्नो नवहिं अयरेहिनंतइजिनोऽवि ।
चउसागरनामेहिं अनंतईतो जिनो धम्मो ॥
धम्मजिनाओ संतीतिहि उ तिचउभागपलिअऊणेहिं ।
अयरेहि समुप्पन्नो पलिअद्धेणं तु कुंथुजिनो ॥
पलिअचब्भाएणं कोडिसहस्सूणएण वासाणं ।
कुंथूओ अरनामो कोडिसहस्सेण मल्लिजिनो ॥
मल्लिजिनाओ मुनिसुव्वओ य चउपन्नावासलक्खेहिं ।
सुव्वयनामाओ नमी लक्खेहिं छहि उप्पन्नो ॥
पंचहिं लक्खेहिं तओ अरिट्ठनेमी जिनो समुप्पन्नो ।
तेसीइसहस्सेहिं सएहि अद्धट्ठमेहिं च ॥
नेमीओ पासजिनो पासजिनाओ य होइ वीरजिनो ।
अड्डारसज्जसएहिं गएहिं चरमो समुप्पन्नो ॥

वृ- इयमत्र स्थापना–उसभाओ कोडिलक्ख ५० अजिओ, कोडिलक्ख ३० संभवो, कोडिलक्ख १० अभिनंदनो, कोडिलक्ख ५ सुमती, कोडीओ नउईओ सहस्सेहिं ९० पउमप्पहो, कोडीनवसहस्सेहिं ९ सुपासो, कोडीनवसएहिं ९ चंदप्पभो, कोडीओ नउइओ ९० पुप्फदंतो, कोडीओ नवहि उ ९ सीअलो, कोडीऊणा १०० सा० ६६२६००० वरिसाइं सेज्जंसो, सागरोपमा ५८ वासुपुज्जो, तीससरागराइं ३० विमलो, सागरोवमाई ९ अनंतो, सागरोवमाइं ४ धम्मो, सागरोवमाइं ३ ऊणाइं पलिओवमचउभागेहिं तिहिं संती, पलिअद्धं २ कुंथू, पलियंचउब्भाओ ऊणओ वासकोडीसहस्सेण १ अरो, वासकोडीसहस्सं १ मल्ली, वरिसलक्खचउपन्ना मुनिसुव्वओ, वरिसलक्ख ६ नमी, वरिसलक्ख ५ अरिट्ठनेमी, वरिससहस्सा ८३७५० पासो, वाससयाइं २५० वद्धमाणो । जिनंतराइं ॥

साम्प्रतं चक्रवर्त्तिनोऽधिकृत्य जिनान्तराण्येव प्रतिपाद्यन्ते–तत्र–

नि. (४१६) उसभे भरहो अजिए सगरो मघवं सणंकुमारो अ ।
धम्मस्स य संतिस्स य जिनंतरे चक्कवट्टिदुगं ॥

नि. (४१७) संती कुंथू अ अरो अरहंता चेव चक्कवट्टी अ ।
अरमल्लीअंतरे उ हवइ सुभूमो अ कोरव्वो ॥

नि. (४१८) मुनिसुव्वए नमिंमि अ हुंति दुवे पउमनाभहरिसेना ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमिनेमिसु जयनामो अरिट्ठमासंदरे बंभो ॥

वृ- इह च असंमोहार्थं सर्वेषामेव जिनचक्रवर्त्तिवासुदेवानां यो यस्मिन् जिनकालेऽन्तरे वा चक्रवर्त्ती वा वासुदेवो वा भविष्यति बभूव वा तस्य अनन्तरव्यावर्णितप्रमाणायुः समन्वितस्य सुखपरिज्ञानार्थमयं प्रतिपादनायापायः–

बत्तीसं घरयाइं काऊं तिरियायताहिं रेहाहिं ।
उड्डाययाहिं काउं पंच घराइं तओ पढमे ॥
पन्नरस जिन निरंतर सुण्णदुगं ति जिन सुण्णतियगं च ।
दो जिन सुण्ण जिणिंदो सुण्ण जिणो सुण्ण दोन्नि जिना ॥

बितियपंतिठवणा –

दो चक्कि सुण्ण तेरस पण चक्किसुण्ण चक्कि दो सुण्णा ।
चक्कि सुण्ण दु चक्की सुण्णं चक्की दु सुण्णं च ॥

ततियपंतिठवणा–

दस सुण्ण पंच केसव पण सुण्ण केसि सुण्ण केसी य ।
दो सुण्ण केसवोऽवि य सुण्णदुगं केसव ति सुण्ण ॥

प्रमाणान्यायूंषि चामीषां प्रतिपादितान्येव । तानि पुनर्यथाक्रमं ऊर्ध्वायतरेखाभिरधोधोगृहद्वये स्थापनीयानीति ।

उक्तसम्बन्धगाथात्रयगमनिका–ऋषभे तीर्थकरे भरतश्चक्रवर्त्ती, तथा अजिते तीर्थकरे सगरश्चक्रवर्त्ती भविष्यति एवं तीर्थकरोक्तानुवादः, सर्वत्र भविष्यत्कालानुरूपः क्रियाध्याहारः कार्यः, त्रिकालसूत्रप्रदर्शनार्थो वा भूतेनापि न दुष्यति, तथा चावोचत्–'मघवा सणंकुमारो सणंकुमारं गया कप्पं' इत्यादि । एवं सर्वत्र योज्यमिति । मघवान् सनत्कुमारश्च एतच्चक्रवर्त्तिद्वयं धर्मस्य शान्तेश्च अनयोरन्तरं तस्मिन् जिनान्तरे चक्रवर्त्तिद्वयं भविष्यत्यभवद्वेति गाथार्थः ॥ द्वितीय-गाथागमनिका–शान्तिः कुन्थुश्चारः, एते त्रयोऽप्यशोकाद्यष्टमहाप्रातिहार्यादिरूपां पूजामर्हन्तीत्यर्हन्तश्चैव चक्रवर्त्तिनश्च, तथा अरमल्ल्यन्तरे तु भवति सुभूमश्च कौरव्यः, तुशब्दोऽन्तरविशेषणे, नान्तरमात्रे, किन्तु पुरुषपुण्डरीकदत्तवासुदेवद्वयमध्यइति गाथार्थः ॥ तृतीय-गाथागमनिका–मुनिसुव्रते तीर्थकरे नमौ च भवतः द्वौ, कौ द्वो ?, पद्मनाभहरिषेणौ 'नमिनेमिसुजयनामो अरिट्ठपासंतरे बंभो' त्ति नमिश्च नेमी च नमिनेमिनौ, अन्तरग्रहण-मभिसंबध्यते, ततश्च नमिनेम्यन्तरे जयनामाऽभवत्, अरिष्टग्रहणाद् अरिष्ठनेमिः, पार्श्वेति पार्श्वस्वामी, अनयोरन्तरे ब्रह्मदत्तो भविष्यत्यभवद्वेति गाथार्थः ॥

इदानीं वासुदेवो यो यत्तीर्थकरकालेऽन्तरे वा खल्वासीत् असौ प्रतिपाद्यते–

नि. (४१९) पंचऽरहंते वंदंति केसवा पंच आनुपुव्वीए ।
सिज्जंस तिविट्ठाई धम्म पुरिससीहपेरंता ॥

वृ- गमनिका–पञ्च अर्हतः वन्दन्ते केशवाः, एतदुक्तं भवति–पञ्च केशवा अर्हतो वन्दन्ते, वन्दन्त इत्येतेषां सम्यक्त्वख्यापनार्थमिति । कियन्तोऽर्हन्तः ? किमेकः द्वौ त्रयो वा ?, नेत्याह– 'पंच' पञ्चेति पञ्चैव, किं यथाकथञ्चित् ? नेत्याह–'आनुपूर्व्या' परिपाठ्या 'सिज्जंस तिविट्ठाई

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धम्म पुरिससीहपेरंता' श्रेयांसादीन् त्रिपृष्ठादयः धर्मपर्यन्तान् पुरुषसिंहपर्यन्ता इति, वन्दन्त इति शास्त्रकारवचनत्वात् वर्त्तमाननिर्देशः, पाठान्तरं वा 'पंचऽरिहंते वंदिंसु केसवा' इत्यादि गाथार्थः ॥

नि. (४२०) अरमल्लिअंतरे दुन्नि केसवा पुरिसपुंडरिअदत्ता ।
मुनिसुव्वयनमिअंतरि नारायण कण्हु नेमिंमि ॥

वृ- अरश्च मल्लिश्च अरमल्ली तयोरन्तम्-अपान्तरालं तस्मिन्, द्वौ केशवौ भविष्यतः, कौ द्वौ इत्याह-पुरुषपुण्डरीकदत्तौ 'मुनिसुव्वणमिअंतरे णारायणो' त्ति मुनिसुव्रतश्च नमिश्च मुनिसुव्रतनमी तयोरन्तरं मुनिसुव्रतनम्यन्तरं तस्मिन् नारायणो नाम वासुदेवो भविष्यति अभवद्वा। तथा 'कण्हो य नेमिंमि' त्ति कृष्णाभिधानश्चरमो वासुदेवो नेमितीर्थकरे भविष्यति बभूव वेति गाथार्थः ॥ एवं तावत् चक्रवर्त्तिनो वासुदेवाश्च यो यज्जिनकाले अन्तरे वा स उक्तः, साम्प्रतं चक्रवर्त्तिवासुदेवान्तराणि प्रतिपादयन्नाह-

नि. (४२१) चक्किदुगं हरिपणगं पणगं चक्कीण केसवो चक्की ।
केसव चक्की केसव दु चक्की केसी 'चक्की अ ॥

वृ- प्रथममुक्तलक्षणकाले चक्रवत्तिद्वयं भविष्यति अभवद्वा, ततस्त्रिपृष्ठादिहरिपञ्चकं, पुनः पञ्चकं मघवादीनां चक्रवत्तिनां, पुनः पुरुषपुण्डरीकः केशवः, ततः सुभूमाभिधानश्चक्रवर्त्ती, पुनर्दत्ताभिधानः केशवः, पुनः पद्मनामा चक्रवर्त्येव, पुनर्नारायणाभिधानः, केशवः, पुनः हरिषेणजयनामानौ द्वौ चक्रवत्तिनौ, पुनः कृष्णनामा केशवः, पुनर्बह्मदत्ताभिधानश्चक्रवर्तीति, क्रियायोगः सर्वत्र प्रथमपदवद् द्रष्टव्य इति गाथार्थः ॥ उक्तमानुषङ्गिकं, प्रकृतं प्रस्तुमः-तत्र 'तित्थगरो को इहं भरहे !' तद्व्याचिख्यासयाऽऽह-मूलभाष्यकारः-

[भा.४४] अह भणइ नरवरिंदो ताय ! इमीसित्तिआइ परिसाए ।
अन्नोऽवि कोऽवि होही भरहे वाहंमि तित्थयरो ? ॥

वृ- गमनिका-अत्रान्तरे अथ भणति नरवरेन्द्रः-तात ! अस्या एतावत्याः परिषदः अन्योऽपि कश्चिद् भविष्यति तीर्थकरोऽस्मिन् भारते वर्षे ?, भावार्थस्तु सुगम एवेति गाथार्थः ॥

नि. (४२२) तत्थ मरीईनामा आइपरिव्वायगो उसभनत्ता ।
सज्झायझाणजुत्तो एगंते झायइ महप्पा ॥

वृ- 'तत्र' भगवतः प्रत्यासन्ने भूभागे मरीचिनामा आदौ परिव्राजक आदिपरिव्राजकः प्रवर्त्तकत्वात्, ऋषभ नप्ता-पौत्रक इत्यर्थः । स्वाध्याय एव ध्यानं स्वाध्यायध्यानं तेन युक्तः, एकान्ते ध्यायति महात्मेति गाथार्थः ॥

नि. (४२३) तं दाएइ जिणिंदो एव नरिंदेन पुच्छिओ संतो ।
धम्मवरचक्कवट्टी अपच्छिमो वीरनामुत्ति ॥

वृ- गमनिका-भरतपृष्टो भगवान् 'तं' मरीचिं दर्शयति जिनेन्द्रः, एवं नरेन्द्रेण पृष्टः सन् धर्मवरचक्रवर्ती अपश्चिमो वीरनामा भविष्यति इति गाथार्थः ॥

नि. (४२४) आइगरु दसाराणं तिविट्ठू नामेण पोअणाहिवई ।
पिअमित्तचक्कवट्टी मूआइ विदेहवासंमि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- गमनिका—आदिकरो दशाराणां त्रिपृष्ठनामा पोतना नाम नगरी तस्या अधिपतिः भविष्यतीति क्रिया। तथा प्रियमित्रनामा चक्रवर्ती मूकायां नगर्यां 'विदेहवासंमि' त्ति महाविदेहे भविष्यतीति गाथार्थः ॥

नि. (४२५) तं वयणं सोऊणं राया अंचियतणूरुहसरीरो।
अभिवंदिऊण पिअरं मरीइमभिवंदओ जाइ ॥

वृ- गमनिका—'तद्वचनं' तीर्थकरवदनविनिर्गतं श्रुत्वा राजा अञ्चितानि तनूरुहाणि-रोमाणि शरीरे यस्य स तथाविधः अभिवन्द्य 'पितरं' तीर्थकरं मरीचिं अभिवन्दिष्यत इत्यभिवन्दको याति। पाठान्तरं वा 'मरीइमभिवंदिउं जाइत्ति' मरीचिं याति किमर्थम् ? अभिवन्दितुं-अभिवन्दनायेत्यर्थः, यातीति वर्त्तमानकालनिर्देशः त्रिकालगोचरसूत्रप्रदर्शनार्थ इति गाथार्थः ॥

नि. (४२६) सो विनएण उवगओ काऊण पयाहिणं च तिक्खुत्तो।
वंदइ अभित्थुणंतो इमाहि महुराहि वग्गूहिं ॥

वृ- गमनिका—'सः' भरतः विनयेन—करणभूतेन मरीचिसकाशमुपागतः सन् कृत्वा प्रदक्षिणं च 'तिक्खुत्तो' त्ति त्रिकृत्वः तिस्रो वारा इत्यर्थः, वन्दते अभिष्टुवन् एताभिः 'मधुराभिः' वल्गुभिः वाग्भिरिति गाथार्थः ॥

नि. (४२७) लाहा हु ते सुलद्धा जंसि तुमं धम्मचक्कवट्टीणं।
होहिसि दसचउदसमो अपच्छिमो वीरनामुत्ति ॥

वृ- 'लाभाः' अभ्युदयप्राप्तिविशेषाः, हुकारो निपातः, स चैवकारार्थः, तस्य च व्यवहितः संबन्धः, 'ते' तव सुलब्धा एव, यस्मात् त्वं धर्मचक्रवर्त्तिनां भविष्यसि 'दशचतुर्दशमः' चतुर्विंशतितम इत्यर्थः, अपश्चिमो वीरनामेति गाथार्थः ॥ तथा— आइगरु० पूर्ववत् ज्ञेया। एकान्तरसम्यग्दर्शनानुरञ्जितहृदयो भावितीर्थकरभक्त्या च तमभिवन्दनायोद्यतो भरत एवाह—

नि. (४२८) नावि अ पारिव्वज्जं वंदामि अहं इमं व ते जम्मं।
जं होहिसि तित्थयरो अपच्छिमो तेन वंदामि ॥

वृ- गमनिका—नापि च परिव्राजामिदं पारिव्राजं वन्दामि अहं इदं च ते जन्म, किन्तु यद्भविष्यसि तीर्थकरः अपश्चिमः तेन वन्दे इति गाथार्थः ॥ तथा—

नि. (४२९) एवण्हं थोऊणं काऊण पयाहिणं च तिक्खुत्तो।
आपुच्छिऊण पिअरं विणीअणगरिं अह पविट्ठो ॥

वृ- गमनिका—एवं स्तुत्वा 'ण्हमि' ति निपातः पूरणार्थो वर्त्तते, कृत्वा प्रदक्षिणां च त्रिकृत्वः आपृच्छ्य 'पितरं' ऋषभदेवं 'विनीतनगरी' अयोध्यां 'अथ' अनन्तरं प्रविष्टो भरत इति गाथार्थः ॥ अत्रान्तरे—

नि. (४३०) तव्वयणं सोऊणं तिवइं आप्फोडिऊण तिक्खुत्तो।
अब्भहिअजायहरिसो तत्थ मरीई इमं भणइ ॥

वृ- गमनिका—तस्य-भरतस्य वचनं तद्वचनं श्रुत्वा तत्र मरीचिः इदं भणतीति योगः, कथमित्यत आह—त्रिपदीं दत्त्वा, रङ्गमध्यागतमल्लवत्, तथा आस्फोट्य त्रिकृत्वः—तिस्रो वारा इत्यर्थः, किंविशिष्टः सन् इत्यत आह—अभ्यधिको जातो हर्षो यस्येति समासः, तत्र स्थाने

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मरीचिः 'इदं' वक्ष्यमाणलक्षणं भणति, वर्त्तमाननिर्देशप्रयोजनं प्राग्वदिति गाथार्थः ॥

नि. (४३१) जइ वासुदेवु पढमो मूआइ विदेहि चक्कवट्टित्तं ।
चरमो तित्थयराणं होउ अलं इत्तिअं मज्झ ॥

वृ- गमनिका—यदि वासुदेवः प्रथमोऽहं मूकायां विदेहे चक्रवर्त्तित्वं प्राप्स्यामि, तथा 'चरमः' पश्चिमः तीर्थकराणां भविष्यमि, एवं तर्हि भवतु एतावन्मम, एतावतैव कृतार्थ इत्यर्थः, 'अलं' पर्याप्तं अन्येनेति । पाठान्तरं वा 'अहो मए एत्तिअं लद्धं' ति गाथार्थः ॥

नि. (४३२) अहयं च दसाराणं पिआ य मे चक्कवट्टिवंसस्स ।
अज्जो तित्थयराणं, अहो कुलं उत्तमं मज्झ ॥

वृ- गमनिका—अहमेव, चशब्दस्यैवकारार्थत्वात्, किम् ?, दशाराणां प्रथमो भविष्यामीति वाक्यशेषः, पिता च 'मे' मम चक्रवर्तिवंशस्य प्रथम इति क्रियाऽध्याहारः । तथ 'आर्यकः' पितामहः स तीर्थकराणां प्रथमः, यत एवं अतः 'अहो' विस्मये कुलमुत्तमं ममेति गाथार्थः ॥

पृच्छाद्वारं गतम्, इदानीं निर्वाणद्वारावयवार्थाभिधित्सयाऽऽह—

नि. (४३३) अह भगवं भवमहणो पुव्वाणमनूनगं सयसहस्सं ।
अनुपुव्वि विहरिऊणं पत्तो अट्ठावयं सेलं ॥

वृ- गमनिका—अथ भगवान् भवमथनः पूर्वाणामन्यूनं शतसहस्त्रं आनुपूर्व्या विहृत्य प्राप्तोऽष्टापदं शैलं, भावार्थः सुगम एवेति गाथार्थः ॥

नि. (४३४) अट्ठावयंमि सेले चउदसभत्तेन सो महरिसीणं ।
दसहि सहस्सेहि समं निव्वाणमनुत्तरं पत्तो ।

वृ- गमनिका—अष्टापदे शैले चतुर्दशभक्तेन स महीर्षीणा दशभिः सहस्त्रैः समं निर्वाणमनुत्तरं प्राप्तः । अस्या अपि भावार्थः सुगम एव, नवरं चतुदर्शभक्तं-षड्रात्रोपवासः । भगवन्तं चाष्टापदप्राप्तं अपवर्गजिगमिषुं श्रुत्वा भरतो दुःखसंतप्तमानसः पद्भ्यामेव अष्टापदं ययौ, देवा अपि भगवन्तं मोक्षजिगमिषुं ज्ञात्वा अष्टापदं शैलं दिव्यविमानारूढाः खलु आगतवन्तः, उक्तं च 'भगवति मोक्षगमनायोद्यते –

जाव य देवावासो जाव य अट्ठावओ नगवरिंदो ।
देवेहिं य देवीहि य अविरहियं संचरंतेहिं ॥

तत्र भगवान् त्रिदशनरेन्द्रैः स्तूयमानो मोक्षं गत इति गाथार्थः ॥ साम्प्रतं निर्वाणगमनविधिप्रतिपादनाय एनां द्वारगाथामाह—

नि. (४३५) निव्वाणं १ चिहगागिई जिनस्स इक्खाग सेसयाणं च २ ।
सकहा ३ थूभ जिनहरे ४ जायग ५ तेनाहिअग्गित्ति ६ ॥

वृ- 'निर्वाणमिति' भगवान् दशसहस्त्रपरिवारो निर्वाणं प्राप्तः, अत्रान्तरे च देवाः सर्व एवाष्टापदमागताः । 'चितिकाकृतिरिति' ते तिस्त्रः चिता वृत्तत्र्यस्त्रचतुरस्त्राकृतीः कृतवन्तः इति, एकां पूर्वेण अपरां दक्षिणेन तृतीयामपरेणेति, तत्र पूर्वा तीर्थकृतः दक्षिणा इक्ष्वाकूणां अपरा शेषाणामिति, ततः अग्निकुमाराः वदनैः खलु अग्नि प्रक्षिप्तवन्तः, तत एव निबन्धनाल्लोके 'अग्निमुख वै देवाः' इति प्रसिद्धं, वायुकुमारास्तु वातं मुक्तवन्त इति, मांसशोणिते च ध्यामिते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सति मेधकुमाराः सुरभिणा क्षीरोदजलेन निर्वापितवन्तः । 'सकथेति' सकथा-हनुमोच्यते, तत्र दक्षिणा हनुमां भगवतः संबन्धिनीं शक्रो जग्राह वामामीशानः आधस्त्यदक्षिणां पुनश्चमरः आधस्त्योत्तरां तु बलिः, अवशेषास्तु त्रिदशाः शेषाङ्गानि गृहीतवन्तः, नरेश्वरादयस्तु भस्म गृहीतवन्तः, शेषलोकास्तु तद्भस्मना पुण्डकाणि चक्रुः, तव एव च प्रसिद्धिमुपागतानि । 'स्तूपा जिनगृहं चेति' भरतो भगवन्तमुद्दिश्य वर्धकीरत्नेन योजनायामं त्रिगव्यूतोच्छ्रितं सिंहनिषद्यायतनं कारितवान्, निजवर्णप्राणयुक्ताः चतुर्विंशतिं जीवाभिगमोक्तपरिवारयुक्ताः तीर्थकरप्रतिमाः तथा भ्रातृशतप्रतिमा आत्मप्रतिमां च स्तूपशतं च, मा कश्चिद् आक्रमणं करिष्यतीति, तत्रैकां भगवतः शेषान् एकोनशतस्य भ्रातृणामिति, तथा लोहमयान् यन्त्रपुरुषान् तद्द्वारपालांश्चकार; दण्डरत्नेन अष्टापदं च सर्वतश्छिन्नवान्, योजने योजने अष्टौ पदानि च कृतवान्, सगरसुतैस्तु स्ववंशानुरागाद्यथा परिखां कृत्वा गङ्गाऽवतारिता तथा ग्रन्थान्तरतो विज्ञेयमिति । 'याचकास्तेनाहिताग्न यः' इत्यस्य व्याख्या-देवैर्भगवत्सकथादौ गृहीते सति श्रावका देवान् अतिशयाभक्त्या याचितवन्तः, देवा अपि तेषां प्रचरत्वात् महता यत्नेन याचनाभिद्रुता आहुः-अहो याचका अहो याचका इति, तत एव हि याचका रूढाः, ततोऽग्नि गृहीत्वा स्वगृहेषु स्थापितवन्तः, तेन कारणेन आहिताग्नय इति तत एव च प्रसिद्धाः, तेषां चाग्नीनां परस्परतः कुण्डसंक्रान्तवर्य विधिः-भगवत्ः, संबन्धिभूतः सर्वकुण्डेषु संचरति, इक्ष्वाकुकुण्डाग्निस्तु शेषकुण्डाग्निषु संचरति, न भगवत्कुडण्डाग्नौ इति, शेषानगारकुण्डाग्निस्तु नान्यत्र संक्रमत इति गाथार्थः ॥ साम्प्रतमप्रतिहतद्वारगाथाया द्वारद्वयव्याचिख्यासया मूलभाष्यकार आह–

[भा.४५] थूभसय भाउगाण चउवीसं चेव जिणहरे कासी ।
सव्वजिणाणं पडिमा वण्णपमाणेहि निअएहिं ॥

वृ- गमनिका–स्तूपशतं भाहूणां भरतः कारितवान् इति, तथा चतुविशतिं चैव जिनगृहे-जिनायतनानि 'कासीति' कृतवान्, का इत्याह–सर्वजिनानां प्रतिमा वर्णप्रमाणैः 'निजैः' आत्मीयैरिति गाथार्थः ॥ साम्प्रतं भरतव्यक्ततानिबद्धां संग्रहगाथां प्रतिपादयन्नाह–

नि. (४३६) आयंसघरपवेसो भरहे पडणं च अंगुलीअस्स ।
सेसाणं उम्मुअणं संवेगो नाण दिक्खा य ॥

वृ- अस्या भावार्थः कथानकादवसेयः, तच्चेदम्-भगवतो निव्वाणं गयस्स आययणं काराविय भरहो अउज्झमागओ, कालेन य अप्पसोगो जाओ, ताहे पुनरवि भोगे भुंजिउं पवत्तो, एवं तस्स पंच पुव्वसयसहस्सा अइक्कंता भोगे भुंजंतस्स, अन्नया कयाइ सव्वालंकारभूसिओ आयंसघ-रमतिगतो, तत्थ य सव्वंगिओ पुरिसो दीसइ, तस्स एवं पेच्छमाणस्स अंगुलिज्जयं पडियं, तं च तेन न नायं पडियं, एवं तस्स पलोयंतस्स जाहे सा अंगुली दिट्ठिमि पडिया, ताहे असोभंतिआ दिट्ठा, ततो कडगंपि अवनेइ, एवमेक्केक्कमवणेतेण सव्वमाभरणमवणीअं, ताहे अप्पाण उच्चियपउमं व पउमसरं असोभंतं पेच्छिय संवेगावण्णो परिचिंतिउं पयत्तो–आगंतुगदव्वेहिं मे सरीरगंति न सहावसुंदरं, एवं चिंतंतस्स अपुव्वकरणज्झाणमुवट्ठिअस्स केवलनाणं समुप्पन्नंति । सक्को देवराया आगओ भणति-दव्वलिंगं पडिवज्जह, जाहे निक्खमणमहिमं करेमि, ततो तेन पंचमुट्ठिओ लोओ कओ, देवयाए रओहरणपडिग्गहमादि उवगरणमुवनीअं, दसहिं रायसहस्सेहिं समं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पव्वइओ। सेसा नव चक्किणो सहस्सपरिवारा निक्खंता। सक्केणं वंदिओ, ताहे भगवं पुव्वसयहस्सं केवलिपरियागं पाउणित्ता परिनिव्वुडो य। आइच्चजसो सक्केणाभिसित्तो, एवमट्ठपुरिसजुगाणि अभिसित्ताणि। उक्तो गाथार्थः, साम्प्रतमक्षरगमनिका—आदर्शकगृहे प्रवेशः, कस्य? 'भरहेत्ति' भरतस्य प्राकृतशैल्या षष्ठ्यर्थे सप्तमी, तथा पतनं चाङ्गलीयस्य बभूव, शेषाणां कटकादीनां तून्मोचनं अनुष्ठितं, ततः संवेगः संजातः, तदुत्तरकालं ज्ञानमुत्पन्नमिति, दीक्षा च तेन गृहीता, चशब्दान्निर्वृत्तश्चेत्यक्षरार्थः ॥ उक्तमानुषङ्गिकं इदानीं प्रकृतां मरीचिवक्तव्यतां पृच्छतां कथयतीत्यादिना प्रतिपादयति – तत्र–

नि. (४३७) पुच्छंताण कहेइ उवट्ठिए देइ साहुणो सीसे।
गेलन्नि अपडिअरणं कविला इत्थंपि इहयंपि ॥

वृ- गमनिका—पृच्छतां कथयति, उपस्थितान् ददाति साधुभ्यः शिष्यान्, ग्लानत्वे अप्रतिजागरणं कपिल! अत्रापि इहापि। भावार्थः-स हि प्राग्व्यावर्णितस्वरूपो मरीचिः भगवति निर्वृत्ते साधुभिः सह विहरन् पृच्छतां लोकानां कथयति धर्मं जिनप्रणीतमेव, धर्माक्षिप्तांश्च प्राणिन उपस्थितान् ददाति साधुभ्यः शिष्यानिति। अन्यदा संग्लानः संवृत्तः, साधवोऽप्यसंयतत्वान्न प्रतिजाग्रति, स चिन्तयति-निष्ठितार्थाः खलु एते, नासंयतस्य कुर्वन्ति, नापि ममैतान् कारयितुं युज्यते, तस्मात् कञ्चन् प्रतिजागरकं दीक्षयामीति, अपगतरोगस्य च कपिलो नाम राजपुत्रो धर्मशुश्रूषया तदन्तिकमागत इति, कथिते साधूधर्मे स आह-यद्ययं मार्गः किमिति भवता एतदङ्गीकृतम्?, मरीचिराह—पापोऽहं, 'लोएंदिये' त्यादिविभाषा पूर्ववत्, कपिलोऽपि कर्मोदयात् साधुधर्मानभिमुखः खल्वाह—तथापि किं भवद्दर्शने नास्त्येव धर्म इति, मरीचिरपि-प्रचुरकर्मा खल्वयं न तीर्थकरोक्तं प्रतिपद्यते, वरं मे सहायः संवृत्त इति संचिन्त्याह—'कविला इत्थंपित्ति' अपिशब्दस्यैवकारार्थत्वात् निरूपचरितः खल्वत्रैव साधूमार्गे 'इहयंपित्ति' स्वल्पस्तु अत्रापि विद्यते इति गाथार्थः ॥ स ह्येयमाकर्ण्य तत्सकाश एव प्रव्रजितः, मरीचिनाऽप्यनेन दुर्वचनेन संसारोऽभिनिर्वर्त्तितः, त्रिपदीकाले च नीचैर्गोत्रं कर्म बद्धमिति ॥

अमुमेवार्थं प्रतिपादयन्नाह–

नि. (४३८) दुब्भासिएण इक्केण मरीई दुक्खसायरं पत्तो।
भमिओ कोडाकोडिं सागरसरिनामधेज्जाणं ॥

वृ- गमनिका—'दुर्भाषितेनैकेन' उक्तलक्षणेन मरीचिर्दुःखसागरं प्राप्तः भ्रान्तः कोटीनां कोटी कोटीकोटी तां, केषामित्याह—'सागरसरिनामधेज्जाणंति' सागरसदृशनामधेयानां, सागरोपमाणामिति गाथार्थः।

नि. (४३९) तम्मूलं संसारो नीआगोत्तं च कासि तिवइंमि।
अपडिक्कंतो बंभे कविलो अंतद्धिओ कहए ॥

वृ- द्वितीयगाथागमनिका—'तन्मूलं' दुर्भाषितमूलं संसारः संजातः, तथा स एव नीचैर्गोत्रं च कृतवान्-निष्पादितवान् 'त्रिपद्यां' प्राग्व्यावर्णितस्वरूपायामिति। 'अपडिक्कंतो बंभेत्ति' स मरीचिः चतुरशीतिपूर्वशतसहस्राणि सर्वायुष्कमनुपाल्य तस्मात् दुर्भाषितात् गर्वाच्च 'अप्रतिक्रान्तः' अनिवृत्तः ब्रह्मलोगे दशसागरोपमस्थितिः देवः संजात इति। कपिलोऽपि ग्रन्थार्थपरिज्ञान-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शून्य एव तद्दर्शितक्रियारतो विजहार, आसुरिनामा च शिष्योऽनेन प्रव्राजित इति, तस्य स्वाचारमात्रं दिदेश, एवमन्यानपि शिष्यान् स गृहीत्वा शिष्यप्रवचनानुरागतत्परो मृत्वा ब्रह्मलोक एवोत्पन्नः, स ह्युत्पत्तिसमनन्तरमेव अवधिं प्रयुक्तवान्-किं मया हुतं वा ? इष्टं वा ? दानं वा दत्तं ? येनैषा दिव्या देवर्द्धिः प्राप्तेति, स्वं पूर्वभवं विज्ञाय चिन्तयामास-ममहि शिष्यो न किञ्चिद्वेत्ति, तत्तस्य उपदिशामि तत्त्वमिति, तस्मै आकाशस्थपञ्चवर्णमण्डलकस्थः तत्त्वं जगाद, आह च–'कमिलो अंतद्धिओ कहए' कपिलः अन्तर्हितः कथितवान्, किम् ?-अव्यक्तात् व्यक्तं प्रभवति, ततः षष्टितन्त्रं जातं, तथा चाहुस्तन्मतानुसारिणः–

"प्रकृतेर्महांस्ततोऽहङ्कार स्तस्माद्गणश्च षोडशकः ।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि ॥"

इत्यादि, अलं विस्तरेण, प्रकृतं प्रस्तुमः इति गाथार्थः ॥

नि. (४४०) इक्खागेसु मरीई चउरासीई अ बंभलोगंमि ।
कोसिउ कुल्लागंमी (गेसुं) असीइमाउं च संसारे ॥

वृ- गमनिका–इक्ष्वाकुषु मरीचिरासीत्, चतुरशीतिं च पूर्वशतसहस्त्राण्यायुष्कं पालयित्वा 'बंभलोयंमि' ब्रह्मलोके कल्पे देवः संवृत्तः, ततश्चायुष्कक्षयाच्च्युत्वा 'कोसिओ कुल्लाएसुन्ति' कोल्लाकसंनिवेशे कौशिको नाम ब्राह्मणो बभूव, 'असीइमाउं च संसारेत्ति' स च तत्राशीतिं पूर्वशतसहस्त्राण्यायुष्कमनुपाल्य 'संसारेत्ति' तिर्यग्नरनारकामरभवानुभूतिलक्षणे पर्यटित इति गाथार्थः ॥ संसारे कियन्तमपि कालमटित्वा स्थूणायां नगर्यां जात इति, अमुमेवार्थं 'थूणाई' त्यादिना प्रतिपादयति–

नि. (४४१) थूणाइ पूसमित्तो आउं बावत्तरिं च सोहम्मे ।
चेइअ अग्गिज्जोओ चोवट्ठीसाणकप्पंमि ॥

वृ- स्थूणायां नगर्यां पुष्पमित्रो नाम ब्राह्मणः संजातः 'आउं बावत्तरिं सोहम्मेत्ति' तस्यायुष्कं द्विसप्ततिः पूर्वशतसहस्त्राण्यासीत्, परिव्राजकदर्शने च प्रव्रज्यां गृहीत्वा तां पालयित्वा कियन्तमपि कालं स्थित्वा सौधर्मे कल्पे अजघन्योत्कृष्टस्थितिः समुत्पन्न इति । 'चेइअ अग्गिज्जोओ चोवट्ठीसाणकप्पंमीति' सौधर्माच्च्युतः चैत्यसन्निवेशे अग्निद्योतो ब्राह्मणः संजातः, तत्र चतुःषष्टि-पूर्वशतसहस्त्राण्यायुष्कमासीत्, परिव्राट् च संजातो, मृत्वा चेशाने देवोऽजघन्योत्कृष्टस्थितिः संवृत्त इति गाथार्थः ॥

नि. (४४२) मंदिरे अग्गिमूई छप्पन्ना उ सणंकुमारंमि ।
सेअवि भारद्दाओ चोआलीसं च माहिंदे ॥

वृ- गमनिका–ईशानाच्च्युतो 'मन्दिरेत्ति' मन्दिरसन्निवेशे अग्निभूतिनामा ब्राह्मणो बभूव, तत्र षट्पञ्चाशत् पूर्वशतसहस्त्राणि जीवितमासीत्, परिव्राजकश्च बभूव, मृत्वा 'सणंकुमारंमीति' सनत्कुमारकल्पे विमध्यमस्थितिर्देवः समुत्पन्न इति । 'सेअवि भारद्दाए चोआलीसं च माहिंदेत्ति' सनत्कुमारात् च्युतः श्वेतव्यां नगर्यां भारद्वाजो नाम ब्राह्मण उत्पन्न इति, तत्र च चतुश्चत्वारिंशत् पूर्वशतसहस्त्राणि जीवितमासीत्, परिव्राजकश्चाभवत्, मृत्वा च माहेन्द्रे कल्पेऽजघन्योत्कृष्ट-स्थितिर्देवो बभूवेति गाथार्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (४४३) संसरिअ थावरो रायगिहे चउतीस बंभलोगंमि ।
छस्सुवि पारिव्वज्जं भमिओ तत्तो अ संसारे ॥

वृ- माहेन्द्रात् च्युत्वा संसृत्य कियन्तमपि कालं संसारे ततः स्थावरो नाम ब्राह्मणो राजगृहे उत्पन्न इति, तत्र च चतुस्त्रिंशत् पूर्वशतसहस्त्राण्यायुष्कं परिव्राजकश्चासीत्, मृत्वा च ब्रह्मलोकेऽजघन्योत्कृष्टस्थितिर्देवः संजातः, एवं षट्स्वपि वारासु परिव्राजकत्वमृधिकृत्य दिवमाप्तवान्। 'भमिओ तत्तो अ संसारे' ततो ब्रह्मलोकाच्च्युत्वा भ्रान्तः संसारे प्रभूतं कालमिति गाथार्थः ॥

नि. (४४४) रायगिह विस्सनंदी विसाहभूई अ तस्स जुवराया ।
जुवरन्नो विस्सभूई विसाहनंदी अ इअरस्स ।

नि. (४४५) रायगिह विस्सपूई विसाहभूइसुओ खत्तिए कोडी ।
वाससहस्सं दिक्खा संभूअजइस्स पासंमि ॥

वृ- भावार्थः खल्वस्य गाथाद्वयस्य कथानकादवसेयः, तच्चेदम्-रायगिहे नयरे विस्सनंदी राया, तस्स भाया विसाहभूई, सो य जुवराया, तस्स जुवरण्णो धारिणीए देवीए विस्सभूई नाम पुत्तो जाओ, रन्नोऽवि पुत्तो विसाहनंदित्ति, तत्थ विस्सभूइस्स वासकोडी आऊ, तत्थ पुप्फकरंडकं नाम उज्जानं, तत्थ सो विस्सभूती अंतेउरवरगतो सच्छंदहसुहं पवियरइ, ततो जा सा विसाहनंदिस्स माया तीसे दासचेडीओ पुप्फकरंडए उज्जाने पत्ताणि पुप्फाणि अ आनेंति, पिच्छंति अ विस्सभूतिं कीडंतं, तासिं अमरिसो जाओ, ताहे साहिंति जहा-एवं कुमारो ललइ, किं अम्ह रज्जेण वा बलेण वा ? जइ विसाहनंदी नं भुंजइ एवंविहे भोए, अम्ह नामं चेव, रज्जं पुन जुवरन्नो पुत्तस्स जस्सेरिसं ललिअं, सा तासिं अंतिए सोउं देवी ईसाए कोवघरं पविट्ठा, जइ ताव रायाणए जीवंतए एसा अवत्था, जाहे राया मओ भविस्सइ ताहे एत्थ अम्हे को गणिहित्ति ?, राया गमेइ, सा पसायं न गिण्हइ, किं मे रज्जेण तुमे वत्ति ?, पच्छा तेन अमच्चस्स सिट्ठं, ताहे अमच्चोऽवि तं गमेइ, तहवि न ठाति, ताहे अमच्चो भणइ-रायं ! मा देवीए वयणातिक्कमो कीरउ, मा मारेहिइ अप्पाणं, राया भणइ-को उवाओ होज्जा ?, न य अम्हं वंसे अन्नंमि अतिगए उज्जाणे अन्नओ अतीति, तत्थ वसंतमासं ठिओ, मासग्गेसु अच्छति, अमच्चो भणति-उवाओ किज्जउ जहा-अमुगो पच्चंतराया उक्कुट्ठो, अणज्जंता पुरिसा कूडलेहे उवणेंतु, एवमेएण कयगेण ते कूडलेहा रण्णो उवट्ठाविया, ताहे राया जत्तं गिण्हइ, तं विस्सभूइणा सुयं, ताहे भणति-मए जीवमाणे तुब्भे किं निग्गच्छह ?, ताहे सो गओ, ताहे चेव इमो अइगओ, सो गतो तं पच्चंतं, जाव न किंचि पिच्छइ अहुमरेंतं, ताहे आहिंडित्ता जाहे नत्थि कोई जो आणं अइक्कमति, ताहे पुनरवि पुप्फकरंडयं उज्जाणमागओ, तत्थ दारवाला दंडगहियग्गहत्था भणंति-मा अईह सामी !, सो भणति-किं निमित्त ?,

एत्थ विसाहनन्दी कुमारो रमइ, ततो एयं सोऊण कुविओ विस्सभूई, तेन नायं-अहं कयगेण निग्गच्छाविओत्ति, तत्थ कविट्ठलता अनेगफलभरसमोणया, सा मुट्ठिपहारेण आहया, ताहे तेहिं कविट्ठेहिं भूमी अत्थुआ, ते भणति-एवं अहं तुज्झं सीसाणि पाडिंतो जइ अहं महल्लपिउणो गोरवं न करेंतो, अहं भे छम्मेण नीणिओ, तम्हा अलाहि भोगेहिं, तओ निग्गओ भोगा अवमाणमूलन्ति, अज्जसंभूआणं थेराणं अंतिए पव्वइओ, तं पव्वइयं सोउं ताहे राया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संतेउरपरियणो जुवराया य निग्गओ, ते तं खमावेंति, न य तेसिं सो आणत्ति गेण्हति । ततो बहूहिं छट्ठट्ठमादिएहिं अप्पाणं भावेमाणो विहरइ, एवं सो विहरमाणो महुरं नगरिं गतो । इओ य विसाहनंदी कुमारो तत्थ महुराए पिउच्छाए रण्णो अग्गमहिसीए धूआ लद्धेल्लिआ, तत्थ गतो, तत्थ से रायमग्गे आवासो दिन्नो । सो य विस्सभूती अनगारो मासखमण-पारणगे हिंडंतो तं पदेसमागओ जत्थ ठाणे विसाहनंदीकुमारी अच्छति, ताहे तस्स पुरिसेहिं कुमारो भण्णति-सामि ! तुब्भे एयं न जाणह ?, सो भणति -न जाणामि, तेहिं भण्णति–एस सो विस्सभूतीकुमारो, ततो तस्स तं दट्ठूण रोसो जाओ । एत्थंतरा सूतिआए गावीए पेल्लिओ पडिओ, ताहे तेहिं उक्किट्ठकलयलो कओ, इमं च णेहिं भणिअं-तं बलं तुज्झ कविट्ठपाडणं च कहिं गतं ?, ताहे नेन ततो पलोइयं, दिट्ठो य नेन सो पावो, ताहे अमरिसेणं तं गाविं अग्गसिंगेहिं गहाय उड्ढं उव्वहति, सुदुब्बलस्सवि सिंघस्स किं सियालेहि बलं लंघिज्जइ ?, ताहे चेव नियत्तो, इमो दुरप्पा अज्जवि मम रोसं वहति, ताहे सो नियाणं करेति-जइ इमस्स तवनियमस्स बंभचेरस्स फलमत्थि तो आगमेसाणं अपरिमितबलो भवामि । तत्थ सो अनालोइयपडिक्कंतो महासुक्के उववन्नो, तत्थुक्कोसठितिओ देवो जातः ।

ततो चइऊण पोअणपुरे नगरे पुत्तो पयावइस्स मिगाईए देवीए कुच्छिंसि उववन्नो । तस्स कहं पयावई नामं, तस्स पुव्वं रिउपडिसत्तुत्ति नामं होत्था, तस्स य भद्दाए देवीए अत्तए अयले नामं कुमारे होत्था, तस्स य अयलस्स भगिनी मियावईनाम दारिया अतीव रूववती, सा य उम्मुक्कबालभावा सव्वालंकारविभूसिआ पिउपायवंदि या, तेन सा उच्छंगे निवेसिआ, सो तीसे रूवे जोव्वणे य अंगफासे य मुच्छिओ, तं विसज्जेत्ता पउरजनवयं लहरति– जं एत्थं रयणं उप्पज्जइ तं कस्स होति ?, ते भणंति–तुब्भं, एवं तिन्नि वारा साहिए सा चेडी उवट्ठविआ, ताहे लज्जिआ निग्गया, तेसिं सव्वेसिं कुव्वमाणाणं गंधव्वेण विवाहेन सयमेव विवाहिया, उप्पाइया नेनं भारिया, सा भद्दा पुत्तेण अयलेण समं दक्खिणावहे माहेस्सरिं पुरिं निवेसेति, महन्तीए इस्सरीए कारियत्ति माहेस्सरी, अयलो मायं ठविऊण पिउमूलमागओ, ताहे लोएण पयावई नामं कयं, पया अनेन पडिवण्णा पयावइत्ति, वेदेऽप्युक्तम्–"प्रजापतिः स्वां दुहितरमकामयत" ।

ताहे महासुक्काओ चइऊण तीए मियावईए कुच्छिंसि उववन्नो, सत्त सुमिणा दिट्ठा, सुविणपाढएहिं पढमवासुदेवो आदिट्ठो, कालेण जाओ, तिन्नि यसे पिट्ठकरंडगा तेन से तिविट्ठू नामं कयं, माताए परिमक्खितो उम्हतेल्लेणंति, जोव्वणगमणुपत्तो । इओ य महामंडलिओ आसग्गीवो राया, सोणेमित्तियं पुच्छति-कत्तो मम भयंति, तेन भणियं–जो चंडमेहं दूतं आधरिसेहिति, अवरं ते य महाबलगं सीहं मारेहिति, ततो ते भयंति, तेन सुयं जहा–पयावइपुत्ता महाबलवगा, ताहे तत्थ दूतं पेसेति, तत्थ य अंतेउरे पेच्छणयं वट्टति, तत्थ दूतो पविट्ठो, राया उट्ठिओ, पेच्छणयं भग्गं, कुमारा पेच्छणगेण अक्खित्ता भणंति-को एस ?, तेहिं भणिअं-जहा आसग्गीवरण्णो दूतो, ते भणंति-जाहे एस वच्चेज्ज ताहे कहेज्जाह, सो राइणा पूएऊण विसज्जिओ पहाविओ अप्पणो विसयस्स, कहियं कुमाराणं, तेहिं गंतूण अद्धपहे हओ, तस्स जे सहाया ते सव्वे दिसोदिसिं पलाया, रन्ना सुयं जहा-आधरिसिओ दूओ, संभंतेण निअत्तिओ,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताहे रन्ना बिउणं तिगुणं दाऊण मा हु रन्नो साहिज्जसु जं कुमारेहिं कयं, तेन भणियं-न साहामि, ताहे जे ते पुरतो गता तेहिं सिट्ठं जहा-आधरिसिओ दूतो, ताहे सो राया कुविओ, तेन दूतेण नायं जहा-रन्नो पुव्वं कहितेल्लयं, जहावित्तं सिट्ठं, ततो आसग्गीवेण अन्नो दूतो पेसिओ, वच्च पयावइं गंतूण भणाहि-मम सालिं रक्खाहि भक्खिज्जमाणं, गतो दूतो, रण्णा कुमारा उवलद्धा-किह अकाले मच्चू खवलिओ ?, तेन अम्हे अवारए चेव जत्ता आणत्ता, राया पहाविओ,

ते भणंति—अम्हे वच्चामो, ते रुब्भंता मड्डाए गया, गंतूण खेत्तिए भणंति-किहऽण्णे रायाणो रक्खियाइया ?, ते भणंति-आसहत्थिरहपुरिस पागारं काऊं, केच्चिरं ?, जाव करिसणं पविट्ठं, तिविट्ठू भणति-को एच्चिरं अच्छति ?, मम तं पएसं दरिसह, तेहिं कहियं-एताए गुहाए, ताहे कुमारो रहेणं तं गुहं पविट्ठो, लोगेन दोहिवि पासेहि कलयलो कओ, सीहो वियंभंतो निग्गओ, कुमारो चिन्तेइ-एस पाएहिं अहं रहेण, विसरिसं जुद्धं, असिखेडगहत्थो रहाओ ओइण्णो, ताहे पुणोवि विचिन्तेइ-एस दाढानक्खाउहो अहं असिखेडएण, एवमवि असमंजसं, तंपि अनेन असिखेडगं छड्डियं, सीहस्स अमरिसो जातो—एगं ता रहेण गुहं अतिगतो एगागी, बितिअं, भूमिं ओतिण्णो, ततिअं आउहाणि विमुक्काणि, अज्ज णं विणिवाएमित्ति महता अवदालिएण वयणेण उक्खंदं काऊण संपत्तो, ताहे कुमारेण एगेण हत्थेण उवरिल्लो होट्ठो एगेणं हेट्ठिल्लो गहिओ, ततो नेन जुण्णपडगोविव दुहाकाऊण मुक्को ताहे लोएण उक्कुकिलयलो कओ, अहासीन्निहिआए देवयाए आभरणवत्थकुसुमवरिसं, वरिसियं, ताहे सीहो तेन अमरिसेण फुरफुरेंतो अच्छति, एवं नाम अहं कुमारेण जुद्धेण मारिओत्ति, तं च किर कालं भगवओ गोअमसामी रहसारही आसी, तेन भण्णति-मा तुमं अमरिसं वहाहि, एस नरसीहो तुमं मियाहिवो, तो जइ सीहो सीहेण मारिओ को एत्थ अवमाणो ?, तानि सो वयणाणि महुमिव पिबति, सो मरित्ता नरएसु उववन्नो, सो कुमारो तच्चम्मं गहाय सनगरस्स पहाबितो, ते गामिल्लए भणति-गच्छह भो तस्स घोडयगीवस्स कहेह जहा अच्छसु वीसत्थो, तेहिं गंतूण सिट्ठं, रुट्ठो दूतं विसज्जेइ, एते पुत्ते तुमं मम ओलग्गए पट्ठवेहिं, तुमं महल्लो, जाहे पेच्छामि सक्कारेमि रज्जाणि य देमि,

तेन भणियं-अच्छंतु कुमारा, सयं चेव णं ओलग्गामित्ति, ताहे सो भणति-किं न पेसेसि ? अतो जुद्धसज्जो निग्गच्छासि, सो दूतो तेहिं आधरिसित्ता धाडिओ, ताहे सो आसग्गीवो सव्वबलेण उवट्ठिओ, इयरेवि देसंते ठिआ, सुबहुं कालं जुज्झेऊण हयगयरहनरादिक्खयं च पेच्छिऊण कुमारेण दूओ पेसिओ जहा-अहं च तुमं च दोण्णिवि जुद्धं सपंलग्गामो, किंवा बहुएण अकारिजणेण मारिएण ? एवं होउत्ति, बीअदिवसे रहेहिं संपलग्गा, जाहे आउधाणि खीणाणि ताहे चक्कं मुयइ, तं तिविट्ठुस्स तुबेण उरे पडिअं, तेणेव सीसं छिन्नं, देवेहिं उग्धुट्ठे-जहेस तिविट्ठू पढमो वासुदेवो उप्पन्नोत्ति । ततो सव्वे रायाणो पणिवायमुवगता, उयविअं अड्ढभरहं, कोडिसिला दंडबाहाहिं धारिआ, एवं रहावत्तपव्वयसमीवे जुद्धं आसी । एवं परिहायमाणे बले कण्हेण किल जाणुगाणि जाव किहवि पाविआ । तिविट्ठू चलसीइवाससय-सहस्साइं सव्वाउयं पालइत्ता कालं काऊण सत्तमाए पुढवीए अप्पइट्ठाणे नरए तेत्तीसं सागरोम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वमट्ठितीओ नेरइओ उववण्णो । अयमासां भावार्थः, अक्षरार्थस्त्वभिधीयते—राजगृहे नगरे विश्वनन्दी राजाऽभूत्, विशाखभूतिश्च तस्य युवराजेति, तत्र जुवरण्णो'त्ति युवराजस्य धारिणी-देव्या विश्वभूति नामा पुत्र आसीत्, विशाखनन्दिश्चेतरस्य राज्ञ इत्यर्थः, तत्रेत्थमधिकृतो मरीचिजीवः 'रायगिहे विस्सभूति'त्ति राजगृहे नगरे विश्वभूतिर्नाम विशाखभूतिसुतः क्षत्रियोऽ-भवत्, तत्र च वर्षकोट्यायुष्कमासीत्, तस्मिंश्च भवे वर्षसहस्रं 'दीक्षा' प्रव्रज्या कृता संभूतियतेः पार्श्वे । तत्रैव—

नि. (४४६) गोत्तासिउ महुराए सनिआणो मासिएण भत्तेणं ।
महसुक्के उववन्नो तओ चुओ पोअणपुरंमि ॥

वृ- पारणके प्रविष्टो गोत्रासितो मथुरायां निदानं चकार, मृत्वा च सनिदानोऽनालोचिता-प्रतिक्रान्तो मासिकेन भक्तेन महाशुक्रे कल्पे उपपन्न उत्कृष्टस्थितिर्देव इति, 'ततो' महाशुक्राच्युतः पोतनपुरे नगरे—

नि. (४४७) पुत्तो पयावइस्सा मिआवईदेविकुच्छिसंभूओ ।
नामेण तिविट्ठुत्ती आइं आसी दसाराणं ॥

वृ- पुत्रः प्रजापते राज्ञः मृगावतीदेवीकुक्षिसंभूतः नाम्ना त्रिपृष्ठः 'आदिः' प्रथमः आसीद् दसाराणां, तत्र वासुदेवत्वं चतुरशीतिवर्षशतसहस्राणि पालयित्वा अधः सप्तमनरकपृथिव्याम-प्रतिष्ठाने नरके त्रयस्त्रिंशत्सागरोपमस्थितिर्नारकः संजात इति ॥ अमुमर्थं प्रतिपादयन्नाह—

नि. (४४८) चुलसीईमप्पइट्ठे सीहो नरएस तिरियमनुएसु ।
पिअमित्त चक्कवट्टी मूआइ विदेहि चुलसीई ॥

वृ- चतुरशीतिवर्षशतसहस्राणि वासुदेवभवे खल्वायुष्कमासीत्, तदनुभूय अप्रतिष्ठाने नरके समुत्पन्नेः, तस्मादप्युद्वर्त्त्य सिंहो बभूव, मृत्वा च पुनरपि नरक एवोत्पन्न इति, 'तिरिय-मनुएसुत्ति' पुनः कतिचित् भवग्रहणानि तिर्यग्मनुष्येषूत्पद्य 'पिअमित्त चक्कवट्टी मूआइ विदेहि चुलसीइ' त्ति अपरविदेहे मूकायां राजधान्यां धनञ्जयनृपतेः धारिणीदेव्यां प्रियमित्राभिधानः चक्रवर्ती समुत्पन्नः, तत्र चतुरशीतिपूर्वशतसहस्राण्यायुष्कमासीदिति गाथार्थः ॥

नि. (४४९) पुत्तो धनंजयस्सा पुट्टिल परिआउ कोडि सव्वट्ठे ।
नंदन छत्तग्गाए पणवीसाउं सयसहस्सा ॥

वृ- गमनिका—तत्रासौ प्रियमित्रः पुत्रो धनञ्जयस्य धारिणीदेव्याश्च भूत्वा चक्रवर्त्तिभोगान् भुक्त्वा कथञ्चित् संजातसंवेगः सन् 'पोट्टिल इति' प्रोष्ठिलाचार्यसमीपे प्रव्रजितः 'परिआओ कोडि सव्वट्ठे' त्ति प्रव्रज्यापर्यायो वर्षकोटी बभूव, मृत्वा महाशुक्रे कल्पे सर्वार्थे विमाने सप्तदशसागरोपमस्थितिर्देवोऽभवत् 'नंदन छत्तग्गाए पणवीसाउं सयसहस्सेति' ततः सर्वार्थ-सिद्धाच्चुत्वा छत्राग्रायां नगर्यां जितशत्रुनृपतेर्भद्रादेव्या नन्दनो नाम कुमार उत्पन्न इति, पञ्चवि-शतिवर्षशतसहस्राण्या-युष्कमासीदितिगाथार्थः ॥ तत्र च बाल एव राज्यं चकार, चतुर्विंशतिवर्ष-सहस्राणि राज्यं कृत्वा ततः—

नि. (४५०) पव्वज्ज पुट्टिले सयसहस्स सव्वत्थ मासभत्तेणं ।
पुप्फुत्तरि उववन्नो तओ चुओ माहणकुलंमि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- गमनिका—राज्यं विहाय प्रव्रज्यां कृतवान् 'पोट्टिलत्ति' प्रोष्ठिलाचार्यान्तिके 'सयसहस्सं'ति वर्षशतसहस्त्रं यावदिति, कथम् ?, सर्वत्र मासभक्तेन-अनवरतमासोपवासेनेति भावार्थः, अस्मिन् भवे विंशतिभिः कारणैः तीर्थकरनामगोत्रं कर्म निकाचयित्वा मासिकया संलेखनया-ऽऽत्मानं क्षपयित्वा षष्टिभक्तानि विहाय आलोचितप्रतिक्रान्तो मृत्वा 'पुप्फोत्तरे उववन्नोत्ति' प्राणतकल्पे पुष्पोत्तरावतंसके विमाने विंशतिसागरोपमस्थितिर्देव उत्पन्न इति । 'ततो चुओ माहणकुलंमित्ति' ततःपुष्पोत्तराच्चयुतः ब्राह्मणकुण्डग्रामनगरे ऋसभदत्तस्य ब्राह्मणस्य देवानन्दायाः पत्न्याः कुक्षौ समुत्पन्न इति गाथार्थ ।। कानि पुनर्विशतिः कारणानि ? यैस्तीर्थकरनामगोत्रं कर्म तेनोपनिबद्धमित्यत आह—

नि. (४५१-४५६) अरिहंतसिद्धपवयण ।। दंसणं ।। अप्पुव्व ।।
पुरमेण ।। तं च कहं ।। निअमा ।।

वृ- एता ऋषभदेवाधिकारे व्याख्यातत्वान्न विव्रियन्ते ।

नि. (४५७) माहणकुंडग्गामे कोडालसगुत्तमाहणो अत्थि ।
तस्स घरे उववन्नो देवानंदाइ कुच्छिंसि ।।

वृ- पुष्पोत्तराच्युतो ब्राह्मणकुण्डग्रामे नगरे कोडालसगोत्रो ब्राह्मणः ऋषभदत्ताभिधानोऽस्ति, तस्य गृहे उत्पन्नः, देवानन्दायाः कुक्षाविति गाथार्थः ।। साम्प्रतं वर्धमानस्वामिवक्तव्यतानिबद्धां द्वारगाथामाह निर्युक्तिकारः—

नि. (४५८)सुमिण १ मवहार २ ऽभिग्गह ३ जम्मण ४ मभिसेअ ५ वुड्ढि ६ सरणं ७ च।
भेसण ८ विवाह ९ वच्चे १० दाणे ११ संबोह १२ निक्खमणे १३ ।।

वृ- गमनिका—'सुमिणेति' महास्वप्ना वक्तव्याः, यान् तीर्थकरजनन्यः पश्यन्ति, यथा च देवानन्दया प्रविशन्तो निष्क्रामन्तश्च दृष्टाः, त्रिशलया च प्रविशन्त इति । 'अवहारत्ति' अपहरणमपहारः स वक्तव्यो यथा भगवानपहृत इति । 'अभिग्गहेत्ति' अभिग्रहो वक्तव्यः, यथा भगवता गर्भस्थेनैव गृहीत इति । 'जम्मणेति' जन्मविधिर्वक्तव्यः । 'अभिसेउत्ति' अभिषेको वक्तव्यः, यथा विबुधनाथाः कुर्वन्ति, 'वुड्ढित्ति' वृद्धिर्वक्तव्या भगवतो यथाऽसौ वृद्धि जगाम। 'सरणंति' जातिस्मरणं च वक्तव्यं । 'भेसणेति' यथा देवेन भेषितः तथा वक्तव्यं । 'विवाहेति' विवाहविधिर्वक्तव्यः । 'अवच्चेत्ति' अपत्यं-पुत्रभाण्डं वक्तव्यं । 'दाणेत्ति' निष्क्रमणकाले दानं वाच्यं । 'संबोहेति' संबोधनविधिर्वक्तव्यः यथा लोकान्तिकाः संबोधयन्ति । 'निक्खमणेत्ति' निष्क्रमणे च यो विधिरसौ वक्तव्य इति गाथासमुदायार्थः ।। अवयवार्थ तु प्रतिद्वारं वक्ष्यति भाष्यकार एव, तत्र स्वप्नद्वारावयवार्थमभिधित्सुराह—

[भा.४६]गय १ वसह २ सीह ३ अभिसेअ ४ दाम ५ ससि ६ दिनयरं ७ झयं ८ कुम्भं ९ ।
पउमसर १० सागर ११ विमानभवन १२ रयणुच्चय १३ सिहिं च १४ ।।

वृ- गजं वृषभं सिंहं अभिषेकं दाम शशिनं दिनकरं ध्वजं कुम्भं पद्मसरः सागरं विमानभवनं रत्नोच्चयं शिखिनं च, भावार्थः स्पष्ट एव, नवरं अभिषेकः-श्रियः परिगृह्यते, दाम-पुष्पदाम रत्नविचित्रं, विमानं च तद्भवनं च विमानभवनं-वैमानिकदेवनिवास इत्यर्थः, अथवा वैमानिकदेवप्रच्युतेभ्यः विमानं पश्यति, अधोलोकोद्वृत्तेभ्यस्तु भवनमिति, न तूभयमिति ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.४७] एए चउदस सुमिणे पासइ सा माहणी सुहपसुत्ता ।
जं रयणिं उववन्नो कुच्छिंसि महायसो वीरो ।।

वृ- गमनिका–एतान् चतुर्दश महास्वप्नान् पश्यति सा ब्राह्मणी सुखप्रसुप्ता, यस्यां रजन्यामुत्पन्नः कुक्षौ महायशा वीर इति । पश्यतीति निर्देशः पूर्ववत्, पाठान्तरं वा 'एए चोद्दस सुमिणे पेच्छिआ माहणी' ततश्च दृष्टवतीति गाथार्थः ।।

[भा.४८] अह दिवसे बासीई वसइ तहि माहणीइ कुच्छिंसि ।
चिंतइ सोहम्मवई, साहरिउं जे जिनं कालो ।।

वृ- गमनिका–अथ दिवसान् द्व्यशीतिं वसति तस्या ब्राह्मण्याः कुक्षाविति । अथानन्तरं एतावत्सु दिवसेषु अतिक्रान्तेषु चिन्तयति सौधर्मपतिः संहर्त्तुं 'जे' निपातः पादपूरणार्थः, जिनं कालो वर्त्तते इति गाथार्थः ।। किमिति संह्रियत इत्याह–

[भा.४९] अरहंत चक्कवट्टी बलदेवा चेव वासुदेवा य ।
एए उत्तमपुरिसा न हु तुच्छकुलेसु जायंति ।।

वृ- भावार्थः स्पष्ट एव, नवरं 'तुच्छकुलेषु' असारकुलेषु इति । केषु पुनः कुलेषु जायन्ते इत्याह–

[भा.५०] उग्गकुलभोगखत्तिअकुलेसु इक्खागनायकोरव्वे ।
हरिवंसे अ विसाले आयंति तहिं पुरिससीहा ।।

वृ- गमनिका–उग्रकुलभोजक्षत्रियकुलेषु इक्ष्वाकुज्ञातकौरव्येषु पुनः कुलेषु हरिवंशे च विशाले 'आयंति' आगच्छन्ति उत्पद्यन्त इत्यर्थः 'तत्र' उग्रकुलादौ 'पुरुषसिंहाः' तीर्थकरादय इति गाथार्थः ।। यस्मादेवं तस्माद् भुवनगुरुभक्त्या चोदितो देवराजो हरिणेगमेषिमभिहितवान्- एष भरतक्षेत्रे चरमतीर्थकृत् प्रागुपात्तकर्मशेषपरिणतिवशात् तुच्छकुले जातः, तदयमितः संहृत्य क्षत्रियकुले स्थाप्यतामिति । स हि तदादेशात्तथैव चक्रे ।। भाष्यकारस्तु अमुमेवार्थं 'अह भणती' त्यादिना प्रतिपादयति–

[भा.५१] अह भणइ नेगमेसिं देविंदो एस इत्थ तित्थयरो ।
लोगुत्तमो महप्पा उववन्नो माहणकुलंमि ।।

वृ- गमनिका–'अथ' अनन्तरं भणति 'नेगमेसिं' ति प्राकृतशैल्या हरिणेगमेषिं देवेन्द्रः 'एष' भगवान् 'अत्र' ब्राह्मणकुले 'लोकोत्तमो' महात्मा उत्पन्न इति गाथार्थः ।। इदं चासाधु, ततश्चेदं कुरु–

[भा.५२] खत्तिअकुंडग्गामे सिद्धत्थो नाम खत्तिओ अत्थि ।
सद्धित्थ भारिआए साहर तिसलाइ कुच्छिंसि ।।

वृ- गमनिका–क्षत्रियकुण्डगामे सिद्धार्थो नाम क्षत्रियोऽस्ति, तत्र सिद्धार्थभार्यायाः संहर त्रिशलायाः कुक्षाविति गाथार्थः ।।

[भा.५३] बाढंति भाणिऊणं वासारत्तस्स पंचमे पक्खे ।
साहरइ पुव्वरत्ते हत्थुत्तर तेरसी दिवसे ।।

वृ- गमनिका–स हरिणेगमेषिः 'बाढंति भाणिऊणं' ति बाढमित्यभिधाय, अत्यर्थं करोमि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आदेशं, शिरसि स्वाम्यादेशमिति, वर्षारात्रस्य पञ्चमे पक्षे मासद्वयेऽतिक्रान्ते अश्वयुग्बहुल-त्रयोदश्यां संहरति पूर्वरात्रे–प्रथमप्रहरद्वयान्त इति भावार्थः, हस्तोत्तरायां त्रयोदशीदिवसे इति गाथार्थः ॥

[भा.५४]   गयगाहा ॥

[भा.५५]   एए चोद्दससुमिणे पासए सा माहणी पडिनिअत्ते ।
               जं रयणी अवहरिओ कुच्छीआ महायसो वीरो ॥

वृ- पूर्ववत् । इदं नानात्वं-पश्यति सा ब्राह्मणी प्रतिनिवृत्तान् यस्यां रजन्याम् अपहृतः कुक्षितः महायशा वीर इति गाथार्थः ॥

[भा.५६]   गयगाहा ॥

[भा.५७]   एए चोद्दस सुमिणे पासइ सा तिसलया सुहपसुत्ता ।
               जं रयणिं साहरिओ कुच्छिंसि महायसो वीरो ॥

वृ- इदं गाथाद्वयं त्रिशलामधिकृत्य पूर्ववद्वाच्यम् ॥ गतमपहारद्वारम्, साम्प्रतमभिग्रहद्वारव्याचिख्यासयाऽऽह–

[भा.५८]   तिहि नाणेहिं समग्गो देवी तिसलाइ सो अ कुच्छिंसि ।
               अह वसइ सण्णिगब्भो छम्मासे अद्धमासं च ॥

वृ- 'अथ' 'पहारानन्तरं वसति संज्ञी चासौ गर्भश्चेति समासः क्व?-देव्याः त्रिशलायाः स तु कुक्षौ, आह–सर्वो गर्भस्थः संज्ञ्येव भवतीति विशेषणवैफल्यं, न, दृष्टिवादोपदेशेन विशेषण-त्वात्, स च ज्ञानद्वयवानपि भवत्यत आह-त्रिभिर्ज्ञानैः-मतिश्रुतावधिभिः समग्रः । कियन्तं कालमित्याह–षण्मासान् अर्धमासं चेति गाथार्थः ॥

[भा.५९]   अह सत्तमंमि मासे गब्भत्थो चेवऽभिग्गहं गिण्हे ।
               नाहं समणो होहं अम्मापिअरंमि जीवंते ॥

वृ- गमनिका–अथ सप्तमे मासे गर्भादारभ्य तयोर्मातापित्रोर्गर्भप्रयत्नकरणेनात्यन्तस्नेहं विज्ञाय अहो ममोपर्यतीव अनयोः स्नेह इति यद्यहमनयोः जीवतोः प्रव्रज्यां गृह्णामि नूनं न भवत एतावित्यतो गर्भस्थ एव अभिग्रहं गृह्णाति, ज्ञानत्रयोपेतत्वात् । किंविशिष्टमित्याह–नाहं श्रमणो भविष्यामि मातापित्रोर्जीवतोरिति गाथार्थः ॥ एवं–

[भा.६०]   दोण्ह वरमहिलाणं गब्भे वसिऊण गब्भसुकुमालो ।
               नवमासे पडिपुण्णे सत्त य दिवसे समइरेगे ॥

वृ- गमनिका–द्वयोर्वरमहिलयोः गर्भे उषित्वा गर्भे सुकुमारः गर्भसुकुमारः, प्रायः अप्राप्तदुःख इत्यर्थः । कियन्तं कालम् ? नव मासान् प्रतिपूर्णान् सप्त दिवसान् 'सातिरेकान्' समधिकान् इति गाथार्थः ॥

[भा.६१]   अह चित्तसुद्धपक्खस्स तेरसीपुव्वरत्तकालंमि ।
               हत्थुत्तराहिं जाओ कुण्डग्गामे महावीरो ॥

वृ- गमनिका–'अथ' अनन्तरं चैत्रस्य शुद्धपक्षः चैत्रशुद्धपक्षः तस्य चैत्रशुद्धपक्षस्य त्रयोदश्यां पूर्वरात्रकाले-प्रथमप्रहरद्वयान्त इति भावार्थः । हस्तोत्तरायां जातः हस्त उत्तरो यासां ता हस्तोत्तराः-

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

उत्तराफाल्गुन्य इत्यर्थः । कुण्डग्रामे महावीर इति ।। जातकर्म दिक्कुमार्यादिभिर्निर्वर्त्तितं पूर्ववदवसेयं, किञ्चित्प्रतिपादयन्नाह–

[भा.६२] आभरणरयणवासं वुट्ठं तित्थंकरंमि जायंमि ।
सक्को अ देवराया उवागओ आगया निहओ ।।

वृ- गमनिका–आभरणानि–कटककेयूरादीनि रत्नानि-इन्द्रनीलादीनि तद्वर्षं-वृष्टिं तीर्थकरे जाते सति, शक्रश्च देवराज उपागतस्तत्रैव, तथा आगताः पद्मादयो निधय इति गाथार्थः ।।

[भा.६३] तुट्ठाओ देवीओ देवा आनंदिआ सपरिसागा ।
भयवंमि वद्धमाणे तेलुक्कसुहावहे जाए ।

वृ- तुष्टा देव्यः देवा आनन्दिताः सह परिषद्भिः वर्त्तन्त इति सपरिषदः भगवति वर्धमाने त्रैलोक्यसुखावहे जाते सतीति गाथार्थः ।। गतं जन्मद्वारं, अभिषेकद्वारावयवार्थं प्रतिपादयन्नाह–

[भा.६४] भवणवइवाणमंतरजोइसवासी विमाणवासी अ ।
सव्विड्ढीइ सपरिसा चउव्विहा आगया देवा ।।

वृ- गमनिका–भवनपतयश्च व्यन्तराश्च ज्योतिर्वासिनश्चेति समासः, विमानवासिनश्च सर्वर्ध्या सपरिषदः चतुर्विधा आगता देवा इति गाथार्थः ।।

[भा.६५] देवेहिं संपरिवुडो देविंदो गिण्हिऊण तित्थयरं ।
नेऊण मंदरगिरिं अभिसेअं तत्थ कासीअ ।।

वृ- देवैः संपरिवृतो देवेन्द्रो गृहीत्वा तीर्थकरं नीत्वा मन्दरगिरिं'अभिसेअं' ति अभिषेकं तत्र कृतवांश्चेति गाथार्थः ।।

[भा.६६] काऊण य अभिसेअं देविंदो देवदानवेहि समं ।
जननीइ समप्पित्ता जम्मणमहिमं च कासीअ ।।

वृ- गमनिका–कृत्वा चाभिषेकं देवेन्द्रो देवदानवैः सार्धं, देवग्रहणात् ज्योतिष्कवैमानिकग्रहणं, दानवग्रहणात् व्यन्तर-भवनपतिग्रहणमिति । ततो जनन्याः समर्प्य जन्ममहिमां च कृतवान् स्वर्गे नन्दीश्वरे द्वीपे चेति गाथार्थः ।। साम्प्रतं यदिन्द्रादयो भुवननाथेभ्यो भक्त्या प्रयच्छन्ति तद्दर्शनायाह–

[भा.६७] खोमं कुंडलजुअलं सिरिदामं चेव देइ सक्को से ।
मणिकनगरयणवासं उवच्छुभे जंभगा देवा ।।

वृ- गमनिका–'क्षौमं' देववस्त्रं 'कुण्डलयुगलं' कर्णाभरणं 'श्रीदाम' अनेकरत्नखचितं दर्शनसुभगं भगवतो ददाति शक्रः 'से' तस्य । इत्थं निर्देशस्त्रिकालगोचरसूत्रप्रर्दनार्थः । 'जृम्भकाः' व्यन्तरा देवाः, शेषं सुगममिति गाथार्थः ।।

[भा.६८] वेसमणवयण संचोइआ उ ते तिरिअजंभगा देवा ।।
कोडिग्गसो हिरण्णं रयणाणि अ तत्थ उवर्निति ।।

वृ- गमनिका–वैश्रमणवचनसंचोदितास्तु ते तिर्यग्जृम्भका देवाः । तिर्यगिति तिर्यग्लोक-जृम्भकाः 'कोट्यग्रशः' कोटीपरिमाणतः 'हिरण्यम्' अघटितरूपं 'रत्नानि च' इन्द्रनीलादीनि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्रोपनयन्तीति गाथार्थः ।। गतमभिषेकद्वारं, इदानीं वृद्धिद्वारावयवार्थमाह–

[भा.६९] अह वड्ढइ सो भयवं दिअलोअचुओ अनोवमसिरीओ ।
दासीदासपरिवुडो परिकिण्णो पीढमद्देहिं ।।

वृ- अथ वर्धते स भगवान् देवलोकच्युतः अनुपमश्रीको दासीदासपरिवृतः 'परिकीर्णं' पीठमर्द्दैः' महानृपतिभिः परिवृत इति गाथार्थः ।।

[भा.७०] असिअसिरओ सुनयनो० ।

[भा.७१] जाईसरो अ भयवं० ।।

वृ- गाथाद्वयमिदं ऋषभदेवाधिकार इव द्रष्टव्यम् ।। भेषणद्वद्वारावयवार्थमाह–

[भा.७२] अह ऊणअट्ठवासस्स भगवओ सुरवराण मज्झंमि ।
संतगुणुक्कित्तणयं करेइ सक्को सुहम्माए ।।

वृ- गमनिका–'अथ' अनन्तरं न्यूनाष्टवर्षस्य भगवतः सतः सुरवराणां मध्ये सन्तश्च ते गुणाश्च सद्गुणाः तेषां कीर्त्तनं-शब्दनमिति समासः, करोति 'शक्रो' देवराजः 'सुधर्माया' सभायां व्यवस्थित इति गाथार्थः ।। किंभूतमित्यत आह–

[भा.७३] बालो अबालभावो अबालपरक्कमो महावीरो ।
न हु सक्कइ भेसेउं अमरेहिं सइंदएहिंपि ।।

वृ- गमनिका–बालः न बालभावोऽबालभावः, भावः–स्वरूपं, न बालपराक्रमोऽबालपराक्रमः, पराक्रमः-चेष्टा, 'शूर वीर विक्रान्ता' विति कषायादिशत्रुजयाद् विक्रान्तो वीरः, महांश्चासौ वीरश्चेति महावीरः, नैव शक्यते भेषयितुं 'असरैः' देवैः सेन्द्रैरपीति गाथार्थः ।।

[भा.७४] तं वयणं सोऊणं अह एगु सुरो असद्दहंतो उ ।
एइ जिनसण्णिगासं तुरिअं सो भेसणट्ठाए ।।

वृ- गमनिका–तद्वचनं श्रुत्वा अथैकः 'सुरो' देवः अश्रद्धानस्तु-अश्रद्दधान इत्यर्थः, 'एति' आगच्छति 'जिनसन्निकाशं' जिनसमीपं त्वरितमसौ, किमर्थम् ? -'भेषणार्थम्' भेषणनिमित्तमिति गाथार्थः ।। स चागत्य इदं चक्रे–

[भा.७५] सप्पं च तरुवरंभी काउं तिंदूसएण डिंभं च ।
पिट्ठी मुट्ठीइ हओ वंदिअ वीरं पडिनिअत्तो ।।

वृ- अस्या भावार्थः कथानकादवसेयः, तच्चेदम्–देवो भगवओ सकाशमागओ, भगवं पुन चेडरूवेहिं समं रुक्खखेड्डेण कीलइ, तेसु रुक्खेसु जो पढमं विलग्गति जो य पढमं ओलुहति सो चेडरूवाणि वाहेइ, सो अ देवो आगंतूण हेट्ठओ रुक्खस्स सप्परूवं विउव्वित्ता अच्छइ उप्परामुहो, सामिणा अमूढेण वामहत्थेण सत्ततिलमित्तत्ते छूढो, ताहे देवो चिंतेइ-एत्थ ताव न छलिओ । अह पुनरवि सामी तेंदूसएण रमइ, सो य देवो चेडरूवं विउव्विऊण सामिणा समं अभिरमइ, तत्थ सामिणा सो जिओ, तस्स उवरिं विलग्गो, सो य वड्ढिउं पवत्तो पिसायरूवं विउव्वित्ता, तं सामिणा अभीएण तलप्पहारेण पहओ जहा तत्थेव णिब्बुड्डो, एत्थवि न तिन्नो छलिउं, देवो वंदित्ता गओ । अयं पुनरक्षरार्थः- सर्प च तरुवरे कृत्वा 'तेन्दूसकेन' क्रीडाविशेषेण हेतुभूतेन 'डिम्भं च' बालरूपं च, कृत्वेत्यनुवर्त्तते । पृष्ठौ मुष्टिना हतः वन्दित्वा वीरं प्रतिनिवृत्त

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यक्षरार्थः ।। अन्यदा भगवनतमधिकाष्टवर्षं कलाग्रहणयोग्यं विज्ञाय मातापितरौ लेखाचार्याय उपनीतवन्तौ । आह च–

[भा.७६] अह तं अम्मापिअरो जाणित्ता अहिअअट्ठवासं तु ।
कयकोउअलंकारं लेहायरिअस्स उवर्णिति ।।

वृ- गमनिका–'अथ' अनन्तरं भगवन्तं मातापितरौ ज्ञात्वा अधिकाष्टवर्षं तु कृतानि रक्षादीनि कौतुकानि केयूरादयोऽलङ्काराश्च यस्येति समासः, तं 'लेखाचार्याय' उपाध्यायायेत्यर्थः । 'उवर्णेति' त्ति प्राकृतशैल्या उपनयतः, पाठान्तरं वा 'उवर्णेसु' तदा उपनीतवन्त इति गाथार्थः ।। अत्रान्तरे देवराजस्य खल्वासनकम्पो बभूव, अवधिना च विज्ञायदं प्रयोजनं अहो खल्वपत्यस्नेहविलसितं भुवनगुरुमातापित्रोः येन भगवन्तमपि लेखाचार्याय उपनेतुमभ्युद्यतौ इति संप्रधार्य आगत्य चोपाध्यायतीर्थकरयोः परिकल्पितयोः बृहदल्पयोरासनयोः उपाध्यायपरिकल्पिते बृहदासने भगवन्तं निवेश्य शब्दलक्षणं पृष्टवान् ।। अमुमेवार्थं प्रतिपादयति भाष्यकारः 'सक्को अ०' इत्यादिनेति ।

[भा.७७] सक्को अ तस्समक्खं भगवंतं आसने निवेसित्ता ।
सद्दस्स लक्खणं पुच्छे वागरणं अवयवा इंदं ।।

वृ- गमनिका–शक्रश्च 'तत्समक्षं' लेखाचार्यसमक्षं 'भगवंत' तीर्थकरं आसने निवेश्य शब्दस्य लक्षणं पृच्छति । पाठान्तरं वा 'पुच्छिसु सद्दलक्खणं, वागरणं अवयवा इंदं' पृष्टवान् शब्दलक्षणं, भगवता च व्याकरणमभ्यधायि, व्याक्रियन्ते लौकिकसामयिकाः शब्दा अनेनेति व्याकरणं - शब्दशास्त्रं, तदवयवाः केचन उपाध्यायनेन गृहीताः, ततश्च एन्द्रं व्याकरणं संजातमिति गाथार्थः।

विवाहद्वारावयवार्थमभिधित्सयाऽऽह–

[भा.७८] उम्मुक्कबालभावो कमेण अह जोव्वणं अनुप्पत्तो ।
भोगसमत्थं नाउं अम्मापिअरो उ वीरस्स ।।

वृ- गमनिका–एवं उन्मुक्तो बालभावो येनेति समासः, 'क्रमेण' उक्तप्रकारेण 'अथ' अनन्तरं 'यौवनं' वयोविशेषलक्षणं बालादिभावात् पश्चात् प्राप्तः अनुप्राप्तः । अत्रान्तरे भुज्यन्त इति भोगाः–शब्दादयः तेषां समर्थो भोगसमर्थः तं ज्ञात्वा भगवन्तं, कौ ?-मातापितरौ तु वीरस्येति गाथार्थः ।। किम् ?–

[भा.७९] तिहिरिक्खिंमि पसत्थे महंतसामंतकुलपसूआए ।
कारंति पाणिगहणं जसोअवररायकण्णाए ।।

वृ- तिथिश्च ऋक्षं च तिथिऋक्षं, ऋक्षं -नक्षत्रं, तस्मिन् तिथिऋक्षे, 'प्रशस्ते' शोभने, महच्च तत्सामन्तकुलं च महासामन्तकुलं तस्मिन् प्रसूतेति समासः तया, कारयतः मातापितरौ, पाणेर्ग्रहणं पाणिग्रहणं, कया ?–यशोदा चासौ वरराजकन्या चेति विग्रहः तया, तत्र 'महासामन्तकुल-प्रसूतया' इत्यनेनान्वयमहत्त्वमाह, 'वरराजकन्यया' इत्यनेन तु तत्कालराज्यसंपद्युक्तामाहेति गाथार्थः ।। अपत्यद्वारावयवार्थं व्यचिख्यासुराह–

[भा.८०] पंचविहे मानुस्से भोगे भुंजितु सह जसोआए ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेयसिरिंव सुरूवं जनेइ पिअदंसणं धूअं ॥

वृ- गमनिका– 'पञ्चविधान्' पञ्चप्रकारान् शब्दादीन् मनुष्याणामेते मानुष्यास्तान् भोगान् भुक्त्वा 'ततो' यशोदायाः, तेजसः श्रीः तेजःश्रीः तां तेजः श्रियमिव सुरूपां, अथवा तस्याः श्रियमिवेति पाठान्तरं वा । जनयति प्रियदर्शनां 'धुता' दुहितरं, 'जणिंसु' वा पाठः, जनितवानिति गाथार्थः ॥ अत्रान्तरे च भगवत् मातापितरौ कालगतौ, भगवानपि तीर्णप्रतिज्ञः प्रव्रज्याग्रहणाहित-मतिः नन्दिवर्धनपुरस्सरं स्वजनमापृच्छति स्म, स पुनराह–भगवन् ! क्षारं क्षते मा क्षिपस्व, कियन्तमपि कालं तिष्ठं, भगवानाह–कियन्तम् ?, स्वजन आह–वर्षद्वयं, भगवानाह–भोजनादौ मम व्यापारो न वोढव्य इति, प्रतिपन्ने भगवान् समधिकं वर्षद्वयं प्रासुकैषणीयाहारः शीतोद-कमप्यपिबन् तस्थौ, अत्रान्तर एव महादानं दत्तवान्, लोकान्तिकैश्च प्रतिबोधितः पुनः पूर्णावधिः प्रव्रजित इति ॥ अमुमेवार्थं संक्षेपतः प्रतिपादयन् आह निर्युक्तिकृत् –

नि. (४५९) हत्थुत्तरजोएणं कुंडग्गामंमि खत्तिओ जच्चो ।
वज्जरिसहसंघयणो भविअजनविबोहओ वीरो ॥

नि. (४६०) सो देवपरिग्गहिओ तीसं वासाइ वसइ गिहवासे ।
अम्मापिइहिं भयवं देवत्तगएहिं पव्वइओ ॥

वृ- गमनिका–'हस्तोत्तरयोगेन' उत्तराफाल्गुनीयोगेनत्यर्थः, कुण्डग्रामे नगरे क्षत्रियो 'जात्यः' उत्कृष्ट इत्यर्थः, वज्रऋषभ-संहननो भव्यजनविबोधको वीरः, किम् ? -मातापितृभ्यां भगवान् देवत्वगताभ्यां प्रव्रजित इति योगः ! द्वितीयगाथागमनिका - 'सः' भगवान् देवपरिगृहीतः त्रिंशद्वर्षाणि वसति, उषित्वा वा पाठान्तरं, गृहवासे शेषं व्याख्यातमेव ॥ साम्प्रतं भाष्यकारः प्रतिद्वारं अवयवार्थं व्याख्यानयति 'संवच्छरेण०' गाथेत्यादिना–

[भा.८१-८५] संवच्छरेणं० ॥ एगा हिरण्ण० ॥ सिंघाडय० ।
वरवरिआ० ॥ तिण्णेव य० ॥

वृ- इदं गाथापञ्चकं ऋषभदेवाधिकारे व्याख्यातत्वान्न विव्रियते ॥ संबोधनद्वारावयवार्थमाह–

[भा.८६-८७] सारस्सयमाइच्चा० ॥ एए देवनिकाया० ।

[भा.८८] एवं अभिथुव्वंतो बुद्धो बुद्धारविंदसरिसमुहो ।
लोगंतिगदेवेहिं कुंडग्गामे महावीरो ॥

वृ- इदमपि गाथात्रयं व्याख्यातत्वात् न प्रत्यन्ते । आह–ऋषभदेवाधिकारे 'संबोहण-परिच्चाएत्ति' इत्यादिद्वारगाथायां संबोधनोत्तरकालं परित्यागद्वारमुक्तं, तता मूलभाष्यकृता व्याख्या कृतेति, अधिकृतद्वारगाथायां तु 'दाने संबोधनिक्खमणे' इत्यभिहितं, इत्थं व्याख्या (च) कृतेति । ततश्च इह दानद्वारस्य संबोधनद्वारात् पूर्वमुपन्यासः तत्र वा संबोधनद्वारादुत्तरं परित्यागद्वारस्य विरुध्यत इति, उच्यते, न सर्वतीर्थकराणामयं नियमो यदुत-संबोधनोत्तरकाल-भाविनी महादानप्रवृत्तिरिति, अधिकृतग्रन्थोपन्यासान्यथानुपपत्तेः, नियमेऽपीह दानद्वारस्य बहुतरवक्तव्यात्वात् संबोधनद्वारात् प्रागुपन्यासो न्यायप्रदर्शनार्थोऽविरुद्ध एव, अधिकृतद्वार-गाथनियमे तु व्यत्ययेन परिहारः-तत्राल्पवक्तव्यत्वात् संबोधनद्वारस्य प्रागुपन्यासः, इत्येतावन्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संभविनः पक्षाः, तत्त्वं तु विशिष्टश्रुतविदो जानन्तीति अलं प्रसङ्गेन ।। साम्प्रतं निष्क्रमणद्वारावयवार्थं व्याचिख्यासुराह–

[भा.८९] मनपरिणामो अ कओ अभिनिक्खणंमि जिनवरिंदेण ।
देवेहिं य देवीहिं य समंतओ उच्छयं गयणं ।।

वृ- गमनिका-मनः परिणामश्च कृतः 'अभिनिष्क्रमणे' इति अभिनिष्क्रमणविषयो जिनवरेन्द्रेण, तावत् किं संजातमित्याह–देवैर्देवीभिश्च 'समन्ततः' सर्वासु दिक्षु 'उच्छय गयणं' ति व्याप्तं गगनमिति गाथार्थः ।।

[भा.९०] भवणवइवाणमंतर जोइसवासी विमानवासी अ ।
घरणियले गयणयले विज्जुज्जे ओकओ खिप्पं ।।

वृ- यैर्देवैः गगनतलं व्याप्तं ते खल्वमी वर्त्तन्ते-भवनपतयश्च व्यन्तराश्च ज्योतिर्वासिनश्चेति समासः, ज्योतिः-शब्देन इह तदालया एवोच्यन्ते, विमानवासिनश्च । अमीभिरागच्छद्भिः धरणितले गगनतले विद्युतामिवोद्योतो विद्युदुद्योतः कृतः 'क्षिप्र' शीघ्रमिति गाथार्थः ।।

[भा.९१] जाव य कुंडग्गामो जाव य देवाण भवनआवासा ।
देवेहिंय देवीहिं य अविरहिअं संचरंतेहिं ।।

वृ- गमनिका–यावत् कुण्डग्रामो यावच्च देवानां भवनावासां अत्रान्तरे धरणितलं गगनतलं च देवैः देवीभिश्च 'अविरहितं' व्याप्तं संचरद्भिरिति गाथार्थः ।। अत्रान्तरे देवैरेव भगवतः शिबिकोपनीता, तामारुह्य भगवान् सिद्धार्थवनमगतम्, अमुमेवार्थं प्रतिपादयति –'चंदप्पभा येत्यादिना'–

[भा.९२] चन्दप्पभा य सीआ उवनीआ जम्मजरणमुक्कस्स ।
आसत्तमल्लदामा जलयथलयदिव्वकुसुमेहिं ।।

वृ- चन्द्रप्रभा शिबिकेत्यभिधानं 'उपनीता' आनीता, कस्मै-जरामरणाभ्यां मुक्तवत् मुक्तः तस्मै-वर्धमानायेत्यर्थः, षष्ठी चतुर्थ्यर्थे द्रष्टव्या । किंभूता सेत्याह–आसक्तानि माल्यदामानि यस्यां सा तथोच्यते, तथा जलजस्थलजदिव्यकुसुमैः, चर्चितेति वाक्यशेषः इति गाथार्थः ।।

शिबिकाप्रमाणदर्शनायाह–

[भा.९३] पंचासइ आयामा धनूनि विच्छिन्न पणवीसं तु ।
छत्तीसइमुव्विद्धा सीया चंदप्पभा भणिआ ।।

वृ- पञ्चाशत् धनूंषि आयामो–दैर्घ्यं यस्याः सा पञ्चाशदायामा धनूंषि, विस्तीर्णा पञ्चविंशत्येव, षट्त्रिंशद्धनूंषि 'उव्विद्धत्ति' उच्चा, उच्चैस्त्वेन षट्त्रिंशद्धनूंषीति भावार्थः, शिबिका चन्द्रप्रभाभिधाना 'भणिता' प्रतिपादिता तीर्थकरगणधरैरिति, अनेन शास्त्रपारतन्त्र्यमाहेति गाथार्थः ।।

[भा.९४] सीआइ मज्झयारे दिव्वं मणिकनगरयणचिंचइअं ।
सीहासनं महरिहं सपायवीढं जिनवरस्स ।।

वृ- शिबिकाया मध्य एव मध्यकारस्तस्मिन् 'दिव्य' सुरनिर्मितं मणिकनकरत्नखचितं सिंहासनं महार्हं, तत्र मणयः-चन्द्रकान्ताद्याः कनकं-देवकाञ्चनं रत्नानि-मरकतेन्द्रनीलादीनि 'चिंचइअं' ति देशीवचनतः खचितमित्युच्यते । सिंहप्रधानमासनं सिंहासनं, महान्तं-भुवनगुरुमर्हतीति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महार्हं, सह पादपीठेनेति सपादपीठं, जिनवरस्य, कृतमिति वाक्यशेषः इति गाथार्थः ॥

[भा.९५] आलइअमालमउडो भासुरबोंदी पलंबवनमालो ।
सेययवत्थनियत्थो जस्स य मोल्लं सयसहस्सं ॥

[भा.९६] छट्ठेणं भत्तेणं अज्झवसाणेण सोहणेण जिनो ।
लेसाहिं विसुज्झंतो आरुहई उत्तमं सीअं ॥

वृ- आलइअं आविद्धमुच्यते, माला-अनेकसुरकुसुमग्रथिता, मुकुटास्तु प्रसिद्ध एव, माला च मुकुटश्च मालामुकुटौ आविद्धौ मालामुकुटौ यस्येति विग्रहः । भास्वरा–छायायुक्ता बोन्दी–तनुः यस्य स तथाविधः, प्रलम्बा वनमाला-प्रागभिहिता अन्या वा यस्येति समासः । 'सेययवत्थनियत्थे' त्ति नियत्थं–परिहितं भण्णइ, निवसितं श्वेतं वस्त्रं येन स निवसितश्वेतवस्त्रः, बन्धानुलोम्यात् निवसितशब्दस्य सूत्रान्तरे प्रयोगः, लक्षणतस्तु बहुव्रीहौ निष्ठान्तं पूर्वं निपततीति पूर्वं द्रष्टव्यः, श्वेतवस्त्रपरिधान इत्यर्थः । यस्य च मूल्यं शतसहस्त्रं दीनाराणामिति गाथार्थः ॥ स एवंभूतो भगवान् मार्गशीर्ष-बहुलदशम्यां हस्तोत्तरानक्षत्रयोगेन 'छट्ठेणं भत्तेणं' इत्यादि, षष्ठेन भक्तेन, दिनद्वयमुपोषित इत्यर्थः अध्यवसानं-अन्तः-करणसव्यपेक्षं विज्ञानं तेन 'सुन्दरेण' शोभनेन 'जिनः' पूर्वोक्तः, तथा लेश्याभिर्विशुध्यमानः मनोवाक्कायपूर्विकाः कृष्णादिद्रव्यसंबन्धजनिताः खलु आत्मपरिणाः लेश्या इति, उक्तं च-"कृष्णादिद्रव्यसाचिव्यात्, परिणामो य आत्मनः । स्फटिकस्येव तत्रायं, लेश्याशब्दः प्रयुजयते ॥" ताभिः विशुध्यमानः, किम् ?-आरोहति 'उत्तमा' प्रधानां शिबिकामिति गाथार्थः ॥

[भा.९७] सीहासने निसन्नो सक्कीसाना य दोहि पासेहिं ।
वीअंति चामरेहिं मणिकनगविचित्तदंडेहिं ॥

वृ- तत्र भगवान् सिंहासने निषण्णः शक्रेशानौ च देवनाथौ द्वयोः पार्श्वयोः व्यवस्थितौ, किम् ?-वीजयतः, काभ्याम् ?-चामराभ्यां, किंभूताभ्याम् ?-मणिरत्नविचित्रदण्डाभ्यामिति गाथार्थः ॥ एवं भगवति शिबिकान्तर्वर्त्तिनि सिंहासनारूढे सति सा शिबिका सिद्धार्थोद्यानयनाय उत्क्षिप्ता ॥ कैरित्याह–

[भा.९८] पुव्विं उक्खित्ता मानुसेहिं सा हट्ठरोमकूवेहिं ।
पच्छा वहंति सीअं असुरिंदसुरिंदनागिंदा ॥

वृ- 'पूर्वं' प्रथमं 'उत्क्षिप्ता' उत्पाटिता, कैः ?-मानुषैः, सा शिबिका, किंविशिष्टैः ?-हृष्टानि रोमकूपानि येषामिति-समासः, तैः । पश्चाद्वहन्ति शिबिकां, के ?-असुरेन्द्रसुरेन्द्रनागेन्द्रा इति गाथार्थः ॥ असुरादिस्वरूपव्यावर्णनायाह–

[भा.९९] चलचवलभूसणधरा सच्छंदविउव्विआभरणधारी ।
देविंददानविंदा वहंति सीअं जिणिंदस्स ॥

वृ- गमनिका–चलाश्च ते चपलभूषणधराश्चेति समासः । चलाः-गमनक्रियायोगात् हारादिचपलभूषणधराश्च । स्वच्छन्देन-स्वाभिप्रायेण विकुर्वितानि-देवशक्त्या कृतानि आभरणानि–कुण्डलादीनि धारयितुं शीलं येषामिति समासः । अथवा चलचपलभूषणधरा इत्युक्तं, तानि च भूषणानि किं ते परिनिर्मितानि धारयन्ति उत नेति विकल्पसंभवे व्यवच्छेदार्थमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'स्वच्छन्दविकुर्विताभरणधारिणः', क एते ?-देवेन्द्रा दानवेन्द्राः, किम् ?-वहन्ति शिबिकां जिनेन्द्रस्येति गाथार्थः ।। अत्रान्तरे-

[भा.१००] कुसुमानि पंचवण्णाणि मुयंता दुंदुही य ताडंता ।
देवगणा य पहट्ठा समंतओ उच्छयं गयणं ।।

वृ- भगवति शिबिकारूडे गच्छति सति नभः स्थलस्थाः कुसुमानि शुक्लादिपञ्चवर्णानि मुञ्चन्तः तथा दुदुम्भींस्ताडयन्तश्च, के ?-'देवगणाः' देवसंघाताः चशब्दस्य प्राक्संबन्धो व्यवहितः प्रदर्शित एव, प्रकर्षेण हृष्टाः प्रहृष्टाः, किम् ?-भगवन्तमेव स्तुवन्तीति क्रियाऽध्याहारः । एवं स्तुवद्भिर्देवैः किमित्याह-'समन्ततः' सर्वासु दिक्षु सर्वं 'उच्छयं गगणं' व्याप्तं गगनमिति गाथार्थः ।।

[भा.१०१] वनसंडोव्व कुसुमिओ पउमसरो वा जहा सरयंकाले ।
सोहइ कुसुमभरेणं इय गगनयलं सुरगणेहिं ।।

वृ- गमनिका-वनखण्डमिव कुसुमितं पद्मसरो वा यथा शरत्काले शोभते कुसुमभरेण-हेतुभूतेन, 'इय' एवं गगनतलं सुरगणैः शुशुभे इतिं गाथार्थः ।।

[भा.१०२] सिद्धत्थवणं च जहा असनवनं सणवणं असोगवणनं ।
चूअवनंव कुसुमिअं इअगयणयलं सुरगणेहिं ।।

वृ- सिद्धार्थकवनमिव यथा असनवनं, अशनाः-बीजकाः, सणवनं अशोकवनं चूतवनमिव कुसुमितं, 'इअ' एवं गगनतलं सुरगणै रराजेति गाथार्थः ।।

[भा.१०३] अयसिवनं व कुसुमिअं कणिआरवनं व चंपयवनं व ।
तिलयवनं व कुसुमिअं इअ गयनतलं सुरगणेहिं ।।

वृ- अतसीवनमिव कुसुमितं, अतसी-मालवदेशप्रसिद्धा, कर्णिकारवनमिव चम्पकवनमिव तथा तिलकवनमिव कुसुमितं यथा राजते, 'इअ' एवं गगनतलं सुरगणैः क्रियायोगः पूर्ववदिति गाथार्थः ।।

[भा.१०४] चरपडहभेरिझल्लरिदुंदुहिसंखसहिएहिं तूरेहिं ।
धरणियले गयणयले तूरनिनाओ परमरम्मो ।।

वृ- वरपटहभेरिंझल्लरिदुन्दुभिशङ्खसहितैस्तर्यैः करणभूतैः, किम् ?-धरणितले गगनतले 'तूर्यनिनादः' तूर्यनिर्घोषः परमरम्योऽभवदिति गाथार्थः ।।

[भा.१०५] एवं सदेवमणुआसुराएँ परिसाएँ परिवुडो भयवं ।
अभिथुव्वंतो गिराहिं संपत्तो नायसंडवणं ।।

वृ- गमनिका-'एवं' उक्तेन विधिना, सह देवमनुष्यासुरैर्वर्त्तते इति सदेवमनुष्यासुरा तया, कयेत्याह-परिषदा परिवृतो भगवान् अभिस्तूयमानो 'गीर्भिः' वाग्भिरित्यर्थः, संप्राप्तः ज्ञातखण्डवनमिति गाथार्थः ।।

[भा.१०६] उज्ञानं संपत्तो ओरुभइ उत्तमाउ सीआओ ।
सयमेव कुणइ लोअं सक्को से पडिच्छए केसे ।।

वृ- गमनिका-उद्यानं संप्राप्तः, 'ओरुहइत्ति' अवतरति उत्तमायाः शिबिकायाः, तथा स्वयमेव करोति लोचं, 'शक्रो' देवराजा 'से' तस्य प्रतीच्छति केशानिति, एवं वृत्तानुवादेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रन्थकारवचनत्वात् वर्त्तमाननिर्देशः सर्वत्र अविरुद्ध एवेति गाथार्थः ॥

[भा.१०७] जिनवरमणुन्नवित्ता अंजनघणरुयगाविमलसंकासा ।
केसा खणेण नीआ खीरसरिनसनामयं उदहिं ॥

वृ- गमनिका-शक्रेण-जिनवरमनुज्ञाप्य अञ्जनं-प्रसिद्धं घनो-मेघः रुक्-दीप्तिः, अञ्जनघनयो रुक् अञ्जनघनरुक् अञ्जनघनरुग्वत् विमलः संकाशः-छायाविशेषो येषां ते तथोच्यन्ते । अथवा अञ्जनघनरुचकविमलानामिवं संकाशो येषामिति समासः 'रुचकः' कृष्णमणिविशेष एव, क एते ? - केशाः, किम् ?- क्षणेन नीताः, कम् ?-'क्षीरसदृशनामानमुदधिं' क्षीरोदधिमिति गाथार्थः ॥ अत्रान्तरे च चारित्रं प्रतिप्रत्तुकामे भगवति सुरासुरमनुजवृन्दसमुद्भवो ध्वनिस्तूर्यनिनादश्च शक्रादेशाद् विरराम, अमुमेवार्थं प्रतिपादयन्नाह-

[भा.१०८] दिव्वो मनूसघोसो तूरनिनाओ अ सक्कवयणेणं ।
खिप्पामेव निलुक्को जाहे पडिवज्जइ चरित्तं ॥

वृ- गमनिका-'दिव्यो' देवसमुत्थो मनुष्यघोषश्च, चशब्दस्य व्यवहितः संबन्धः, तथा तूर्यनिनादश्च शक्रवचनेन 'क्षिप्रमेव' शीघ्रमेव 'निलुक्कोत्ति' देशीवचनतो विरतः 'यदा' यस्मिन् काले प्रतिपद्यते चारित्रमिति गाथार्थः ॥ स यथा चारित्रं प्रतिपद्यते तथा प्रतिपिपादयिषुराह-

[भा.१०९] काऊण नमोक्कारं सिद्धाणमभिग्गहं तु सो गिण्हे ।
सव्वं मे अकरणिज्जं पावंति चरित्तमारूढो ॥

वृ- कृत्वा नमस्कारं सिद्धेभ्यः अभिग्रहमसौ गृह्णाति, किंविशिष्टमित्याह-सर्वं 'मे' मम 'अकरणीयं' न कर्त्तव्यं, किं तदित्याह-पापमिति, किमित्याह-चारित्रमारूढ इतिकृत्वा, स च भदन्तशब्दरहितं सामायिकमुच्चारयतीति गाथार्थः ॥ चारित्रप्रतिपत्तिकाले च स्वभावतो भुवनभूषणस्य भगवतो निर्भूषणस्य सत इन्द्रो देवदूष्यवस्त्रमुपनीतवान् इति । अत्रान्तरे कथानकम्-एगेन देवदूसेण पव्वएइ, एतं जाहे अंसे करेइ एत्थंतरा पिउवयंसो धिज्जाइओ उवट्ठिओ, सो अ दानकाले कहिंपि पवसिओ आसी, आगओ भज्जाए अंबडिओ, सामिणा एवं परिचत्तं, तुमं च पुन वणाइ हिंडसि, जाहि जइ इत्थंतरेऽवि लभिज्जासि । सो भणइ-सामि! तुब्भेहिं मम न किंचि दिन्नं, इदाणिंपि मे देहि । ताहे सामिणा तस्स दूसस्स अद्धं दिन्नं, अन्नं मे नत्थि परिचत्तंति । तं तेन तुण्णागस्स उवनीअं जहा एअस्स दसिआओ बंधाहि । कत्तोत्ति पुच्छिए भणति-सामिणा दिन्नं, तुण्णाओ भणति-तंपि से अद्धं आणेहि, जया पडिहिति भगवओ अंसाओ, ततो अहं तुण्णामि ताहे लक्खामोल्लं भविस्सइत्ति तो तुज्झवि अद्धं मज्झवि अद्धं, पडिवण्णो ताहे पओलग्गिओ, सेसमुवरि भणिहामि । अलं प्रसङ्गेन ॥ तस्य भगवतश्चारित्रप्रतिपत्तिसमनन्तरमेव मनः पर्यायज्ञानमुदपादि, सर्वतीर्थकृतां चायं क्रमो, यत आह-

[भा.११०] तिहिं नाणेहिं समग्गा तित्थयरा जाव हुंति गिहवासे ।
पडिवण्णंमि चरित्ते चउनाणी जाव छउमत्था ॥

वृ- 'त्रिभिर्ज्ञानैः' मतिश्रुतावधिभिः संपूर्णाः तीर्थकरणशीलास्तीर्थकरा भवन्तीति योगः । किं सर्वमेव कालम् ?, नेत्याह-यावद्गृहवासे भवन्तीति वाक्यशेषः । प्रतिपन्ने चारित्रे चतुर्ज्ञानिनो, भवन्तीत्यनुवर्त्तते । कियन्ते कालमित्याह-यावत् छद्मस्थाः तावदपि चतुर्ज्ञानिन इति गाथार्थः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवमसौ भगवान् प्रतिपन्नचारित्रः समासादितमनः पर्यवज्ञानो ज्ञातखण्डादापृच्छय स्वजनान् कर्मारग्राममगमत् । आह च भाष्यकारः–

[भा.१११] बहिआ य नायसंडे आपुच्छित्ताण नायए सव्वे ।
दिवसे मुहुत्तसेसे कुमारगामं समणनुपत्तो ॥

वृ- बहिर्धा च कुण्डपुरात् ज्ञातखण्ड उद्याने, आपृच्छ्य 'ज्ञातकान्' स्वजनान् 'सर्वान्' यथासन्निहितान्, तस्मात् निर्गतः, कर्मारग्रामगमनायेति वाक्यशेषः । तत्र च पथद्वयं-एको जलेन अपरः स्थल्यां, तत्र भगवान् स्थल्यां गतवान्, गच्छंश्च दिवसे मुहूर्त्तशेषे कर्मारग्राममनुप्राप्त इति गाथार्थः ॥ तत्र प्रतिमया स्थित इति । अत्रान्तरे–तत्थेगो गोवो, सो दिवसं बइल्ले वाहित्ता गामसमीवं पत्तो, ताहे चिंतेइ-एए गामसमीवे चरंतु, अहंपि ता गावीओ दुहामि, सोऽवि ताव अन्तो परिकम्मं करेइ; तेऽवि बइल्ला अडविं चरन्ता पविट्ठा, सो गोवो निग्गओ, ताहे सामिं पुच्छइ -कहिं बइल्ला ?, ताहे सामी तुण्हिक्को अच्छइ, सो चिंतेइ-एस न याणइ, तो मग्गिउं पवत्तो सव्वरत्तिंपि, तेऽवि बइल्ला सुचिरं भमित्ता गामसीमवमागया माणुसं दट्ठूण रोमंथंता अच्छंति, ताहे सो आगओ, ते पेच्छइ तत्थेव निविट्ठे, ताहे आसुरुत्तो एएण दामएण आहणामि, एएण मम एए हरिआ, पभाए घेत्तूण वच्चिहामित्ति । ताहे सक्को देवराया चिंतेइ-किं अज्ज सामी पढमदिवसे करेइ ?, जाव पेच्छइ गोवं धावंतं, ताहे सो तेन थंभिओ, पच्छा आगओ तं तज्जेति-दुरप्पा ! न याणसि सिद्धत्थरायपुत्तो एस पव्वइओ । एयंमि अंतरे सिद्धत्थो सामिस्स माउसियाउत्तो बालतवोकम्मेणं वाणमन्तरो जाएल्लओ, सो आगओ ? ताहे सक्को भणइ-भगवं ! तुब्भ उवसग्गबहुलं, अहं बारस वरिसाणि तुब्भं वेयावच्च करेमि, ताहे सामिणा भणिअं-न खलु देविंदो ! एयं भूअं वा (भव्वं वा भविस्सं वा) जण्णं अरहंता देविंदाण वा असुरिंदाण वा निस्साए कट्टु केवलनाणं उप्पाडेंति, सिद्धिं वा वच्चंति, अरहंता सएण उट्ठाण-बलविरियपुरिसकारपरक्कमेणं केवलनाणं उप्पाडेंति । ताहे सक्केण सिद्धत्थे भण्णइ-एस तव नियल्लओ, पुणो य मम वयणं–सामिस्स जो परं मारणंतिअं उवसग्गं करेइ तं वारेज्जसु, एवमस्तु तेन पडिस्सुअं, सक्को पडिगओ, सिद्धत्थो ठिओ । तद्दिवसं सामिस्स छट्ठपारणयं, तओ भगवं विहरमाणो गओ कोल्लागसन्निवेसे, तत य भिक्खट्ठा पविट्ठो बहुलमाहणगेहं, जेणामेव कुल्लाए सन्निवेसे बहुले माहणे, तेन महुधयसंजुत्तेण परमण्णेण पडिलाभिओ, तत्थ पंच दिव्वाइं पाउब्भूयाइं । अमुमेवार्थमुपसंहरन्नाह–

नि. (४६१) गोवनिमित्तं सक्कस्स आगमो वागरेइ देविंदो ।
कोल्लाबहुले छट्ठस्स पारणे पयस वसुहारा ॥

वृ- ताडनायोद्यगोपनिमित्तं प्रयुक्तावधेः 'शक्रस्य' देवराजस्य, किम् ?, आगमनं आगमः अभवत्, विनिवार्य च गोपं 'वागरेइ देविंदो' त्ति भगवन्तमभिवन्द्य 'व्याकरोति' अभिधत्ते देवेन्द्रो-भगवन् ! तवाहं द्वादश वर्षाणि वैयावृत्त्यं करोमीत्यादि, 'वागरिंसु' वा पाठान्तरं, व्याकृतवानिति भावार्थः, सिद्धार्थं वा तत्कालप्राप्तं व्याकृतवान् देवेन्द्रः-भगवान् त्वया न मोक्तव्य इत्यादि । गते देवराजे भगवतोऽपि कोल्लाकसन्नियेशे बहुलो नाम ब्राह्मणः 'षष्ठस्य' तपोविशेषस्य पारणके, किम ?, 'पयस' इति पायसं समुपनीतवान्, 'वसुधारे'ति तद्गृहे वसुधारा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पतितेति गाथाक्षरार्थः ॥ कथानकम्-तओ सामी विहरमाणो गओ मोरागं सन्निवेसं, तत्थ मोराए उवट्ठिओ, ताहे सामिणा पुव्वपओगेण बाहा पसारिआ, सो भणति-अत्थि घरा, एत्थ कुमारवर ! अच्छाहि, तत्थ सामी एगराइअं वसित्ता पच्छा गतो, विहरति, तेन य भणियं-विवित्ताओ वसहीओ, जइ वासारत्तो कीरइ, आगच्छेज्जह अनुग्गहीया होज्जामो । ताहे सामी अ उउबद्धिए मासे विहरेत्ता वासावासे उवागते तं चेव दूइज्जंतयगामं एति, तत्थेगंमि उडवे वासावासं ठिओ । पढमपाउसे य गोरूवाणि चारिं अलभंताणि जुण्णाणि तणाणि खायंति, तानि य घराणि उव्वेल्लेंति, पच्छा ते वारेंतिं, सामी न वारेइ, पच्छा दूइज्जंतगा तस्स कुलवइस्स साहेंतिं जहा एस एताणि न निवारेतिं, ताहे सो कुलवती अनुसासति भणति-कुमारवर ! सउणीवि ताव अप्पनिअं नेड्डं रक्खति, तुमं वारेज्जासि, सप्पिवासं भणति । ताहे सामी अचियत्तोग्गहोत्तिकाउं निग्गओ, इमे य तेन पंच अभिग्गहा गहीआ, तं जहा-अचियत्तोग्गहे न वसियव्वं १ निच्चं वोसट्ठकाएण २ मोनेनं ३ पाणीसु भोत्तव्वं ४गिहत्थो न वंदियव्वो नऽब्भुट्ठेतव्वो ५, एते पंच अभिग्गहा । तत्थ भगवं अद्धमासं अच्छित्ता तओ पच्छा अट्ठितगामं गतो । तस्स पुन अट्ठिअगामस्स पढमं वद्धमाणगं नाम आसी, सो य किह अट्ठियग्गामो जाओ ?, धनदेवो नाम वाणिअओ पंचहिं धुरसएहिं गणिमधरिममेज्जस्स भरिएहिं तेणंतेण आगओ, तस्स समीवे य वगेवती नाम नदी, तं सगडाणि उत्तरंति, तस्स एगो बइल्लो सो मूलधूरे जुप्पति,स तावच्चएण ताओ गड्डिओ उत्तीण्णाओ, पच्छा सो पडिओ छिन्नो, सो वाणिअओ तस्स तणपाणिअं पुरओ छड्डेऊण तं अवहाय गओ । सोऽवि तत्थ वालुगाए जेट्ठामूलमासे अतीव उण्हेण तण्हाए छुहाए य परिताविज्जइ,

वद्धमाणओ य लोगो तेणंतेण पाणिअं तणं च वहति, न य तस्स कोइवि देइ, सो गोणो तस्स पओसमावण्णो, अकामतण्हाछुहाए य मरिऊणं तत्थेव गामे अग्गुज्जाणे सूलपाणीजक्खो उप्पन्नो, उवउत्तो पासंति तं बलीवद्दसरीरं, ताहे रुसिओ मारिं विउव्वति, सो गामो मरिउमारद्धो, ततो अद्दण्णा कोउगसयाणि करेंति, तहवि न ट्ठाति, ताहे भिन्नो गामो अन्नगामेसु संकंतो, तत्थावि न मुंचति, ताहे तेसिं चिंता जाता-अम्हेहिं तत्थ न नज्जइ-कोऽवि देवो वा दानवो वा विराहिओ, तम्हा तहिं चेव वच्चामो, आगया समणा नगरदेवयाए विउलं असनं पानं खाइमं साइमं उवक्खडावेंति, बलिउवहारे करेंता समंतओ उड्ढमुहा सरणं सरणंति, जं अम्हेहिं सम्मं न चेट्ठिअं तस्स खमह, ताहे अंतलिक्खपडिवण्णो सो देवो भणति-तुम्हे दुरप्पा निरनुकंपा, तेणंतेण य एह जाह य, तस्स गोणस्स तणं वा पाणिअं वा न दिन्नं, अतो नत्थि भे मोक्खो, ततो ण्हाया पुप्फबलिहत्थगया भणंति-दिट्ठो कोवो पसादमिच्छामो, ताहे भणति-एताणि मानुसअट्ठिआणि पुंजं काऊण उवरि देवउलं करेह, सूलपाणिं च तत्थ जक्खं बलिवद्दं च एगपासे ठवेह, अन्ने भणंति-बइल्लरूवं करेह, तस्स य हेट्ठा ताणि से अट्ठिआणि निहणह, तेहिं अचिरेण कयं, तत्थ इंदसम्मो नाम पडियरगो कओ । ताहे लोगो पंथिगादि पेच्छइ पंडरट्ठिअगामं देवउलं च ताहे पुच्छंति अन्ने-कयराओ गामाओ आगता जाह वत्ति, ताहे भणंति-जत्थ ताणि अट्ठियाणि, एवं अट्ठिअगामो जाओ । तत्थ पुन वाणमंतरघरे जो रत्तिं परिवसति सो तेन सूलपाणिणा जक्खेण वाहेत्ता पच्छा रत्तिं मारिज्जइ, ताहे तत्थ दिवसं लोगे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अच्छति, पच्छा अन्नत्थ गच्छति, इंदसम्मोऽवि धूपं दीवगं च दाउं दिवसओ जाति । इतो य तत्थ सामी आगतो, दूतिज्ञंतगामपासाओ, तत्थ य सव्वो लोगो एगत्थ पिंडिओ अच्छइ, सामिणा देवकुलिगो अनुन्नविओ, सो भणति-गामो जाणति, सामिणा गामो मिलिओ चेवाणुन्नविओ, गामो भणति-एत्थ न सक्का वसिउं, सामी भणइ-नवरं तुम्हे अनुजाणह, ते भणंति-ठाह, तत्थेक्केक्को वसहिं देइ, सामी नेच्छति, जाणति-जहेसो संबुज्झिहितित्ति, ततो एगकूणे पडिमं ठिओ, ताहे सो इंदसम्मो सूरे धरेंते चेव धूवपुप्फं दाउं कप्पडियकारोडिय सव्वे पलोइत्ता भणति-जाह मा विनस्सिहिह, तंपि देवज्ञयं भणति-तुब्भेवि नीध, मा मारिहिज्ञिहिध, भगवं तुसिणीओ, सो वंतरो चिंतेइ–देवकुलिएण गामेण य भण्णंतोऽवि न जाति, पेच्छ जं से करेमि, ताहे संझाए चेव भीमं अट्टट्टहासं मुअंतो बीहावेति ।। अभिहितार्थोपसंहारायेदं गाथाद्वयमाह–

नि. (४६२) दूइज्ञंतगा पिउणो वयंस तिव्वा अभिग्गहा पंच ।
अचियत्तुग्गहि न वसन १ निच्चं वोसट्ठ २ मोनेनं ३ ॥

नि. (४६३) पाणीपत्तं ४ गिहिवंदनं च ५ तओ वद्धमाणवेगवई ।
धनदेव सूलपाणिंदसम्म वासऽट्ठिअग्गामे ॥

वृ- विहरतो मोराकसन्निवेशं प्राप्तस भगवत्‌ः तन्निवासी दूइज्ञन्तकाभिधानपाषणडस्थो दूतिज्ञंतक एवोच्यते, 'पितुः' सिद्धार्थस्य 'वयस्यः' स्निग्धकः, सोऽभिवाद्य भगवन्तं वसतिं दत्तवान् इति वाक्यशेषः । विहृत्य च अन्यत्र वर्षाकालगमनाय पुनस्तत्रैवागतेन विदित-कुलपत्यभिप्रायेण, किम् ?, 'तिव्वा अभिग्गहा पंच' त्ति 'तीव्राः' रौद्राः अभिग्रहाः पञ्च गृहीता इति वाक्यशेषः । ते चामी 'अचियत्तुग्गहि न वसणं ति' 'अचियत्तं' देशीवचनं अप्रीत्यभिधायकं, ततश्च तत्स्वामिनो न प्रीतिर्यस्मिन्नवग्रहे सोऽप्रीत्यवग्रहः तस्मिन् 'न वसनं' न तत्र मया वसि-तव्यमित्यर्थः, 'निच्चं वोसट्ठं मोनेनंति' नित्यं सदा व्युत्सृष्टकायेन सता मौनेन विहर्त्तव्यं 'पाणिपत्तं'-ति पाणिपात्रभोजिना भवितव्यं, 'गिहिवंदणं चेत्ति' गृहस्थस्य वन्दनं, चशब्दादभ्युत्थानं च न कर्त्तव्यमिति । एतान् अभिग्रहान् गृहीत्वा तथा तस्मान्निर्गत्य 'वासऽट्ठिअग्गामेत्ति' वर्षाकालं अस्थिग्रामे स्थित इति अध्याहारः, स चास्थिग्रामः पूर्वं वर्धमानाभिधः खल्वासीत्, पश्चात् अस्थिग्रामसंज्ञामित्थं प्राप्तः, तत्र हि वेगवतीनदी, तां धनदेवाभिधानः सार्थवाहः तं प्रधानेन गवाऽनेकशकटसहितः समुत्तीर्णः, तस्य च गोरनेकशकटस-मुत्तारणतो हृदयच्छेदो बभूव, सार्थवाहः तं तत्रैव परित्यज्य गतः, स वर्धमाननिवासिलोकाप्रतिजागरितो मृत्वा तत्रैव शूलपाणिनामा यक्षोऽभवत्, दृष्टभयलोककारितायतने स प्रतिष्ठितः, इन्द्रशर्मनामा प्रतिग-जागरको निरूपित इत्यक्षरार्थः ।।

एवमन्यासामपि गाथानामक्षरगमनिका स्वबुद्ध्या कार्येति । कथानकशेषम्–

जाहे सो अट्टट्टहासादिणा भगवंतं खोभेउं पवत्तो ताहे सो सव्वो लोगो तं सद्दं सोऊण भीओ, अज्ञ सो देवज्ञओ मारिज्ञइ, तत्थ उप्पलो नाम पच्छाकडओ पासावच्चिज्ञओ परिव्वायगो अट्ठंगमहानिमित्तजाणगो जनपासाओ तं सोऊण मा तित्थंकरो होज्ञ अधितिं करेइ, बीहेइ य रत्तिं, गंतुं, ताहे सो वाणमंतरो जाहे सद्देण न बीहेति ताहे हत्थिरूवेणुवसग्गं करेति, पिसायरूवेणं नागरूवेणं य, एतेहिंपि जाहे न तरति खोभेउं ताहे सत्तविहं वेदणं उदीरेइ, तं जहा–सीसवेयणं

कण्ण अच्छि नासा दंत नह पट्ठिवेदणं च एक्केक्का वेअणा समत्थ पागतस्स जीवितं संकामेउं, किं पुन सत्तवि समेताओ उज्जलाओ ?, अहियासेति, ताहे सो देवो जाहे न तरति चालेउं वा खाभेउं वा, ताहे परितंतो पायवडितो खामेति, खमह भट्टारगत्ति । ताहे सिद्धत्थो उद्धाइओ भणति-हंभो सूलपाणी ! अपत्थिअपत्थिआ न जाणसि सिद्धत्थरापुत्तं भगवंतं तित्थयरं, जइ एयं सक्को जाणइ तो ते निव्विसयं करेइ, ताहे सो भीओ दुगुणं खामेइ, सिद्धत्थो से धम्मं कहेइ, तत्थ उवसंतो महिमं करेइ सामिस्स, तत्थ लोगो चिंतेइ-सो तं देवज्ञयं मारित्ता इदानिं कीलइ, तत्थ सामी देसूणे चत्तारि जामे अतीव परियाविओ पहायकाले मुहुत्तमेत्तं निद्दापमादं गओ, तत्थ इमे दस महासुमिणे पासित्ता पडिबुद्धो, तं जहा-तालपिसाओ हओ, सेअसउणो चित्तकोइलो अ दोऽवि एते पज्जुवासंता दिट्ठा, दामदुगं च सुरहिकुसुममयं, गोवग्गो अ पज्जुवासेंतो, पउमसरो विबुद्धपंकओ,

– सागरो अ मे नित्थिण्णोत्ति, सूरो अ पइन्नरस्सीमंडलो उग्गमंतो, अंतेहि य मे मानुसुत्तरो वेढिओत्ति, मंदरं चारूढोमित्ति । लोगो पभाए आगओ, उप्पलो अ, इन्दसम्मो अ, ते अ अच्चणिअं दिव्वगंधचुण्णपुप्फवासं च पासंति, भट्टारगं च अक्खयसव्वंगं, ताहे सो लोगो सव्वो सामिस्स उक्किट्ठसिंहणायं करेंतो पाएसु पडिओ भणति–जहा देवज्ञएणं देवो उवसामिओ, महिमं पगओ, उप्पलोऽवि सामिं दट्ठुं वंदिअ भणियाइओ–सामी ! तुब्भेहिं अंतिमरातीए दस सुमिणा दिट्ठा, तेसिमं फलंति-जो तालपिसाओ हओ तमचिरेण मोहणिज्जं उम्मूलेहिसि, जो असेअसउणो तं सुक्कज्झाणं काहिसि, जो विचित्तो कोइलो तं दुवालसंगं पन्नवेहिसि, गोवग्गफलं च ते चउव्विहो समणसमणीसावगसाविगासंघो भविस्सइ, पउमसरा चउलिवहदेवसंघाओ भविस्सइ, जं च सागरं तिन्निो तं संसारमुत्तारिहिसि, जो अ सूरो तमचिरा केवलनाणं ते उप्पज्जिहित्ति, जं चंतेहिं माणुसुत्तरो वेढिओ तं ते निम्मलो जसकीत्तिपयावो सयलतिहुअणे भविस्सइत्ति, जं च मंदरमारूढोऽसि तं सीहासणत्थो सदेवमणुआसुराए परिसाए धम्मं पन्नवेहिसित्ति, दामदुगं पुन न याणामि, सामी भणति-हे उप्पल ! जण्णं तुमं न जाणासि तण्णं अहं दुविहं सागाराणगारिअं धम्मं पण्णवेहामित्ति, ततो उप्पलो वंदित्ता गओ, तत्थ सामी अद्धमासेण खमति । एसो पढमो वासारत्तो १ ।

ततो सरए निग्गंतूण मोरागं नाम सन्निवेसं गओ, तत्थ सामी बाहिं उज्जाने ठिओ, तत्थ मोराए सन्निवेसे अच्छंदा नाम पासंडत्था, तत्थेगो अच्छंदओ तंमि सन्निवेसे कोंटलवेंटलेण जीवति, सिद्धत्थओ अ एक्कल्लओ दुक्खं अच्छति बहुसंमोइओ पूअं च भगवओ अपिच्छंतो, ताहे सो वोलेंतयं गोवं सद्दावेत्ता भणति–जहिं पधावितो जहिं जिमिओ पंथे य जं दिट्ठं, दिट्ठो य एवंगुणविसिट्ठो सुमिणो, तं वागरेइ, सो आउट्टो गंतुं नामे मित्तपरिचिताणं कहेति, सव्वेहिं गामे य पगासिअं–एस देवज्ञओ उज्जाणे तीताणागयवट्टमाणं जाणइ, ताहे अन्नोऽवि लोओ आगओ, सव्वस्स वागरेइ, लोगो आउट्टो महिमं करेइ, लोगेन अविरहिओ अच्छइ, ताहे सो लोगो भणइ-एत्थ अच्छंदओ नाम जाणओ, सिद्धत्थो भणति-सो न किंचि जाणइ, ताहे लोगो गंतुं भणइ-तुमं न किंचि जाणसि, देवज्ञसो जाणइ, सो लोयमज्झे अप्पाणं ठावेउकामो भणति-एह जामो, जइ मज्झ पुरओ जाणइ तो जाणइ, ताहे लोगेण परिवारिओ एइ, भगवओ पुरओ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ठिओ तणं गहाय भणति-एयं तणं किं छिंदिहिति नवत्ति, सो चिंतेइ-जइ भणति-न छिज्जिहि इति ता णं छिंदिस्सं, अह भणइ-छिज्जिहिति, तो न छिंदिस्सं, ततो सिद्धत्थेण भणिअं-न छिज्जिहित्ति, सो छिंदिउमाढत्तो, सक्केण य उवओगो दिन्नो, वज्जं पक्खित्तं, अच्छंदगस्स अंगुलीओ दसवि भूमीए पडिआओ, ताहे लोगेन खिंसिओ, सिद्धत्थो य से रुट्ठो ।

अमुमेवार्थं समासतोऽभिधित्सुराह-

नि. (४६४) रोद्दा य सत्त वेयण थुइ दस सुमिणुप्पलऽद्धमासे य ।
मोराए सक्कारं सक्को अच्छंदए कुविओ ॥

वृ- समासव्याख्या-रौद्राश्च सप्त वेदना यक्षेण कृताः,स्तुतिश्च तेनैव कृता,दश स्वप्ना भगवता दृष्टाः, उत्पलः फलं जगाद, 'अद्धमासे यत्ति' अर्धमासमर्धमासं च क्षपणमकार्षीत्, मोरायां लोकः सत्कारं चकार, शक्रः अच्छन्दके तीर्थकरहीलनात् परिकुपित इत्यक्षरार्थः ॥

इयं निर्युक्तिगाथा, एतास्तु मूलभाष्यकारगाथाः-

[भा.११२] भीमट्टहास हत्थी पिसाय नागे य वेदना सत्त ।
सिरकण्णनासदंते नहऽच्छी पट्ठीय सत्तमिआ ॥

[भा.११३] तालपिसायं १ दो कोइला य ३ दामदुगमेव ४ गोवग्गं ५ ।
सर ६ सागर ७ सूरं ८ ते ९ मंदर १० सुविणुप्पले चेव ॥

[भा.११४] मोहे १ य झाण २ पवयण ३ धम्मे ४ संघे ५ य देवलोए ६ य ।
संसारं ७ नाण ८ जसे ९ धम्मं परिसाएँ मज्झंमि ॥

वृ- भीमाट्टहासः हस्ती पिशाचो नागश्च वेदनाः सप्त शिरःकर्णनासादन्तनखाक्षि पृष्ठौ च सप्तमी, एतद्व्यन्तरेण कृतं । तालपिशाचं द्वौ कोकिलौ च दामद्वयमेव गोवर्गं सरः सागरं सूर्यं अन्त्रं मन्दरं 'सुविणुप्पले चेवत्ति' एतान् स्वप्नान् दृष्टवान्, उत्पलश्चैव फलं कथितवान् इति । तच्चेदम्-मोहं च ध्यानं प्रवचनं धर्मः सङ्घश्च 'देवलोकश्च' देवजनश्चेत्यर्थः, संसारं ज्ञानं यशः धर्मं पर्षदो मध्ये, मोहं च निराकरिष्यसीत्यादिक्रियायोगः स्वबुद्ध्या कार्यः ॥

मोरागसन्निवेसे बाहिं सिद्धत्थ तीतमाईणि ।
साहइ जनस्स अच्छंद पओसो छेअणे संक्को ॥

अर्थोऽस्याः कथानकोक्त एव वेदितव्य इति । इयं गाथा सर्वपुस्तकेषु नास्ति, सोपयोगा च । कथानकशेषम्-तओ सिद्धत्थो तस्स पओसमावण्णो तं लोगं भणति-एस चोरो, कस्स नेन चोरियंति भणह, अत्थेत्थ वीरघोसो नाम कम्मकरो ? सो पादेसु पडिओ अहंति, अत्थि तुब्भ अमुककाले दसपलयं वट्टयं नट्ठपुव्वं ? आमं अत्थि, तं एएण हरियं, तं पुन कहिं ? एयस्स पुरोहडे महिसिंदुरुक्खस्स पुरत्थिमेणं हत्थमित्तं गंतूणं तत्थ खणिउं गेण्हह । ताहे गता, दिट्ठं, आगया कलकलं करेमाणा । अन्नंपि सुणह-अत्थि एत्थं इंदसम्मो नाम गिहवई ? ताहे भणति-अत्थि, ताहे सो सयमेव उवट्ठिओ, जहा अहं, आनवेह, अत्थि तुब्भ ओरणओ अमुयकालंमि नट्ठिल्लओ ? स आह-आमं अत्थि, सो एएन मारित्ता खइओ, अट्ठियाणि य से बदरीए दक्खिणे पासे उक्कुरुडियाए निहयाणि, गया, दिट्ठाणि, उक्किट्ठकलयलं करेंता आगया, ताहे भणंति-एयं बितिअं । अमुमेवार्थं प्रतिपादयन्नाह निर्युक्तिकृत्-

नि. (४६५) तण छेयंगुलि वीरघोस महिसिंदु दसपलिअं ।
बिइइंदसम्म ऊरण बयरीए दाहिणुक्कुरुडे ॥

वृ- अच्छन्दकः तृणं जग्राह, छेदः अङ्गुलीनां कृतः खल्विन्द्रेण, 'कम्मार वीरघोसत्ति' कर्मकरो वीरघोषः, तत्संबन्ध्यनेन 'महिसिंदु दसपलियं' दशपलिकं करोटकं गृहीत्वा महिसेन्दु-वृक्षाधः स्थापितं, एकं तावदिदं, द्वितीयं-इन्द्रशर्मण ऊरणकोऽनेन भक्षितः, तदस्थीनि चाद्यापि तिष्ठन्त्येव बदर्या अध दक्षिणोत्कुरुट इति ॥ ततियं पुन अवच्चं, अलाहि भणितेण, ते निबंधं करेंति, पच्छा भणति–वच्चह भज्जा से कहेहिइ, सा पुन तस्स चेव छिड्डाणि मग्गमाणी अच्छति, ताए सुयं-जहा सो विडंबिओत्ति, अंगुलीओ से छिन्नाओ, सा य तेन तद्दिवसं पिट्टिया, सा चिंतेति-नवरि एउ गामो, ताहे साहेमि, ते आगया पुच्छंति, सा भणइ-मा से नामं गेण्हइ, भगिनीए पती ममां नेच्छति, ते उक्किट्ठिं करेमाणा तं भणंति-एस पावो, एवं तस्स उड्डाहो जाओ, एस पावो, जहा न कोइ भिक्खंपि देइ, ताहे अप्पसागारियं आगओ भणइ-भगवं ! तुब्भे अन्नत्थवि पुज्जिज्जह, अहं कहिं जामि ?, ताहे अचियत्तोग्गहोत्तिकाउं सामी निग्गओ । ततो वच्चमाणस्स अंतरा दो वाचालाओ-दाहिणा उत्तरा य, तासिं दोण्हवि अंतरा दो नईओ–सुवण्णवालुगा रुप्पवालुगा य, ताहे सामी दक्खिण्णवाचालाओ सन्निवेसाओ उत्तरवाचालं वच्चइ, तत्थ सुवण्णवालुयाए नदीए पुलिणे कंटियाए तं वत्थं विलग्गं, सामी गतो, पुनोऽवि अवलोइअं, किं निमित्तं ?, केई भणंति-ममत्तीए, अवरे–किं थंडिल्ले पडिअं अथंडिल्लेत्ति, केई-सहसागारेणं, केई–वरं सिस्साणं सुलभं भविस्सइ ?, तं च तेन धिज्जाइएण गहिअं, तुण्णागस्स उवनीअं, सयसहस्समोल्लं जायं, एक्केक्कस्स पन्नासं सहस्साणि जायाणि । अमुमेवार्थमभिधित्सुराह–

नि. (४६६) तइ अमवच्चं भज्जा कहिही नाहं तओ पिउवयंसो ।
दाहिणवायालसुवण्णावालु गाकंटए वत्थं ॥

वृ- पदानि-तृतीयमवाच्यं भार्या कथयिष्यति । ततः पितुर्वयस्यस्तु दक्षिणवाचालसुवर्ण-वालुकाकण्टके वस्त्रं, क्रियाऽध्याहारतोऽक्षरगमनिका स्वबुद्धया कार्येति । ताहे सामी वच्चइ उत्तरवाचालं, तत्थ अंतरा कनगखलं नाम आसमपयं, तत्थ दो पंथा-उज्जुगो वंको य, जो सो उज्जुओ सो कणगखलंमज्झेण वच्चइ, वंको परिहरंतो, सामी उज्जुगेण पहाविओ, तत्थ गोवालेहिं वारिओ, एत्थ दिट्ठिविसो सप्पो, मा एएण वच्चह, सामी जाणति-जहेसो भविओ संबुज्झिहिति, तओ गतो जक्खघरमंडवियाए पडिमं ठिओ । सो पुन को पुव्वभवे आसी ? खमगो, पारणए गओ वासिगभत्तस्स, तेन मंडुक्कलिया विराहिआ, खुड्डएण परिचोइओ, ताहे सो भणति-किं इमाओऽवि मए मारिआओ लोयमारिआओ दरिसेइ, ताहे खुड्डएणनायं-वियाले आलोहिइत्ति, सो आवस्सए आलोएत्ता उवविट्ठो, खुड्डओ चिंतेइ-नूनं से विस्सरियं, ताहे सारिअं, रुट्ठो आहणामित्ति उद्धाइओ खुड्डगस्स, तत्थ थंभे आवडिओ मओ विराहियसामण्णो जोइसिएसु उववन्नो, ततो चुओ कणगखले पंचण्हं तावससयाणं कुलवइस्स तावसीए उदरे आयाओ, ताहे दारगो जाओ, तत्थ से कोसिओत्ति नामं कयं, सो य अतीव तेन सभावेन चंडकोधो, तत्थ अन्नेऽवि अत्थि कोसिया, तस्स चंडकोसिओत्ति नामं कयं, सो कुलवती मओ, ततो य सो कुलवई जाओ, सो तत्थ वणसंडे मुच्छिओ, तेसिं तावसाण तानि फलानि न देइ, ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अलभंता गया दिसोदिसं, जोऽवि तत्थ गोवालादी एति तंपि हंतुं धाडेइ, तस्स अदूरे सेयंबियानाम नयरी, ततो रायपुत्तेहिं आगंतूणं विरहिए पडिनिवेसेण भग्गो विनासिओ य, तस्स गोवालएहिं कहियं, सो कंटियाणं गओ, ताओ छड्डेत्ता परसुहत्थो गओ रोसेन धमधमंतो, कुमारेहिं दिट्ठो एंतओ, तं दट्ठूण पलाया, सोऽवि कुहाडहत्थो पहावेत्ता खड्डे आवडिऊण पडिओ,

सो कुहाडो अभिमुहो ठिओ, तत्थ से चिरं दो भाए कयं, तत्थ मओ तंमि चेव वनसंडे दिट्ठीविसो सप्पो जाओ, तेन रोसेण लोभेण य तं रक्खइ वणसंडं, तओ ते तावसा सव्वे दड्ढा, जे अदड्ढगा ते नट्ठा, सो तिसंझं वणसंडं परियंचिऊणं जं सउणगमवि पासइ तं डहइ, ताहे सामी तेन दिट्ठो, ततो आसुरुत्तो, ममं न याणसि ?, सूरं णिज्झाइत्ता पच्छा सामिं पलोएइ, सो न डज्झइ जहा अन्ने, एवं दो तिन्नि वारा, ताहे गंतूण डसइ, डसित्ता अवक्कमइ--मा मे उवरिं पडिहित्ति, तहवि न मरइ, एवं तिन्नि वारे, ताहे पलोएंतो अच्छति अमरिसेणं, तस्स भगवओ रूवं पेच्छंतस्स ताणि विसभरियाणि अच्छीणि विज्झाइयाणि सामिणो कंतिसोम्मयाए, ताहे सामिणा भणिअं-उवसम भो चंडकोसिया !, ताहे तस्स ईहापोहमग्गणगवेसणं करेंतस्स जातीसरणं समुप्पन्नं, ताहे तिक्खुत्तो आयाहिणपयाहिणं करेत्ता भत्तं पच्चक्खाइ मनसा, तित्थगरो जाणइ, ताहे सो बिले तुंडं छोढुं ठिओ, माऽहं रुट्ठो संतो लोगं मारेहं, सामी तस्स अनुकंपाए अच्छइ, सामिं दट्ठूण गोवा लवच्छवाला अल्लियंति, रुक्खेहिं आवरेत्ता अप्पाणं तस्स सप्पस्स पाहाणे खिवंति, न चलतित्ति अल्लीणो कट्ठेहिं घट्टिओ, तहवि न फंदतित्ति तेहिं लोगस्स सिट्ठं, तो लोगो आगंतूण सामिं वंदित्ता तंपि य सप्पं महेइ, अन्नाओ य घयविक्किणियाओ तं सप्पं मुक्खेंतिं, फरुसिंति, सो पिवीलियाहिं गहिओ, तं वेयणं अहियासेत्ता अद्धमासस्स मओ सहस्सारे उववन्नो । अमुमेवार्थमुपसंहरन्नाह–

नि. (४६७) उत्तरवाचालंतरवनसंडे चंडकोसिओ सप्पो ।
न डहे चिंता सरणं जोइस कोवा ऽहि जाओऽहं ॥

वृ- उत्तरवाचालन्तरवनखण्डे चण्डकौशिकः सर्पः न ददाह चिन्ता स्मरणं ज्योतिष्कः क्रोधाद् अहिर्जातोऽहमिति, अक्षरगमनिका स्वबुद्ध्या कार्येति ॥ अनुक्तार्थं प्रतिपादयन्नाह–

नि. (४६८) उत्तरवायाला नागसेन खीरेण भोयणं दिव्वा ।
सेयवियाय पएसीं पंचरहे निज्जरायाणो ॥

वृ- गमनिका–उत्तरयाचाला नागसेनः क्षीरेण भोजनं दिव्यानि श्वेतम्ब्यां प्रदेशी पञ्चरथैः नैयका राजानः–नैयका गोत्रतः, प्रदेशे निजा इत्यपरे । शेषो भावार्थः कथानकादवसेयः तच्चेदम्–तओ सामी उत्तरवाचालं गओ, तत्थ पक्खक्खमणपारणते अतिगओ, तत्थ नागसेनेन गिहवइणा खीरभोयणेन पडिलाभिओ, पंच दिव्वाणि पाउब्भूयाणि, ततो सेयबियं गओ, तत्थ पदेसी राया समणोवासओ भगवओ महिमं करेइ, तओ भगवं सुरभिपुरं वच्चइ, तत्थंतराए नेज्जगा रायाणो पंचहिं रथेहिं एन्ति पएसिरण्णो पासे, तेहिं तत्थ सामी वंदिओ पूइओ य, ततो सामी सुरभिपुरं गओ, तत्थ गंगा उत्तरियव्वा, तत्थ सिद्धजत्तो नाम नाविओ, खेमल्लो नाम सउणजाणओ, तत्थ य नावाए लोगो विलग्गइ, कोसिएण महासउणेण वासियं, कोसिओ नाम उलूको, ततो खेमिलेण भणियं-जारिसं सउणेण भणियं तारिसं अम्हेहिं मारणतियं पावियव्वं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किं पुन ? इमस्स महरिसिस्स पभावेन मुच्चिहामे, सा य नावा पहाविया, सुदाढेण य नागकुमारराइणा दिट्ठो भयवं नावाए ठिओ, तस्स कोवो जाओ, सो य किर जो सो सीहो वासुदेवत्तणे मारिओ सो संसारं भमिऊण सुदाढो नागो जाओ, सो संवट्टगवायं विउव्वेत्ता नावं ओबोलेउं इच्छइ। इओ य कंबलसंबलाणं आसनं चलियं, का पुन कंबलसंबलाण उप्पत्ती ?–महुराए नगरीए जिणदासो वाणियओ सड्ढो, सोमदासो साविया, दोऽवि अभिगयाणि परिमाणकडाणि, तेहिं चउप्पयस्स पच्चक्खायं, ततो दिवसदेवसिअं गोरसं गिण्हंति, तत्थ य आभीरी गोरसं गहाय आगया, सा ताए सावियाए भण्णइ-मा तुमं अन्नत्थ भमाहि, जत्तिअं आनेसि तत्तिअं गेण्हामि, एवं तासिं संगयं जायं, इमावि गंधपुडियाइ देइ, इमावि कूइगादि दुद्धं दहियं वा देइ, एवं तासिं सोहियं जायं।

अन्नया तासिं गोवाणं विवाहो जाओ, ताहे ताणि निमंतेंति, ताणि भणन्ति-अम्हे वाउलाणि न तरामो गंतुं, जं तत्थ उवउज्जति भोयणे कडुगभंडादी वत्थाणि आभरणाणि धूवपुप्फगंधमल्लादि वधूवरस्स तं तेहिं दिन्नं, तेहिं अतीव सोभावियं, लोगेन य सलाहियाणि, तेहिं तुट्ठेहिं दो तिवरिसा गोणपोतलया हट्ठसरीरा उवट्ठिया कंबलसंबलत्ति नामेणं, तानि नेच्छंति, तानि नेच्छंति, बला बंधिउं गयाणि, ताहे तेन सावएन चिंतिय–जइ मुच्चिहिंति ताहे लोगो वाहेहित्ति, ता एत्थ चेव अच्छंतु, फासुगचारी किणिऊणं दिज्जइ, एवं पोसिज्जंति, सोऽवि सावओ अट्ठमीचउद्दसीसु उववासं करेइ पोत्थयं च वाएइ, तेऽवि तं सोऊण भद्दया जाया सण्णिणो य, जद्दिवसं सावगो न जेमेइ तद्दिवसं तेऽवि न जेमंति, तस्स सावगस्स भावो जाओ-जहा इमे भविया उवसंता, अब्भहिओ य नेहो जाओ, ते रुवस्सिणो, तस्स य सावगस्स मित्तो, तत्थ भंडीरमणजत्ता, तारिसा नत्थि अन्नस्स बइल्ला, ताहे तेन ते भंडीए जोएत्ता नीआ अनापुच्छाए, तत्थ अन्नेण अन्नेणवि समं धावं कारिया, ताहे ते छिन्ना, तेन ते आनेउं बद्धा, न चरंति नय पाणियं पिबंति, जाहे सव्वहा सव्वहा नेच्छंति ताहे सो सावओ तेसिं भत्तं पच्चक्खाइ, नमुक्कारं च देइ, ते कालगया नागकुमारेसु उववन्ना, ओहिं पउंजंति, जाव पेच्छंति तित्थगरस्स उवसग्ग कीरमाणं, ताहे तेहिं चिंतियं-अलाहि ता अन्नेणं, सामिं मोएमो, आगया, एगेन नावा गहिया एगो सुदाढेण समं जुज्झइ, सो महिड्ढिगो, तस्स पुन चवण्कालो, इमे य अहुणोववण्णया, सं तेहिं पराइओ, ताहे ते नागकुमारा तित्थगरस्स महिमं करेंति सत्तं रूवं च गायंति, एवं लोगोऽवि ततो सामी उत्तिण्णो, तत्थ देवेहिं सुरहिगंधोदयवासं पुप्फवासं च वुट्ठं, तेऽवि पडिगया।

अमुमेवार्थमुपसंहरन्नाह–

नि. (४६९) सुरहिपुर सिद्धजत्तो गंगा कोसिअ विऊय खेमिलओ।
नाग सुदाढे सीहे कंबलसबला य जिनमहिमा ॥

नि. (४७०) महुराए जिनदासो आहीर विवाह गोण उववासे।
भंडीर मित्त अवच्चे भत्ते नागोहि आगमनं ॥

नि. (४७१) वीरवरस्स भगवओ नावारूढस्स कासि उवसग्गं।
मिच्छादिट्ठि परद्धं कंबलसबला समुत्तारे ॥

वृ- पदानि-सुरभिपुरं सिद्धयात्रः गङ्गा कौशिकः विद्वांश्च खेमिलकः नागः सुदंष्ट्रः सिंहः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- द्वे एव च षष्ठशते एकोनत्रिंशदधिके उपोषितो भगवान्, एवं न कदाचिन्नित्यभक्तं चतुर्थभक्तं वा 'से' तस्याऽऽसीदिति गाथार्थः ॥

नि. (५३४) बारस वासे अहिए छट्ठं भत्तं जहन्नयं आसि ।
सव्वं च तवोकम्मं अपाणयं आसि वीरस्स ॥

वृ- द्वादश वर्षाण्यधिकानि भगवतश्छद्मस्थस्य सतः 'षष्ठं भक्तं' द्विरात्रोपवासलक्षणं जघन्यकमासीत्, तथा सर्वं च तपःकर्म अपानकमासीद्वीरस्य, एतदुक्तं भवति– क्षीरादिद्रवाहार-भोजनकाललभ्यव्यतिरेकेण पानकपरिभोगो नाऽऽसेवित इति गाथार्थः ॥

पारणककालमान-प्रतिपादनायाह–

नि. (५३५) तिन्नि सए दिवसाणं अउणावण्णं तु पारणाकालो ।
उक्कुडुयनिसेज्जाणं ठियपडिमाणं सए बहुए ॥

वृ- त्रीणि शतानि दिवसानामेकोनपञ्चाशदधिकानि तु पारणकालो भगवत इति, तथा 'उत्कुटुकनिषद्यानां' स्थितप्रतिमानां शतानि बहूनीति गाथार्थः ॥

नि. (५३६) पव्वज्जाए पढमं दिवसं एत्थं तु पक्खिवित्ता णं ।
संकलियंमि उ संते जं लद्धं तं निसामेह ॥

वृ- प्रव्रज्यायाः सम्बन्धिभूतं दिवसं प्रथमम् 'एत्थं तु' अत्रैवोक्तलक्षणे दिवसगणे प्रक्षिप्य संकलिते तु सति यल्लब्धं तत् 'निशामयत' शृणुतेति गाथार्थः ॥

नि. (५३७) बारस चेव य वासा मासा छच्चेव अद्धमासो य ।
वीरवरस्स भगवओ एसो छउमत्थपरियाओ ॥

वृ- द्वादश चैव वर्षाणि मासाः षडेवार्धमासश्च वीरवरस्य भगवतः एष छद्मस्थपर्याय इति ।

नि. (५३८) एवं तवोगुणरओ अनुपुव्वेणं मुनी विहरमाणो ।
घोरं परीसहचमुं अहियासित्ता महावीरो ॥

वृ- 'एवम्' उक्तेन प्रकारण तपोगुणेषु रतः-तपोगुणरतः 'अनुपूर्वेण' क्रमेण मन्यते जगतः त्रिकालावस्थामिति मुनिः विहरन् 'घोरां' रौद्रां 'परीषहचमूं' परीषहसेनामधिसह्य महावीरइति।

नि. (५३९) उप्पन्नंमि अनंते नट्ठंमि य छाउमत्थिए नाणे ।
राईए संपत्तो महसेनवणंमि उज्जाने ॥

वृ- 'उत्पन्ने' प्रादुर्भूते कस्मिन्? -'अनन्ते' ज्ञेयानन्तत्वात् अशेषज्ञेयविषयत्वाच्च केवलमनन्तं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नष्टे च छाद्मस्थिके ज्ञाने, राव्यां संप्राप्तो महसेनवनमुद्यानं, किमिति ? भगवतो ज्ञानरत्नोत्पत्ति-समनन्तरमेव देवाः चतुर्विधा अप्यागता आसन्, तत्र च प्रवज्याप्रतिपत्ता न कश्चिद्विद्यत इति भगवान् विज्ञाय विशिष्टधर्मकथनाय न प्रवृत्तवान्, ततो द्वादशसु योजनेषु मध्यमा नाम नगरी, तत्र सोमिलार्यो नाम ब्राह्मणः, स यज्ञं यष्टुमुद्यतः, तत्र चैकादशोपाध्यायाः खल्वागता इति, ते च चरमशरीराः, ततश्च तान् विज्ञाय ज्ञानोत्पत्तिस्थाने मुहूर्तमात्रं देवपूजां जीतमितिकृत्वा अनुभूय देशनामात्रं कृत्वा असंख्येयाभिर्देवकोटीभिः परिवृतो देवोद्योतेनाशेषं पन्थानमुद्योतयन् देवपरिकल्पितेषु पद्मेषु चरणन्यासं कुर्वन् मध्यमानगर्यां महसेनवनोद्यानं संप्राप्त इति ।

नि. (५४०) अमरनररायमहिओ पत्तो धम्मवरचक्कवट्टित्तं ।
बीयंपि समोसरणं पावाए मज्झिमाए उ ॥

वृ- स एव भगवान् अमराश्च नराश्च अमरनराः तेषां राजानः तैर्महितः-पूजितः प्राप्तः,किमिइ त्याह–धर्म्मश्चासौ वरश्च धर्मवरः तस्य चक्रवर्त्तित्वं, तत्प्रभुत्वमित्यर्थः । पुनर्द्वितीयं समवसरणम्, अपिशब्दः पुनःशब्दार्थे द्रष्टव्यः, पापायां मध्यमायां, प्राप्त इत्यनुवर्त्तते, ज्ञानोत्पत्तिस्थान-कृतपूजापेक्षया चास्य द्वितीयता इति गाथार्थः ॥

नि. (५४१) तत्थ किल सोमिलज्ञोत्ति माहणो तस्स दिक्खकालंमि ।
पउरा जनजाणवया समागया जन्नवाडंमि ॥

वृ- 'तत्र' पापायां मध्यमायां, किलशब्दः पूर्ववत्, सोमिलार्य इति ब्राह्मणः, तस्य 'दीक्षाकाले' यागकाल इत्यर्थः, 'पौराः' विशिष्टनगरवासिलोकसमुदायः'जनाः' सामान्यलोकाः जनपदेषु भवा जानपदाः, विषयलोका इत्यर्थः, समागता यज्ञपाट इति गाथार्थः ॥ अत्रान्तरे–

नि. (५४२) एगंते य विवित्तो उत्तरपासंमि जन्नवाडस्स ।
तो देवदानविंदा करेंति महिमं जिणिंदस्स ॥

वृ- एकान्ते च विविक्ते उत्तरपार्श्वे यज्ञपाटकस्य ततो देवदानवेन्द्राः कुर्वन्ति महिमां जिनेन्द्रस्य, पाठान्तरम् वा 'कासी महिमं जिणिंदस्स' कृतवन्त इति गाथार्थः ॥ अमुमेवार्थं किञ्चिद्विशेषयुक्तं भाष्यकारः प्रतिपादयन्नाह–

[भा.११५] भवणवइवाणमंतरजोइसवासी विमाणवासी य ।
सव्विड्ढिए सपरिसा कासी नाणुप्पयामहिमं ॥

वृ- भवनपतिव्यन्तरज्योतिर्वासिनो विमानवासिनश्च सर्वर्द्ध्या हेतुभूतया सपरिषदः, कृतवन्तः ज्ञानोत्पत्ति-महिमाम् इति गाथार्थः ॥

साम्प्रतं समवसरणवक्तव्यतां प्रपञ्चतः प्रतिपादयन्नेतां द्वारगाथामाह–

नि. (५४३) समोसरणे केवइया रूव पुच्छ वागरेण सोयपरिणामे ।
दानं च देवमल्ले मल्लाणयणे उवरि तित्थं ॥

वृ- 'समोसरणे' त्ति समवसरणविषयो विधिर्वक्तव्यः, ये देवाः यत् प्राकारादि यद्विधं यथा कुर्वन्तीत्यर्थः । 'केवइय' त्ति कियन्ति सामायिकानि भगवति कथयति मनुष्यादयः प्रतिपद्यन्ते ?, कियतो वा भूभागादपूर्वे समवसरणेऽदृष्टपूर्वेण वा साधुना आगन्तव्यमिति । 'रूवत्ति' भगवतो रूपं व्यावर्णनीयं, 'पुच्छ' त्ति किमुत्कृष्टरूपतया भगवतः प्रयोजनमिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृच्छा कार्योत्तरं च वक्तव्यं, कियन्तो वा युगपदेव हृद्गतं संशयं पृच्छन्तीति, 'वागरणं' ति व्याकरणं भगवतो वक्तव्यं, यथा युगपदेव सङ्ख्यातीतानामपि पृच्छतां व्याकरोतीति, 'पुच्छावागरणं' ति एकं वा द्वारं, पृच्छाया व्याकरणं पृच्छाव्याकरणमित्येतद्वक्तव्यं, 'सोय-परिणामे'त्ति श्रोतृषु परिणामः श्रोतृपरिणामः, स च वक्तव्यः, यथा-सर्वश्रोतृणां भागवती वाक् स्वभाषया परिणमत इति। 'दानं च'त्ति वृत्तिदानं प्रीतिदानं च कियत् प्रयच्छन्ति चक्रवर्त्यायः तीर्थकरप्रवृत्तिकथकेभ्य इति वक्तव्यं। 'देवमल्ले' त्ति गन्धप्रक्षेपात् देवानां सम्बन्धि माल्यं देवमाल्यं-बल्यादि कः करोति कियत्परिमाणं चेत्यादि। 'मल्लानयणे'त्ति माल्यानयने यो विधिरसौ वक्तव्यः, 'उवरि तित्थं' ति उपरीति पौरुष्यामतिक्रान्तायां तीर्थमिति-गणधरो देशनां करोतीति गाथासमुदायाथः। अवयवार्थं तु प्रतिद्वारं वक्ष्यामः। इयं च गाथा केषुचित्पुस्तकेषु अन्यत्रापि दृश्यते, इह पुनर्युज्यते, द्वारनियमतोऽसंमोहेन समवसरणवक्तव्यताप्रतीतिनिबन्धनत्वादिति। आह-इहं समवसरणं किं यत्रैव भगवान् धर्ममाचष्टे तत्रैव नियमतो भवत्युत नेथ्याशङ्कापनोद-मुखेन प्रथमद्वारावयवार्थं विवृण्वन्नाह-

नि. (५४४) जत्थ अपुव्वोसरणं जत्थ व देवो महिड्ढिओ एइ।
वाउदयपुप्फवद्दलपागारतियं च अभिओगा॥

वृ- यत्र क्षेत्रे अपूर्वं समवसरणं भवति, अवृत्तपूर्वमित्यथः, तथा यत्र वा भूतसमवसरणे क्षेत्रे देवो महर्द्धिकः 'एति' आगच्छति, तत्र किमित्याह-वातं रेण्वाद्यपनोदाय उदकवर्द्दलं भाविरेणुसंतापोपशान्तये तथा पुष्पवर्द्दलं क्षितिविभूषायै, वर्द्दलशब्द उदकपुष्पयोः प्रत्येक-मभिसंबध्यते, तथा प्राकारत्रितयं च सर्वमेतदभियेगमर्हन्तीत्याभियोग्याः-देवाः, कुर्वन्तीति वाक्यशेषः, अन्यत्र त्वनियम इति गाथाथः॥ एवं तावत् सामान्येन समवसरणकरणविधिरुक्तः, साम्प्रतं विशेषण प्रतिपादनयन्नाह-

नि. (५४५) मणिकनगरयणचित्तं भूमीभागं समंतओ सुरभिं।
आजोअनंतरेणं करेंति देवा विचित्तं तु॥

वृ- मणयः-चन्द्रकान्तादयः कनकं-देवकाञ्चनं रत्नानि-इन्द्रनीलादीनि, अथवा स्थल-समुद्भवा मणयः जलसमुद्भवानि रत्नानि, तैश्चित्रं, भूभागं 'समन्ततः' सर्वासु दिक्षु 'सुरभि' सुगन्धिगन्धयुक्तं, किम्?-कुर्वन्ति देवा विचित्रं तु, किंपरिमाणमित्याह-'आयोजनान्तरतो' योजनपरिमाणमित्यर्थः, पुनर्विचित्रग्रहणं वैचित्र्यनानात्वख्यापनार्थम्, अथवा कुर्वन्ति देवा विचित्रं तु, किंभूतम्?-मणिकनकरत्नविचित्रमिति गाथार्थः॥

नि. (५४६) वेंटट्ठाइं सुरभि जलथलयं दिव्वकुसुमनीहारिं।
पइरंति समंतेणं दसद्धवण्णं कुसुमवास॥

वृ- वृन्तस्थायि सुरभि जलस्थलजं दिव्यकुसुमनिर्हारि प्रकिरन्ति समन्ततः दशार्द्धवर्णं कुसुमवर्षं, भावार्थः सुगमो, नवरं निर्हारि-प्रबलो गन्धप्रसर इति गाथार्थः॥

नि. (५४७) मणिकनगरयणचित्ते चउद्दिसिं तोरणे विउव्वंति।
सच्छत्तसालंभजियमयरद्धयचिंधसंठाणे॥

वृ- मणिकनकरत्नचित्राणि 'चउद्दिसि'त्ति चतसृष्वपि दिक्षु तोरणानि विकुर्वन्ति, किंवि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शिष्टान्यत आह–छत्रं-प्रतीतं सालभञ्जिकाः–स्तम्भपुत्तलिकाः 'मकर' त्ति मकरमुखोपलक्षणं ध्वजाः प्रतीताः चिह्नानि–स्वस्तिकादीनि संस्थानं-तद्रचनाविशेष एव, सच्छोभनानि छत्रसालभञ्जिकामकरध्वजचिह्नसंस्थानानि येषु तानि तथोच्यन्ते, एतानि व्यन्तर-देवाः कुर्वन्तीति ।

नि. (५४८) तिन्नि य पागारवरे रयणविचित्ते तहिं सुरगणिंदा ।
मणिकंचनकविसीसगविभूसिरूते विउव्वेंति ॥

वृ- त्रींश्च प्राकारवरान् रत्नविचित्रान् तत्र सुरगणेन्द्रा मणिकाञ्चनकपिशीर्षकविभूषितांस्ते विकुर्वन्तीति, भावार्थः स्पष्टः, उत्तरगाथायां वा व्याख्यास्यति ॥ सा चेयम्–

नि. (५४९) अब्भंतर मज्झ बहिं विमानजोइभवणाहिवकया उ ।
पागारा तिन्नि भवे रयणे कनगे य रयए य ॥

वृ- अभ्यन्तरे मध्ये च बहिर्विमानज्योतिर्भवनाधिपकृतास्तु आनुपूर्व्या प्राकारास्त्रयो भवन्ति, 'रयणे कनगे य रयए य'त्ति रत्नेषु भवो रात्नः रत्नमय इत्यर्थः, तं विमानाधिपतयः कुर्वन्ति, कनके भवः कानकः तं ज्योतिर्वासिनः कुर्वन्ति, राजतो–रूप्यमयश्च तं भवनपतयः कुर्वन्ति इति गाथार्थः ॥

नि. (५५०) मणिरयणहेमयाविय कविसीसा सव्वरयणिया दारा ।
सव्वरयणामय च्चिय पडागधयतोरणविचित्ता ॥

वृ- मणिरत्नहेममयान्यपि च कपिशीर्षकाणि, तत्र पञ्चवर्णमणिमयानि प्रथमप्राकारे वैमानिकाः, नानारत्नमयानि द्वितीये ज्योतिष्काः, हेममयानि तृतीये भवनपतय इति, तथा सर्वरत्नमयानि द्वाराणि त एव कुर्वन्ति, तथा सर्वरत्नमयान्येव मूलदलतः पताकाध्वजप्रधानानि तोरणानि विचित्राणि कनकचन्द्रस्वस्तिकादिभिः, अत एव प्रागुक्तं मणिकनकरत्न चित्रत्वम् एतेषामविरुद्धमिति गाथार्थः ॥

नि. (५५१) तत्तो य संमतेणं कालागरुकुंदुरुक्कमीसेणं ।
गंधेन मनहरेणं धूवघडीओ विउव्वेंति ॥

वृ- ततश्च समन्ततः कृष्णागरुकुन्दुरुक्कमिश्रेण गन्धेन मनोहारिणा युक्ताः, किम् ? -धूपघटिका विकुर्वन्ति त्रिदशा एवेति गाथार्थः ॥

नि. (५५२) उक्कुट्ठिसीहणायं कलयलसद्देन सव्वओ सव्वं ।
तित्थगरपायमूले करेंति देवा निवयमाणा ॥

वृ- तत्रोत्कृष्टिसिंहनादं तीर्थकरपादमूले कुर्वन्ति देवा निपतमानाः, उत्कृष्टिः-हर्षविशेषप्रेरितो ध्वनिविशेषः, किंविशिष्टम् ? -कलकलशब्देन 'सर्वतः' सर्वासु दिक्षु युक्तं 'सर्वम्' अशेषमिति।

नि. (५५३) चइदुमपेढछंदय आसनछत्तं च चामराओ य ।
जं चऽन्नं करणिज्जं करेंति तं वाणमंतरिया ॥

वृ- चैत्यद्रुमम्–अशोकवृक्षं भगवतः प्रमाणात् द्वादशगुणं तथा पीठं तदधो रत्नमयं तस्योपरि देवच्छन्दकं तन्मध्ये सिंहासनं तदुपरि छत्रातिच्छत्रं च, चः समुच्चय, चामरे च यक्षहस्तगते, चशब्दात् पद्मसंस्थितं धर्मचक्रं च, यच्चान्यद्वातोदकादि 'करणीयं' कर्त्तव्यं कुर्वन्ति तद् व्यन्तरा देवा इति गाथार्थः । आह–किं यद्यत्समवसरणं भवति तत्र तत्रायमित्थं नियोग उत नेति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रोच्यते–

नि. (५५४) साहारणओसरणे एवं जत्थिड्ढिमं तु ओसरइ ।
एक्कु चिय तं सव्वं करेइ भयणा उ इयरेसिं ॥

वृ- साधारणसमवसरणे एवं साधारणं -सामान्यं यत्र देवेन्द्रा आगच्छन्ति तत्रैवं नियोगः, 'जत्थिड्ढिमं तु ओसरइ'त्ति यत्र तु ऋद्धिमान् समवसरति कश्चिदिन्द्रसामानिकादिः तत्रैक एव तत्प्राकारादि सर्वं करोति, अत एव च मूलटीकाकृताऽभ्यधायि–''असोगपायवं जिनउच्चत्ताओ बारसगुणं सक्को विउव्वइ'' इत्यादि, 'भयणा उ इतरेसिं' ति यदीन्द्रा नागच्छन्ति ततो भवनवास्यादयः कुर्वन्ति वा न वा समवसरणमित्येवं भजनेतरेषामिति गाथार्थः ॥

नि. (५५५) सूरोदय पच्छियमाए ओगाहन्तीएँ पुव्वओऽईइ ।
दोहिं पउमेहिं पाया मग्गेन य होइ सत्तऽन्ने ॥

वृ- एवं देवैर्निष्पादिते समवसरणे सूर्योदये-प्रथमायां पौरुष्याम्, अन्यदा पश्चिमायां 'ओगाहंतीए' त्ति अवगाहन्त्याम्–आगच्छन्त्यामित्यर्थः, 'पुव्वओऽतीती'ति पूर्वद्वारेण 'अतीति'त्ति आगच्छति प्रविशतीत्यर्थः । कथमित्याह–द्वयोः 'पद्मयोः' सहस्त्रपत्रयोः देवपरिकल्पितयोः पादौ स्थापयन्निति वाक्यशेषः, 'मग्गेन य होंति सत्तऽन्ने'त्ति मार्गतश्च पृष्टतश्च भवन्ति सप्तान्ये च भगवत्ः पद्मा इति, तेषां च यद्यत् पश्चिम् तत्तत्पादन्यासं कुर्वतो भगवतः पुरतस्तिष्ठतीति गाथार्थः ॥

नि. (५५६) आयाहिण पुव्वमुहो तिदिसिं पडिरूवगा उ देवकया ।
जेट्ठगणी अन्नो वा दाहिणपुव्वे अदूरंमि ॥

वृ- स एवं भगवान् पूर्वद्वारेण प्रविश्य 'आदाहिन' त्ति चैत्यद्रुमप्रदक्षिणां कृत्वा 'पुव्वमुहो'त्ति पूर्वाभिमुख उपविशतीति, 'तिदिसिं पडिरूवगा उ देवकय' त्ति शेषासु तिसृषु दिक्षु प्रतिरूपकाणि तु तीर्थकराकृतीनि सिंहासनादियुक्तानि देवकृतानि भवति, स च ज्येष्ठो वाऽन्यो वेति, प्रायो ज्येष्ठ इति, स ज्येष्ठगणिरन्यो वा दक्षिणपूर्वदिग्भागे अदूरे-प्रत्यासन्न एव भगवतो भगवन्तं प्रणिपत्य निषीदतीति क्रियाऽध्याहारः, शेषगणधरा अप्येवमेव भगवन्तमभिवन्द्य तीर्थकरस्य मार्गतः पार्श्वतश्च निषीदन्तीति गाथार्थः ॥ भुवनगुरुरूपस्य त्रैलोक्यगतरूप-सुन्दरतरत्वात् त्रिदशकृतप्रतिरूपकाणां किं तत्साम्यमसाम्यं वेत्याशङ्कानिरासार्थमाह–

नि. (५५७) जे ते देवेहिं कया तिदिसिं पडिरूवगा जिनवरस्स ।
तेसिंपि तप्पभावा तयानुरूवं हवइ रूवं ॥

वृ- यानि तानि देवैः कृतानि तिसृषु दिक्षु प्रतिरूपकाणि जिनवरस्य, तेषामपि 'तत्प्रभावात्' तीर्थकरप्रभावात् 'तदनुरूपं' तीर्थकररूपानुरूपं भवति रूपमिति गाथार्थः ॥

नि. (५५८) तित्थाइसेससंजय देवी वेमाणियाण समणीओ ।
भवणवइवाणमंतर जोइमियाणं च देवीओ ॥

वृ- 'तीर्थं' गणधरस्तस्मिन् स्थिते सति 'अतिसेससंजय'त्ति अतिशयिनःसंयताः,तथा देव्यो वैमानिकानां तथा श्रमण्यः तथा भवनपतिव्यन्तरज्योतिष्कानां च देव्य इति समुदायार्थः ॥ अवयवार्थप्रतिपादनाय आह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (५५९) केवलिनो तिउण जिनं तित्थपणामं च मग्गओ तस्स ।
मनमादीवि नमंता वयंति सट्ठाणसट्ठाणं ॥

वृ- केवलिनः 'त्रिगुणं' त्रिःप्रदक्षिणीकृत्य 'जिनं' तीर्थकरं तीर्थप्रणामं च कृत्वा मार्गतः 'तस्य' तीर्थस्य गणधरस्य निषीदन्तीति क्रियाध्याहारः, 'मनमाईवि नमंता वयंति सट्ठाणसट्ठाणं'ति मनः पर्यायज्ञानिनोऽपि भगवन्तमभिवन्द्य तीर्थं केवलिनश्च पुनः केवलिपृष्ठतो निषीदन्तीति। आदिशब्दान्निरतिशयसंयता अपि तीर्थकरादीनभिवन्द्य मनः पर्यायज्ञानिनां पृष्ठतो निषीदन्ति, तथा वैमानिकदेव्योऽपि तीर्थकरादीनभिवन्द्य साधुपृष्ठतः तिष्ठन्ति न निषीदन्ति, तथा श्रमण्योऽपि तीर्थकरसाधूनभिवन्द्य वैमानिकदेवीपृष्ठतः तिष्ठन्ति न निषीदन्ति, तथा भवनपतिज्योतिष्कव्यन्तरदेव्योऽपि तीर्थकरादीनभिवन्द्य दक्षिणपश्चिमदिग्भागे प्रथमं भवनपति-देव्यः ततो ज्योतिष्कव्यन्तरदेव्यः तिष्ठन्तीति, एवं मनःपर्याय-ज्ञान्यादयोऽपि नमन्तो व्रजन्ति स्वस्थानं स्वस्थानमिति गाथार्थः ॥

नि. (५६०) भवणवई जोइसिया बोद्धव्वा वाणमंतरसुरा य ।
वेमाणिया य मनुया पयाहिणं जं च निस्साए ॥

वृ- भवनपतयः ज्योतिष्का बोद्धव्या व्यंतरसुराश्च, एते हि भगवन्तमभिवन्द्य साधूंश्च यथोपन्यासमेवोत्तर-पश्चिमे पार्श्वे तिष्ठन्तीत्येवं बोद्धव्याः, तथा वैमानिका मनुष्याश्च, चशब्दात् स्त्रियश्चास्य, चशब्दस्य व्यवहित उपन्यासः । किम् ? 'पयाहिणं' प्रदक्षिणां कृत्वा तीर्थकरादीन-भिवन्द्य तेऽप्युत्तरपूर्वे दिग्भागे यथासंख्यमेव तिष्ठन्तीति ॥ अत्र च मूलटीकाकारेण भवनपति-देवीप्रभृतीनां स्थानं निषीदनं वा स्पष्टाक्षरैर्नोक्तम्, अवस्थानमात्रमेव प्रतिपादितं, पूर्वाचार्यो-पदेशलिखितपट्टकादिचित्रकर्मबलेन तु सर्वा एव देव्यो न निषीदन्ति, देवाः पुरुषाः स्त्रियश्च निषीदन्तीति प्रतिपादयन्ति केचन इत्यलं प्रसङ्गेन । 'जं च निस्साए' त्ति, यः परिवारो यं च निश्रां कृत्वा आयातः स तत्पार्श्वे एव तिष्ठतीति गाथार्थः ॥ साम्प्रतमभिहितमेवार्थं संयतादि-पूर्वद्वारादिप्रवेशविशिष्टं प्रतिपादयन्नाह भाष्यकारः-

[भा.११६] संजयवेमणित्थी संजय (इ) पुव्वेण पविसिउं वीरं ।
काउं पयाहिणं पुव्वदक्खिणे ठंति दिसिभागे ॥

वृ- गमनिका-संयता वैमानिकस्त्रियः संयत्यः पर्वेण प्रवेष्टुं वीरं कृत्वा प्रदक्षिणं पूर्वदक्षिणे तिष्ठन्ति दिग्भागे इति गाथार्थः ॥

[भा.११७] जोइसिय भवणवंतरदेवीओ दक्खिणेण पविसंति ।
चिट्ठंति दक्खिणावरदिसिंमि तिगुणं जिनगं काउं ॥

वृ- गमनिका-ज्योतिष्कभवनव्यन्तरदेव्यो दक्षिणेन प्रविश्य तिष्ठन्ति दक्षिणापरदिशि त्रिगुण जिनं कृत्वा इति गाथार्थः ॥

[भा.११८] अवरेण भवनवासी वंतरजोइससुरा य अइगंतुं ।
अवरुत्तरदिसिभागे ठंति जिनं तो नमंसित्ता ॥

वृ- गमनिका-अपरेण भवनवासिनो व्यन्तरज्योतिष्कसुराश्चातिगन्तुम् अपरोत्तरदिग्भागे तिष्ठन्ति जिनं नमस्कृत्य इति गाथार्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.११९] समहिंदा कप्पसुरा राया नरनारिओ उदीणेणं ।
पविसित्ता पुव्वुत्तरदिसीएँ चिट्ठंति पंजलिआ ॥

वृ- गमनिका–समहेन्द्राः कलपसुरा राजानो नरा नार्यः 'औदीच्येन' उत्तरेण इत्यर्थः, प्रविश्य पूर्वोत्तरदिशि तिष्ठन्ति प्राञ्जलय इति गाथार्थः ॥ भावार्थः सर्वासां सुगम एव ॥ अभिहितार्थोपसङ्गहाय इदमाह–

नि. (५६१) एक्केक्कीय दिसाए दिगं दिगं होइ सन्निविट्ठं तु ।
आदिचरिमे विमिस्सा थीपुरिसा सेस पत्तेयं ॥

वृ- पूर्वदक्षिणाअपरदक्षिणाअपरोत्तरापूर्वोत्तराणामेकैकस्यां दिशि उक्तलक्षणम् संयतवैमानिकाङ्गनासंयत्यादि त्रिकं त्रिकं भवति सन्निविष्टं तु आदिचरमे पूर्वदक्षिणापूर्वोत्तरदिगूद्वये विमिश्राः संयतादयः स्त्रीपुरुषाः शेषदिगूद्वये प्रत्येकं भवन्तीति गाथार्थः ॥

तेषां चेत्थं स्थितानां देवनराणां स्थितिप्रतिपादनाय आह–

नि. (५६२) एंतं महिड्डियं पणिवयंति ठियमवि वयंति पणमंता ।
नवि जंतणा न विकहा न परोप्परमच्छरो न भयं ॥

वृ- येऽल्पर्द्धयः पूर्वं स्थिताः ते आगच्छन्तं महर्द्धिकं प्रणिपतन्ति, स्थितमपि महर्द्धिकं पश्चादागताः प्रणमन्तो व्रजन्ति, तथा नापि यन्त्रणा–पीडा न विकथा न परस्परमत्सरो न भयं तेषां विरोधिसत्त्वानामपि भवति, भगवतोऽनुभावात्, इति गाथार्थः ॥

एते च मनुष्यादयः प्रथमप्राकारान्तर एव भवन्ति ये उक्ताः, यत आह–

नि. (५६३) बिइयंमि होंति तिरिया तइए पागारमंतरे जाणा ।
पागारजढे तिरियाऽवि होंति पत्तेय मिस्सा वा ॥

वृ- द्वितीये प्राकारान्तरे भवन्ति तिर्यञ्चः, तथा तृतीये प्राकारान्तरे यानानि, 'प्राकारजढे' प्राकाररहिते बहिरित्यर्थः, तिर्यञ्चोऽपि भवन्ति, अपिशब्दात् मनुष्या देवा अपि, ते च प्रत्येकं मिश्रा वेति, ते पुनः प्रविशन्तो भवन्ति निर्गच्छन्तश्चैके इति गाथार्थः ॥

द्वितीयाद्वारावयवार्थमभिधित्सुः सम्बन्धगाथामाह–

नि. (५६४) सव्वं च देसविरतिं सम्मं घेच्छति व होति कहणा उ ।
इहरा अमूढलकखो न कहेइ भविस्सइ न तं च ॥

वृ- 'सव्वं च देसविरति'ति सर्वविरतिं च देशविरतिं च, विरतिशब्द उभयथापि सम्बध्यते, सम्यक्त्वं ग्रहीष्यति वा भवति कथना तु प्रवर्त्तते कथनमित्यर्थः, 'इहर' त्ति अन्यथा न मूढलक्षोऽमूढलक्षः सर्वज्ञेयाविपरीतवेत्ता इत्यर्थः, किम् ? न कथयति । आह–समवसरणकरणप्रयासो विबुधानामनर्थकः, कृतेऽपि नियमतोऽकथनात् इत्याह–भविष्यति न तच्च, यद् भगवति कथयत्यन्यतमोऽप्यन्यतमसत्सामायिकं न प्रतिपद्यते इति, भविष्यत्कालस्त्रिकालोपलक्षणार्थ इति गाथार्थः ॥ 'केवइय' त्ति कियन्ति सामायिकानि मनुष्यादयः प्रतिपद्यन्ते इत्याह–

नि. (५६५) मनुए चउमन्नयरं तिरिए तिन्नि व दुवे व पडिवज्जे ।
जइ नत्थि नियमसो च्चिय सुरेसु सम्मत्तपडिवत्ती ॥

वृ- अथवा–कथं भविष्यति न तच्चेत्याह–यत-'मनुए' गाहा । व्याख्या–मनुष्ये प्रतिपत्तरि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चतुर्णामन्यतप्रतिपत्तिरिति, पाठान्तरं वा 'मणुओ चउ अन्नतरं' ति मनुष्यश्चतुर्णामन्यतमत्प्रतिपद्यते, तिर्यञ्चः त्रीणि वा–सर्वविरतिवर्जानि, द्वे वा-सम्यक्त्वश्रुतसामायिके प्रतिपद्यन्ते इति। यदि नास्ति मनुष्यतिरश्चां कश्चित्प्रतिपत्ता ततो नियमत एव सुरेषु सम्यक्त्व-प्रतिपत्तिर्भवतीति गाथार्थः ॥ स चेत्थं धर्ममाचष्टे–

नि. (५६६) तित्थपणामं काउं कहेइ साहारणेण सद्देणं।
सव्वेसिं सण्णीणं जोयणनीहारिणा भगवं ॥

वृ- 'नमस्तीर्थाये' त्यभिधाय प्रणामं च कृत्वा कथयति, साधारणेन प्रतिपत्तिमङ्गीकृत्य शब्देन, केषां साधारणे-नेत्याह-'सर्वेषाम्' अमरनरतिरश्चां सञ्ज्ञिनां, किंविशिष्टेन ?-'योजननिर्हारिणा' योजनव्यापिना भगवानिति, एतदुक्तं भवति–भागवतो ध्वनिः अशेषसमवसरणस्थसञ्ज्ञिजिज्ञासितार्थप्रतिपत्तिनिबन्धनं भवति, भगवतः सातिशयत्वादिति गाथार्थः।

आह–कृतकृत्यो भगवान् किमिति तीर्थंप्रणामं करोतीति ?, उच्यते–

नि. (५६७) तप्पुव्विया अरहया पूइयपूता य विनयकम्मं च।
कयकिच्चोऽवि जह कहं कहए नमए तहा तित्थं ॥

वृ- तीर्थं–श्रुतज्ञानं तत्पूर्विका 'अर्हत्ता' तीर्थकरता, तदभ्यासप्राप्तेः, पूजितेन पूजा पूजितपूजा सा च कृताऽस्य भवति, लोकस्य पूजितपूजकत्वाद्, भगवताऽप्येतत्पूजितमिति प्रवृत्तेः, तथा 'विनयकर्म च' वक्ष्यमाणवैनयिकधर्ममूलं कृतं भवति, अथवा–कृतकृत्योऽपि यथा कथां कथयति नमति तथा तीर्थमिति। आह–इदमपि धर्मकथनं कृतकृत्यस्यायुक्तमेव, न, तीर्थकरनामगोत्रकर्मविपाकत्वात्, उक्तं च–'तं च कथं वेदिज्जती' त्यादि गाथार्थः ॥ आह–क्व केन साधुना कियतो वा भूभागात् समवसरणे खल्वागन्तव्यम्, अनागच्छतो वा किं प्रायश्चित्त मिति ?, उच्यते–

नि. (५६८) जत्थ अपुव्वोसरणं न दिट्ठपुव्वं व जेन समणेणं।
बारसहिं जोयणेहिं सो एइ अनागमे लहुया ॥

वृ- यत्रापूर्वं समवसरणं, तत्तीर्थकरापेक्षया अभूतपूर्वमित्यर्थः, न दृष्टपूर्वं वा येन श्रमणेन द्वादशभ्यो योजनेभ्यः स आगच्छति, 'अनागच्छति' अवज्ञया ततोऽनागमे सति 'लहुग' त्ति चतुर्लघवः प्रायश्चित्तं भवतीति गाथार्थः ॥ द्वारम् ॥ अन्ये त्वेकगाथयैवानया प्रकृतद्वारव्याख्यां कुर्वते, साऽप्यविरुद्धा व्युत्पन्ना चेति ॥ रूपपृच्छाद्वारावयवार्थ विवृण्वन् आह–

नि. (५६९) सव्वसुरा जइ रूवं अंगुट्ठापमाणयं विउव्वेज्जा।
जिनपायंगुट्ठं पइ न सोहए तं जहिंगालो ॥

वृ- कीदृग् भगवतो रूपमित्यत आह-सर्वसुरा यदि रूपमशेषसुन्दररूपनिर्माणपणशक्त्या अङ्गुष्ठप्रमाणकं विकुर्वीरन् तथापि जिनपादाङ्गुष्ठं प्रति न शोभते तद् यथाऽङ्गार इति गाथार्थः।

साम्प्रतं प्रसङ्गतो गणधरादीनां रूपसम्पदभिधित्सयाऽऽह–

नि. (५७०) गणहर आहार अनुत्तरा (य) जाव वण चक्कि वासु बला।
मंडलिया ता हीना छट्ठाणगया भवे सेसा ॥

वृ- तीर्थकररूपसम्पत्सकाशादनन्तगुणहीना गणधरा रूपतो भवन्ति, गणधररूपेभ्यः सका-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शादनन्तगुणहीनाः खल्वाहारकदेहाः, आहारकदेहरूपेपेभ्योऽनन्तगुणहीनाः 'अनुत्तराश्चे' ति अनुत्तरवैमानिका भवन्ति, एवमनन्तरानन्तर-देहरूपेभ्योऽनन्तगुणहानिर्द्रष्टव्या, ग्रैवेयकाच्युता-रणप्राणनतानतसहस्त्रारमहाशुक्रलान्तकब्रह्मलोकमाहेन्द्रसनत्कुमारे शान सौधर्मभवनवा-सिज्योतिष्कव्यन्तरचक्रवर्त्तिवासुदेवबलदेवमहामाण्डलिकानामित्यत एवाह-'जाव वण चक्कि वासु बला । मंडलिया ता हीनत्ति' यावत् व्यन्तरचक्रवर्त्तिवासुदेवबलदेवमाण्डलिकास्तावत् अनन्तगुहीनाः, 'छट्ठाणगया भवे सेस' त्ति शेषा राजानो जनपदलोकाश्च षट्स्थानगता भवन्ति, अनन्त भागहीना वा असङ्ख्येयभागहीना वा सङ्ख्येयभागहीना वा सङ्ख्येयगुणहीना वा असङ्ख्येय-गुणहीना वा अनन्तगुणहीना वा इति गाथार्थः ॥ उत्कृष्टरूपतायां भगवतः प्रतिपादयितुं प्रक्रन्तायामिदं प्रासङ्गिकं रूपसौन्दर्यनिबन्धनं संहननादि प्रतिपादयन्नाह-

नि. (५७१) संघयण रूव संठाण वण्ण गइ सत्त सार उस्सासा ।
एमाइनुत्तराइं हवंति नामोदए तस्स ॥

वृ- 'संहननं' वज्रऋषभनाराचं 'रूपम्' उक्तलक्षणं 'संस्थानं' समचतुरस्त्रं 'वर्णो' देहच्छाया 'गतिः' गमनं 'सत्त्वं' वीर्यान्तररायकर्मक्षयोपशमादिजन्य आत्मपरिणामः, सारो द्विधा-बाह्योऽ-भ्यन्तरश्च, बाह्यो गुरुत्वम्, आभ्यन्तरो ज्ञानादिः, 'उच्छ्वासः' प्रतीत एव, संहननं च रूपं च संस्थानं च वर्णश्च गतिश्च सत्त्वं च सारश्च उच्छ्वासश्चेति समासः । एवमादीनि वस्तून्यनुत्तराणि भवन्ति तस्य भगवतः, आदिशब्दात् रुधिर गाक्षीराभं मासं चेत्यादि, कुत इत्याह-'नामोदयादि'ति नामाभिधानं कर्मानेकभेदभिन्नं नदुदयादिति गाथार्थः ॥ आह-अन्यासां प्रकृतीनां वेदना गोत्रादयो नाम्नो वा ये इन्द्रियाङ्गादयः प्रशस्ता उदया भवन्ति ते किमनुत्तरा भगवतः छद्मस्थकाले केवलिकाले वा उत नेति ?, अत्रोच्यते-

नि. (५७२) पगडीणं अन्नासुवि पसत्थ उदया अनुत्तरा होंति ।
खय उवसमेऽवि य तहा खयम्मि अविगप्पमाहंसु ॥

वृ- 'पगडीणं अन्नासुवि' त्ति, षष्ठ्यर्थे सप्तमी, प्रकृतीनामन्यासामपि प्रशस्ता उदया उच्चैर्गोत्रादयो भवन्ति, किमितरजनस्येव ?, नेत्याह-'अनुत्तरा' अनन्यसदृशा इत्यर्थः, अपि-शब्दान्नाम्नोऽपि येऽन्ये जात्यादय इति । 'खय उवसमेऽवि य तह' त्ति, क्षयोपशमेऽपि सति ये दानलाभादयः कार्यविशेषा अपिशब्दादुपशमेऽपि ये केचन तेऽप्यनुत्तरा भवन्ति इति क्रियायोगः, तथा कर्मणः क्षये सति क्षायिकज्ञानदिगुणसमुदयम् 'अविगप्पमाहंसु'त्ति अविकल्पं-व्यावर्णनादिवि-कल्पातीतं सर्वोत्तममाख्यातवन्तः तीर्थकृद्गणधरा इति गाथार्थः ॥ आह-असात-वेदनीयाद्याः प्रकृतयो नाम्नो वा या अशुभास्ताः कथं तस्य दुःखदा न भवन्ति इति ?, अत्रोच्यते-

नि. (५७३) अस्सायमाइयाओ जावि य असुहा हवंति पगडीओ ।
निंबरसलवोव्व पएण होंति ता असुहया तस्स ॥

वृ- असाताद्याः या अपि च अशुभा भवन्ति प्रकृतयः, ता अपि निम्बरसलव इव 'पयसि' क्षीरे लवो-बिन्दुः, न भवन्ति ताः अशुभदाः असुखदा वा 'तस्य' तीर्थकरस्येति गाथार्थः ॥ उक्तमानुषङ्गिकं, प्रकृतद्वारमधिकृत्याह- उत्कृष्टरूपतया भगवतः किं प्रयोजनमिति ?, अत्रोच्यते,-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (५७४) धम्मोदएण रूवं करेंति रूवस्सिणोऽवि जइ धम्मं ।
गिज्झवओ य सुरूवो पसंसिमो तेन एवं तु ॥

वृ- दुर्गतौ प्रपतन्तमात्मानं धारयतीति धर्मः तस्योदयः तेन रूपं भवतीति श्रोतारोऽपि प्रवर्त्तन्ते, तथा कुर्वन्ति 'रूपस्विनोऽपि' (वस्सिणोऽवि) रूपवन्तोऽपि यदि धर्म्म ततः शेषैः सुतरां कर्त्तव्य इति श्रोतृबुद्धिः प्रवर्त्तते, तथा 'ग्राह्यवाक्यश्च' आदेयवाक्यश्च सुरूपो भवति, चब्दात् श्रोतृरूपाद्यभिमानापहारी च अतः, प्रशंसामो भगवतस्तेन रूपमिति गाथार्थः ॥ द्वारम्।

अथवा पृच्छेति भगवान् देवनरतिरश्चां प्रभूतसंशयिनां कथं व्याकरणं कुर्वन् संशयव्यवच्छित्तिं करोतीति ?, उच्यते, युगपत्, किमित्याह–

नि. (५७५) कालेन असंखणेवि संखातीताण संसईणं तु ।
मा संसयवोच्छित्ती न होज्ज कमवागरणदोसा ॥

वृ- कालेनासङ्खयेयेनापि सङ्खयातीतानां संशयिनां-देवादीनां मा संशयव्यवच्छित्तिर्न भवेत्, कुतः ?-क्रमव्याकरणदोषात्, अतो युगपद् व्यागृणातीति गाथार्थः ॥युगपदाव्याकरणगुणं प्रतिपिपादयिषुराह–

नि. (५७६) सव्वत्थ अविसमत्तं रिद्धिविसेसो अकालहरणं च ।
सव्वन्नुपच्चओऽवि य अचिंतगुणभूतिओ जुगवं ॥

वृ- 'सर्वत्र' सर्वसत्त्वेषु 'अविषमत्वं' युगपत् कथनेन तुल्यत्वं भगवत इति, रागद्वेषरहितस्य तुल्यकालसंशयिनां युगपत् जिज्ञासतां कालभेदकथने रागेतरगोचरचित्तवृत्तिप्रसङ्गात्, सामान्यकेवलिनां तत्प्रसङ्ग इति चेत्, न, तेषामित्थं देशनाकरणानुपपत्तेः, तथा ऋद्धिविशेषश्चायं भगवतोयद् युगपत् सर्वेषामेव संशयिनामशेषसंशयव्यवच्छित्तिं करोतीति । अकालहरणं चेत्थं भगवतः, युगपत् संशयाऽपगमात्, क्रमकथने तु कस्यचित् संशयिनोऽनिवृत्तसंशयस्यैव मरणं स्यात्, न च भगवन्तमप्यवाप्य संशयनिवृत्त्यादिफलरहिता भवन्ति प्राणिन इति, तथा सर्वज्ञप्रत्ययोऽपि च तेषामित्थमेव भवति, न ह्यसर्वज्ञो, हृद्गताशेषसंशयापनोदायालमिति, क्रमव्याकरणे तु कस्यचिदनपेतसंशयस्य तत्प्रतीत्यभावः स्यात्, तथाऽचिन्त्या गुणभूतिः-अचिन्त्या गुणसंपद् भगवत इति, यस्मादेते गुणास्ततो युगपत्कथयति इति गाथार्थः ॥ श्रोतृपरिणामः पर्यालोच्यते–तत्र यथा सर्वसंशयिनां समा सा पारमेश्वरी वागशेषसंशयोन्मूलनेन स्वभाषया परिणमते तथा प्रतिपादयन्नाह–

नि. (५७७) वासोदयस्स व जहा वण्णादी होंति भायणविसेसा ।
सव्वेसिंपि सभासा जिनभासा परिणमे एवं ॥

वृ- 'वर्षोदकस्य वा' वृष्ट्युदकस्य वा, वाशब्दात् अन्यस्य वा, यथैकरूपस्य सतः वर्णादयो भवन्ति, भाजनविशेषात्, कृष्णसुरभिमृत्तिकायां स्वच्छं सुगन्धं रसवच्च भवति ऊषरे तु विपरीतम्, एवं सर्वेषामपि श्रोतॄणां स्वभाषया जिनभाषा परिणमत इति गाथार्थः ॥

तीर्थकरवाचः सौभाग्यगुणप्रतिपादनायाह–

नि. (५७८) साहारणासवत्तो तदुवओगो उ गाहगगिराए ।
न य निव्विज्जइ सोया किढिवाणियदासिआहरणा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- साधारणा-अनेकप्राणिषु स्वभाषात्वेन परिणामात् नरकादिभयरक्षणत्वाद्वा, असपत्ना-अद्वितीया, साधारणा (चा) ऽसावसपत्ना चेति समासः, तस्यां साधारणासपत्नायां सत्यां, किम् ?, तस्यामुपयोगस्तदुपयोग एव भवति श्रोतुः, तुशब्दस्यावधारणार्थत्वात्, कस्यां ?–ग्राहयतीति ग्राहिका, ग्राहिका चासौ गीश्च ग्राहकगीः तस्यां ग्राहकगिरि, उपयोगे सत्यप्यन्यत्र निर्वेददर्शनादाह-न च निर्विद्यते श्रोता, कुतः खल्वयमर्थोऽवगन्तव्यः ? इत्याह–किढिवणिग्दास्युदाहरणादिति, तच्चेदम्–एगस्स वाणियगस्स एका किढिदासी, किढी थेरी, सा गोसे कट्ठाणं गया, तण्हाछुहाकिलंता मज्झण्हे आगया, अतिथेवा कट्ठा आनीयत्ति भुक्खियतिसिया पुणो पट्ठविया, सा य वड्डं कट्ठयभारं ओगाहंतीए पोरुसीए गहायागच्छति, कालो य जेट्ठामूलमासो, अह ताए थेरीए कट्ठभाराओ एगं कट्ठं पडियं, ताहे ताए ओणमित्ता तं गहियं, तं समयं च भगवं तित्थगरो धम्मं कहियाइओ जोयणनीहारिणा सरेणं, सा थेरी तं सद्दं सुणेंती तहेव ओणता सोउमाढत्ता, उण्हं खुहं पिवासं परिस्समण च न विंदइ, सूरत्थमणे तित्थगरो धम्मं कहेउमुट्ठिओ, थेरी गया । एवं–

नि. (५७९) सव्वाउअंपि सोया खवेज्ज जइ हु सययं जिनो कहए ।
सीउण्हखुप्पिवासापरिस्समभए अविगणेंतो ॥

वृ- भगवति कथयति सति सर्वायुष्कमपि श्रोता क्षपयेत् भगवत्समीपवर्त्त्येव, यदि हु 'सततम्' अनवरतं जिनः कथयेत् । किंविशिष्टः सन्नित्याह–शीतोष्णक्षुत्पिपासापरिश्रमभयानविगणयन्निति गाथार्थः ॥ साम्प्रतं दानद्वारावयवार्थमधिकृत्योच्यते-तत्र भगवान् येषु नगरादिषु विहरति, तेभ्यो वार्त्ता ये खल्वानयन्ति, तेभ्यो यत्प्रयच्छन्ति वृत्तिदानं प्रीतिदानं च चक्रवर्त्यादयस्तदुपप्रदिदर्शयिषुराह–

नि. (५८०) वित्ती उ सुवण्णस्सा बारस अद्धं च सयसहस्साइं ।
तावइयं चिय कोडी पीतीदानं तु चक्किस्स ॥

वृ- 'वृत्तिस्तु' वृत्तिरेव नियुक्तपुरुषेभ्यः, कस्येत्हार-सुवर्णस्य, द्वादश अर्द्धं च शतसहस्राणि, अर्द्धत्रयोदश सुवर्णलक्षा -इत्यर्थः, तथा तावत्य एव कोट्यः प्रीतिदानं तु, केषामित्याह–चक्रवर्त्तिनां, तत्र वृत्तिर्या परिभाषिता नियुक्तपुरुषेभ्यः, प्रीतिदानं यद् भगवदागमननिवेदने परमहर्षात् नियुक्तेतरेभ्यो दीयत इति, तत्र वृत्तिः संवत्सरनियता, प्रीतिदानमनियतम्, इति गाथार्थः ॥

नि. (५८१) एयं चेव पमाणं नवरं रययं तु केसवा दिंति ।
मंडलिआण सहस्सा पीईदानं सयसहस्सा ॥

वृ- एतदेव प्रमाणं वृत्तिप्रीतिदानयोः, नवरं 'रजतं तु' रूप्पं तु 'केशवाः' वासुदेवा ददति, तथा माण्डलिकानां राज्ञां सहस्राण्यर्द्धत्रयोदश रूप्यस्य वृत्तिर्नियुक्तेभ्यो वेदितव्या, 'पीईदानं सतसहस्सं' ति 'सूचनात् सूत्र' मिति प्रीतिदानमर्द्धत्रयोदशशतसहस्राण्यवगन्तव्यानीति गाथार्थः। किमेत एव महापुरुषाः प्रयच्छन्ति ?, नेत्याह–

नि. (५८२) भत्तिविहवानुरूपं अन्नेऽवि य देंति इब्भमाईया ।
सोऊण जिनागमनं निउत्तमणिओइएसु वा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- भक्तिविभवानुरूपं अन्येऽपि च ददति इभ्यादयः, इभ्यो–महाधनपतिः, आदिशब्दात् नगरग्रामभोगिकादयः, कदा ? श्रुत्वा जिनागमनं, केभ्यो ? नियुक्तानियोजितेभ्यो वेति, गाथार्थः ॥ तेषामित्थं प्रयच्छतां के गुणा इति ?, उच्यते–

नि. (५८३) देवानुअत्ति भत्ती पूया थिरकरण सत्तअनुकंपा ।
साओदय दानगुणा पभावना चेव तित्थस्स ॥

वृ- देवानुवृत्तिः कृता भवति, कथं ?, यतो देवा अपि भगवतः पूजां कुर्वन्त्यतः तदनुवृत्तिः कृता भवति, तथा भक्तिश्च भगवतः कृता भवति, तथा भूजा च, तथा स्थिरीकरणमभिनवश्राद्धकानां, तथा कथकसत्त्वानुकम्पा च कृतेति, तथा सातोदयवेदनीयं बध्यते, एते दानगुणाः, तथा प्रभावना चैव तीर्थस्य कृता भवतीति गाथार्थः ॥ साम्प्रतं देवमाल्यद्वारावयवार्थमधिकृत्योच्यते–तत्र भगवान् प्रथमां सम्पूर्णपौरुषीं धर्ममाचष्टै, अत्रान्तरे देवमाल्यं प्रविशति, बलिरित्यर्थः, आह–कस्तं करोति इति ?, उच्यते–

नि. (५८४) राया व रायमुच्चो तस्सऽसई पउरजनवओ वाऽवि ।
दुब्बलिखंडियबलिछडियतंदुलाणाढगं कलमा ॥

वृ- 'राजा वा' चक्रवर्त्तिमण्डलिकादिः 'राजामात्यो वा' अमात्यो–मन्त्री, तस्य राज्ञोऽमात्यस्य वा असति–अभावे नगरनिवासिविशिष्टलोकसमुदायः पौरं तत्करोति, ग्रामादिषु जनपदो वा, अत्र जनपदशब्देन तन्निवासी लोकः परिगृह्यते, स किंविशिष्टः किंपरिमाणो वा क्रियत इति?, आह-'दुब्बली' त्यादि, तत्र दुर्बलिकया खण्डितानां 'बली'ति बलवत्या छटितानां तन्दुलानाम् आढकं–चतुः प्रस्थपरिमाणं, 'कलमे' ति प्राकृतशैल्या कलमानां–तन्दुलानाम् इति गाथार्थः । किंविशिष्टानामिति ? आह–

नि. (५८५) भाइयपुणाणियाणं अखंडफुडियाण फलगसरियाणं ।
कीरइ बली सुरावि य तत्थेव छुहंति गंधाई ॥

वृ- विभक्तपुनरानीतानां भाजनम्-ईश्वरादिगृहेषु वीननार्थमर्प्पणं तेभ्यः प्रत्यानयनं-पुनरानयनमिति, विभक्ताश्चते पुनरानीताश्चेति समासः, तेषां, किंविशिष्टानाम् ?-अखण्डाः-सम्पूर्णावयवाः अस्फुटिताः–राजीरहिताः, अखण्डाश्च तेऽस्फुटिताश्च इति समासः, तेषां, 'फलगसरिताणं' ति फलकवीनितानाम् एवं भूतानामाढकं क्रियते बलिः, सुरा अपि च तत्रैव बलौ प्रक्षिपन्ति गन्धादीनिति गाथार्थः ॥ माल्यानयनद्वारं, इदानीं तमित्थं निष्पन्नं बलिं राजादयस्त्रिदशसहिताः गृहीत्वा तूर्यनिनादेन दिग्मण्डमापूरयन्तः खल्वागच्छन्ति, पूर्वद्वारेण च प्रवेशयन्ति, अत्रान्तरे भगवानप्युपसंहरतीति, आह–

नि. (५८६) बलिपविसणसमकालं पुव्वद्दारेण ठाति परिकहणा ।
तिगुणं पुरओ पाडण तस्सद्धं अवडियं देवा ॥

वृ- पूर्वद्वारेणेति व्यवहित उपन्यासः, बलेः प्रवेशेनं पूर्वद्वारेणस बलिप्रवेशनसमकालं 'तिष्ठति' उपरमते धर्मकथेति, 'तिगुणं पुरओ पाडण' प्रविश्य राजादिर्बलिव्यग्रदेहो भगवन्तं त्रिः प्रदक्षिणीकृत्य तं बलिं तत्पादान्तिके पुरतः पातयति, तस्य चार्द्धमपतितं देवाः गृह्णन्ति, इति ।

नि. (५८७) अद्धद्धं अहिवइणो अवसेसं हवइ पागयजनस्स ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सव्वामयप्पसमणी कुप्पइ नऽन्नो य छम्मासे ॥

वृ- शेषार्द्धस्य अर्द्धं–अर्द्धार्द्धं तदधिपतेर्भवति राज्ञ इत्यर्थः, अवशेषं यद्बलेरास्ते तद्भवति कस्य ?, प्रकृतिषु भवः प्राकृतो–जनस्तस्य, स चेत्थंसामर्थ्यो भवति–ततः सिक्थेनापि शिरसि प्रक्षिप्तेन रोगः खलूपशमं याति, अपूर्वश्च षण्मासान् यावन्न भवतीति, आह च–सर्वामयप्रशमनः, कुप्यति नान्यश्च षण्मासं यावत् । प्राकृतशैल्या स्त्रीलिङ्गनिर्देश इति गाथार्थः ॥ अपरे त्वनन्रोक्त-द्वारद्वयमप्येकद्वारीकृत्य, व्याचक्षतने, तथापि अविरोध इति । इत्थं बलौ प्रक्षिप्ते भगवान् प्रथमात् प्राकारान्तरात् उत्तरद्वारेण निर्गत्य उत्तरपूर्वायां दिशि देवच्छन्दके यथासुखं समाधिना व्यवतिष्ठतं इति । भगवत्युत्थिते द्वितीयपौरुष्यामाद्यगणधरोऽन्यतमो वा धर्ममाचष्टे । आह–भगवानेव किमिति नाचष्टे ?, तत्कथने के गुणा इति ?, उच्यते–

नि. (५८८) खेयविणोओ सीसगुणदीवणा पच्चओ उभयओऽवि ।
सीसायरियकमोऽवि य गणहरकहणे गुणा होंति ॥

वृ- खेदविनोदो भगवतो भवति, परिश्रमविश्राम इत्यर्थः, तथा 'शिष्यगुणदीपना' शिष्यगुणप्रख्यापना च कृता भवनि, तथा प्रत्यय उभयतोऽपि श्रोतृणामुपजायते–यथा भगवताऽभ्यधायि तताा गणधरेणापि, गणधरे वा तदनन्तरं तदुक्तानुवादिनि प्रत्ययो भवति श्रोतृणाम्–नान्यथावाद्ययमिति, तथा शिष्याचार्यक्रमोऽपि च दर्शितो भवति, आचार्यात् उपश्रुत्य योग्यशिष्येण तदर्थान्वाख्यानं कर्त्तव्यमिति, एते गणधरकथने गुणा भवन्ति इति गाथार्थः ॥

आह-स गणधरः क्व निषण्णः कथयतीति ?, उच्यते–

नि. (५८९) आओवणीयसीहासणे निविट्ठो व पायवीढंमि ।
जिट्ठो अन्नयरो वा गणहारी कहइ बीआंए ॥

वृ- राज्ञा उपनीतं राजोपनीतं राजोपनीतं च तत् सिंहासनं चेति समासः, तस्मिन् राजोपनीतसिंहासने उपविष्टो वा भगवत्पादपीठे, स च ज्येष्टः अन्यतरो वा गणं–साध्वादि-समुदायलक्षणं धारयितुं शीलमस्येति गणधारी कथयति द्वितीयायां पौरुष्यामिति गाथार्थः ॥

आह-स कथयन् कथं कथयतीति ?, उच्यते–

नि. (५९०) संखाईएऽवि भवे साहइ जं वा परो उ पुच्छिज्जा ।
न य णं अनाइसेसी वियाणई एस छउमत्थो ॥

वृ- सङ्ख्यातीतानपि भवान्, असङ्ख्येयानित्यर्थः, किं ? -'साहइ'त्ति देशीवचनतः कथयति, एतदुक्तं भवति–असङ्ख्येयभवेषु यदभवद्भविष्यति वा, यद्वा वस्तुजातं परस्तु पृच्छेत् तत्सर्वं कथयतीति, अनेनाशेषाभिलाप्यपदार्थप्रतिपादनशक्तिमाह, किं बहुना ? -'न च' नैव, णमिति वाक्यालङ्कारे, 'अनाइसेसि' त्ति अनतिशयी अवध्याद्यतिशयरहित इत्यर्थः, विजानाति यथा एष गणधरछद्मस्थ इति, अशेषप्रश्नोत्तरप्रदानसमर्थत्वात्तस्येति गाथार्थः ॥ समवसरणं समत्तं

एवं तावत्समवसरणवक्तव्यता सामान्येनोक्ता, प्रकृतमिदानीं प्रस्तूयते-तत्र भगवतः समवसरणे निष्पन्ने सत्यत्रान्तरे देवजयशब्दसम्मिश्रदिव्यदुन्दुभिशब्दाकर्णनोत्फुल्लनयन-गगनावलोकनोपलब्धस्वर्गवधूसमेतसुरवृन्दानां यज्ञपाटकसमीपाभ्यागतजनानां परितोषोऽभवद्–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अहो स्विष्टं, विग्रहवन्तः खलु देवा आगता इत्याह–

नि. (५९१) तं दिव्वदेवघोसं सोऊणं मानुसा तहिं तुट्ठा ।
अहो (हु) जन्निएण जट्ठं देवा किर आगया इहइं ।।

वृ- तं दिव्यदेवघोषं श्रुत्वा मनुष्याः 'तत्र' यज्ञपाटे तुष्टाः, 'अहो' ! विस्मये, यज्ञेन जयति लोकानिति याज्ञिकः तेनेष्टं, कुतः ?-एते देवाः किल आगता अत्रेति, किलशब्दः संशय एव, तेषामन्यत्र गमनादिति गाथार्थः ।। तत्र च यज्ञपाटे वेदार्थविदः एकादशापि गणधरा ऋत्विजः समन्वागता इत्याह च–

नि. (५९२) एक्कारसवि गणहरा सव्वे उन्नयविसालकुलवंसा ।
पावाएँ मज्झिमाए समोसढा जन्नवाडम्मि ।।

वृ- एकादशापि गणधराः समवसृताः यज्ञपाट इति योगः, किंभूता इत्याह–'सर्वे' निरवशेषाः उन्नताः-प्रधानजातित्वात् विशालाः-पितामहपितृव्याद्यनेकसमाकुलाः कुलान्येव वंशाः-अन्वया येषां ते तथाविधाः, पापायां मध्यमायां 'समवसृताः' एकीभूताः, क्व?-यज्ञपाट इति गाथार्थः। आह–किमाद्याः, किंनामानो वा त एते गणधराः इति ? उच्यते –

नि. (५९३) पढमित्थ इंदभूई बिइओ उण होइ अग्गिभूइत्ति ।
तइए य वाउभूई तओ वियत्ते सुहम्मे य ।।

वृ- प्रथमः 'अत्र' गणधरमध्ये इन्द्रभूतिः, द्वितीय, पुनर्भवति अग्निभूतिरिति, तृतीयश्च वायुभूतिः, ततो व्यक्तः चतुर्थः सुधर्मश्च पञ्चमः, इति गाथार्थः ।।

नि. (५९४) मंडियमोरियपुत्तो अकंपिए चेव अयलभाया य ।
मेयज्जे य पभासे गणहरा होंति वीरस्स ।।

वृ- मण्डिकपुत्रः मौर्यपुत्रः, पुत्रशब्दः प्रत्येकमभिसम्बध्यते, अकम्पितश्चैव अचलभ्राता च मेतार्यश्च प्रभासः, एते गणधरा भवन्ति वीरस्य इति गाथार्थः ।।

नि. (५९५) जंकारण निक्खमणं वोच्छं एएसि आनुपुव्वीए ।
तित्थं च सुहम्माओ निरवच्चा गणहरा सेसा ।।

वृ- 'यत्कारणं' यन्निमित्तं निष्क्रमणं यत्तदोर्नित्यसम्बन्धात् तत् वक्ष्ये 'एतेषां' गणधराणाम् 'आनुपूर्व्या' परिपाट्या, तथा तीर्थं च सुधर्मात् सञ्जातं, 'निपत्याः' शिष्यगणरहिताः गणधराः 'शेषाः' इन्द्रभूत्यादयः इति गाथार्थः ।। तत्र जीवादिसंशयापनोदनिमित्तं गणधरनिष्क्रमणमितिकृत्वा यो यस्य संशयस्तदुपदर्शनायाह–

नि. (५९६) जीवे कम्मे तज्जीव भूय तारिसय बंधमोक्खे य ।
देवा नेरइए या पुण्णे परलोय नेव्वाय ।।

वृ- एकस्य जीवे संशयः-किमस्ति नास्ति इति, तथा परस्य कर्मणि, ज्ञानरणीयादिलक्षणं कर्म किमस्ति नास्ति ? इति, अपरस्य 'तज्जीवे' त्ति किं तदेव शरीरं स एव जीव उत अन्य इति, न जीवसत्तायाम् इति, तथा 'भूते'त्ति अपरस्य भूतेषु संशयः, पृथिव्यादीनि भूतानि सन्ति न वेति, अपरस्य 'तारिसय' त्ति किं यो यादृश इह भवे स तादृश एव अन्यस्मिन्नपि ? उत नेति, 'बन्धमोक्खे य'त्ति अपरस्य तु किं बन्धमोक्षौ स्तः ? उत न इति, आह–कर्मसंशयात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्य को विशेष इति ? उच्यते, स कर्मसत्तागोचरः, अयं तु तदस्तित्वे सत्यपि जीवकर्मसंयोग-विभागगोचर इति, तथा अपरस्य देवाः किं सन्ति ? नेति वा, अपरस्य तु नारकाश्च संशयगोचराः, किं ते सन्ति न सन्ति वा ?, तथा अपरस्य पुण्ये संशयः, कर्मणि सत्यपि किं पुण्यमेव प्रकर्षप्राप्तं प्रकृष्टसुखहेतुः, तदेव चापचीयमानमत्यन्तस्वल्पावस्थं दुःखस्य उत तदतिरिक्तं पापमस्ति आहोस्विदेकमेव उभयरूपम् उत स्वतन्त्रमुभयमिति, अपरस्य तु परलोके संशयः, सत्यप्यात्मनि परलोको-भवान्तरलक्षणः किमस्ति नास्ति ? इति, अपरस्य तु निर्वाणे संशयः, निर्वाणं किमस्ति नास्ति ? इति, आह-बन्धमोक्षसंशयात् अस्य को विशेष इति, उच्यते, स हि उभयगोचरः, अयं तु केवलविषय एव, तथा किं संसाराभावमात्र एव असौ मोक्षः ? उत अन्यथा ? इत्यादि, इति गाथार्थः ॥ साम्प्रतं गणधरपरिवारमानप्रदर्शनाय आह–

नि. (५९७) पंचण्हं पंचसया अद्धुट्ठसया य होंति दोण्ह गणा ।
दोण्हं तु जुयलयाणं तिसओ तिसओ भवे गच्छो ॥

वृ- पञ्चानामाद्यानां गणधराणां पञ्च शतानि प्रत्येकं प्रत्येकं परिवार इति, तथा अर्द्धं चतुर्थस्य येषु नामि अर्धचतुर्थानि २ शतानि अर्द्धचतुर्थशतानि २ मानं ययोः तौ अर्धचतुर्थशतौ भवतः द्वयोः प्रत्येकं गणौ, इह गणः समुदाय एव उच्यते, न पुनरागमिक इति, तथा द्वयोस्तु गणधरयुगलयोः त्रिशतः त्रिशतो भवति गच्छः, एतदुक्तं भवति–उपरितनानां चतुर्णां गणधराणां प्रत्येकं त्रिशतमानः परिवार इति गाथार्थः ॥ उक्तमानुषङ्गिकं, प्रकृतं उच्यते–ते हि देवाः तं यज्ञपाटं परिहृत्य समवसरणभुवि निपतितवन्तः, तांश्च तथा दृष्ट्वा लोकाऽवि तत्रैव ययौ, भगवन्तं तु त्रिदशलोकेन पूज्यमानं द्दष्ट्वा अतीव हर्षं चक्रे, प्रवादश्च सञ्जातः- सर्वज्ञाऽत्र समवसृतः, तं देवाः पूजयन्ति इति, अत्रान्तरे खल्वाकर्ण्णितसर्वज्ञ-प्रवादाऽमर्षाध्मातः खल्विन्द्रभूतिर्भगवन्तं प्रति प्रस्थित इत्याह–

नि. (५९८) सोऊण कीरमाणीं महिमं देवेहि जिनवरिंदस्स ।
अह एह अहम्माणी अमरिसिओ इंदभूइत्ति ॥

वृ- श्रुत्वा च क्रियमाणां, दृष्ट्वा वा पाठान्तरं, महिमां देवैर्जिनवरेन्द्रस्य, अथास्मिन् प्रस्तावे 'एइ' त्ति आगच्छति भगवत्समीपम् 'अहम्माणि' त्ति अहमेव विद्वान् इति मानोऽस्य इति अहंमानी, 'अमर्षितः' अमर्षयुक्तः, अमर्षो–मत्सरविशेषः, मयि सति कोऽन्यः सर्वज्ञः ? इति, अपनयामि अद्य सर्वज्ञवादम्, इत्यादिसङ्कल्पकलुषितान्तरात्मा, कोऽसौ इत्याह–इन्द्रभूतिः इति गाथार्थः ॥ स च भगवत्समीपं प्राप्य भगवन्तं च चतुस्त्रिंशदतिशयसमन्वितं त्रिदशासुरनरेश्वरपविृतं दृष्ट्वा साशङ्कः तदग्रतस्तस्थौ, अत्रान्तरे–

नि. (५९९) आभट्ठो य जिणेणं जाइजरामरणविप्पमुक्केणं ।
नामेण य गोत्तेण य सव्वण्णू सव्वदरिसीणं ॥

वृ- 'आभाषितश्च' संलप्तश्च, केन ? -जिनेन, किंविशिष्टेन ? -जातिः-प्रसूतिः जरा–वयोहानिलक्षणा मरणं–दशविधप्राणवियोगरूपम् एभिर्विप्रमुक्तस्तेन, कथम् ? -नाम्ना च हे इन्द्रभूते ! गोत्रेण च हे गौतम ! किंविशिष्टेन जिनेन इत्याह–सर्वज्ञेन सर्वदर्शिना । आह–यो जरामरणविप्रमुक्तः स सर्वज्ञ एवेति गतार्थत्वात् विशेषणवैयर्थ्यं, न, नयवादपरिकल्पितजात्यादिवि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रमुक्तमुक्तनिरासार्थत्वात् तस्येति, तथा च कैश्चित् अचेतना मुक्ता गुणविगमोक्षवादिभिरिष्यन्त एवेति गाथार्थः ॥ इत्थं नामगोत्रसंलप्तस्य तस्य चिन्ताऽभवत्–अहो नामापि मे विजानाति, अथवा प्रसिद्धोऽहं, को मां न वेत्ति ?, यदि मे हृद्गतं संशयं ज्ञास्यति अपनेष्यति वा, स्यान्मम विस्मय इति, अत्रान्तरे भगवानाह–

नि. (६००) किं मन्नि अत्थि जीवो उआहु नत्थित्ति संसओ तुज्झ ।
वेयपयाण य अत्थं न याणसी तेसिमो अत्थो ॥

वृ- हे गौतम ! किं मन्यसे-अस्ति जीव उत नास्तीति, ननु अयमनुचितस्ते संशयः, अयं च संशयस्तव विरुद्ध-वेदपदश्रुतिनिबन्धनः, तेषां वेदपदानां चार्थं न जानासि, यथा न जानासि तथा वक्ष्यामः, तेषामयमर्थो -वक्ष्यमाणलक्षण इति । अन्ये तु-किंशब्दं परिप्रश्नार्थे व्याचक्षते, तच्च न युज्यते, भगवतः सकलसंशयातीतत्वात्, संशयवतश्च तत्प्रयोगदर्शनात्, किमित्थमन्यथेति वा, अथवा किमस्ति जीव उत नास्ति इति मन्यसे, अयं संशयस्तव, शेषं पूर्ववदिति गाथार्थः। यदुक्तम्–'संशयस्तव विरुद्धवेदपदश्रुतिनिबन्धन' इति, तान्यमूनि वेदपदानि–"विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति, न प्रेत्य सञ्ज्ञाऽस्ती" त्यादीनि, तथा 'स वै अयमात्मा ज्ञानमयं' इत्यादीनि च, एतेषां चायमर्थो भवतः चेतसि विपरिवर्त्तते–विज्ञानमेव चैतन्यं, नीलादिरूपत्वात्, चैतन्यविशिष्टं यन्नीलादि तस्मात्, तेन घनो विज्ञानघनः, स एव 'एतेभ्यः' अध्यक्षतः परिच्छिद्यमानस्वरूपेभ्यः, केभ्यः ? -'भूतेभ्यः' पृथिव्यादिलक्षणेभ्यः, किम्? –'समुत्थाय' उत्पद्य, पुनस्तानि एव 'अनु विनश्यति' अनु–पश्चाद्विनश्यति विज्ञानघनः, 'न प्रेत्य संज्ञाऽस्ति' प्रेत्य मृत्वा न पुनर्जन्म न परलोकसञ्ज्ञाऽस्ति इति भावार्थः । ततश्च कुतो जीवः ?, युक्त्युपपन्नश्च अयमर्थः, (इति) ते मतिः-यतः प्रत्यक्षेणासौ न परिगृह्यते, यतः 'सत्संप्रयोगे पुरुषस्य इन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षं' न चास्य इन्द्रियसम्प्रयोगोऽस्ति, नाप्ययमनुमानगोचरः, यतः–प्रत्यक्षपुरस्सरं पूर्वोपलब्धलिङ्गलिङ्गिसम्बन्धस्मृतिमुखेन तत्प्रवर्त्तते, गृहीताविनाभावस्य धूमादनलज्ञानवत्, न च इह तल्लिङ्गाविनाभावग्रहः, तस्याप्रत्यक्षत्वात्, नापि सामान्यतोदृष्टादनुमानात् सूर्येन्दुगतिपरिच्छेदवत् तदवगमो युज्यते, दृष्टान्तेऽपि तस्याध्यक्षतोऽ-ग्रहणात्, न चागमगम्योऽपि, आगमस्यानुमानादभिन्नत्वात्, तथा च–घटे घटशब्दप्रयोगोपलब्धावुत्तरत्र घटध्वनिश्रवणात् अन्वयव्यतिरेकमुखेन घट एवानुमितिरुपजायते, न च इत्थमात्मशब्दः शरीरादन्यत्र प्रयुज्यमानो दृष्टो यमात्मशब्दात् प्रतिपद्येमहि इति, किंच–आगमानामेकज्ञेयेऽपि परस्परविरोधेन प्रवृत्तेरप्रमाणत्वात्, तथा च –

'एतावानेव पुरुषो, यावानिन्द्रियगोचरः ।
भद्रे ! वृकपदं पश्य, यद्वदन्ति बहुश्रुताः ॥'

इत्यागमः, तथा 'न रूपं भिक्षवः पुद्गल' इत्याद्यपरः, पुद्गले रूपं निषिध्यते, अमूर्त्त आत्मा इत्यार्थः तथा 'अकर्त्ता निर्गुणो भोक्ता' इत्यादिश्चान्यः, तथा 'स वै अयमात्मा ज्ञानमय' इत्याद्यपर इति, एते च सर्व एव प्रमाणं न भवन्ति, परस्परविरोधेन एकार्थाभिधायकत्वात्, पाटलिपुत्रस्वरूपाभिधायकपरस्परविरुद्धवाक्यपुरुषव्रातवत्, अतो न विद्मः–किमस्ति नास्ति?, इत्ययं ते अभिप्रायः, तत्र वेदपदानां चार्थ न जानासि, चशब्दात् युक्तिं हृदयं च, तेषामेकवाक्यता-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यामयमर्थः-'विज्ञानधन एवे'ति ज्ञानदर्शनोपयोगरूपं विज्ञानं ततोऽनन्यत्वात् आत्मा विज्ञानघनः, प्रतिप्रदेशमनन्तविज्ञानपर्यायसङ्घातात्मकत्वाद्वा विज्ञानघनः, एवशब्दोऽवधारणे, विज्ञानघनानन्यत्वात् विज्ञानघन एव, 'एतेभ्यो भूतेभ्यः' क्षित्युदकादिभ्यः 'समुत्थाय' कथञ्चिद्भूत्वा इति हृदयं, यतो न घटाद्यर्थरहितं विज्ञानमुत्पद्यते, न च भूतधर्म एव विज्ञानं, तदभावे मुक्त्यवस्थायां भावात्, तद्भावेऽपि मृतशरीरादावभावात्, न च वाच्यं-घटसत्तायामपि नवतानिवृत्तौ शरीरभावेऽपि चैतन्य-निवृत्तेः नवतावद्भूतधर्मता चैतन्यस्य, घटस्य द्रव्यपर्यायी-भयरूपत्वे सति सर्वथा नवताऽनिवृत्तेः, न च इत्थं देहाच्चैतन्यस्यानिवृत्तिः,

तथा श्रुतावप्युक्तम्-"अस्तमिते आदित्ये याज्ञवल्क्यः चन्द्रमस्यस्तमिते शानतेऽग्नौ शान्तायां वाचि किंज्योतिरेवायं पुरुषः, आत्मा ज्योतिः सम्राट् इतिहोवाच," तान्येव हि भूतानि विनाशव्यवधानाभ्यां ज्ञेयभावेन विनश्यन्ति, अनु-पश्चात् विनश्यति अनुविनश्यति, स च विवक्षितविज्ञानाऽऽत्मना उपरमते भाविविज्ञानात्मना उत्पद्यते सामान्यविज्ञानसन्तत्या द्रव्यतया अवतिष्ठत इति, न च पूर्वोत्तरयोरत्यन्तभेदः, सति तस्मिन् एकस्य विज्ञानस्य विज्ञानत्वासत्त्वप्रसङ्गात्, 'न प्रेत्यसञ्ज्ञाऽस्ति' इति न प्राक्तनी घटादिविज्ञानसञ्ज्ञाऽवतिष्ठते, साम्प्रतविज्ञानोपयोगवि-ध्नितत्वात् इत्ययं वेदपतार्थ इति, तथा सौम्य ! प्रत्यक्षतोऽपि आत्मा गम्यत एव, तस्य ज्ञानात् अनन्यत्वात्, तद्धर्मत्वात् चैतन्यस्य, ज्ञानस्य च स्वसंविदितरूपत्वात्, तथा च नीलविज्ञानमेव उत्पन्नमासीत् इतिदर्शनीत्, न च अननुभूतेऽर्थे स्मृतिप्रभवो युज्यते, न च भिन्नं ज्ञानमात्मनः, प्रमात्रन्तरवत् विवक्षितप्रमातुः संवेदनानुपपत्तेः, न च स्वात्मनि क्रियाविरोधः, प्रदीपवत् तस्य स्वपरप्रकाशकत्वात्, इत्थं तावत् भवतोऽपि अयमनन्तपर्यायात्मकत्वात् ज्ञानदेशावभासितत्वात् प्रदीपदेशोद्योतितघटवत् देशतः प्रत्यक्ष एव, ज्ञानावरणीयाद्यशेषप्रतिबन्धकापगमसमनन्तराविर्भूतकेवलज्ञानसम्पदां सर्वप्रत्यक्ष इति । अनुमानगम्योऽप्ययं-विद्यमानकर्तृकमिदं शरीरं, भोग्यत्वात्, ओदनादिवत्, व्योमकुसुमं विपक्ष इत्यनुमानं, न च लिङ्ग्यविनाभूतलिङ्गोपलम्भव्यतिरेकेणानुमानस्य एकान्ततोऽप्रवृत्तिः, हसितादिलिङ्गविशेषस्य ग्रहाख्यलिङ्ग्य-विनाभावग्रहणमन्तरेणापि ग्रहगमकत्वदर्शनात्, न च देह एव ग्रहो, येन अन्यदेहदर्शनमविनाभावग्रहणनियामकं भवतीति । आगमगम्यता त्वस्याभिहितैव । इत्यलं विस्तरेण, गमनिकामात्रमेतत् इति ।

नि. (६०१) छिण्णंमि संसयंमी जिनेन जरमरणविप्पमुक्केणं ।
सो समणो पव्वइओ पंचहि सह खंडियसएहिं ॥

वृ- एवं 'छिन्ने' निराकृते संशये जिनेन जरामरणाभ्याम्-उक्तलक्षणाभ्यां विप्रमुक्तः तेन 'स' इन्द्रभूतिः 'श्रमणः प्रव्रजितः' साधुः संवृत्त इत्यर्थः, पञ्चभिः सह खण्डिकशतैः, खण्डिकाः-छात्रा इति गाथार्थः ॥ इह च वेदपदोपन्यासस्तदा वेदानां सञ्ज्ञातत्वात् तेन च प्रमाणत्वेन अङ्गीकृतत्वात् । इति प्रथमो गणधरः समाप्तः ॥

नि. (६०२) तं पव्वइयं सोउं बितिओ आगच्छई अमरिसेणं ।
वच्चामि न आनेमी पराजिणित्ता न तं समणं ॥

वृ- 'तम्' इन्द्रभूतिं प्रव्रजितं श्रुत्वा 'द्वितीयः' खल्वग्निभूतिरत्रान्तरे आगच्छति अमर्षेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राग्व्यावर्ण्णित स्वरूपेण हेतुभूतेन, व्रजामि णमिति वाक्यालङ्काकरे, आनयामि इन्द्रभूतिमिति गम्यते, पराजित्य, णं पूर्ववत्, तं 'श्रमणम्' इन्द्रजालिककल्पमिति गाथार्थः ।। स हि तेन छलादिना विनिर्जित इतीदानीं तस्य का वार्त्ता ? इत्यादि चिन्तयन् जिनसकाशं प्राप्तः, दृष्ट्वा च भगवन्तं विस्मयमुपगत इति, अत्रान्तरे–

नि. (६०३) आभट्ठो य जिणेणं जाइजरामरणविप्पमुक्केणं ।
नामेण य गोत्तेण य सव्वण्णू सव्वदरिसीणं ।।

वृ- पूर्ववत्, नामोत्राभ्यां संलप्तश्चिन्तयामास–नामापि मे वेत्ति, अथवा प्रसिद्धोऽहं, को मां न वेत्ति ?, यदि मे हृद्गतं संशयं ज्ञास्यति अपनेष्यति वा, तदा सर्वज्ञाशङ्का स्यात् इति ।।

अत्रान्तरे भगवताऽभिहितः–

नि. (६०४) किं मण्णि अत्थि कम्मं उदाहु नत्थित्ति संसाओ तुज्झ ।
वेयपयाण य अत्थं न जाणसी तेसिमो अत्थो ।।

वृ- किं मन्यसे अस्ति कर्म उत नास्तीति ?, नन्वयमनुचितस्ते संशयः, अयं च संशयस्तव विरुद्धवेदपदनिबन्धनो वर्त्तते, वेदपदानां चार्थं न जानासि, यथा च न जानासि तथा वक्ष्यामः, तेषामयमर्थो-वक्ष्यमाणलक्षण इत्यक्षरार्थः ।। तानि च अमूनि वेदपदानि–''पुरुष एवेदं ग्निं सर्वं यद्भूतं यच्च भाव्यं उतामृतत्वस्येशानो यदन्नेनातिरोहति यदेजति यन्नैजति यद् दूरे यदु अन्तिके यदन्तरस्य सर्वस्य यदु सर्वस्यास्य बाह्यत'' इत्यादि, तथा 'पुण्यः पुण्येन' इत्यादि, तेषां चायमर्थः ते मतौ विपरिवर्त्तते-पुरुषः-आत्मा, एवशब्दोऽवधारणे, स च कर्मप्रधानादिव्यवच्छेदार्थः, 'इदं' सर्वं प्रत्यक्षवर्त्तमानं चेतनाचेतनं, ग्निमिति वाक्यालङ्कारे, 'यद् भूतं' यद् अतीतं यच्च 'भाव्यं' भविष्यं, मुक्तिसंसारावपि स एव इत्यर्थः, 'उतामृतत्वस्येशान' इति, उतशब्दोऽप्यर्थे, अपिशब्दश्च समुच्चये, 'अमृतत्वस्य' अमरणभावस्य–मोक्षस्य ईशानः-प्रभुश्चेत्यर्थः 'यत्' इति यच्चेति चशब्दलोपात्, 'अन्नेन' आहारेण 'अतिरोहति' अतिशयेन वृद्धिमुपैति, 'यद् एजति' यत् चलति–पश्वादि, 'यत् न एजति' यन्न चलति–पर्वतादि, 'य द्दूरे' मेर्वादि, 'यद् उ अन्तिके' उशब्दोऽवधरणे, 'अन्तिके' समीपे यत्, तत्पुरुष एव इत्यर्थः, 'यद् अन्तर्' मध्ये 'अस्य' चेतना चेतनस्य सर्वस्य, यदेव सर्वस्यास्य बाह्यतः, तत्सर्वं पुरुष एव इति, अतः तदतिरिक्तस्य कर्मणः किल सत्ता दुःश्रद्धेया, ते मतिः, तथा प्रत्यक्षानुमानागमगोचरातीतं च एतत्, अमूर्त्तस्य च आत्मनो मूर्त्तकर्मणा कथं संयोग ? इति, कथं वा अमूर्त्तस्य सतः मूर्त्तकर्मकृतावृपधातानुग्रहौ स्यातामिति, लोके तन्त्रान्तरेषु च कर्मसत्ता गीयते 'पुण्यः पुण्येन' इत्यादौ, अतो न विद्मः–किमस्ति नास्ति वा ?, ते अभिप्रायः, तत्र वेदपदानां च अर्थं न जानासि, चशब्दाद्युक्तिं हृदयं च, तेषां वेदपदानामेकवाक्यतया व्यवस्थितानामयमर्थः–एतानि हि पुरुषस्तुतिपराणि वर्त्तन्ते, तथा जात्यादिमदत्यागाय अद्वैतभावनाप्रतिपादकानि वा, न कर्मसत्ताप्रतिषेधकानि, अन्यार्थानि वा, सौम्य ! इत्थं चैतदङ्गकर्त्तव्यं, यतः नाकर्मणःकर्त्तृत्वं युज्यते, प्रवृथिनिबन्धनाभावात्, एकान्तरशुद्धत्वात्, गगनवत्, इतश्च अकर्मा नारम्भते, एकत्वात् एकपरमाणुवत्, न च अशरीरवानीशानः खल्वारम्भको युज्यते, तस्य स्वशरीरारम्भेऽपि उक्तदोषानतिवृत्तेः, न च अन्यस्तच्छरीरारम्भाय व्याप्रियते, शरीरित्वाशरीरित्वाभ्यां तस्यापि आरम्भ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कत्वानुपपत्तेः, न च शुद्धस्य देहकरणेच्छा युज्यते, तस्या रागविकल्पत्वात्, तस्मात् कर्मसद्वितीयः पुरुषः कर्ता इति ।

न च तत्कर्म प्रत्यक्षप्रमाणगोचरातीतं, मत्प्रत्यक्षत्वात्, त्वत्संशयवत्, भवतोऽपि अनुमान-गोचरत्वात्, तच्चेदमनुमानम्-शरीरान्तरपूर्वकं बालशरीरं, इन्द्रियादिमत्त्वात्, युवशरीरवत्, न च जन्मान्तरातीतशरीरपूर्वकमेवेदं, तस्यापान्तराल-गतावभावेन तत्पूर्वकत्वानुपपत्तेः, न चाशरी-रिणो नियतगर्भदेशस्थानप्राप्तिपूर्वकः शरीरग्रहो युज्यते, नियामककारणाभावात्, न स्वभाव एव नियामको, वस्तुविशेषाकारणतावस्तुधर्मविकल्पानुपपत्तेः, स्वभावो हि वस्तुविशेषो वा स्यादकारणता वा वस्तुधर्मो वा ?, न तावत् वस्तुविशेषः, अप्रमाणकत्वात्, किं च–स मूर्त्तो वा स्यादमूर्त्तो वा ?, यदि मूर्त्तः, कर्मणोऽस्य च न कश्चिद्भेदः, कर्म्मैव सञ्ज्ञान्तरवाच्यं तत्, अथ अमूर्त्तो, न तर्हि नियामको देहकारणं वा, अमूर्त्तत्वात्, गगनवत्, तथाहि-नामूर्त्तान्मूर्त्त-प्रसूतिरिति, न चाकारणता स्वभावः, कारणाभावस्याविशिष्टत्वात् युगपदेषदेहसंभवप्राप्तेः, अकारणताविशेषाभ्युपगमे च तद्भावप्रसङ्गः, न च वस्तुधर्मः स्वभावः, आत्माख्यवस्तुधर्मत्वेन अमूर्त्तत्वात्, गगनवत्, तस्य देहादिकारणत्वानुपपत्तेः, मूर्त्तवस्तुधर्मत्वे पुनरसौ न पुद्गलपर्याय-मतिवर्त्तते, कर्मापि च पुद्गलपर्यायानन्यरूपमेव इत्यविप्रतिपत्तिरिति, तस्मात् यच्छरीरपूर्वकं बालशरीरं तत्कार्मणमिति, आगमगम्यं च एतत्, 'पुण्यः पुण्येन पापः पापेन कर्मणा' इत्यादिश्रुतिवचनप्रामाण्यात्, तथा अमूर्त्तस्यापि आत्मनो विशिष्टपरिणामवतः मूर्त्तकर्मपुद्गल-सम्बन्धोऽविरुद्ध एव, आकाशस्येव घटादिसंयोग इति, तथा अमूर्त्तस्यापि मूर्त्तकृतावुप-घातानुग्रहावविरुद्धौ, विज्ञानस्य मदिरापानौषधादिभिः उपघातानुग्रहदर्शनात्, इत्यलं प्रसङ्गेनेति।

नि. (६०५) छिन्नंमि संसयंमी जिनेन जरमरणविप्पमुक्केणं ।
सो समणो पव्वइओ पंचहि सह खंडियसएहिं ॥

वृ- इत्थं छिन्ने संशये जिनेन जरामरणविप्रमुक्तेन स श्रमणः प्रव्रजितः पञ्चभिः सह खण्डिकशतैः, भावार्थः सुगम इति गाथार्थः ॥ द्वितीयो गणधरः समाप्तः ॥

नि. (६०६) ते पव्वइए सोउं तइओ आगच्छई जिनसगासं ।
वच्चामि न वंदामी वंदित्ता पज्जुवासामि ॥

वृ- 'तौ' इन्द्रभूतिअग्निभूती प्रव्रजितौ श्रुत्वा तृतीयो वायुभूतिनामा आगच्छति जिनसकाशं, उभयनिष्क्रमणाकर्ण्णनादपेताभिमानः सञ्जातसर्वज्ञप्रत्ययः खलु अत एवाहं व्रजामि, णमिति वाक्यालङ्कारे, वन्दे भगवन्तं, तथा वन्दित्वा पर्युपासयामि इति गाथार्थः ॥ इति सञ्जातसङ्कल्पो भगवत्समीपं गत्वा अभिवन्द्य च भगवन्तं तदग्रतस्तस्थौ, अत्रान्तरे–

नि. (६०७) आभट्ठो य जिणेणं जाइजरामरणविप्पमुक्केणं ।
नामेण य गोत्तेण य सव्वण्णू सव्वदरिसीणं ॥

वृ- पूर्ववत् ॥ इत्थमपि संलप्तौ हृद्गतं संशयं प्रष्टुं क्षोभादसमर्थो भगवताऽभिहितः–

नि. (६०८) तज्जीवतस्सरीरंति संसओ नवि य पुच्छसे किंचि ।
वेयपयाण य अत्थं न जाणसी तेसिमो अत्थो ॥

वृ-स जीवः तदेव शरीरमिति, एवं संशयस्तव, नापि च पृच्छसि किञ्चित् विदिताशेषतत्त्वम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अयं स संशयस्तव विरुद्धवेदपदश्रुतिनिबन्धनो वर्त्तते, वेदपदानां चार्थं न जानासि, तेषां तव संशयनिबन्धनानामयमर्थो-वक्ष्यमाणलक्षण इति गाथाक्षरार्थः ॥ तानि चामूनि परस्परविरुद्धानि वेदपदानि–'विज्ञानघन एव एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्यसञ्ज्ञाऽस्ति' इत्यादीनि, तथा 'सत्येन लभ्यः तपसा ह्येष ब्रह्मचर्येण नित्यं ज्योतिर्मयो हि शुद्धो, यं पश्यन्ति धीरा यतयः संयतात्मानः' इत्यादीनि चेति, एतेषां चायमर्थः ते बुद्धौ प्रतिभासते–'विज्ञानघने' त्यादीनां पूर्ववत् व्याख्या, नवरं न प्रेत्य सञ्ज्ञा अस्ति-न देहात्मनोः भेदसञ्ज्ञाऽस्ति, भूतसमुदायमात्रधर्मत्वात् चैतन्यस्य, ततश्चामूनि किल शरीरातिरिक्तात्मोच्छेदपराणि वर्त्तन्ते, 'सत्येन लभ्य' इत्यादीनि तु देहातिरिक्तात्मप्रतिपादकानि इति, अतः संशयः, युक्ता च भूतसमुदायमात्रधर्मता चेतनायाः, ते मतिः, तत्र एवोपलब्धेर्गौरतादिवदिति, तथा प्रत्यक्षादि प्रमाणगोचरातिक्रान्तश्च देहातिरिक्त आत्मेति, तत्र वेदपदानां चार्थ न जानासि, चशब्दाद्युक्ति हृदयं च, तेषामयमर्थः-तत्र 'विज्ञानघने' त्यादीनां प्रथमगणधरवक्तव्यतायां व्याख्याततत्वात् न प्रदर्श्यते, 'सत्येन लभ्य' इत्यादीनां तु सुगमत्वादिति । न च तत्रैव उपलब्ध्या हेतुभूतया चेतनायाः शरीरधर्मताऽनुमातुं युज्यते, तद्धर्मतया तत्रोपलम्भासिद्धेः, न च तस्मिन् सत्येव उपलम्भः तद्धर्मत्वानुमानाय अलं, ध्यभिचारदर्शनाद्, यतः स्पर्शे सत्येव रूपादयः उपलभ्यन्ते, न च तद्धर्मता तेषामिति, तस्मात् शरीरातिरिक्तात्माख्यपदार्थधर्मश्चेतना इति, देशप्रत्यक्षश्चायम्, अवग्रहादीनां स्वसंवेद्यत्वात्, भावना प्रथमगणधरवत् अवसेयास अनुमानगम्योऽपि, तच्चेदम्–देहेन्द्रियातिरिक्त आत्मा, तद्विगमेऽपि तदुपलब्धार्थनुस्मरणात्, पञ्चवातायनोपलब्धार्थानुस्मर्तुर्देवदत्तवत्, आगमगम्यता तु अस्य प्रसिद्धा रूव 'सत्येन लभ्य' इत्यादिवेदपदप्रामाण्याभ्युपगमादिति, अलं विस्तरेण, गमनिकामात्रमेतत् ।

नि. (६०९) छिण्णंमि संसयंमी जिनेन जरमरणविप्पमुक्केणं ।
सो समणो पव्वइओ पंचहिं सह खंडियसएहिं ॥

वृ- पूर्ववत् ॥ तृतीयो गणधरः समाप्त इति । अस्य च प्रथमगणधरादिदं नानात्वं–तस्य जीवसत्तायां संशयः, अस्य तु शरीरातिरिक्ते खल्वात्मनि, न तु तस्य सत्तायामिति ॥

नि. (६१०) ते पव्वइए सोउं वियत्तो आगच्छई जिनसगासं ।
वच्चामि न वंदामी वंदित्ता पज्जुवासामि ॥

वृ- तान् प्रव्रजितान् श्रुत्वा इन्द्रभूतिप्रमुखान् व्यक्तो नाम गणधरः आगच्छति जिनसकाशं, किंविशिष्टेनाध्यवसायेन इत्याह–व्रजामि, णमिति वाक्यालङ्कारे, वन्दामि भगवन्तं जिनं, तथा वन्दित्वा पर्युपासयामि इति गाथाक्षरार्थः ॥ इत्येवंभूतेन सङ्कल्पेन गत्वा भगवन्तं प्रणम्य तत्पादान्तिके भगवत्सम्पदुपलब्ध्या विस्मयोत्फुल्लनयनस्तस्थौ, अत्रान्तरे–

नि. (६११) आभट्ठो य जिणेणं जाइजरामरणविप्पमुक्केणं ।
नामेण य गोत्तेण य सव्वण्णू सव्वदरिसीणं ॥

वृ- व्याख्या-पूर्ववत् ।

नि. (६१२) किं मण्णि पंच भूया अत्थि नत्थित्ति संसओ तुज्झं ।
वेयपयाण य अत्थं य जाणसी तेसिमो अत्थो ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- किं 'पञ्च भूतानि' पृथिव्यादीनि सन्ति न सन्तीति वा मन्यसे, व्याख्यान्तरं पूर्ववत् । संशयश्च तवाय विरुद्धवेदपदश्रुतिसमुत्थो वर्त्तते, शेषं पूर्ववत्, तानि चामूनि वेदपदानि वर्त्तन्ते–'स्वप्नोपमं वै सकलमित्येष ब्रह्मविधिरञ्जसा विज्ञेय' इत्यादीनि, तथा 'द्यावा पृथिवी' इत्यादीनि च, तथा 'पृथ्वी देवता आपो देवता' इत्यादीनि च, एतेषां चायमर्थः तव प्रतिमासते- 'स्वप्नोपमं' स्वप्नसद्दशं, वैनिपातोऽवधारणे 'सकलम्' अशेषं जगत् 'एष ब्रह्मविधिः' एष परमार्थ-प्रकार इत्यर्थः 'अञ्जसा प्रगुणेन न्यानेन 'विज्ञेयो' विज्ञातव्यो भाव्य इत्यर्थः, ततश्चामूनि किल भूतनिह्नवपराणि, शेषाणि तु सत्ताप्रतिपादकानीति, अतः संशयः, तथा भूताभाव एव च युक्तत्युपपन्नः, ते चित्तविभ्रमः, तेषां प्रमाणतोऽग्रहणात्, तथाहि–चक्षुरादिविज्ञानस्य आलम्बनं परमाणवो वा स्युः परमाणुसमूहो वा ?, न तावदणवो, विज्ञाने अप्रतिभासनात्, नापि तत्समूहो, भ्रान्तत्वात्, द्विचन्द्रवत्, भ्रान्तता चास्य समूहिभ्यस्तत्त्वान्यत्वाभ्यामनिर्वचनीयत्वात् अवस्तुत्वात्, अतः कुतो भूतसत्तेति, तत्र वेदपदानां चार्थ न जानासि, चशब्दाद्युक्ति हृदयं च 'तेषां' तवसंशयनिबन्धनानां वेदपदा नामयमर्थः, 'स्वप्नोपमं वै सकल' मित्यादीन्यध्यात्मचिन्तायां मणिकनकाङ्गनादिसंयोगस्यानियतत्वादस्थिरत्वादसारत्वा-द्विपाककटुकत्वादास्थानिवृत्तिपराणि वर्त्तन्ते, न तु तदत्यन्ताभावप्रतिपादकानि इति, तथा 'द्यावा पृथिवी' त्यादीनि तु सुगमानि, तथा सौम्य ! न च चक्षुरादिविज्ञाने परमाणवो नावभासन्ते, तेषां तुल्यातुल्यरूपत्वात्, तुल्यरूपस्य च चक्षुरादिविज्ञाने प्रतिभासनात्, न च तुल्यं रूपं नास्त्येव, तदभावे खल्वेकपरमाणु-व्यतिरेकेणान्येषामणुत्वाभावप्रसङ्गात्, न च तद् अन्यव्यावृत्तिमात्रं परिकल्पितमेव, स्वरूपाभावेऽन्य-व्यावृत्तिमात्रतायां तस्य खपुष्पकल्पत्वप्रसङ्गात्, तथा चाशेषपदार्थव्यावृत्तमपि खपुष्पं स्वरूपा-भावान्न सत्तां धारयति, न च तद्रूपमेव सजातीयेतरासाधारणं तदन्यव्यावृत्तिः, तस्य तेभ्यः स्वभावभेदेन व्यावृत्तेः, स्वभावभेदानभ्युपगमे च सजातीयेतरभेदानुपपत्तेः, सजातीयैकान्त-व्यावृत्तौ च विजातीयव्यावृत्तावनणुत्ववदणुत्वाभावप्रसङ्गः, भावे च तुल्यरूपसिद्धिरिति, न चेयमनिमित्ता तुल्यबुद्धिः, देशादिनियमेनोत्पत्तेः, न च स्वप्नबुद्ध्या व्यभिचारः, तस्या अप्य-नेकविधनिमित्तबलेनैव भावात्, आह च भाष्यकारः–

"अनुभूय दिट्ठ चिन्तिय सुय पयइवियार देवयाऽनूया ।
सुमिणस्स निमित्ताइं पुण्णं पावं च नाभावो ॥"

न च भूताभावे स्वप्नास्वप्नगन्धर्वपुरपाटलिपुत्रादिविशेषो युज्यते, न चालयविज्ञान-गतशक्तिपरिपाकसमनन्तरोपजातविकल्पविज्ञानसामर्थ्यमस्यास्तुल्यबुद्धेः कारणं, स्वलक्षणाद-स्वलक्षणानुपपत्तेः, नापि पारम्पर्येण तदुत्पत्तिर्युज्यते, स्वलक्षणसामान्यलक्षणातिरिक्तवस्त्वभावेन पारम्पर्यानुपपत्तेः, बाह्यनीलाद्यभावे च शक्तिविपाकनियमो न युज्यते, नियामकसहकारि-कारणाभावात् । किंच-आलयात्पीतादिसंवेदनजननशक्तयो भिन्ना वा स्युरभिन्ना वा ?, यद्यभिन्नाः सर्वैकत्वप्रसङ्गः, एकालयाभेदान्यथानुपपत्तेः, ततश्च कुतस्तासां पीतादिप्रतिभासहेतुता ?, प्रयो-गश्चनीलविज्ञानहेतुतया परिकल्पिता शक्तिर्न तद्धर्मा, शक्तन्तरस्वात्मवत्, अथ भिन्नास्त-थाप्यवस्तुसत्यो वा स्युः वस्तुसत्यो वा ?, यद्यवस्तुसत्यः समूहवत्कुतः प्रत्ययत्वम् ?, अथ वस्तुसत्यो बाह्योऽर्थः केन वार्यत इति ?, एवमणूनां तुल्यरूपग्रहणं तदाभासज्ञानोत्पत्तेः, न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च विषयबलोपजातसंवेदनाकारस्य विषयाद्भेदाभेदविकल्पद्वारेणानुपपत्तिर्भाव्या, विशिष्टपरिणामोपेतार्थसन्निधावात्मनः कालक्षयोपशमादिसव्यपेक्षस्य नीलादिविज्ञानमुत्पद्यते, तथापरिणामाद्, इत्थं चैतदङ्गीकर्त्तव्यम्, अन्यथा नीलात्संवेदनान्नीलसंवेदनान्तरानुपपत्तिः, प्रागुपन्यस्तविकल्पयुगलकसम्भवादित्येवं परमाणुतुल्यरूपग्रहोऽविरुद्धः, अतुल्यरूपं तु योगिगम्यत्वात् विशिष्टक्षयोपशमाभावात्सर्वथा न परिगृह्यते, न च परमाणूनां बहुत्वेऽपि विशेषाभावाद् घटशरावादिबुद्धेः तुल्यत्वप्रसङ्गो, विशेषाभावस्यासिद्धत्वात्, तथा च परमाणव एव विशिष्टपरिणामवन्तो घट इति, न च परमाणुसमुदायातिरिक्तानि भूतानि इत्यलं प्रसङ्गेन ।

नि. (६१३) छिन्नंमि संसयंमी जिनेन जरमरणविप्पमुक्केणं ।
सो समणो पव्वईओ पंचहिं सह खंडियसएहिं ॥

वृ- व्याख्या-पूर्ववत् । इति चतुर्थो गणधरः समाप्तः ।

नि. (६१४) ते पव्वइए सोउं सुहमो आगच्छई जिनसगासं ।
वच्चामि णं वंदामी वंदित्ता पज्जुवासामी ॥

वृ- 'तान्' इन्द्रभूतिप्रमुखान् प्रव्रजितान् श्रुत्वा सुधर्मः पञ्चमो गणधर आगच्छति जिनसकाशं, किम्भूतेनाध्यवसायेन इत्याह-पश्चार्द्धं पूर्ववत् । स च भगवन्तं दृष्ट्वा अतीव मुमुदे, अत्रान्तरे–

नि. (६१५) आभट्ठो य जिणेणं जाइजरामरणविप्पमुक्केणं ।
नामेण य गोत्तेण य सव्वण्णू सव्वदरिसीणं ॥

वृ- व्याख्या-पूर्ववत् ।

नि. (६१६) किं मण्णि जारिसो इह भवंमि सो तारिसो परभवेऽवि ?।
वेयपयाण य अत्थं न जाणसी तेसिमो अत्थो ॥

वृ- किं मन्यसे ? यो मनुष्यादिर्यादृश इह भवे स तादृशः परभवेऽपि, नन्वयमनुचितस्ते संशयः, व्याख्यान्तरं पूर्ववत्, संशयश्च तवायं विरुद्धवेदपदश्रुतिनिबन्धनो वर्त्तते, तानि चामूनि–"पुरुषो वै पुरुषत्वमश्नुते'पुरुषत्वं प्राप्नोतीत्यर्थः 'पशवः पशुत्वम्' इत्यादीनि, तथा 'शृगालो वै एष जायते यः सपुरीषो दह्यते' इत्यादीनि च, तत्र वेदपदानां चार्थं न जानासि, चः पूर्ववत्, तेषामयमर्थो-वक्ष्यमाणलक्षण इत्यक्षरार्थः । तत्र वेदपदानां त्वमित्थमर्थं मन्यसेपुरुषो मृतः सन् पुरुषत्वमश्नुते, पुरुषत्वमश्नुते, पुरुषत्वमेव प्राप्नोतीत्यर्थः, तथा पशवो–गवादयः पशुत्वमेवेत्यूनि भवान्तरसादृश्याभिधायकानि, तथा 'शृगालो वै एष' इत्यादीनि तु भवान्तरे वैसादृश्यख्यापकानीत्यतः संशयः, कारणानुरूपं च कार्यमुत्पद्यते इति तेऽभिप्रायो, यतो न शालिबीजाद्गोधूमाङ्कुरप्रसूतिः इति, तत्र वेदपदानामयमर्थः-पुरुषः, खल्विह जन्मनि स्वभावमार्दवार्जवादिगुणयुक्तो मनुष्यनामगोत्रे कर्मणी बद्ध्वा मृतः सन् पुरुषत्वमश्नुते, न तु नियमतः, एवं पशवोऽपि पशुभवे मायादिगुणयुक्ताः, पशुनामगोत्रे कर्मणी बद्ध्वा मृताः सन्तः पशुत्वमासादयन्ति, न तु नियोयतः इति, कर्मसापेक्षो जीवानां गतिविशेष इत्यर्थः, शेषाणि तु सुगमानि, न च नियमतः कारणानुरूपं कार्यमुत्पद्यते, वैसादृश्यस्यापि दर्शनात्, तद्यथा–शृङ्गाच्छरो जायते, तस्मादेव सर्षपानुलिप्तात्, तृणानीति, तथा गोलोमाविलोमभ्यो दूर्वेति, एवमनियमः, अथवा कारणानुरूपकार्यपक्षेऽपि भवान्तरवैचित्र्यमस्य युक्तमेव, यतो भवाङ्कुरबीजं सौम्य ! सात्मकं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्म, तच्च तिर्यग्नरनारकामराद्यायुष्कभेद-भिन्नत्वात् चित्रवेव, अतः कारणवैचित्र्यादेव कार्य्यवैचित्र्यमिति, वस्तुस्थित्या तु सौम्य ! न किञ्चिदिह लोके परलोके वा सर्वथा समानमसानं वाऽस्ति, तथा चेह युवा निजैरप्यतीतानागतैर्बालवृद्धादिपर्यायैः सर्वथा न समानः, अवस्था-भेदग्रहणात्, नापि सर्वथाऽसमानः, सत्ताद्यनुगमदर्शनाद्, एवं परलोकेऽपि मनुजो देवत्वमापन्नो न सर्वथा समानोऽसमानो वा, इत्थं चैतदङ्गीकर्त्तव्यं, अन्यथा दानदयादीनां वैयर्थ्यप्रसङ्गात् ।

नि. (६१७) छिन्नंमि संसयंमी जिनेन जरमरणविप्पमुक्केणं ।
सो समणो पव्वइओ पंचहिं सह खंडियसएहिं ॥

वृ- व्याख्या–पूर्ववत् ॥ इति पञ्चमो गणधरः समाप्तः ।

नि. (६१८) ते पव्वइए सोउं मंडिओ आगच्छइ जिनसगासं ।
वच्चामि न वंदामी वंदित्ता पज्जुवासामि ॥

वृ- तानिन्द्रभूतिप्रमुखान् प्रव्रजितान् श्रुत्वा मण्डिकः षष्ठो गणधरः आगच्छति जिनकसाशं, किम्भूतेनाध्यवसायेनेत्याह–वच्चामि णमित्यादि पूर्ववत् । स च भगवत्समीपं गत्वा प्रणम्य च भुवननाथमतीव मुदितः तदग्रतस्तस्थौ, अत्रान्तरे–

नि. (६१९) आभट्ठो य जिणेणं जाइजरामरणविप्पमुक्केणं ।
नामेण य गोत्तेण य सव्वण्णू सव्वदरिसीणं ॥

वृ- व्याख्या–पूर्ववत् ।

नि. (६२०) किं मन्नि बंधमोक्खा अत्थि न अत्थित्ति संसओ तुज्झं ।
वेयपयाण य अत्थं न याणसी तेसिमो अत्थो ॥

वृ- किं मन्यसे बन्धमोक्षौ स्तो न वा ?, नन्वयमनुचितस्ते संशयः, व्याख्यान्तरं पूर्ववत्, अयं च संशयस्तव विरुद्ध-वेदपदश्रुतिसमुत्थो वर्त्तते, वेदपदानां चार्थं न जानासि, चः पूर्ववत्, तेषामयमर्थो–वक्ष्यमाणलक्षण इत्यर्थः । तानि चामूनि वेदपदानि–'स एष विगुणो विभुर्न बध्यते संसरति वा, न मुच्यते मोचयति वा, न वा एष बाह्यमभ्यन्तरं वा वेद' इत्यादीनि च, एषां चायमर्थस्ते चेतसि प्रतिभासते–स एषः-अधिकृतो जीवः विगुणः-सत्त्वादिगुणरहितः विभुः–सर्वगतः न बध्यते-पुण्यपापाभ्यां न युज्यत इत्यर्थः, संसरति वा, नेत्यनुवर्त्तते, न मुच्यते-न कर्मणा वियुज्यते, बन्धाभावात्, मोचयति वाऽन्यम्, अनेनाकर्त्तृकत्वमाह, न वा एष बाह्यम्-आत्मभिन्नं महदहङ्कारादि अभ्यन्तरं–स्वरूपमेव वेद–विजानाति, प्रकृतिधर्मत्वात् ज्ञानस्य, प्रकृतेश्चाचेतनत्वाद्बन्धमोक्षानुपपत्तिरिति भावः । ततश्चामूनि किल बन्धमोक्षाभव-प्रतिपादकानि, तथा 'नह वै' नैवेत्यर्थः, सशरीरस्य प्रियाप्रिययोरपहतिरस्तीतिबाह्या-ध्यात्मिकानादिशरीरसन्तानयुक्तत्वात् सुखदुःखयोरपहतिः संसारिणो नास्तीत्यर्थः, अशरीरं वा वसन्तम्–अमूर्त्तमित्यर्थः, प्रियाप्रिये न स्पृशतः, कारणाभावादित्यर्थः, अमूनि च बन्धमोक्षा-भिधायकानीति, अतः संशयः, तथा सौम्य ! भवतोऽभिप्रायो–बन्धो हि जीवकर्मसंयोगलक्षणः, स आदिमानादिरहितो वा स्यात् ?,

यदि प्रथमो विकल्पस्ततः किं पूर्वमात्मप्रसूतिः पश्चात्कर्मणः उत पूर्वं कर्मणः पश्चादात्मनः आहोश्विद्युगपदुभयस्येति ?, किं चातः, न तावत्पूर्वमात्मप्रसूतिर्युज्यते, निर्हेतुकत्वाद्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्योमकुसुमवत्, नापि कर्मणः प्राक् प्रसूतिः, कर्त्तुरभावात्, न चाकर्तृकं कर्म भवति, युगप्रसूतिरप्यकारणत्वादेव न युज्यते, न चानादिमत्यप्यात्मनि बन्धो युज्यते, बन्धकारणाभावाद् गगनस्येव, इत्थं चैतदङ्गीकर्त्तव्यम्, अन्यथा मुक्तस्यापि बन्धप्रसङ्गः, तथा च सति नित्यमोक्षत्वान्मोक्षानुष्ठानवैयर्थ्यम्, अथ द्वितीयः पक्षः, तथापि नात्मकर्मवियोगो भवेद्, अनादित्वाद्, आत्माकाशसंयोगवद्, इत्थं मोक्षो न घटते, तथा देहकर्मसन्तानानादित्वाच्च कुतो मोक्ष इति ते मतिः । तत्र वेदपादनामयमर्थः-स एष-मुक्तात्मा विगताः छाद्मस्थिकज्ञानादयो गुणा यस्य स विगुणः विभुः-विज्ञानात्मना सर्वगतः न बध्यते—मिथ्यादर्शनादिबन्धकारणाभावात् संसरति वा-मनुजादिभवेषु कर्मबीजाभावात्, नेत्यनुवर्त्तते, न मुच्यते, मुक्तत्वात्, मोचयति वा तदा खलूपदेशदानविकलत्वात्, नेत्यनुवर्त्तते, तथा संसारिकसुखनिवृत्त्यर्थमाह-नवा एष—मुक्तात्मा बाह्यं-स्त्रकन्दनादिजनितम् आभ्यन्तरम्-आभिमानिकं वेद-अनुभवात्मना विजानातीत्येवमेतानि मुक्तात्मस्वरूपाभिधायकान्येव, शेषाणितु सुगमानि, तथा जीवकर्मणोरप्यनादिमतोरनादिमानेव संयोगो, धर्माधर्मास्तिकायाकाशसंयोगवदिति, न चानादित्वात्संयोगस्य वियोगाभावः, यतः काञ्चनोपलयोः संयोगोऽनादिसन्ततिगतोऽपि क्षारमृत्पुटपाकादिद्रव्यसंयोगोपायतो विघटते,

एवं जीवकर्मणोरपि ज्ञानदर्शन चारित्रयोगोपायाद्वियोग इति, न चानादित्वात्सर्वस्य कर्मणो जीवकृतत्वानुपपत्तिः, यो वर्त्तमानतया मिथ्यादर्शनादिसव्यपेक्षात्मनोपात्तं कृतमित्युच्यते, सर्वं च वर्त्तमानत्वेन मिथ्यादर्शनादिसव्यपेक्षात्मोपात्तं कर्म अनादि च, कालवत्, यथा हि यावानतीतः कालस्तेनाशेषेण वर्त्तमानत्वमनुभूतमथ चासावनादिरिति, न चामूर्त्तस्य मूर्त्तसंयोगो न घटते, घटाकाशसंयोगदर्शनाद्, वियोगस्तु दर्शित एव, न च मुक्तस्यापि कर्मयोगः, तस्य कषायादिपरिणामाभावात्, कषायादियुक्तश्च जीवः कर्मणो योग्यान् पुद्गलानादत्ते इति, न चेत्थं भव्योच्छेदप्रसङ्गः, अनागतकालवत्तेषामनन्तत्वात्, न च परिमितक्षेत्रे तेषामवस्थानाभावः, अमूर्त्तत्वात्, प्रतिद्रव्यमनन्तकेवलज्ञानदर्शनसम्पातवन्नर्त्तकीनयनविज्ञानसम्पातवद्वा, इत्यलं प्रसङ्गेन ।

नि. (६२१) छिन्नंमि संसयंमी जिनेन जरमरणविप्पमुक्केणं ।
सो समणो पव्वइओ अद्धुट्ठहिं सह खंडियसएहिं ॥

वृ- पूर्ववत्, नवरम्—अर्द्धचतुर्थैः सह खण्डिकशतैः । इति षष्ठो गणधरः समाप्तः ।

नि. (६२२) ते पव्वइए सोउं मोरिओ आगच्छई जिनसगासं ।
वच्चामि न वंदामी वंदित्ता पज्जुवासामि ॥

वृ- पूर्ववत्, नवरं मौर्य आगच्छति जिनसकाशामिति नानात्वम् ।

नि. (६२३) आभट्ठो य जिणेणं जाइजरामरणविप्पमुक्केणं ।
नामेण य गोत्तेण य सव्वण्णू सव्वदरिसीणं ॥

वृ- सपातनिका व्याख्या पूर्ववदेव ।

नि. (६२४) किं मन्नसि संति देवा उयाहु न सन्तीति संसओ तुज्झं ।
वेयपयाण य अत्थं न याणसी तेसिमो अत्थो ॥

वृ- किं सन्ति देवा उत न सन्तीति मन्यसे, व्याख्यान्तरं प्राग्वत्, अयं च संशयस्तव विरुद्धवेदपदश्रुतिप्रभवो वर्त्तते, पश्चार्द्धं पूर्ववत् । तानि चामूनि वेदपदानि-'स एष यज्ञायुधी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जयमानोऽञ्जसा स्वर्गलोकं गच्छती' त्यादीनि, तथा 'अपाम सोमम्, अमृता अभूम, अगमन् ज्योतिः, अविदाम देवान्, किं नूनमस्मांस्तृणवदरातिः, किमु धूर्त्तिरमृतमर्त्त्यस्ये' त्यादीनि च, तथा 'को जानाति ? मायोपमान् गीर्वाणानिन्द्रयमवरुणकुबेरादीनि' त्यादि, एतेषां चायमर्थस्ते मतौ प्रतिभासते—यथा अपाम-पीतवन्तः सोमं-लतारसम् अमृता-अमरणधर्माणः अभूम—भूताः स्म, अगमन्—गताः ज्योतिः-स्वर्गम्, अविदाम देवान्-देवत्वं प्राप्ताः स्मः, किं नूनमस्मांस्तृण-वत्करिष्यतीति, अयमर्थः-अरातिर्व्याधिः किमु-प्रश्ने धूर्त्तिः-जरा अमृतमर्त्त्यस्य-अमृतत्वं प्राप्तस्य पुरुषस्येत्येवं द्रष्टवयम्, अमरणधर्मिणो मनुष्यस्य किं करिष्यन्ति व्याधयः ?। तथा सौम्य ! त्वमित्थं मन्यसे-नारकाः सङ्क्लिष्टासुरपरमाधार्मिकायत्ततया कर्मवशतया च परतन्त्रत्वात् स्वयं च दुःख-सम्प्रतप्तत्वादिहागन्तुमशक्ता एव, अस्माकमप्यनेन शरीरेण तत्र कर्मवशतया एव गन्तुमशक्यत्वात् प्रत्यक्षीकरणोपाया-सम्भवाद् आगमगम्या एव, श्रुतिस्मृतिग्रन्थेषु श्रूयमाणाः श्रद्धेया भवन्तु, ये पुनर्देवाः स्वच्छन्दचारिणः कामरूपाः प्रकृष्टदिव्यप्रभावात् इहागमन-सामर्त्थ्यवन्तस्ते किमितीह नागच्छन्ति ? यतो न दृश्यन्त इति, अतो न सन्ति ते, अस्मदाद्य-प्रत्यक्षत्वात्, खरविषाणवत्, तत्र वेदपदानां चेत्यादि पूर्ववत्,

तत्र वेदपदानामयमर्थः –'को जानाति ? मायोपमान् गीर्वाणानिन्द्रयमवरुणकुबेरादीनि' त्यादि, तत्र परमार्थचिन्तायां सन्ति देवाः, मत्प्रत्यक्षत्वात्, मनुष्यवत्, भवतोऽपि, आगमाच्च सर्वथा, सर्वमनित्यं मायोपमं, न तु देवनास्तित्वपराणि वेदवाक्यानीति, तथा स्वच्छन्दचारिणोऽपि चामी यदिह नागच्छन्ति तत्रेदं कारणम्—नागच्छन्तीह सदैव सुरगणाः, सङ्क्रान्तदिव्यप्रेम-त्वाद्विषयप्रसक्तत्वात् प्रकृष्टरूपगुणस्त्रीप्रसक्त-विच्छिन्नरम्यदेशान्तरगतमनुष्यवत्, तथाऽ-समाप्तकर्त्तव्यत्वाद्, बहुकर्त्तव्यताप्रसाधनप्रयुक्तविनीतपुरुषवत्, तथाऽनधीननुजकार्यत्वात्, नारकवत्, अनभिमतगेहादौ निः सङ्गयतिवद्वेति, तथाऽशुभत्वान्नरभवस्य तद्गन्धासहिष्णुतया नागच्छन्ति, मृतकडेवरमिव हंसा इति, जिनजन्ममहिमादिषु पुनर्भक्तिविशेषाद् भवान्तररागतश्च क्वचिदागच्छन्त्येव, तथा चैते साम्प्रतं भवतोऽपि प्रत्यक्षा एव, शेषकालमपि सामान्यत-श्चन्द्रसूर्यादिविमानालयप्रत्यक्षत्वात्तद्वासिसिद्धिः, इत्यलं प्रसङ्गेन ।

नि. (६२५) छिन्नंमि संसयंमी जिनेन जरमरणविप्पमुक्केणं ।
सो समणो पव्वइओ अद्धुट्ठहिं सह खंडियसएहिं ॥

वृ- व्याख्या—पूर्ववत् । समाप्तः सप्तमो गणधरः ।

नि. (६२६) ते पव्वइए सोउं अकंपिओ आगच्छई जिनसगासं ।
वच्चामि न वंदामी वंदित्ता पज्जुवासामि ॥

वृ- व्याख्या—पूर्ववन्नवरमकम्पिकः आगच्छतीति नानात्वम् ।

नि. (६२७) आभट्ठो य जिणेणं जाइजरामरणविप्पमुक्केणं ।
नामेण य गोत्तेण य सव्वण्णू सव्वदरिसीणं ॥

वृ- व्याख्या-सपातनिका पूर्ववदेव ।

नि. (६२८) किं मन्ने नेरइया अत्थि न अत्थित्ति संसओ तुज्झं ।
वेयपयाण य अत्थं न याणसी तेसिमो अत्थो ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- नरान् कायन्तीति नरकास्तेषु भवा नारकाः, किं नारकाः सन्ति न सन्तीति मन्यसे, व्याख्यान्तरं पूर्ववत्, अयं च संशयस्तव विरुद्धवेदपदश्रुतिसमुद्‌भवो वर्त्तते, शेषं पूर्ववत्, वेदपदानि चामूनि-'नारको वै एष जायते, यः शूद्रान्नमश्नाति' इत्यादि, 'एष' ब्राह्मणो नारको भवति यः शूद्रान्नमत्ति, 'नह वै प्रेत्य नरके नारकाः सन्ती' त्यादि, गतार्थं, युक्तय एवोच्यन्ते-तत्राकम्पिकाभिप्रायमाह–सौम्य ! त्वमित्थं मन्यसे-देवा हि चन्द्रादयस्तावत् प्रत्यक्षा एव, अन्येऽप्युपयाचितादिफलदर्शनानुमानतोऽवगम्यन्ते, नारकास्त्वभिधानव्यतिरिक्तार्थशून्याः कथं गम्यन्त इति ?, प्रयोगश्च-न सन्ति नारकाः, साक्षादनुमानतो वाऽनुपलब्धेः, व्योमकुसुमवत्, व्यतिरेके देवाः, इत्थं पूर्वपक्षमाशङ्क्य भगवानेवाह–

सौम्य ! ते हि नारकाः कर्मपरतन्त्रत्वादिहागन्तुमसमर्थाः, भवद्विधानामपि तत्र गमनशक्त्य-भावः, कर्मपरतन्त्रत्वादेव, अतो भवद्विधानां तदनुपलब्धिरिति, क्षायिकज्ञानसम्पदुपेतानां तु वीतरागाणां प्रत्यक्षा एव, तेषां सकलज्ञानयुक्तत्वाद् अपास्तसमस्तावरणत्वात्, न चाशेषपदार्थ-विदः साक्षात्करिक्षायिकभावस्था न सन्ति, यतो ज्ञस्वभाव आत्मा ज्ञानावरणीयप्रति-वद्धस्वभावत्वात् नाशेषं वस्तु विजानाति, तत्क्षयोशमजस्तु तस्य स्वरूपाविर्भावविशेषो दृश्यते, तथा च कश्चिद्बहु जानाति कश्चिद्बहुतरमिति क्षायोपशमिकोऽयं ज्ञानवृद्धिभेद इति, न ह्ययं ज्ञानविशेषः खल्वात्मनस्तत्स्वाभाव्यमन्तरेणोपपद्यते इति, एवं चापगताशेषज्ञानवरणस्य ज्ञस्वभावत्वाद शेषज्ञेयपरिच्छेदकत्वमिति, तथा चास्मिन्नेवार्थे लौकिको दृष्टान्तः, यथा हि पद्मरागादिरुपलविशेषो भास्वरस्वरूपोऽपि स्वगतमलकलङ्काङ्कितस्तदा वस्त्वप्रकाशयन्नपि क्षारमृत्पुटपाकाद्युपायतस्तदपाये प्रकाशयति, एवमात्मापि ज्ञस्वभावः कर्ममलिनः प्रागशेषं वस्त्वप्रकाशन्नपि सम्यक्त्वज्ञान-तपोविशेषसंयोगोपायतोऽपेत-समस्तावरणः सर्वं वस्तु प्रकाश-यति, प्रतिबन्धकाभावात्, न चाप्रतिबद्धस्वभावस्यापि पद्मरागवत्सर्वत्र प्रकाशनव्यापाराभावः, तस्य ज्ञस्वभावत्वाद्, न हि ज्ञो ज्ञेये सति प्रतिबन्धशून्यो न प्रवर्त्तते, न च प्रकाशकस्व-भाव-पद्मरागेणैव व्यभिचारो भावयितव्यः, तस्य सन्निकृष्टार्थप्रकाशनात्, विप्रकृष्टविषये तु देशवि-प्रकर्षेणैव प्रति-बद्धत्वादप्रवृत्तिः, न चात्मनोऽपि देशविप्रकर्ष एवापरिच्छेदहेतुः, तस्यागमगम्येषु सूक्ष्मव्य-वहितविप्रकृष्टेष्वखिलपदार्थेष्वधिगतिसामर्थ्यदर्शनात्, तथा च परमाणुमूलकीलोदकाम-रलोकचन्द्रोपरागादिपरिच्छेदसामर्थ्यमस्यागमोपदेशतः क्षयोपशमवतोऽपि दृश्यते, एवं साक्षात्कारि क्षायिकमपि प्रतिपत्तव्यमिति ।

एवं क्षायिकज्ञानवतां नारकाः प्रत्यक्षा एव, भवतोऽप्यनुमानगम्याः, तच्चेदम्-विद्यमानभोक्तृकं प्रकृष्टपापफलं, कर्मफलत्वात्, पुण्यफलवत्, न च तिर्यग्नरा एव प्रकृष्टपापफलभुजः, तस्यौदारिकशरीरवता वेदयितुमशक्यत्वात्, अनुत्तरसुरजन्मनिबन्धनप्रकृष्टपुण्यफलवत्, तथाऽऽगमगम्याश्च ते, यत एवमागमः-"सततानुबन्धमुक्तं दुःखं नरकेषु तीव्रपरिणामम् । तिर्यक्षूष्णभयक्षुत्तृडादिदुःखं सुखं चाल्पम् ।। सुखदुःखे मनुजानां मनः-शरीराश्रये बहुविकल्पे। सुखमेव तु देवानामल्पं दुःखं तु मनसि भवम् ।।" इत्यादि, एवम्–

नि. (६२९) छिण्णंमि संसयंमी जिनेन जरमरणविप्पमुक्केणं ।
सो समणो पव्वइओ तिहि उ सह खंडियसएहिं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- पूर्ववन्नवरं त्रिभिः सह खण्डिकशतैरिति ॥ अष्टमो गणधरः समाप्तः ॥

नि. (६३०) ते पव्वइए सोउं अयलभाया आगच्छइ जिनसगासं ।
वच्चामि न वंदामी वंदित्ता पज्जुवासामि ॥

वृ- पूर्ववन्नवरम्-अचलभ्राता आगच्छति जिनसकाशमिति ।

नि. (६३१) आभट्ठो य जिणेणं जाइजरामरणविप्पमुक्केणं ।
नामेण य गोत्तेण य सव्वण्णू सव्वदरिसीणं ॥

वृ- सपातनिका पूर्ववत् ।

नि. (६३२) किं मन्नि पुण्णपावं अत्थि न अत्थित्ति संसओ तुज्झं ।
वेयपयाण य अत्थं न याणसी तेसिमो अत्थो ॥

वृ- किं पुण्यपापे स्तः न वा ? मन्यसे, व्याख्यान्तरं पूर्ववत्, अयं च संशयस्तव विरुद्धवेदपदश्रुतिप्रभवो दर्शनान्तरविरुद्धश्रुतिप्रभवश्च, तत्र वेदपदानां चार्थं न जानासि, चशब्दाद्युक्तिहृदयं च, तेषामयमर्थ इत्यक्षरार्थः । तानि चामूनि वेदपदापि–'पुरुष एवेदं ग्नि सर्व' मित्यादीनि यथा द्वितीयगणधरे, व्याख्यापि तथैव, स्वभावोपन्यासोऽपि तथैव, तथा सौम्याचलभ्रातः ! त्वमित्थं मन्यसे-दर्शनविप्रपत्तिश्चात्र, तत्र केषाञ्चिद्दर्शनम्–पुण्यमेवैकमस्ति न पापं, तदेव चावाप्तप्रकर्षावस्थं स्वर्गाय क्षीयमाणं तु मनुष्यतिर्यग्नारकादिभवफलाय, तदशेषक्षयाच्च मोक्ष इति, यताऽत्यन्तपथ्याहारासेवनादुत्कृष्टमारोग्यसुखं भवति, किञ्चित्किञ्चित्पथ्याहार-परिवर्जनाच्चारोग्यसुखहानिः, अशेषाहारपरिक्षयाच्च सुखाभावकल्पोऽपवर्गः, अन्येषां तु पापमेवैकं, न पुण्यमस्ति, तदेव चोत्तमावस्थामनुप्राप्तं नारकभवायालं, क्षीयमाणं तु तिर्यग्नरामर-भवाये ति, तदत्यन्तक्षयाच्च मोक्ष इति, यथा अत्यन्तापथ्याहारसेवनात्परमनारोग्यं, तस्यैव किञ्चित्किञ्चिदपकर्षादारोग्यसुखम्, अशेषपरित्यागान्मृतिकल्पो मोक्ष इति, अन्येषां तूभय-मप्यन्योऽन्यानुविद्धस्वरूपकल्पं सम्मिश्रसुखदुःखाख्यफलहेतुभूतमिति, तथा च किल नैकान्ततः संसारिणः सुखं दुःखं चास्ति, देवानामपीर्ष्यादियुक्तत्वात्, नारकाणामपि च पञ्चेन्द्रियत्वानुभवाद्, इत्थंभूतपुण्यपापाख्यवस्तुक्षयाच्चापवर्ग इति,

अन्येषां तु स्वतन्त्रमुभयं विविक्तसुखदुःखकारणं, तत्क्षयाच्च निःश्रेयसावाप्तिरिति, अतो दर्शनानां परस्परविरुद्धत्वात्, अप्रमाणत्वादस्मिन्विषये प्रामाण्याभाव इति तेऽभिप्रायः, 'पुण्यः पुण्येने'त्यादिना प्रतिपादिता च तत्सत्ता, अः संशयः, तत्र वेदपदानां चार्थं न जानासि, तेषामयमर्थः यथा द्वितीयगणधरे तथा स्वभावनिराकरणयुक्तो वक्तव्यः, सामान्यकर्मसत्तासिद्धिरपि तथैव वक्तव्या, यच्च दर्शनानामप्रामाण्यं मन्यसे, परस्परविरुद्धत्वाद्, एतदसाम्प्रतम्, एकस्य प्रमाणत्वात्, तथा च पाटलिपुत्रादिस्वरूपाभिधायकाः सम्यक् तद्रूपाभिधायकयुक्ताः परस्परविरुद्धवचसोऽपि न सर्व एवाप्रमाणतां भजन्ते, तत्र यत्प्रमाणं तदप्रमाणनिरासद्वारेण प्रदर्शयिष्यामः, तत्र न तवात्पुण्यमेवापचीयमानं दुःखकारणं, तस्य सुखहेतुत्वेनेष्टस्वात्, स्वल्पस्यापि स्वल्पसुखनिर्वर्त्तकत्वात्, तथा चाणीयसो हेमपिण्डादणुरपि सौवर्ण्ण एव घटो भवति, न मार्त्तिक इति, न च तद्भावो दुःखहेतुः, तस्य निरुपाख्यत्वात्, न च सुखाभाव एव स्वसत्ताविकलो दुःखं, तस्यानुभूयमानत्वात्, ततश्च स्वानुरूपकारणपूर्विका

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुःखप्रकर्षानुभूतिः, प्रकर्षानुभूतित्वात्, पुण्यप्रकर्षानुभूतिवत्, न च पुण्यलेश एवानुरूपं कारणमस्या इति, एवं दृष्टान्तोऽप्याभासितव्यः, केवलपुण्यवादनिरासः।

केवलपापपक्षेऽपि विपरीतमुपपत्तिजालमिदमेव वाच्यं, नापि तत्सर्वथाऽन्योऽन्यानुविद्धस्वरूपं निरंशवस्त्वन्तरमेव, सर्वथा सम्मिश्रसुखदुःखाख्यकार्यप्रसङ्गाद्, असदंशश्च सुखदुःखानुभवो, देवानां सुखाधिक्यदर्शनात्, नारकाणां च दुःखाधिक्यदर्शनात्, न च सर्वथा सम्मिश्रैकरूपस्य हेतोरल्पबहुत्वभेदेऽपि कार्यस्य स्वरूपेण प्रमाणतोऽल्पबहुत्वं विहाय भेदो युज्यते, न हि मेचककारणप्रभवं कार्य्यमन्यतमवर्ण्णोत्कटतां बिभर्त्ति, तस्मात् सुखातिशयस्यान्यन्निमित्तमन्यच्च दुःखातिशयस्येति। न च सर्वथैकस्य सुखातिशयनिबन्धनांशवृद्धिर्दुःखातिशयकारणांशहान्या सुखातिशयप्रभवाय कल्पयितुं न्याय्या, भेदप्रसङ्गात्, तथा च यद्वृद्धावपि यस्य वृद्धिर्न भवति तत्ततो भिन्नं प्रतीतमेव, एवं सर्वथैकरूपता पुण्यपापयोर्न घटते, कर्मसामान्यतया त्वविरुद्धाऽपि, यतः–सद्वेद्य सम्यक्त्वहास्यरतिपुरुषवेदशुभायु-र्नामगोत्राणि पुण्यमन्यत्पाप मिति, सर्वं चैतत्कर्म, तस्माद्विविक्ते पुण्यपापे स्त इति। संसारिणश्च सत्त्वस्यैतदुभयमप्यस्ति, किञ्चित्कस्यचिदुपशान्तं किञ्चित्क्षयोपशमतामुपगतं किञ्चित्क्षीणं किञ्चिदुदीर्णम्, अत एव च सुखदुःखातिशयवैचित्र्यं जन्तनामिति।–

नि. (६३३) छिन्नंमि संसयंमी जिनेन जरमरणविप्पमुक्केणं।
सो समणो पव्वइओ तिहि उ सह खंडियसएहिं॥

वृ- पूर्ववत्। नवमो गणधरः समाप्तः॥

नि. (६३४) ते पव्वइए सोउं मेयज्जो आगच्छई जिनसगासं।
वच्चामि न वंदामी वंदित्ता पज्जुवासामि॥

वृ- व्याख्या–पूर्ववन्नवरं मेतार्यः आगच्छतीति॥

नि. (६३५) आभट्ठो य जिणेणं जाइजरामरणविप्पमुक्केणं।
नामेण य गोत्तेण य सव्वण्णू सव्वदीरिसीणं॥

वृ- सपातनिका व्याख्या पूर्ववदेव।

नि. (६३६) किं मन्ने परलोगो अत्थि नत्थित्ति संसओ तुज्झं।
वेयपयाण य अत्थं न याणसी तेसिमो अत्थो॥

वृ- किं परलोको–भवान्तरगतिलक्षणोऽस्ति नास्तीति मन्यसे, व्याख्यान्तरं पूर्ववत्, अयं च संशयस्तव विरुद्धवेदपदश्रुतिनिमित्तो वर्त्तते, शेषं पूर्ववत्, तानि चामूनि वेदपदानि-'विज्ञानघने'त्यादीनि, तथा 'स वै आत्मा ज्ञानमय' इत्यादीनि च पराभिप्रेतार्थयुक्तानि यथा प्रथमगणधर इति, भूतसमुदायधर्मत्वाच्च चैतन्यस्य कुतो भवान्तरगतिलक्षणपरलोकसम्भव इति ते मतिः, तद्विघाते चैतन्यविनाशादिति, तथा सत्यप्यात्मनि नित्येऽनित्ये वा कुतः परलोकः?, तस्यात्मनोऽप्रच्युतानुत्पन्नस्थिरैकस्वभावत्वात् विभुत्वात् तथा निरन्वयविनश्वरस्वभावेऽप्यात्मनि कारणक्षणस्य सर्वथाऽभावोत्तरकालमिह लोकेऽपि क्षणान्तराप्रभवः कुतः परलोक इत्यभिप्रायः, तत्र वेदपदानां चार्थं न जानासि, तेषामयमर्थः-तत्र 'विज्ञानधने' त्यादीनां पूर्ववद्वाच्यं, न च भूतसमुदायधर्मश्चैतन्यं, क्वचित्सन्निकृष्टदेहोपलब्धावपि चैतन्य संशयात्, न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च धर्मिग्रहणे धर्माग्रहणं युज्यते, इतश्च देहादन्यच्चैतन्यं, चलनादिचेष्टानिमित्तत्वात्, इह यद्यस्य चलनादिचेष्टानिमित्तं तत्ततो भिन्नं दृष्टं, यथा मारुतः पादपादिति, ततश्च चैतन्यस्याऽऽत्मधर्मत्वात्तस्य चानादिमत्कर्मसन्तति-समालिङ्गितत्वात् उत्पादव्ययध्रौव्ययुक्तत्वात्कर्मपरिणामापेक्षमनुष्यादिपर्यायनिवृत्त्या देवादिपर्यायान्तरावाप्तिरस्याविरुद्धेति, नित्यानित्यैकान्तपक्षोक्तदोषानुपपत्तिश्चात्रानभ्युपगमात् इति ।

नि. (६३७) छिन्नंमि संसयंमी जिनेन जरमरणविप्पमुक्केणं ।
सो समणो पव्वइओ तिहि उ सह खंडियसएहिं ॥

वृ- व्याख्या–पूर्ववत् । दशमो गणधरः समाप्तः ।

नि. (६३८) ते पव्वइए सोउं पभासो आगच्छई जिनसगासं ।
वच्चामि न वंदामि वंदित्ता पज्जुवासामि ॥

वृ- व्याख्या–पूर्ववन्नवरं प्रभासः आगच्छतीति ।

नि. (६३९) आभट्ठो य जिणेणं जाइजरानरणविप्पमुक्केणं ।
नामेण य गोत्तेण य सव्वण्णू सव्वदरिसीणं ॥

वृ- सपातनिका व्याख्या पूर्ववदेव ।

नि. (६४०) किं मन्ने निव्वाणं अत्थि नत्थित्ति संसओ तुज्झं ।
वेयपयाण उ अत्थं न याणसि तेसिमो अत्थो ॥

वृ- किं निर्वाणमस्ति नास्तीति मन्यसे, व्याख्यान्तरं पूर्ववत्, अयं च संशयस्तव विरुद्धवेदपदश्रुतिसमुत्थो वर्त्तते, शेषं पूर्ववत् । तानि चामूनि वेदपदानि–'जरामर्य्यं वा एतत्सर्वं यदग्निहोत्रं' तथा 'द्वे ब्रह्मणी वेदितव्ये, परमपरं च, तत्र परं सत्यं ज्ञानमनन्तं ब्रह्मे'ति, एतेषां चायमर्थस्तव मतौ प्रतिभासते-अग्निहोत्रक्रिया भूतवधोपकारभूतत्वात् शबलाकारा, जरामर्य्यवचनाच्च तस्याः सदाकरणमुक्तं, सा चाभ्युदयफला, कालान्तरं च नास्ति यस्मिन्नपवर्गप्रापणक्रियारम्भ इति, तस्मात्साधनाभावान्नास्ति मोक्षः, ततश्चामूनि मोक्षाभावप्रतिपादकानि, शेषाणि तु तदस्तित्वपापकानीत्यतः संशयः, तथा संसाराभावो मोक्षः, संसारश्च तिर्यग्नरनारकामरभवरूपः, तद्भावानतिरिक्तश्चात्मा, ततश्च तदभावे आत्मनोऽप्यभाव एवेति कुतो मोक्षः ?। तत्र वेदानां चार्थं न जानासि, तेषामयमर्थः-'जरामर्य्यं वा' वाशब्दोऽप्यर्थ ततश्च यावज्जीवमपि, न तु नियोगत इति, ततश्चापवर्गप्रापणक्रियारम्भकालास्तिताऽनिवार्य्या, न च संसाराभावे तदव्यक्तिरिक्तत्वात् आत्मनोऽप्यभावो युज्यते, तस्मात्पर्यायरूपत्वात्, न च पर्यायनिवृत्तौ पर्यायिणः सर्वथा निवृत्तिरिति, तथा च हेमकुण्डलयोरनन्यत्वं, न च कुण्डलपर्यायनिवृत्तौ हेम्नोऽपि सर्वथा निवृत्तिः, तथाऽनुभवात्, इत्थं चैतदङ्गीकर्त्तव्यम्, अन्यथा पर्यायनिवृत्तौ पर्यायिणः सर्वथा निवृत्त्यभ्युपगमे पर्यायान्तरानुपपत्तिः प्राप्नोति, कारणाभावात्, तदभावस्य च सर्वदाऽविशिष्टत्वात्, तस्मात्संसारनिवृत्तावप्यात्मनो भावात् वस्तुस्वरूपो मोक्ष इति ॥

नि. (६४१) छिन्नंमि संसयंमी जिनेन जरमरणविप्पमुक्केणं ।
सो समणो पव्वइओ तिहि उ सह खंडियसएहिं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- पूर्ववदेव । एकादशो गणधरः समाप्तः । उक्ता गणधरसंशयापनयनवक्तव्यता ।
साम्प्रतमेतेषामेव वक्तव्यताशेषप्रतिपिपादयिषया द्वारगाथामाह–

नि. (६४२) खेत्ते काले जम्मे गोत्तमगार छउमत्थपरियाए ।
केवलिय आउ आगम परिनेव्वाणे तवे चेव ॥

वृ- एकारान्ताः शब्दाः प्राकृतशैल्या प्रथमैकवचनान्ता द्रष्टव्याः, ततश्च गणधरानधिकृत्य क्षेत्रं–जनपदग्रामनगरादि तद्वक्तव्यं जन्मभूमिः, तथा कालो नक्षत्रचन्द्रयोगोयपलक्षितो वाच्यः, जन्म वक्तव्यं, तच्च मातापित्रायत्तमित्यतो माता-पितरौ वाच्यौ, गोत्रं यद्यस्य तद्वाच्यम्, 'अगारच्छीमत्थपरियाए' त्ति पर्यायशब्दः उभयत्राप्यभिसम्बध्यते, अगारपर्यायो-गृहस्थपर्यायो वाच्यः, तथा छद्मस्थपर्यायश्चेति, तथा केवलिपर्यायो वाच्यः, सर्वायुष्कं वाच्यं, तथा आगमो वाच्यः, कः कस्यागम आसीत् ?, परिनिर्वाणं वाच्यं, कस्य भगवति जीवति सति आसीत् कस्य वा मृते इति, तपश्च वक्तव्यं, किं केनापवर्ग्गं गच्छता तप आचरितमिति ?, चशब्दात्संहननादि च वाच्यम्, इति गाथासमुदायार्थः ॥

इदानीमयवयवार्थः प्रतिपाद्यते-तत्र क्षेत्रद्वारावयवार्थाभिधित्सयाऽऽह–

नि. (६४३) मगहा गोब्बरगामे जाया तिन्नेव गोयमसगोत्ता ।
कोल्लागसन्निवेसे जाओ विअत्तो सुहम्मो य ॥

वृ- मगधाविषये गोर्बरग्रामे सन्निवेशे जातास्त्रय एवाद्याः 'गोयमे'त्ति एते त्रयोऽपि गौतमसगोत्रा इति, कोल्लागसन्निवेशे जातो व्यक्तः सुधर्मश्चेति गाथार्थः ॥

नि. (६४४) मोरीयसन्निवेसे दो भायरो मंडिमोरिया जाया ।
अयलो य कोसलाएँ महिलाए अंकपिओ जाओ ॥

वृ- मौर्यसन्निवेशे द्वौ भ्रातरी मण्डिकमौर्यौ जातौ, अचलश्च कौशलायां मिथिलामकम्पिको जात इति गाथार्थः ॥

नि. (६४५) तुंगीय सन्निवेसे मेयज्जो वच्छभूमिएँ जाओ ।
भगवंपि य प्पभासो रायगिहे गणहगे जाओ ॥

वृ- तुङ्गिकसन्निवेशे मेतार्य्यो वस्तभूमौ जातः, कोशाम्बीविषय इत्यर्थः, भगवानपि च प्रभासो राजगृहे गणधरो जात इति गाथार्थः ॥ कालद्वारावयवार्थः प्रतिपाद्यते-तत्र कालो हि नक्षत्रचन्द्रयोगोपलक्षित इतिकृत्वा यद्यस्य गणभृतो नक्षत्रं तदभिधित्सुराह–

नि. (६४६) जेट्ठा कित्तिय साई सवणो हत्थुत्तरा महाओ य ।
रोहिणि उत्तरसाढा मिगसिर तह अस्सिणी पूसो ॥

वृ- ज्येष्ठाः कृत्तिकाः स्वातयः श्रवणः हस्त उत्तरो यासां ताः हस्तोत्तरा-उत्तरफाल्गुन्य इत्यर्थः, मघाश्च रोहिण्यः उत्तराषाढा मृगशिरस्तथा अश्विन्यः पुष्यः, एतानि यथायोगमिन्द्रभूतिप्रमुखानां नक्षात्राणीति गाथार्थः ॥ जन्मद्वारं प्रतिपाद्यते-मातापित्रायत्तं च जन्मेतिकृत्वा गणभृतां मातापितरावेव प्रतिपादयन्नाह–

नि. (६४७) वसुभूई धनमित्ते धम्मिल मोरिए चेव ।
देवे वसू य दत्ते बले य पियरो गणहराणं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- वसुभूतिः धनमित्रः धर्मिलः धनदेवः मौर्यश्चैव देवः वसुश्च दत्तः बलश्च पितरो गणधराणां, तत्र त्रयाणामाद्यानामेक एव पिता, शेषाणां तु यथासङ्ख्यमन्येषां, नवरं विजयदेवा मण्डिक-मौर्य्ययोः पितृभेदेन द्वयोर्माता, धनदेवे पञ्चत्वमुपगते मौर्य्येण गृहे धृता सैव, अविरोधश्च तस्मिन् देश इति गाथार्थः ।। गोत्रद्वारप्रतिपादनाय आह–

नि. (६४९) तिन्नि य गोयमगोत्ता भारद्दा अग्गिवेसवासिट्ठा ।
कासवगोयमहारिय कोडिण्णदुगं च गोत्ताइं ।।

वृ- त्रयश्च गौतमगोत्राः इन्द्रभूत्यादयः, भारद्वाजाग्निवैश्यायनवाशिष्टाः यथायोगं व्यक्तसु-धर्ममण्डिकाः, काश्यपगौतमहारीतसगोत्राः मौर्याकम्पिकाचलभ्रातर इति, कौण्डिन्यसगोत्रौ द्वौ मेतार्यप्रभासावित्येतानि गणधराणां गोत्राणीति गाथार्थः ।।

अगारपर्याय-द्वारव्याचिख्यासयाऽऽह–

नि. (६५०) पन्ना छायालीसा बायाला होइ पण्ण पन्ना य ।
तेवन्न पंचसट्ठी अडयालीसा य छायाला ।।

वृ- पञ्चाशत् षट्चात्वारिंशत् द्विचत्वारिंशत् भवति पञ्चाशत् पञ्चाशच्च त्रिपञ्चाशत् पञ्चषष्टिः अष्टचत्वारिंशत् षट्चत्वारिंशत् इति गाथार्थः ।।

नि. (६५१) छत्तीसा सोलसगं अगारवासो भवे गणहराणं ।
छउमत्थयपरियागं अहक्कमं कित्तइस्सामि ।।

वृ- षट्त्रिंशत् षोडशकम् 'अगारवासो' गृहवासो यथासङ्ख्यम् एतावान् गणधराणाम् इति गाथार्द्धम् । अनन्तरद्वारावयवार्थप्रतिपिपादयिषयाऽऽह पश्चार्द्धा–छद्मस्थपर्यायं 'यथाक्रमं' यथायोगं कीर्त्तयिष्यामि इति गाथार्थः ।।

नि. (६५२) तीसा बारस दसगं बारस बायाल चोद्दसदुगं च ।
नवगं बारस दस अट्ठगं च छउमत्थपरियाओ ।।

वृ- गाथेयं निगदसिद्धा ।। केवलिपर्यायपरिज्ञानोपायप्रतिपादनायाह–

नि. (६५३) छउमत्थपरीयागं अगारवासं च वोगसित्ता णं ।
सव्वाउगस्स सेसं जिनपरियागं वियाणाहि ।।

वृ- छद्मस्थपर्यायम् अगारवासं च व्यवकलभ्य सर्वायुष्कस्य शेषं जिनपर्यायं विजानीहीति गाथार्थः ।। स चायं जिनपर्यायः–

नि. (६५४) बारस सोलस अट्ठारसेव अट्ठारसेव अट्ठेव ।
सोलस सोल तहेक्कवीस चोद्द सोले य सोलेय ।।

वृ- निगदसिद्धा । सर्वायुष्कप्रतिपादनायाह–

नि. (६५५) बानउई चउहत्तरि सत्तरि तत्तो भवे असीई य ।
एगं च सय तत्तो तेसीई पंचनउई य ।।

नि. (६५६) अट्ठत्तरिं च वासा तत्तो बावत्तरिं च वासाइं ।
बावट्ठी चत्ता खलु सव्वगणहराउयं एयं ।।

वृ- गाथाद्वयं निगदसिद्धमेव ।। आगमद्वारावयवार्थं प्रतिपादयन्नाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (६५७) सव्वे य माहणा जच्चा, सव्वे अज्झावया विऊ ।
सव्वे दुवालसंगी य, सव्वे चोद्दसपुव्विणो ॥

वृ- सर्वे च ब्राह्मणा जात्याः, अशुद्धा न भवन्ति, सर्वेऽध्यापकाः, उपाध्याया इत्यर्थः, 'विद्वांसः' पण्डिताः, अयं गृहस्थागमः, तथा सर्व्वे द्वादशाङ्गिनः, तत्र स्वल्पेऽपि द्वादशाङ्गाध्ययने द्वादशाङ्गिनोऽभिधीयन्त एव अतः सम्पूर्ण-ज्ञापनार्थमाह—सर्वे चतुर्द्दशपूर्विण इति गाथार्थः ॥

परिनिर्वाणद्वारमाह—

नि. (६५८) परिनिव्वुया गणहरा जीवंते नायए नव जना उ ।
इंदमूई सुहम्मो य रायगिहे निव्वुए वीरे ॥

वृ- निगदसिद्धा । तपोद्वारप्रतिपादनायाह—

नि. (६५९) मासं पाओवगया सव्वेऽवि य सव्वलद्धिसंपन्ना ।
वज्जरिसहसंघयणा समचउरंसा य संठाणा ॥

वृ- 'मासं पायोवगय' त्ति सर्व एव गणधराः मासं पादपोपगमनं गताः-प्राप्ताः, द्वारगाथोपन्यस्तचशब्दार्थमाह—सर्वेऽपि च सर्वलब्धिसम्पन्नाः-आमर्षौषध्याद्यशेषलब्धिसम्पन्ना इत्यर्थः, वज्रऋषभसंहननाः समचतुरस्त्राश्च संस्थानत इति गाथार्थः ॥ उक्तः सामायिकार्थसूत्रप्रणेतृणां तीर्थकरगणधराणां निर्ग्गमः, साम्प्रतं क्षेत्रद्वारमवसरप्राप्तमुल्लङ्घ्य कालद्वारमुच्यते, अनन्तरमेव द्रव्यनिर्गमस्य प्रतिपादितत्वात् कालस्य च द्रव्यपर्यायत्वात् अन्तरङ्गत्वाद् 'अन्तरङ्गबहिरङ्गयोश्चान्तरङ्ग एव विधिर्बलवान्' इति परिभाषासामर्थ्यादिति, निर्युक्तिकृता तु क्षेत्रस्याल्पवक्तव्यत्वादन्यथोपन्यासः कृत इति । स च कालो नामाद्येकादशभेदभिन्नः, तत्र नामस्थापने सुज्ञाने, द्रव्यादिकालस्वरूपाभिधित्सयाऽऽह—

नि. (६६०) दव्वे अद्ध अहाउय उवक्कमे देसकालकाले य ।
तह य पमाणे वण्णे भावे पगयं तु भावेणं ॥

वृ- तत्र 'द्रव्य' इति वर्त्तनादिलक्षणो द्रव्यकालो वाच्यः, 'अद्धे'त्ति चन्द्रसूर्यादिक्रियाविशिष्टोऽर्द्धतृतीयद्वीपसमुद्रान्तर्वर्त्त्यद्धाकालः समयादिलक्षणो वाच्यः, तथा यथाऽऽयुष्ककालो देवाद्यायुष्कलक्षणो वाच्यः, तथा 'उपक्रमकालः' अभिप्रेतार्थसामीप्यानयनलक्षणः सामाचारीयथायुष्कभेदभिन्नो वाच्यः, तथा देशकालो वाच्यः, देशः प्रस्तावोऽवसरो विभागः पर्याय इत्यनर्थान्तरं, ततश्चाभीष्टवस्त्ववाप्त्यवसरकाल इत्यर्थः, तथा कालकालो वाच्यः, तत्रैकः कालशब्दः प्राग्निरूपित एव, द्वितीयस्तु सामयिकः, कालो मरणमुच्यते, मरणक्रियाकलनं कालकाल इत्यर्थः, चः समुच्चये, तथा च 'प्रमाणकालः' अद्धाकालविशेषो दिवसादिलक्षणो वाच्यः, तथा वर्ण्णकालो वाच्यः, वर्ण्णश्चासौ कालश्चेति वर्णकालः, 'भावि'त्ति औदयिकादिभावकालः सादिसपर्यवसानादिभेदभिन्नो वाच्य इति, 'प्रकृतं तु भावेने' ति भावकालेनाधिकार इति गाथासमुदायार्थः ॥ साम्प्रतमवयवार्थोऽभिधीयते-तत्राद्यद्वारावयवार्थाभिधित्सयाऽऽह—

नि. (६६१) चेयणमचेयणस्स व दव्वस्स ठिइ उ जा चउवियप्पा ।
सा होइ दव्वकालो अहवा दवियं तु तं चेव ॥

वृ- चेतनाचेतनस्य देवस्य स्कन्धादेः, बिन्दुरलाक्षणिकः, अथवा चेतनस्याचेतनस्य च द्रव्यस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थानं-स्थितिरेव या सादिसपर्यवसानादिभेदेन 'चतुर्विकल्पा' चतुर्भेदा सा स्थितिर्भवति द्रव्यस्य कालो द्रव्यकालः, तत्पर्यायत्वात्, अथवा 'द्रव्यं तु' तदेव द्रव्यमेव कालो द्रव्यकाल इति गाथार्थः। चेतना चेतनद्रव्यचतुर्विधस्थितिनिदर्शनायाह–

नि. (६६२) गइ सिद्धा भवियाया अभविय पोग्गल अनागयद्धा य।
तीयद्ध तिन्नि काया जीवाजीवट्ठिई चउहा ॥

वृ- 'गति'त्ति देवादिगतिमधिकृत्य जीवाः सादिसपर्यवसानाः, 'सिद्ध'त्ति सिद्धाः प्रत्येकं सिद्धत्वेन साद्यपर्यवसानाः 'भवियाय'त्ति भव्याश्च भव्यत्वमधिकृत्य केचनानादिसपर्यवसानाः, 'अभविय'त्ति अभव्याः खल्वभव्यतया अनाद्यपर्यवसाना इति जीवस्थितिचतुर्भङ्गिका। 'पोग्गल'त्ति पूरणगलनधर्माणः पुद्गलाः, ते हि पुद्गलत्वेन सादिसपर्यवसानाः, 'अनागयद्ध'त्ति अनागताद्धा–अनागतकालः, स हि वर्त्तमानसमयादिः सादिरनन्तत्वाच्चापर्यवसान इति, 'तीयद्धा'त्ति अतीतकालोऽनन्तत्वादनादिः साम्प्रतसमयपर्यन्तविवक्षायां सपर्यवसान इति, 'तिण्णि काय'त्ति धर्माधर्माकाशस्तिकायाः खल्वनाद्यपर्यवसाना इति, इत्थं जीवाजीवास्थितिश्चतुर्द्धेति गाथार्थः ॥ अद्धाकालद्वारावयवार्थ व्याचिख्यासुराह–

नि. (६६३) समयावलिय मुहुत्ता दिवसमहोरत्त पक्ख मासा य।
संवच्छर युग पलिया सागर ओसप्पि परियट्टा ॥

वृ- तत्र परमनिकृष्टः कालः समयोऽभिधीयते, स च प्रवचनप्रतिपादितपट्टशटिकापाटनदृष्टान्तादवसेयः, आवलिका–असङ्ख्येयसमयसमुदायलक्षणा, द्विघटिको मुहूर्त्तः, दिवसश्चतुष्प्रहरात्मकः, यद्वा आकाशखण्डमादित्येन स्वभाभिर्व्याप्तं तद्दिवसं इत्युच्यते, शेषं निशेति, अहोरात्रमष्टप्रहरात्मकमहर्न्निराहिमित्यर्थः, पक्षः-पञ्चदशाहोरात्रात्मकः, मासः- तद्द्विगुणः, चः समुच्चये, संवत्सरो-द्वादशमासात्मकः, युगं पञ्चसंवत्सरम्, असङ्ख्येययुगात्मकं पलितमिति उत्तरपदलोपाद्, इत्थं सागरोपममपि, तत्र पल्योपमदशकोटीकोट्यात्मकं सागरमाख्यायते, उत्सर्पिणी-सागरोपमदशकोटीकोट्यात्मिका, एवमवसर्प्पिण्यपि, परावर्त्तोऽनन्तोत्सर्प्पिण्यवसर्पिण्यात्मकः, स च द्रव्यादिभेदभिन्नः प्रवचनादवसेय इति गाथार्थः ॥

यथाऽऽयुष्ककालद्वार-मुच्यते-तत्राद्धाकाल एवायुष्ककर्मानुभवविशिष्टः सर्वजीवानां वर्त्तनादिमयो यथायुष्क-कालोऽभिधीयते, तथा चाह–

नि. (६६४) नेरइयतिरियमनुयादेवाण अहाउयं तु जं जेण।
निव्वत्तियमन्नभवे पालेंति अहाउकालो सो ॥

वृ- नारकतिर्यग्मनुष्यदेवानां यथायुष्कमेव यद्येन निर्वर्त्तितं-रौद्रध्यानादिना कृतम 'अन्यभवे' अन्यजन्मनि तद् यदा विपाकतस्त एवानुपालयन्ति स यथायुष्ककालस्तु, इति गाथार्थः।

साम्प्रतमुपक्रमकालद्वारमाह–

नि. (६६५) दुविहोवक्कमकालो सामायारी अहाउयं चेव।
सामायारी तिविहा ओहे दसहा पयविभागे ॥

वृ- द्विविधश्चासायुपक्रमकालश्चेति समासः, तदेव द्वैविध्यमुपदर्शन्नाह–'सामायारी अहाउअं चेव' समाचरणं समाचारः-शिष्टाचरितः क्रियाकलापस्तस्य भावः "गुणवचनब्राह्मणादिभ्यः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्मणि च'' ष्यञ् समाचार्य्यं, पुनः स्त्रीविवक्षायां षिद्गौरादिभ्यश्चे ति ङीष्, यस्ये त्यकारलोपः, यस्य हल इत्यनेन तद्धितयकारलोपः, परगमनं सामाचारी, तस्या उपक्रमणम्–उपरिमश्रुतादिहा-नयनमुपक्रमः, सामाचार्युपक्रमश्चासौ कालश्चेति समासः, यथाऽऽयुष्कस्योपक्रमणं दीर्घकाल-भोग्यस्य लघुतरकालेन क्षपणमुपक्रमः, यथायुष्कोपक्रमश्चासौ कालश्चेति समासः,तत्र हि काल-कालवतौरभेदात् कालस्यैव आयुष्काद्युपाधिविशिष्टिस्योपक्रमो वेदितव्य इत्यभिप्रायः । तत्र सामाचारी त्रिविधा–'ओहे दसहा पदविभागे' त्ति 'ओघः' सामान्यम्, ओघः सामाचारी सामान्यतः सङ्क्षेपाभिधानरूपा, सा चोघनिर्युक्तिरिति । दशविधसामाचारी इच्छाकारादिलक्षणा, पदविभाग-सामाचारी छेदसूत्राणीति । तत्रौघसमाचारी नवमात्पूर्वात् तृतीयाद्वस्तुन आचाराभिधानात् तत्रापि विंशतितमात्प्राभृतात्, तत्राप्योघप्राभृतप्राभृतात् निर्व्यूढेति, एतदुक्तं भवति-साम्प्रतकाल-प्रव्रजितानां ताव्च्छ्रुतपरिज्ञानशक्तिविकलानामायुष्कादिह्रासमपेक्ष्य प्रत्यासन्नीकृतेति । दश-विधसामाचारी पुनः षड्विंशतितमादुत्तराध्ययनात्स्वल्पतरकालप्रव्रजितपरिज्ञानार्थ निर्व्यूढेति। पदविभागसामाचार्य्यपि छेदसूत्रलक्षणान्नवमपूर्वादेव निर्व्यूढेति गाथार्थः ।। साम्प्रतमोघनिर्युक्ति-र्वाच्या, सा च सुप्रपञ्चितत्वादेव न विव्रियते, साम्प्रतं दशविधसामाचारीस्वरूपदर्शनायाह–

नि. (६६६) इच्छा मिच्छा तहाकारो, आवसिया य निसीहिया ।
आपुच्छणा य पडिपुच्छा छंदणा य निमंतणा ।।

नि. (६६७) उवसंपया य काले, सामायारी भवे दसहा ।
एएसिं तु पयाणं पत्तेय परूवणं वोच्छण ।।

वृ- एषणमिच्छाकरणं कारः, तत्र कारशब्दः प्रत्येकभिसम्बध्यते, इच्छया-बलाभियोगमन्तरेण करणम् इच्छाकारः इच्छाक्रियेत्यर्थः, तथा चेच्छाकारेण ममेदं कुरु इच्छाक्रियया न च बलाभियोगपूर्विकयेति भावार्थः १, तथा मिथ्या-वितथ मनृतमिति पर्यायाः, मिथ्याकरणं मिथ्याकारः, मिथ्याक्रियेत्यर्थः, तथा च संयमयोगवितथाचरणे विदित जिनवचनसाराः साघवस्तत्क्रियाया वैतथ्यप्रदर्शनाय मिथ्याकारं कुर्वते, मिथ्याक्रियेयमिति हृदयं २, तथाकरणं तथाकारः, स च सूत्रप्रश्नगोचरो यथा भवद्भिरुक्तं तथेदमित्येवस्वरूपः ३, अवश्यकर्त्तव्यै-र्योगैर्निष्पन्ना आवश्यिकी ४, चः समुच्चये, तथा निषेधेन निर्वृत्ता नैषेधिकी ५ आप्रच्छनमापृच्छा, सा विहारभूमिगमनादिप्रयोजनेषु गुरोः कार्या ६, चः पूर्ववत्, तथा प्रतिपृच्छा, सा च प्राङ्नि-युक्तेनापि करणकाले कार्या, निषिद्धेन वा प्रयोजनतः कर्त्तुकामेनेति, तथा छन्दना च प्राग्गृही-तेनाशनादिना कार्या ९, तथा निमन्त्रणा अगृहीतेनैवाशनादिनाऽहं भवदर्थमशनाद्यानयामि इत्येवम्भूता ९, उपसम्पच्च विधिनाऽऽदेया १० । एवं 'काले' कालविषया सामाचारी भवेद्दशविधा तु । एवं तावत्समासत उक्ताः, साम्प्रतं प्रपञ्चतः प्रतिपदमभिधित्सुराह–एतेषां पदानां, तुर्विशेषणे, गोचरप्रदर्शनेन 'प्रत्येकं' पृथक् पृथक् प्ररूपणां वक्ष्य इति गाथाद्वयसमासार्थः ।।

तत्रेच्छाकारो येष्वर्थेषु क्रियते तत्प्रदर्शनायाह–

नि. (६६८) जइ अब्भत्थेज्ज परं कारणजाए करेज्ज से कोई ।
तत्थवि इच्छाकारो न कप्पई बलाभिओगो उ ।।

वृ- 'यदी' त्यभ्युपगमे अन्यथा साधूनामकारणेऽभ्यर्थना नैव कल्पते, ततश्च यद्यभ्यर्थयेत्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'परम्' अन्यं साधुंग्लानादौ कारणजाते कुर्यात् वा, 'से' तस्य कर्तुकामस्य 'कश्चिद्' अन्यसाधुः, तत्र कारणजातग्रहणममुभयथाऽपि सम्बध्यते, तत्रापि तेनान्येन वा साधुना तत्तस्य चिकीर्षितं कर्त्तुकामेन इच्छाकारः, कार्य इति क्रियाध्याहारः, अपिः चशब्दार्थे, अथवाऽपीत्यादिना न्यक्षेण वक्ष्यति, किमित्येवमत आह-न कल्पत एव बलाभियोग इति गाथार्थः ॥

उक्तगाथावयवार्थप्रतिपादनायैवाह-

नि. (६६९) अब्भुवगमंमि नज्जइ अब्भत्थेउं न वट्टइ परो उ ।
अनिगूहियबलविरिएण साहुणा ताव होयव्वं ॥

वृ- 'यद्यभ्यर्थयेत् पर' मित्यस्मिन् यदिशब्दप्रदर्शिते अभ्युपगमे सति ज्ञायते, किमित्याह-अभ्यर्थयितुं 'न वर्त्तते' न युज्यते एव परः, किमित्यत एवाह-न निगूहिते बलवीर्य्ये येनेति समासः, बलं-शारीरं वीर्यम्-आन्तरः शक्तिविशेषः, तावच्छब्दः प्रस्तुतार्थप्रदर्शक एव, अनिगूहितबलवीर्येण तावदित्थं साधुना भवितव्यमिति । पाठान्तरं वा 'अनिगूहियबलविरिएण साहुणा जेण होयव्वं' ति, अस्यायमर्थः-येन कारणेनानिगूहितबलवीर्येण साधुना भवितव्यमिति युक्तिः अतः अभ्यर्थयितुं न वर्त्तते पर इति गाथार्थः ॥

आह-इत्थं तर्हि अभ्यर्थनागोचरेच्छा-कारोपन्यासोऽनर्थक इति ?, उच्यते,

नि. (६७०) जइ हुज्ज तस्स अनलो कज्जस्स वियाणती य वा वाणं ।
गिलाणाइहिं वा हुज्ज वियावडो कारणेहिं सो ॥

वृ- यदि भवेत् 'तस्य' प्रस्तुतस्य कार्यस्य, किम् ?-'अनलः' असमर्थः विजानाति न वा, वाणमिति पूरणार्थो निपातः, ग्लानादिभिर्वा भवेद्व्यापृतः कारणैरसौ तदा सञ्जातद्वितीय-पदोऽभ्यर्थनागोचरमिच्छाकारं रत्नाधिकं विहायान्येषां करोतीति गाथार्थः ॥ आह च-

नि. (६७१) राइनियं वज्जेत्ता इच्छाकारं करेइ सेसाणं ।
एयं मज्झं कज्जं तुब्भे उ करेह इच्छाए ॥

वृ- रत्नानि द्विधा-द्रव्यरत्नानि भावरत्नानि च, तत्र मरकतवज्रेन्द्रनीलवैडूर्यादीनि द्रव्यरत्नानि, सुखहेतुत्वमधिकृत्य तेषामनैकान्तिकत्वादनात्यन्तिकत्वाच्च, भावरत्नानि सम्यग्दर्शनज्ञान-चारित्राणि, सुखनिबन्धनताङ्गीकृत्य तेषामेकान्तिकत्वादात्यन्तिकत्वाच्च, भावरत्नैरधिको रत्नाधिकस्तं वर्जयित्वा इच्छाकारं करोति शेषाणां, कथमित्याह-इदं मम कार्यं वस्त्रसीवनादि यूयं कुरुतेच्छया न बलाभियोगेनेति गाथार्थः ॥ 'जइ अब्भत्थेज्ज परं कारणजाए'त्ति एतावन्मूल-गाथाया व्याख्यातं, साम्प्रतं 'करेज्ज से कोइ' त्ति अस्य गाथाऽवयवस्यावयवार्थं प्रतिपादयति, अत्रान्यकरणसम्भवे कारण-प्रतिपादनायाह-

नि. (६७२) अहवाऽवि विनासेंतं अब्भत्थेंतं च अन्न दट्ठूणं ।
अन्नो कोइ भणेज्जा तं साहुं निज्जरट्ठीओ ॥

वृ- तत्र 'अहवावि विनासेंत' ति अक्षराणां व्यवहितः सम्बन्धः, स चेत्थं द्रष्टव्यः-विनाशयन्तमपि चिकीर्षितं कार्यम्, अपिशब्दात् गुरुतरकार्यकरणसमर्थमविनाशयन्तमप्यभ्यर्थ-यन्तं वा अभिलषितकार्यकरणाय कञ्चन अन्यं साधुं दृष्ट्वा किमित्याह-'अन्यः' तत्प्रयोजनकरण-शक्तः कश्चिद्भणेत् तं साधुं निर्ज्जरार्थीति गाथार्थः ॥ किमित्याह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (६७३) अहयं तुब्भं एयं करेमि कज्जं तु इच्छकारेणं ।
तत्थऽवि सो इच्छं से करेइ मज्जायमूलियं ॥

वृ- अहमित्यात्मनिर्देशे युष्माकम् 'इदं' कर्तुमिष्टं कार्य करोमि 'इच्छाकारेण' युष्माकमिच्छाक्रियया, न बलादित्यर्थः, तत्रापि 'स' कारापकः साधुः 'इच्छं से करेइ'त्ति सूचनात्सूत्रम्, इच्छाकारं करोति, नन्वसौ तेनेच्छाकारेण याचितस्ततः किमर्थमिच्छाकारं करोतीत्याह–मर्यादामूलं, साधूनामियं मर्यादा–न किञ्चिदिच्छाव्यतिरेकेण कश्चित्कारयितव्य इति गाथार्थः। व्याख्यातोऽधिकृतगाथावयवः, साम्प्रतं 'तत्थवि इच्छाकारो'त्ति अस्यापिशब्दस्य विषयप्रदर्शनायाह–

नि. (६७४) अहवा सयं करेंतं किंची अन्नस्स वावि दट्ठूणं ।
तस्सवि करेज्ज इच्छं मज्झंपि इमं करेहित्ति ॥

वृ- अथवा 'स्वकम्' आत्मीयं कुर्वन्तं 'किञ्चित्' पात्रलेपनादि अन्यस्य वा दृष्ट्वा किम् ? -तस्याप्यापन्नप्रयोजनः सन् कुर्यादिच्छाकारं, कथम् ? -ममापीदं-पात्रलेपनादि कुरुतेति गाथार्थः ॥ इदानीमभ्यर्थितसाधुगोचरविधिप्रदर्शनायाऽऽह–

नि. (६७५) तत्थवि सो इच्छं से करेइ दीवेइ कारणं वाऽवि ।
इहरा अनुग्गहत्थं कायव्वं सुहाणो किच्चं ॥

वृ- तत्रप्यभ्यर्थितः सन् 'इच्छाकारं करोति' इच्छाम्यहं तव करोमीति, अथ तेन गुर्वादिकार्यान्तरं कर्त्तव्यमिति तदा दीपयति कारणं वापि, 'इहरा' अन्यथा गुरुकार्यकर्त्तव्याभावे सति अनुग्रहार्थ कर्त्तव्यं साधोः कृत्यमिति गाथार्थः ॥

अपिशब्दाक्षिप्तेच्छाकारविषय-विशेषप्रदर्शनायैवाह–

नि. (६७६) अहवा नाणाईणं अट्ठाएँ जइ करेज्ज किच्चाणं ।
वेयावच्चं किंची तत्थवि तेसिं भवे इच्छा ॥

वृ- अथवा ज्ञानादीनामर्थाय, आदिग्रहणाद्दर्शनचारित्रग्रहणं, यदि कुर्यात् 'कृत्यानाम्' आचार्याणां वैयावृत्त्यं 'कश्चित्' साधुः, पाठान्तरं वा 'किंचि'त्ति किञ्चिद्विश्रामणादि, तत्रापि 'तेषां' कृत्यानां तं साधुं वैयावृत्त्ये नियोजयतां 'भवे इच्छे' ति भवेदिच्छाकारः, इच्छाकारपुरः सरं योजनीय इति गाथार्थः ॥ किमित्यत आह–यस्मात–

नि. (६७७) आणाबलाभिओगो निग्गंथाणं न कप्पई काउं ।
इच्छा पउंजियव्वा सेहे राईनिए (य) तहा ॥

वृ- आज्ञापनामाज्ञा-भवतेदं कार्यमेवेति, तदकुर्वतो बलात्कारापणं बलाभियोय इति, स 'निर्ग्रन्थानां' साधूनां न कल्पते कर्त्तुमिति, किन्तु 'इच्छ'त्ति इच्छाकारः प्रयोक्तव्यः, प्रयोजने उत्पन्ने सति शैक्षके तथा रत्नाधिके चालापकादि प्रष्टुकामेन, आद्यन्तग्रहणादन्येषु चेति गाथार्थः। एष उत्सर्ग उक्तः, अपवादस्त्वाज्ञाबलाभियोगावपि दुर्विनीते प्रयोक्तव्यौ, तेन च सहोत्सर्गतः संवास एव न कल्पते, बहुस्वजननालप्रतिबद्धे त्वपरित्याज्ये अयं विधिः-प्रथममिच्छाकारेण योज्यते, अकुर्वन्नाज्ञया पुनर्बलाभियोगेनेति, आह च–

नि. (६७८) जह जच्चबाहलाणं आसाणं जनवएसु जायाणं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सयमेव खलिणगहणं अहवावि बलाभिओगेणं ॥

नि. (६७९) पुरिसज्जाएऽवि तहा विनीयविनयंमि नत्थि अभिओगो ।
सेसंमि उ अभिओगो जनवयजाए जहा आसे ॥

वृ- यथा जात्यबाह्लीकानामश्वानां जनपदेषु च-मगधादिषु जातानां, चशब्दलोपोऽत्र द्रष्टव्यः, स्वयमेव खलिनग्रहणं भवति, अथवापि बलाभियोगेनेति, खलिनं-कविकमभिधीयते, एष दृष्टान्तः, 'यमर्थोपनयः-पुषजातेऽपि तथा, जातशब्दः प्रकारवचनः, 'विनीयविनयंमि'त्ति विविधम्-अनेकधा नीतः-प्रापितः विनयो येन स तथाविधः तस्मिन् नास्त्यभियोगो जात्यबाह्लीकाश्ववत्, 'सेसंमि उ अभिओगो' त्ति शेषे-विनयरहिते बलाभियोगः प्रवर्त्तते, कथं ? -जनपदजाते यथाऽश्वे इति गाथाद्वयसमुदायार्थः ॥ अवयवार्थस्तु कथानकादवसेयः, तच्चेदम्–

बाहलविसए एगो आसकिसोरो, सो दमिज्जिउकामो वेयालियं अहिवासिऊण पहाए अग्घेऊण बाहियालिं नीतो, खलिणं से ढोइयं, सयमेव तेन गहियं विनीयोत्ति । तत्तो राया सयमेवारूढो, सो हिययइच्छियं वूढो, रण्णा उयरिऊण आहारलयणादिणा सम्मं पडियरिओ, पतिदियहं च सुद्धत्तणओ एवं वहइ, न तस्स बलाभिओगो पवत्तइ । अवरो पुन मगहादिजनवए जातो आसो, सोऽवि दमिज्जिउकामो वेयालियं अहिवासितो, मायरं पुच्छइ-किमेयंति, तीए भणियंकल्लं वाहिज्जसि तस, सयमेव खलिणं गहाय वहंतो नरिंदं तोसिज्जासि, तेन तहा कयं, रन्नावि सव्वो से उवयारो कओ, माऊए सिट्ठं, तीए भणितो-पुत्त ! विनयगुणफलं ते एयं, कल्लं पुणो मा खलिणं पडिवज्जिहिसि, मा वा वहिहिसि, तेणं तहेव कयं, रन्नावि खोखरेण पिट्टिता बला कवियं दाऊण वाहित्ता पुणोऽवि जवसं से निरुद्धं, तेन माऊए सिट्ठं, सा भणइ–पुत्त ! दुच्चेट्ठियफलमिणं ते, तं दिट्ठोभयमग्गो जो ते रुच्चइ तं करेहिसि । एस दिट्ठंतो अयमुवणओ-जो सयं न करेइ वेयावच्चादि तत्थ बलाभिओगोऽवि पयट्टाविज्जइ जनवयजाते जहा आसेत्ति। तस्माद्बलाभियोगमन्तरेणैव मोक्षार्थिना स्वयमेव प्रत्युत इच्छाकारं दत्त्वा अनभ्यर्थितेनैव वैयावृत्त्यं कार्यम् ॥ आह–तथाऽप्यनभ्यर्थितस्य स्वयमिच्छाकारणकमरमयुक्तमेवेत्याशङ्क्याह–

नि. (६८०) अब्भत्थणाए मरुओ वानरओ चेव होइ दिट्ठंतो ।
गुरुकरणे सयमेव उ वाणियगा दुन्नि दिट्ठंता ॥

वृ- अभ्यर्थनायां मरुकः, पुनः शिष्यचोदनायां सत्यां वानरकश्चैव भवति दृष्टान्तः, गुरुकरणे स्वयमेव तु वणिजौ द्वौ दृष्टान्त इति समासार्थः ॥ व्यासार्थः कथानकेभ्योऽवसेय इति, तानि चामूनि–एगस्स साहुस्स लद्धी अत्थि, सो न करेइ वेयावच्चं बालबुड्ढाणंति, आयरियपडिचोइतो भणइ–को मं अब्भत्थेइ ?, आयरिएण भणिओ–तुमं अब्भत्थणं मग्गंतो चुक्किहिसि, जहा सो मरुगोत्ति । एगो मरुगो नाणमदमत्तो कत्तियपुण्णिमाए नरिंदजनवदेसुं दानं दाउमब्भुट्ठिएसु न तत्थ वच्चइ, भज्जाए भणितो–जाहि, सो भणइ–एगं ताव सुद्दाणं परिग्गहं करेमि, बीयं तेसिं घरं वच्चामि ?, जस्स आसत्तमस्स कुलस्स कज्जं सो मम आनेत्ता देउ, एवं सो जावज्जीवाए दरिद्दो जातो । एवं तुमंपि अब्भत्थणं मग्गमाणो चुक्किहिसि निज्जराए, एतेसिं बालबुड्ढाणं अन्ने अत्थि करेंतगा, तुज्झवि एस लद्धी एवं चेव विराहित्ति । ततो सो एवं भणिओ भणइ–एवं सुंदरं जाणंता अप्पणा कीस न करेह ?, आयरिया भणंति-सरिसोऽसि तुमं तस्स वानरगस्स,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जहा एगो वानरो रुक्खे अच्छइ, वासासु सीतवातेहिं झडिज्झति, ताहे सुघराए सउणिगाए भणिओ–'वानर !

पुरिसोऽसि तुमं निरत्थयं वहसि बाहुदंडाइं ।
जो पायवस्स सिहरे न करेसि कुडिं पडालिं वा ॥

सो एवं तीए भणिओ तुण्हिको अच्छइ, ताहे सा दोच्चंपि तच्चंपि भणइ, ततो सो रुट्ठो तं रुक्खं दुरुहिउमाढत्तो, सा नट्ठा, तेन तीसे तं घरं सुंबं सुंबं विक्खित्तं, भणइ य –

नविसि ममं मयहरिया नविसि ममं सोहिया व निद्धा वा ।
सुघरे ! अच्छसु विघरा जा वट्टसि लोगतत्तीसु ॥

सुहं इदानिं अच्छ । एवं तुमंपि मम चेव उवरिएण जाओ, किं च-मम अन्नंपि निज्ञरादारं अत्थि, तेन मम बहुतरिया निज्ञरा, तं लाहं चुक्कीहामि, जहा सो वाणियगो–दो वाणियगा ववहरंति, एगो पढमपाउसो मोल्लं दायव्वयं होहित्ति सयमेव आसाढपुण्णीमाए घरं पच्छ(त्थ) इतो, बीएण अद्धं वा तिभागं वा दाऊण छवावियं, सयं ववहरइ, तेन तद्दिवसं बिउणो लाहो लद्धो, इयरो चुक्को । एवं चेव जइ अहं अप्पणा वेयावच्चं करेमि तो अचिंतणेण सुत्तत्था नासंति, तेहि य नट्ठेहिं गच्छसारवणाऽभावेण गणस्सादेसादिअप्पडितप्पणेण बहुयरं मे नासेइति। आह च –

सुत्तत्थेसु अचिंतण आएसे बुड्ढसेहगगिलाणे ।
बाले खमए वाई इड्ढीमाइ अनिड्ढी य ॥
एएहिं कारणेहिं तुंबभूओ उ होति आयरिआ । वेयावच्चं न करे कायव्वं तस्स सेसेहिं ॥
जेन कुलं आयत्तं तं पुरिसं आयरेण रक्खेज्ञा ।
न हु तुंबंमि विनट्ठे अरया साहारया होंति ॥

बाले सप्पभए तहा इड्ढिमंतंमि आगए पानगादिगए आयरिए लहुत्तं, एवं वादिम्मिवि, अनिस्सरपव्वइयगा य एएत्ति, जनापवादो, सेसं कंठं । आह–इच्छाकारेणाहं तव प्रथमालिकामानयामीत्यभिधाय यदा लब्ध्यभावान्न सम्पादयति तदा निर्ज्जरालाभविकलस्तस्येच्छाकारः, इत्यतः किं तेनेत्याशङ्क्याह–

नि. (६८१) संजमजोए अब्भुट्ठियस्स सद्धाएँ काउकामस्स ।
लाभो चेव तवस्सिस्स होइ अद्दीणमणसस्स ॥

वृ- 'संयमयोगे' संयमव्यापारे अभ्युत्थितस्य तथा 'श्रद्धया' मनःप्रसादेन इहलोकपरलोकाशंसां विहाय कर्त्तुकामस्य, किम् ? -'लाभो चेव तवसिस्स' त्ति प्रकरणान्निर्ज्जराया लाभ एव तपस्विनो भवति अलब्ध्यादौ, अदीनं मनोऽस्येति अदीनमनास्तस्यादीनमसन इति गाथार्थः ॥

इदानीं मिथ्याकारविषयप्रतिपादनायाह–

नि. (६८२) संजमजोअ अब्भुट्ठियस्स जंकिंचि वितहमायरियं ।
मिच्छा एतंति वियाणिऊण मिच्छत्ति कायव्वं ॥

वृ- संयमयोगः-समितिगुप्तिरूपस्तस्मिन्विषयभूतेऽभ्युत्थितस्य सतः यत्किञ्चिद्वितथम्-अन्यथा आचरितम्–आसेवितं, भूतमिति वाक्यशेषः, 'मिथ्या एतदिति' विपरीतमेतदित्येवं विज्ञाय

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किम् ?-'मिच्छत्ति कायव्वं' मिथ्यादुष्कृतं दातव्यमित्यर्थः । संयमयोगविषयायां च प्रवृत्तौ वितथासेवने मिथ्यादुष्कृतं दोषापनयनायालं, न तूपेत्यकरणगोचरायां नाप्यसकृतत्करण-गोचरायामिति गाथाहृदयार्थः ।। तथा चोत्सर्गमेव प्रतिपादयन्नाह–

नि. (६८३) जइ य पडिक्कमियव्वं अवस्स काऊण पावयं कम्मं ।
तं चेव न कायव्वं तो होइ पए पडिक्कंतो ।।

वृ- यदि च 'प्रतिक्रान्तव्यं' निवर्त्तितव्यं, मिथ्यादुष्कृतं दातव्यमित्यर्थः, 'अवश्यं' नियमेन कृत्वा पापकं कर्म, ततश्च 'तदेव' पापकं कर्म न कर्त्तव्यं, ततो भवति 'पदे' उत्सर्गपदविषये प्रतिक्रान्त इति । अथवा-'पद'त्ति प्रथमं प्रतिक्रान्त इति गाथार्थः ।।

साम्प्रतं यथाभूतस्येदं मिथ्यादुष्कृतं सुदत्तं भवति तथा भूतमभिधित्सुराह–

नि. (६८४) जं दुक्कडंति मिच्छा तं भुज्जो कारणं अपूरेंतो ।
तिविहेण पडिक्कंतो तस्स खलु दुक्कडं मिच्छा ।।

वृ- 'यदि' त्यनिर्दिष्टस्य निर्देशः, करणमिति योगः, ततश्च 'यत्कारणं' यद् वस्तु दुष्ठु कृतं दुष्कृतम् 'इति' एवं विज्ञाय 'मिच्छ'त्ति सूचनात्सूत्रमितिकृत्वा मिथ्यादुष्कृतं दत्तं, तद् 'भूयः' पुनः प्रागुक्तं दुष्कृतकारणम् 'अपूरयन्' अकुर्वन्ननाचरन्नित्यर्थः, यो वर्त्तते इति वाक्यशेषः, 'तस्स खलु दुक्कडं मिच्छ'त्ति सम्बद्ध एव ग्रन्थः, तत्र स्वयं कायेनाप्य-कुर्वन्नपूरयन्नभिधीयत एवेत्यत आह–'तिविहेण पडिक्कंतो' त्ति त्रिविधेन मनोवाक्कायलक्षणेन योगेन कृतकारितानुमति-भेदयुक्तेन 'प्रतिक्रान्तो' निवृत्तो यस्तस्माद्दुष्कृतकारणात् तस्यैव, खलुशब्दोऽवधारणे, 'दुष्कृतं' प्रागुक्तं दुष्कृतफलदातृत्वमधिकृत्य 'मिथ्ये' ति मिथ्या, भवतीति क्रियाध्याहारः अथवा व्यवहितयोगात्तस्यैव मिथ्यादुष्कृतं भवति नान्यस्येति गाथार्थः ।।

साम्प्रतं यस्य मिथ्यादुष्कृतं दत्तमपि न सम्यग् भवति तत्प्रतिपादनायाह–

नि. (६८५) जं दुक्कडंति मिच्छा तं चेव निवेसए पुणो पावं ।
पच्चक्खमुसावाई मायानियडीपसंगो य ।।

वृ- 'यत्' पापं किञ्चिदनुष्ठानं दुष्कृतमिति विज्ञाय 'मिच्छ'त्ति मिथ्यादुष्कृतं दत्तमित्यर्थः, यस्तदेव निषेवते पुनः पापं स हि प्रत्यक्षमृषावादी वर्त्तते, कथम् ?-दुष्कृतमेतदित्यभिधाय पुनरासेवनात्, तथा मायानिकृतिप्रसङ्गश्च तस्य, स हि दुष्टान्तरात्मा निश्चयतश्चेतसाऽनिवृत्त एव गुर्वादिरञ्जनार्थं मिथ्यादुष्कृतं प्रयच्छति, कुतः ?, पुनरासेवनात्, तत्र मायैव निकृतिर्माया-निकृतिस्तस्याः प्रसङ्ग इति गाथार्थः ।। कः पुनरस्य मिथ्यादुष्कृतपदस्यार्थ इत्याशङ्क्याह–

नि. (६८६) मित्ति मिउमद्दवत्ते छत्ति य दोसाण छायणे होइ ।
मित्ति य मेराएँ ठिओ दुत्ति दुगुंछामि अप्पाणं ।।

वृ- 'मी' त्येवं वर्णः मृदुमार्दवत्वे वर्त्तते, तत्र मृदुत्वं-कायनम्रता मार्द्दवत्वं-भावनम्रतेति, 'छे' ति च दोषस्य-असंयमयोगलक्षणस्य छादने-स्थगने भवति, 'मी' ति चायं वर्णः मर्यादायां–चारित्ररूपायां स्थितोऽहमित्यस्यार्थस्याभिधायकः 'दु' इत्ययं वर्णः जुगुप्सामि–निन्दामि दुष्कृत-कर्मकारिणमात्मानमित्यस्मिन्नर्थे वर्त्तत इति गाथार्थः ।।

नि. (६८७) कत्ति कडं मे पावं डत्ति य डेवेमि तं उवसमेणं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एसो मिच्छाउक्कडपयक्खरत्थो समासेणं ॥

वृ- 'क' इत्ययं वर्ण्णः कृत मया पापमित्येवमभ्युपगमार्थे वर्त्तते, 'ड' इति च 'डेवेमि तं' ति लङ्घयामि–अतिक्रमामि तत्, केनेत्याह–उपशमेन हेतुभूतेन, 'एषः' अनन्तरोक्तः प्राकृतशैल्या मिथ्यादुष्कृतपदस्याक्षरार्थ इति 'समासेन' सङ्क्षेपेणेति गाथार्थः ॥ आह–कथमक्षराणां प्रत्येकमुक्तार्थतेति, पदवाक्योरेवार्थदर्शनादिति, अत्रोच्यते, इह यथा वाक्यैकदेशत्वात्पदस्यार्थोऽस्ति तथा पदैकदेशत्वाद्वर्ण्णार्थोऽप्यवसेय इति, अन्यथा पदस्याप्यर्थशून्यत्वप्रसङ्गः, प्रत्येकक्षरेषु तदभावादिति, प्रयोगश्च–इह यद्यत्र प्रत्येकं नास्ति तत्समुदायेऽपि न भवति, प्रत्येकमभावात्, सिकतातैलवदिति, इष्यते च वर्ण्णसमुदायात्मकस्य पदस्यार्थः, तस्मात्तदन्यथाऽनुपपत्तर्वर्ण्णार्थोऽपि प्रतिपत्तव्य इत्यलं प्रसङ्गेनेति ।

साम्प्रतं तथाकारो यस्य दीयते तत्प्रतिपिपादयिषयाऽऽह–

नि. (६८८) कप्पाकप्पे परिनिट्ठियस्स ठाणेसु पंचसु ठियस्स ।
संजमतवड्ढगस्स उ अविकप्पेणं तहाकारो ॥

वृ- कल्पो विधिराचार इति पर्यायाः, कल्पविपरीतस्त्वकल्पः, जिनस्थविरकल्पादिर्वा कल्पः, चरकादिदीक्षा पुनरकल्प इति, कल्पश्चाकल्पश्च कल्पाकल्पमित्येकवद्भावस्तस्मिन् कल्पाकल्पे, परि-समन्तात् निष्ठितः परिनिष्ठितो, ज्ञाननिष्ठां प्राप्त इत्यर्थः, तस्य, तथा तिष्ठन्त्येतेषु सत्सु शाश्वते स्थाने प्राणिन इति स्थानानि-महाव्रतान्यभिधीयन्ते, तेषु स्थानेषु पञ्चसु स्थितस्य, महाव्रतयुक्तस्येत्यर्थः, तथा संयमतपोभ्यामाढ्यः-सम्पन्न इत्यनेनोत्तरगुणयुक्ततामाह, तस्य किमित्याह–'अविकल्पेन' निश्चयेन, किम् ? -तथाकारः, कार्य इति क्रियाध्याहार इति गाथार्थः।

इदानीं तथाकारविषयप्रतिपादनायाह–

नि. (६८९) वायणपडिसुणणाए उवएसे सुत्तअत्थकहणाए ।
अवितहमेयंति तहा पडिसुणणाए तहक्कारो ॥

वृ- वाचना-सूत्रप्रदानलक्षणा तस्याः प्रतिश्रवणं-प्रतिश्रवणा तस्यां वाचनाप्रतिश्रवणायां, तथाकारः कार्यः, एतदुक्तं भवति-गुरौ वाचनां प्रयच्छति सति सूत्रं गृह्णानेन तथाकारः कार्यः, तथा सामान्येनोपदेशे-चक्रवालसामाचारीप्रतिबद्धे गुरोरन्यस्य वा सम्बन्धिनि तथाकारः कार्यः, तथा 'सुत्त'त्थकहणाए'थि सूत्रार्थकथनायां, व्याख्यान इत्यर्थः, किम ? -तथाकारः कार्यः, तथाकार इति कोऽर्थ इति ?, आह-अवितथमेतत् यदाहुर्यूमिति, न केवलमुक्तेष्वेवार्थेषु तथाकारप्रवृत्तिः, तथा 'पडिसुणणाए' त्ति प्रतिपृच्छोत्तरकालमाचार्ये कथयति सति प्रतिश्रवणायां तथाकारप्रवृत्तिरिति, चशब्लोपोऽत्र द्रष्टव्य इति गाथार्थः ॥

साम्प्रतं स्वस्थाने स्वस्थाने खल्विच्छाकारादिप्रयोक्तुः फलप्रतिपादनायाह–

नि. (६९०) जस्स य इच्छाकारो मिच्छाकारो य परिचिया दोऽवि ।
तइओ य तहक्कारो न दुल्लभा सोग्गई तस्स ॥

वृ- यस्य चेच्छाकारो मिथ्याकारश्च परिचितौ द्वावपि तृतीयश्च तथाकारो न दुर्लभा सुगतिस्तस्येति गाथा निगदसिद्धैव । साम्प्रतमावश्यकीनैषेधिकीद्वारद्वयावयवार्थमभिधित्सुः पातनिकागाथामाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (६९१) आवस्सियं च निंतो जं च अइंतो निसीहियं कुणइ ।
एयं इच्छं नाउं गणिवर ! तुब्भंतिए निउणं ॥

वृ- शिष्यः किलाह-'आवस्सिय'ति आवश्यिकी-पूर्वोक्ता तामावश्यिकीं च 'निन्तो' निर्गच्छन् यां च 'अतिंतो' त्ति आगच्छन्, प्रविशन्नित्यर्थः, नैषेधिकीं करोति, 'एतद्' आवश्यिकीनैषेधिकीद्वयमपि स्वरूपादिभेदभिन्नं इच्छामि ज्ञातु हे गणिवर ! युष्मदन्तिके 'निपुणं' सूक्ष्मं ज्ञातुमिच्छामीति क्रियाविशेषणमिति गाथार्थः ॥ एवं शिष्येणोक्ते सत्याहाचार्यः-

नि. (६९२) आवस्सियं च निंतो जं च अइंतो निसीहियं कुणइ ।
वंजणमेयं तु दुहा अत्थो पुन होइ सो चेव ॥

वृ- आवश्यिकीं च निर्गच्छन् यां च प्रविशन्नैषेधिकीं करोति, 'व्यञ्जनं' शब्दरूपं 'एतं तु दुह'त्ति एतदेव शब्दरूपं द्विधा, अर्थः पुनर्भवत्यावश्यिकीनैषेधिक्योः 'स एव' एक एव, यस्मादवश्यंकर्त्तव्ययोगक्रियाऽऽवश्यिकी निषिद्धात्मनश्चातिचारेभ्यः क्रिया नैषेधिकीति, न ह्यसावप्यवश्यं कर्त्तव्यं व्यापारमुल्लङ्घ्य प्रवर्त्तते, आह-यद्येव भेदोपन्यासः किमर्थम् ?, उच्यते, क्वचित् स्थितिगमनक्रियाभेदादभिधानभेदाच्चेति गाथार्थः ॥ आह-'आवश्यिकीं च निर्गच्छ' न्नित्युक्तं, तत्र साधोः किमवस्थानं श्रेय उताटनमिति ?, उच्यते, अवस्थानमिति, कथम् ?, यत आह-

नि. (६९३) एगग्गस्स पसंतस्स न होंति इरियाइया गुणा होंति ।
गंतव्वमवस्सं कारणंमि आवस्सिया होइ ॥

वृ- एकमग्रम्-आलम्बनमस्येत्येकाग्रस्तस्य, स चाप्रशस्तालम्बनोऽपि भवत्यत आह-'प्रशान्तस्य' क्रोधरहितस्य तिष्ठतः, किम ?, न भवन्ति ईर्यादयः, ईरणमीर्य्या-गमनमित्यर्थः, इहैर्य्याकार्यं कर्म ईर्य्याशब्देन गृह्यते, कारणे कार्योपचाराद्, ईर्य्या आदौ येषामात्मसंयम-विराधनादीनां दोषाणां ते ईर्यादयो न भवन्ति तथा 'गुणाश्च' स्वाध्यायध्यानादयो भवन्ति, प्राप्तं तर्हि संयतस्यागमनमेव श्रेय इति तदपवादमाह-न चावस्थाने खलूक्तगुणसम्भवान्न गन्तव्यमेव, किन्तु 'गन्तव्यमवस्सं कारणंमि' गन्तव्यम् 'अवश्यं' नियोगतः 'कारणे' गुरुग्लानादि-सम्बन्धिनि, यतस्तत्रागच्छतो दोषा इति, तथा च कारणे गच्छतः 'आवस्सिया होइ' आवश्यिकी भवतीति गाथार्थः ॥ आह-कारणन गच्छतः किं सर्वस्यैवावश्यकी भवति उत नेति ?, नेति, कस्य तर्हि ?, उच्यते,-

नि. (६९४) आवस्सिया उ आवस्सएहिं सव्वेहिं जुत्तजोगिस्स ।
मनवयणकायगुत्तिंदियस्स आवस्सिया होइ ॥

वृ- आवश्यिकी तु 'आवश्यकैः' प्रतिक्रमणादिभिः सर्वैर्युक्तयोगिनो भवति, शेषकालमपि निरतिचारस्य क्रियास्थस्येति भावार्थः, तस्य च गुरुनियोगादिना प्रवृत्तिकालेऽपि 'मन' इत्यादि पश्चार्द्ध मनोवाक्कायेन्द्रियैर्गुप्त इति समासः, तस्य, किम् ? - आवश्यिकी भवति, इन्द्रियशब्दस्य गाथाभङ्गभयाद्व्यवहितोपन्यासः, कायात्पृथगिन्द्रियग्रहणं प्राधान्यख्यापनार्थम्, अस्थि चायं न्यायः-'सामान्यग्रहणे सत्यपि प्राधन्यख्यापनार्थं भेदेनोपन्यासो' यथा-ब्राह्मणा आयाता वशिष्टोऽप्यायात इति गाथार्थः ॥ उक्ताऽऽवश्यिकी, साम्प्रतं नैषेधिकीं प्रतिपादयन्नाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (६९५) सेज्जं ठाणं च जहिं चेएइ तहिं निसीहिया होइ ।
जम्हा तत्थ निसिद्धो तेणं तु निसीहिया होइ ॥

वृ- शेरतेऽस्यामिति शय्या-शयनीयस्थानं तां शय्यां 'स्थानं चे' ति स्थानमूर्ध्वस्थानं, कायोत्सर्ग्गः, यत्र 'चेतयते' इति करोति, शयनक्रियां च कुर्वता निश्चयतः शय्याक्रिया कृता भवति, ततश्च यत्र स्वपितीत्यर्थः, चशब्दो वीरासनाद्यनुक्तसमुच्चयार्थः,अथवा तुशब्दार्थे द्रष्टव्यः, स च विशेषणार्थः, कथम् ?, प्रतिक्रमणाद्यशेषकृतावश्यकः सन्ननुज्ञातो गुरुणा शय्यां स्थानं च यत्र चेतयते 'तत्र' एवं विधस्थितिक्रियाविशिष्ट एव स्थाने नैषेधिकी भवति, नान्यत्र, किमित्यत आह-यस्मात्तत्र निषिद्धोऽसौ तेनैव कारणेन नैषेधिकी भवति, निषेधात्मकत्वात्तस्या इति गाथार्थः ॥ पाठान्तरं वा-

नि. (६९६) सेज्जं ठाण च जदा चेतेति तया निसीहिया होइ ।
जम्हा तदा निसेहो निसेहमइया च सा जेणं ॥

वृ- इयमुक्तार्थत्वात्सुगमैव । अनेन ग्रन्थेन मूलगाथायाः 'आवश्यिकीं च निर्गच्छन् यां चागच्छन् नैषेधिकीं करोति व्यञ्जनमेतद् द्वेधे' त्येतावत् स्थितिरूपनैषेधिकीप्रतिपादनं व्यञ्जनभेदनिबन्धनमधिकृत्य व्याख्यातम् । अमुमेवार्थमुपसञ्जिहीर्षुराह भाष्यकारः-

[भा.१२०] आवस्सियं च निंतो जं च अइंतो निसीहियं कुणइ ।
सेज्ञानिसीहियाए निसीहियाअभिमुहो होई ॥

वृ- आवश्यिकीं च निर्गच्छन् यां चागच्छन् नैषेधिकीं करोति तदेतद् व्याख्यातम्, उपलक्षणत्वात्सह तृतीयपादेन 'व्यञ्जनमेतद् द्विधे' त्यनेनेति । साम्प्रतम् 'अर्थः पुनर्भवति स एव' ति गाथावयवार्थः प्रतिपाद्यते -तत्रेत्थमेक एवार्थो भवति-यस्मान्नैषेधिख्यपि नावश्यंकर्त्तव्यव्यापारगोचरतामतीत्य वर्त्तते, यतः प्रविशन् संयमयोगानुपालनाय शेषपरिज्ञानार्थं चेत्थमाह । 'सेज्ञानिसीहियाए निसीहियाअभिमुहो होइ'त्ति शय्यैव नैषेधिकी तस्यां शय्यानैषेधिक्यां विषयभूतायां, किम ? शरीरमपि नैषेधिकीत्युच्यत इति, अत आह-शरीरनैषेधिक्या आगमनं प्रत्यभिमुखस्तु, अतः संवृतगात्रैर्भवितव्यमिति सञ्ज्ञां करोतीति गाथार्थः ॥

इतश्चैक एवार्थो यत आह-

[भा.१२१] जो होइ निसिद्धप्पा निसीहिया तस्स भावओ होइ ।
अनिसिद्धस्स निसीहिय केवलमेत्तं हवइ सद्दो ॥

वृ- यो भवति निषिद्धात्मा-निषिद्धो मूलगुणोत्तरगुणातिचारेभ्यः आत्मा येनेति समासः, नैषेधिकी 'तस्य' निषिद्धात्मनो 'भावतः' परमार्थतो भवति, न निषिद्धोऽनिषिद्धः उक्तेभ्य एवातिचारेभ्यः तस्य अनिषिद्धस्य-अनुपयुक्तस्यागच्छतः नैषेधिकी, किम ?-'केवलमेत्तं हवइ सद्दो' केवलं शब्दमात्रमेव भवति, न भावत् इति गाथार्थः ॥ आह-यदि नामैवं तत एकार्थतायाः किमाथतमिति ?, उच्यते, निषिद्धात्मनो नैषेधिकी भवतीत्युक्तं, स च-

[भा.१२२] आवस्सयंमि जुत्तो नियमनिसिद्धोत्ति होइ नायव्वो ।
अहवाऽवि निसिद्धप्पा नियमा आवस्सए जुत्तो ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- 'आवश्यके' मूलगुणोत्तरगुणानुष्ठानलक्षणे युक्तः 'नियमनिसिद्धोत्ति होइ नायव्वो' नियमेन निषिद्धो नियम-निषिद्ध 'इति' एवं भवति ज्ञातव्यः, आवश्यिक्यपि चावश्यक-युक्तस्यैवेत्यत एकार्थतेति । अथवेति प्रकारान्तरदर्शनार्थः, अपिशब्दस्य व्यवहितः सम्बन्धः, निषिद्धात्माऽपि नियमादावश्यके युक्तो यतः अतोऽप्येकार्थतेति, पाठान्तरं वा 'अहवावि निसिद्धप्पा सिद्धाणं अंतियं जाइ' त्ति, अस्यायमर्थः – एवं क्रियाया अभेदेनावश्यकीनैषेधिख्योरे-कार्थतोक्ता, इह तु कार्याभेदेनोच्यते, अथवा निषिद्धात्माऽपि सिद्धानामन्तिकं-सामीप्यं 'याति' गच्छति, अपिशब्दादावश्यकयुक्तोऽपि, अतः कार्याभेदादेकार्थतेति गाथार्थः ॥

साम्पतमापृच्छादिद्वारचतुष्टयमेकगाथयैव प्रतिपादयन्नाह–

[भा.१२३] आपुच्छणा उ कज्जे पुव्वनिसिद्धेण होइ पडिपुच्छा ।
पुव्वगहिएण छंदन निमंतणा होअगहिएणं ॥

वृ- आप्रच्छनमापृच्छा सा च कर्त्तुमभीष्टे कार्ये प्रवर्त्तमानेन गुरोः कार्या-अहमिदं करोमीति। तथा पूर्वनिषिद्धेन सता भवतेदं न कार्यमिति, उत्पन्ने च प्रयोजने कर्त्तुकामेन 'होति पडिपुच्छ'त्ति प्रतिपृच्छा कर्त्तव्या भवति, पाठान्तरं वा-'पुव्वनिउत्तेण होइ पडिपुच्छा' पूर्वनियुक्तेन सता यथा भवतेदं कार्यमिति तत्कर्तुकामेन गुरोः प्रतिपृच्छा कर्त्तव्या भवति-अहं तत्करोमीति, तत्र हि कदाचिदसौ कार्यान्तरमादिशति समाप्तं वा तेन प्रयोजनमिति । तथा पूर्वगृहीतेना-शनादिना छन्दना शेषसाधुभ्यः कर्त्तव्या-इदं मयाऽशनद्यानीतं यदि कस्यचिदुपयुज्यते ततोऽसाविच्छाकारेण ग्रहणं करोत्विति । तथा निमन्त्रणा भवत्यगृहीतेनाशनादिना अहं भवतोऽशनाद्यान-यामीति गाथार्थः द्वारं । इदानीमुपसम्पद्द्वारावयवार्थः प्रतिपाद्यते-सा चोपसम्पद् द्विधा भवति-गृहस्थोप-सम्पत्साधूपसम्पच्च, तत्रास्तां तावद् गृहस्थोपसम्पत्, साधूपसम्पत्प्रतिपाद्यते-सा च त्रिविधा-ज्ञानादिभेदाद्, आह च–

नि. (६९८) उवसंपया य तिविहा नाणे तह दंसणे चरित्ते य ।
दंसणनाणे तिविहा दुविहा य चरित्तअट्ठाए ॥

वृ- उपसम्पच्च त्रिविधा 'ज्ञाने' ज्ञानविषया तथा दर्शनविषया चारित्रविषया च, तत्र दर्शनज्ञानयोः सम्बन्धिनी त्रिविधा द्विविधा च चारित्रार्थायेति गाथार्थः ॥ तत्र यदुक्तं-'दर्शनज्ञानयोस्त्रिविधे'ति तत्प्रतिपादयन्नाह–

नि. (६९९) वत्तणा संधणा चेव, गहणं सुत्तत्थतदुभए ।
वेयावच्चे खमणे, काले आवकहाइ य ॥

वृ- वर्त्तना सन्धना चैव ग्रहणमित्यतत्त्रितयं 'सुत्तत्थतदुभए'त्ति सूत्रार्थोभयविषयम-वगन्तव्यमिति, एतदर्थमुपसम्पद्यते, तत्र वर्त्तना प्राग्गृहीतस्यैवास्थिरस्य सूत्रादेर्गुणनमिति, सन्धना तु तस्यैव प्रदेशान्तरविस्मृतस्य मेलनं घटना योजना इत्यर्थः, ग्रहणं पुनः तस्यैव तत्प्रथमतया आदानमिति, एतत्त्रितयं सूत्रार्थोभयविषयं द्रष्टव्यम्, एवं ज्ञाने नवभेदाः, दर्शनेऽपि दर्शनप्रभावनीयशास्त्रविषया एत एव द्रष्टव्या इति, अत्र च सन्दिष्टः सन्दिष्टस्योपसम्पद्यते इत्यादिचतुर्भङ्गिका, प्रथमः शुद्धः शेषास्त्वशुद्धा इति, 'द्विविधा च चारित्रार्थाये'ति यदुक्तं तत्प्रदर्शनायाह–'वेयावच्चे खमणे काले आवकहाइ य' चारित्रोपसम्पद् वैयावृत्यविषया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षपणविषया च, इयं च कालतो यावत्कथिका च भवति, चशब्दादित्वरा च भवति, एतदुक्तं भवति-चारित्रार्थमाचार्याय कश्चिद्वैयावृत्त्यकरत्वं प्रतिपद्यते, स च कालत इत्वरो यावत्कथिकश्च भवतीति गाथासमासार्थः ॥ साम्प्रतमयमेवार्थो विशेषतः प्रतिपाद्यते-तत्रापि सन्दिष्टेन सन्दिष्टस्योपसम्पद्दातव्येति मौलिकोऽयं गुण इति, एतत्प्रभवत्वादुपसम्पद इति, अतः अमुमेवार्थमभिधित्सुराह–

नि. (७००) संदिट्ठो संदिट्ठस्स चेव संपज्जई उ एमाई ।
चउभंगो एत्थं पुन पढमो भंगो हवइ सुद्धो ॥

वृ- 'सन्दिष्ठो' गुरुणाऽभिहितः सन्दिष्टस्यैवाचार्यस्य यथा अमुकस्य सम्पद्यतां उपसम्पदं प्रयच्छत इत्यर्थः, एवमादिश्चतुर्भङ्गः, स चायं-तद्यथा-सन्दिष्टः सन्दिष्टस्योक्त एव, सन्दिष्टः असन्दिष्टः असन्दिष्टस्य–न तावदिदानीं गन्तव्यं न चामुकस्येति, तत्र पुनः प्रथमो भङ्गो भवति शुद्धः, पुनः शब्दस्य विशेषणार्थत्वात् द्वितीयपदेनाव्यवच्छित्ति-निमित्तमन्येऽपि द्रष्टव्या इति गाथार्थः ॥ साम्प्रतं वर्त्तनादिस्वरूपप्रतिपादनायाह–

नि. (७०१) अथिरस्स पुव्वगहियस्स वत्तणा जं इहं थिरीकरणं ।
तस्सेव पएसंतरणट्ठस्सऽनुसंधणा थडणा ॥

नि. (७०२) गहणं तप्पडढमतया सुत्ते अत्थे य तदुभए चेव ।
अत्थग्गहणंमि पायं एस विही होइ नायव्वो ॥

वृ- गाथाद्वयं निगदसिद्धमेव । नवरं-प्रायोग्रहणं सूत्रग्रहणेऽवि कश्चिद्भवत्येव प्रमार्ज्जनादिरिति ज्ञापनार्थम् ॥ साम्प्रतमधिकृतविधिप्रदर्शनाय द्वारगाथामाह–

नि. (७०३) मज्जननिसेज्जअक्खा कितिकंमुस्सग्ग वंदनं जेट्ठे ।
भासंतो होई जेट्ठो नो परियाएण तो वंदे ॥

वृ- एतद्व्याचिख्यासयैवेदमाह–

नि. (७०४) ठाणं पमज्जिऊणं दोन्नि निसिज्जाउ होंति कायव्वा ।
एगा गुरुणो भणिया बितिया पुण होंति अक्खाणं ॥

वृ- निगद सिद्धा, नवरम्-'अक्खाणं'ति समवसरणस्य, न चाकृतसमवसरणेन व्याख्या कर्त्तव्येत्युत्सर्गः ॥ व्याख्यातं द्वारत्रयं, कृतिकर्मद्वारव्यचिख्यासयाऽऽह–

नि. (७०५) दो चेव मत्तगाइं खेले तह काइयाए बीयं तु ।
जावइया य सुणेंती सव्वेऽवि य ते तु वंदंति ॥

वृ- निगदसिद्धैव, नवरं मात्रकं–समाधिः, कृतिकर्मद्वार एव च विशेषाभिधानमदुष्टमिति, अर्द्धकृतव्याख्यानोत्थाना-नुत्थनाभ्यां पलिमन्थाऽऽत्मविराधनादयश्च दोषा भावनीया इति द्वारम्।
अधुना कायोत्सर्गद्वारं व्याचिख्यासुराह–

नि. (७०६) सव्वे काउस्सगं करेंति सव्वे पुणोऽवि वंदंति ।
नासण्णे नाइदूरे गुरूवयणपडिच्छगा होंति ॥

वृ- सर्वे श्रोतारः 'श्रेयांसि बहुविघ्नानी' तिकृत्वा तद्विघातायानुयोगप्रारम्भनिमित्तं कायोत्सर्गं कुर्वन्ति, तं चोत्सार्य सर्वे पुनरपि वन्दन्ते, ततो नासन्ने नातिदूरे व्यवस्थिताः सन्तः, किम् ?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

-गुरुवचनप्रतीच्छका भवन्ति-शृण्वन्तीति गाथार्थः ॥ साम्प्रतं श्रवणविधिप्रतिपादनायाह-

नि. (७०७) निद्दाविगहापरिवज्जिएहिं गुत्तेहिं पंजलिउडेहिं ।
भत्तिबहुमानपुव्वं उवउत्तेहिं सुणेयव्वं ॥

नि. (७०८) अभिकंखंतेहिं सुहासियाइँ वयणाइँ अत्थसाराइं ।
विम्हियमुहेहिं हरिसागएहिं हरिसं जणंतेहिं ॥

वृ- गाथाद्वयं निगदसिद्धं । नवरं 'हरिसागएहिं' ति सञ्जातहर्षैरित्यर्थः, अन्येषां च संवेगकारणादिना हर्षं जनयद्भिः, एवं च शृण्वद्भिस्तैर्गुरोरतीव परितोषो भवतीति ॥

ततः किमित्याह-

नि. (७०९) गुरुपरिओसगएणं गुरुभत्तीए तहेव विनएणं ।
इच्छियसुत्तत्थाणं खिप्पं पारं समुवयंति ॥

वृ- 'गुरुपरितनोषगतेन' गुरुपरितोषजातेन सता गुरुभक्त्या तथैव विनयेन, किम् ? सम्यक्सद्भावप्ररूपणया ईप्सितसूत्रार्थयोः 'क्षिप्रं' शीघ्रं पारं समुपयान्ति-निष्ठां व्रजन्तीति गाथार्थः ॥

नि. (७१०) वक्खाणसमत्तीए जोगं काऊण काइयाईणं ।
वंदंति तओ जेट्ठं अन्ने पुव्वं चिय भणन्ति ॥

वृ- निगदसिद्धा । नवरम्, अन्ये आचार्या इत्थमभिदधति-किल पूर्वमेव व्याख्यानारम्भकाले ज्येष्ठं वन्दन्त इति । द्वारगाथापश्चार्धमाक्षेपद्वारेण प्रपञ्चतो व्याचिख्यासुराह-

नि. (७११) चोएति जइ हु जिट्ठो कहिंचि सुत्तत्थधारणाविगलो ।
वक्खाणलद्धिहीणो निरत्थयं वंदनं तंमि ॥

वृ- निगदसिद्धा । नवरं निरर्थकं वन्दनं, तस्मिंस्तत्फलस्य प्रत्युच्चारकश्रवणस्याभावादिति भावना ।

नि. (७१२) अह वयपरियाएहिं लहुगोऽबिहु भासओ इहं जेट्ठो ।
रायनियवंदने पुण तस्सवि आसायणा भंते !॥

वृ- अथ वयःपर्यायाभ्यां लघुरपि भाषक एवेह ज्येष्ठः परिगृह्यते, रत्नाधिकवन्दने पुनः तस्याप्याशातना भदन्त ! प्राप्नोति, तथाहि-न युज्यत एव चिरकालप्रव्रजितान् लघोर्वन्दनं दापयितुमिति गाथार्थः ॥ इत्थं पराभिप्रायमाशङ्क्याह-

नि. (७१३) जइवि वयमाइएहिं लहुओ सुत्तत्थधारणापडुओ ।
वक्खाणलद्धिमंतो सो चिय इह धेप्पई जेट्ठो ॥

वृ- प्रकटार्था । आशातनादोषपरिजिहीर्षया त्वाह-

नि. (७१४) आसायणावि नेवं पडुच्च जिनवयणभासयं जम्हा ।
वंदनयं राइनिए तेन गुणेणंपि सो चेव ॥

वृ- प्रकटार्थैव । नवरं 'तेन गुणेन' अर्हद्वचनव्याख्यानलक्षणेनेति । इदानीं प्रसङ्गतो वन्दनविषय एव निश्चयव्यवहार-नयमतप्रदर्शनायाह-

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

नि. (७१५) न वओ एत्थ पमाणं न य परियाओऽवि णिच्छयमएणं ।
ववहारओ उ जुज्जइ उभयनयमयं पुण पमाणं ॥

वृ- न 'वयः' अवस्थाविशेषलक्षणम् 'अत्र' वन्दकविधौ प्रमाणं, न च 'पर्यायोऽपि' प्रव्रज्याप्रतिपत्तिलक्षणः 'निश्चयमतेन' निश्चयनयाभिप्रायेण, ज्येष्ठवन्दनादिवयवहारलोपातिप्रसङ्गनिवृत्त्यर्थमाह-व्यवहारतस्तु युज्यते, किमत्र प्रमाणमिति सन्देहापनोदार्थमाह-उभयनयमतं पुनः प्रमाणमिति गाथार्थः ॥ प्रकृतमेवार्थं समर्थयन्नाह-

नि. (७१६) निच्छयओ दुन्नेयं-को भावे कम्मि वट्टई समणो ?।
ववहारओ उ कीरइ जो पुव्वठिओ चरित्तंमि ॥

वृ- निश्चयतो दुर्ज्ञेयं-को भावे कस्मिन्-प्रशस्तेऽप्रशस्ते वा वर्त्तते श्रमण इति, भावश्चेह, ज्येष्ठः, ततश्चानतिशयिनः वन्दनकरणाभाव एव प्राप्त इत्यतो विधिमभिधित्सुराह-व्यवहारतस्तु क्रियते वन्दनं 'यः पूर्वस्थितश्चारित्रे' यः प्रथमं प्रव्रजितः सन्नुपलब्धातिचार इति गाथार्थः ॥

आह-सम्यक् तद्गतभावापरिज्ञाने सति किमित्येतदेवमिति, उच्यते, व्यवहारप्रामाण्यात्, तस्यापि च बलवत्त्वाद्, आह च भाष्यकारः-

[भा.१२३] ववहारोऽविहु बलवं जं छउमत्थंपि वंदई अरहा ।
जा होइ अणाभिन्नो जाणंतो धंमयं एयं ॥

वृ- व्यवहारोऽपि च बलवानेव, 'यद्' यस्मात् छद्मस्थमपि पूर्रत्नाधिकं गुर्वादि वन्दत 'अर्हन्नपि' केवल्यपि, अपिशब्दोऽत्रापि सम्बध्यते । किं सदा ?, नेत्याह-'जा होइ अणाभिन्नो'त्ति यावद् भवत्यनभिज्ञातः यथाऽयं केवलीति, किमिति वन्दत इति, अत आह-जानन् धर्मतामेतां व्यवहारनयबलातिशयलक्षणामिति गाथार्थः ॥ आह-यद्येवं सुतरां वयःपर्यायहीनस्य तदधिकान् वन्दापयितुमयुक्तम्, आशातनाप्रसङ्गादिति, उच्यते-

नि. (७१७) एत्थ उ जिनवयणाओ सुत्तासायणबहुत्तदोसाओ ।
भासंतगजेट्ठगस्स उ कायव्वं होइ किइकम्मं ॥

वृ- 'अत्र तु' व्याख्याप्रस्तावचन्दनाधिकारे 'जिनवचनात्' तीर्थकरोक्तत्वात् तथा च अवन्धमाने सूत्राशातनादोषबहुत्वात् 'भाषमाणज्येष्ठस्यैव' प्रत्युच्चारणसमर्थस्यैवेत्यर्थः, किं?, कर्त्तव्यं भवति 'कृतिकर्म्म' वन्दनमिति गाथार्थः ॥ एवं तावद् ज्ञानोपसम्पद्विधिरुक्तः, दर्शनोपसम्पद्विधिरप्यनेनैव तुल्ययोगक्षेमत्वादुक्त एव वेदितव्यः, तथा च दर्शनप्रभावनीयशास्त्रपरिज्ञानर्थमेव दर्शनोपसम्पदिति ॥ अधुना चारित्रोपसम्पद्विधिमभिधातुकाम आह-

नि. (७१८) दुविहा य चरित्तंमी वेयावच्चे तहेव खमणे य ।
नियगच्छा अन्नंमि य सीयणदोसाइणा होति ॥

वृ- द्विविधा च चारित्रविषयोपसम्पद् वैयावृत्त्यविषया तथैव क्षपणविषया च, आह-किमत्रोपसम्पदा ?, स्वगच्छ एव तत्कस्मान्न क्रियत इति, उच्यते, निजगच्छादन्यस्मिन् गमनं सीदनदोषादिना भवति गच्छस्य, आदिशब्दादन्यभावादिपरिग्रह इति गथार्थः ॥

नि. (७१९) इत्तरियाइविभासा वेयावच्चंमि तहेव खमणे य ।
अविगिट्ठविगिट्ठंमि य गणिणो गच्छस्स पुच्छाए ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- इह चारित्रार्थमाचार्यस्य कश्चिद्वैयावृत्यकरत्वं प्रतिपद्यते, स च कालत इत्वरो यावत्कथिकश्च भवति, आचार्यस्यापि वैयावृत्यकरोऽस्ति वा न वा, तत्रायं विधिः-यदि नास्ति ततोऽसाविष्यत एव, अथास्ति स इत्वरो वा स्याद्यावत्कथिको वा, आगन्तकोऽप्येवं द्विभेद एव, तत्र यदि द्वावपि यावत्कथिकौ ततश्च यो लब्धिमान् स कार्य्यते, इतरस्तूपाध्यायादिभ्यो दीयत इति, अथ नेच्छति ततो वास्तव्य एव प्रीतिपुरस्सरं तेभ्यो दीयते, आगन्तुकस्तु कार्यत इति, अथ प्राक्तनोऽप्युपाध्यायादिभ्यो नेच्छति तत आगन्तुको विसर्ज्यत एव, अथ वास्तव्यो यावत्कथिक इतरस्त्वित्वर इत्यत्राप्येवमेव भेदाः कर्त्तव्याः यावदागन्तुको विसर्ज्यते, नानात्वं तु वास्तव्य उपाध्यायादिभ्योऽनिच्छन्नपि प्रीत्या इति, अथ वास्तव्यः खल्वित्वरः आगन्तुकस्तु यावत्कथिकः, ततोऽसौ वास्तव्योऽवधिकालं यावदुपाध्यायादिभ्यो दीयते, शेषं पूर्ववत्, अथ द्वावपीत्वरौ तत्राप्येक उपाध्यायादिभ्यः कार्य्यते शेषं पूर्ववद्, अन्यतमो वाऽवधिकालं यावद्धार्यत इत्येवं यथाविधिना विभाषा कार्येति । उक्ता वैयावृत्योपसम्पत्,

साम्प्रतं क्षपणोपसम्पत्प्रतिपाद्यते—चारित्रनिमित्तं कश्चित्क्षपणार्थमुपसम्पद्यते, स च क्षपको द्विविधः-इत्वरो यावत्कथिकश्च, यावत्कथिक उत्तरकालेऽनशनकर्त्ता, इत्वरस्तु द्विधा— विकृष्टक्षपकोऽविकृष्टक्षपकश्च, तत्राष्टमादिक्षपको विकृष्टक्षपकः, चतुर्थषष्ठक्षपकस्त्वविकृष्ट इति । तत्रायं विधिः-अविकृष्टक्षपकः खल्वाचार्येण प्रष्टव्यः-हे आयुष्मन् ! पारणके त्वं कीदृशो भवसि ?, यद्यसावाह-ग्लोनोपमः, ततोऽसाविभधातव्यः-अलं तव क्षपणेन, स्वाध्याय-वैयावृत्यकरणे यत्नं कुरु, इतरोऽपि पृष्टः सन्नेवमेव प्रज्ञाप्यते, अन्ये तु व्याचक्षते-विकृष्टक्षपकः पारणककाले ग्लानकल्पतामनुभवन्नपीष्यत एव, यस्तु मासादिक्षपको यावत्कथिको वा स इष्यत एव, तत्राप्याचर्योण गच्छः प्रष्टव्यो—यथाऽयं क्षपक उपसम्पद्यत इति, अनापृच्छय गच्छं सङ्गच्छतः सामाचारीविराधना, यतस्ते सन्दिष्टा अप्युपधिप्रत्युपेक्षणादि तस्य न कुर्वन्ति, अथ पृष्टा ब्रुवते-यथाऽस्माकं एकः क्षपकोऽस्त्येव, तस्य क्षपणपरिसमाप्तावस्य करिष्यामः, ततोऽसौ ध्रियते, अथ नेच्छन्ति ततस्त्यज्यते, अथ गच्छस्तमप्यनुमन्यते ततोऽसाविष्यत एव, तस्य च विधिना प्रतीच्छितस्योद्वर्त्तनादि कार्य, यत्पुनः प्रमादतोऽनाभोगतो वा न कुर्वन्ति शिष्यास्तदाऽऽचार्येण चोदनीया इत्यलं प्रसङ्गेन इति गाथार्थः ॥

चारित्रोपसम्पद्विधि-विशेषप्रतिपादनायाह—

नि. (७२०) उवसंपन्नो जं कारणं तु तं कारणं अपूरेंतो ।
अहवा समाणियंमी सारणया वा विसग्गो वा ॥

वृ- उपसम्पन्नो 'यत्कारणं' यन्निमित्तं, तुशब्दादन्यच्च सामाचार्य्यन्तर्गतं किमपि गृह्यते, 'तत्कारणं' वैयावृत्त्यादि 'अपूरयन्' अकुर्वन, यदा वर्त्तत इत्यध्याहारः, किम् ?-तदा 'सारणया वा विसग्गो वा' तदा तस्य 'सारणा' चोदना वा क्रियते, अविनीतस्य पुनः विसर्गो वा-परित्यागो वा क्रियते इति, तथा नापूरयन्नेव यदा वर्त्तते तदैव सारणा वा विसर्गो वा क्रियते, किं तु ? 'अहवा समाणियंमि'त्ति अथवा परिसमाप्तिं नीते अभ्युपगतप्रयोजने स्मारणा वा क्रियते, यथा—समाप्तं, तद्विसर्गो वेति गाथार्थः ॥ उक्ता संयतोपसम्पत्, साम्प्रतं गृहस्थोपसम्पदुच्यते-तत्र साधूनामियं सामाचारी-सर्वत्रैवाध्वादिषु वृक्षाद्यधोऽप्यनुज्ञाप्य स्थातव्यं, यत आह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (७२१) इत्तरियं पि न कप्पइ अविदिन्नं खलु परोग्गहाईसुं ।
चिट्ठित्तु निसिइत्तु व तइयव्वयरक्खणट्ठाए ॥

वृ- 'इत्वरमपि' स्वल्पमपि, कालमिति गम्यते, न कल्पते अविदत्तं खलु परावगहादिषु, आदिशब्दः परावग्रहांनेकभेदप्रख्यापकः, किं न कल्पते इति ?, आह-'स्थातुं' कार्योत्सर्गं कर्तुं 'निषीदितुम्' उपवेष्टयुं, किमित्यत आह-'तइयव्वयरक्खणट्ठाए' अदत्तादानविरत्याख्य-तृतीयव्रतरक्षणार्थं, तस्माद्भिक्षाटनादावपि व्याघातसम्भवे क्वचित् स्थातुकामेनानुज्ञाप्य स्वामिनं विधिना स्थातव्यम्, अटव्यादिष्वपि विश्रमितुकामेन पूर्वस्थित-मनुज्ञाप्य स्थातव्यं, तद्भावे देवतां, यस्याः सोऽवग्रह इति गाथार्थः ॥ उक्ता दशविधसामाचारी, साम्प्रतमुपसंहरन्नाह-

नि. (७२२) एवं सामायारी कहिया दसहा समासओ एसा ।
संजमतवड्ढयाणं निग्गंथाणं महरिसीणं ॥

वृ- निगदसिद्धा । सामाचार्य्यासेवकानां फलप्रदर्शनायाह-

नि. (७२३) एयं सामायारिं जुंजंता चरणकरणमाउत्ता ।
साहू खवंति कम्मं अनेगभवसंचियमनंतं ॥

वृ- निगदसिद्धा एव । इदानीं पदविभागसामाचार्य्याः प्रस्तावः, सा च कल्पव्यवहाररूपा बहुविस्तरा स्वस्थानादवसेया, इत्युक्तः सामाचार्युपक्रमकालः, साम्प्रतं यथाऽऽयुष्कोपक्रमकालः प्रतिपाद्यते-स च सप्तधा, तद्यथा-

नि. (७२४) अज्झवसाणनिमित्ते आहारे वेयणा पराघाए ।
फासे आणापाणु सत्तविहे झिज्झए आउं ॥

वृ- अध्यवसानमेव निमित्तम् अध्यवसाननिमित्तिं तस्मिन्नध्यवसाननिमित्ते सति, अथवा अध्यवसानं रागस्नेहभयभेदेन त्रिधा तस्मिन्नध्यवसाने सति, तथा दण्डादिके निमित्ते सति, आहारे प्रचुरे सति, वेदनायां नयनादिसम्बन्धिन्या सत्यां, पराघातो गर्त्तापातादिसमुत्थस्तस्मिन् सति, स्पर्शे भुजङ्गादिसम्बन्धिनि, प्राणापानयोर्निरोधे, किम् ?, सर्वत्रैव क्रियामाह-'सप्तविधं' सप्तप्रकारमेवं भिद्यते आयुरिति गाथासमुदायार्थः ॥ अवयवार्थस्तूदाहरणेभ्योऽवसेयः, तानि चामूनि-रागाध्यवसाने सति भिद्यते आयुर्यथा-

एगस्स गावीओ हरियाओ, ताहे कुढिया पच्छओ लग्गा, तेहिं नियत्तियाओ, तत्थेगो अतिसयदिव्वरूवधारी तिसिओ गामं पविट्ठो, तस्स तरुणीए नीणियमुदगं, सो य पीतो, सा तस्स अनुरत्ता, होक्कारंतस्सवि न ठाति, सो उठित्ता गतो, सावि तं पलोएंती तहेव उनुयत्तेति, जाहे अद्दिस्सो जाओ ताहे तहठिया चेव रागसंमोहियमणा उयल्ला । एवं रागज्झवसाणे भिज्जति आउंति । तथा स्नेहाध्यवसाने सति भिद्यते आयुर्यथा-एगस्स वाणियगस्स तरुणी महिला, ताणि परोप्परमतीवमणुरत्ताणि, ताहे सो वाणिज्जगेण गतो, पडिनियत्तो वसहिं एक्काहेण न पावइ, ताहे वयंसगा से भणंति-पिच्छामो किं सच्चो अणुरागो न वत्ति ?, ततो एगेनागंतूण भणिया-सो मउत्ति, तीए भणियं-किं सच्चं ?, सच्चं सच्चंति, ततो तिन्निवारे पुच्छित्ता मया, इयरस्स कहियं, सोऽवि तह चेव मतो । एवं स्नेहाध्यवसाने सति भिद्यते आयुरिति, आह-रागस्नेहयोः कः प्रतिविशेष इति ?, उच्यते, रूपाद्याक्षेपजनितः प्रीतिविशेषो रागः, सामान्यस्त्व-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पत्यादिगोचरः प्रेह इति, भयाध्यवसाने भिद्यते आर्युर्यथा सोमिलस्येति–बारवतीए वासुदेवो राया, वसुदेवो से पिया देवई माया, सा कंचि महिलं पुत्तस्स थणं देंतिं दट्ठूण अद्धितिं पगया, वासुदेवेण पुच्छिया–अम्मो ! कीस अद्धितिं पकरेसि ?, तीए भणियं–

जात ! न मे पुत्तभंडेण केणइ थणो पीउत्ति, वासुदेवेण भणिया–मा अद्धितिं करेसि, इण्हिं ते देवयानुभावेण पुत्तसंपत्तिं करेमो, देवया आराहिया, तीए भणियं-भविस्सइ से दिव्वपुरिसो पुत्तोत्ति, तहेव जायं । जायस्स य से गयसुकुमालोत्ति नामं कयं । सो य सव्वजादवपितो सुहंसुहेण अभिरमइ, सोमिलमाहणधूया य रूववतित्ति परिणाविओ, अरिट्ठनेमिस्स य अंतियं धम्मं सोऊण पव्वइओ, गतो य भगवया सद्धिं, धिज्जाइयस्सवि अपत्तियं जायं । कालेण पुणो भगवया सद्धिं बारवतिमागओ, मसाणे य पडिमं ठितो, दिट्ठो य धिज्जाइएणं, ततो कुविएण कुडियंठो मत्थए दाऊण अंगाराणं से भरितो, तस्स य सम्मं अहियासेमाणस्स केवलं समुप्पण्णं, अंतगडो य संवुत्तो । वासुदेवो य भगवतो रिट्ठनेमिस्स चलणजुयलं नमिऊणं सेसे य साहू वंदिऊण पुच्छइ-भगवं ! कतो गयसुकुमालोत्ति ?, भगवया कहियं-मसाणे पडिमं ठितो आसि, वासुदेवो तत्थेव गतो, मतो दिट्ठो, कुविएण भगवं पुच्छिओ–केणेस मारिउत्ति ?, भगवया भणिय–जस्सेव तुमं नयरिं पविसंतं दट्ठूण सीसं फुट्टिहीतित्ति । धिज्जाइओऽवि मानुसाणि पट्ठाविऊण जाव नीति ताव दिट्ठो अनेन पविसंतो वासुदेवो, भयसंभंतस्स य से सीसं तडित्ति सयसिक्करं फुट्टंति । एवं भयाध्यवसाने सति भिद्यते आयुरिति । यदुक्तं 'निमित्तं सति भिद्यते आयु'रिति तन्निमित्तमनेकप्रकारं प्रतिपादयन्नाह–

नि. (७२५) दंडकससत्थरज्जू अग्गी उदगपडणं विसं वाला ।
सीउण्हं अरइ भयं खुहा पिवासा य वाही य ॥

नि. (७२६) मुत्तपुरीसनिरोहे जिन्नाजिन्ने य भोयणे बहुसो ।
घंसणघोलणपीलण आउस्स उवक्कमा एए ॥

वृ- दण्डकशाशस्त्ररज्जवः अग्निः उदकपतनं विषं व्यालाः शीतोष्णमरतिर्भयं क्षुत्पिपासा च व्याधिश्च मूत्रपुरीषनिरोधः जीर्णाजीर्णे च भोजनं बहुशः घर्षणघोलणपीडनान्यायुषः उपक्रमहेतुत्वादुपक्रमा एते, कारणे कार्योपचारात्, यथा–तन्दुलान् वर्षति पर्जन्यस्तथा आयुर्घृतमिति । तत्र दण्डादयः प्रसिद्धा एव, 'व्यालाः' सर्प्पा उच्यन्ते, घर्षणं चन्दनस्येव, घोलनम् अङ्गुष्ठकाङ्गुलिगृहीतसञ्चाल्यमानयूकाया इव, पीडनम् इक्ष्वादेरिवेति गाथार्थः ॥

तथाऽऽहारे सत्यसति वा भिद्यते आयुर्यथा–एगो मरुगो छणे अट्ठारस वारे भुंजिऊण सूलेण मओ, अन्नो पुण छुहाए मओत्ति । वेदनायां सत्यां भिद्यते आयुर्यथा शिरोनयन-वेदनादिभिरनेके मृता इति । तथा पराघाते सति भिद्यते आयुर्यथा-विज्जले वा तडीए वा खाणीए वा पेल्लियस्सेति । तथा स्पर्शे सति भिद्यते आयुर्यथा-तयाविसेणं सप्पेणं छित्तस्स, जहा वा बंभदत्तस्स इत्थीरयणं, तंमि मए पुत्तेण से भणियं-मए सद्धिं भोगे भुंजाहित्ति, तीए भणियं-न तरसि मज्झं फरिसं विसहित्तए, न पत्तियइ, आसो आणिओ, सो तीए हत्थेण मुहाओ कडिं जाव छित्तो, सो गलिऊण सुक्कक्खएण मतो, तहावि अपत्तियंतेन लोहमयपुरिसो कओ, तीए अवरुंडिओ, सोऽवि विलीणोत्ति । तथा प्राणापाननिरोधे सति भिद्यते आयुर्यथा-छगलगाणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जण्णवाडादिसु मारिज्जंताणं । एवं सप्तविधं भिद्यते आयुरिति । न चैतत्सर्वेषामेव, किं तु सोपक्रमायुषा न निरुपक्रमायुषामिति । तत्र-

देवा नेरइया वा असंखवासाउया य तिरिमणुया ।
उत्तम-पुरिसा य तहा चरिमसरीरा य निरुवकमा ॥
सेसा संसारत्था भइया निरुवक्कमा व इतरे वा ।
सोवक्कवमनिरुवक्कमभेदो भणिओ समासेणं ॥

आह-अध्यवसायादीनां निमित्तत्वापरित्यागादभेदोपन्यासो विरुध्यत इति, न, आन्तरेतर-विचित्रोपाधिभेदेन निमित्तभेदानामेवोपन्यासात्, सकलजनसाधरणत्वाच्च शास्त्रारम्भस्य, आह-यद्येवमुपक्रम्यते आयुस्ततश्च कृतनाशोऽकृताभ्यागमश्च, कथम् ?, संवत्सरशतमुपनिबद्धमायुः, तस्यापान्तराल एव व्यपगमात्कृतनाशः, येन च कर्मणा तदुपक्रम्यते तस्याकृतस्यैवाभ्यागम इति, अत्रोच्यते, यथा वर्षशतभक्तमप्यग्निकव्याधितस्याल्पेनापि कालेनोपभुञ्जानस्य न कृतनाशो नाप्यकृताभ्यागमस्तद्वदिहापीति, आह च भाष्यकारः-

"कम्मोवक्कामिज्जइ अपत्तकालंपि जइ ततो पत्ता ।
अकयागमकयनासामोक्खानासासयादोसा ॥
न हि दीहकालियस्सवि नासो तस्सानुभूतितो खिप्पं ।
बहुकालाहारस्स व दुयमग्गितरोगिणो भोगो ॥
सव्वं च पदेसतया भुञ्जइ कम्ममणुभावतो भइतं ।
तेनावस्सानुभवे के कतनासादयो तस्स ?॥
किंचिदकालेऽवि फलं पाविज्जइ पच्चए य कालेण ।
तह कम्मं पाविज्जइ कालेणवि पच्चए अन्नं ॥
जह वा दीहा रज्जू डज्झइ कालेण पुंजिया खिप्पं ।
विततो पडोऽवि सुस्सइ पिंडीभूतो य कालेणं ॥" इत्यादि

ततश्च यथोक्तदोषानुपपत्तिरिति द्वारगाथावयवार्थः । व्याख्यात उपक्रमकालः, साम्प्रतं देशकालद्वारावयवार्थ उच्यते-तत्र देशकालः प्रस्तावोऽभिधीयते, स च प्रशस्तोऽप्रशस्तश्च, तत्र प्रशस्तस्वरूपप्रतिपादनायाह-

नि. (७२७) निद्धूमगं च गामं महिलाथूभं च सुण्णयं दट्ठुं ।
नीयं च कागा ओलेंति जाया भिक्खस्स हरहरा ॥

वृ- निर्द्धूमकं च ग्रामं महिलास्तूपं च कूपतटिमत्यर्थः, शून्यं दृष्ट्वा, तथा नीचं च काकाः 'ओलिन्ति' त्ति गृहाणि प्रति परिभ्रमन्ति, तांश्च दृष्ट्वा विद्यात् यथा जाता भैक्षस्य 'हरहरे' त्यतीव भिक्षाप्रस्ताव इति, पाठान्तरं वा 'नीयं च काए ओलिन्ते' दृष्ट्वेत्यनुवर्त्तत इति गाथार्थः।

अप्रशस्तदेशकालस्वरूपाभिधित्सयाऽऽह-

नि. (७२८) निम्मच्छियं महुं पायडो निही खज्जगावणो सुण्णो ।
जा यंगणे पसुत्ता पउत्थवइया य मत्ता य ॥

वृ- निर्म्माक्षिकं मधु, प्रकटो निधिः, खाद्यकापणः शून्यः, कुल्लूरिकापण इति भावार्थः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतो मध्वादीनां ग्रहणप्रस्तावः, तथा या चाङ्गणे प्रसुप्ता प्रोषितपतिका च मत्ता च तस्या अपि ग्रहणं प्रति प्रस्ताव एवेति, आसवेन मदनाकुलीकृतत्वात्तस्या इति गाथार्थः। इदानीं कालकालः प्रतिपाद्यते-कालस्य-सत्त्वस्य श्वादेः कालो-मरणं कालकालः, अमुमेवार्थं प्रतिपादयन्नाह-

नि. (७२९) कालेन कओ कालो अम्हं सज्झायदेसकालंमि।
तो तेन हओ कालो अकालकालं करेंतेनं॥

वृ- 'कालेन' शुना 'कृतः कालः' कृतं मरणम् अस्माकं स्वाध्यायदेशकाले ततोऽनेन हतः कालः-भग्नः स्वाध्यायकालः, 'अकाले' अप्रस्तावे 'कालं' मरणं कुर्वतेति गाथार्थः।

इदानीं प्रमाणकालः प्रतिपाद्यते-तत्राद्धाकालविशेष एव मनुष्यलोकान्तर्वर्त्ती विशिष्टव्यवहारहेतुः अहर्निशरूपः प्रमाणकाल इति, आह च-

नि. (७३०) दुविहो पमाणकालो दिवसपमाणं च होइ राई अ।
चइपोरिसिओ दिवसो राती चउपोरिसी चेव॥

वृ- द्विविधः प्रमाणकालः-दिवसप्रमाणं च भवति रात्रिश्च, चतुष्पौरुषी दिवसः रात्रिः चतुष्पौरुष्येव, ततश्च प्रमाणमेव कालः प्रमाणकालः पौरुषीप्रमाणं त्वन्यत्रोत्कृष्टहीनादिभेदभिन्नं प्रतिपादितमेवेति गाथार्थः। इदानीं वर्णकालस्वरूपप्रदर्शनायाह-

नि. (७३१) पंचण्हं वण्णाणं जो खलु वण्णेण कालओ वण्णो।
सो होइ वण्णकालो वण्णिज्जइ जोव जं कालं॥

वृ- पञ्चानां शुक्लादीनां वर्णानां यः खलु वर्ण्णेन छायया कालको वर्ण्णः, खलुशब्दस्यावधारणार्थत्वात्कृष्ण एव, अनेन गौरादेर्नामकृष्णस्य च व्यवच्छेदः, स भवति वर्णकालः, वर्णश्चासौ कालश्चेति वर्णकालः, 'वण्णिज्जइ जो व जं कालं'ति वण्णेनं वर्णः, प्ररूपणमित्यर्थः, ततश्च वर्ण्यते प्ररूप्यते यो वा कश्चित्पदार्थो यत्कालं स वर्ण्णकालंः, वर्ण्णप्रधानः कालो वर्ण्णकाल इति गाथार्थः॥ इदानीं भावकालः प्रतिपाद्यते-भावानामौदयिकादीनां स्थितिर्भावकाल इति, आह च -

नि. (७३२) सादीसपज्जवसिओ चउभंगविभागभावणा एत्थं।
ओदइयादीयाणं तं जाणसु भावकालं तु॥

वृ- सादिः सपर्यवसितश्चतुर्भङ्गविभागभावना अत्र कार्या, केषाम्?-औदयिकादीनां भावानामिति, ततश्च योऽसौ विभागभावनाविषयस्तं जानीहि भावकालं तु, इयमक्षरगमनिका, अयं भावार्थः-औदयिको भावः सादिः सपर्यवसानः सादिरपर्यवसानः अनादिः सपर्यवसानः अनादिरपर्यवसान इत्येवमौपशमिकादिष्वपि चतुर्भङ्गियका द्रष्टवया, इयं पुनरत्र विभागभावना-औदियकचतुर्भङ्गिकायां द्वितीयभङ्गशून्यानां शेषभङ्गानामयं विषयः-नारकादीनां नारकादिभवः खल्वौदयिको भावः सादिसपर्यवसानः, मिथ्यात्वादयो भव्यानामौदयिको भावोऽनादिसपर्यवसानः, स एवाभवयानां चरमभङ्गइति। उक्तः औदयिकः, औपशमिकचतुर्भङ्गिकायां तु द्व्यादयः शून्या एव, प्रथमभङ्गस्त्वौपशमिकसम्यक्त्वादयः, औपशमिको भावः सादिसपर्यवसान इति। उक्त औपशमिकः, क्षायिकचतुर्भङ्गिकायां तु त्र्यादयः शून्या एव, क्षायिकं चारित्रं दानादिलब्धिपञ्चकं च क्षायिको भावः सादिसपर्यवसानः, सिद्धस्य चारित्र्यचारित्र्यादिविकल्पा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तीतत्वात्, क्षायिकज्ञानदर्शने तु सादिरपर्यवसाने इति, अन्ये तु द्वितीयभङ्ग एव सर्वमिदं प्रतिपादयन्ति। उक्तः क्षायिकः, क्षायोपशमिकचतुर्भङ्गिकायां द्वितीयभङ्गशून्यानां शेषभङ्गानामयं विषयः-चत्वारि ज्ञानानि क्षायोपशमिको भावः सादिसपर्यवसानः, मत्यज्ञानश्रुताज्ञाने भव्यानामनादिसपर्यवसाने, एते एवाभव्यानां चरमभङ्ग इति। उक्तः क्षायोपशमिकः, पारिणामिकचतुर्भङ्गिकायां द्वितीयभङ्गशून्यानां शेषभङ्गानामयं गोचरः-पुद्गलकाये द्व्यणुकादिः पारिणामिको भावः सादिसपर्यवसानः, भव्यत्वं भव्यानामनादिः सपर्यवसानः, जीवत्वं पुनः चरमभङ्ग इति, उक्तः पारिणामिकः। उक्तार्थसङ्ग्रहगाथा–

बीयं दुतियादीया भंगा वज्जेत्तु बिइययं सेसे।
भवमिच्छसम्मचरणे दिट्ठीनाणेतराणुभव्वजिए॥

नि. (७३३) एत्थं पुण अहिगारो पमाणकालेन होइ नायव्वो।
खेत्तंमि कंमि काले विभासियं जिनवरिंदेणं ?॥

वृ- 'अत्र पुनः' अनेकविधकालप्ररूपणायाम् 'अधिकारः' प्रयोजनं प्रस्तावः प्रमाणकालेन भवति ज्ञातव्यः। आह-'दव्वे अद्ध' इत्यादिद्वारगाथायां 'पगयं तु भावेणंती' त्युक्तं, साम्प्रतमत्र पुनरधिकारः प्रमाणकालेन भवति ज्ञातव्य इत्युच्यमानं कथं न विरुद्धयत इति ?, उच्यते, क्षायिकभावकाले भगवता प्रमाणकाले च पूर्वाह्णे सामायिकं भाषितमित्य विरोधः। अथवा प्रमाणकालोऽपि भावकाल एव, तस्याद्धाकालस्वरूपत्वादित्यलं विस्तरेणेति। 'उद्देसे निद्देसे ये' त्याद्युपोद्घातनिर्युक्तिप्रतिबद्धद्वारगाथाद्वयस्य व्याख्यातं कालद्वारमिति। साम्प्रतं यत्र क्षेत्रे भाषितं सामायिकं तद्जानन् प्रमाणकालस्य चानेकरूपत्वाद्विशेषमजानन् गाथापश्चार्द्धमाह चोदकः–'खेत्तंमि कंमि काले विभासियं जिनवरिंदेण' ? इति गाथार्थः॥

चोदकप्रश्नोत्तरप्रतिपिपादयिषयाऽऽह–

नि. (७३४) वइसाहसुद्धएक्कारसीऍ पुव्वण्हदेसकालंमि।
महसेणवणुज्जाणे अनंतरं परंपरं सेसं॥

वृ- वैशाखशुद्धैकादश्यां 'पूर्वाह्णदेशकाले' प्रथमपौरुष्यामिति भावार्थः। कालस्यान्तरङ्गत्वख्यापनार्थमेव प्रश्नव्यत्ययेन निर्देशः। महसेनवनोद्याने क्षेत्रे अनन्तरनिर्गमः सामायिकस्य, 'परम्परं सेसं' ति शेषं क्षेत्रजातमधिकृत्य परम्परनिर्गमस्तस्येति, आह च भाष्यकारः-"खेत्तं महसेणवणोवलक्खियं जत्थ निग्गयं पुव्विं। सामाइयमन्नेसु य परंपरविनिग्गमो तस्स॥" इति गाथार्थः। गतं मूलद्वारगाथद्वयप्रतिबद्धं क्षेत्रद्वारम्; इह च क्षेत्रकालपुरुषद्वाराणां निर्गमाङ्गता व्याख्यातैव, ततश्च निर्गमद्वारव्याचिख्यासयाऽऽह-'नामं ठवणा दविए खेत्ते काले तहेव भावे य। एसो उ निग्गमस्सानिक्खेवो छव्विहो होइ' त्ति येयं गाथोपन्यस्ता अस्य एव भावनिर्गमप्रतिपादनायाह निर्युक्तिकारः–

नि. (७३५) खइयंमि वट्टमाणस्स निग्गयं भयवओ जिणिंदस्स।
भावे खओवसमियंमि वट्टमाणेहिं तं गहियं॥

वृ- क्षायिके वर्त्तमानस्य भगवतो निर्गतं जिनेन्द्रस्य भावे, भावशब्दः उभयथाऽप्यभिसम्बध्यते, भावे क्षायोपशमिके वर्त्तमानैः 'तत्' सामायिकमन्यच्च श्रुतं गृहीतं, गणधरादिभिरिति गम्यते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र गौतमस्वामिना निषद्यात्रयेण चतुर्द्दश पूर्वाणि गृहीतानि, प्रपित्य पृच्छा निषद्योच्यते, भगवांश्चाचष्टे-उप्पन्ने इ वा विगमे इ वा धूवे इ वा, एता एव तिस्रो निषद्याः, आसामेव सकाशाद्गणभृताम् 'उत्पादव्ययध्रौव्ययुक्तं सदि' ति प्रतीतिरुपजायते, अन्यथा सत्ताऽयोगात्, ततश्च ते पूर्वभवभावितमतयो द्वादशाङ्गमपरचयन्ति, ततो भगवमणुन्नं करेइ; सक्को य दिव्वं वइरमयं थालं दिव्वचुण्णाणं भरेऊण सामिमुवागच्छइ, ताहे सामी सीहासणाओ उट्ठित्ता पडिपुण्णं मुट्ठिं केसराणं गेण्हइ, ताहे गोयमसामिप्पमुहा एक्कारसवि गणहरा इसिं ओणया परिवाडीए ठायंति, ताहे देवा आउज्जगीयसद्दं निरुंभंति, ताहे सामी पुव्वं तित्थ गोयम-सामिस्स दव्वेहिं गुणेहिं पज्जवेहिं अणुजाणामिति भणति चुण्णाणि य से सीसे छुहइ, ततो देवावि चुण्णवासं पुप्फवासं च उवरिं वासंति, गणं च सुधम्मसामिस्स धुरे ठवेऊण अणुजाणइ। एवं सामाइयस्सवि अत्थो भगवतो निग्गओ, सुत्तं गणहरेहिंतो निग्गतं, इत्यलं विस्तरेणेति गाथार्थः ।

साम्प्रतं पुरुषद्वारावयवार्थप्रतिपिपादयिषयाऽऽह–

नि. (७३६) दव्वाभिलावचिंधे वेए धम्मत्थभोगभावे य ।
भावपुरिसो उ जीवो भावे पगयं तु भावेणं ॥

वृ- 'दव्व'त्ति द्रव्यपुरुषः, स चागमनो आगमज्ञशरीरभव्यशरीररातिरिक्तैकभविक-बद्धायुष्काभिमुखनामगोत्र भेदभिन्नो द्रष्टव्यः, अथवा व्यतिरिक्तो द्विधा-मूलगुणनिर्मितः उत्तरगुणनिर्मितश्च, तत्र मूलगुणनिर्मितः पुरुषप्रायोग्याणि द्रव्याणि, उत्तरगुणनिर्मितस्तु तदाकार-वन्ति तान्येव, अभिलप्यतेऽनेनेति अभिलापः-शब्दः, तत्राभिलापपुरुषः पुल्लिङ्गाभिधानमात्रं घटः पट इति वा, चिह्नपुरुषस्त्वपुरुषोऽपि पुरुषचिह्नोपलक्षितो यथा नपुंसकं रमश्रुचित्तमित्यादि, तथा त्रिष्वपि लिङ्गेषु स्त्रीपुन्नपुंसकेषु तृणज्वालोपमवेदानुभवकाले वेदपुरुष इति, तथा धर्मार्जनव्यापार परः साधुर्धर्मपुरुषः, अर्थार्जनपरस्त्वर्थपुरुषो मम्मणनिधिपालवत्, भोगपुरुषस्तु सम्प्राप्तसमस्तविषयसुखभोगोपभोगसमर्थश्चक्रवर्त्तिवत्, 'भावे य' त्ति भावपुरुषश्च, चशब्दो नामाद्यनुक्तभेदसमुच्चयार्थः, 'भावपुरिसो उ जीवो भावे' त्ति पूः–शरीरं पुरि शेते इति निरुक्तव-शाद् भावपुरुषस्तुजीवः, 'भावि' त्ति भावद्वारे निरूप्यमाणे भावद्वारचिन्तायामिति भावार्थः, अथवा 'भावे'त्ति भावनिर्गमप्ररूपणायामधिकृतायां, किम् ? - 'पगयं तु भावेणं' ति 'प्रकृतम्' उपयोगस्तु भावेनेत्युपलक्षणाद् भावपुरुषेण–शुद्धेन जीवेन, तीर्थकरेणेत्यर्थः, तुशब्दाद्वेदपुरुषेण च गणधरेणेति, एतदुक्तं भवति-अर्थतस्तीर्थकरान्निर्गतं सूत्रतो गणधरेभ्य इति, एवमन्येऽपि यथासम्भवमायोज्या इति गाथार्थः ॥

गतं पुरुषद्वारं, साम्प्रतं कारणद्वारावयवार्थव्याचिख्या-सयाऽऽह–

नि. (७३७) निक्खेवो कारणंमी चउव्विहो दुविहु होइ दव्वंमि ।
तद्दव्यमण्णदव्वे अहवावि निमित्तनेमित्ती ॥

वृ- अस्या गमनिका–निक्षेपणं निक्षेपो न्यास इत्यर्थः, करोतीति कारणं, कार्यं निर्वर्त्तयतीति हृदयं, तस्मिन् कारणे-कारण विषयः 'चतुर्विधः' चतुर्भेदः नामस्थापनाद्रव्यभावलक्षणः, नामस्थापने सुज्ञाने, द्रव्यकारणं व्यतिरिक्तं द्विधा, यत आह–द्विविधो भवति द्रव्ये, निक्षेप इति वर्त्तते, सूचनात्सूत्रमितिकृत्वा द्रव्ये इति द्रव्यकारणविषयो द्विविधो निक्षेपः परिगृह्यते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदेव द्रव्यकारणद्वैविध्यं दर्शयति'मिति तस्यैव पटादेर्द्रव्यं तद्रव्यं-तन्त्वादि, तदेव कारणमिति द्रष्टव्यं, तद्विपरीतं वेमाद्यन्यद्रव्यकारणमिति । अथवाऽन्यथ द्विविधत्वं-निमित्तं नैमित्तिकमपि, अपिशब्दादन्यथापि कारणनानातेति, तां वक्ष्यति । तत्र पटस्य निमित्तं तन्तवस्तु एव कारणं, तद्व्यतिरेकेण पटानुत्पत्तेः, यथा च तन्तुभिर्विना न भवति पटस्तथा तद्गतातानादिचेष्टा-दिव्यतिरेकेणापि न भवत्येव, तस्याश्च चेष्टाया वेमादिनिमित्तं, ततो निमित्तस्येदं नैमित्तिकमिति।

नि. (७३८) समवाइ असमवाई छव्विह कत्ता य कम्म करणं च ।
तत्तो य संपयाणापयाण तह संनिहाणे य ॥

वृ- समेकीभावे अवोऽपृथक्त्वे अय गतौ, ततश्चैकीभावेनापृथग्गमनं समवायः-संश्लेषः स येषां विद्यते ते समवायिनः-तन्तवो यस्मात्तेषु पटः समवैतीति, समवायिनश्च ते कारणं च समवायिकारणं-तन्तुसंयोगाः, कारणद्रव्यान्तर-धर्मत्वात् पटाख्यकार्यद्रव्यान्तरस्य दूर वर्त्तित्वात् असमवायिनः त एव कारणमसमवायिकारणमिति । आह–अर्थाभेदे सत्यनेकधा कारण-द्वयोपन्यासोऽनर्थक इति, न, सञ्ज्ञाभेदेन तन्त्रान्तरीयाभ्युपगमप्रदर्शनपरत्वात्तस्य, अथवा षड्विधमित्याह-कर्त्ता च कारणं, तस्य कार्ये स्वातन्त्र्येणोपयोगात्, तमन्तरेण विवक्षित-कार्यानुत्पत्तेः अभीष्टकारणवत्, ततश्च घटोत्पत्तौ कुलालः कारणं, तथा कारणं च-मृत्पिण्डादि करणं, तस्य साधकतमत्वात्, तथा कर्म च कारणं, क्रियते-निर्वर्त्यते यत्तत्कर्म–कार्यम्, आह-तत्कथम-लब्धात्मलाभं तदा कारणमिति ? अत्रोच्यते, कर्यनिर्वर्त्तनमिक्रयाविषयत्वात्तस्योपचारात्कारणता, उक्तं च-

"निर्वर्त्य वा विकार्य वा, प्राप्यं वा यक्रियाफलम् ।
तत् दृष्टादृष्टसंस्कारं, कर्म कर्त्तुर्यदीप्सितम् ॥"

इत्यादि, मुख्यवृत्त्या वा सौकर्यगुणेन कर्म कारणं, तथा सम्प्रदानं च घटस्य कारणं, तस्य कर्मणाऽभिप्रेतत्वात्, तमन्तरेण तस्याभावात्, सम्यक् सत्कृत्य वा प्रयत्नेन दान सम्प्रदानम्, अत एव च रजकस्य वस्त्रं ददातीति न सम्प्रदाने चतुर्थी, किं तु ब्राह्मणाय घटं ददातीति, तथाऽपादानं कारणं, विवक्षितपदार्थापायेऽपि तस्य ध्रुवत्वेन कार्योपकारकत्वाद्, 'दो अवखण्डने' दानं खण्डनम् अपसृत्य मर्यादया दानमपादानं, पिण्डापायोऽपि मृदो ध्रुवत्वादपादानतेति, सा च घटस्य कारणं, तामन्तरेण तस्यानुत्पत्तेः, तथा सन्निधानं च कारणं, तस्याधारतया कार्योपकारकत्वात्, सन्निधीयते यत्र कार्यं तत्सन्निधानम्-अधिकरणं, तच्च घटस्य चक्रं तस्यापि भूः, तस्या अप्याकाशम्, आकाशस्य त्वधिकरणं नास्ति, स्वरूपप्रतिष्ठितत्वात्, घटस्य चेदं कारणम्, एतदभावे घटानुत्पत्तेरिति गाथार्थः ॥ उक्तं द्रव्यकारणम्, इदानीं भावकारणम्

नि. (७३९) दुविहं च होइ भावे अपसत्थ पसत्थगं च अपसत्थं ।
संसारस्सेगविहं दुविहं तिविहं च नायव्वं ॥

वृ- भवीति भावः, स चौदयिकादिः, स एव कारणं संसारापवर्गयोरिति भावकारणं, तत्र 'द्विविधं च' द्विपकारं च भवति, भावे विचार्यमाणे, कारणमिति प्रक्रमाद्गम्यते, भावविषयं वा, भावकारणमित्यर्थः, अप्रशस्तम्-अशोभनं प्रशस्तं-शोभनं च, तत्राप्रशस्तं संसारस्य सम्बन्धि एकविधम्-एकभेदं द्विविधं-द्विभेदं त्रिविधं-त्रिभेदं च ज्ञातव्यं, चशब्दश्चतुर्विधाद्यनुक्त-

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

कारणभेदसमुच्चयार्थ इति गाथार्थः ।। यदुक्तं-'संसारेस्यैकविध' मित्यादि, तदुपप्रदर्शनायाह-

नि. (७४०) असंजमो य एक्को अन्नाणं अविरई य दुविहं तु ।
अन्नाणं मिच्छत्तं च अविरती चेव तिविहं तु ।।

वृ- 'असंयमः' अविरतिलक्षणः, स ह्येक एव संसारकारणम्, अज्ञानादीनां तदुपष्टम्भकत्वादप्रधानत्वादिति, तथाऽज्ञानमविरतिश्च द्विविधं तु संसारकारणं, तत्राज्ञानं-कर्म्माच्छादितजीवस्य विपरीतावबोध इति, अविरतिस्तु सावद्ययोगानिवृत्तिरिति, तथा मिथ्यात्वमज्ञानं चाविरतिश्चेव त्रिविधं तु संसारकारणं, तत्र मित्त्यात्वम्-अतत्त्वार्थश्रद्धानं, शेषं गतार्थम्, एवं कषायादिसम्पर्कादन्येऽपि भेदाः प्रतिपादयितव्या इति गाथार्थः ।।

उक्तमप्रशस्तं भावकारणम्, अधुना प्रशस्तमुच्यते-

नि. (७४१) होइ पसत्थं मोक्खस्स कारणं एगदुविहतिविहं वा ।
तं चेव य विवरीयं अहिगारो पसत्थएणेत्थं ।।

वृ- भवति प्रशस्तं भावकारणं मोक्षस्य कारणमिति, तच्च 'एक' मित्येकविधं द्विविधं त्रिविधं वा, इदं पुनः 'तदेव' च संसारकारणम् असंयमादि विपरीततं द्रष्टव्यम्, एकविधं संयमः, द्विविधं ज्ञानसंयमौ, त्रिविधं सम्यगदर्शनज्ञानसंयमा इति, 'अधिकारः' प्रस्तावः 'प्रशस्तेन' भावकारणेन 'अत्र' सामायिकान्वाख्याने, मोक्षाङ्गत्वादस्येति । ततश्च प्रशस्त भावरूपं चेदं, कारणं च मोक्षस्य इति अधिकारभावनेति गाथार्थः ।। इत्थं कारणद्वारे अधिकारं प्रदर्श्य पुनः कारणद्वारसङ्गतमेव वक्तव्यताशेषमाशङ्काद्वारेणाभिधित्सुराह -

नि. (७४२) तित्थयरो किं कारण भासइ सामाइयं तु अज्झयणं ?।
तित्थयरनामगोत्तं कम्मं मे वेइयव्वंति ।।

वृ- तीर्थकरणशीलस्तीर्थकरः, तीर्थं पूर्वोक्त, स 'किंकारणं' किंनिमित्तं भाषते सामायिकं त्वध्ययनं ? तुशब्दादन्याध्ययनपरिग्रहः, तस्य कृतकृत्यत्वादिति हृदयम्, अत्रोच्यते-

'तीर्थकरनामगोत्रं' तीर्थकरनामसञ्ज्ञं, गोत्रशब्दः सञ्ज्ञायां, कर्म मया वेदितव्यमित्यनेन कारणेन भाषत इति गाथार्थः ।।

नि. (७४३) तं च कहं वेइज्जइ ? अगिलाए धम्मदेसणाईहिं ।
बज्झइ तं तु भगवओ तइयभवोसक्कइत्ता णं ।।

वृ- व्याख्या-पूर्ववत् ।।

नि. (७४४) नियमा मनुयगतीए इत्थी पुरिसेयरोव्व सुहलेसो ।
आसेवियबहुलेहिं वीसाए अन्नयरएहिं ।।

वृ- पूर्ववदेव । इत्थं तीर्थकृतः सामायिकभाषणे कारणमभिधायाधना गणभृतामाशङ्काद्वारेण तच्छ्रवणकारणं प्रतिपादयन्नाह-

नि. (७४५) गोयममाई सामाइयं तु किंकारणं निसामिंति ?।
नाणस्स तं तु सुंदरमंगुलभावाण उवलद्धी ।।

वृ- गौतमादयो गणधराः 'किंकारणं तु' किंनिमित्तं किंप्रयोजनमित्यर्थः, सामायिकं 'निशामयन्ति' शृण्वन्ति, अत्रोच्यते-'नाणस्स'त्ति प्राकृतशैल्या चतुर्थ्यर्थे षष्ठी, ततश्च ज्ञानाया-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानार्थं, तादर्थ्ये चतुर्थी, तेषां हि भगवद्वदननिर्ग्गतं सामायिकशब्दं श्रुत्वा तदर्थविषयं ज्ञानमुत्पद्यत इति भावना, तत्तु ज्ञानं 'सुन्दरमङ्गुलभावानां' शुभेतरपदार्थानां 'उवलद्धी' त्ति उपलब्ध्ये-उपलब्धिनिमित्तमिति गाथार्थः ।। सा च सुन्दरमङ्गुलभावोपलब्धिः प्रवृत्तिनिवृत्त्योः कारणम्

नि. (७४६) होइ पवित्तिनिवित्ती संजमतव पावकम्मअग्गहणं ।
कम्मविवेगो य तहा कारणमसरीरया चेव ।।

वृ- शुभेतरभावपरिज्ञानादूभवतः 'प्रवृत्तिनिवृत्ती' शुभेषु प्रवृत्तिर्भवतीतरेभ्यो निवृत्तिरिति, ते च प्रवृत्तिनिवृत्ती 'संयमतव' इति संयमतपसोः कारणं, तत्र निवृत्तिकारणेत्वेऽपि संयमस्य प्रागुपादानमपूर्वकर्मागमनिरोधोपकारेण प्राधान्यख्यापनार्थं, तत्पूर्वकं च वस्तुतः सफलं तपः, कारणान्यथोपन्यासस्तु संयमे सत्यपि तपसि प्रवृत्तिः कार्य्योत्यमुनाऽशेन प्राधान्यख्यापनार्थमेवेत्यलं प्रसङ्गेन, तयोश्च संयमतपसोः 'पावकम्मअग्गहणं' ति पापकर्माग्रहणं कर्मविवेकश्च, तथ 'कारणं' निमित्तं प्रयोजनं यथासङ्ख्यम्, उक्तं च परममुनिभिः-'संयमे अणण्हयफले, तवे वोदाणफले' इत्यादि, अणण्हयः -अनाश्रवः वोदाणं–कर्मनिर्जरा, कर्मविवेकस्य च प्रयोजनम् 'असरीरया चेवे'ति अशरीरतैव, चः पूरणार्थः, इति गाथार्थः ।। साम्प्रतं विवक्षितमर्थमुक्तानुवादेन आह–

नि. (७४७) कम्मविवेगो असरीरयाय असरीरया अनाबाहा ।
होअणबाहनिमित्तं अवेयणमणाउलो निरुओ ।।

वृ- 'कर्मविवेकः' कर्मपृथग्भावः एशरीरतायाः कारणम्, अशरीरता 'अनाबाहाए'त्ति अनाबाधायाः कारणं भवति, 'अनाबाधनिमित्तम्' 'अनाबाधकार्यं, निमित्तशब्दः कार्यवाचकः, तथा च वक्तारो भवन्ति-अनेन निमित्तेन–अनेन कारणेन मयेदं प्रारब्धम्, अनेन कार्येणेत्यर्थः, ततश्च भवत्यानाबाधकार्यम्, 'अवेदनः' वेदनारहितो, जीव इति गम्यते, स चावेदनत्वाद् 'अनाकुलः' अविह्वल इत्यर्थः, अनाकुलत्वाच्च नीरुग्भवतीति गाथार्थः ।।

नि. (७४८) नीरुयत्ताए अयलो अयलत्ताए य सासओ होइ ।
सासयभावमुवगओ अव्वाबाहं सुहं लहइ ।।

वृ- स हि जीवः नीरुक्तया अचलो भवति, अचलतया च शाश्वतो भवति, शाश्वतभावम्-उपगतः किम् ? अव्याबाधं सुखं लभत इति गाथार्थः ।। इत्थं पारम्पर्येणाव्याबाधसुखार्थ सामायिकश्रवणमिति । गतं कारणद्वारं, प्रत्ययद्वारमधुना व्याख्यायत इति, आह च–

नि. (७४९) पच्चयनिक्खेवो खलु दव्वंमी तत्तमासगाइओ ।
भावंमि ओहिमाई तिविहो पगयं तु भावेणं ।।

वृ- प्रत्यायतीति प्रत्ययः प्रत्ययनं वा प्रत्ययः, तन्निक्षेपः-तन्न्यासः, खलुशब्दोऽनन्तरोक्तकारण-निक्षेपसाम्यप्रदर्शनार्थः, ततश्च नामादिश्चतुर्विधः प्रत्ययनिक्षेपो, नामस्थापने सुगमे, 'द्रव्ये' द्रव्यविषयस्तप्तमाषकादिः, आदिशब्दाद्धटदिव्यादिपरिग्रः, द्रव्यं च तत्प्रत्याय्यप्रतीतिहेतुत्वात् प्रत्ययश्च द्रव्यप्रत्ययः-तप्तमाषकादिरेव, तज्ज्ञो वा प्रत्याय्यपुरुष प्रत्यय इति 'भावम्मि' त्ति भावे विचार्यमाणेऽवध्यादिस्त्रिविधो भावप्रत्ययः, तस्य बाह्यलिङ्गकारणानपेक्षत्वाद्, आदि-शब्दान्मनः पर्यायकेवलपरिग्रहः, मतिश्रुते तु बाह्यलिङ्गकारणापेक्षित्वान्न विवक्षिते, बहु चात्र वक्तव्यं तच्च नोच्यते, ग्रन्थविस्तरभयादिति, 'प्रकृतम्' उपयोगस्तु सामायिकमङ्गीकृत्य 'भावेणं'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ति भावप्रत्ययेनेति गाथार्थः ॥ अत एवाह–

नि. (७५०) केवलनाणित्ति अहं अरहा सामाइयं परिकहेई ।
तेसिंपि पच्चओ खलु सव्वण्णू निसामिंति ॥

वृ- केवलज्ञानी अहमिति स्वप्रत्ययादर्हन् प्रत्यक्षत् एव सामायिकार्थमुपलभ्य सामायिकं परिकथयति, 'तेषामपि' श्रोतॄणां गणधरादीनां हृद्गताशेषसंशयपरिच्छित्त्या 'प्रत्ययश्रः' अवबोधः सर्वज्ञ इत्येवंभूतो भवति, अस्मादेव यत्कैश्चिदुक्तं-'सर्वज्ञोऽसाविति ह्येतत्तत्कालेऽपि बुभुत्सुभिः। तत्ज्ञानज्ञेयविज्ञानरहितैर्गम्यते कथम् ?॥' इत्यादि, तद्व्युदस्तं वेदितव्यम्, अन्यथा चतुर्वेदे पुरुष लोकस्य तद्व्यवहारानुपपत्तेः, विजृम्भितं चात्रास्मत्स्वयूथ्यैः प्रवचनसिद्ध्यादिषु, अतः सञ्जातप्रत्यया 'निशामयन्ति' शृण्वन्तीति गाथार्थः ॥

गतं प्रत्ययद्वारम्, इदानीं लक्षणद्वारावयवार्थप्रतिपादनायाह–

नि. (७५१) नामं ठवणा दविए सरिसे सामण्णलक्खणागारे ।
गइरागइ नाणत्ती निमित्तं उप्पाय विगमे य ॥

वृ- लक्ष्यतेऽनेनेति लक्षणं-पदार्थस्वरूपं, तच्च द्वादशधा, तत्र नामलक्षणं लक्षणमितीयं वर्ण्णानुपूर्वी, स्थापनालक्षणं लकारादिवर्ण्णानामाकारविशेषः, द्रव्यलक्षणं ज्ञशरीराद्व्यतिरिक्तं यद्यस्य द्रव्यस्यान्यतो व्यवच्छेदकं स्वरूपं, यथा गत्यादि धर्मास्तिकायादीनाम्, इदमेव किञ्चिन्मात्रविशेषात्सादृश्यसामान्यदिलक्षणभेदतो निरुप्यते-तत्र 'सरिसे' त्ति सादृश्यं लक्षणम्, इहत्यघटसदृशः पाटलिपुत्रको घट इति, 'सामन्नलक्खणं' ति सामान्यलक्षणं यथा सिद्धत्वं सिद्धानां सद्द्रव्यजीवमुक्तादिधर्मैः सामान्यमिति, 'आगार'त्ति आक्रियतेऽनेनाभिप्रेतं ज्ञायत इत्याकारो-बाह्यचेष्टारूपः, स एवान्तराकूतगमकरूपत्वाल्लक्षणमिति, उक्तं च –

"आकारैरिङ्गितैर्गत्या, चेष्टया भाषितेन च ।
नेत्रवक्त्रविकारैश्च, गृह्यतेऽन्तर्गतं मनः ॥" इति,

'गइरानइ' त्ति गत्यागतिलक्षणं द्वयोर्द्वयोः पदयोर्विशेषणविशेष्यतया अनुकूलं गमनं गतिः प्रत्यावृत्त्या प्रातिकूल्येनागमनमागतिः, गतिश्चागतिश्च गत्यागती ताभ्यां ते एव वा लक्षणं गत्यागतिलक्षणं, तच्चतुर्धा-पूर्वपदव्याहतमुत्तरपदवहतमुभयपदव्याहतमुभयपदाव्याहतमिति, तत्र पूर्वदव्याहतोदाहरणम्– 'जीवे णं भंते ! नेरइए ? नेरइए जीवे ?, गोयमा ! जीवे सिय नेरइए सिय अनेरईए, नेरइए पुण नियमा जीवे' उत्तरपदवहतोदाहरणम्–'जीवइ भंते ! जीवे जीवे जीवइ ?, गोयमा ! जीवइ ताव नियमा जीवे, जीवे पुण सिय जीवइ सिय नो जीवइ' सिद्धानां जीवनाभावादिति हृदयम्, उभयपदव्याहतोदाहरणम्–'भवसिद्धिए णं भंते ! नेरइए, नेरएइ भवसिद्धिए ?, गोयमा भवसिद्धिए सिय नेरइए सिय अनेरइए, नेरइएवि सिय भवसिद्धिए सिय अभवसिद्धिए' उभयपदाव्याहतोदाहरणम्-जीवे भंते ! जीवे जीवे जीवो ?, गोयमा ! जीवे नियमा जीवे जीवेऽवि नियमा जीवे' उपयोगो नियमाज्जीवः जीवोऽपि नियामदुपयोग इति भावना । लोकेऽपि गत्यागतिलक्षणं –

'रूवी य घडोत्ति चूतो दुमोत्ति नीलोप्पलं च लोगंमि ।
जीवो सचेयणोत्ति य विगप्पनियमादयो भणिया ॥'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा 'नाणत्ति' त्ति नानाभावो नानाता-भिन्नता, सा च लक्षणं, सा पुनश्चतुर्द्धा- द्रव्यतः क्षेत्रतः कालतो भावतश्च, तत्र द्रव्यतो नानाता द्विधा-तद्द्रव्यनानाता अन्यद्रव्यनानाता च, तत्र तद्द्रव्यनानाता परमाणूनां परस्परतो भिन्नता, अन्यद्रव्यनानाता परमाणोर्द्व्यणुकादिभेदभिन्नता, एवमेकादिप्रदेशावगाढैकादिसमयस्थित्येकादिगुणशुक्लानां तदतन्नानाता वाच्या, इदं च लक्षणं पदार्थस्वरूपावस्थापकत्वात् 'निमित्तं' ति लक्ष्यते शुभशुभमनेनेति लक्षणं निमित्तमेव लक्षणं निमित्तलक्षणं, तच्चाष्टधा, उक्तं च –

"भोमसुमिणंतरिक्खं दिव्वं अंगसर लक्खणं तह य।
वंजणमट्ठविहं खलु निमित्तमेयं मुणेयव्वं ॥"

स्वरूपमस्य ग्रन्थान्तरदवसेयम् ॥ 'उपपाद' त्ति यतो नानुत्पन्नं वस्तु लक्ष्यते अत उत्पादोऽपि वस्तुलक्षणं, 'विगमोय' त्ति विगमश्च विनाशश्च वस्तुलक्षणं, तमन्तरेणोत्पादाभावात्, न हि वक्रतयाऽविनष्टमङ्गुलिद्रव्यं ऋजुतयोत्पद्यत इति भावनेति गाथार्थः ॥

नि. (७५२) वीरियभावे य तहा लक्खणमेयं समासओ भणियं।
अहवावि भावलक्खण चउव्विहं सद्दहणमाई ॥

वृ- 'वीरियं' ति वीर्यं–सामर्थ्यं यद्यस्य वस्तुनः तदेव लक्षणं वीर्यलक्षणम्, आह च भाष्यकारः

"विरियंति बलं जीवस्स लक्खणं जं च जस्स सामत्थं।
दव्वस्स चित्तरूवं जह विरियं महोसहादीणं ॥"

तथा भावानाम्-औदयिकादीनां लक्षणं पुद्गलविपाकादिरूपं भावलक्षणं, यथोदयलक्षणः औदयिकः, उपशमलक्षणस्त्वौपशमिकः, तथानुत्पत्तिलक्षणः क्षायिको, मिश्रलक्षणः क्षायोपशमिकः, परिणामलक्षणः पारिणामिकः, संयोगलक्षणः सान्निपातिक इति। अथवा भावाश्च ते लक्षणं चात्मन इति भावलक्षणं, तत्र सामायिकस्य जीवगुणत्वात् क्षयोपशमोपशमक्षयस्वभावत्वाद् भावलक्षणता, अमुमेवार्थं चेतस्यारोप्याह–'भावे य' इत्यादि, भावे च–विचार्य्यमाणे तथा लक्षणमिदं 'समासतः' सङ्क्षेपतो भणित। सामायिकस्य वैशेषिकलक्षणाभिधित्सयाऽऽह- 'अहवावि भावलक्खण चउव्विधं सद्दहणमादी' अथवाऽपि भावस्य-सामायिकस्य लक्षणमनुस्वारलोपोऽत्र द्रष्टव्यः, चतुर्विधं श्रद्धानादीति गाथार्थः ॥ यदुक्तं-'चतुर्विधं श्रद्धानादि' तत्प्रदर्शनायाह–

नि. (७५३) सद्दहण जाणणा खलु विरती मीसाय य लक्खणं कहए।
तेऽवि निसामिंति तहा चउलक्खणसंजुयं चेव ॥

वृ- इह सामायिकं चतुर्विधं भवति, तद्यथा-सम्यक्त्वासामायिकं श्रुतसामायिकं चारित्रसामायिकं चारित्राचारित्रसामायिकं च, अस्य यथायोगं लक्षणं 'सद्दहणं' ति श्रद्धानं, लक्षणमिति योगः सम्यक्त्वसामायिकस्य, 'जाणण'त्ति ज्ञानं ज्ञ-संवित्तिरित्यर्थः, सा च श्रुतसामायिकस्य, खुलशब्दो निश्चयतः परस्परतः सापेक्षत्वविशेषणार्थः, 'विरति'त्ति विरमणं विरतिः-अशेषसावद्ययोगनिवृत्तिः, सा च चारित्रसामायिकस्य लक्षणं, 'मीसा य' त्ति मिश्रा-विरताविरतिः, सा च चारित्राचारित्रासामायिकस्य लक्षणं, कथ्यतत्यनेन स्वमनीषिकाऽपोहने शास्त्रपारतन्त्र्यमाह, भगवान् जिन एवं कथयति, तस्य च कथयतः 'तेऽपि' गणधरादयः 'निशामयन्ति' शृण्वन्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'तथा' तेनैव प्रकारेण चतुर्लक्षणसंयुक्तमेवेति गाथार्थः ॥

उक्तं लक्षणद्वारम्, अधुना नयद्वारं प्रतिपिपादयिषुराह–

नि. (७५४) नेगमसंगहववहारउज्जुसुए चेव होइ बोद्धव्वे ।
सद्दे य समभिरूढे एवंभूए य मूलनया ।

वृ- नयन्तीति नयाः-वस्त्ववबोधगोचरं प्रापयन्त्यनेकधर्मात्मकज्ञेयाध्यवसायान्तरहेतव इत्यर्थः, ते च नैगमादयः, नैगमः सङ्ग्रहः व्यवहारः ऋजुसूत्रश्चैव भवति बोद्धव्यः, शब्दश्च समभिरूढः एवम्भूतश्च मूलनया इति गाथासमुदायार्थो निगदसिद्धः ॥

अवयवार्थं तु प्रतिनयं नयाभिधाननिरुक्तद्वारेण वक्ष्यति, आह च–

नि. (७५५) नेगेहिं मानेहिं मिणइत्ती नेगमस्स नेरुत्ती ।
सेसाणंपि नयाणं लक्खणमिणमो सुणेह वोच्छं ॥

वृ- न एकं नैकं-प्रभूतानीत्यर्थः, नैकैर्मानै :-महासत्तासामान्यविशेषज्ञानैर्मिमीते मिनोतीति वा नैकम इति, इयं नैकमस्य निरुक्तिः, निगमेषु वा भवो नैगमः, निगमाः-पदार्थपरिच्छेदाः, तत्र सर्वं सदित्येवमनुगताकारावबोधहेतुभूतां महासत्तामिच्छति अनुवृत्तव्यावृत्तावबोधहेतुभूतं च सामानविशेषं द्रव्यत्वादिव्यावृत्तावबोधहेतुभूतं च विशेषं परमाणुमिति । आह–इत्थं तर्ह्ययं नैगमः सम्यग्दष्टिरेवास्तु, सामान्यविशेषाभ्युपगमपरत्वात्, साधुवदिति, नैतदेवं, सामान्यविशेषवस्तूनामत्यन्तभेदाभ्युपगमपरत्वात्तस्येति, आह च भाष्यकारः-

"जं सामण्णविसेसे परोप्परं वत्थुतो य सो भिन्ने ।
मन्नइ अच्चंतमतो मिच्छद्दिट्ठी कणातोव्व ॥
दोहिवि नएहि नीतं सत्थुलूएण तहवि मिच्छत्तं ।
जं सविसयप्पहाणत्तणेण अन्नोन्ननिरवेक्खा ॥"

अथवा निलयनप्रस्थकग्रामोदाहरणेभ्योऽनुयोगद्वारप्रतिपादितेभ्यः खल्वयमवसेय इत्यलं विस्तरेण, गमनिकामात्रमेतत् । 'सेसाण' मित्यादि शेषाणामपि नयानां-सङ्ग्रहादीनां लक्षणमिदं शृणुत 'वक्ष्ये' अभिधास्य इत्ययं गाथार्थः ॥

नि. (७५६) संगहियपिंडियत्थं संगहवयणं समासओ बेंति ।
वच्चइ विनिच्छियत्थं ववहारो सव्वदव्वेसुं ॥

वृ- आभिमुख्येन गृहीतः-उपात्तः सङ्गृहीतः पिण्डितः-एकजातिमापन्नः अर्थो-विषयो यस्य तत्सङ्गृहीतपिण्डितार्थं सङ्ग्रहस्य वचनं सङ्ग्रहवचनं 'समासतः' सङ्क्षेपतः ब्रुवते तीर्थकरणगणधरा इति, एतदुक्तं भवति-सामान्यप्रतिपादनपरः खलु अयं सदित्युक्ते सामान्यमेव प्रतिपद्यते न विशेषान्, तथा च मन्यते-विशेषाः सामान्यतोऽर्थान्तरभूताः स्युरनर्थान्तरभूता वा ?, यद्यर्थान्तरभूताः न सन्ति ते, सामान्यादर्थान्तरत्वात्, खपुष्पवत्, अथानर्थान्तरभूताः सामान्यमात्रं ते, तद्व्यतिरिक्तत्वात्, तत्स्वरूपवत्, पर्याप्तं व्यासेन, उक्तः सङ्ग्रहः । 'वच्चति' इत्यादि व्रजति-गच्छति निः-आधिक्येन चयनं चयः अधिकश्चयो निश्चयः-सामान्यं विगतो निश्चयो विनिश्चयः- निःसामान्यभावः तदर्थं-तन्निमित्तं, सामान्यभावायेति भावना, व्यवहारो नयः, क्व ? -'सर्वद्रव्येषु' सर्वद्रव्यविषये, तथा च विशेषप्रतिपादनपरः खलु, अयं हि सदित्युक्ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशेषानेव घटादीन प्रतिपद्यते, तेषां व्यवहारहेतुत्वात्, न तदतिरिक्तं सामान्यं, तस्य व्यवहारापेत्वात्, तथा च-सामान्यं विशेषेभ्यो भिन्नमभिन्नं वा स्यात् ?, यदि भिन्नं विशेषव्यतिरेकेणोपलभ्येत, न चोपलभ्यते, अथाभिन्नं विशेषमात्रं तत्, तदव्यतिरिक्तत्वात्, तदव्यतिरिक्त्वात्, तत्स्वरूपवदिति, अथवा विशेषेण निश्चयो विनिश्चयः-आगोपालाङ्गनाद्यवबोधो न कतिपयविद्वत्सन्निबद्ध इति, तदर्थं व्रजति सर्वद्रव्येषु, आह च भाष्यकारः-

"भमरादि पञ्चवण्णादि निच्छए जंमि वा जनवयस्स ।
अत्थे विनिच्छओ सो विनिच्छयत्थोत्ति जो गेज्झो ॥"
"बहुतरओत्ति य तं चिय गमेइ संतेऽवि सेसए मुयइ ।
संववहारपरतया ववहारो लोयमिच्छंतो ॥"

इत्यादि, उक्तो व्यवहार इति गाथार्थः ॥

नि. (७५७) पच्चुप्पन्नग्गाही उज्जुसुओ नयविही मुणेयव्वो ।
इच्छइ विसेसियतरं पच्चुप्पन्नं नओ सद्दो ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निप्पावयकुडगा, ताहे तेसु उट्ठिएसु विंझो अनुभासइ तं सुणेइ; अट्ठमे कम्मप्पवायपुव्वे कम्मं वण्णिज्जइ, तहा कम्मं बज्झइ, जीवस्स य कम्मस्स य कहं बंधो ?, एत्थ विचारे सो अभिनिवेसेन अन्नहा मन्नंतो परूविंतो य निण्हओ जाओत्ति ॥ अनेन प्रस्तावेन क एते निह्नवा इत्याशङ्काऽपनोदाय तान् प्रतिपिपादयिषुराह–

नि. (७७८) बहुरय पएस अव्वत्तसमुच्छादुगतिगअबद्धिया चेव ।
सत्तेए निन्हगा खलु तित्थंमि उ वद्धमाणस्स ॥

वृ- 'बहुरय'त्ति एकसमयेन क्रियाध्यासितरूपेण वस्तुनोऽनुत्पत्तेः प्रभूतसमयैश्चोत्पत्तैर्बहुषु समयेषु रताः-सक्ताः बहुरताः, दीर्घकालद्रव्यप्रसूतिप्ररूपिण इत्यर्थः १। 'पदेस' त्ति पूर्वपदलोपात् जीवप्रदेशाः प्रदेशाः, यथा महावीरो वीर इति, जीवः प्रदेशो येषां ते जीवप्रदेशाः निह्नवा, चरमप्रदेशजीवप्ररूपिण इति हृदयम् २। 'अव्वत्त' थि उत्तरपदलोपादव्यक्तमता अव्यक्ताः, यथा भीमसेनो भीम इति, व्यक्तं-स्फूटं, न व्यक्तमव्यक्तम्–अस्फुटं मतं येषां तेऽव्यक्तमताः, संयताद्यवगमे सन्दिग्धबुद्धय इति भावना ३ । 'समुच्छेद' त्ति प्रसूत्यनन्तरं सामस्त्येन प्रकर्षच्छेदः समुच्छेदः-विनाशः, समुच्छेदमधीयते तद्वेदिनो वा 'तदधीते तद्वेत्ती' त्यण् सामुच्छेदाः, क्षणक्षयिभावप्ररूपका इति भावार्थः ४ । 'दुग' त्ति उत्तरपदलोपादेकसमये द्वे क्रिये समुदिते द्विक्रिय तदधीयते तद्वेदिनो वा द्वैक्रियाः, कालभेदेन क्रियाद्वयानुभवप्ररूपिण इत्यर्थः ५ । 'तिग' त्ति त्रैराशिका जीवाजीवनोजीवभेदास्त्रयो राशयः समाहृताः त्रिराशि तत्प्रयोजनं येषां ते त्रैराशिकाः, राशित्रयख्यापका इति भावना ६ । 'अबद्धिगा चेव' त्ति स्पृष्टं जीवेन कर्म न स्कन्धवद् बद्धमबद्धम्, अवद्धमेषामस्ति विदन्ति वेत्यबद्धिकाः, स्पृष्टकर्मविपाकरूपका इति हृदयम् ७ । 'सत्तेते णिण्हया खलु तित्थंमि उ वद्धमाणस्स' त्ति सप्तैते निह्नवाः खलु, निह्नव इति कोऽर्थः ?-स्वप्रपञ्चतस्तीर्थकरभाषितं निह्नुतेऽर्थं पचाद्यचि ति निह्नवो-मिथ्यादृष्टिः, उक्तं–

"सूत्रोक्तस्यैकस्याप्यरोचनादक्षरस्य भवति नरः ।
मिथ्यादृष्टिः सूत्रं हि नः प्रमाणं जिनाभिहितम् ॥"

खल्विति विशेषणे, किं विशिनष्टि ?-अन्ये तु द्रव्यलिङ्गतोऽपि भिन्ना बोटिकाख्या इति, तीर्थे वर्द्धमानस्य, पाठान्तरं वा-'एतेसिं निग्गमनं वोच्छामि अहानुपुव्वीए' त्ति गाथार्थः ॥

साम्प्रतं येभ्यः समुत्पन्नास्तान् प्रतिपादयन्नाह–

नि. (७७९) बहुरय जमालिपभवा जीवपएसा य तीसगुत्ताओ ।
अव्वत्ताऽऽसाढाओ सामुच्छेयाऽऽसमित्ताओ ॥

वृ- बहुरताः जमालिप्रभवाः, जमालेराचार्यात् प्रभवो येषां ते तथाविधाः, जीवप्रदेशाश्च तिष्यगुप्तादुत्पन्नाः, अव्यक्ता आषाढात्, सामुच्छेदाः अश्वमित्रादिति गाथार्थः ॥

नि. (७८०) गंगाओ दोकिरिया छलुगा तेरासियाण उप्पत्ती ।
थेरा य गोट्ठमाहिल पुट्ठमबद्धं परूविंति ॥

वृ- गङ्गात् द्वैक्रियाः, षडुलूकात् त्रैराशिकानामुत्पत्तिः, स्थविराश्च गोष्ठामाहिलाः स्पृष्टमबद्धं प्ररूपयन्ति, कर्मेति गम्यते, 'पुट्ठबद्धं परूविंसु' वा पाठान्तरं, ततश्चाबद्धिका गोष्ठामाहिलात् सञ्जाता इति गाथार्थः ॥ साम्प्रतं येषु पुरेषूत्पन्नास्त एते निह्नवास्तानि प्रतिपादयन्नाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (७८१) सावत्थी उसभपुरं सेयविया मिहिल उल्लुगातीरं ।
पुरिमंतरंजि दसपुर रहवीरपुरं च नगराइं ॥

वृ- श्रावस्ती ऋषभपुरं श्वेतविका मिथिला, उल्लुकातीरं पुरमन्तरञ्जि दशपुरं रथवीरपुरं च नगराणि, निह्नवनां यथायोगं प्रभवस्थानानि, वक्ष्यमाणाभिन्न द्रव्यलिङ्गमिथ्यादृष्टिबोटिकप्रभवस्थानरथवीरपुरोपन्यासो लाघवार्थ इति गाथार्थः ॥ भगवतः समुपजातकेवलस्य परिनिर्वृतस्य च कः कियता कालेन निह्नवः समुत्पन्न इति प्रतिपादयन्नाह–

नि. (७८२) चोद्दससोलस वासा चोद्दसवीसुत्तरा य दोन्नि सया ।
अट्ठावीसा य दुवे पंचेव सया उ चोयाला ॥

वृ- चतुर्दशषोडशवषाणि तथ 'चोद्दसवीसुत्तरा य दोन्नि सय' त्ति चतुर्दशाधिके द्वे शते विंशत्युत्तरे च द्वे शते, वर्षाणामिति गम्यते, तथाऽष्टाविंशत्यधिके च द्वे शते, तथा पञ्चैव शतानि चतुश्चत्वारिशदधिकानि, इति गाथार्थः ॥ अवयवार्थ तु भाष्यकार एव प्रतिपादयिष्यति।

नि. (७८३) पंच सया चुलसीया छच्चेव सया नवोत्तरा होंति ।
नाणुप्पत्तीय दुवे उप्पन्ना निव्वुए सेसा ॥

वृ- पञ्च शतानि चतुरशीत्यधिकानि षट् चैव शतानि नवोत्तराणि भवन्ति । ज्ञानोत्पत्तेरारभ्य चतुर्दशषोडशवर्षाणि यावदतिक्रान्तानि तावदत्रान्तरे द्वावाद्यावुत्पन्नौ, उत्पन्ना निर्वृत्ते भगवति, यथोक्तकाले चातिक्रान्ते शेषा : खल्वव्यक्तादय इदि बोटिकप्रभवकालाभिधानं लाघवार्थमेवेति गाथार्थः ॥ अधुना सूचितमेवार्थ मूलभाष्यकृद् यथाक्रमं स्पष्टयन्नाह–

[भा.१२५] चोद्दस वासाणि तया जिनेन उप्पाडियस्स नाणस्स ।
तो बहुरयाण दिट्ठी सावत्थीए समुप्पन्ना ॥

वृ- चतुर्दशवर्षाणि तदा 'जिनेन' वीरेणोत्पादितस्य ज्ञानस्य ततोऽत्रान्तरे बहुरतानां दृष्टिः श्रावस्त्यां नगर्यां समुत्पन्नेति गाथार्थः ॥ यथोत्पन्ना तथोपदर्शयन् सङ्ग्रहगाथामाह–

[भा.१२६] जेट्ठा सुदंसण जमालिऽणोज्ज सावत्थितेंदुगुज्जाणे ।
पंचसया य सहस्सं ढंकेण जमालि मोत्तूणं ॥

वृ- कुण्डपुरं नगरं, तत्थ जमाली सामिस्स भाइणिज्जो, सो सामिस्स मूले पंचसयपरिवारो पव्वइओ, तस्स भज्जा सामिणो दुहिता, तीसे नामाणि जेट्ठत्ति वा सुदंसणत्ति वा अनोज्जत्ति वा, सावि सहस्सपरिवारा अनुपव्वइया, जहा पन्नत्तीए तहा भणियव्वां, एक्कारसंगा अहिज्जिया, सामिं आपुच्छिऊण पंचसयपरिवारो जमाली सावत्थी गतो, तत्थ तेंडुगं उज्जाणे कोट्ठए चेइए समोसढो, तत्थ से अंतपंतेहिं रोगो उप्पन्नो, न तरइ निसन्नो अच्छिउं, तो समणे भणियाइओ-सेज्जासंथारयं करेइ, ते काउमारद्धा ॥ अत्रान्तरे जमालिर्दाहज्वराभिभूतस्तान् विनेयन् पप्रच्छ-संस्तृतं न वेति ?, ते उक्तवन्तः-संस्तृतमिति, स चोत्थितो जिगमिषुरर्धसंस्तृतं दृष्ट्वा क्रुद्धः, सिद्धान्तवचनं स्मृत्वा 'क्रियमाणं कृत'-मित्यादि कर्मोदयतो वितथमिति चिन्तयामास, 'क्रियमाण, 'क्रियमाणं कृत' मित्येतद् भगवद्वचनं वितथं, प्रत्यक्षविरुद्धत्वात्, अश्रावणशब्दवचनवत्, प्रत्यक्षविरुद्धता चास्यार्धसंस्तृतसंस्तारासंस्तृतदर्शनात्, ततश्च क्रियमाणत्वेन प्रत्यक्षसिद्धेन कृतत्वधर्मोऽपनीयत इति भावना, ततो यद् भगवानाह तदनृतं, किन्तु कृतमेव कृतमिति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं पर्यालोच्यैवमेव प्ररूपणां चकारेति, स चेत्थं प्ररूपयनं स्वगच्छस्थविरैरिदमुक्तः- हे आचार्य! 'क्रियमाणं कृत' मित्यादि भगवद्वचनमवितमथमेव, नाध्यक्षविरुद्धं, यदि क्रियमाणं क्रियाविष्टं कृतं नेष्यते ततः कथं प्राक् क्रियाऽनारम्भसमय इव पश्चादपि क्रियाऽभावे तदिष्यत इति, सदा प्रसङ्गात्, क्रियाऽभावस्याविशिष्टत्वात्, तथा यच्चोक्तं भवता 'अर्द्धसंस्तृतसंस्तृतदर्शनात्' तदप्ययुक्तं, यतो यद् यदा यत्राकाशदेशे वस्त्रमास्तीर्यते तत्तदा तत्रास्तीर्णमेव, एवं पाश्चात्यवस्त्रास्तरणसमये खल्वसावास्तीर्ण एव, विशिष्टसमयापेक्षीणि च भगवद्वचनानि, अतोऽदोषः

एवं सो जाहे न पडिवज्जइ ताहे केइ असद्दहंता तस्स वयणं गया सामिसगासं, अन्ने तेनेव समं ठिया, पियदंसणावि, तत्थेव ढंको नाम कुंभगारो समणोवासओ, तत्थ ठिया, सा वंदितुं आगया, तंपि तहेव पन्नवेइ, सा य तस्सानुराएण मिच्छत्तं विपडिवण्णा, अज्ञाणं परिकहेइ, तं च ढंकं भणति, सो जाणति-एसाऽवि विप्पडिवण्णा नाहघएणं, ताहे सो भणति-सम्मं अहं न याणामि एयं विसेसतरं, अन्नयाकयाईं सज्झायपोरुसिं करेइ, ततो ढंकेण भायणाणि उव्वत्तंतेण ततोहुत्तो इंगालो छूढो, ततो तीसे संघाडीए एगदेसो दड्ढो, सा भणइ-सावय ! किं ते संघाडी दड्ढा ?, सो भणइ-तुब्भे चेव पन्नवेह जहा-दज्झमाणे अडड्ढे, केण तुब्भ संघाडी दड्ढा ?, ततो सा संबुद्धा भणइ-इच्छामि संमं पडिचोयणा, ताहे सा गंतूण जमालिं पन्नवेइ बहुविहं, सो जाहे न पडिवज्जइ ताहे सा सेससाहुणो य सामिं चेव उवसंपन्नाइं, इतरोऽवि एगागी अनालोइयपडिक्कंतो कालगतो ॥ एष सङ्ग्रहार्थः, अक्षराणि त्वेवं नीयन्ते, जेट्ठा सुदंसणा अनोज्ञति जमालिधरणीए नामाइं, सावत्थीए नयरीए तेंदुगुज्ञाणे जमालिस्स एसा दिट्ठी उप्पण्णा, तत्थ पंचसया य साहूणं सहस्सं च संजईणं, एतेर्षि जे सतं न पडिबुद्धं तं ढंकेण पडिबोहियंति वक्कसेसं, जमालिं मोत्तूणंति ॥ अन्ये त्वेवं व्याचक्षते-जेट्ठा महत्तरिगा सुदंसणाऽभिहाणा भगवतो भगिणी, तीसे जमाली पुत्तो, तस्स अन्नोज्ञा नाम भगवतो दुहिता भारिया ॥ शेषं पूर्ववत् । गतः प्रथमो निह्नवः, साम्प्रतं द्वितीयं प्रतिपादयन्नाह–

[भा.१२७] सोलस वासाणि तया जिनेन उप्पाडियस्स नाणस्स ।
जीवपएसियदिट्ठी उसभपुरंमी समुप्पन्ना ॥

वृ- षोडश वर्षाणि तदा जिनेनोत्पादितस्य ज्ञानस्य जीवप्रदेशिकदृष्टिस्तत ऋषभपुरे समुत्पन्ना इति गाथार्थः ॥ कथमुत्पन्ना ? रायगिहं नगरं गुणसिलयं चेइयं, तत्थ वसू नामायरिओ चोद्दसपुव्वी समोसढो, तस्स सीसो तीसगुत्तो नाम, सो आयप्पवायपुव्वे इमं आलावयं अज्झावेइ-एगे भंते ! जीवपएसे जीवेत्ति वत्तव्वं सिया ?, नो इणमट्ठे समट्ठे, एवं दो जीवपएसा तिन्नि संखेज्ञा असंखेज्ञा वा, जाव एगेनावि पदेसेण ऊणो नो जीवोत्ति वत्तव्वं सिया, जम्हा कसिणे पडिपुन्ने लोगागासपदेसतुल्लपएसे जीवेत्ति वत्तव्व' मित्यादि, एवमज्झाविंतो मिथ्यात्वोदयतो व्युत्थितः सन्नित्थमभिहितवान्यद्येकादयो जीवप्रदेशोः खल्वेकप्रदेशहीना अपि न जीवाख्यां लभन्ते, किन्तु चरमप्रदेशयुक्ता एव लभन्त इति, ततः स एवैकः प्रदेशो जीव इति, तद्भावभावित्वात् जीवत्वस्येति, स खल्वेवं प्रतिपादयन् गुरुणोक्तो–नैतदेवं, जीवाभावप्रसङ्गात्, कथम् ?, भवदभिमतोऽन्त्यप्रदेशोऽप्यजीवः, अन्यप्रदेशतुल्यपरिमाणत्वात्, प्रथमादिप्रदेशवत्, प्रथमादि-प्रदेशो वा जीवः, शेषप्रदेशतुल्यपरिममाणत्वाद्, अन्त्यप्रदेशवत्, न च पूरण इतिकृत्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्य जीवत्वं युज्यते, एकैकस्य पूरणत्वाविशेषाद्, एकमपि विना तस्यासम्पूर्णत्वमित्येवमप्युक्तो यदा न प्रतिपद्यते ताहे से काउस्सग्गो कतो, एवं सो बहूहिं असब्भादुब्भावणाहिं मिच्छत्ताभिनिवेसेण य अप्पां च परं च तदुभयं च वुग्गाहेमाणो वुप्पाएमाणो गतो आमलपप्पं नगरिं, तत्थ अंबसालवणे ठितो, तत्थ मित्तसिरी नाम समणोवासओ, सो जाणइ-जहेस निण्हओ, अन्नया कयाइ तस्स संखडी जाता, ताहे तेन निमंतिओ-तुब्भेहिं सयमेव घरं आँगंतव्वं, ते गता, ताह तस्स निविट्ठस्स विउला खज्जगविही नीणिता, ताहे सो ताओ एक्केक्काओ खंडं खंडं देइ, एवं कूरस्स कुसणस्स वत्थस्स, पच्छा पादेसु पडितो, सयणं च भणइ-एह वंदह, साहू पडिलाभिया, अहो अहं धन्नो सपुण्णो जं तुब्भे मम घरं सयमेवागता, ताहे ते भणंति-किं धरिसियामो अम्हे एवं तुमे ?, सो भणति-ससिद्धंतेण तुम्हे मया पडिलाभ्यिा, जइ नवरं वद्धमानसामिस्स तणएण सिद्धंतेण पडिलाभेमि, तत्थ सो संबुद्धो भणइ-इच्छामि अज्जो ! सम्मं पडिचोयणा, ताहे पच्छा सावएण विहिना पडिलाभितो, मिच्छामि दुक्कडं च कतं, एवं ते सव्वे संबोहिया, आलोइय पडिकंता विहरंति ॥ अमुमेवार्थमुपसंजिहीर्षुराह-

[भा.१२८] रायगिहे गुणसिलए वसु चोद्दसपुव्वि तीसगुत्ताओ ।
आमलकप्पा नयरी मित्तसिरी कूरपिंडाई ॥

वृ- अस्याः प्रपञ्चार्थ उक्त एव, अक्षरगमनिका तु उसभपुरंति वा रायगिहंति वा एगट्ठा, तत्थ रायगिहे गुणसिलए उज्जाने वसु चोद्दसपुव्वी आयरिओ समोसढो, तस्स सीसाओ तीसगुत्ताओ एसा दिट्ठी समुप्पन्ना, सो मिच्छात्ताभिभूओ आमलकप्पा नाम नयरी तं गओ, मित्तसिरी सावओ, तेन कूरपुवगादि (देशीयवचनत्वात् कूरसिक्थादिनेत्यर्थः) दिट्ठंतेहिं पडिबोहिउत्ति ॥

गतो द्वितीयो निह्नवः, साम्प्रतं तृतीयं प्रतिपादयन्नाह-

[भा.१२९] चोद्दा दोवाससया तइया सिद्धिं गयस्स वीरस्स ।
अव्वत्तयाण दिट्ठी सेयवियाए समुप्पन्ना ॥

वृ- चतुर्दशाधिके द्वे वर्षशतो तदा सिद्धिं गतस्य वीरस्य ततोऽव्यक्तकदृष्टिः श्वेतव्यां नगर्यां समुत्पन्नेति गाथार्थः ॥ कथमुत्पन्ना ?-सेयवियाए नयरीए पोलासे उज्जाने अज्जासाढा नामायरिया समोसढा, तेसिं सीसा बहवे आगाढजोगं पडिवन्ना, स एवायरिओ तेसिं वायणायरिओ, अन्नो तत्थ नत्थि, ते य रत्तिं हिययसूलेण मया सोहम्मे नलिनिगुम्मे विमाने देवा उववन्ना, ओहिं पउंजंति, जाव पेच्छंति तं सरीरगं, ते य साहू आगाढजोवाही, तेवि न याणंति-जहा आयरिया कालगता, ताहे तं चेव सरीरगं अनुप्पविसित्ता ते साहुणो उट्ठवेंति, वेरत्तियं करेह, एवं तेन तेसिं दिव्वपभावेण लहुं चेव सारियं, पच्छा सो ते भणइ-खमह भंते! जं भे मए अस्संजएण वंदाविया, अहं अमुगदिवसे कालगतो, तुज्झं अनुकंपाए आगतो, एवं सो खामेत्ता पडिगतो, तेवि तं सरीरगं छड्डेऊण चिंतेंति-एच्चिरं कालं अस्संजतो वंदितो, ततो ते अव्वत्तभावं भावेंति-

को जाणइ किं साहू देवो वा ? तो न वंदणिज्जोत्ति ।
होज्जासंजतनमणं होज्ज मुसावायममुगोत्ति ॥१॥
थेरवयणं जदि परे संदेहो किं सुरोत्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साहुत्ति देवे कहं न संका किं सो देवो अदेवोत्ति ॥२॥
तेन कहिएत्ति व मती देवोऽहं रूवदरिसणाओ य ।
साहुत्ति अहं कहिअ समाणरूवंमि किं संका ? ॥३॥
देवस्स व किं वयणं सच्चंति न साहुरूवधारिस्स ।
न परोप्परंपि वंदह जं जाणंताविं जययोत्ति ॥४॥

एवं भण्णमाणावि जाहे न पडिवज्जंति ताहे उग्घाडिया, ततो विहरंता रायगिहं गया, तत्थ मोरियवंसपसूओ बलभद्दो नाम राया समणोवासओ, तेन ते आगमिया-जहा इहमागतत्ति, ताहे तेन गोहा आणत्ता-वच्चह गुणसिलगातो पव्वइयए आणेस, तेहिं आनीता, रन्ना पुरिसा आणत्ता-सिग्घं एते कडगमद्देण मारेह, ततो हत्थी कडगेहि य आनीएहिं ते पभणिया-अम्हे जाणामो जहा तुमं सावओ, तो कहं अम्हे माराविहि ?, राया भयइ-तुम्हे चोरा नु चारियाणु अभिमरा नु ?, को जाणइ ?, ते भणंति-अम्हे साहुणो, राया भणइ-किह तुब्भे समणा ?, जं अव्वत्ता परोप्परस्सवि न वंदह, तुब्भे समणा वा चारियावा ?, अहंपि सावगो वा न वा ?, ताहे ते संबुद्धा लज्जिया पडिवन्ना निस्संकिया जाया, ताहे अंबाडिया खरेहिं मउएहि य, संबोहणट्ठाए तुब्भं इमं मए एयाणुरूवं कयं, मुक्का खामिा य ॥ अमुमेवार्थमुपसंहरन्नाह–

[भा.१३०] सेयवि पोलासाढे जोगे तद्दिवसहिययसूले य ।
सोहंमि नलिनिगुम्मे रायगिहे मुरिय बलभद्दे ॥

वृ- श्वेतव्यां नगर्यां पोलासे उद्याने आषाढाख्य आचार्यः योग उत्पाटिते सति तद्दिवस एव हृदयशूले च, उत्पन्ने मृत इति वाक्यशेषः, स च सौधर्मे कल्पे नलिनिगुल्मे विमाने, समुत्पद्यावधिना पूर्ववृत्तान्तमवगम्य विनेयानां योगान् सारितवानिति वाक्यशेषः, सुरलोकगते तस्मिन्नव्यक्तमतास्तद्विनेया विहरन्तो राजगृहे नगरे मौर्ये बलभद्रो राजा, तेन सम्बोधिता इति वाक्यशेषः, एवमन्या अपि सङ्ग्रहगाथा स्वबुद्धया व्याख्येया इति । उक्तस्तृतीयो निह्नवः, चतुर्थव्याचिख्यासयाऽऽह-

[भा.१३१] वीसा दो वाससया तइया सिद्धिं गयस्स वीरस्स ।
सामुच्छेइयदिट्ठी मिहिलपुरीए समुप्पन्ना ॥

वृ- विंश्त्युत्तरे द्वे वर्षशते तदा सिद्धिं गतस्य वीरस्य ततोऽत्रान्तरे सामुच्छेदिकदृष्टिः मिथिलापुर्यां समुत्पन्नेति गाथार्थः ॥ यथोत्पन्ना तथा प्रदर्शयन्नाह–

[भा.१३२] मिहिलाए लच्छिघरे महगिरिकोडिण्ण आसमित्ते य ।
नेउनियानुप्पवाए रायगिहे खंडरक्खा य ॥

वृ- मिहिलाए नयरीए लच्छिहरे चेतिए महागिरीआयरियाण कोडिण्णो नाम सीसो ठितो, तस्स आसमित्तो सीसो, सो अनुप्पवादपुव्वे नेउनियं वत्थुं पढति, तत्थ छिन्नछेदनवत्तव्वयाए आलावगो जहा पडुप्पन्नसमयनेरइया वोच्छिज्जिस्संति, एवं जाव वेमाणियत्ति, एवं बिइयादि-समएसु वत्तव्वं, एत्थ तस्स वितिगिच्छा जाया-जहा सव्वे पुडप्पन्न-समयसंजाता वोच्छिज्जिस्संति–

'एवं च कतो कम्माणुवेयणं सुकयदुक्कयाणंति ? ।
उप्पादानंतरतो सव्वस्स विनाससब्भावा ॥१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सो एवमादि परुवेंतो गुरुणा भणिओ–

'एगनयमरूणमिणं सुत्तं वच्चाहि मा हु मिच्छत्तं ।
निरवेक्खो सेसाणवि नयाण हिदयं वियारेहि ॥२॥'
नहि सव्वहा विनासो अद्धापज्ञायमेत्तणासंमि ।
अपरप्पज्ञाया अनंतधम्मिणो वत्थुणो जुत्ता ॥३॥
अह सुत्तातोत्ति मती ननु सुत्ते सासयंपि निद्दिट्ठं ।
वत्थुं दव्वट्ठाए असासयं पज्ञवट्ठाए ॥४॥
तत्थवि न सव्वनासो समयादिविसेसणं जतोऽभिहितं ।
इहरा न सव्वनासे समयादिविसेसणं जुत्तं ॥५॥'

जाहे पन्नविओवि नेच्छति ताहे उग्घाडितो, ततो सो समुच्छेदं वागरेंतो कंपिल्लपुरं गतो, तत्थ खंडरक्खा नाम समणोवासया, ते य सुंकपाला, तेहिं ते आगमिएल्लगा, तेहि ते गहिया, ते मारेउमारद्धा, ते भणंति भयभीया-अम्हेहिं सुयं जहा तुब्भे सावगा, तहावि एते साहू मारेह, ते भणंति-जे ते साहू ते वोच्छिण्णा तुज्झं चेव सिद्धंतो एस, अतो तुब्भे अन्ने केवि चोरा, ते भणंति-मा मारेह, एवं तेहिं संबोहिया पडिवण्णा सम्मत्तं । अयं गाथार्थः ॥ अक्षराणि तु क्रियाध्याहारतः स्वधिया ज्ञेयानि । गतश्चतुर्थो निह्नवः, साम्प्रतं पञ्चममभिधित्सुराह–

[भा.१३३] अट्ठावीसा दो वाससया तइया सिद्धिं गयस्स वीरस्स ।
दो किरियाणं दिट्ठी उल्लुगतीरे समुप्पन्ना ॥

वृ- अष्टाविंशत्यधिके द्वे वर्षशते तदा सिद्धिं गतस्य वीरस्य, अत्रान्तरे द्वैक्रियाणां दृष्टिः उल्लुकातीरे समुत्पन्नेति गाथार्थः ॥ यथा समुत्पन्ना तथा निदर्शनायाह–

[भा.१३४] नइखेडजनव उल्लुग महगिरिधनगुत्त अज्ञगंगे य ।
किरिया दो रायगिहे महातवो तीरमणिणाए ॥

वृ- उल्लुका नाम नदी, तीए उवलक्खिओ जनवतोवि सो चेव भण्णइ, तीसे य नदीए तीरे एगंमि खेडठाणं, बीयंमि उल्लुगातीरं नगरं, अन्ने तं चेव खेडं भणंति, तत्थ महागिरीण सीसो धनगुत्तो नाम, तस्सवि सीसो गंगो नाम आयरियो, सो तीसे नदीए पुव्विमे तडे, आयरिया से अवरिमे तडे, ततो सो सरयकाले आयरियं वंदओ उच्चलिओ, सो य खल्लाडो, तस्स उल्लुगं नदिं उत्तरंतस्स सा खल्ली उण्हेण डज्झइ, हिट्ठा य सीयलेण पाणिएण सीतं, ततो सो चिंतेइ-सुत्ते भणियं जहा एगा किरिया वेदिज्ञइ-सीता उसिणा वा, अहं च दोकिरियाओ वेएमि, अतो दोऽवि किरियाओ एगसमएण वेदिज्ञंति, ताहे आयरियाण साहइ, ताहे भणिओ-मा अज्ञो ! एवं पन्नवेहि, नत्थि एगसमएण दो किरियाओ वेदिज्ञंति, जतो समओ मनो य सुहुमा न लक्खिज्ञंति उत्पलपत्रशतवेधवत्, एवं सो पन्नवितोऽवि जाहे न पडिवज्ञइ ताहे उग्घाडितो, सो हिडंतो रायगिहं गतो, महातवो तीरप्पभे नाम पासवणे, तत्थ मणिनागो नाम नागो, तस्स चेतिए ठाति, सो तत्थ परिसामज्झे कहेति-जहा एगसमएन दो किरियाओ वेदिज्ञंति, ततो मणिनागेन भणियं तीसे परिसाए मज्झे–अरे दुट्ठसेहा ! कीस एयं अपन्नवणं पन्नवेसि ?, एत्थ चेव ठाणे ठिएण भगवता वद्धमाणसामिणा वागरियं– जहा एगं किरियं वेदेत्ति, तुमं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेसिं किं लट्ठतरओ जाओ ?, छड्डेहि एयं वादं, मा ते दोसेणासेहामि-

'मणिनागेनारद्धो भयोववत्तिपडिबोहिओ वोत्तुं ।
इच्छामो गुरुमूलं गंतूण ततो पडिक्कंतो ।।१।।

त्ति गाथार्थः ।। गतः पञ्चमो निह्नवः, षष्ठमधुनोपदर्शयन्नाह-

[भा.१३५] पंचसया चोयाला तइया सिंद्धि गयस्स वीरस्स ।
पुरिमंतरंजियाए तेरासियदिट्ठी उववन्ना ।।

वृ- पञ्च वर्षशतानि चतुश्चत्वारिंशदधिकानि तदा सिद्धिं गतस्य वीरस्य, अत्रान्तरे पुर्यन्तरञ्जिकायाम्, अनुस्वारोऽलाक्षणिकः, त्रैराशिकदृष्टिरुत्पन्नेति गाथार्थः ।। कथमुत्पन्नेति प्रदर्श्यते - तत्र

[भा.१३६] पुरिमंतरंजि भूयगुह बलसिरि सिरिगुत्त रोहगुत्ते य ।
परिवायपोट्टसाले घोसणपडिसेहणा वाए ।।

वृ- सङ्ग्रहगाथा । अस्याश्च कथानकादर्थोऽवसेयः, तच्चेदम्-अंतरंजिया नाम पुरी, तत्थ भूयगुहं नाम चेतियं, तत्थ सिरिगुत्ता नाम आयरिया ठिता,तत्थ बलसिरी नाम राया, तेसिं सिरिगुत्ताणं थेराणं सड्ढियरो रोहउत्तो नाम सीसो, अन्नगामे ठितओ, ततो सो उवज्झायं वंदओ एति, एगो य परिवायओ पोट्टं लोहपट्टएण बंधिउं जंबुसालं गहाय हिंडइ, पुच्छितो भणइ-नाणेण पोट्टं फुट्टइ तो लोहपट्टेण बद्धं, जंबुडालं च जहा एत्थ जंबूदीवे नत्थि मम पडिवादित्ति, ततो तेन पडहतो नीणावितो-जहा सुण्णा परप्पवादा, तस्स लोगेन पोट्टसालो चेव नामं कतं, सो पडहतो रोहगुत्तेणं वारिओ, अहं वादं देमित्ति, ततो सो पडिसेहित्ता गतो आयरियसगासं, आलोएइ-एवं मए पडहतो विणिवारिओ, आयरिया भणंति-दुट्ठु कयं, जतो सो विज्ञाबलिओ, वादे पराजितोऽवि विज्ञाहिं उवट्ठाइत्ति तस्स इमाओ सत्त विज्ञाओ, तं जहा-

[भा.१३७] विच्छुय सप्पे मूसग मिई वराही य कायपोआईं ।
एयाहिं एयाहि विज्ञाहिं सो उ परिव्वायओ कुसलो ।।

वृ- तत्र वृश्चिकेति वृश्चिकप्रधाना विद्या गृह्यते, सर्पेति सर्पप्रधाना, 'मूसग' त्ति मूषकप्रधाना, तथा मृगी नाम विद्या, मृगीरूणोपघातकारिणी, एवं वाराही च, 'कागपोत्ति' त्ति-काकविद्या, पोताकीविद्या च, पोताक्यः सकुनिका भण्यन्ते, एतासु विद्यासु, एताभिर्वा विद्याभिः स परिव्राजकः कुशल इति गाथार्थः ।। सो भणइ-किं सक्का एत्ताहे निलुक्किउं ?, ततो सो आयरिएण भणिओ-पढियसिद्धाउ इमाउ सत्त पडिवक्खविज्ञाओ गेण्ह, तं जहा-

[भा.१३८] मोरी नउलि बिराली वग्घी सीही उलूगि ओवाई ।
एयाओ विज्ञाओ गेण्ह परिवायमहणीओ ।।

वृ- मोरी नकुली बिराली व्याघ्री सिंही च उलूकी 'ओवाइ' त्ति ओलावयप्रधाना, एता विद्या गृहाण परिव्राजकमथिन्य इति गाथार्थः ।। रयहरणं च से अभिमंतेउं दिन्नं, जइ अत्रंपि उट्ठेइ तो रयहरणं भमाडिज्ञासि, तो अज्ञेयो होहिसि, इंदेणावि सक्किहिसि नो जेतुं, ताहे ताओ विज्ञाओ गहाय गओसभं, भणियं चऽणेण-एस किं जाणति ?, एयस्स चेव पुव्वपक्खो होउ, परिव्वाओ चिंतेइ-एए निउणा तो एयाण चेव सिद्धंतं गेण्हामि, जहा-मम दो रासी, तं-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जहा-जीवा य अजीवा य, ताहे इयरेण चिंतियं-एतेण अम्ह चेव सिद्धंतो गहिओ, तेन तस्स बुद्धिं परिभूय तिन्नि रासी ठविया-जीवा अजीवा नोजीवा, तत्थ जीवा संसारत्था, अजीवा घडादि, नोजीवा घिरोलियाछिन्नपुच्छाई, दिट्ठंतो दंडो, जहा दंडस्स आदिमज्झं अग्गं च, एवं सव्वे भावा तितिहा, एवं सो तेन निप्पपसिणवागरणो कओ, ताहे सो परिवायओ रुट्ठो विच्छुए मुयइ, ताहे सो तेसिं पडिवक्खे मोरे मुयइ, ताहे तेहिं हएहिं विंछिएहि पच्छा सप्पे मुयइ, इयरो तेसिं पडिघाए नउले मुयइ, ताहे उंदुरे तेसिं मज्जारे, मिए तेसिं वग्घे, ताहे सूयरे तेसिं सीहे, काके तेसिं उलुगे, ताहे पोयागी मुयइ तेसिं ओलाइं, एवं जाहे न तरइ ताहे गद्दभी मुक्का, तेन य सा रयहरणेण आहया, सा परिवायगस्स उवरिं छेरित्ता गया, ताहे सो परिवायगो हीलिज्जंतो निच्छूढो, ततो सो परिवायगं पारजिणित्ता गओ आयरियसगासं, आलोएइ-जहा जिओ एवं, आयरिया आह-कीस तए उट्ठिएण न भणियं ?-नत्थित्ति तिन्नि रासी, एयस्स मए बुद्धि परिभूय पन्नविया, इयाणपि गंतुं भणाहि, सो नेच्छइ, मा मे ओहावणा होउत्ति, पुणो पुणो भणिओ भणइ-को वा एत्थ दोसो ? जइ तिन्नि रासी भणिया, अत्थि चैव तिन्नि रासी, आयरिया आह-अज्जो ! असब्भावो तित्थगरस्स आरासयणा य, तहावि न पडिवज्जाइ, तसो सा आयरिएण समं वायं लग्गो, ताहे आयरिया राउलं गया भणंति-तेन मम सिस्सेण अवसिद्धंतो भणिओ, अम्हं दुवे चेव रासी, इयाणि सो विपडिवन्नो, तो तुब्भे अम्हं वायं सुणेह, पडिस्सुयं राइणा, ततो तेसिं रायसभाए रायपुरओ आवडियं, जहेगदिवसं उट्ठाय २ छम्मासा गया, ताहे राया भणइ-मम रज्जं अवसीदति, ताहे आयरिएहिं भणियं-इच्छाए मए एच्चिरं कालं धरिओ, एत्ताहे पासह कल्लं दिवसं आगए निगिण्हामि, ताहे पभाए भणइ-कुत्तियावणे परिक्खिज्जउ, तत्थ सव्वदव्वाणि अत्थि, आणेह जीवे अजीवे नोजीवे य, ताहे देवयाए जीवा अजीवा य दिन्ना, नोजीवा नत्थि, एवमादिचोयालसएण पुच्छाणं निग्गहिओ ॥ अमुमेवार्थमुपसहरन्नाह–

[भा.१३९] सिरिगुत्तेणऽवि छलुगो छम्मासे कड्ढिऊण वाय जिओ ।
आहरणकुत्तियावण चोयालसएण पुच्छाणं ॥

वृ- निगदसिद्धा, नवरं चोयालसयं-तेन रोहेन छम्मूलपयत्थ गहिया, तं जहा-दव्वगुणकम्म-सामन्नविसेसा छट्ठओ य समवाओ, तत्थ दव्वं नवहा, तं जहा-भूमी उदयं जलणो पवणो कालो दिसा अप्पओ मणो यत्ति, गुणा सतरस, तं जहा-रूवं रसो गंधो फासो परिमाणं पुहुत्तं संओगो विभागो परापरत्तं बुद्धी सुहं दुक्खं इच्छा दोसो पयत्तो य, कम्मं पंचधा-उक्खेवणं अवक्खेवणं आउंचणं पसारणं गमणं च, सामण्णं तिविहं-महासामण्णं १ सत्ता-सामण्णं त्रिपदार्थसद्बुद्धिकारि २ सामण्णविसेसो द्रव्यत्वादि ३, अन्ये त्वेवं व्याख्यानयन्ति-त्रिपदार्थसत्करी सत्ता, सामण्णं द्रव्यत्वादि, सामन्नविसेसो पृथिवीत्वादि, विसेसा अंता (अनंता य), इहपच्चयहेऊ य समवाओ, एए छत्तीसं भेया, एत्थ एक्केक्के चत्तारि भंगा भवंति, तं जहा-भूमी अभूमी नोभूमी नोअभूमी, एवं सव्वत्थ, तत्थ कुत्तियावणे भूमी मग्गिया लेट्टुओ लद्धो, अभूमीए पाणियं, नोभूमीए जलाद्येव तु ना राश्यन्तरं, नोअभूमीए लेट्टुए चेवं एवं सव्वत्थ ॥

आह च भाष्यकारः जीवमजीवं दाउं नोजीवं जाइओ पुणो अजीवं देइ चरिमंमि जीवं न उ नोजीवं सजीवदलं ततो निग्गहिओ छलूगो, गुरुणा से खेलमल्लो मत्थए भग्गो, ततो निद्धाडिओ,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुरूवि पूतिओ नगरे य गोसयणं कयं–वद्धमाणसामी जयइत्ति ॥ अमुमेवार्थमुपसंहरन्नाह–

[भा.१४०] वाए पराजिओ सो निव्विसओ कारिओ नरिंदेणं ।
घोसावियं च नगरे जयइ जिनो वद्धमाणोत्ति ॥

वृ- निगदसिद्धा, तेनावि सरक्खरडिएणं चेव वइसेसियं पणीयं, तं च अन्नमन्नेहिं खाइं नीयं, तं चोलूयपणीयन्ति वुच्चइ, जओ सो गोत्तेणोलूओ आसि ॥ गतः षष्ठो निह्नवः, साम्प्रतं सप्तमं प्रतिपादयितुमाह–

[भा.१४१] पंचसया चुलसीया तइया सिद्धि गयस्स वीरस्स ।
अबद्धियाण दिट्ठी दसपुरनयरे समुप्पन्ना ॥

वृ- पञ्च वर्षशतानि चतुरशीत्यधिकानि तदा सिद्धिं गतस्य वीरस्य, ततोऽबद्धिकदृष्टिः दशपुरनगरे समुत्पन्नेति गाथार्थः ॥ कथमुत्पन्ना ?, तत्रार्यरक्षितवक्तव्यतायां कथानकं प्रायः कथितमेव, यावद् गोष्ठामाहिलः प्रत्युच्चारके कर्मबन्ध-चिन्तायां कर्मोदयादभिनिविष्टो विप्रतिपन्न इति । तथा च कथानकानुसन्धानाय प्रागुक्तानुवादपरां सङ्ग्रहगाथामाह–

[भा.१४२] दसपुरे नगरुच्छुघरे अज्जरक्खियपूसमित्ततियगं च ।
गोट्ठामाहिल नवमट्ठमेसु पुच्छा य विंझस्स ॥

वृ- इयमर्थतः प्राग्व्याख्यातैवेति न विव्रियते, प्रकृतसम्बन्धस्तु-विंझो अट्ठमे कम्मप्पवायपुव्वे कम्मं परूवेति, जहा किंचि कम्म जीवपदेसेहिं बद्धमेत्तं कालन्तरट्ठितिमपप्प विहडइ शुष्ककुड्यापतितचूर्णमुष्टिवत्, किंचि बद्धं पुट्ठं च कालंतरेण विहडइ, आर्द्रलेपकुड्यो सस्नेहचूर्णवत्; किंचि पुण बद्धं पुट्ठं निकाइयं जीवेण सह एगत्तमावन्नं कालान्तरेण वेइज्जइत्ति ॥ एवं श्रुत्वा गोष्ठामाहिल आह–नन्वेवं मोक्षाभावः प्रसज्यते, कथम् ?, जीवात् कर्म न वियुज्यते, अन्योऽन्याविभागबद्धत्वात्, स्वप्रदेशवत्, तस्मादेवमिष्यतां–

[भा.१४३] पुट्ठो जहा अबद्धो कंचुइणं कंचुओ समन्नेइ ।
एवं पुट्ठमबद्धं जीवं कम्मं समन्नेइ ॥

वृ- स्पृष्टो यथाऽबद्धः कञ्चुकिनं पुरुषं कञ्चुकः 'समन्वेति' समनुगच्छति, एवं स्पृष्टमबद्धं कर्म जीवं समन्वेति, प्रयोगश्च-जीवः कर्मणा स्पृष्टो न च बध्यते, वियुज्यमानत्वात्, कञ्चुकेनेव तद्वानिति गाथार्थः । एवं गोट्ठामाहिलेण भणिते विंझेण भणियं-अम्हं एवं चेव गुरुणा वक्खाणियं, गोट्ठामाहिलेण भणियं-सो य न याणति, किं वक्खाणेइ ?, ताहे सो संकिओ समाणो गओ पुच्छिउं, मा मए अन्नहा गहियं हवेज्ज, ताहे पुच्छिओ सो भणइ-जहा मए भणियं तहा तुमएवि अवगयं, तहेवेदं, ततो विंझेण माहिलवुत्तंतो कहिओ, ततो गुरुर्भणति-माहिलभणिती मिच्छा, कहं ! यदुक्तम्-जीवात् कर्म न वियुज्यत इत्यादि, अत्र प्रत्यक्षविरोधिनी प्रतिज्ञा, यस्मादायुष्ककर्मवियोगात्मकं मरणमध्यक्षसिद्धमिति, हेतुरप्यनैकान्तिकः, अन्योऽन्याविभागसम्बद्धानामपि क्षीरोदकादीनामुपायतो वियोगदर्शनात्, दृष्टान्तोऽपि न साधनधर्मानुगतः, स्वप्रदेशस्य युक्तत्वासिद्धेः, ताद्रूप्येणानादिरूपत्वाद्भिन्नं च जीवात् कर्म्मेति, तथा यच्चोक्तम्-'जीवः कर्मणा स्पृष्टो न बध्यत इत्यादि' अत्रापि किं प्रतिप्रदेशं स्पृष्टो नभसेव उत त्वङमात्रे कंचुकेनेव, यदि प्रतिप्रदेशं दृष्टान्तदार्ष्टान्तिकयोरसाम्यं, कंचुकेन प्रतिप्रदेशमस्पृष्टत्वात्, अथ त्वग्मात्रे स्पृष्ट

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति, ततो नापान्तरालगत्यनुयायि कर्म, पर्यन्तमात्रवर्त्तित्वाद्, बाह्याङ्गमलवत्, एवं च सर्वो जीवो मोक्षभाक्, कर्मानुगमरहितत्वात्, मुक्तवत्, तथाऽन्तर्वेदनाऽभावप्रसङ्गः, तन्निमित्त-कर्माभावात्, सिद्धस्येव, न च भिन्नदेशस्यापि वेदनाहेतुत्वं युज्यते, शरीरान्तरगतेनातिप्रसङ्गात्, न च स्वकृतत्वं निबन्धनम्, अत्रान्तर्वर्त्तिप्रदेशानां कर्मयोगरहितानां कर्तुत्वानुपपत्तेः, तस्माद् यत् किञ्चिदेतदिति । एवं गेण्हिऊण सो विंझेण भणितो-एवं आयरिया भणंति, ततो सो तुण्हिक्को ठिओ चिंतेइ-समप्पउ तो खोडेहामि, अन्नया नवमे पुव्वे साहूण पच्चक्खाणं वण्णिज्जइ, जहा-पाणाइवायं पच्चक्खामि जावज्जीवाए इत्यादि, गोष्ठामाहिलो भणति-नैवं सोहणं, किं तर्हि ?

[भा.१४४] पच्चक्खाणं सेयं अपरिमाणेण होइ कायव्वं ।
जेसिं तु परीमाणं तं दुट्ठं आससा होइ ॥

वृ- प्रत्याख्यानं श्रेयः, 'अपरिमाणेन' कालावधिं विहाय कर्तव्यं, एव क्रियमाणं श्रेयो भवति, येषां तु परिमाणं प्रत्याख्याने तत् प्रत्याख्यानं 'दुष्टम्' अशोभनं, किमिति ?, यतस्तत्र 'आससा होइ' त्ति अनुस्वाारलोपादाशंसा भवति, प्रयोगश्च-यावज्जीवकृतावधिप्रत्याख्यान-माशंसादोषदुष्टं, परिमाणपरिच्छिन्नावधित्वात्, श्वःसूर्योदयात् परतः पारयिष्यामीत्यु-पवासप्रत्याख्यानवत्, तस्मादपरिमाणमेव प्रत्याख्यानं श्रेयः, आशंसारहितत्वात्, तीरितादि-विशुद्धोपवासादिवदिति गाथार्थः ॥ एवं पन्नवेंतो विंझेण भणिओ-न होति एयं एवं जं तुमे भणियं, सुण, एत्थंतरंमि य जं तस्स अवसेसं नवमपुव्वस्स तं समत्तं, ततो सो अभिनिवेसेण पूसमित्तसयासं चेव गंतूण भणइ-अन्नहा आयरिएहिं भणियं अन्नहा तुमं पन्नवेसि ॥ उपन्यस्तश्चानेन तत्पुरतः स्वपक्षः, तत्राऽऽचार्य आह-ननु यदुक्तं भवता-'यावज्जीवं कृतावधि-प्रत्याख्यानमाशंसादोषदुष्टमित्यादि' एतदयुक्तं, यतः कृतप्रत्याख्यानानां साधूनां नाशंसा–मृताः सेविष्याम इति, किन्तु मृतानां देवभवे मा भूद् व्रतभङ्ग इति कालावधिकरणम्, अपरिमाणपक्षे तु भूयांसो दोषाः, कथम् ?, अपरिमाणमिति कोऽर्थः ?, किं यावच्छक्तिः उत अनागताद्धा आहोश्विदपरिच्छेदः ?, यदि यावच्छक्तिरस्ति, एवं सति शक्तिमितकालावध्युपगमाद-स्मन्मतानुवाद एव, आशंसादोषोऽपि काल्पनिकस्तुल्यः, अनागताद्धापक्षेऽपि भवान्तरेऽ-वश्यंभावी व्रतभङ्गः, अपरिच्छेदपक्षेऽपि कालानियमात् व्रतभङ्गादयो दोषा इति । एवं आयरिएहिं भणिए न पडिवज्जइ, ततो जेऽवि अन्नगच्छेल्लया थेरा बहुस्सुया ते पुच्छिया भणंति-एत्तियं चेव, ततो सो भणति-तुब्भे किं जाणह ?, तित्थगरेहिं एत्तियं भणियं जहाऽहं भणामि, ते भणंति-तुमं न याणसि, मा तित्थगरे आसाएहिं, जाहे न ठाइ ताहे संघसमवाओ कओ, ततो सव्वसंघेण देवयाए काउस्सग्गो कओ जा भद्दिया सा आगया भणति-संदिसहत्ति, ताहे सा भणिया–वच्च तित्थगरं पुच्छ किं जं गोट्ठामाहिलो भणति तं सच्चं किं जं दुब्बलियापूसमित्तप्पमुहो संघोत्ति, ताहे सा भणइ-मम अनुग्गहं देह काउसग्गं गमणापडिघायनिमित्तं, तओ ठिया काउस्सग्गसं, ताहे सा भगवंतं पुच्छिऊण आगया भणति-जहा संघो सम्मावादी, इयरो मिच्छावादी, निह्नओ एस सत्तमओ, ताहे सो भणति-एसा अप्पिड्ढिया वराई, का एयाए सत्ती गंतूणं ?, तोवि न सद्दहइ, ताहे संघेण वज्झो कओ, ततो सो अनालोइयपडिक्कंतो कालगतो।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गतः सप्तमो निह्नवः, भणिताश्च देशविसंवादिनो निह्नवाः, साम्प्रतमनेनैव प्रस्तावेन प्रभूतविसंवादिनो बोटिका भण्यन्ते, तत्र कदैते सञ्जाता इति प्रतिपादयन्नाह–

[भा.१४५] छव्वाससयाइं नवुत्तराइं तइया सिद्धिं गयस्स वीरस्स ।
तो बोडियाण दिट्ठी रहवीरपुरे समुप्पन्ना ॥

वृ- निगदसिद्धैव, तत्र यथा बोटिकानां दृष्टिरुत्पन्ना तथा संग्रहगाथयोपदर्शयन्नाह–

[भा.१४६] रहवीरपुरं नयरं दीवगमुज्जाण अज्जकण्हे य ।
सिवभूइस्सुवहिंमि य पुच्छा थेराण कहणा य ॥

वृ- रहवीरपुरं नगरं, तत्थ दीवगमुज्जाणं, तत्थ अज्जकण्हा नामायरिया समोसढा, तत्थ य एगो सहस्समल्लो सिवभूती नाम, तस्स भज्जा, सा तस्स मायं वड्ढेइ-तुज्झ पुत्तो दिवसे २ अड्ढरत्ते एइ, अहं जग्गामि छुहातिया अच्छामि, ताहे ताए भण्णति-मा दारं देज्जाहि, अहं जग्गामि, सा पसुत्ता, इयरा जग्गइ, अड्ढरत्ते आगओ बारं मग्गइ, ताहे ताए भण्णति-मा दारं देज्जाहि, अहं अज्ज जग्गामि, सा पसुत्ता, इयरा जग्गइ, अड्ढरत्ते अ'गओ बारं मग्गइ, मायाए अंबाडिओ-जत्थ एयाए वेलाए उग्घाडियाणि दाराणि तत्थ वच्च, सो निग्गओ, मग्गंतेण साहुपडिस्सओ उग्घाडिओ दिट्ठो, वंदित्ता भणति-पव्वावेह मं, ते नेच्छंति, सयं लोओ कओ, ताहे से लिंगं दिन्नं, ते विहरिया । पुणो आगयाणं रन्ना कंबलरयणं से दिन्नं, आयरिएण किं एएण जतीणं ?, किं गहियंति भणिऊण तस्स अनापुच्छाए फालियं निसिज्जाओ य कयाओ, ततो कसाईओ । अन्नया जिणकप्पिया वण्णिज्जंति, जहा-

जिनकप्पिया य दुविहा पाणीपाया पडिग्गहधरा य ।
पाउरणमपाउरणा एक्केक्का ते भवे दुविहा ॥१॥
दुगतिगच्छाउक्कपणगं नवदएक्कारसेव बारसगं ।
एए अट्ठ विकप्पा जिनकप्पे होंति उवहिस्स ॥२॥

केसिंचि दुविहो उवही रयहरणं पोत्तिया य, अन्नेसिं तिविहो-दो ते चेव कप्पो वड्ढिओ, चउव्विहे दो कप्पा, पंचविहे तिन्नि, नवविहे रयहरणमुहपत्तियाओ, तहा–

'पत्तं पत्ताबंधो पायट्ठवणं च पायकेसरिया ।
पडलाइं रयत्ताणं च गोच्छओपायणिज्जोगो ॥१॥'

दसविहे कप्पो वड्ढितो, एगारसविहे दो, बारसविहे तिन्नि । एत्थंतरे सिवभूइणा पुच्छिओ-किमियाणि एत्तिओ उवही धरिज्जति ?, जेण जिणकप्पो न कीरइ, गुरुणा भणियं-न तीरइसो इयाणि वोच्छिन्नो, ततो सो भणति-किं वोच्छिज्जति ?, अहं करेमि, सो चेव परलोगत्थिणा कायव्वो, किं उवहिपडिग्गहेण ?, परिग्गहसब्भावे कसायमुच्छाभयाइया बहुदोसा, अपरिग्गहत्तं च सुए भणियं, अचेला य जिणिंदा, अतो अचेलया सुंदरत्ति, गुरुणा भणिओ–देहसब्भावेऽवि कसायमुच्छाइया कस्सवि हवंति, तो देहोऽवि परिच्चइयव्वोत्ति, अपरिग्गहत्तं च सुते भणियं, धम्मोपकरणेवि मुच्छा न कायव्वत्ति, जिनावि नेगंतेण अचेला, जओ भणियं-'सव्वेवि एगदूसेण निग्गया जिनवरा इत्यादि' एवं थेरेहिं कहणा से कतत्ति गाथार्थः ॥ एवंपि पन्नविओ कम्मोदएण चीवराणि छड्डेत्ता गओ, तस्सुत्तरा भइनी, उज्जाने ठियस्स वंदिया गया, तं दट्ठूण तीएवि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चीवराणि छड्डियाणि, ताहे भिक्खं पविट्ठा, गणियाए दिट्ठा, मा अम्ह लोगो विरज्जिहित्ति उरे से पोत्ती बद्धा, ताहे सा नेच्छइ, तेन भणियं-अच्छउ एसा, तव देवयाए दिन्ना, तेन य दो सीसा पव्वाविया–कोडिन्नो कोट्टवीरे य, ततो सीसाण परंपराफासो जाआ, एवं बोडिया उप्पन्ना ॥
अमुमेवार्थमुपसंजिहीर्षुराह मूलभाष्यकारः-

[भा.१४७] ऊहाए पन्नत्तं बोडियसिवभूइउताराहि इमं ।
मिच्छादंसणमिणमो रहवीरपुरे समुप्पन्नं ॥

[भा.१४८] बोडियसिवभूईओ बोडियलिंगस्स होइ उप्पत्ती ।
कोडिण्णकोट्टवीरा परंपराफासमुप्पन्ना ॥

वृ- 'ऊहया' स्वतर्कबुद्ध्या 'प्रज्ञप्तं' प्रणीतं बोटिकशिवभूत्युत्तराभ्यामिदं मिथ्यादर्शनम्, 'इणमो'त्ति एतच्च क्षेत्रतो रथवीरपुरे समुत्पन्नमिति गाथार्थः ॥ बोटिकशिवभूतेः सकाशात् बोटिकलिङ्गस्य भवत्युत्पत्तिः, वर्तमाननिर्देशप्रयोजनं पूर्ववत्, पाठान्तरं वा 'बोडियलिंगस्स आसि उप्पत्ती' ततः कौडिन्यः कुट्टवीरश्च, 'सर्वो द्वन्द्वो विभाषया एकवद्भवती' ति कौण्डिन्य-कोट्टवीरं तस्मात्, परम्परास्पर्शम्-आचार्यशिष्यसम्बन्धलक्षणमधिकृत्योत्पन्ना–सञ्जाता, बोटिक-दृष्टिरध्याहरणीयेति गाथार्थः ॥ साम्प्रतं निह्नववक्तव्यतां निगमयन्नाह–

नि. (७८४) एवं एएकहिया ओसप्पिणीए उ निण्हया सत्त ।
वीरवरस्स पवयणे सेसाणं पव्वयणे नत्थि ॥

वृ- 'एवम्' उक्तेन प्रकारेण 'एते' अनन्तरोक्ताः 'कथिताः' प्रतिपादिताः, अवसर्पिण्यामेव निह्नवाः सप्त अमी वीरवरस्य 'प्रवचने' तीर्थे, 'शेषाणाम्' अर्हतां प्रवचने 'नत्थि' त्ति न सन्ति, यद्वा नास्ति निह्नवसत्तेति गाथार्थः ॥

नि. (७८५) मोत्तुणमेसिमिक्कं सेसाणं जावजीविया दिट्ठी ।
एक्केक्कस्स य एत्तो दो दो दोसा मुणेयव्वा ॥

वृ- मुक्त्वैषामेकं गोष्ठामाहिलं निह्नवाधमं 'शेषाणां' जमालिप्रभृतीनां प्रत्याख्यानमङ्गीकृत्य यावज्जीविका दृष्टिः, नापरिमाणं प्रत्याख्यानमिच्छन्तीति भावना, आह–प्रकरणादेवेदमवसीयते किमर्थमस्योपन्यास इति ?, उच्यते, प्रत्यहमुपयोगेन प्रत्याख्यानस्योपयोगित्वात्मा भूत् कश्चित् तथैव प्रतिपद्येत (त्तेति), अतो ज्ञाप्यते-निह्नवानामपि प्रत्याख्याने इयमेव दृष्टिः, एकैकस्य च 'एत्तो' त्ति अतोऽमीषां मध्ये द्वौ द्वौ दोषौ विज्ञातव्यौ, मुक्त्वैकमिति वर्तते, भावार्थ तु वक्ष्यामः, परस्परतो यथाऽऽहुर्बहुरता जीवप्रदेशिकान्-भवन्तः कारणद्वयान्मिथ्यादृष्टयः, यद्भणथ-एकप्रदेशो जीवः, तथा क्रियमाणं च कृतमित्येवं सर्वत्र योज्यं, गोष्ठामाहिल मधिकृत्यैकैकस्य त्रयो दोषा इति यथाहुर्बहुरतान् गोष्ठामाहिलाः-दोषत्रयाद् भवन्तो मिथ्यादृष्टयः यत् कृतं कृतमिति भणतः तथा बद्धं कर्म वेद्यते यावज्जीवं च प्रत्याख्यानमिति गाथार्थः ॥

तत्रैता दृष्टयः किं संसाराय आहोस्विदपवर्गायेत्याशङ्कानिवृत्त्यर्थमाह–

नि. (७८६) सत्तेया दिट्ठीओ जाइजरामरणगब्भवसहीणं ।
मूलं संसारस्स उ भवंति निग्गंथरूवेणं ॥

वृ- सप्तैता दृष्टयः, बोटिकास्तु मिथ्यादृष्टय एवेति न तद्विचारः, 'जातिजरामरणगर्भ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वसतीना'मिति, जातिग–गहणान्नारकादिप्रसूतिग्रह इत्यतो गर्भवसतिग्रहणमदुष्टं 'मूलं' कारणं, भवन्तीति योगः, मा भूत् सकृद्भाविनीनां जाति-जरामरणगर्भवसतीनां मूलमिति प्रत्ययः अत आह– 'संसारस्स उ' संसरणं संसारः-तिर्यग्नरनारकामरभवानुभूतरूपः प्रदीर्घो गृह्यते, तस्यैव तुशब्दस्यावधारणार्थत्वात्, निर्ग्रन्थरूपेणेति गाथार्थः।। आह-एते निह्नवाः किं साधवः ? उत तीर्थान्तरीयाः ? उत गृहस्था इति ?, उच्यते, न साधवः, यस्मात् साधूनामेकस्याप्यर्थाय कृतमशनादि शेषाणामकल्प्यं, नैवं निह्नवानामिति, आह च–

नि. (७८७) पवयणनीहूयाणं जं तेसिं कारियं जहिं जत्थ ।
भज्जं परिहरणाए मूले तह उत्तरगुणे य ।।

वृ- 'पवयणनीहूयाणं' ति निहूयंति देशीवचनमकिञ्चित्करार्थे, ततश्च प्रवचनं-यथोक्तं क्रियाकलापं प्रत्यकिञ्चित्कराणां 'यद्' अशनादि तेषां कारितं यस्मिन् काले यत्र क्षेत्रे तद् 'भाज्यं' विकल्पनीयं परिहरणया, कदाचित् परिह्रियते कदाचिन्नेति, यदि लोको न जानाति यथैते निह्नवाः साधुभ्यो भिन्नास्तदा परिह्रियते, अथ च जानाति तदा न परिह्रियत इति, अथवा परिहरणा-परिभोगोऽभिधीयते, यत उक्तम्–"धारणा उवभोगो परिहरणा तस्स परिभोगो" तत्र भाज्यं 'मूले' मुलगुणविषयमाधाकर्मादि तथा उत्तरगुणविषयं च क्रीतकृतादीत्यतो नैते साधवः, नापि गृहस्था गृहीतलिङ्गत्वात्; नापि तीर्थान्तरीयाः, नान्यतीर्थ्याः, यतस्तदर्थाय यत् कृतं तत् कल्प्यमेव भवति, अतोऽव्यक्ता एत त गाथार्थः ।। आह–बोटिकानां यत् कारितं तत्र का वार्ता ?, उच्यते–

नि. (७८८) मिच्छादिट्ठीयाणं जं तेसिं कारियं जहि जत्थ ।
सव्वंपि तयं सुद्धं मूले तह उत्तरगुणे य ।।

वृ- 'मिथ्यादृष्टिनां बोटिकानां 'यद् अशनादि तेषां कारितं यस्मिन् काले यत्र क्षेत्रे सर्वमपि तत् शुद्धः कल्प्यमिति भावना, मूलगुण विषयं तथोत्तरगुणविषयं चेति गाथार्थः ।। उक्तं समवतारद्वारम्, अधुनाऽनुमतद्वारं व्याख्याते-तत्र यद्यस्य नयस्य सामायिक मोक्षमार्गत्वेनानुमतं तदुपदर्शयन्नाह-

नि. (७८९) तवसंजमो अनुमओ निग्गंथं पवयणं च ववहारो ।
सद्दुज्जुसुयाणं पुन निव्वाणं संजमो चेव ।।

वृ- तापयतीति तपः तपःप्रधानः संयमस्तपः संयमः असौ 'अनुमतः' अभीष्टो मोक्षाङ्गतयेति, निर्ग्रन्थानामिदं नैर्ग्रन्थ्यम्-आर्हतमिति भावना, किं ?-प्रवचनं श्रुतमित्यर्थः, चशब्दोऽनुक्तसम्यक्त्वसामायिकसमुच्चयार्थः, 'ववाहारो'त्ति एवं व्यवहारो व्यवस्थितः, व्यवहारग्रहणाच्च तदधोवर्तिनैगमसंग्रहनयद्वयमपि गृहीतं वेदितवयं, ततश्चैतदुक्तं भवति– नैगमसंग्रहव्यवहारास्त्रिविधमपि सामायिकं मोक्षमार्गताऽनुमन्यन्ते, तपः संयमग्रहणाच्चारित्र सामायिकं, प्रवचनतग्रहणाद् श्रुतसामायिकं, चशब्दात् सम्यक्त्वसामायिकम्, आह-यद्येवं किमिति मिथ्यादृष्टयः ?, उच्यते, यतो व्यस्तान्यप्यनुमन्यन्ते, न सापेक्षाण्येव, शब्दऋजुसूत्रयोः पुनः कारणे कार्योपचारात् निर्वाणमार्ग एव निर्वाणं संयम एवेत्यनुमतम्, ऋजुसूत्रमुल्लङ्घ्यादौ शब्दोपन्यासः शेषोपरितननयानुमतसंग्रहार्थः, एतदुक्तं भवति-ऋजुसूत्रादयः सर्वे चारित्र-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सामायिकमेव मोक्षमार्गत्वेनानुमन्यन्ते, नेतरे द्वे, तद्भावेऽपि मोक्षाभावात्, तथाहि-समग्रज्ञान-दर्शनलाभेऽपि नानन्तरमेव मोक्षः, किन्तु सर्वसंवररूपचारित्रावाप्त्यनन्तरमेव, अतस्तद्भाव-भावित्वात् तदेव मोक्षमार्ग इति गाथार्थः ।। 'उद्देसे निद्देसे य' इत्याद्युपोद्घात-निर्युक्तिप्रथमद्वार-गाथावयवार्थो गतः, इदानीं द्वितीयद्वारगाथाप्रथमवयवः किमिति द्वारं व्याख्यायते-किं सामायिकं ?, किं तावज्जीवः ? उताजीवः ? अथोभयम् ? उतानुभयं ?, जीवाजीवत्वेऽपि किं द्रव्यं ? उत गुण इत्याशङ्कासम्भवे सत्याह–

नि. (७९०) आया खलु सामइयं पच्चक्खायंतओ हवइ आया ।
तं खलु पच्चक्खाणं आवाए सव्वदव्वाणं ।।

वृ- 'आत्मा' जीवः खलुशब्दोवधारणे, आत्मैव–जीव एव सामायिकमित्य जीवादि-पूर्वोक्त-विकल्पव्यवच्छेदः, 'पच्चक्खायंतओ हवइ आय' त्ति स च प्रत्याचक्षाणः-प्रत्याख्यानं कुर्वन् 'क्रियमाणं कृत' मिति क्रियाकालनिष्ठाकालयोरभेदाद् वर्तमानस्यैवातीतापत्तेः कृतप्रत्या-ख्यानोऽपि गृह्यते, स एव च परमार्थत आत्मा, श्रद्धानज्ञानसावद्यनिवृत्तिस्व-स्वभावावस्थि-तत्वात्, शेषः संसारी पुनरात्मैव न भवति, प्रचरघातिकर्मभिस्तस्य स्वाभाविक-गुणतिरस्करणात्, अतो द्वितीयाऽऽत्मग्रहणं, 'तं खलु पच्चक्खाणं' ति खलुशब्दः सामायिकस्य जीवपरिण-तित्वज्ञापनार्थः, तत् प्रत्याख्यानं जीवपरिणतिरूपत्वाद्विषयमधिकृत्य 'आवाए सव्वदव्वाणं' ति सर्वद्रव्याणामापाते-आभिमुख्येन समवाये, निष्पद्यत इति वाक्यशेषः, तस्य श्रद्धेयज्ञयक्रियो-पयोगित्वात् सर्वद्रव्याणामिति । आह–किं सामायिकमिति स्वरूपप्रश्ने प्रस्तुते सति-विषय-निरूपणमस्यान्याय्यम्, अप्रस्तुतत्वाद्, बाह्यशास्त्रवत्, उच्यते, अप्रस्तुतत्वा-दित्यसिद्धं, तथाहि-सामायिकस्य विषयनिरूपेणं प्रस्तुतमेव, सामायिकस्याङ्गभूतत्वात्, सामायिकस्वात्मवदित्यलं विस्तरेण, इति गाथार्थः ।। तत्र यदुक्तम् 'आत्मा खलु सामायिक' मिति, तत्र यथाभूतोऽसौ सामायिकं तथाभूतमभिधित्सुराह मूलभाष्यकारः–

[भा.१४९] सावज्जजोगविरओ तिगुत्तो छसु संजओ ।
उवउत्तो जयमाणो आया सामाइयं होई ।।

वृ- सावद्ययोगविरतः अवद्यं मिथ्यात्वकषायनोकषायलक्षणं सहावद्येन सावद्यो योगस्तद्विरतः-तद्विनिवृत्तः, त्रिभिः-मनोवाक्कायैर्गुप्तः षट्सु-जीवनिकायेषु संयतः-प्रयत्नवान्, तथाऽवश्यं-कर्तव्येषु योगेषु सदोपयुक्तः, यतमानश्च तेष्वेवासेवनया, इत्थम्भूत एवात्मा सामायिकं भवतीति गाथार्थः ।। साम्प्रतं यदुक्तम् 'तं खलु पच्चक्खाणं आवाए सव्वदव्वाणं'ति, तत्र साक्षान्यमहाव्रतरूपं चारित्रसामायिकमधिकृत्य सर्वद्रव्यविषयतामप्योपदर्शयन्नाह–

नि. (७९१) पढमंमि सव्वजीवा बिरूइ चरिमे य सव्वदव्वाइं ।
सेसा महव्वया खलु तदेक्कदेसेण दव्वाणं ।।

वृ- 'प्रथमे' प्राणातिपातनिवृत्तिरूपे व्रते विषयद्वारेण चिन्त्यमाने 'सर्वजीवाः' त्रसस्थावर-सूक्ष्मेतरभेदा विषयत्वेन द्रष्टव्याः, तदनुपालनरूपत्वात् तस्येति, तथा 'द्वितीये' मृषावाद-निवृत्तिरूपे 'चरिमे च' परिग्रहनिवृत्तिरूपे सर्वद्रव्याणि विषयत्वेन द्रष्टव्यानि, कथम् ?, नास्ति पञ्चास्तिकायात्मको लोक इति मृषावादस्य सर्वद्रव्यविषयत्वात्, तन्निवृत्तिरूपत्वाच्च द्वितीयव्रतस्य,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा मूर्च्छाद्वारेण परिग्रहस्यापि सर्वद्रव्यविषयत्वाच्चरमव्रतस्य च तन्निवृत्तिरूपत्वादशेष-द्रव्यविषयतेति पूर्वार्द्धभावना । 'सेसा महव्वया खलु तदेक्कदेसेण दव्वाणं' ति शेषाणि महाव्रतानि, खल्वित्यवधारणार्थः, तस्य च व्यवहितः सम्बन्धः, तेषामेकदेशस्तदेकदेशस्तेन तदेकदेशेनैव हेतुभूतेन द्रव्याणां, भवन्तीति क्रियाध्याहारः, कथम् ?-तृतीयस्य ग्रहणधारणीयद्रव्यादत्ता-दानविरतिरूपत्वात्, चतुर्थस्य च रूपरूपसहगतद्रव्यसम्बन्ध्यब्रह्मविरतिरूपत्वात्, षष्ठस्य च रात्रिभाजनविरतिरूपत्वादिति पश्चार्द्धभावना, इति गाथार्थः ॥ एवं चारित्रसामायिकं निवृत्तिद्वारेण सर्वद्रव्यविषयं श्रुतसामायिकमपि श्रुतज्ञाननात्मकत्वात् सर्वद्रव्यविषयमेव सम्यक्त्वसामायिकमपि सर्वद्रव्याणां सगुणपर्यायाणां श्रद्धानरूपत्वात् सर्वविषयमेवेत्यलं प्रसङ्गेन, प्रकृतं प्रस्तुमः-तत्र सामायिकजीवादिव्युदासेन जीव एवेत्युक्तं, तस्य च नयमतभेदेन द्रव्यगुणप्राप्तौ सकलनयधार-द्रव्यार्थिकपर्यायार्थिकाभ्यां स्वरूपव्यवस्थोपस्थापनायाह–

नि. (७९२) जीवो गुणपडिवन्नो नयस्स दव्वट्ठियस्स सामइयं ।
सो चेव पज्जवणयट्ठियस्स जीवस्स एस गुणो ॥

वृ- 'जीवः' आत्मा, गुणैः प्रतिपन्नः-आश्रितः-गुणप्रतिपन्नः, गुणाश्च सम्यक्त्वादयः खल्वौ-पचारिकाः, 'नयस्य' द्रव्यार्थिकस्य सामायिकमिति वस्तुत आत्मैव सामायिकं, गुणास्तु तद्व्य-तिरेकेणानवगम्यमानत्वान्न सन्त्येव, तत्प्रतिपत्तिरपि तस्य भ्रान्ता, चित्रे निम्नोन्नत-भेदप्रति-पत्तिवदिति भावना, स एव सामायिकादिर्गुणः पर्यायार्थिकनयस्य, परमार्थतो यस्याज्जीवस्य एष गुण इति, उत्तरपदप्रधानत्वात् तत्पुरुषस्य, यथा तैलस्य धारेति, न तत्र धाराऽतिरेकेणापरं तैलमस्ति, एवं न गुणातिरिक्तो जीव इति, इत्थं चेदमङ्गीकर्तव्यमिति मन्यते, तथाहि-गुणातिरिक्तो जीवो नास्ति, प्रमाणानुपलब्धेः, रूपाद्यर्थान्तररूपघटवत्, तस्माद्गुणः सामायिकमिति हृदयं, न तु जीव इति गाथार्थः ॥ साम्प्रतं पर्यायार्थिक एव स्वं पक्षं समर्थयन्नाह–

नि. (७९३) उप्पज्जंति वयंति य परिणम्मंति य गुणा न दव्वाइं ।
दव्वप्पभवा य गुणा न गुणप्पभवाइं दव्वाइं ॥

वृ- उत्पद्यन्ते व्ययन्ते च, अनेनोत्पादव्ययरूपेण परिणमन्ति च गुणाः, चशब्द एवकारार्थः स चावधारणे, तस्य चैवं प्रयोगः-गुणा एव न द्रव्याण्युत्पादव्ययरूपेण परिणमन्तीति, अतस्त एव सन्ति, उत्पादव्ययपरिणामत्वात्, पत्रनीलतारक्ततादिवत्, तदतिरिक्तस्तु गुणी नास्त्येव, उत्पादव्ययपरिणामरहितत्वाद्, वान्ध्येयादिवत्, किञ्च 'दव्वप्पभवा य गुणा न' द्रव्यात् प्रभवो येषां ते द्रव्यप्रभवाः, चशब्दो युक्त्यन्तरसमुच्चये, गुणा न भवन्ति, तथा गुणप्रभवाणि द्रव्याणि, नैवेति वर्तत्ते, अतो न कारणत्वं नापि कार्यत्वं द्रव्याणामित्यभावः, सतः कार्यकारणरूपत्वात्, अथवा द्रव्यप्रभवाश्च गुणा न, किन्तु गुणप्रभवाणि द्रव्याणि, प्रतीत्यसमुत्पादोपजातगुणसमुदये द्रव्योपचरात्, तस्माद् गुणः सामायिकमिति गाथार्थः ॥ एवं पर्यायार्थिकेन स्वमते प्रतिपादिते सति द्रव्यार्थिक आह–द्रव्यं प्रधानं न गुणाः यस्मात्–

नि. (७९४) जं जं जे जे भावे परिणमइ पओगवीससा दव्वं ।
तं तह जाणाइ जिनो अपज्जवे जाणणा नत्थि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यद् यद् यान् यान् भावान् विज्ञानघटादीन् परिणमति प्रयोगविस्त्रसातो द्रव्यं तत्, प्रयोगेन घटादीन् विश्रसातोऽभ्रेन्द्रधनुरादीन्, द्रव्यमेव तदुत्प्रेक्षितपर्यायमुत्फणविफण-कुण्डलितादिपर्यायसमन्वितसर्पद्रव्यवत्, तथाहि-न तत्र केचनोत्फणादयः सर्पद्रव्यातिरिक्ताः सन्ति, निर्मूलत्वात्, किन्तु तदेव तत्र परमार्थसदिति, किञ्च-तत् 'तथैव' अन्वयप्रधानं पर्यायोपसर्जनं जानाति परिच्छिनत्ति जिनः 'अपज्जवे जाणणा नत्थि' त्ति अपर्यायि-निराकारे 'जाणणा नत्थि'त्ति परिज्ञा नास्ति, न च ते पर्यायाः तत्र वस्तुनि सन्तो द्रव्यमेव, तदाकारवत्, ततश्च तदेव सत्; केवलिनाऽप्यवगम्यमानत्वात्, केवलस्वात्मवत्, तस्माज्जीव एव सामायिकमिति गाथार्थः ॥ अथवा 'उप्पज्जंति' त्ति इयमेव गाथा द्रव्यार्थिकमतेन व्याख्यायते-द्रव्यार्थिकवादी पर्यायार्थिकवादिनं प्रत्याह–गुणा न सन्त्येव, कुतो ?, यस्मादुत्पद्यन्ते व्ययन्ते च, अनेनोत्पादव्यय-परिणामेन परिणमन्ति गुणा एव, न द्रव्याणि, ततश्च तान्येव सन्ति, सततमवस्थितत्वाद्, अपरोपादेयत्वात्, द्रव्यप्रभवाश्च गुणाः परोपादाना वर्त्तन्ते, न गुणप्रभवाणि द्रव्याण्यपरोपा-दानत्वात्, तस्मादात्मैव सामायिकमिति गाथार्थः ॥ एवमवगतोभयनयमतश्चोदक आह-किमत्र तत्त्वमिति ?, अत्रोच्यते-सामायिकभावपरिणतः आत्मा सामायिकं, यस्माद् यत् सत् तद् द्रव्यपर्यायोभयरूपमिति, तथा चागमः–

नि. (७९५) जं जं जे जे भावे परिणमइ पओगवीससा दव्वं ।
तं तह जाणाइ जिनो अपज्जवे जाणणा नत्थि ॥

वृ- यद् यद् यान् यान् 'भावान्' आध्यात्मिकान् बाह्यांश्च परिणमति प्रयोगविस्त्रसा द्रव्यं, भावार्थः पूर्ववत्, तत्तथापरिणाममेव जानाति जिनः, अपर्यायि परिज्ञा नास्ति, तस्मादुभयात्मकं वस्तु, केवलिना तथाऽवगतत्वादिति गाथार्थः ॥ साम्प्रतं कतिविधमिति द्वारमिति व्याख्यायते,

नि. (७९६) सामाइयं च तिविहं सम्मत्त सुयं तहा चरित्तं च ।
दुविहं चेव चरित्तं अगारमनगारियं चेव ॥

वृ- 'सामायिकं' प्राग्निरूपितशब्दार्थः, 'चः' पूरणे 'त्रिविधं' त्रिभेदं, सम्यक्त्वम्, अनुस्वार-लोपात्, श्रुतं तथा चारित्रं, चशब्दः स्वगतानेकभेदप्रदर्शनार्थः, तत्र सम्यक्त्वमिति सम्यक्त्व-सामायिकं, तद् द्विविधं-नैसर्गिकमधिगमजं च, अथवा दशविधम्-एकैकस्यौ-पशमिकसा-स्वादनक्षायोपशमिकवेदकक्षायिकभेदभिन्नत्वात्, अथवा त्रिविधं-क्षायिकं क्षायोप-शमिकमौप-शमिकं च, कारकरोचकव्यञ्जकभेदं वा, श्रुतमिति श्रुतसामायिकं, तच्च सूत्रार्थो-भयात्मकत्वात् त्रिविधम्, अक्षरानक्षरादिभेदादनेविधं चेति, 'चारित्रम्' इति चारित्रसामायिकं, तच्च क्षायिकादि त्रिविधं, सामायिकच्छेदोपस्थाप्यपरिहारविशुद्धिकसूक्ष्मसम्परायययथाख्यातभेदेन वा पञ्चविधम्, अथवा गृहीताशेषविकल्पं द्विविधम्–अगारसामायिकमनगारसामायिकं च, तथा चाह–'दुविधं चेव चरित्तं अगारमनगारियं चेव' द्विविधमेव चारित्रं मूलभेदेन, अगाः– वृक्षास्तैः कृतमगारं-गृहं तदस्यास्तीति मतुबलोपादगारः-गृहस्थस्तस्ये दम्–आगारिकम्, इदं चानेकभेदं, देशविरतेश्चित्र-रूपत्वात्, अनगारः-साधुस्तस्येदम्-आनगारिकं चैव । आह- सम्यक्त्वश्रुतसामायिके विहाय चारित्रसामायिकभेदस्य साक्षादभिधानं किमर्थम् ?, उच्यते, अस्मिन् सति तयोर्नियमेन भाव इति ज्ञापनार्थं, चरमत्वाद्वा यथाऽस्य भेद उक्त एवं शेषयोरपि वाच्य इति ज्ञापनार्थमिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गाथार्थः ॥ साम्प्रतं मूलभाष्यकारः श्रुतसामायिकं व्याचिख्या-सुस्तस्याध्ययनरूपत्वादाह–

[भा.१५०] अज्झयणंपि य तिविहं सुत्ते अत्थे य तदुभए चेव ।
सेसेसुवि अज्झयणेसु होइ एसेव निज्जुत्ती ॥

वृ- अध्ययनमपि च त्रिविधं सूत्रविषयमर्थविषयं च तदुभयविषयं चैव, अपिशब्दात् सम्यक्त्वसामायिकमप्यौपशमिकादिभेदात् त्रिविधमिति । प्रक्रान्तोपोद्घात निर्युक्तेरशेषाध्ययनव्यापितां दर्शयन्नाह-'शेषेष्वपि' चतुर्विंशतिस्थ्वादिष्वन्येषु वाऽध्ययनेषु भवति एषैव निर्युक्तिः– उद्देशनिर्देशादिका निरुक्तिपर्यवसानेति । आह- अशेषद्वारपरिसमाप्तावति-देशोन्याय्यः, अपान्तराले किमर्थमिति ?, उच्यते, 'मध्यग्रहणे आद्यन्तयोर्ग्रहणं भवती' ति न्यायप्रदर्शनार्थ इति गाथार्थः ॥ अधुना कस्येति द्वारं प्रतिपाद्यते, तत्र यस्य तद् भवति तदभिधित्सयाऽऽह–

नि. (७९७) जस्स सामानिओ अप्पा, संजमे नियमे तवे ।
तस्स सामाइयं होइ, इह केवलिभासियं ॥

वृ- यस्य 'सामानिकः' सन्निहितः, अप्रवसित इत्यर्थः, 'आत्मा' जीवः, क्व?-'संयमे' मूलगुणेषु 'नियमे' उत्तरगुणेषु 'तपसि' अनशनादिलक्षणे 'तस्य' एवम्भूतस्याप्रमादिनः सामायिकं भवति, 'इति' एवं केवलिभिर्भाषितमिति गाथार्थः ॥

नि. (७९८) जो समो सव्वभूएसु, तसेसु थावरेसु य ।
तस्स सामाइयं होइ, इइ केवलिभासियं ॥

वृ- यः 'समः' मध्यस्थः, आत्मानमिव परं पश्यतीत्यर्थः, 'सर्वभूतेषु' सर्वप्राणिषु 'त्रसेषु' द्वीन्द्रियादिषु 'स्थावरेषु च' पृथिव्यादिषु, तस्य सामायिकं भवति, एतावत् केवलिभाषितमिति गाथार्थः ॥ साम्प्रतं फलप्रदर्शनद्वारेणस्य करणविधानं प्रतिपादयन्नाह–

नि. (७९९) सावज्जजोगप्परिवज्जणट्ठा, सामाइयं केवलियं पसत्थं ।
गिहत्थधम्मा परमंति नच्चा, कुज्जा बुहो आयहियं परत्थं ॥

वृ- सावद्ययोगपरिवर्जनार्थं सामायिकं 'कैवलिकं' परिपूर्णं 'प्रशस्तं' पवित्रम्, एतदेव हि गृहस्थधर्मात् 'परमं' प्रधानम् 'इति' एवं ज्ञात्वा कुर्याद् 'बुधः' विद्वान् 'आत्महितम्' आत्मोपकारकं 'परार्थम्' इति परः-मोक्षस्तदर्थं, न तु सुरलोकाद्यवाप्तयर्थम्, अनेन निदानपरिहारमाह, इति वृत्तार्थः ॥ परिपूर्णसामायिककरणशक्त्यभावे गृहस्थोऽपि गृहस्थसामायिकं 'करेमि भंते ! सामाइयं सावज्जं जोगं पच्चक्खामि दुविहं तिविहेणं जाव नियमं पज्जुवासामी' त्येवं कुर्यात्, आह–तस्य सर्वं त्रिविधं त्रिविधेन प्रत्याचक्षाणस्य को दोष इति ?, उच्यते, प्रवृत्तकर्मारम्भानुमत्यनिवृत्त्या करणासम्भव एव, तथा भङ्गप्रसङ्गदोषश्चेति । आह च–

नि. (८००) सव्वंति भाणिऊणं विरई खलु जस्स सव्विया नत्थि ।
सो सव्वविरइवाई चुक्कइ देसं च सव्वं च ॥

वृ- 'सव्वं' ति उपलक्षणात् सर्वं सावद्य योगं प्रत्याख्यामि त्रिविधं त्रिविधेन, इत्येवं 'भाणिऊण' अभिधाय 'विरतिः' निवृत्तिः खलु यस्य 'सर्विका' सर्वा नास्ति, प्रवृत्तकर्मारम्भानुमतिसद्भावात्, स सर्वविरतिवादी 'चुक्कइ' त्ति भ्रश्यति 'देसं च सव्वं चे' ति देशविरतिं सर्वविरति च, प्रतिज्ञाताकरणात् । आह–आगमे त्रिविधं त्रिविधेनेति गृहस्थ-प्रत्याख्यानमुक्तं तत्कथमिति?,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उच्यते, स्थूलसावद्ययोगविषयमेव तत्, आह च भाष्यकारः-

"जति किंचिदप्पजोयणमपप्पं वा विसेसिउं वत्थुं ।
पच्चक्खेज्ज न दोसो संयभुरमणादिमच्छव्व ॥१॥
जो वा निक्खमिउमणो पडिमं पुत्तादिसंतइणिमित्तं ।
पडिवज्जिज्ज तओ वा करिज्ज तिविहंपि तिविहेणं ॥२॥
जो पुन पुव्वारद्धाणुज्झियसावज्जकम्मसंताणो ।
तदनुमतिपरिणति सो न तरति सहसा णियत्तेउं ॥३॥

इत्यादि" तथाऽपि गृहस्थसामायिकापि परलोकार्थिना कार्यमेव, तस्यापि विशिष्टफल-साधकत्वाद्, आह च निर्युक्तिकारः-

नि. (८०१) सामाइयंमि उ कए समणो इव सावओ हवइ जम्हा ।
एएण कारणेणं बहुसो सामाइयं कुज्जा ॥

वृ- सामायिक एव कृते सति श्रमण इव श्रावको भवति, यस्मात् प्रायोऽशुभयोगरहितत्वात् कर्मवेदक इत्यर्थः, अनेन कारणेन 'बहुशः' अनेकधा सामायिकं कुर्यादिति गाथार्थः ॥ किञ्च

नि. (८०२) जीवो पमायबहुलो बहुसोऽवि अ बहुविहेसु अत्थेसुं ।
एएण कारणेणं बहुसो सामाइयं कुज्जा ॥

वृ- जीवः प्रमादबहुलः 'बहुशः' अनेकधाऽपि च बहुविधेष्वर्थेषु-शब्दादिषु प्रमादवांश्चै-कान्तेनाशुभबन्धक एव, अतोऽनेन कारणेन तत्परिजिहीर्षया बहुशः सामायिकं कुर्यात्-मध्यस्थो भूयादिति गाथार्थः ॥ साम्प्रतं सङ्क्षेपेण सामायिकवतो मध्यस्थस्य लक्षणमभिधित्सुराह-

नि. (८०३) जो नवि वट्टइ रागे नवि दोसे दोण्ह मज्झयारंभि ।
सो होइ उ मज्झत्थो सेसा सव्वे अमज्झत्था ॥

वृ- यो नापि वर्तते रागे नापि द्वेषे, किं तर्हि ?-'दोण्ह मज्झयारंमि' द्वयोर्मध्य इत्यर्थः, स भवति मध्यस्थः, शेषाः सर्वेऽमध्यस्था इति गाथार्थः ॥ साम्प्रतं क्व किं सामायिकमिति निरूपयन् द्वारगाथात्रयमाह-

नि. (८०४) खेत्तदिसाकालगइ भवियसण्णिऊसा सदिट्ठिमाहारे ।
पज्जत्तसुत्तजम्मट्ठितिवेयसण्णाकसाया ऊ ॥

नि. (८०५) नाणे जोगुवओगे सरीरसंठाणसंघयणमाणे ।
लैसा परिणामे वेयणा समुग्घाय कम्मे य ॥

नि. (८०६) निव्वेढणमुव्वट्टे आसवकरणे तहा अलंकारे ।
सयनासनठाणत्थे चंकम्मंते य किं कहियं ॥

वृ- आसां समुदायार्थः क्षेत्रदिक्कालगतिभव्यसंज्ञिउच्छ्वासदृष्ट्याहारकानङ्गीकृत्याऽऽ-लोचनीयं, किं क्वसामायिकमिति योगः, तथा पर्याप्तसुप्तजन्मस्थितिवेदसंज्ञाकषायायूषि चेति, तथा ज्ञानं योगोपयोगौ शरीरसंस्थानसंहननमानानि लेश्याः परिणामं वेदनां समुद्घातं कर्म च क्रिया पूर्ववत्, तथा निर्वेष्टनोद्वर्त्तने अङ्गीकृत्यालोचनीयं-क्वकिमिति ? आश्रवकरणं तथाऽलङ्कारं तथा शयनासनस्थानस्थानधिकृत्येति, तथा चङ्क्रमतश्च विषयीकृत्य किं सामायिकं क्व

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यालोचनीयमिति समुदायार्थः । अवयवार्थं तु प्रतिद्वारं स्वयमेव वक्ष्यति-तत्रोर्ध्वलोकादिक्षेत्र-मङ्गीकृत्य सम्यक्त्वादिसामायिकानां लाभादिभावमभिधित्सुराह–

नि. (८०७) संमसुआणं लंभो उड्ढं च अहे अ तिरिअलोए अ ।
विरई मनुस्सलोए विरयाविरई तिरिएसुं ॥

वृ- सम्यक्त्वश्रुतसामायिकयोः 'लाभः' प्राप्तिः 'उड्ढं च' इत्यूर्ध्वलोके च 'अधे य' त्ति अधोलोके च तिर्यग्लोके च, इयमत्र भावना-ऊर्ध्वलोके मेरुसुरलोकादिषु ये सम्यक्त्वं प्रतिपद्यन्ते जीवास्तेषां श्रुताज्ञानमपि तदैव सम्यक्श्रुतं भवतीति, एमधोलोकेऽपि महाविदेहाधोलौकिकग्रामेषु नरकेषु च ये प्रतिपद्यन्ते, एवं तिर्यग्लोकेऽपीति, 'विरईं मनुस्सलोगे' त्ति विरतिशब्देन सर्वविरति-सामायिकं गृह्यते, तच्च लाभापेक्षया मनुष्यलोक एव भवति, नान्यत्र, मनुष्या एवास्य प्रतिपत्तार इति भावना, क्षेत्रनियमं तु विशिष्टश्रुतविदो विदन्ति, 'विराविरई य तिरिएसुं' ति विरताविरतिश्च देशविरतिसामायिकलक्षणा लाभविचारे तिर्यक्षु भवति, मनुष्येषु च केषुचित् ।

नि. (८०८) पुव्वपडिवन्नगा पुण तीसुवि लोएसु निअमओ तिण्हं ।
चरणस्स दोसु निअमा भयणिज्ञा उड्ढलोगंमि ॥

वृ- पूर्वप्रतिपन्नकास्तु त्रयाणां नियमेन त्रिष्वपि लोकेषु विद्यन्ते, चारित्रसामायिकं त्वधोलोकतिर्यग्लोकयोरेव, ऊर्ध्वलोके तु भाज्या इत्यलं प्रसङ्गेनेति गाथार्थः ॥

साम्प्रतं दिग्द्वारा-वयवार्थाभिधित्सया दिक्स्वरूप-प्रतिपादनायाह–

नि. (८०९) नामं ठवणा दविए खेत्तदिसा तावखेत्त पन्नवए ।
सत्तमिया भावदिसा सा होअट्ठारसविहा उ ॥

वृ- नामस्थापने सुगमे 'दविए' त्ति द्रव्यविषया दिक् द्रव्यदिक्, सा च जघन्यतस्त्रयोदश-प्रदेशिकं दशदिक्प्रभवं द्रव्यं, तत्रैकैकः प्रदेशो विदिक्ष्वेते चत्वारः, मध्ये त्वेक इत्येते पञ्च, चतसृषु च दिक्ष्वायतावस्थितौ द्वौ द्वाविति, आह च भाष्यकारः–

'तेरसपदेसियं खलु तावतिएसुं भवे पदेसेसुं ।
जं दव्वं ओगाढं जहन्नगं तं दसदिसागं ॥'

उत्कृष्टतस्त्वनन्तप्रदेशिकमिति, 'खेत्तदिस' त्ति क्षेत्रदिक्, सा चानेकभेदा मेरुमध्याष्ट-प्रादेशिकरुचकाद् बहिर्द्व्यादिद्व्युत्तरश्रेण्या शकटोर्द्धिसंस्थानाश्चतस्रो दिशः, चतसृणामङ्गप्यन्त-राल-कोणावस्थिता एक-प्रदेशिकारिछन्नावलिसंस्थानाश्चतस्त्र एव विदिशः ऊर्ध्वं चतुःप्रदेशिक चतुरस्त्रदण्डसंस्थाना एकैव, अधोऽप्येवंप्रकारा द्वितीयेति, उक्तं च–

'अट्ठपदेसो रुयगो तिरियं लोगस्स मज्झयारंमि ।
एस पभवो दिसाणं एसेव भवेऽनुदिसाणं ॥
दुपदेसादिदुरुत्तर एगपदेसा अनुत्तरा चेव ।
चउरो चउरो य दिसा चउरादि अनुत्तरा दोन्नि ॥
सगड्ढिसंठिताओ महादिसाओ भवंति चत्तारि ।
मुत्तावली य चउरो दो चेव य होंति रुयगनिभा ॥

आसां च नामानि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'इंदग्गेई जम्मा य नेरती वारुणी य वायव्वा ।
सोमा ईसानऽवि य विमला य तमा य बोद्धव्वा ॥१॥
इंदा विजयद्वारानुसारतो सेसिया पदक्खिणतो ।
अट्ठवि तिरियदिसाओ उड्ढं विमला तमा चाधो ॥२॥

'तावखेत्त' त्ति, तापः-सविता तदुपलक्षिता क्षेत्रदिक् तापक्षेत्रदिक्, सा चानियता–

'जे सिं जत्तो सूरोउदेति तेसिं तईं हवइ पुव्वा ।
तावक्खेत्तदिसाओ पदाहिणं सेसियाओसिं ॥१॥'

'पन्नवए' त्ति प्रज्ञापकस्य दिक् प्रज्ञापकदिक्–

"पन्नवओ जदभिमुहो सा पुव्वा सेसिया पदाहिनतो ।
तस्सेवनुगंतव्वा अग्गेयादी दिसा नियमा ॥१॥'

सप्तमी भावदिक् सा भवत्यष्टादशविधैव, दिश्यते अयममुक इति संसारी यया सा भावदिक्, सा चेत्थं भवत्यष्टादशविधा–

'पुढविजलजलण वाया मूला खंधग्गपोरबीया य ।
बितिचउपंचेंदिय तिरियनारगा देवसंधाया ॥१॥
संमुच्छिमकंमाकम्मभूमगणरा तहऽन्तरद्दीवा ।
भावदिसा दिस्सइ जं संसारी नियमेताहिं ॥२॥'

ति गाथार्थः ॥ इह च नामस्थापनाद्रव्यदिग्भिरनधिकार एव, शेषासु यथासम्भवं सामायिकस्य प्रतिपद्यमानकः पूर्वप्रतिपन्नो वा वाच्यः, तत्र क्षेत्रदिशोऽधिकृत्य तावदाह–

नि. (८१०) पुव्वाईआसु महादिसासु पडिवज्जमाणओ होइ ।
पुव्वपडिवन्नओ पुण अन्नयरीए दिसाए उ ॥

वृ- पूर्वाद्यासु महादिक्षु विवक्षिते काले सर्वेषां सामायिकानां प्रतिपद्यमानको भवति, न तु विदिक्षु, तास्वेकप्रदेशिकत्वेन जीवावगाहनाभावात्, आह च भाष्यकारः–

"छिण्णावलिरुयगागिइदिसासु सामाइयं न जं तासु ।
सुद्धासु नावगाहइ जीवो ताओ पुं फुसेज्जा ॥१॥"

पूर्वप्रतिपन्नकः पुनरन्यतरस्यां दिशि भवत्येव, पुनः शब्दस्यैवकारार्थत्वादिति गाथार्थः ॥ तापक्षेत्रप्रज्ञापकदिक्षु पुनरष्टसु चतुर्णामपि सामायिकानां पूर्वप्रतिपन्नोऽस्ति, प्रतिपद्यमानकश्च सम्भवति, अधऊर्ध्वदिग्द्वये तु सम्यक्त्वाश्रुतसामायिकयोरेवमेव, देशविरतिसर्वविरति-सामायिकयोस्तु पूर्वप्रतिपन्नकः सम्भवति, प्रतिपद्यामानकस्तु नैवेति, उक्तं च–

"अट्ठसु चउण्ह नियमा पुव्वपवण्णो उ दोसु दोण्हेव ।
दोण्ह तु पुव्वपवण्णो सिय नन्नो तावपन्नवए ॥१॥"

भावदिक्षु पुनरेकेन्द्रियेषु न प्रतिपद्यमानको नापि पूर्वप्रतिपन्नतुर्णामपि, विकलेन्द्रियेषु सम्यक्त्वश्रुतसामायिकयोः पूर्वप्रतिपन्नः सम्भवति नेतरः, पञ्चेन्द्रियतिर्यक्षु सर्वविरतिवर्जानां पूर्वप्रतिपन्नोऽस्ति, प्रतिपद्यमानको भाज्यः, विवक्षितकाले नारकामराकर्मभूमिजान्तरद्वीपकनरेषु सम्यक्त्वश्रुतयोः पूर्वप्रतिपन्नकोऽस्त्येव, इतरस्तु, भाज्यः, कर्मभूमिजमनुष्येषु चतुर्णामपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्वप्रतिपन्नोऽस्त्येव, प्रतिपद्यमानकस्तु भाज्यः, सम्मूर्च्छिमेषु तूभयाभाव इति, उक्तं च—

"उभयाभावो पुढवादिएसु विगलेसु होज्ज उववन्नो ।
पंचेंदियतिरिएसुं नियमा तिण्हं सिय पवज्जे ॥१॥
नारगदेवाकम्मगअंतरदीवेसु दोण्ह भयणा उ ।
कम्मगणरेसु चउसुं मुच्छेसु तु उभयपडिसेहो ॥२॥

कालद्वारमधुना, तत्र कालस्त्रिविधः-उत्सर्पिणीकालः अवसर्पिणीकालः उभयाभावतोऽवस्थितश्चेति, तत्र भरतैरावतेषु विंशतिसागरोपमकोटीकोटिमानः कालचक्रभेदोत्सर्पिण्यवसर्पिणीगतः प्रत्येकं षड्विधो भवति, तत्रावसर्पिण्यां सुषमसुषाख्यश्चतुः-सागरोपमकोटीकोटिमानः प्रवाहतः प्रथमः, सुषमाख्यस्त्रिसागरोपमकोटिकोटिमानो द्वितीयः, सुषमदुष्षमाख्यस्तु सागरोपमकोटीकोटिद्वयमानस्तृतीयः, दुष्षमसुषमाख्यस्तु द्विचत्वारिंशद्वर्षसहस्त्रन्यूनसागरोपमकोटीकोटिमानश्चतुर्थः, दुष्षमाख्यास्त्वेकविंशतिवर्षसहस्त्रमानः पञ्चमः, दुष्षमदुष्षमाख्यः पुनरेकविशतिवर्षसहस्त्रमान एव षष्ठ इति, अयमेव चोत्क्रमेणोत्सर्पिण्यामपि यथोक्तसङ्ख्योऽवसेयः काल इति, अवस्थितस्तु चतुर्विध, तद्यथा—सुषमसुषमाप्रति-भागःसुषमाप्रतिभागः सुषमदुषमाप्रतिभागः दुष्षमसुषमाप्रतिभागश्चेति, तत्र प्रथमो देवकुरूत्तर-कुरुषु द्वितीयो हरिवर्षरम्यकयोः तृतीयोहेमवर्तैरण्यवतयोः चतुर्थो विदेहेष्विति, तत्रेस्थमनेकधा काले सति यस्य सामायिकस्य यस्मिन् काले प्रतिपत्तिरित्येतदभिधित्सुराह—

नि. (८११) संमत्तस्स सुयस्स य पडिवत्ती छव्विहंमि कालंमि ।
विरइं विरयाविरइं पडिवज्जइ दोसु तिसु वावि ॥

वृ- सम्यक्त्वस्य श्रुतस्य च द्वयोरप्यनयोः सामायिकयोः प्रतिपत्तिः षड्विधे— सुषमसुषमादिलक्षणे काले सम्भवति, स च प्रतिपत्ता सुषमसुषमादिषु देशन्यूनपूर्वकोट्यायुष्क एव प्रतिपद्यते, पूर्वप्रतिपन्नकास्त्वनयोर्विद्यन्त एव, 'विरतिं' समग्रचारित्रलक्षणां तथा 'विरताविरतिं' देशचारित्रात्मिकां प्रतिपद्यते कश्चित् द्वयोः कालयोस्त्रिषु वाऽपि कालेषु, अपिः सम्भावने, अस्य चार्थमुपरिष्टाद्वक्ष्यामः, तत्रेयं प्रकृतभावना-उत्सर्पिण्यां द्वयोर्दुष्षमसुषमायां सुषमदुष्षमायां च, अवसर्पिण्यां त्रिषु सुषमदुष्षमायां दुष्षमसुषमायां दुष्षमायां चेति, पूर्वप्रतिपन्नस्तु विद्यत एव, अपिशब्दात् संहरणं प्रतीत्य पूर्वप्रतिपन्नकः सर्वकालेष्वेव सम्भवति, प्रतिभागकालेषु तु त्रिषु सम्यक्त्वश्रुतयोः प्रतिपद्यमानकः सम्भवति, पूर्वप्रतिपन्नकस्त्वस्त्येव, चतुर्थे तु प्रतिभागे चतुर्विधस्यापि प्रतिपद्यमानकः सम्भवति, पूर्वप्रतिपन्नकस्तु विद्यत एव, बाह्यद्वीपसमुद्रेषु तु काललिङ्गरहितेषु त्रयाणां प्रतिपद्यमानकः सम्भवति, पूर्वप्रतिपन्नस्त्वस्त्येवेति गाथार्थः ॥

साम्प्रतं गतिद्वारमुच्यते—

नि. (८१२) चउसुवि गतीसु नियमा सम्मत्तसुयस्स होइ पडिवत्ती ।
मनुएसु होइ विरती विरयाविरई य तिरिएसुं ।

वृ- चतसृष्वपि गतिषु, नियमात् इति नियमग्रहणमवधारणार्थे चतसृष्वेव न मोक्षगताविति हृदयं, सम्यक्त्वश्रुतयोर्भवति प्रतिपत्तिः, सम्भवति विवक्षितने काल इत्यर्थः, अपिशब्दः पृथिव्यादिषु गत्यन्तर्गतेषु न भवत्यपीति सम्भावयति, पूर्वप्रतिपन्नकस्त्वनयोर्विद्यत एव, तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मनुष्येषु भवति विरतिः-प्रतिपत्तिमङ्गीकृत्य मनुष्येष्वेव सम्भवति 'विरतिः' समग्रचरित्रात्मिका, पूर्वप्रतिपन्नापेक्षया तु सदा भवत्येव, 'विरताविरतिश्च' देशचारित्रात्मिका तिर्यक्षु, भवतीत्यनुवर्तते, भावना मनुष्यतुल्येति गाथार्थः ।। भव्यसंज्ञिद्वारावयवार्थाभिधित्सयाऽऽह-

नि. (८१३) भवसिद्धिओ उ जीवो पडिवज्जइ सो चउण्हमन्नयरं ।
पडिसेहो पुण असण्णिमीसए सण्णि पडिवज्जे ।।

वृ- भवसिद्धिको भव्योऽभिधीयते, भवसिद्धिकस्तु जीवः प्रतिपद्यते 'चतुर्णां' सम्यक्त्वसामायिकादीनाम् 'अन्यतरत्' एकं द्वे त्रीणि सर्वाणि वा, व्यवहारनयापेक्षयेत्थं प्रतिपाद्यते, न तु निश्चयतः केवलसम्पक्त्वसामायिकसम्भवोऽस्ति, श्रुतसामायिकानुगतत्वात् तस्य, एवं संज्ञ्यपि, यत आह-संन्नि पडिवज्जे, पूर्वप्रतिपन्नकस्तु भव्यसंज्ञिषु विद्यत एव, प्रतिषेधः पुनरसंज्ञिनि मिश्रकेऽभव्ये च, इदमत्र हृदयम्-अन्यतमसामायिकस्य प्रतिपद्यमानकान् प्राक्प्रतिपन्नान् वाऽऽश्रित्य प्रतिषेधः असंज्ञिनि 'मिश्रके' सिद्धे, यतोऽसौ न संज्ञी नाप्यसंज्ञी न भव्यो नाप्यभव्यः अतो मिश्रः, अभव्ये च, पुनःशब्दस्तु पूर्वप्रतिपन्नोऽसंज्ञी सास्वादनो जन्मनि सम्भवतीति विशेषणार्थः, संज्ञी प्रतिपद्यत इति व्याख्यातमेवेति गाथार्थः ।। गतं द्वारद्वयम् ।।

उच्छ्वासदृष्टि-द्वारद्वयाभिधित्सयाऽऽह-

नि. (८१४) ऊसासग नीसासग मीसग पडिसेह दुविह पडिवण्णो ।
दिट्ठीइ दो नया खलु ववहारो निच्छओ चेव ।।

वृ- उच्छ्वसितीति उच्छ्वासकः, निःश्वसितीति निःश्वासकः, आनापानपर्याप्तिपरिनिष्पन्न इत्यर्थः, स हि चतुर्णामपि प्रतिपद्यमानकः सम्भवति, पूर्वप्रतिपन्नस्त्वस्त्येवेति वाक्यशेषः, मिश्रः खल्वानापानपर्याप्तयाऽपर्याप्तो भण्यते, तत्र प्रतिपत्तिमङ्गीकृत्य प्रतिषेधः, नाषौ चतुर्णामपि प्रतिपद्यमानकः सम्भवतीति भावना, 'दुविहपडिवन्नो' त्ति स एव द्विविधस्य सम्यक्त्वश्रुतसामायिकस्य प्रतिपन्नः-पूर्वप्रतिपन्नो भवति, देवादिर्जन्मकाल इति, अथवा 'मिश्रः' सिद्धः, तत्र पतुर्णामप्युभयथाऽपि प्रतिषेधः, द्विविधस्य दर्शनचारित्रसामायिकस्य शैलेशीगतः पूर्वप्रतिपन्नो भवति, असावपि च तावन्मिश्र एवेति । दृष्टौ विर्चामाणायां द्वौ नयौ खलु विचारकौ-व्यवहारो निश्चयश्चैव, तत्राद्यस्य सामायिकरहितः सामायिकं प्रतिपद्यते, इतरस्य तद्युक्त एव, क्रियाकालनिष्ठाकालयोरभेदादिति गाथार्थः ।। साम्प्रतमाहारकपर्याप्तकद्वारद्वयं प्रतिपादयन्नाह-

नि. (८१५) आहारओ उ जीवो पडिवज्जइ सो चउण्हमन्नयरं ।
एमेव य पज्जत्तो सम्मत्तसुए सिया इयरो ।।

वृ- आहारकस्तु जीवः प्रतिपद्यते स चतुर्णामन्यतरत्, पूर्वप्रतिपन्नस्तु नियमादस्त्येव, एवमेव च पर्याप्तः षड्भिरप्याहारदिपर्याप्तिभिश्चतुर्णामन्यतरत् प्रतिपद्यते, पूर्वप्रतिपन्नस्त्वस्त्येव, 'सम्मत्तसुए सिया इयरो' त्ति इतरः-अनाहारकोऽपर्याप्तकश्च, तत्रानाहारकोऽपान्तरालगतौ सम्यक्त्वश्रुते अङ्गीकृत्य स्यात्-भवेत् पूर्वप्रतिपन्नः, प्रतिपद्यमानकस्तु नैवेति वाक्यशेषः, केवली तु समुद्घातशैलेश्यवस्थायामनाहारको दर्शनचरणसामायिकद्वस्येति, अपर्याप्तोऽपि सम्यक्त्वश्रुते अधिकृत्य स्यात् पूर्वप्रतिपन्न इति गाथार्थः ।।

गतं द्वारद्वयं, साम्प्रतं सुप्तजन्मद्वारद्वय-व्याचिख्यासयेदमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (८१६) निद्दाए भावओऽवि य जागरमाणो चउण्हमन्नयरं ।
अंडयपोयजराउय तिग तिग चउरो भवे कमसो ॥

वृ- इह सुप्तो द्विविधः-द्रव्यसुप्तो भावसुप्तश्च, एण जाग्रदपीति, तत्र द्रव्यसुप्तो निद्रया, भावसुप्तस्त्वज्ञानी, तथा द्रव्यजागरो निद्रया रहितः, भावजागरः सम्यग्दृष्टिः, तत्र निद्रया भावतोऽपि च जाग्रत् चतुर्णां सामायिकानामन्यतरत् प्रतिपद्यते, पूर्वप्रतिपन्नस्त्वस्त्येवेत्यध्याहारः, अपिशब्दो विशेषणे, किं विशिनष्टि ? -भावजागरः द्वयोः प्रथमयोः पूर्वप्रतिपन्न एव, द्वयस्य तु प्रतिपत्ता भवतीति, निद्रासुप्तस्तु चतुर्णामपि पूर्वप्रतिपन्नो भवति, न तु प्रतिपद्यमानकः, भावसुप्तस्तूभयविकलः, नयमताद्वा प्रतिपद्यमानको भवति, अलं विस्तरेण । जन्म त्रिविधम्-अण्डजपोतजजरायुजभेदभिन्नं, तत्र यथासङ्ख्यं 'तिग तिग चउरो भवे कमसो' त्ति अण्डजाः-हंसादयः त्रयाणां प्रतिपद्यमानकाः सम्भवन्ति, पूर्वप्रतिपन्नास्तु सन्त्येव, पोतजाः-हस्तत्याद-योऽप्येवमेव, जरायुजाः-मनुष्यास्तेऽपि चतुर्णामित्थमेव, औपपातिकास्तु प्रथमयोर्द्वयोरेवमिति गाथार्थः ॥ स्थितिद्वारमधुनाऽऽह-

नि. (८१७) उक्कोसयट्ठितीए पडिवज्जंते य नत्थि पडिवण्णो ।
अजहन्नमनुक्कोसे पडिवज्जंते य पडिवण्णे ॥

वृ- आयुर्वर्जानां सप्तानां कर्मप्रकृतीनामुत्कृष्टस्थितिर्जीवश्चतुर्णामपि सामायिकानां 'पडिवज्जंते य नत्थि पडिवण्णो' त्ति प्रतिपद्यमानको नास्ति प्रतिपन्नश्च नास्तीति, चशब्दस्य व्यवहितः सम्बन्धः, आयुषस्तूत्कृष्टस्थितौ द्वयोः पूर्वप्रतिपन्न इति, अजघन्योत्कृष्टस्थितिरेवाजघन्योकृष्टः स्थितिशब्द-लोपात्, 'पडिवज्जंते य पडिवण्णो' त्ति, स हि चतुर्णामपि प्रतिपद्यमानकः सम्भवति, प्रति-पन्नश्चास्त्येव, जघन्यायुष्कस्थितिस्तु न प्रतिपद्यते, न पूर्वप्रतिपन्नः, क्षुल्लकभवगत इति, शेषक-र्मराशिजघन्यस्थितिस्तु देशविरतिरहितस्य सामायिकत्रयस्य पूर्वप्रतिपन्नः स्याद्, दर्शनसप्त-कातिक्रान्तः क्षपकः अन्तकृत् केवली, तस्य तस्यामवस्थायां देशविरतिपरिणामाभावात्, जघन्यस्थितिकर्मबन्धकत्वाच्च जघन्यस्थितित्वं तस्य न तूपात्तकर्मप्रवाहापेक्षयेति, आह च -

"न जहन्नाउठिईए पडिवज्जइ नेव पुव्वपडिवण्णो ।
सेसे पुव्वपवण्णो देसविरतिवज्जिए होज्ज ॥"

गाथार्थः ॥ द्वारं ॥ साम्प्रतं वेदसंज्ञाकषायद्वारत्रयं व्याचिख्यासुराह-

नि. (८१८) चउरोऽवि तिविहवेदे चउसुवि सण्णासु होइ पडिवत्ती ।
हेट्ठा जहा कसाएसु वण्णियं तह य इहयंपि ॥

वृ- 'चत्वार्यपि' सामायिकानि 'त्रिविधवेदे' स्त्रीपुंनपुंसकलक्षणे उभयथाऽपि, सन्तीति वाक्यशेषः, इयं भावनाचत्वार्यपि सामायिकान्यधिकृत्य त्रिविधवेदे विवक्षिते काले प्रतिपद्यमानकः सम्भवति, पूर्वप्रतिपन्नस्त्वस्त्येव, अवेदस्तु देशविरतिरहितानां त्रयाणां पूर्वप्रतिपन्नः स्यात्; क्षीणवेदः क्षपको, न तु प्रतिपद्यमानकः । द्वारं । तथा चतसृष्वपि संज्ञासु-आहारभयमैथुन-परिग्रहरूपासु चतुर्विधस्यापि सामायिकस्य भवति 'प्रतिपत्तिः' प्रतिपद्यमानको भवति, न न भवति, इतरस्त्वस्त्येव । द्वारम् । अधो यथा 'पढमिल्लुगाण उदये' इत्यादिना कषायेषु वर्णितं, इहापि तथैव वर्णितव्यं, समुदायार्थस्त्वयम्-सकषायी चतुर्णामप्युभयथाऽपि भवति, अकषायी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तु छद्मस्थवीतरागस्त्रयाणां पूर्वप्रतिपन्नो भवति, न तु प्रतिपद्यमानकः । द्वारमिति गाथार्थः ॥

गतं द्वारत्रयं, साम्प्रतमायुर्ज्ञानद्वारद्वयाभिधित्सयाऽऽह–

नि. (८१९) संखिज्जाऊ चउरो भयणा सम्मसुयऽसंखवासीणं ।
ओहेण विभागेन य नाणी पडिवज्जई चउरो ॥

वृ- सङ्ख्येयायुर्नरः चत्वारि प्रतिपद्यते, प्रतिपन्नस्त्वस्त्येवेति वाक्यशेषः, 'भयणा सम्मसुयऽ-संखवासीणं' ति भजना-विकल्पना सम्यक्त्वश्रुतसामायिकयोरसङ्ख्येयवर्षायुषाम्, इयं भावना-विवक्षितकालेऽसङ्ख्येयवर्षायुषां सम्यक्त्व श्रुतयोः प्रतिपद्यमानकः सम्भवति, पूर्वप्रतिपन्नस्त्व-स्त्येवेति । द्वारम् । 'ओहेण विभागेण य नाणी पडिवज्जए चउरो'त्ति ओधेन–सामान्येन ज्ञानी प्रतिपद्यते चत्वार्यपि नयमतेन, पूर्वप्रतिपन्नस्त्वस्त्येव, विभागेन चाभिनिबोधिकश्रुतज्ञानी युगपदाद्यसामायिकद्वयप्रतिपत्ता सम्भवति, पूर्वप्रतिपन्नस्त्वस्त्येवेति, उपरितनसामायिकद्वयस्यापि प्रतिपद्यमानकः सम्भवति, इतरस्त्वस्त्येवेति, अवधिज्ञानी सम्यक्त्वश्रुतसामायिकयोः पूर्वप्रतिपन्न एव न प्रतिपद्यमानकः, देशविरतिसामायिकं तु न प्रतिपद्यते, गणपूर्वकत्वात् तदवाप्तेः, स्यात् पुनः पूर्वप्रतिपन्नः, सर्वविरतिसामायिकं तु प्रतिपद्यते, पूर्वप्रतिपन्नोऽपि भवति, मनःपर्यायज्ञानी देशविरतिरहितस्य त्रयस्य पूर्वप्रतिपन्न एव, न प्रतिपद्यमानकः, युगपद्वा सह तेन चारित्रं प्रतिपद्यते तीर्थकृद्, उक्तं च–"पडिवन्नंमि चरित्ते चउणाणी जाव छउमत्थो" त्ति, भवस्थः केवली पूर्वप्रतिपन्नः सम्यक्त्वचारित्रयोः न तु प्रतिपद्यमानक इति गाथार्थः ॥

गतं द्वारद्वयं, साम्प्रतं योगोपयोगशरीरद्वाराभिधित्सयाऽऽह–

नि. (८२०) चउरोऽवि तिविहजोगे उवओगदुगंमि चउर पडिवज्जे ।
ओरालिए चउक्कं सम्मसुय विउव्विए भयणा ॥

वृ- 'चत्वार्यपि'सामायिकानि सामान्यतः 'त्रिविधयोगे' मनोवाक्कायलक्षणे सति प्रतिपत्ति-माश्रित्य विवक्षितकाले सम्भवन्ति, प्राक्प्रतिपन्नतां त्वधिकृत्य विद्यन्त एव, विशेषतस्त्वौदारि-ककाययोगवति योगत्रये चत्वार्युभयथाऽपि, वैक्रियकाययोगवति तु सम्यक्त्वश्रुते उभयथाऽपि, आहारककाययोगवति तु देशविरतिरहितानि त्रीणि सम्भवन्ति, तैजसकार्मणकाययोग एव केवले अपान्तरालगतावाद्यं सामायिकद्वयं प्राक्प्रतिपन्नतामधिकृत्य स्यात्, मनोयोगे केवले न किञ्चित्, तस्यैवाभावाद्, एवं वाग्योगेऽपि, कायवाग्योगद्वये तु स्याद् द्वयमाद्यं प्राक्प्रतिपन्न-तामधिकृत्य, सम्यक्त्वात् प्रतिपततो विकलेन्द्रियोपपातिषु घण्टालालान्यायेनेति विस्तरेणालम्। 'उवओगदुगीम चउरो पडिवज्जे' त्ति उपयोगद्वये–साकारानाकारभेदे चत्वारि प्रतिपद्यते, प्राक्प्रतिपन्नस्तु विद्यत एव, अत्राह-'सव्वाओ लद्धीओ सागारोवओगोवउत्तस्स भवन्ती' त्यागमादनाकारोपयोगे सामायिकलब्धिविरोधः, उच्यते, प्रवर्धमानपरिणामजीवविषयत्वात् तस्यागमस्य, अवस्थितौपशमिकपरिणामापेक्षया चानाकरोपयोगे सामायिकलब्धिप्रतिपादनाद-विरोध इति, आह च भाष्यकारः–

"ऊसरदेसं दड्ढेल्लयं च विज्झाइ वणदवो पप्प ।
इय मिच्छस्स अनुदए उवसमसमं लहइ जीवो ॥१॥"

अवस्थितपरिणामता चास्य–'जं मिच्छस्सानुदओ न हायए तेन तस्स परिणामो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जं पुण सयमुवसंतं न वड्ढएऽवट्ठितो तेणं ॥२॥

'ओरालिए चउक्कं सम्मसुत विउव्विए भयण' त्ति औदारिके शरीरे सामायिकचतुष्कमुभयथाऽप्यस्ति, सम्यक्त्वश्रुतयोर्वैक्रियशरीरे भजना-विकल्पना कार्या, एतदुक्तं भवति-सम्यक्त्वश्रुतयोर्वैक्रियशरीरी प्रतिपद्यमानकः पूर्वप्रतिपन्नश्चास्ति, उपरितनसामायिकद्वयस्य तु प्राक्तिपन्न एव, विकुर्वितवैक्रियशरीरश्चारणश्रावकादिः श्रमणो वा, न प्रतिपद्यमानकः, प्रमत्तत्वात्, शेषशरीरविचारो योगद्वारानुसारतोऽनुसरणीय इति गाथार्थः ॥ द्वारत्रयं गतं, साम्प्रतं संस्थानादिद्वारत्रयावयवार्थप्रतिपादनायाह–

नि. (८२१) सव्वेसुवि संठाणेसु लहइ एमेव सव्वसंघयणे ।
उक्कोसजहण्णं वज्जिऊण मानं लहे मनुओ ॥

वृ- संस्थितिः संस्थानम्–आकारविशेषलक्षणं, तच्च षोढा भवति, उक्तं च–

"समचउरंसे नग्गोहमंडले साइ वामणे खुज्जे ।
हुंडेऽवि य संठाणे जीवाणं छम्मुणेयव्वा ॥१॥"
तुल्लं वित्थडबहुलं उस्सेहबहुं च मडहकुट्ठं च ।
हेट्ठिल्लकायमडहं सव्वत्थासंठियं हुंडं ॥२॥" इत्यादि

तत्र सर्वेष्वपि संस्थानेषु 'लभते' प्रतिप्रद्यते चत्वार्यैपि सामायिकानि, प्राक्प्रतिपन्नोऽप्यस्तीत्यध्याहारः, 'एमेव सव्वसंघयणे'त्ति एवमेव सर्वसंहननविषयो विचारो वेदितव्यः, तानि च षट् संहननानि भवन्तीति, उक्तं च–

"वज्जरिसभणारायं पढमं बितियं च रिसभनारायं ।
नाराय अद्धनारायं कीलिया तहय छेवट्ठं ॥१॥
रिसभो उ होइ पट्टो वज्जं पुण कीलिया मुणेयव्वा ।
उभओमक्कडबंधं नारायं तं वियाणाहि ॥२॥"

इह चेत्थंम्भूतास्थिसञ्चयोपमितः शक्तिविशेषः संहननमुच्यते न त्वस्थिसञ्चय एव, देवानामस्थिरहितानामपि प्रथमसंहननयुक्तत्वात् । 'उक्कोसजन्नं वज्जिऊण मानं लभे मनुओ' त्ति उत्कृष्टं जघन्यं च वर्जयित्वा मानं-शरीरप्रमाणं लभते-प्रतिपद्यते मनुजः प्रकरणादनुवर्तमानं चतुर्विधमपि सामायिकं, प्राक् प्रतिन्नोऽपि विद्यत इति गाथार्द्धहृदयम्, अन्यथा नारकादयोऽपि सामान्येन सामायिकद्वयं त्रीणि वा लभन्त एवेति, उक्तं च– "किं जहन्नोगाहणगा पडिवज्जंति उक्कोसोगाहणगा अजहन्नुक्कोसोगाहणग त्ति पुच्छा ?, गोतमा ! णेरइयदेवा न जहन्नोगाहणगा किंचि पडिवज्जंति, पुव्वपडिवण्णगा पुण सिया सम्मत्तसुताण, ते चेव अजहन्नुक्कोसोगाहणगा उक्कोसोगाहणगा य सम्मत्तसुते पडिवज्जंति, नो सेसेत्ति । पुव्वपडिवण्णगा दोवि दोण्हं चेव । तिरिएसु पुच्छा ?, गोतमा ? एगेंदिया तिसुवि ओगाहणासु न किंचि पडिवज्जंति, नावि पुव्वपडिवण्णगा । जहन्नोगाहणगा विगलिंदिया सम्मत्तसुयाणं पुव्वपडिवण्णगा हवेज्जा न पडिवज्जमाणगा, अजहन्नुक्कासोगाहणगा उक्कोसोगाहणगा पुण न पुव्वपडिवण्णा नावि पडिवज्जमाणगा, सेसतिरिया जहन्नोगाहणगा सम्मत्त सुयाण पुव्वपडिवण्णगा होज्जा नो पडिवज्जमाणगा, अजहन्नुक्कोसोगाहणगा पुण तिण्हं दुहावि संति, उक्कोसोगाहणगा दोण्हं दुहावि । मनुएसु पुच्छा?,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गोतमा ! संमुच्छिममनुस्से पडुच्च तिसुवि ओगाहणासु चउण्हंपि सामाइयाणं न पुव्वपडिवण्णगा नो पडिवज्जमाणगा। गब्भवक्कंतिय जहन्नोगाहणमणूसा सम्मत्तसुयाण पुव्वपडिवण्णगा होज्ञा णो पडिवज्जमाणगा, अजहण्णुक्कोसोगाहणगा पुण चउण्हवि दुधावि संति, उक्कोसोगाहणगा पुण दुण्हं दुधावी' त्यादि, अलं प्रसङ्गेन ॥ गतं द्वारत्रयम्, अधुना लेश्याद्वारावयवार्थमभिधित्सुहार–

नि. (८२२) सम्मत्तसुयं सव्वासु लहइ सुद्धासु तीसु य चरित्तं।
पुव्वपडिवण्णगो पुण अन्नयरीए उ लेसाए ॥

वृ- सम्यक्त्वं च श्रुतं चेति एकवद्भावस्तत् सम्यक्त्वश्रुतं 'सर्वासु' कृष्णादिलेश्यासु 'लभते' प्रतिपद्यते, 'शुद्धासु' तेजोलेश्याद्यासु तिसृष्वेव, चशब्दस्यावधारणार्थत्वात्, 'चारित्रं' विरतिलक्षणं, लभत इति वर्तते, एवं प्रतिपद्यमानकमधिकृत्य लेश्याद्वारं निरूपितम्, अधुना प्राक्प्रतिपन्नमधिकृत्याऽऽह-'पुव्वपडिवण्णओ पुण अन्नतरीए उ लेसाए' पूर्वप्रतिपन्नकः पुनरन्यतरस्यां तु लेश्यायां-कृष्णाद्यभिधानायां भवति। आह–मतिश्रुतज्ञानलाभचिन्तायां शुद्धासु तिसृषु प्रतिपद्यमानक उक्तः कथमिदानीं सर्वास्वभिधीयमानः सम्यक्त्वश्रुतप्रतिपत्ता न विरुध्यत इति ?, उच्यते, तत्र कृष्णादिद्रव्यसाचिव्यजनिताऽऽत्मपरिणामरूपां भावलेश्यामाश्रित्यासावुक्तः, इह त्ववस्थितकृष्णादिद्रव्यरूपां द्रव्यलेश्यामेव इत्यतो न विरोधः, उक्तं च–"से णूणं भंते ! किण्हलेसा नीललेस्सं पप्प नो तारूवत्ताए नो तावण्णत्ताए नो तागंधत्ताए नो तारसत्ताए नो ताफासत्ताए भुज्ञो भुज्ञो परिणमति ?, हंता गोतमा ! किण्णलेस्सा नीललेस्सं पप्प नो तारूवत्ताए जाव परिणमति, से केणट्ठेणं भंते ! एवं वुच्चति-किण्हलेस्सा नीललेस्सं पप्प जाव नो परिणमइ ?, गोतमा ! आगारभावायाए वा से सिया पलिभागमायाए वा से सिया, किण्हलेस्सा णं साणो खलु नीललेसा, तत्थ गता उसक्कति वा अहिसक्कइ वा, से तेणट्ठेणं गोतमा ! एवं वुच्चति-किण्हलेस्सा णीललेस्सं पप्प जाव नो परिणमति,

अयमस्यार्थः–'आगार' इत्यादि, आकार एव भाव आकारभावः, आकारभाव एव आकारभावमात्रं, मात्रशब्दः खल्वाकारभावव्यतिरिक्तप्रति-बिम्बादिधर्मान्तरप्रतिषेधवाचकः, अतस्तेनाकारभावमात्रेणैवासौ नीललेश्या स्यात्, न तु तत्स्वरूपापत्तितः, तथा प्रतिरूपो भागः प्रतिभागः, प्रतिबिम्बमित्यर्थः, प्रतिभाग एव प्रतिभागमात्रं, मात्रशब्दो वास्तवपरिणाम-प्रतिषेधवाचकः, अतस्तेन प्रतिभागमात्रेणैव असौ नीललेश्या स्यात्, न तु तत्स्वरूपत एवेत्यर्थः, स्फटिकवदुपधानवशादुपधानरूप इति दृष्टान्तः ततश्च स्वरूपेण कृष्णलेश्यैवासौ न नीललेश्या, किं तर्हि?, तत्र गतोत्सर्पति, किमुक्तं भवति ?-तत्रस्थैव-स्वरूपस्थैव नीललेश्यादि लेश्यान्तरं प्राप्योत्सर्पते इत्याकारभावं प्रतिबिम्बभागं वा नीललेश्यासम्बन्धिनमासादयतीत्यर्थः "एवं नीललेसा काउलेसं पप्प जाव णीललेसा णं सा णो खलु काउलेसा, तत्थ गता उस्सक्कइ वा ओसक्कइ वा" अयं भावार्थः–तत्र गतोत्सर्पति, किमुक्तं भवति ?-तत्रस्थैव स्वरूपस्थैवोत्सर्पति, आकारभावं प्रतिबिम्बभागं वा कापोतलेश्यासम्बन्धिनमासादयति, तथाऽपसर्पति वा-नीललेश्यैव कृष्णलेश्यां प्राप्य, भावार्थस्तु पूर्ववत्: 'एवं काउलेसा तेउलेसं पप्प, तेउलेसा पम्हलेसं पप्प, पम्हलेसा सुक्कलेसं पप्प, एवं सुक्कलेसा पम्हलेसं पप्प' भावार्थस्तु पूर्ववत्, 'एवं किण्हेलसा नीललेसं पप्प,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किण्हलेसा काउलेसं पप्प, किण्हलेसा तेउलेसं पप्प, एवं जाव सुक्कलेसं पप्प, एवमेगेगा सव्वाहिं चारिज्जति', ततश्च सम्यक्त्वश्रुतं सर्वास्ववस्थितकृष्णादिद्रव्यालेश्यासु लभते नारकादिरपि, शुद्धासु तेजोलेश्याद्यासु तत्तद्रव्यसाचिव्य-सञ्जातात्मपरिणामलक्षणासु तिसृषु च चारित्रं, शेषं पूर्ववदिति गाथार्थः ॥ साम्प्रतं परिणामद्वारावयवार्थ प्रतिदर्शयन्नाह–

नि. (८२३) वड्ढंते परिणामे पडिवज्जइ सो चउण्हमन्नयरं ।
एमेवऽवट्ठियंमिवि हायंति न किंचि पडिवज्जे ॥

वृ- परिणामः-अध्यवसायविशेषः, तत्र शुभशुभतररूपतया वर्द्धमाने परिणामे प्रतिपद्यते स 'चतुर्णा' सम्यक्त्वादिसामायिकानामन्यतरत्, 'एमेवऽवट्ठियंमिवि'त्ति एवमेवावस्थितेऽपि शुभे परिणामे प्रतिपद्यते स चतुर्णामन्यतरदिति, 'हायंति न किंचि पडिवज्जे' त्ति क्षीयमाणे शुभे परिणामे न किञ्चित् सामायिकं प्रतिपद्यते, प्राक्प्रतिपन्नस्तु त्रिष्वपि परिणामेषु भवतीति गाथार्थः ॥ अधुना वेदनासमुद्घातकर्मद्वारद्वयव्याचिख्यासयाऽऽह–

नि. (८२४) दुविहाएँ वेयणाए पडिवज्जइ सो चउण्हमन्नयरं ।
असमोहओऽवि एमेव पुव्वपडिवण्णए भयणा ॥

वृ- द्विविधायां वेदनायां-सातासातरूपायां सत्यां प्रतिपद्यते स चतुर्णामन्यतरत्, प्राक्प्रतिपन्नश्च भवति, 'असमोहतोऽवि एमेव'त्ति असमवहतोऽप्येवमेव प्रतिपद्यते स चतुर्णामन्यतरत्, प्राक्प्रतिपन्नश्च भवति, समवहतस्तु केवलिसमुद्घातादिना सप्तविधे न प्रतिपद्यते, किन्तु 'पुव्वपडिवण्णए भयण' त्ति पूर्वप्रतिपन्नके समवहते विचारयितुमारब्धे भजना सेवना समर्थना कार्या, पूर्वप्रतिपन्नो भवतीत्यर्थः, सप्तविधत्वं पुनः समुद्घातस्य, यथोक्तम्–

'केवलि कसायमरणे वेदण वेउव्वि तेय आहारे ।
सत्तविह समुग्घातो पन्नत्तो वीयरागेहिं ॥१॥'

इह च पूर्वप्रतिपन्नके भजना, समवहतो हि सामायिकद्वयस्य त्रयस्य वा पूर्वप्रतिपन्नको भावनीय इति गाथार्थः ॥ गतं द्वारद्वयं, निर्वेष्टनद्वारप्रतिपादनायाह–

नि. (८२५) दव्वेण य भावेण य निव्विड्ढंतो चउण्हमन्नयरं ।
नरएसु अनुव्वट्टे दुगं चउक्कं सिया उ उव्वट्टे ॥

वृ- द्रव्यतो भावतश्च निर्वेष्टयन् चतुर्णामन्यतरत् प्रतिपद्यते प्राक्प्रतिपन्नश्चास्ति, द्रव्यनिर्वेष्टनं कर्मप्रदेशविसङ्घातरूपं भावनिर्वेष्टनं क्रोधादिहानिलक्षणं, तत्र सर्वमपि कर्म निर्वेष्टयंश्चतुष्टयं लभते, विशेषतस्तदावरणं ज्ञानावरणं निर्वेष्टयन् श्रुतसामायिकमाप्रोति मोहनीयं तु शेषत्रयमिति, संवेष्टस्त्वनन्तानुबन्ध्यादीन् न प्रतिपद्यते, शेषकर्म त्वङ्गीकृत्योभयथाऽप्यस्ति । उद्वर्तनाद्वार-मधुना–नरकेषु-अधिकरणभूतेष्वनुद्वर्तयन्, तत्रस्थ एवेत्यार्थः, नरकाद्वेति पाठान्तरं, 'दुगं' ति आद्यं सामायिकद्विकं प्रतिपद्यते, तदेव चाधिकृत्य पूर्वप्रतिपन्नो भवति, उद्वृत्तस्तु 'स्यात्' कदाचित् चतुष्कं प्रतिपद्यते कदाचित् त्रिकं,स पूवप्रतिपन्नोऽप्यस्त्येवेति गाथार्थः ॥

नि. (८२६) तिरिएसु अनुव्वट्टे तिगं चउक्कं सिया उ उव्वट्टे ।
मणनुएसु अनुव्वट्टे चउरो ति दुगं तु उव्वट्टे ॥

वृ- 'तिर्यक्षु' गर्भव्युत्क्रान्तिकेषु संज्ञिष्वनुद्वृत्तः सन् त्रिकम्' आद्यं सामायिकत्रयमधिकृत्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपत्ता प्राक्प्रतिपन्नश्च भवतीत्यध्याहारः, 'चउक्कं सिया उ उव्वट्टे' उद्वृत्तस्तु मनष्यादिष्वायातः 'स्यात्' कदाचिच्चतुष्टयं स्यात् त्रिकं स्यात् द्विकमधिकृत्योभयथाऽपि भवतीति, 'मनुएसु अनुव्वट्टे चउरो ति दुगं तु उव्वट्टे' मनुष्येष्वनुद्वृत्तः सन् चत्वारि प्रतिपद्यते प्राक्प्रतिपन्नश्च भवति, त्रीणि द्विकं, तुशब्दो विशेषणे, उद्वृत्तस्तिर्यग्नारकामरेष्वायातः त्रीणि द्विकं वाऽधिकृत्योभयथाऽपि भवतीति गाथार्थः ॥

नि. (८२७) देवेसु अनुव्वट्टे दुगं चउक्कं सिया उ उव्वट्टे ।
उव्वट्टमाणओ पुं सव्वोऽवि न किंचि पडिवज्जे ॥

वृ- देवेष्वनुद्वृत्तः सन् 'द्विकम्' आद्यं सामायिकद्वयमाश्रित्योभयथाऽपि भवतीति क्रिया, 'चउक्कं सिया उ उव्वट्टे' त्ति पूर्ववत्, उद्वर्तमानकः पुनरपान्तरालगतौ सर्वोऽप्यमरादिर्न किश्चित् प्रतिपद्यते, प्राक्प्रतिपन्नस्तु द्वयोर्भवतीति गाथार्थः ॥ आश्रवकरणद्वारप्रतिपादनायाह–

नि. (८२८) नीसवमाणो जीवो पडिवज्जइ सो चउण्ह मन्नयरं ।
पुव्वपडिवण्णओ पुण सिय आसवओ व णीसवओ ॥

वृ- निश्रावयन् यस्मात् सामायिकं प्रतिपद्यते, तदावरणं कर्मनिर्जरन्नित्यर्थः, शेषकर्म तु बध्नन्नपि जीव-आत्मा प्रतिपद्यते स चतुर्णामन्यतरत्, पूर्वप्रतिपन्नकः पुनः स्यादाश्रवको बन्धक इत्यर्थः, निःश्रावको वा, वाशब्दस्य व्यवहितः, सम्बन्धः, आह-निर्वेष्टनद्वारादस्य को विशेष इति ?, उच्यते, निर्वेष्टनस्य कर्मप्रदेशविज्ञातरूपत्वात् क्रियाकालो गृहीतः, निःश्रवणस्य तु निर्जरारूपत्वा-न्निष्ठाकाल इति, अथवा तत्र संवेष्टनवक्तव्यताऽर्थतोऽभिहिताः, इह तु साक्षादिति गाथार्थः ॥ अधुनाऽलङ्कारशयनासनस्थानचङ्क्रमणद्वारकदम्बकव्याचिख्यासयाऽऽह–

नि. (८२९) उम्मुक्कमनुम्मुक्के उम्मुंचंते य केसलंकारे ।
पडिवज्जेज्जऽन्नयरं सयणाईसुंपि एमेव ॥

वृ- 'उन्मुक्ते' परित्यक्ते 'अनुन्मुक्ते' अपरित्यक्ते अनुस्वारोऽलाक्षणिकः, उन्मुञ्चंश्च केशालङ्कारान्; केशग्रहणं कटककेयूराद्युपलक्षणं, प्रतिपद्येत अन्यतरच्चतुर्णां 'सयनादीसुंपि एमेव' त्ति शयनादिष्वपि द्वारेषु तिसृष्वप्यवस्थास्वेवमेव योजना कार्या, उन्मुक्तशयनोऽ-नुन्मुक्तशयनः तथोन्मुञ्चन् चतुर्णामन्यतरत् प्रतिपद्यते प्राक्प्रतिपन्नश्च भवति, एवं शेषयोजना कार्या, इति गाथार्थः ॥ उपोद्घातनिर्युक्तौ द्वितीयद्वारगाथायां क्वेति द्वारं गतम्, अधुना केष्विति द्वारं व्याचिख्यासुराह–

नि. (८३०) सव्वगयं सम्मत्तं सुए चरित्ते न पज्जवा सव्वे ।
देसविरइं पडुच्चा दोण्हवि पडिसेहणं कुज्जा ॥

वृ- अथ केषु द्रव्येषु पर्यायेषु वा सामायिकमिति ?, तत्र सर्वगतं सम्यक्त्वं, सर्वद्रव्यपर्याय-रुचिलक्षणत्वात् तस्य, तथा 'श्रुते' श्रुतसामायिके 'चारित्रे' चारित्रसामायिके न पर्यायाः सर्वे विषयाः, श्रुतस्याभिलाप्यविषयत्वाद्, द्रव्यस्य चाभिलाप्यानभिलाप्यपर्याययुक्तत्वात्, चारित्रस्यापि 'पढमंमि सव्वजीवा' इत्यादिना सर्वद्रव्यासर्वपर्यायविषयतायाः प्रतिपादितत्वात्; देशविरतिं प्रतीत्य द्वयोरपि–सकलद्रव्यपर्याययोः प्रतिबेधनं कुर्यात्, न सर्वद्रव्यविषयं नापि सर्वपर्यायविषयं देशविरतिसामायिकमिति भावना । आह–अयं सामायिकविषयः किंद्वारे प्ररूपित एवेति किं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनरभिधानम् ?, उच्यते, किं तदिति तत्र सामायिकं जातिमात्रमुक्तं, विषयविषयिणोरभेदेन, इह पुनः सामायिकस्य किंद्वारं एव द्रव्यत्वगुणत्वनिरूपितस्य ज्ञेयभावेन विषयाभिधानमिति, आह च भाष्यकारः-

"किं तंति जातिभावेण तत्थ इह णेयभावतोऽभिहितं ।
इह विसयविसयिभेदो तत्थाभेदोवयारो त्ति ॥"

गाथार्थः ॥ केष्विति गतं, कथं पुनः सामायिकमवाप्यते ?, तत्र चतुर्विधमपि मनुष्यादिस्थानावाप्तौ सत्यामवाप्यत इतिकृत्वा तत्क्रमदुर्लभताख्यापनायाह निर्युक्तिकारः-

नि. (८३१) मानुस्स खेत्त जाई कुलरूवारोग्गमायं बुद्धी ।
सवणोग्गह सद्धा संजमो य लोगंमि दुलहाइं ॥
इंदियलद्धी निव्वत्तणा य पज्जत्ति निरुवहयखेमं ।
धायारोग्गं सद्धा गाहगउवओग अट्ठो य (अन्यदीया)

नि. (८३२) चोल्लग पासग धण्णे जूए रयणे य सुमिण चक्के य ।
चम्मजुगे परमाणू दस दिट्ठन्ता मणुयलंभे ॥

वृ- 'मानुष्यं' मनुजत्वं 'क्षेत्रम्' आर्यं 'जातिः' मातृसमुत्था 'कुलं' पितृसमुत्थं 'रूपम्' अन्यूनाङ्गता 'आरोग्यं' रोगाभावः 'आयुष्कं' जीवितं 'बुद्धिः' परलोकप्रवणा 'श्रवणं' धर्मसम्बद्धम् 'अवग्रहः' तदवधारणम् अथवा श्रवणावग्रहो-यत्यवग्रहः 'श्रद्धा' रुचिः 'संयमश्च' अनवद्यानुष्ठानलक्षणः, एतानि स्थानानि लोके दुर्लभानि, एतदवाप्तौ च विशिष्टसामायिकलाभ इति।

अथ चैतानि दुर्लभानि-'इन्द्रियलब्धिः' पञ्चेन्द्रियलब्धिरित्यर्थः, निर्वर्त्तना च इन्द्रियाणामेव, पर्याप्तिः-स्वविषयग्रहणसामर्थ्यलक्षणा, 'निरुवहत'त्ति निरुपहतेन्द्रियता, 'क्षेमं' विषयस्य 'ध्रातं' सुभिक्षम् 'आरोग्यं' नीरोगता 'श्रद्धा' भक्तिः 'ग्राहकः' गुरु 'उपयोगः' श्रोतुस्तदभिमुखता 'अट्ठो य' त्ति अर्थित्वं च धर्म इति गाथार्थः ॥ भिन्नकर्तुकी किलेयम् ।

जीवो मानुष्यं लब्ध्वा पुनस्तदेव दुःखने लप्स्यते, बह्वन्तरायान्तरितत्वात्, ब्रह्मदत्तचक्रवर्तिमित्रब्राह्मणचोल्लकभोजनवत्, अत्र कथानकम्-बंभदत्तस्स एगो कप्पडिओ ओलग्गओ, बहुसु आवतीसु अवत्थासु य सव्वत्थ सहायो आसि, सो य रज्जं पत्तो, बारससंवच्छरिओ अभिसेओ कओ, कप्पडिओ तत्थ अल्लियाबंपि न लहति, ततोऽनेन उवाओ चिन्तितो, उवाहणाओ धए बंधिऊण धयवाहएहिं समं पधावितो, रन्ना दिट्ठो, उत्तिणेणं अवगूहितो, अन्ने भणंति-तेन दारवाले सेवमाणेण बारसमे संवच्छरे राया दिट्ठो, ताहे राया तं दट्ठूण संभंतो, इमो सो वराओ मम सुहदुक्खसहायगो, एत्ताहे करेमि वित्तिं, ताधे भणति-किं देमि त्ति ?, सो भणति-देह करचोल्लए घरे घरे जाव सव्वंमि भरहे, जाधे निट्ठितं होज्जा ताहे पुणोवि तुब्भ घरे आढवेऊण भुजामि, राया भणति-किं ते एतेण ?, देसं ते देमि, तो सुहं छत्तछायाए हत्थिखंधवरगतो हिंडिहिसि, सो भणति-किं मम एद्दहेण आहट्टेण ?, ताहे सो दिन्नो चोल्लगो, ततो पढमदिवसे राइणो घरे जिमितो, तेन से जुवलयं दीनारो य दिन्नो, एवं सो परिवाडीए सव्वेसु राउलेसु बत्तीसाए रायवरसहस्सेसु तेसिं च जे भोइया, तत्थ य नगरे अनेगाओ कुलकोडीओ, णगरस्स चेव सो कता अंतं कहिति, ताधे गामेसु ताहे पुणो भरहवासस्स, अवि सो वच्चेज्ज अंतं न य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मानुसत्तणातो भट्ठो पुणो मानुसत्तणं लहइ ? 'पासग' त्ति, चाणक्कस्स सुवण्णं नत्थि, ताधे केण उवाएण विढविज्ज सुवण्णं ?, ताधे जंतपासया कता, केइ भणंति-वरदिन्नगा, ततो एगो दक्खो पुरिसो सिक्खावितो, दीनारथालं भरियं, सो भणति-जति ममं कोइ जिणति सो थालं गेण्हतु, अह अहं जिणामि तो एगं दीनारं जिणामि, तस्स इच्छाए जंतं पडति अतो न तीरइ जिणितुं, जहा सो न जिप्पइ एवं मानुसंलंभोऽवि, अवि नाम सो जिप्पेज्ज न य मानुसातो भट्ठो पुण माणुसत्तणं २ ॥

'धन्ने'त्ति जत्तियाणि भरहे धन्नाणि ताणि सव्वाणि पिण्डिताणि, तत्थ पत्थो सरिसवाणं छूढो, ताणि सव्वाणि आडुआलित्ताणि, तत्थेगा जुण्णथेरी सुप्पं गहाय ते विणिज्ज पुणोऽविय पत्थं पूरेज्ज, अवि सा देवप्पसादेण पूरेज्ज न य मानुसत्तणं ३ । 'जूए' जधा एगो राया, तस्स सभा अट्ठखंभसतसंनिविट्ठा जत्थ अत्थायणं देति, एक्केक्को य खंभो अट्ठसयंसिओ, तस्स रन्नो पुत्तो रज्जकंखी चिंतेति-थेरो या, मारिऊण रज्जं गिण्हामि, तं च अमच्चेण नायं, तेन रन्नो सिट्ठं, ततो राया तं पुत्तं भणति-अम्ह जो न सहइ अनुक्कमं सो जूतं खेल्लति, जति जिणति रज्जं से दिज्जति, कह पुण जिणियव्वं ?, तुज्झ एगो आओ, अवसेसा अम्हं आया, जति तुमं एगेण आएण अट्ठसतस्स खंभाणं एक्केक्कं असियं अट्ठसते वारा जिणासि तो तुज्झ रज्जं, अवि य देवताविभासा ४ । 'रतणे' त्ति, जहा एगो वाणियओ बुड्ढो, रयणाणि से अत्थि, तत्थ य महे महे अन्ने वाणियया कोडिपडागाओ उब्भेंति, सो न उब्भवेति, तस्स पुत्तेहिं थेरे थेरे पउत्थे ताणि रयणाणि देसी वाणिययाण हत्थे विक्कीताणि, वरं अम्हेऽवि कोडिपडागाओ उब्भवेन्ता, ते य वाणियगा समंततो पडिगया पारसकूलादीणि, थेरो आगतो, सुतं जधा विक्कीताणि, ते अंबाडेनि, लहुं रयणाणि आणेह, ताहे ते सव्वतो हिंडितुमारद्धा, किं ते सव्वरयणाणि पिंडिज्ज?, अविय देवप्पभावेण विभासा ५ ।

'सुविणए' त्ति-एगेन कप्पडिएण सुमिणए चंदो गिलितो, कप्पडियाण कथितं, ते भणंति-संपुण्णचंदमंडलसरिसं पोवलियं लभिहिसि, लद्धा घरच्छादणियाए, अन्नेनवि दिट्ठो, सो ण्हाइऊण पुप्फफलाणि गहाय सुविणपाढगस्स कथेति, तेन भणितं-राया भविस्ससि । इत्तो य सत्तमे दिवसे तत्थ राया मतो अपुत्तो, सो य निव्विण्णो अच्छति, जाव आसो अधियासितो आगतो, तेन तं दट्ठूण हेसितं पदक्खिणीकतो य, ततो विलइओ पुट्ठे, एवं सो राया जातो, ताहे सो कप्पडिओ तं सुणेति, जधा-तेनऽवि दिट्ठो एरिसो सुविणओ, सोवि आदेसफलेण किर राया जातो, सोय चिंतेति-वच्चामि जत्थ गोरसो तं पिबेत्ता सुवामि, जाव पुणो तं चेव सुमिणं पेच्छामि, अत्थि पुन सो पेच्छेज्जा ?, अवि य सो न मानुसातो ६ ? 'चक्क'त्ति दारं, इंदपुरं नगरं, इंददत्तो राया, तस्स इट्ठाणं वराणं दवीणं बावीसं पुत्ता, अन्ने भणंति-एक्काए चेव देवीए पुत्ता, राइणो पाणसमा, अन्ना एक्का अमच्चधूया, सा परं परिणिंतेण दिट्ठेल्लिया, सा अन्नता कताइ रिउण्हाता समाणी अच्छति, रायणा य दिट्ठा, का एसत्ति ?, तेहिं भणितं-तुब्भे देवी एसा, ताहे सो ताए समं रत्तिं एक्कं वसितो, सा य रितुण्हाता, तीसे गब्भो लग्गो, सा य अमच्चेण भणिएल्लिता-जया तुमं गब्भो आहूतो भवति तदा ममं साहिज्जसु, ताए तस्स कथितं-दिवसो मुहुत्तो जं च रायाएण उल्लवितं सातियंकारो, तेन तं पत्तए लिहितं, सो सारवेति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णवण्हं मासाणं दारओ संजातो, तस्स दासचेडाणि तद्दिवसं जाताणि, तं जहा-अग्गियओ पव्वतओ बहुलियो सागरो य, ताणि य सहजातगाणि, तेन कलायरियस्स उवणीतो, तेन लेहाइताओ गणियप्पहाणाओ कलाओ गाहितो, जाहे ताओ गाहिंति आयरिया ताधे ताणि तं कड्ढंति वाउल्लेंति य, पुव्वपरिच्चएणं ताणि रोडंति, तेन ताणि य चेव गणिताणि, गहिताओ कलाओ, ते य अन्ने बावीसं कुमारा गाहिज्जंतां तं आयरियं पिट्टंति अवयणाणि य भणंति, जति सो आयरिओ पिट्टेति ताहे गंतूण मातूणं साहंति, ताहे ताओ तं आयरियं खिंसंति-कीस आहणसि ?, किं सुलभाणि पुत्तजम्माणि ?, अतो ते न सिक्खिता।

इओ य महुराए पव्वयओ राया, तस्स सुता निव्वुती नाम दारिया, सा रन्नो अलंकिया उवनीता, राया भणति-जो तव रोयति भत्तारो, तो ताए भणितं -जो सूरो वीरो विक्कंतो सो मम भत्ता होउ, से पुण रज्जं दिज्जा, ताधे सा तं बलवाहनं गहाय गता इंदपुरं नगरं, तस्स इंददत्तस्स बहवे पुत्ता, इंददत्तो तुट्ठो चिंतेइणूणं अहं अन्नेहिंतो राईहिंतोलट्ठो तो आगता, तता तेन उस्सितपडागं नगरं कारितं, तत्थ एक्कंमि अक्खे अट्ठचक्काणि, तेसिं पुरतो धिइल्लिया ठविया, सा अच्छिम्मि विधितव्वा, ततो इंददत्तो राया सन्नद्धो निग्गतो सह पुत्तेहिं, सावि कण्णा सव्वालंकारभूसिया एगंमि पासे अच्छति, सो रंगो ते य रायाणो ते य दंडभडभोइया जारिसो दोवतीए, तत्थ रण्णो जेट्ठो पुत्तो सिरिमालीनाम कुमारो, सो भणितो-पुत्त ! एस दारिया रज्जं च घेत्तव्वं, अतो विंध एतं पुत्तलियंति, ताधे सोऽकतकरणो तस्स समूहस्स मज्झे धणुं चेव गेण्हितु न तरति, कहऽविऽणेण गहितं, तेन जतो वच्चतुं ततो वच्चतुत्ति मुक्कोसरो, सो चक्के अप्फिडिऊण भग्गो, एवं कस्सइ एक्कं अरगतरं वोलीणो कस्सइ दोन्नि कस्सइ तिन्नि अन्नेसिं बाहिरेण चेव नीति, ताधे राया अधितिं पगतो-अहोऽहं एतेहिं धरिसितोत्ति, ततो अमच्चेण भणितो-कीस अधितिं करेह ?, राया भणति-एतेहिं अहं अप्पधाणो कतो, अमच्चो भणति-अत्थि अन्नो तुब्भ पुत्तो धूताए तणइओ सुरिंददत्ते नाम, सो समत्थो विंधितुं, अभिण्णाणाणि से कहिताणि, कहिं सो ?, दरिसितो, ततो सो राइणा अवगूहितो, भणितो- सयं तव एए अट्ठ रहचक्के भेत्तूण पुत्तलियं अच्छिम्मि विंधित्ता रज्जसुक्कं निव्वुतिदारियं संपावित्तए, ततो कुमारो जधाऽऽणवेहत्ति भणिऊण ठाणं ठाइतूण धणुं गेण्हति, लक्खभिमुहं सरं सज्जेति, ताणि य दासरूवाणि चउद्दिसं ठिताणि रोडिंति, अन्ने य उभयतो पासिं गहितखग्गा, जति कहवि लक्खस्स चुक्कति ततो सीसं छिंदितव्वंति, सोऽवि से उवज्झाओ पासे ठितो भयं देति-मारिज्जसि जति चुक्कसि, ते बावीसंपि कुमारा मा एस विन्धिस्सतित्ति विसेसउल्लंठाणि विग्घाणि करेंति, ततो ताणि चत्तारि ते य दो पुरिसे बावीसं च कुमारे अगणंतेण ताणं अट्ठण्हं रहचक्काणं अंतरं जाणिऊणं तंमि लक्खे णिरुद्धाए दिट्ठीए अन्नमतिं अकुणमाणेण सा धिइल्लिया वामे अच्छिम्मि विद्धा, ततो लोगेण उक्किट्ठिसीहणादकलकलुमिस्सो साधुकारो कतो, जधा तं चक्कं दुक्खं भेत्तुं एवं मानुसत्तणंपि ७। 'चम्मे'त्ति-जधा अगो दहो जोयणसयसहस्सविच्छिण्णो चम्मेण णद्धो, एगं से मज्झे छिड्डं जत्थ कच्छभस्स गीवा मायति, तत्थ कच्छभो वासस ते वाससते गते गीवं पसारेति, तेन कहवि गीवा पसारिता, जाव तेन छिड्डेण निग्गता, तेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जोतिसं दिहं कोमुदीए पुप्फफलाणि य, सो आगतो, सयणिज्जयाणं दाएमि, आनेत्ता सव्वतो पलोयति, न पेच्छति, अवि सो, न य मानुसातो ८ । युगदृष्टान्त-प्रतिपादनायाऽऽह–

नि. (८३३) मुव्वंते होज्ज जुगं अवरंते तस्स होज्ज समिला उ ।
जुगछिड्डंमि पवेसो इय संसइओ मणुयलंभो ॥

वृ- जलनिधेः पूर्वान्ते भवेद् युगम्, अपरान्ते तस्य भवेत् समिला तु, एवं व्यवस्थिते सति यथा युगच्छिद्रे प्रवेशः संशयितः, 'इय' एवं संशयितो मनुष्यलाभो, दुर्लभ इति गाथार्थः ॥

नि. (८३४) जह समिला पब्भट्ठा सागरसलिले अनोरपारंमि ।
पविसेज्ज जुग्गछिड्डं कहवि भमंती भमंतंमि ॥

वृ- यथा समिला प्रभ्रष्टा 'सागरसलिले' समुद्रपानीय 'अनोरपार'मिति देशीवचनं पचुरार्थे उपचारत आराद्भागपरभागरहित इत्यर्थः, प्रविशेत् युगच्छिद्रं कथमपि भ्रमन्ती भ्रमति युग इत्येवं दुर्लभं मानुष्यमिति गाथार्थः ॥

नि. (८३५) सा चंडवायबीचीपणुल्लिया अवि लभेज्ज युगछिड्डुं ।
न य मानुसाउ भट्ठो जीवो पडिमानुसं लहइ ॥

वृ- सा समिला चण्डवातवीचीप्रेरिता सत्यपि लभेत युगच्छिद्रं, न च मानुष्याद् भ्रष्टो जीवः प्रतिमानुषं लभत इति गाथार्थः ॥ इदानीं परमाणू, जहा एगो खंभो महापमाणो, सो देवेणं चुण्णेऊणं अविभागिमाणि खंडाणि काऊण नालियाए पक्खितो, पच्छा मंदरचूलियाए ठितेण फुमितो, ताणि नट्ठाणि, अत्थि पुन कोवि ?, तेहिं चेव पोग्गलेहिं तमेव खंभं निव्वत्तेज्ज ?, नो त्ति, एस अभावो, एवं भट्ठो मानुसातो न पुणो । अहवा सभा अनेगखंभसत-सहस्ससंनिविट्ठा, सा कालंतरेण झामिता पडिता, अत्थि पुण कोइ ?, तेहिं चेव पोग्गलेहिं करेज्ज़ा, नोत्ति, एवं माणुस्सं दुल्लहं ।

नि. (८३६) इय दुल्लहलंभं मानुसत्तणं पाविऊण जो जीवो ।
न कुणइ पारत्तहियं सो सोयइ संकमणकाले ॥

वृ- 'इय' एवं दुर्लभलाभं मानुषत्वं प्राप्य ये जीवो न करोति परत्र हितं-धर्मं, दीर्घत्वमलाक्षणिकं, स शोचति सङ्क्रमणकाले' मरणकाल इति गाथार्थः ॥

नि. (८३७) जह वारिमज्झछूढोव्व गयवरो मच्छउव्व गलगहिओ ।
वग्गुरपडिउव्व मओ संवट्टइओ जह व पक्खी ॥

वृ- यथा वारिमध्यक्षिप्त इव गजवरो मत्स्यो वा गलगृहीतः वागुरापतितो वा मृगः संवर्त-जालम् इतः–प्राप्तो यथा वा पक्षीति गाथार्थः ॥

नि. (८३८) सो सोयइ मच्चुजरासमोच्छुओ तुरियनिद्दपक्खित्तो ।
तायारमविंदंतो कम्मभरपणोल्लिओ जीवो ॥

वृ- सोऽकृतपुण्यः शोचति, मृत्युजरासमास्तृतो-व्याप्तः, त्वरितनिद्रया प्रक्षिप्तः, मरणनिद्र-याऽभिभूत इत्यर्थः, त्रातारम् 'अविन्दन्' अलभन्नित्यर्थः, कर्मभरप्रेरितो जीव इति गाथार्थः ।
स चेत्थं मृतः सन्–

नि. (८३९) काऊणमनेगाइं जम्ममरणपरियट्टणसयाइं ।

दुक्खेण मानुसत्तं जइ लहइ जहिच्छया जीवो ॥

वृ- कृत्वाऽनेकानि जन्ममरणपरावर्तनशतानि दुःखेन मानुषत्वं लभते जीवो यदि यदृच्छया, कुशलपक्षकारी पुनः सुखेन मृत्वा सुखेनैव लभत इति गाथार्थः ॥

नि. (८४०) तं तह दुल्लहलंभं विज्जुलयाचंचलं मानुसत्तं ।
लद्धूण जो पमायइ सो कापुरिसो न सप्पुरिसो ।

वृ- तत्तथा दुर्लभलाभं विद्युल्लताचञ्चलं मानुषत्वं लब्ध्वा यः 'प्रमाद्यति' प्रमादं करोति स कापुरुषो न सत्पुरुष इति गाथार्थः ॥ इत्यलं प्रसङ्गेन, प्रकृतं प्रस्तुमः-यथैभिर्दशभिर्दृष्टान्तैर्मानुष्यं दुर्लभं तथाऽऽर्यक्षेत्रादीन्यपि स्थानानि, ततश्च सामायिकमपि दुष्प्रापमिति, अथवा मानुष्ये लब्धेऽप्येभिः कारणैदुर्लभं सामायिकमिति प्रतिपादयन्नाह-

नि. (८४१) आलस्स मोहऽवण्णा थंभा कोहा पमाय किवणत्ता ।
भयसोगा अन्नाणा वक्खेव कुतूहला रमणा ॥

वृ- आलस्यान्न साधुसकाशं गच्छति शृणोति वा, मोहाद् गृहकर्तव्यतामूढो वा, अवज्ञातो वा किमेते विजानन्तीति, स्तम्भाद् वा जात्याद्यभिमानात् क्रोधाद् वा साधुदर्शनादेव कुप्यति, 'प्रमादात्' वा मद्यादिलक्षणात् 'कृपणत्वात' वा दातव्यं किञ्चिदिति, 'भयान्' वा नरकादिभयं वर्णयन्तीति, 'शोकात्' वा इष्टवियोगजात् 'अज्ञानात्' कुदृष्टिमोहितः, 'व्याक्षेपाद्' बहुकर्तव्यतामूढः, 'कुतूहलात्' नटादिविषयात्, 'रमणात्' लावकादिखेड्डेनेति गाथार्थः।

नि. (८४२) एतेहिं कारणेहिं लद्धूण सुदुल्लहंपि मानुस्सं ।
न लहइ सुतिं हियकरिं संसारुत्तारणिं जीवो ॥

वृ- एभिः 'कारणैः' आलस्यादिभिर्लब्ध्वा सुदुर्लभमपि मानुष्यं न लभते श्रुतिं हितकारिणी संसारोत्तारिणीं जीव इति गाथार्थः ॥ व्रतादिसामग्रीयुक्तस्तु कर्मरिपून् विजित्याविकलचारित्रसामायिकलक्ष्मीमवाप्रोति, यानादिगुणयुक्तयोधवज्जयलक्ष्मीमिति ॥ आह च-

नि. (८४३) जाणावरणपहरणे जुद्धे कुसलत्तणं च नीती य ।
दक्खत्तं ववसाओ सरीरमारोग्गया चेव ॥

वृ- यानं हस्त्यादि, आवरणं-कवचादि, ग्रहरणं-खङ्गादि, यानावरणग्रहरणानि, युद्धे कुशलत्वं च-सम्यग् ज्ञानमित्यर्थः, 'नीतिश्च' निर्गमप्रवेशरूपा 'दक्षत्वम्' आशुकारित्वं 'व्यवसायाः' शौर्यं शरीरम् अविकलम् 'आरोग्यता, व्याधिवियुक्ताता चैवेति । एतावद्गुणसाम्ग्र्यविकल एव योधो जयश्रियमाप्रोतीति दृष्टान्तः, दार्ष्टान्तिकयोजना त्वियं-'जीवो जोहो जाणं वयाणि आवरणमुत्तमा खंती। झाणं पहरणमिट्ठं गीयत्थत्तं च कोसल्लं ॥ दव्वाइजहोवायाणुरूवपडिवत्तिवत्तिया नीति। दक्खत्तं किरियाणं जां करणमहीणकालंमि ॥ करण सहणं च तवोवसग्गदुग्गावतीएँ ववसाओ। एतेहिं सुणिरोगो कम्मरिउं जिणति सव्वेहिं ॥' विजितय च समग्रसामायिकश्रियमासादयतीति गाथार्थः ॥ अथवाऽनेन प्रकारेणाऽऽसाद्यत इति-

नि. (८४४) दिट्ठे सुएऽनुभूअ कम्माण खए कए उवसमे अ ।
मनवयणकायजोगे अ पसत्थे लब्भए बोही ॥

वृ- दृष्टे भगवतः प्रतिमादौ सामायिकमवाप्यते, यथा श्रेयांसेन भगवद्दर्शनादवाप्तमिति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथानकं चाधः, कथितमेव, श्रुते चावाप्यते यथाऽऽनन्दकामदेवाभ्यामवाप्तमिति, अत्र कथानकपमुपरितनाङ्गादवसेयम्, अनुभूते क्रियाकलापे सत्यवाप्यते, यथा वल्कचीरिणा पित्रुपकरणं प्रत्युपेक्षमाणेनेति, कथानकं कथिकातोऽवसेयं, कर्मणां क्षये कृते सति प्राप्यते, यथा चण्डकौशिकेन प्राप्तम्, उपशमे च सत्यवाप्यते यथाऽङ्गऋषिणा, मनोवाक्कायययोगे च प्रशस्ते लभ्यते बोधिः, सामायिकमनर्थान्तरमिति गाथार्थः ॥

अथवाऽनुकम्पादिभिरवाप्यते सामायिकमित्याह-

नि. (८४५) अनुकंपऽकामनिज्जर बालतवे दानविनयविब्भंगे ।
संयोगविप्पओगे वसणूसवइड्ढि सक्कारे ॥

नि. (८४६) वेज्जे मेंठे तह इंदनाग कयउण्ण पुप्फसालसुए ।
सिवदुमहुरवणिभाउय आहीरदसण्णिलापुत्ते ॥

वृ- अनुकम्पाप्रवणचित्तो जीवः सामायिकं लभते, शुभपरिणामयुक्तत्वाद्, वैद्यवत्, प्रतिज्ञेयमेव मनाग् विशेषितव्या, हेतुदृष्टान्तान्यत्वं तु प्रतिप्रयोगं भणिष्यामः-अकामनिर्जरावान् जीवः सामायिकं लभते, शुभ्परिणामयुक्तत्वान्मिण्ठवत्, बालतपोयुक्तत्वादिन्द्रनागवत्, सुपात्र-प्रयुक्तयथाराक्तिश्रद्धादानत्वात् कृतपुण्यकवत्, आराधितविनयत्वात् पुष्पशालसुतवत्, अवाप्त-विभङ्गज्ञानत्वात् तापसशिवराजऋषिवत्, दृष्टद्रव्यसंयोगप्रियद्वेष्यपुत्रद्वयवत्, अनुभूतोत्स-वत्वा-दाभीरवत्, भ्रातृद्वयशकटचक्रव्यापादितमल्लण्डीलब्धमानुषत्वस्त्रीगर्भजातप्रियद्वेष्य-पुत्रद्वयवत्, अनुभूतोत्सवत्वादाभीरवत्, दृष्टमहर्द्धिकत्वाद्दशार्णभद्रराजवत्, सत्कारका-ङ्क्षिणोऽप्यलब्ध-सत्कारत्वादिलापुत्रवत्, इयमक्षरगमनिका, साम्प्रतमुदाहरणानि प्रदर्श्यन्ते- बारवतीए कण्हस्स वासुदेवस्स दो वेज्जा-धन्नंतरी वैतरणी य, धन्नंतरी अभविओ, वेतरणी भविओ, सो साधूण गिलाणाणं पिएण साहति, जं जस्स कायव्वं तं तस्स फासुएण पडोआरेण साहति, जति से अप्पणो अत्थि ओसधाणि तो देति, धन्नंतरी पुण जाणि सावज्जाणि ताणि साहति असाधुपा-ओग्गाणि, ततो साहुणो भणंति-अम्हं कतो एताणि ?, सो भणति-न मए समणाणं अट्ठाए अज्झाइतं वेज्जसत्थं, ते दोवि महारंभा महापरिग्गहा य सव्वाए बारवतीए तिगिच्छं करेंति,

अन्नदा कण्हो वासुदेवो तित्थगरं पुच्छति-एते बहूणं ढंकादीणं वधकरणं काऊण कहिं गमिस्संति ?, ताधे सामी साधति-एस धन्नंतरी अप्पतिट्ठाणे नरए उववज्जिहिति, एस पुण वेतरणी कालंजरवत्तिणीए गंगाए महानदीए विंझस्स य अंतरा वाणरत्ताए पच्चायाहिति, ताधे सो वयं पत्तो सयमेव जूहवतित्तणं काहिति, तत्थ अन्नया साहुणो सत्थेण समं धाविस्संति, एगस्स य साधुस्स पादे सल्लो लग्गिहिति, ताधे ते भणंति-अम्हे पडिच्छामो, सो भणति-मा सव्वे मरामो, वच्चह तुब्भे अहं भत्तं पच्चक्खामि, ताहे निब्बंधं काउं सोऽवि ठिओ, न तीरति सल्लं नीनेतुं, पच्छा थंडिल्लं पावितो छायं च, तेऽवि गता, ताहे सो वाणरजूहवती तं पदेसं एति जत्थ सो साधू, जाव पुरिल्लेहिं तं दट्ठूण किलिकिलाइतं, तो तेन जूहाहिवेण तेसिं किलिकिलाइतसद्दं सोऊण रूसितेण आगंतूण दिट्ठो सो साधू, तस्स तं दट्ठूण ईहापूहा करेंतस्स कहिं मया एरिसो दिट्ठोत्ति ?, जाती संभरिता, बारवई संभरति, ताहे तं साधुं वंदति, तं च से सल्लं पासति, ताहे तिगिच्छं सव्वं संभरति, ततो सो गिरिं विलग्गिऊण सल्लुद्धरणिसल्लरोहणीओ ओसहीओ य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गहाय आगतो, ताधे सल्लुद्धरणीए पादो आलित्तो, ततो एगमुहुत्तेण पडिओ सल्लो, पउणावितो संरोहणीए, ताहे तस्स पुरतो अक्खराणि लिहति, जधा–अहं वेतरणी नाम वेज्जो पुव्वभवे बारवतीए आसि, तेहिंवि सो सुतपुव्वो, ताधे सो साधू धम्मं कथेति, ताहे सो भत्तं पच्चक्खाति, तिन्नि रातिंदियाणि जीवित्ता सहस्सारं गतो ।। तथा चाऽऽह–

नि. (८४७) सो वाणरजूहवती कंतारे सुविहियानुकंपाए ।
भासुरवरबोंदिधरो देवो वेमाणिओ जाओ ।।

वृ- निगदसिद्धा ।ओहिं पयुंजति जाव पेच्छति तं सरीरगं तं च साधुं,ताहे आगंतूण देविड्ढिं दाएति, भणति य-तुज्झप्पसादेण मए देविड्ढी लद्धत्ति, ततोऽनेन सो साधू साहरितो तेसिं साधूणं सगासंति, ते पुच्छंति-किहऽसि आगतो ? ताहे साहति । एवं तस्स वानरस्स सम्मत्त-सामाइयसुयसामाइयचरित्ताचरित्तसामाइयाणं अनुकंपाए लाभो जातो, इतरधा निरयपा-योग्गाणि कम्माणि करेत्ता नरयं गतो होन्तो । ततो चुतस्स चरिथसामाइयं भविस्सति सिद्धी य १ । अकामनिज्जराए, वसंतपुरे नगरे इब्भवधुगा नदीए ण्हाति, अन्नो य तरुणो तं दट्ठूण भणति-

सुण्हातं ते पुच्छति एस नदी मत्तवारणकरोरु !।
एते य नदीरुक्खा अहं च पादेसु ते पडिओ ।।१।। (सा भणति)-
'सुभगा होंतु नदीओ चिरं च जीवंतु जे नदीरुक्खा ।
सुण्हातपुच्छगाण य धत्तिहामो पियं काउं ।।२।।

ततो सो तीए घरं वा दारं वा अयाणन्तो चिन्तेति–

"अन्नपानैर्हरेद्बालां, यौवनस्थानं विभूषया ।
वेश्यां स्त्रीमुपचारेण, वृद्धां कर्कशसेवया ।।१।।"

तीसे बिइज्झियाणि चेडरूवाणि रुक्खे पलोएंताणि अच्छंति, तेन तेसिं पुप्फाणि फलाणि य दाऊण पुच्छिताणि-का एसा ?, ताणि भणंति-अमुगस्स सुण्हा, ताहे सो चिंतेति-केण उवाएण एतीए समं मम संपयोगो भवेज्जा ?, ततो नेन चरिका दाणमाणसंगहीता काऊण विसज्जिता तीए सगासं, ताए गंतूण सा भणिता-जधा अमुगो ते पुच्छति, तीए रुट्ठाए पत्तुल्लगाणि धोवंतीए मसिलित्तेण हत्थेण पिट्ठीए आहता, पंचंगुलीओ जाताओ, ओवारेण य निच्छूढा, सा गता साहति-नामंपि न सहति, तेन नातं जहा-कालपक्खपंचमीए, ताहे तेन पुणरवि पेसिता पवेसजाणणानिमित्तं, ताहे सलज्जाए आहणिऊण असोगवणियाए छिंडियाए निच्छूढा, सा गता साहति-नामंपि न सहति, तेन नातो पवेसो, तेनावदारेण अइगतो, असोगवणियाए सुत्ताणि, जाव ससुरेण दिट्ठा, तेन णातं, जधा-न मम पुत्तोत्ति, पच्छा से पादातो नेउरं गहितं, चेतितं च तीए, भणितो य नाए-नास लहुं, सहायकिच्चं करेज्जासि, इतरी गंतूण भत्तारं भणति–इत्थं धम्मो, जामो असोगवणियं, गताणि, असोगवणियाए पसुत्ताणि, ताहे भत्तारं उठवेत्ता भणति-तुज्झं एतं कुलाणुरूवं ?, जं मम पादातो ससुरो नेउरं गेण्हति, सो भणति-सुवसु लभिहिसि पभाते, थेरेण सिट्ठं, सो रुट्ठो भणति–विवरीतोऽसि थेरा ?, सो भणति-मए दिट्ठो अन्नो, ताहे विवादे सा भणति–अहं अप्पाणं सोहेमि, एवं करेहि, ण्हाता, ताहे जक्खघरं अइगता, जो कारी सो लग्गति दोण्हं जंघाणं अंतरेण वोलंतओ, अकारी मुच्चति, सा पधाविता, ताहे सो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विडो पिसायरूवं काऊण सागतएणं गेण्हति,

ताहे तत्थ गंतूण जक्खं भणति-जो मम पितिदिन्नओ तं च पिसायं गोत्तूण जइ अन्नं जाणामि तो मे तुमं जाणासित्ति, जक्खो विलक्खो चिंतेति-पेच्छह केरिसाणि मंतेति ?, अहंपि वंचितो नाए, नत्थि सतित्तणं धूत्तीए, जाव चिंतेति ताव निप्फिडिता, ताहे सो थेरो सव्वेण लोगेण हीलितो, तस्स ताए अद्धितीए निद्दा नट्ठा, ताहे रन्नो तं कण्णे गतं, रायाणएण अंतेउरवालओ कतो, आभिसिक्कं च हत्थिरयणं रण्णो वासघरस्स हेट्ठा बद्धं अच्छति, देवी य हत्थिमेंठे आसत्तिया, नवरं रत्तिं हत्थिणा हत्थो पसारितो, सा पासायाओ ओयारिया, पुणरवि पभाए पडिविलएता, एवं वच्चति काले, अन्नता चिरं जातंति हत्थिमेंठेण हत्थिसंकलाए हता, सा भणति-सो पुरिसो तारिसो न सुवति, मा रूसह, तं थेरो पेच्छति, सो चिंतेति-जति एताओवि एरिसिओ, किंनु ताओ भद्दियाउत्ति सुत्ता, पभाते सव्वो लोगो उट्ठितो, सो न उट्ठितो, राया भणति-सुवउ, सत्तमे दिवसे उट्ठितो, राइणा पुच्छितेण कहितं-जहेगा देवी न याणामि कतरत्ति, ताहे राइणा भेंडमओ हत्थी कारितो, सव्वाओ अंतेपुरियाओ भणियाओ-एयस्स अच्चणियं करेत्ता ओलंडेह, सव्वाहिं ओलंडितो, सा नेच्छति, भणति-अहं बीहेमि, ताहे राइणा उप्पलणालेण आहता, जाव उमुच्छिता पडिया ततो से उवगतं-जधेसा कारित्ति, भणिता–

'मत्तं गयमारुहंतीए भेंडमयस्स गयस्स भयतिए ।
इह मुच्छित उप्पलाहता तत्थ न मुच्छित संकलाहता ॥१॥'

पुट्ठी से जोइया, जाव संकलपहारा दिट्ठा, ताहे राइणा हत्थिमेंठो सा य दुयगाणि वि तम्मि हत्थिम्मि विलग्गाविऊण छण्णकडए विलइताणि, भणितो मिंठो-एत्थ अप्पततीओ गिरिप्पवातं देहि, हत्थिस्स दोहिवि पासेहिं वेलुग्गाहा ठविता, जाव हत्थिणा एगो पादो अ'गासे कतो, लोगो भणति-किं तिरिओ जाणति ?, एताणि मारेतव्वाणि, तहावि राया रोसं न मुयति, ततो दो पादा आगासे ततियवारए तिन्नि पादा आगासे एक्केण पादेन ठितो, लोगेण अक्कंदो कतो-किं एंतं हत्थिरयणं विनासेहि ?, रन्नो चित्तं ओआलितं, भणितो-तरसि नियत्तेउं ?, भणति-जति अभयं देह, दिन्नं, तेन नियत्तितो अंकुसेण जहा भमित्ता थले ठितो, ताहे उत्तारेत्ता णिव्विसताणि कयाणि । एगत्थ पच्चंतगामे सुन्नघरे ठिताणि, तत्थ य गामेल्लयपारद्धो चोरो तं सुन्नघरं अतिगतो, ते भणंति-वेढेतुं अच्छामो, मा कोवि पविसउ, गोसे घेच्छामो, सोऽवि चोरो लुडंतो किहवि तीसे ढुक्को, तीसे फासो वेदितो, सा ढुक्का भणति-कोऽसि तुमं ?, सो भणति-चोरोऽहं, तीए भणियं-तुमं मम पती होहि, जा एतं साहामो जहा एस चोरोत्ति, तेहिं कल्लं पभाए मेंठो गहिओ, ताहे उविद्धो सूलाए भिण्णो, चोरेण समं सा वच्चति, जावंतरा नदी, सा तेन भणिता-जधा एत्थं सरत्थंभे अच्छ, जा अहं एताणि वत्थाभरणाणि उत्तारेमि, सो गतो, उत्तिण्णो पधावितो, सा भणति

"पुणा नदी दीसइ कागपेज्ञा, सव्वं पियाभंडग तुज्झ हत्थे ।
जधा तुमं पारमतीतुकामो, धुवं तुमं भंड गहीउकामो ॥१॥

सो भणति–

चिरसंथुतो बालि ! असंथुएणं, मेल्हे पिया ताव धुओऽधुवेणं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जाणेमि तुज्झ प्पयइस्सभावं, अन्नो नरो को तुह विस्ससेज्ञा ?॥१॥"

सा भणति-किं जाहि ?, सो भणति-जहा ते सो मारावितो एवं ममंपि कहंचि मारेहिसि। इतरोवि तत्थ विद्धो उदगं मग्गति, तत्थेगो सड्ढो, सो भणति-जति नमोक्कारं करेसि तो देमि, सो उदगस्स अट्ठा गतो, जाव तंमि एंते चेव सो नमोक्कारं करेंतो चेव कालगतो, वाणमंतरो जातो, सुड्ढोवि आरक्खियपुरिसेहिं गहितो, सो देवो ओहिं पयुंजति, पेच्छति सरीरगं सड्ढं च बद्धं, ताहे सो सिलं विउव्वित्ता मोएति, तं च पेच्छंति सरथंभे णिलुक्कं, ताहे से धिणा उप्पन्ना, सियालरूवं विउव्वित्ता मंसपेसीए गहियाए उदगतीरेण वोलेति, जाव नदीतो मच्छो उच्छलिऊण तडे पडितो, ततो सो मंसपेसिं मोत्तूण मच्छस पधावितो, सो पाणिए पडितो, मंसपेसीवि सेणेण गहिता, ताहे सियालो झायति, ताए भण्णति –

मंसपेसी परिच्चज्ञ मच्छं पच्छसि जंबुआ !।
चुक्को मंसं च मच्छं च कलुणं झायसि कोण्हुआ !॥१॥
तेन भण्णति-'पत्तपुडपडिच्छण्णे ! जनयस्स अयसकारिए !।
चुक्का पत्ति च जारं च कलुणं झायसि बंधकी ॥२॥

एवं भणिया ता विलिया जाता, ताहे सो सयं रूवं दंसेति, पण्णवित्ता वुत्ता-पव्वयाहि, ताहे सो राया तंज्ञितो, तेन पडिवण्णा, सक्कारेण णिक्खंता, देवलोयं गता एवमकामनिज्ञराए मेण्ठस्स २ ॥

बालतवेण-वसंतपुरं नगरं, तत्थ सिट्ठिघरं मारिए उच्छादितं, इंदनागो नाम दारओ, सो छुट्टो, छुहितो गिलाणो पाणितं मग्गति, जाव सव्वाणि मताणि पेच्छति, बारंपि लोगेण कंटियाहिं ढक्कियं, ताहे सो सुणइयच्छिद्देणं णिग्गंतूण तंमि नगरे कप्परेण भिक्खं हिंडति, लोगो से देइ सदेसभूतपुव्वोत्तिकाउं, एवं सो संवड्ढइ। इतो य एगो सत्थवाहो रायगिहं जाउकामो घोसणं घोसावेति, तेन सुतं, सत्थेण समं पत्थितो, तत्थ तेन सत्थे कूरो लद्धो, सो जिमितो, न जिण्णो, सेट्ठिणा बितियदिवसे अच्छति, सत्थवाहेण दिट्ठो, चिंतेति-नूनं एस उववासिओ, सो य अव्वत्त-लिंगो, बितियदिवसे हिंडंतस्स सेट्ठिणा बहुंणिद्धं च दिन्नं, सो तेन दुवे दिवसा अज्ञिण्णएण अच्छति, सत्थवाहो जाणति-एस छट्ठण्णकालिओ, तस्स सद्धा जाता, सो ततियदिवसे हिंडंतो सत्थवाहेण सद्दावितो, कीसऽसि कल्लं नागतो ?, तुण्हिक्को अच्छति, जाणइ, जधा-छट्ठं कतेल्लयं, ताहे से दिन्नं, तेनवि अन्नेवि दो दिवसे अच्छावितो, लोगोवि परिणतो, अन्नस्स निमंतेंतस्सवि न गेण्हति, अन्ने भणंति-एसो एगपिंडिओ, तेन तं अट्ठापदं लद्धं, वाणिएण भणितो-मा अन्नस्स खणं गेण्हेज्ञासि, जाव नगरं गम्मति ताव अहं देमि, गता नगरंस तेन से नियघरे मढो कतो, ताधे सीसं मुंडावेति कासायाणि य चीवराणि गेण्हति, ताधे विक्खातो जणे जातो, ताधे तस्सवि घरे नेच्छति, ताधे जद्दिवसं से पारणयं तद्दिवसं से लोगो आनेइ भत्तं, एगस्स पडिच्छति, ततो लोगो न याणति-कस्स पडिच्छितंति ?, ताधे लोगेण जाणणानिमित्तं भेरी कता, जो देति सो ताडेति, ताहे लोगो पविसति, एवं वच्चति कालो। सामी य समोसरितो, ताहे साधू संदिसावेत्ता भणिता-मुहुत्तं अच्छह, अणेसणा, तंमि जिमिते भणिता-ओयरह, गोतमो य भणितो-मम वयणेणं भणेज्ञासि-भो अणेगपिंडिया ! एगपिंडितो ते दट्ठमिच्छति, ताहे गोतम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सामिणा भणितो रुट्ठो, तुब्भे अनेगाणि पिंडसताणि आहारेह, अहं एगं पिंडं भुंजामि, तो अहं चेव एगपिंडिओ, मुहुत्तन्तरस्स उवसंतो चिंतेति-ण एते मुसं वदंति, किह होज्जा ?, लद्धा सुती, होमि अनेगपिंडितो, जद्दिवसं मम पारणयं तद्दिवसं अनेगाणि पिंडसताणि कीरंति, एते पुण अकतमकारितं, भुंजंति, तं सच्चं भणंति, चिन्तंतेण जाती सरिता, पत्तेयबुद्धो जातो, अज्झयणं भासति, इंदणागेण अरहता वुत्तं, सिद्धो य एवं बालतवेण सामाइयं लद्धं तेन ३।

दानेन, जधा--एगाए वच्छवालीए पुत्तो, लोगेण उस्सवे पायसं ओवक्खडितं, तत्थासन्नघरे दारगरूवाणि पासति पायसं जिमिंताणि, ताधे सो मायरं भणेइ-ममऽवि पायसं रंधेहि, ताहे नत्थित्ति सा अद्धितीए परुण्णा, ताओ सएज्झियाओ पुच्छंति, णिब्बंधे कथितं, ताहिं अनुकंपाए अन्नाएवि अन्नाएवि आनीतं खीरं साली तंदुला य, ताधे थेरीए पायसो रद्धो, ततो तस्स दारयस्स ण्हायस्स पायसस्स घतमधुसंजुत्तस्स थालं भरेऊण उवट्ठितं, साधू य मासखवणपारणते आगतो, जाव थेरी अंतो वाउला ताव तेन धम्मोऽवि मे होउत्ति तस्स पायसस्स तिभागो दिन्नो, पुणो चिंतितं-अतिथोवं, बितिओ तिभागो दिन्नो, पुणोवि नेन चिंतितं-एत्थ जति अन्नं अंबक्खलगादि छुभति तोऽवि नस्सति, ताहे तइओ तिभागो दिन्नो, ततो तस्स तेन दव्वसुद्धेण दायगसुद्धेण गाहगसुद्धेण तिविहेण तिकरणसुद्धेण भावेणं देवाउए निबद्धे, ताधे माता से जाणति-जिमिओ, पुणरवि भरितं, अतीव रंकत्तणेण भरितं पोट्टं, ताधे रत्तिं विसूइयाए मतो देवलोगं गतो, ततो चुतो रायगिहे नगरे पधाणस्स धनावहस्स पुत्तो भद्दाए भारियाए जातो, लोगो य गब्भगते भणति-कयपुन्नो जीवो जो उववण्णो, ततो से जातस्स नामं कतं कतपुण्णोथि, वड्ढितो, कलाओ गहियातो, परिणीतो, माताए दुल्ललियगोट्ठीए छूढो, तेहिं गणियाघरं पवेसितो, बारसहिं वरिसेहिं णिद्धणं कुलं कतं, तोऽवि सो न निग्गच्छति, मातापिताणि से मताणि, भज्जा य से आभरणगाणि चरिमदिवसे पेसेति, गणितामायाए नातं-निस्सारो कतो, ताधे ताणि अन्नं च सहस्सं पडिविसज्जितं, गणियामाताए भण्णइ- निच्छुभउ एसो, सा नेच्छति, ताहे चोरियं नीणिओ घरं सज्जिज्जति, उत्तिण्णो बाहिं अच्छति, ताहे दासीए भण्णति-निच्छूढोऽवि अच्छसि ?, ताहे नियघरयं सडियपडियं गतो, ताहे से भज्जा संभमेणं उट्ठिता, ताहे से सव्वं कथितं, सोगेणं अप्फुण्णो भणति-अत्थि किंचि ? जा अन्नहिं जाइत्ता ववहरामि, ताहे जाणि आभरणगाणि गणितामाताए जं च सहस्सं कप्पासमोल्लं दिन्नं ताणि से दंसिताणि, सत्थो य तद्दिवसं कंपि देसं गंतुकामओ, सो तं भंडमोल्लं गहाय तेन सत्थेणं समं पधावितो, बाहिं देउलियाए खट्टं पाडिऊणं सुत्तो।

वृ-उत्पादनम् उत्पत्तिः, प्रसूतिः उत्पाद इत्यर्थः, सोऽस्य नमस्कारस्य नयानुसारतश्चिन्त्यः, तथा निक्षेपणं निक्षेपो न्यास इत्यर्थः, स चास्य कार्यः, पद्यतेऽनेनेति पदं तच्च नामिकादि, तच्चास्य वाच्यं, तथा 'पदार्थः' पदस्यार्थः पदार्थः, स च वाच्यः, तस्य च निर्देशः सदाद्यनुयोगद्वारविषयत्वात्, प्रकर्षेण रूपणा-प्ररूपणा कार्येति, वसन्त्यस्मिन् गुणा इति वस्तु तदर्हं वाच्यम्, आक्षेपणम् आक्षेपः आशङ्केत्यर्थः, सा च कार्या, प्रसिद्धिः तत्परिहाररूपा वाच्येति, क्रमः अर्हदादिरभिधेयः, 'प्रयोजनं' तद्विषयमेव, अथवा येन प्रयुक्तः प्रवर्तते तत्प्रयोजनम्-अपवर्गाख्यं, तथा 'फलं' तच्च क्रियाऽनन्तरभावि स्वर्गादिकम्, अन्ये तु व्यत्ययेन प्रयोजनफलयोरर्थप्रतिपादयन्ति, नमस्कारः खल्वेभिर्द्वारैश्चिन्त्य इति गाथासमुदायार्थः ॥ 'यथोद्देशं निर्देश' इति न्यायमाश्रित्योत्पत्तिद्वारनिरूपणायाऽऽह निर्युक्तिकारः–

नि. (८८८) उप्पन्नाऽनुप्पन्नो इत्थ नयाऽऽइनिगमस्सऽनुप्पन्नो ।
सेसाणं उप्पन्नो जइ कत्तो ?, तिविहसामित्ता ॥

वृ- उत्पन्नश्चासावनुत्पन्नश्च स इति समानाधिकरणः, क्तेन नञ्विशिष्टेनानञ् कृताकृतादिवदुत्पन्नानुत्पन्नः, स्याद्वादिन एव एवंप्रकारः समासो युज्यते, नान्यस्यैकान्तवादिनः, एकत्रैकदा परस्पविरुद्धधर्मानभ्युपगमात्, आह–स्याद्वादिनोऽपि कथमेकत्रैकदा परस्परविरुद्धधर्माध्यास इति, उच्यते, 'एत्थ णय'त्ति अत्र नयाः प्रवर्तन्ते, ते च नैगमादयः सप्त, नैगमोऽपि द्विभेदः-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वसङ्ग्राही देशसङ्ग्राही च, तत्रादिनैगमस्य सामान्यमात्रावलम्बित्वात् तस्य चोत्पादव्यय-रहितत्वान्नमस्कारस्यापि तदन्तर्गतत्वादनुत्पन्नः, 'सेसाणं उप्पण्णो'त्ति शेषाः-विशेषग्राहिणस्तेषां शेषाणां विशेषग्राहित्वात् तस्य चोत्पादव्ययवत्त्वात् उत्पादव्यशून्यस्य वान्ध्येयादिवदवस्तुत्वात् नमस्कारस्य च वस्तुत्वादुत्पन्न इति, आह-शेषाः सङ्ग्रहादयः, सङ्ग्रहस्य च विशेषग्राहित्वं नास्तीति, उच्यते, तस्यादिनैगम एवान्तर्भावान्न दोष इति, अतः शेषाणामुत्पन्नः, 'जइ कत्तो'त्ति यद्युत्पन्नः कुत ? इति, आह-'तिविह-सामित्ता' त्रिविधं च तत् स्वामित्वं चेति समासः, तस्मात्त्रिविधस्वामित्वात्-त्रिविधस्वामिभावात् त्रिविधकारणादित्यर्थः। आह-एवमप्येकत्रैकदा परस्परविरुद्धधर्माध्यासदोषस्तदवस्थ एव, न, अशेषवस्तुन एव तत्त्वतः सामान्यविशेषात्मकत्वात्, सामान्यधैः सत्त्वादिभिरनुत्पादात् विशेषधैः संस्थानानुपूर्व्यादिभिरुत्पादाद्, विजृम्भितं चात्र भाष्यकृता तत्तु नोच्यते ग्रन्थविस्तर भयाद्, गमिनकामात्रमेवैतदिति गाथार्थः यदुक्तं -'त्रिविध-स्वामित्वादि'ति, तत् त्रिविधस्वामित्वमुपदर्शयन्नाह-

नि. (८८९) समुट्ठाण १ वायणा २ लद्धिओ य ३ पढमे नयत्तिए तिविहं।
उज्जुसुय पढमवज्जं सेसनया लद्धिमिच्छंति ॥

वृ- समुत्थानतो वाचनातो लब्धितश्च नमस्कारः समुत्पद्यत इति वाक्यशेषः, सम्यक् सङ्गतं प्रशस्तं वोत्थानं समुत्थानं तन्निमित्तं नमस्कारस्य, कस्य समुत्थानम् ?, अन्यस्याश्रुतत्वात्त-दाधारभूतत्वात् प्रत्यासन्नत्वाद् देहस्यैव गृह्यते इति, युक्तं च देहसमुत्थानं नमस्कारकारणं, तद्भावभावित्वान्यथाऽनुपपत्तेरिति, अतः समुत्थानतः १, वाचनं वाचना-परतः श्रवणम् अधिगम उपदेश इत्यनर्थान्तरं, मा च नमस्कारकारणं, तद्भावभावित्वादेवेति, अतो वाचनात् २, लब्धिः-तदावरणकर्मक्षयोपशमलक्षणा, सा च कारणं, तद्भावभावित्वादेव, अतो लब्धितश्च ३, पदान्तप्रयुक्तश्चशब्दो नयापेक्षया त्रयाणामपि प्राधान्यख्यापनार्थः। अत एवाह-'पढमे नयत्तिए तिविहं'ति प्रथमे नयत्रिकेऽशुद्धनैगमसङ्ग्रहौ कथं त्रिविधं कारणमिच्छतः ?, तयोः सामान्यमात्रावलम्बित्वाद्, उच्यते, 'आदिनेगमस्सऽणुप्पन्न' इत्यत्रेव प्रथमनयत्रिकात् तयोरुत्क-लितत्वान्न दोषः, 'उज्जुसुयपढमवज्जंति' ऋजुसूत्रः प्रथमवर्ज-समुत्थानाख्यकारणशून्यं कारणद्वय-मेवेच्छति, समुत्थानस्य व्यभिचारित्वात्, तद्भावेऽपि, वाचनालब्धिशून्यस्यासम्भवात्, 'सेस नया लद्धिमिच्छंति'त्ति शेषनयाः-शब्दादयो लब्धिमेव एकां कारण-मिच्छन्ति, वाचनाया अपि व्यभिचारित्वात्, तथाहि-सत्यामपि वाचनायां लब्धिरहितस्य गुरुकर्मणोऽभव्यस्य वा नैवोत्पद्यते नमस्कारः, तस्यां सत्यामेवोत्पद्यते, ततोऽसाधरणत्वात्सैव कारणमिति गाथार्थः ॥

इदानीं निक्षेपः, स च चतुर्धा-नामनमस्कारः स्थापनानमस्कारः द्रव्यनमस्कारः भावन-मस्कारश्च, नामस्थापने सुगमे, ज्ञभव्यशरीरातिरिक्तद्रव्यनमस्काराभिधित्सयाऽऽह-

नि. (८९०) निह्नाइ दव्व भावोवउत्तु जं कुज्ज संमदिट्ठी उ।
नेवाइअं पयं दव्वभावसंकोअनपयत्थो।

वृ- निह्नवादिर्द्रव्यनमस्कारः, नमस्कारनमस्कारवतोरव्यतिरेकात्, आदिशब्दात् द्रव्यार्थो वा यो मन्त्रदेवताद्याराधनादाविति, एत्थ दव्वनमोक्कारे उदाहरणं-वसंतपुरे नयरे जियसत्तू राया, धारिणीसहिओ ओलोयणं करेइ, दमगपासणं, अनुकंपाए नइसरिसा रायाणोत्ति भणइ देवी,

रन्ना आणाविओ, कयालंकारो दिन्नवत्थो तेहिं उवनीओ, सो य कच्छूए गहिएल्लओ, भासुरं ओलग्गाविज्जइ, कालंतरेण रायाणए से रज्जं दिन्नं, पेच्छइ दंडभडभोइए देवयाययणपूयाओ करेमाणे, सो चिंतेइ-अहं कस्स करेमि ?, रन्नो आययणं करेमि, तेन देउलं कयं, तत्थ रन्नो देवीए य पडिमा कया, पडिमापिवेसे आणीयाणि पुच्छंति, साहइ, तुट्ठो राया सक्कारेइ, सो तिसंझं अच्चेइ, पडियरणं, तुट्ठेण राइणा से सव्वट्ठाणगाणि दिन्नानि, अन्नया राया दंडयत्ताए गओ तं सव्वंतेउरट्ठाणेसु ठवेऊणं, तत्थ य अंतेउरियाओ निरोहं असहमाणिओ तं चेव उवचरंति, सो नेच्छइ, ताहे ताओ भत्तगं नेच्छंति, पच्छा सणियं पविट्ठो, विट्टालिओ य, राया आगओ, सिट्ठे विनासिओ । रायत्त्थाणीओ तित्थयरो, अंतेउरत्थाणीया छक्काया, अहवा न छक्काया किंतु संकादओ पदा, मा सेणियादीणवि दव्वनमोक्कारो भविस्सइ, दमगत्थाणिया साहू, कच्छूल्लत्थाणीयं मिच्छत्तं, भासूरत्थाणीयं सम्मत्तं, डंडो विनिवाओ संसारे, एस दव्वनमोक्कारो। 'भावोवउत्तु जं कुज्ज सम्मद्दिट्ठी उ' नोआगमतो भावनमस्कारः 'यत् कुर्यात्' यत् करोति शब्दक्रियादि सम्यगृद्दष्टिरेवेति, अत्र च नामादिनिक्षेपाणां यो नयो यं निक्षेपमिच्छति तदेतद्विशेषा-वश्यकादाशङ्कापरिहारसहितं विज्ञेयम्, इह तु ग्रन्थविस्तरभयादल्पमतिवि-नेयजनानुग्रहार्थं च नोक्तमिति ॥

पदद्वारमधुना-पद्यतेऽनेनेति पदं, तच्च पञ्चधा-नामिकं नैपातिकम् औपसर्गिकम् आख्यातिकं मिश्रं चेति, तत्राश्व इति नामिकं, खल्विति नैपातिकं, परीत्यौपसर्गिकं, धावतीत्याख्यातिकं, संयत इति मिश्रं, रूवं नामिकादिपञ्चप्रकारपदसम्भवे सत्याह–'नेवाइयं पयं'ति निपतत्यर्हदादिष-दादिपर्यन्तेष्विति निपातः, निपातादागतं तेन वा निर्वृत्तं स एव वा स्वार्थिकप्रत्ययविधानात् नैपातिकमिति, तत्र 'नम' इति नैपातिकं पदं ॥ पदार्थद्वारमधुना–तत्र गाथावयवः 'दव्वभाव-संकोयणपयत्थो' त्ति नम इत्येतत् पूजार्थं 'णम ग्रह्वत्वे' धातुः 'उणादयो बहुल' मित्यसुन्, नमोऽर्हद्भ्यः, स च द्रव्यभावसङ्कोचनलक्षण इति, तत्र द्रव्यसंकोचनं करशिरः-पादादिसङ्कोचः, भावसङ्कोचनं विशुद्धस्य मनसो नियोगः, द्रव्यभावसज्ञोचनप्रधानः पदार्थो द्रव्यभावसङ्कोचन-पदार्थः, शाकपार्थिवादेराकृतिगणत्वात् प्रधानपदलोपः, अत्र च भङ्ग-चतुष्टयं–द्रव्यसङ्कोचो न भावसङ्कोच इत्येकः, यथा पालकस्य, भावसङ्कोचो न द्रव्यसङ्कोच इत्यनत्तरदेवानां द्वितीयः, द्रव्यभावयोः सङ्कोच इति शाम्बस्य तृतीयः, न द्रव्यसङ्कोचो न भावसङ्कोच इति शून्यः । इह च भावसङ्कोचः प्रधानो द्रव्यसङ्कोचोऽपि तच्छुद्धिनिमित्त इति गाथार्थः ॥ प्ररूपणाद्वारप्रति-पादनायाऽऽह–

नि. (८९१) दुविहा परूवणा छप्पया य १ नवहा य २ छप्पया इणमो ।
किं १ कस्स २ केण व ३ कहिं ४ किच्चिरं ५ कइविहो व ६ भवे ॥

वृ- 'द्विविधा' द्विप्रकारा प्रकृष्टा–प्रधाना प्रगता वा रूपणा–वर्णना प्ररूपणेति, द्वैविध्यं दर्शयति-षट्पदा च नवधा च-नवप्रकाश नवपदा चेत्यर्थः, चशब्दात् पञ्चपदा च, तत्र 'छप्पया इणमो' षट्पदेयं षट्पदा इदानीं वा, किं ? कस्य ? केन वा ? क्व वा ? कियच्चिरं ? कतिविधो वा भवेन्नमस्कार इति गाथासमुदायार्थः ॥ तत्राऽऽद्यद्वारा वयवार्थाभिधित्सयाऽऽह–

नि. (८९२) किं ? जीवो तप्परिणओ पुव्वपडिवन्नओ उ जीवाणं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवस्स व जीवाण व पडुच्च पडिवज्जमाणं तु ॥

वृ- किं शब्दः क्षेपप्रश्नपुंसकव्याकरणेषु, तत्रेह प्रश्ने, अयं च प्राकृतेऽलिङ्गः सर्वनामनपुंसकनिर्देशः सर्वलिङ्गैः सह यथायोगमभिसम्बध्यते, किं सामायिकं ? को नमस्कारः?, तत्र नैगमाद्यशुद्धनयमतमधिकृत्याजीवादिव्युदासेनाह– जीवो नाजीवः, स च सङ्ग्रहनयापेक्षया मा भूदविशिष्टः स्कन्धः, यथाऽऽहुस्तन्मतावलम्बिनः–'पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्, उतामृतत्वस्येशानो यदन्नेनातिरोहती'त्यादि, तथा तन्नयविशेषापेक्षयैव मा भूदविशेषो ग्राम इत्यतो नोस्कन्धो नोग्राम इति वाक्यशेषः, सर्वास्तिकायमयः स्कन्धः, तद्देशो जीवः, स चैकदेशत्वात् स्कन्धो न भवति, अनेकस्कन्धापत्तेः, अस्कन्धोऽपि न भवति, स्कन्धाभावप्रसङ्गाद्, अनभिलाप्योऽपि न भवति, वस्तुविशेषत्वात्, तस्मान्नोस्कन्धः, स्कन्धैकदेश इत्यर्थः, स्कन्धदेशविशेषार्थद्योतको नोशब्दः, एवं नोग्रामोऽपि भावनीयः, नवरं ग्रामः-चतुर्दशभूतग्रामसमुदायः, यथोक्तम्–

"एगिंदिय सुहुमियरा सन्नियपणिंदिया सबितिचऊ ।
पज्जत्तापज्जत्ता भेदेणं चोद्दसग्गामा ॥१॥"

अलंप्रसङ्गेन, प्रकृतं प्रस्तुमः-सामान्येनाशुद्धनयानां जीवस्तज्ज्ञानलब्धियुक्तो योग्यो वा नमस्कारः, शब्दादिशुद्धनयमतं त्वधिकृत्याह–'तप्परिणओ' जीव इति वर्तते, स हि नमस्कारपरिणामपरिणत एव नमस्कारो नापरिणत इत्यर्थः । एकत्वानेकत्वचिन्तायां तु नैगमस्य सङ्ग्रहव्यवहारान्तर्गतत्वात् सङ्ग्रहादिभिरेव विचारः, तत्र सङ्ग्रहस्य नमस्कारजातिमात्रापेक्षत्वादेको नमस्कारः, व्यवहारस्य व्यवहारपरत्वाद् वहवो नमस्काराः, ऋजुसूत्रादीनां वर्तमानमात्रग्राहित्वाद् बहव एवोपयुक्ताश्चेति समासार्थः, व्यासार्थो विशेषावश्यकादवसेयः, किमितिद्वारं गतं । साम्प्रतं कस्य ? इति द्वारम्, इह च प्राक्प्रतिपन्नप्रति-पद्यमानकाङ्गीकरणतोऽभीष्टमर्थं निरूपयन्नाह-'पुव्वपडिवन्नओ उ जीवाणं' इत्यादि, प्रकृतचिन्तायामिह पूर्वप्रतिपन्न एव यदाऽधिक्रियते तदा व्यवहारनयमतमाश्रित्य जीवानां जीवस्वामिक इत्यर्थः, प्रतिपद्यमानं तु प्रतीत्य जीवस्य जीवानां (वा) इत्यक्षरगमनिका, भावार्थस्तु नयैश्चिन्त्यते- यस्मान्नमस्कार्य-नमस्कर्तृद्वया-धीनं नमस्कारकरणं, तत्र नैगमव्यवहारमतं नमस्कार्यस्य नमस्कारः,न कर्तुः,यद्यपि नमस्कार-क्रियानिष्पादकः कर्ता तथाऽपि नासौ तस्य, स्वयमनुपयुज्यमानत्वात्,यतिभिक्षावत्,तथाहि-न दातुर्भिक्षा निष्पादकस्य, अपि तु भिक्षोर्भिक्षेति प्रतीतम्, अत्र च सम्बन्धविशेषपेक्षावशप्रापिता अष्टौ भङ्गा भवन्ति, तद्यथा–जीवस्य १ अजीवस्य २ जीवानां ३ अजीवानां ४ जीवस्य चाजीवस्य च ५ जीवस्य चाजीवानां च ६ जीवानामजीस्य च ७ जीवानामजीवानांच ८, अत्रोदाहरणानि–

"जीवस्स सो जिनस्स व अज्ञीवस्स उ जिणिंदपडिमाए।
जीवाए जतीणं पिव अज्ञीवाणं तु पडिमाणं ॥१॥"
जीवस्साजीवस्स य जइणो बिंबस्स चेगओ समयं ।
जीवस्सजीवाण य जइणो पडिमाण चेगत्थं ॥२॥
जीवाणजीवस्स य जईण बिंबस्स चेगओ समयं ।
जीवाणमजीवाण य जईण पडिमाण चेगत्थं ॥३॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सङ्ग्रहमतं तु नमः सामान्यमात्रं तत्स्वामिमात्रस्य च वस्तुनो जीवो नम इति च तुल्याधिकरणम्, अभेदपरमार्थत्वात् तस्य, कश्चित्तु शुद्धतरः पूज्यजीवपूजकजीवसम्बन्धाज्जीवस्यैव नमस्कार इत्येकं भङ्गं मतमपीदमेव, केवलमुपयुक्तकर्तुस्वामिकोऽसौ, तस्य ज्ञानमात्रत्वात् ज्ञानमात्रता चास्योपयोगादेव फलप्राप्तिः, शब्दक्रियाव्यभिचारात्, एकत्वानेकत्वविचारस्तु नैगमादिनयापेक्षया पूर्ववदायोजनीय इति गाथार्थः ॥

कस्येति गतं, केन ? इत्यधुना निरूप्यते-केन साधनेन नमस्कारः ?, तत्रेयं गाथा-

नि. (८९३) नाणावरणिज्जस्स य दंसणमोहस्स तह खओवसमे ।
जीवमजीवे अट्ठसु भंगेसु उ होइ सव्वत्थ ॥

वृ- 'ज्ञानावरणीयस्य' इति सामान्यशब्देऽपि मतिश्रुतज्ञानावरणीयं गृह्यते, मतिश्रुतज्ञानान्तर्गतत्वात् तस्य, तथा सम्यग्दर्शनसाहचर्याज्ज्ञानस्य दर्शनमोहनीयस्य च क्षयोपशमेन साध्यते, प्राकृतशैल्या तृतीयानिर्देशो द्रष्टव्यः, तस्य चावरणस्य द्विविधानि स्पर्धकानि भवन्ति-सर्वोपघातीनि देशोपघातीनि च, तत्र सर्वेषु सर्वघातिषूद्घातितेषु देशोपघातिनां च प्रतिसमयं विशुद्ध्यपेक्षं भागैरनन्तैः क्षयमुपगच्छद्भिर्विमुच्यमानः क्रमेण प्रथममक्षरं लभते, एवमेकैकवणप्राप्त्या समस्तनमस्कारमिति, क्षयोपशमस्वरूपं पूर्ववद् । गतां केनेति द्वारं, कस्मिन्नित्यधुना, तत्र कस्मिन्निति सप्तम्यधिकरणे, अधिकरणं चाधारः, स च चतुर्भेदः, तद्यथा-व्यापकः औपश्लेषिकः सामीप्यको वैषयिकश्च, तत्र व्यापकः तिलेषु तैलम्, औपश्लेषिकः-कटे आस्ते, सामीप्य कः-गङ्गायां घोषः, वैषयिकः-रूपे चक्षुः, तत्राद्योऽभ्यन्तरः, शेषा बाह्याः, तत्र नैगमव्यवहारौ बाह्यमिच्छतः, तन्मतानुवादि च साक्षादिदं गाथाशकलं-'जीवमजीवेत्यादि' जीवमजीव इति प्राकृतशैल्याऽनुस्वारस्याभूतस्यैवागमः, तत्त्वतस्तु जीवे अजीवे इत्याद्यष्टसु भङ्गेषु भवति सर्वत्रेति भावना, नमस्कारो हि जीवगुणत्वाज्जीवः, स च यदा गजेन्द्रादौ तदा जीवे, यदा कटादौ तदाऽजीवे, यदोभयाऽऽत्मके तदा जीवाजीवयोः, एवमेकवचनबहुवचनभेदा-दष्टौ भङ्गाः प्रागुक्ता एव योग्याः । आह-पूज्यस्य नमस्कार इति नैगमव्यवहारौ, स एव च किमित्याधारो न भवति ? येन पृथगिष्यते, उच्यते, नावश्यं स्वेन स्वात्मन्येव भवितव्यम्, अन्यत्रापि भावात्, यथा देवदत्तस्य धान्यं क्षेत्र इति, तुशब्दाच्छषनयाक्षेपः कृतः, संक्षेपतो दश्यते-तत्र सङ्ग्रहोऽभेदपरमार्थत्वात् कश्चिद्वस्तुमात्रे अभीच्छति, कश्चित्तद्धर्मत्वाज्जीव इति, ऋजुसूत्रस्तु जीवगुणत्वाज्जीव एव मन्यते, आह-ऋजुसूत्रोऽन्याधारमपीच्छत्येव, 'आकाशे वसती' ति वचनाद्, उच्यते द्रव्यविवक्षायामेवं न गुणविवक्षायामिति, शब्दादयस्तूपयुक्ते ज्ञानरूपे जीव एवेच्छन्ति नान्यत्र, न वा शब्दक्रियारूपमिति गाथार्थः ॥ कस्मिन्निति द्वारमुक्ते, साम्प्रतं कियच्चिरमसौ भवतीति निरूप्यते, तत्रेयं गाथा-

नि. (८९४) उवओग पडुच्चंतोमुहुत्त लद्धीइ होइ उ जहन्नो ।
उक्कोसट्ठिइ छावट्ठिं सागराऽरिहाइं पंचविहो ॥

वृ- उपयोगं प्रतीत्य अन्तर्मुहूर्तं स्थितिरिति सम्बध्यते जघन्यतः उत्कृष्टतश्च, 'लद्धीए होइ उ जहन्नो' लब्धेश्च क्षयोपशमस्य च भवति तु जघन्या स्थितिरन्तर्मुहूर्त एव, उत्कृष्टस्थितिर्लब्धेः षट्षष्टिसागरोपमाणि, सम्यक्त्वकाल इत्यर्थः, एकं जीवं प्रतीत्यैषा, नानाजीवान् पुनरधिकृत्योप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योगापेक्षया जघन्येनोत्कृष्टतश्च स एव, लब्धितश्च सर्वकालमिति ।। कतिविधो वा ? इत्यस्य प्रश्नस्य निर्वचनार्थो गाथावयवः-'अरिहाइ पंचविहो'त्ति अर्हत्सिद्धाचार्योपाध्याय-साधुपदादि-सन्निपातात् पञ्चविधार्थसम्बन्धात् अर्हदादिपञ्चविध इत्यनेन चार्थान्तरेण वस्तुस्थित्या नमः पदस्याभिसम्बन्धमाहेति गाथार्थः ।। गता षट्पदप्ररूपणेति, साम्प्रतं नवपदाया अवसरः, तत्रेयं गाथा–

नि. (८९५) संतपयपरूवणया १ दव्वपमाणं च २ खित्त ३ फुसणा य ४ ।
काले अ ५ अंतरं ६ भाग ७ भाव ८ अप्पाबहुं चेव ९ ।।

वृ- सत् इति सद्भूतं विद्यमानार्थमित्यर्थः, सच्च तत्पदं च सत्पदं तस्य प्ररूपणा सत्पदप्ररूपणा, कार्येति वाक्यशेषः, यतश्च नमस्कारो जीवद्रव्यादभिन्न इत्यतो द्रव्यप्रमाणं च वक्तव्यं, कियन्ति नमस्कारवन्ति जीवद्रव्याण ? तथा 'क्षेत्रम' इति कियति नमस्कारः ? एवं स्पर्शना च कालश्च अन्तरं च वक्तव्यं, तथा भाग इति नमस्कारवन्तः शेष जीवानां कतिथे भागे वर्तन्त इति, 'भावे'त्ति कस्मिन् भावे ? 'अप्पाबहुं चेव' त्ति अल्पबहुत्वं च वक्तव्यं, प्राक्प्रतिपन्न-प्रतिपद्य-मानकापेक्षयेति समासार्थः ।। व्यासार्थस्तु प्रतिद्वारं वक्ष्यते, तत्राद्याद्वाराभिधित्सयाऽऽह–

नि. (८९६) संतपयं पडिवन्ने पडिवज्जंते अ मग्गणं गइसुं १ ।
इंदिअ २ काए ३ वेए ४ जोए अ ५ कसाय ६ लेसासु ७ ।।

नि. (८९७) सम्मत्त ८ नाण ९ दंसण १० संजय ११ उवओगओ अ १२ आहारे १३ ।
भासग १४ परित्त १५ पज्जत्त १६ सुहुमे १७ सन्नी अ १८ भव १९ चरमे २० ।।

वृ- इदं गाथाद्वयं पीठिकायां व्याख्यातत्वान्न विव्रियते । द्वारम् । अनुक्तद्वारत्रयावय-वार्थप्रतिपादनायाह–

नि. (८९८) पलिआसंखिज्जइमे पडिवन्नो हुज्ज खित्तलोगस्स ।
सत्तसु चउदसभागेसु हुज्ज फुसणावि एमेव ।।

वृ- 'पलियासंखेज्जइमे पडिवन्नो होज्ज' त्ति इयं भावना-सूक्ष्मक्षेत्रपल्योपमस्यासङ्खयेयतमे भागे यावन्तः प्रदेशा एतावन्तो नमस्कारप्रतिपन्ना इति ।। 'खित्तलोगस्स सत्तसु चोद्दसभागेसु होज्ज' त्ति गतार्थं, नवरमधोलोके पञ्चस्विति ।। 'फुसणावि एमेव' त्ति नवरं पर्यन्तवर्तिनोऽपि प्रदेशान् स्पृशतीति भेदेनाभिधानमिति गाथार्थः ।। कालद्वारावय-वार्थव्याचिख्यासयाऽऽह–

नि. (८९९) एगं पडुच्च हिट्ठा तहेव नानाजिआण सव्वद्धा ।
अंतर पडुच्च एगं जहन्नमंतोमुहुत्तं तु ।।

वृ- एकं जीवं प्रतीत्याधस्तात् षट्पदप्ररूपणायां यथा काल उक्तस्तथैव ज्ञातव्यः, नाना-जीवानप्यधिकृत्य तथैव, यत आह–'तहेव नाणाजीवां सव्वद्धा भाणियव्वा' काक्वा नीयते । 'अंतर पडुच्च एगं जहन्नमन्तोमुहुत्तं तु' कण्ठ्यं, नवरं प्रतीत्यशब्दस्य व्यवहितो योगः, एकं प्रतीत्यैवमिति गाथार्थः ।।

नि. (९००) उक्कोसेणं चेयं अद्धापरिअट्टओ उ देसूणो ।
नानाजीवे नत्थि उ भावे य भवे खओवसमे ।।

वृ- उक्कोसेणं चेयं, तमेव दर्शयति-'अद्धापरियट्टओ उ देसूणो नानाजीवे नत्थि उ' नानाजीवान् प्रतीत्य नास्त्यन्तरं, सदाऽव्यवच्छिन्नत्वात् तस्य ।। 'भावे य भवे खओवसमे' त्ति, प्राचुर्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मङ्गीकृत्यैतदुक्तम्, अन्यथा क्षायिकौपशमिकयोरप्येके वदन्ति, क्षायिके यथा- श्रेणिकादीनाम्, औपशमिके श्रेण्यन्तर्गतानामिति, यथासङ्ख्यं च भागद्वारावयवार्थानभिधानमदोषायैव, विचित्रत्वात् सूत्रगतेरिति गाथार्थः ।। भागद्वारं व्याचिख्यासुराह–

नि. (९०१) जीवाणऽनंतभागो पडिवण्णो सेसगा अनंतगुणा ।
वत्थुं तऽरिहंताइ पञ्च भवे तेसिमो हेऊ ।।

वृ- जीवाणणन्तभागो पडिवण्णे सेसगा अपडिवन्नगा अनंतगुणत्ति ।। अल्पवहुत्वद्वारं यथा पीठिकायां मतिज्ञानाधिकार इति । साम्प्रतं चशब्दाक्षिप्तं पञ्चविधप्ररूपणामनभिधाय पश्चार्धेन वस्तुद्वारनिरूपणायेदमाह–'वस्तु' इति वस्तु द्रव्यं दलिकं योग्यमर्हमित्यनर्थान्तरं, वस्तु नमस्कारार्हा अर्हदादयः पञ्चैव भवन्ति, तेषां वस्तुत्वेन नमस्कारार्हत्वेऽयं हेतुः-वक्ष्यमाणलक्षण इति गाथार्थः। अधुना चशब्दसूचितां पञ्चविधां प्ररूपणां प्रतिपादयन्नाह–

नि. (९०२) आरोवणा य भयणा पुच्छा तह दायणा य निज्जवणा ।
नमुकारऽनमुक्कारे नोआइजुए व नवहा वा ।।

वृ- आरोपणा च भजना पृच्छा तथा 'दायना' दर्शना दापना वा, निर्यापना, तत्र किं जीव एव नमस्कार ? आहोस्विन्नमस्कार एव जीवः ? इत्येवं परस्परावधारणम् आरोपणा, तथा जीव एव नमस्कार इत्युत्तरपदावधारणम् १, अजीवाद्व्यवच्छिद्य जीव एव नमस्कारोऽवधार्यते, जीवस्त्वनवधारितः, नमस्कारो वा स्यादनमस्कारो वा, एषा एकपदव्यभिचाराद्भजना २, किंविशिष्टो जीवो नमस्कारः ? किंविशिष्टस्त्वनमस्कार इति पृच्छा ३, अत्र प्रतिव्याकरणं दापना -नमस्कारपरिणतः जीवो नमस्कारो नापरिणत इति ४, निर्यापना त्वेष एव नमस्कार-पर्यायपरिणतो जीवो नमस्कारः, नमस्कारोऽपि जीवपरिणाम एव नाजीवपरिणाम इति, एतदुक्तं भवति-दापना प्रश्नार्थव्याख्यानं निर्यापना तु तस्यैव निगमनमिति, अथवेयमन्या चतुर्विधा प्ररूपणेति, यत आह–'नमोक्कारऽनमोक्कारे नोआदिजुए व नवधा वा' तत्र प्रकृत्यकारनोकारोभयनिषेधसमाश्रयाच्चातुर्विध्यं, प्रकृतिः–स्वभावः शुद्धता तथा नमस्कार इति, स एव नञा सम्बन्धादकारयुक्तः अनमस्कारः, स एव नोशब्दोपपदे नोनमस्कारः, उभयनिषेधात्तुं नोऽनमस्कार इति, तत्र नमस्कारस्तत्परिणतो जीवः, अनमस्कारस्त्वपरिणतो लब्धिशून्यः अन्यो वा, 'नोआइजुए व'त्ति नोआदियुक्तो वा नमस्कारः अनस्मारकश्च, अनेन भङ्गकद्वयाक्षेपो वेदितव्यः, नोशब्देनाऽऽदिर्युक्तो यस नमस्कारस्येतरस्य चेत्यक्षरगमनिका, तत्र नोनमस्कारो विवक्षया भङ्गकद्वयाक्षेपो वेदितव्यः, नोशब्देनाऽऽदिर्युक्तो यस्य नमस्कारस्येतरस्य चेत्यक्षरगमनिका, तत्र नोनस्कारो विवक्षया नमस्कारदेशः अनमस्कारो वा, देशसर्वनिषेधपरत्वान्नोशब्दस्य, नोअनमस्कारोऽपि अनमस्कारदेशो वा नमस्कारो वा, देशसर्वनिषेधत्वादेव, एषा चतुर्विधा, नैगमादिनयाभ्युपगमस्त्वस्याः पूर्वोक्तानुसारेण प्रदर्शनीयः, 'नवधा वे' ति प्रागुक्ता पञ्चविधा इयं चतुर्विधा च सङ्कलिता सती नवविधा प्ररूपणा प्रकारान्तरतो द्रष्टव्येति गाथार्थः। प्ररूपणाद्वारं गतम्, इदानीं निः शेषमिति, साम्प्रतं 'वत्थुं तऽरहंताई पंच भवे तेसिमो हेउ'त्ति गाथाशकलोपन्यस्तमवसरायातं च वस्तुद्वारं विस्तरतो व्याख्यायत इति, तत्रानन्तरोक्तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गाथाशकलं व्याख्यातमेव, नवरं तत्र यदुक्तं 'तेषां वस्तुत्वेऽयं हेतु' रिति, स खल्विदानीं हेतुरुच्यते, तत्रेयं गाथा–

नि. (९०३) मग्गे १ अविप्पनासो २ आयारे ३ विनयया ४ सहायत्तं ५ ।
पंचविहनमुक्कारं करेमि एएहिं हेऊहिं ॥

वृ- मार्गः अविप्रणाशः आचारः विनयता सहायत्वम् अर्हदादीनां नमस्कारार्हत्वे एते हेतव, यदाह–पञ्चविधनमस्कारं करोमि एभिर्हेतुभिरिति गाथासमासार्थः ॥ इयमत्र भावना-अर्हतां नमस्कारार्हत्वे मार्गः-सम्यगूदर्शनादिलक्षणो हेतुः, यस्मादसौ तैः प्रदर्शितस्तस्माच्च मुक्तिः, ततश्च पारम्पर्येण मुक्तिहेतुत्वात् पूज्यास्त इति । सिद्धानां तु नमस्कारार्हत्वेऽविप्रणाशः, शाश्वतत्वं हेतुः, तथाहि-तदविप्रणाशवगम्य प्राणिनः संसारवैमुख्येन मोक्षाय घटन्ते । आचार्याणां तु नमस्कारार्हत्वे आचार एव हेतुः, तथाहि–तानाचारवत आचाराख्यापकांश्च प्राप्य प्राणिन आचारपरिज्ञानानुष्ठानाय भवन्ति । उपाध्यायानां तु नमस्कारार्हत्वे विनयो हेतुः, यतस्तान् स्वयं विनीतान् प्राप्य कर्मविनयनसमर्थविनयवन्तो (प्र) भवन्ति देहिन इति । साधूना तु नमस्कारार्हत्वे सहायत्वं हेतुः, यतस्ते सिद्धिवधूसङ्गमैकनिष्ठानां तदवाप्तिक्रियासाहाय्य-मनुतिष्ठन्तीति गाथार्थः ॥ एवं तावत्समासेनार्हदादीनां नमस्कारार्हत्वद्वारेण मार्गप्रणयनादयो गुणा उक्ताः साम्प्रतं प्रपञ्चेनार्हतां गुणानुपदर्शयन्नाह–

नि. (९०४) अडवीइ देसिअत्तं १ तहेव निज्जामया समुद्दंमि २ ।
छक्कायरक्खणट्ठा महगोवा तेन वुच्चंति ३ ॥

वृ- अटव्यां देशकत्वं कृतमर्हद्भिः, तथैव निर्यामकाः समुद्रे, भगवन्त एव षट्कायरक्षणार्थं यतः प्रयत्नं चक्रुः महागोपास्तेनोच्यन्त इति गाथासमासार्थः ॥ अवयवार्थ तु प्रतिद्वारं वक्ष्यति, तत्र द्वारावयवार्थोऽभिधीयते–

नि. (९०५) अडविं सपच्चवायं वोलित्ता देसिओवएसेणं ।
पावंति जहिट्ठपुरं भवाडविंपी तहा जीवा ॥

नि. (९०६) पावंति निव्वुइपुरं जिनोवइट्ठेण चेव मग्गेणं ।
अडवीइ देसिअत्तं एवं नेअं जिणिंदाणं ॥

वृ- 'अटवी' प्रतीतां 'सप्रत्यपायाम्' इति व्याघ्रादिप्रत्यपायबहुलां 'वोलेत्त' त्ति उल्लङ्घ्य 'देशिकोपदेशेन' निपुणमार्गज्ञोपदेशेन प्राप्नुवन्ति 'यथा' 'इष्टपुरम्' इष्टपत्तनं, भवाटवीमप्युल्ल-ङ्घ्येति वर्तते, तथा जीवः किं प्राप्नुवन्ति ?–'निर्वृतिपुरं' सिद्धिपुरं जिनोपदिष्टेनैव मार्गेण, नान्योपदिष्टेन, ततश्चाटव्यां देशिकत्वमेवं 'ज्ञेयं' ज्ञातव्यं, केषां ?-जिनेन्द्राणामिति गाथाद्वयसमा-सार्थः ॥ व्यासार्थस्तु कथानकादवसेयः, तच्चेदम्-एत्थं अडवी दुविहा–दव्वाडवी भावाडवी य, तत्थ दव्वाडवीए ताव उदाहरणं-वसंतपुरं नयरं, धनो सत्थवाहो, सो पुरंतरं गंतुकामो घोसणं कारेइ जहा नंदिफलणाए, तओ तत्थ वहवे तडिगकप्पडिगायदो संपिडिया, सो तेसिं मिलियाणं पंथगुणे कहेइ-एगो पंथो उज्जुओ एगो वंको, जो सो वंको तेन मणागं सुहंसुहेण गम्मइ, बहुणा य कालेण इच्छियपुरं पाविज्जइ, अवसाणे सोवि उज्जुगं चेव ओयरइ, जो पुण उज्जुगो तेन लहुं गम्मइ, किच्छेण य, कहं ?, सो अईव विसमो सण्हो य, तत्थ ओतारे चेव दुवे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महाघोरा वग्घसिंहा परिवसंति, ते तओ पाए चेव लग्गंति, अमुयंताण य पहं न पहवंति, अवसानं च जाव अनुवट्टंति, रुक्खा य एत्थ एगे मणोहरा, तेसिं पुण छायासु न वीसमियव्वं, मारणप्पिया खु सा छाया, परिसडियपंडुपत्ताणं पुण अहो मुहुत्तगं वीसमियव्वं, मणोहररूवधारिणो महुरवयणेणं एत्थ मग्गंतरट्ठिया बहवे पुरिसा हक्कारेंति, तेसिं वयणं न सोयव्वं, सत्थिगा खणंपि न मोत्तव्वा, एगागिणो नियमा भयं, दुरंतो य घोरो दवग्गी अप्पमत्तेहिं उल्लवेयव्वो, अणोल्हविज्जंतो य नियमेण डहइ, पुणो य दुग्गुच्चपव्वओ उवउत्तेहिं चेव लंघेयव्वो, अलंघणे नियमा मरिज्जंति, पुणो महती अइगुविलगव्वरा वंसकुडंगी सिग्घं लंघियव्वा, तंमि ठियाणं बहू दोसा, तओ य लहुगो खड्डो, तस्स समीवे मनोरहो नाम बंभणो निच्चं सण्णिहिआ अच्छइ, सो भणइ-मणागं पूरेहि एयंति, तस्स न सोयव्वं, सो न पूरेयव्वो, सो खु पूरिज्जमाणो महल्लतरो भवइ पंथाओ य भज्जिज्जइ, फलाणि य एत्थ दिव्वाणि पंचप्पयाराणि नेत्ताइसुहंकराणि किंपागाणं न पेक्खियव्वाणि न भोत्तव्वाणि, बावीसं च णं एत्थ घोरा महाकराला पिसाया खणं खणमभिद्दवंति तऽवि णं न गणेयव्वा, भत्तपानं च तत्थ विभागओ विरसं दुल्लभं चत्ति, अप्पयाणयं च न कायव्वं, अणवरयं च गंतव्वं, रत्तीए वि दोन्नि जामा सुवियव्वं, सेसदुगे य गंतव्वमेव, एवं च गच्छंतेहिं देवानुप्पिया ! खिप्पमेव अडवी लंघिज्जइ, लंघित्ता य तमेगंतदोगच्चवज्जियं पसत्थं सिवपुरं पाविज्जइ, तत्थ य पुणो न होंति केइ किलेसत्ति । तओ तत्थ केइ तेन समं पयट्टा जे उज्जुगेण पधाविया, अन्ने पुण इयरेण, तओ सो पसत्थे दिवसे उच्चलिओ, पुरओ वच्चंतो मग्गं आहणइ, सिलाइसु य पंथस्स दोसगुणपिसुणगाणि अक्खराणि लिहइ, एत्तियं गयमेत्तियं सेसंति विभासा, एवं जे तस्स निद्देसे वट्टिया ते तेन समं अचिरेण तं पुरं पत्ता, जेऽवि लिहियानुसारेण संमं गच्छंति तेऽवि पावंति, जे न वट्टिया न वा वट्टंति छायादिषु पडिसेविणो ते न पत्ता न यावि पावंति । एवं दव्वाडवीदेसिगणायं, इयाणिं भावाडवीदेसिगणाए जोइज्जइ–सत्थवाहत्थाणीया अरहंता, उग्घोसणाथणीया धम्मकहा तडिगाइथाणीया जीवा, अडवीत्थाणीओ संसारो उज्जुगो साहुमग्गो, वंको य सावगमग्गो पप्पपुरत्थाणीओ मोक्खो, वग्घसिंघतुल्ला रागद्दोसा, मणोहर-रुक्खच्छायाथाणीया इत्थिगाइ-संसत्तवसहीओ, परिसडियाइत्थणीआओ अणवज्जवसहीओ, मग्गतडत्थहक्कारणपुरिसथाणगा पासत्थाई अकल्लाणमित्ता, सत्थिगाथाणीया साहू, दवग्गा-इथाणिया कोहादओ कसाया, फलथाणीया विसया, पिसायथाणीया बावीसं परीसहा भत्तपाणाणि एसणिज्जाणि, अपयाण-गथाणीओ निच्चुज्जमो, जामदुगे सज्झाओ, पुरपत्ताणं च णं मोक्खसुहंति। एत्थय तं परं गंतुकामो जनो उवएसदाना इणा उवगारी सत्थवाहोत्ति नमंसति, एव मोक्खतथीहिवि भगवं पणमियव्वो ।। तथा चाह–

नि. (९०७) जह तमिह सत्थवाहं नमइ जनो तं पुरं तु गंतुमणो ।
परमुवगारित्तणओ निव्विग्घत्थं च भत्तीए ।।

नि. (९०८) अरिहो उ नमुक्कारस्स भावओ खीणरागमयमोहो ।
मुक्खत्थीणंपि जिनो तहेव जम्हा अओ अरिहा ।।

वृ- गाथाद्वयं निगदसिद्धं, नवरं मदशब्देन द्वेषोऽभिधीयते इति ।।

नि. (९०९) संसाराअडवीए मिच्छत्तऽन्नाणमोहिअपहाए ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जेहिं कय देसिअत्तं ते अरिहंते पणिवयामि ॥

वृ- संसाराटव्यां, किंविशिष्टायां ?-'मित्त्यात्वाज्ञानमोहितपथायां' तत्र मिथ्यात्वाज्ञानाभ्यां मोहितः पन्था यस्यामिति विग्रहः, तस्यां, यैः कृतं देशिकत्वं तानर्हतः 'प्रणौमि अभ्यर्थयामीति गाथार्थः ॥ दृष्ट्वा ज्ञात्वा च सम्यक् पन्थानमासेव्य च कृतं नान्यथा, तथा चाऽऽह-

नि. (९१०) सम्मद्दंसणदिट्ठो नाणेण य सुट्ठु तेहिं उवलद्धो ।
चरणकरणेण पहओ निव्वाणपहो जिणिंदेहिं ॥

वृ- 'समग्दर्शनेन' अविपरीतदर्शनेन दृष्टः, ज्ञानेन च 'सुष्ठु' यथाऽवस्थितः तैरर्हद्भिर्ज्ञातः, चरणं च करणं चेत्येकवद्भावस्तेन 'ग्रहतः' आसेवितः 'निर्वाणपथः' मोक्षमार्गो जिनेन्द्रैः । तत्र व्रतादि चरणं, पिण्डविशुद्ध्यादि च करणं, यथोक्तम्-

"वय समणधम्म संजम वेयावच्च च बंभगुत्ताओ ।
नाणादितियं तव कोव निग्गहाई चरणमेण ॥१॥
पिंडविसोही समिई भावन पडिमा य इंदियनिरोहो ।
पडिलेहणगुत्तीओ अभिग्गहा चेव करणं तु ॥२॥"

इति गाथार्थः ॥ न केवलं ग्रहत एव, किन्तु ते खल्वनेन पथा निर्वृतिपुरमेव प्राप्ता इति,

नि. (९११) सिद्धिवसहिमुवगया निव्वासुहं च ते अनुप्पत्ता ।
सासयमव्वाबाहं पत्ता अयरामरं ठाणं ॥

वृ- 'सिद्धिवसतिं' मोक्षालयम् 'उपगताः' सामीप्येन-कर्मविगमलक्षणेन प्राप्ता इति अनेनैकेन्द्रियव्यच्छेदमाह, केषाञ्चित् सुखदुःखरहिता एव ते तत्र तिष्ठन्तीति दर्शनम्, अत आह-'निर्वाणसुखं च तेऽनुप्राप्तां' निरतिशयसुखं प्राप्ता इत्यर्थः, ते च केषाञ्चिद्दर्शन-परिभवादिनेहाऽऽगच्छन्तीति दर्शनं, तन्निवृत्त्यर्थमाह-'शाश्वतं' नित्यम् 'अव्यावाधं' व्यावाधा-रहितं प्राप्ताः 'अजरामरं स्थानं' जरामरणरहितं स्थानमिति गाथार्थः ॥

साम्प्रतं द्वितीयद्वारव्याचिख्यासयाऽऽह-

नि. (९१२) पावंति जहा परं संमं निज्ञामया समुद्दस्स ॥
भवजलहिस्स जिणिंदा तहेव जम्हा अओ अरिहा ॥

वृ- 'प्रापयन्ति' नयन्ति 'यथा' येन प्रकारेण 'पारं' पर्यन्तं 'सम्यक्'शोभनेन विधिना 'विधिना 'निर्यामकाः' प्रतीताः, कस्य ?-समुद्रस्य, 'भवजलधेः' भवसमुद्रस्य जिनेन्द्रास्तथैव, पारं प्रापयन्तीति वर्तते, यस्मादेवमतस्तेऽर्हाः, नमस्कारस्येति गम्यते, अयं संक्षेपार्थः ॥ भावत्थो पुण एत्थ निज्ञामया दुविहा, तं जहा-दव्वनिज्ञामया भावनिज्ञामया य, दव्वनिज्ञामरू उदाहरणं तहेव घोसणगं विभासा । एत्थ अट्ठवाया वण्णेयव्वा, तं जहा-पाईणं वाए पडीणं वाए ओईणं वाए दाहिणं वाए, जो उत्तरपुरत्थिमेण सो सत्तासुओ, दाहिणपुव्वेणं तुंगारो, अवरदाहिणेणं वीआओ, अवरुत्तरेण गज्ञभो, एवेते अट्ठ वाया, अन्नेवि दिसासुं अट्ठ चेव, तत्थ उत्तरपुव्वेणं दोन्नि, तं जहा-उत्तरसत्तासुओ पुरत्थिमसत्तासुओ य इयरीए वि दोन्निवि पुरत्थिमतुंगारो दाहिणतुंगारो य, दाहिणवीयावो अवरवीयावो य, अवरगज्ञभो उत्तरगज्ञभो य, एए सोलस वाया । तत्थ जहा जलिहिंमि कालियावायरहिए गज्ञहानुकूलवाए निउणनिज्ञामगसहिया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निच्छिड्डपोता जहिट्ठियं पट्टणं पावेंति, एवं च–

नि. (९१३) मिच्छत्तकालियावायविरहिए सम्मत्तगज्जभपवाए ।
एगसमएण पत्ता सिद्धिवसहिपट्टणं पोया ॥

वृ- मिथ्यात्वमेव कालिकावातः तेन विरहिते भवाम्भोधौ तथा सम्यक्त्वगर्जभप्रवाते, कालिकावातो ह्यसाध्यः गर्ज्जभस्त्वनुकूलः, रूकसमयेन प्राप्ताः सिद्धिवसतिपत्तंन 'पोताः' जीवाबोहित्थाः, तन्निर्यामकोपकारादिति भावना ॥ ततश्च यथा सांयात्रिकसार्थः प्रसिद्धं निर्यामकं चिरगतमपि यात्र-सिद्ध्यर्थं पूजयति, एवं ग्रन्थकरोऽपि सिद्धिपत्तनं प्रति प्रस्थितोऽभीष्ट-यात्रासिद्धये निर्यामकरत्नेभ्यस्तीर्थकृद्भयः स्तवचिकीर्षयेदमाह–

नि. (९१४) निज्जामगरयणाणं अमूढनाणमइकण्णाधाराणं ।
वंदामि विनयपणओ तिविहेण तिदंडविरयाणं ॥

वृ- 'निर्यामकरत्नेभ्यः' अर्हद्भयः 'अमूढज्ञाना'यथावस्थितज्ञाना मननं मतिः–संविदेव सैव कर्णधारो येषां ते तथाविधास्तेभ्यो वन्दामि विनयप्रणतस्त्रिविधेन त्रिदण्डविरतेभ्य इति गाथार्थ ॥ द्वारं ॥ साम्प्रतं तृतीयद्वारव्याचिख्यासयाऽऽह–

नि. (९१५) पालंति जहा गावो गोवा अहिसावयाइदुग्गेहिं ।
पउरतणपाणिआणि अ वणाणि पावंति तह चेव ॥

नि. (९१६) जीवनिकाया गावो जं ते पालंति ते महागोवा ।
मरणाइभया उ जिणा निव्वाणवणंच पावंति ॥

नि. (९१७) तो उवगारित्तणओ नमोऽरिहा भविअजीवलोगस्स ।
सव्वस्सेह जिणिंदा लोगुत्तम भावओ तह य ॥

वृ-गाथात्रयं निगदसिद्धमेव ॥ एवं तावदुक्तेन प्रकारेण नमोऽर्हत्वहेतवे गुणाः प्रतिपादिताः, साम्प्रतं प्रकारान्तरेण नमोऽर्हत्वहेतुगुणाभिधित्सयाऽऽह–

नि. (९१८) रागद्दोसकसाए, इंदिआणि अ पंचवि ।
परीसहे उवस्सग्गे, नामयंता नमोऽरिहा ॥

वृ- रागद्वेषकषायेन्द्रियाणि च पञ्चापि परीषहानुपसर्गान्नामयन्तो नमोऽर्हा इति । तत्र 'रञ्ज रागे' रज्यते अनेन अस्मिन् वा रञ्जनं वा रागः, स च नामादिश्चतुर्विधः, तत्र नामस्थापने सुगमे, द्रव्यरागो द्वेधा-आगमतो नोआगमतश्च, आगमतो रागपदार्थज्ञस्तत्रानुपयुक्तः, नोआगमतो ज्ञशरीरभव्यशरीरतद्व्यतिरिक्तभेदस्त्रिभेदस्त्रिविधः, व्यतिरिक्तोऽपि कर्मद्रव्यरागो नोकर्मद्रव्य-रागश्च, कर्मद्रव्यरागश्चतुर्विधः–रागवेदनीयपुद्गला योग्याः १ बध्यमानका २ बद्धाः ३ उदीरणावलिका-प्राप्ताश्च ४, बन्धपरिणामाभिमुखा योग्याः, बन्धपरिणामप्राप्ता बध्यमानकाः, निर्वृत्तबन्धपरिणामाः सत्कर्मतया स्थिता जीवेनाऽऽत्मसात्कृता बद्धाः, उदीरणाकरणेना-ऽऽकृष्योदीरणावलिकामानीताश्चरमा इति, नोकर्मद्रव्यरागस्तु कर्मरागैकदेशस्तदन्यो वा, तदन्यो द्विविधः- प्रायोगिको वैश्रसिकश्च, प्रायोगिको कुसुम्भरागादिः, वैश्रसिकः, सन्ध्याभ्ररागादिः भावरागोऽप्यागमेतरभेदाद् द्विधैव, आगमतो रागपदार्थज्ञ उपयुक्तः, नोआगमतो रागवेदनीय-कर्मोदयप्रभवः परिणाम-विशेषः, स च द्वेधा–प्रशस्तोऽप्रशस्तश्च, अप्रशस्तस्त्रिविधः-दृष्टिरागो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विषयरागः स्नेहरागश्च, तत्र त्रयाणां त्रिषष्ठ्यधिकानां प्रावादुकशतानामात्मीयात्मीयदर्शनानुरागो दृष्टिरागः, यथोक्तम्–

"असियसयं किरियाणं अकिरियवाईणमाहु चुलसीई ।
अन्नाणिय सत्तट्ठी वेणइयाणं च बत्तीसा ॥१॥
जिनवयणवाहिरमई मूढा नियदंसणानुराएण ।
सव्वण्णुकहियमेते मोक्खपहं न उ पवज्जंति ॥२॥"

विषयरागस्तु शब्दादिविषयगोचरः स्नेहरागस्तु विषयादिनिमित्तविकलोऽविनीतेष्वप्यपत्यादिषु यो भवति, तत्रेह रागे उदाहरणम्–खितिपतिट्ठियं णयरं, तत्थ दो भाउगा–अरहन्नओ अरहमित्तो य, महंतस्स भारिया खुड्डलए रत्ता, सो नेच्छइ, वहुसो उवसग्गेइ, भणिया य अनेन-किं न पेच्छसि भाउगंति ?, भत्तारो मारिओ, सा पच्छा भणइ-इयाणिं पि न इच्छसि ?, सो तेन निव्वेएण पव्वइओ, साहू जाओ, सावि अट्टवसट्टा मया सुणिया जाया, साहुणो य तं गामं गया, सुणियाए दिट्ठो, लग्गा मग्ग मग्गि, उवसग्गोत्ति नट्ठो रत्तीए । तत्थवि मया मक्कडी जाया अडवीए, तेऽवि कम्मधम्मसंजोगेण तीसे अडवीए मज्झेणं वच्चंति, तीए दिट्ठो, लग्गा कंठे, तत्थवि किलेसेण पलाआ, तत्थवि मया जक्खिणी जाया, ओहिणा पेच्छइ, छिद्दाणि मग्गइ, सोऽवि अप्पमत्तो, सा छिद्दं न लहइ, सा य सव्वादरेणं तस्स छिद्दं मग्गेइ, एवं च जाइ कालो, तेन किर जे समवया समणा ते तं भणंति–

हसिऊण तरुणसमणा भणंति धन्नोऽसि अरहमित्त ! तुमं ।
जंसि पिओ सुणियाणं वयंस ! गिरिमक्कडीणं च ॥१॥

अन्नया सो साहू वियरयं उत्तरइ, तत्थ य पायविक्खंभं पाणियं, तेन पादो पसारिओ गइभेएण, तत्थ य ताए छिद्दं लहिऊण ऊरुओ छिन्नो, मिच्छामि दुक्कडंति-पडिओ माहं आउक्काए पडिओ होज्जत्ति, सम्मद्दिट्ठियाए सा धाडिया, तहेव सप्पएसो लाइओ रूढो य देवयप्पहावेण, अन्ने भणंति-सो भिक्खस्स गओ अन्नगामे, तत्थ ताए वाणमंतरीए तस्स रूवं छाएत्ता तस्स रूवेण पंथे छाएत्ता तस्स रूवेण पंथे तलाए ण्हाइ, अन्नेहिं दिट्ठो, सिट्ठं गुरूणं, आवस्सए आलोएइ, गुरूहिं भणियं-सव्वं आलोएहि अज्जो !, सो उवउत्तो मुहणंतगमाइ, भणइ-न संभरामि खमासमणा !, तेहिं पडिभिण्णो भणइ-नत्थित्ति, आयरिया अनुवट्ठियस्स न दिंति पायच्छित्तं, सो चिंतेइ–किं कह वत्ति ? सा उवसंता साहइ–एयं मए कयं, सा साविया जाया, सव्वं परिकहेइ । एस तिविहो अप्पसत्थो, तस्स अप्पसत्थस्स इमा निरुत्तगाहा–

'रज्जंति असुभकलिमल-कुणिमाणिट्ठेसु पाणिणो जेणं ।
रागोत्ति तेन भण्णइ जं रज्जइ तत्थ रागत्थे ॥'

एषोऽप्रशस्तः, प्रशस्तस्त्वर्हदादिविषयः, यथोक्तं–

"अरहंतेसु य रागो रागो साहूसु बंभयारीसु ।
एस पसत्थो रागो अज्ज सरागाण साहूणं ॥१॥"

एवंविधं रागं नामयन्तः-अपनयन्तः, क्रियाकालनिष्ठाकालयोरभेदादपनीत एव गृह्यते, आह–प्रशस्तनामनमयुक्तं, न, तस्यापि बन्धात्मकत्वात्, आह–'एस पसत्थो' इत्यादि कथं?,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सरागसंयतानां कूपखननो-दाहरणात् प्राशस्त्यमित्यलं प्रसङ्गेन । इदानीं दोषो द्वेषो वा, 'दुष वैकृत्ये' दुष्यतेऽनेन अस्मिन्नस्माद्दूषणं वा दोषः, 'द्विष अप्रीतौ' वा द्विष्यतेऽनेनेत्यादिना द्वेषः, असावपि नामादिश्चतुर्विधो न्यक्षेण रागवदवसेयः, तथाऽपि दिग्मात्रतो निर्दिश्यते- नोआगमतो द्रव्यद्वेषः ज्ञशरीरेतरव्यतिरिक्तः कर्मद्रव्यद्वेषो नोकर्मद्रव्यद्वेषश्च, कर्मद्रव्यद्वेषः योग्यादिभेदाश्चतुर्विधा एव पुद्गलाः, नोकर्मद्रव्यदोषो दुष्टव्रणादिः, भावद्वेषस्तु द्वेषकर्मविपाकः, स च प्रशस्तेतरभेदः, प्रशस्तोऽज्ञानादिगोचरः, तथा ह्यज्ञानमविरतिमित्यादि द्वेष्टि, अप्रशस्तस्तु सम्यक्त्वादिगोचरः, तत्राप्रशस्ते उदाहरणं-णंदो नाम नाविओ गंगाए लोगं उत्तारेइ, तत्थ य धम्मरूइं नाम अणगारो तीए नावाए उत्तिण्णो, जणो मोल्लं दाऊण गओ, साहू रुद्धो, फिडिया भिक्खावेला, तहावि न विसज्जेइ, वालुयाए उण्हाएतिसाइओ य अमुंचंतो रुट्ठो, सो य दिट्ठीविसलद्धिओ, तेन डड्ढो मओ एगाए सभाए घरकोइलओ जाओ, साहूवि विहरंतो तं गामं गओ, भत्तपानं गहाय भोचुकामो सभं अइगओ, तेन दिट्ठो, सो पेक्खंतओ चेव तस्स आसुरत्तो, भोत्तुमारद्धस्स कयवरं पाडेइ, अन्नं पासं गओ, तत्थवि, एवं कहिंचि न लब्भइ, सो तं पलोएइ, को रे एस ? नाविगनंदमंगुलो ?, दड्ढो, समुद्दं जओ गंगा पविसइ तत्थ वरिसे २ अन्नण्णेणं मग्गेणं वहइ, चिराणगं जं तं मयगंगा भण्णइ, तत्थ हंसो जाओ, सोऽवि माहमासे सत्थेण पहाईए जाइ, तेन दिट्ठो, पाणियस्स पक्खे भरिऊण सिंचइ, तत्थवि उद्दविओ पच्छा सीहो जाओ अंजणगपव्वए, सोऽवि सत्थेण तं वीईवयइ, सीहो उट्ठिओ, सत्थो भिन्नो, सो इमं न मुयइ, तत्थवि दड्ढो, मओ य वाणारसीए बडुओ जाओ, तत्थवि भिक्खं हिंडंतं अन्नेहिं डिभरूवेहिं समं हणइ, छुभइ धूली, रुट्ठेण दड्ढो, तत्थेव राया जाओ, जाईं संभरइ, सव्वाओ अईयजाईओ सरइ असुभाओ, जइ संपयं मारेइ तो बहुगाओ फीट्टो होमित्ति तस्स जाणणानिमित्तं समस्सं समालंबेइ, जो एयं पूरइ तस्स रज्जस्स अद्धं देमि, तस्स इमो अत्थो–

गंगाए नाविओ नंदो, सहाए घरकोइलो ।
हंसो मयंगतीराए, सीहो अंजनपव्वए ॥

वाणारसीए बडुओ, राया तत्थेव आगओ' एवं गोवगावि पढंति, सो विहरंतो तत्थ समोसढो, आरामे ठिओ, आरामिओ पढइ, तेन पुच्छिओ साहइ, तेन भणियं-अहं पूरेमि 'एएसिंघायओ जो उ सो इत्थेव समागओ' सो घेत्तूणं रन्नो अग्गओ पढइ, राया सुणंतओ मुच्छिओ, सो हम्मइ–सो भणइ

हम्ममाणो कव्वं काउं अहं न याणामि ।
लोगस्स कलिकलंडो एसो समणेण मे दिन्नो ॥

राया आसत्थो वारेइ केणंति पुच्छति, साहइ–समणेणं, राया तत्थ मनुस्से विसज्जेइ, जइ अणुजाणह वंदओ एमि, आगआ सड्ढो जाओ, साहूवि आलोइयपडिक्कंतो सिद्धो ॥ एवंविधं द्वेषं नामयन्त इत्यादि रागवदायोज्यं, इह रागद्वेषौ क्रोधाद्यपेक्षया नयैः पर्यालोच्येते–नैगमस्य सङ्ग्रहव्यवहारान्तर्गतत्वात् सङ्ग्रहादिभिरेव विचारः, तत्र सङ्ग्रहस्याप्रीतिजातिसामान्यात् क्रोधमानौ द्वेषः, मायालोभौ तु प्रीतिजातिसामान्याद् रागः, व्यवहारस्य तु क्रोधमानमाया द्वेषः, मायाया अपि परोपघातार्थं प्रवृत्तिद्वारेणाप्रीतिजातावन्तर्भावात्, लोभस्तु रागः, ऋजुसूत्रस्य त्वप्रीतिरूपत्वात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रोध एव परगुणद्वेषः, मानादयस्तु भाज्याः, कथं ?, यदा मानः स्वाहङ्कारे प्रयुज्यते तदाऽऽत्मनि बहुमानप्रीतियोगाद् रागः, यदा तु स एव परगुणद्वेषे प्रयुज्यते तदाऽप्रीतिरूपत्वाद् द्वेषः, एवं मायालोभावप्यात्मनि मूर्च्छार्पणाद् रागः, तावेव परोपघातनिमित्तयोगादप्रीतिरूपत्वाद् द्वेषः, शब्दादीनां तु लोभ एव मानमाये स्वगुणोपकारमूर्च्छात्मकत्वात् प्रीत्यन्तर्गतत्वाल्लोभस्वरूपवदतस्त्रितयमपि रागः, स्वगुणोपकारांशरहितास्तु मानाद्यंशाः क्रोधश्च परोपघातात्मकत्वात् द्वेष इत्यलं प्रसङ्गेन, विशेषभावना विशेषावश्यकादवसेयेति ॥ अथ कषायद्वारं, शब्दार्थः प्राग्वत्, तेषामष्टधा निक्षेपः, नामस्थापनाद्रव्यसमुत्पत्तिप्रत्ययादेशरसभावलक्षणः, आह च–

"नामं ठवणा दविए उप्पत्ती पच्चए य आएसे ।
रसभावकसायाणं न एहिं छहि मग्गणा तेसिं ॥१॥"

तत्र नामस्थापने क्षुण्णे, द्रव्यकषायो व्यतिरिक्तः कर्मद्रव्यकषायो नोकर्मद्रव्यकषायश्च, कर्मद्रव्यकषायो योग्यादिभेदाः कषायपुद्गलाः, नोकर्मद्रव्यकषायस्तु सर्जकषायादिः, उत्पत्तिकषायो यस्माद् द्रव्यादेर्बाह्यात् कषायप्रभवस्तदेव कषायनिमित्तत्वाद् उत्पत्तिकषाय इति, उक्तं

"किं एत्तो कट्ठयरं जं मूढो खाणुगंमि अप्फिडिओ ।
खाणुस्स तस्स रूसइ न अप्पणो दुप्पओगस्स ॥१॥"

प्रत्ययकषायः खल्वान्तरकारणविशेषः तत्पुद्गललक्षणः, आदेशकषायः कैतवकृतभृकुटिभङ्गुराकारः, तस्य हि कषायमन्तरेणापि तथादेशदर्शनात्, रसकषायो हरीतक्यादीनां रसः, भावकषायो द्विविधः–आगमतस्तदुपयुक्तो नोआगमतस्तदुदय एव, स च क्रोधादिभेदाच्चतुर्विधः, क्रोधोऽपि नामादिभेदाच्चतुर्विधः कषायप्ररूपणायां भावित एव, तथापि व्यतिरिक्तो द्रव्यक्रोधः प्राकृतशब्दसामान्यपेक्षत्वात् चर्मकारकोत्थः रजकनीलिकोत्थश्च क्रोध इति गृह्यते, भावक्रोधस्तु क्रोधोदय एव, स च चतुर्भेदः, यथोक्तं भाष्यकृता–

"जलरेणुभूमिपव्वयराईसरिसो चउव्विहो कोहो" प्रभेदफलमुत्तरत्र वक्ष्यामः । तत्थ कोहे उदाहरणं-वसंतपुरे नयरे उच्छन्नवंसो एगो दारगो देसंतरं संकममाणो सत्थेण उज्झिओ तावसपल्लिंगओ, तस्स नामं अग्गिओत्ति, तावसेण संवड्ढिओ, जम्मो नामं सो तावसो, जमस्स पुत्तोत्ति जमदग्गिओ जाओ, सो घोरं तवच्चरणं करेइ, विक्खाओ जाओ । इओ य दो देवा वेसाणरो सड्ढो धन्नंतरी तावसभत्तो, ते दोवि परोप्परं पन्नवेंति, भणंति य-साहुतावसे परिक्खामो, आह सड्ढो-जो अम्हं सव्वअंतिगओ तुब्भ य सव्वप्पहाणो ते परिक्खामो । इओ य मिहिलाए नयरीए तरुणधम्मो पउमरहो राया, सो चंपं वच्चइ वसुपुज्जसामिस्स पामूलं पव्वयमित्ति, तेहिं सो परिक्खिज्जइ भत्तेणं पानेन य, पंथे य विसमे सो सुकुमालो दुक्खाविज्जइ, अनुलोभे य से उवसग्गे करिंति, सो धणियतरागं थिरो जाओ, सो तेहिं न खोभिओ, अन्ने भणंति–सावओ भत्तपच्चक्खाइओ, ते सिद्धपुत्तरूवेणं गया, अइसए साहिंति, भणंति यमा इमं करेहि जहा चिरं जीवियव्वं, सो भणइ-बहुओ मे धम्मो होहीति, न सक्को खोभेउं । गया जमदग्गिस्स मूलं, सउणरूवाणि कयाणि, कुच्चे से धरओ कओ, सउणओ भणइ-भद्दे ! जामि हिमवंतं, सा न देइ मा न एहिसित्ति, सो सवहे करेइ-गोघायकाइ जहा एमित्ति, सा भणइ-न्न एएहिं पत्तियामित्ति, जइ एयस्स रिसिस्स दुक्कियं पियसित्ति तो ते विसज्जेमि, सो रुट्ठो, तेन दोवि दोहिंवि हत्थेहिं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गहियाणि, पुच्छियाणि भणंति-महरिसि ! अनवच्चोसित्ति, सो भणइ-सच्चइं, खोभिओ, एवं सो सावगो जाओ देवो । इमोऽवि ताओ आयावणाउ ओत्तिन्नो मिगकोट्ठगं नयरं जाइ, तत्थ जियसत्तू राया, सो उट्ठिओ-किं देमि ?, धूयं देहित्ति, तस्स धूयासयं, जा तुमं इच्छइ सा तुज्झति, कन्नंतेउरं गओ, ताहिं दट्ठूण निच्छूढं, न लज्जिसित्ति भणिओ, ताओ खुज्जीकयाओ, तत्थेगा रेणुएणं रमइ तस्स धूया, तीए णेणं फलं पणामियं, इच्छिसित्ति य भणिया, तीए हत्थो पसारिओ, निज्झंतीए उवट्ठियाओ खुज्जाओ, सालियरूवए देहि, ताओ अखुज्जाओ कयाओ, कन्नकुज्जं नयरं संवुत्तं, इयरीवि नीया आसमं, सगोमाहिसो परियणो दिन्नो, संवड्ढिया, जोव्वणपत्ता जाहे जाया ताहे वीवाहधम्मो जाओ, अन्नया उदुंमि जमदग्गिणा भणिया-अहं ते चरुगं साहेमि जेणं ते पुत्तो बंभणस्स पहाणो होहिति, तीए भणियं-एवं कज्जउत्ति, मज्झ य भगिनी हत्थिणापुरे अनंतवीरियस्स भज्जा, तीसेऽवि साहेहि खत्तियचरुगंति, तेन साहिओ, सा चिंतेइ-अहं ताव अडविमिगी जाया, मा मम पुत्तोवि एवं नासउत्ति तीए खत्तियचरू जिमिओ, इयरीए इयरो पेसिओ, दोण्हवि पुत्ता जाया, तावसीए रामो, इयरीए कत्तवीरिओ, सो रामो तत्थ संवड्ढइ । अन्नया एगो विज्जाहरो तत्थ समोसढो, तत्थ एसो पडिलग्गो, तेन सो पडिचरिओ, तेन से पडिचरिओ, तेन से परसुविज्जा दिन्ना, सरवणे साहिया, अन्ने भणंति-जमदग्गिस्स परंपरागयत्ति परसुविज्जा सा रामो पाढिओत्ति । सा रेणुगा भगिनीघरं गयत्ति तेन रन्ना समं संपलग्गा,

तेन से पुत्तो जाओ, सपुत्ता जमदग्गिना आनिया, रुट्ठो, सा रामेण सपुत्तिया मारिया, सो य किर तत्थेव इसुसत्थं सिक्खिओ, तीसे भगिनीए सुयं, रन्नो कहियं, सो आगओ विनासित्ता गावीए घेत्तूणं पहाविओ, रामस्स कहियं, तेन पहाविऊण परसुणा मारिओ, कत्तवीरिओ य राया जाओ, तस्स देवी तारा । अन्नया से पिउमरणं कहियं, तेन आगएणं जमदग्गी मारिओ, रामस्स कहियं, तेणागएणं जलंतेणं परसुणा कत्तवीरिओ मारिओ, सयं चेव रज्जं पडिवन्नं । इओ य सा तारा देवी तेन संभमेण पलायंती तावसासमं गया, पडिओ से मुहेणं गब्भो, नामं कयं सुभूमो, रामस्स परसू जहि २ खत्तियं पेच्छइ तहिं तहिं जलइ, अन्नया तावसासमस्स पासेणं वीईवयइ, परसू पज्जलिओ, तावसा भणंति-अम्हेच्चिय खत्तिया, तेन रामेण सत्तवारा निक्खत्ता पुहवी कया, हणूणं थालं भरियं, एवं किर रामेणं कोहेणं खत्तिया वहिया ॥ एवं विधं क्रोधं नामयन्त इत्यादि पूर्ववत् । मानोऽपि नामादिश्चतुर्विध एव, कर्मद्रव्यमानस्तथैव नोकर्मद्रव्यमानस्तु स्तब्धद्रव्यलक्षणः, भावमानस्तु तद्विपाकः, स च चतुर्धा, यथाऽऽह– 'तिणसलयाकट्ठट्ठियसलेत्थं भोवमोमाणो'त्ति, अत्रोदाहरणं-

सो सुभूमो तत्थ संवड्ढइ विज्जाहरपरिग्गहिओ, अन्नया परिखिज्जइ विसाईहिं, इओ य रामो नेमित्तं पुच्छइ-कओ मम विनासोत्ति ?, भणिय-जो एयंमि सीहासने निवेसिहिति एयाउ दाढाओ पायसीभूयाओ खाहिति तओ भयं, तो तेणं अवारियं भत्त्यं कयं, तत्थ सीहासनं धुरे ठवियं, दाढाओ से अग्गओ कयाओ । इत्तो य मेहणाओ विज्जाहरो सो पउमसिरिधूयाए नेमित्तियं पुच्छइ-कस्सेसा दायव्वा ?, सो सुभोमं साहइ, तप्पभिइओ मेहनाओ सुभोमं ओलग्गइ, एवं वच्चइ कालो । इओ य सुभूमो मायरं पुच्छइ-किं एत्तिगो लोगो ? अन्नोवि अत्थि ?, तीए सव्वं कहियं, तो माणीहि मा मारिज्जिहिसित्ति, सो तं सोऊणमभिमाणेण हत्थिणाउरं गओ तं सभं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सीहासने निविट्ठो, देवया रडिऊण नट्ठा, ताओ दाढाओ परमन्नं जायाओ, तो तं माहणा पहया, तेणं विज्ञाहरेणं तेसिमुवरिं पाडिज्ञंति, सो वीसत्थो भुंजइ, रामस्स परिकहियं, सन्नद्धो तत्थागओ परसुं मुयइ, विज्झाओ, इमो य तं चेव थालं गहाय उट्ठिओ, चक्करयणं जायं, तेन सीसं छिन्नं रामस्स, पच्छा तेन सुभोमेण मानेनं एक्कवीसं वारा निब्बंभणा पुहवी कया, गब्भावि फालिया ।। एवंविधं मानं नामयन्त इत्यादि पूर्ववत् । माया चतुर्विधा, कर्मद्रव्यमाया योग्यादिभेदाः पुद्गला इति, नोकर्मद्रव्यमाया निधानादिप्रयुक्तानि द्रव्याणि, भावमाया तत्कर्मविपाकलक्षणा, तस्याश्चैते भेदाः-'मायावलेहिगोमुत्तिमिंढसिंगघणवंसिमूलसमा' मायाए उदाहरणं पंडरज्ञा-जहा तीए भत्तपच्चक्खाइयाए पूयाणिमित्तं तिन्नि वारे लोगो आवाहिओ, तं आयरिएहिं नायंआ-लोआविया, ततियं च णालोविया, भणइ-एस पुव्वब्भासेणागच्छइ; सा य मायासल्लदोसेण किब्बिसग जाया, एरिसी दुरंता मायेति ।।

अहवा सव्वंगसुंदरित्ति, वसंतपुरं नयरं, जियसत्तू राया, धनवईधनावहा भायरो सेट्ठी, धनसिरी य से भगिनी, सा य वालरंडा परलोगरया य, पच्छा मासकप्पागयधम्मधोसायरियसगासे पडिबुद्धा, भायरोवि सिनेहेणं तहेव, सा पव्वइउमिच्छइ, ते तं संसारनेहेणं न देंतिं, सा य धम्मव्वयं खद्धं खद्धं करेइ, भाउज्ञायाओ से कुरुकुरायंति, तीए विचिंतिय-पेच्छामि ताव भाउगाण चित्तं, किमेयाहिंति ?, पच्छा नियडीए आलोइऊण सोवणयपवेसकाले वीसत्थं वीसत्थं बहुं धम्मगयं जंपिऊण तओ नट्ठखिड्डेणं जहा से भत्ता सुणेइ तहेगा भाउज्ञाया भणिया-किं बहुना ? साडियं रक्खेज्ञासि, तेन चिंयियं-नूणमेसा दुच्चारिणित्ति, वारियं च भगवया असईपोसणंति, तओ णं परिट्ठवेमित्ति पल्लंके उववसिंती वारिया, सा चिंतेइ-हा ! किमेयंति, पच्छा तेन भणियं-घराओ मे णीहि, सा चिंतेइ-किं मए दुक्कडं कयंति, न किंचि पासइ, तओ तत्थेव भूमिगयाए किच्छेण णीया रयणी, पभाए उल्लुग्गंगी निग्गया, धणसिरीए भणिया-कीस उल्लुग्गंगित्ति, सा रुयंती भणइ-न याणामो अवराहं, गेहाओ य धाडिया, तीए भणियं-वीसत्था अच्छह, अहं ते भलिस्सामि, भाया भणिओ-किमेयमेवंति,स तेन भणियं-अलं मे दुट्ठसीलाए, तीए भणियं-कहं जाणासि ?, तेन भणियं-तुज्झ चेव सगासाओ, सुया से धम्मदेसणा निवारणं च, तीए भणियं-अहो ते पंडियत्तणं वियारक्खमत्तं च धम्मे य परिणामो, मए सामन्नेण बहुदोसमेयं भगवया भणियं तीसे उवइट्ठं वारिया य, किमेतावतैव दुच्चारणी होइ, तओ सो लज्जिओ, मिच्छादुक्कडं से दवाविओ, चिंतियं च णाए-एस ताव मे कसिणधवलपडिवज्ञगो, वीओवि एवं चेव विण्णासिओ, नवरं सा भणिया-किं बहुणा ?, हत्थं रक्खिज्ञसित्ति, सेसविभासा तहेव, जाव एसोऽवि मे कसिणधवलपडिवज्ञगोत्ति एत्थ पुण इमाए नियडिए अभक्खाणदोसओ तिव्वं कम्ममुवनिबद्धं, पच्छा एयस्स अपडिक्कमिय भावओ पव्वइया, भायरोऽवि से सह जायाहिं पव्वइया, अहाउयं पालइत्ता सव्वाणि सुरलोगं गयाणि, तत्थवि अहाउयं पालयित्ता भायरो से पढमं चुया सागेए णयरे असोगदत्तस्स इब्भस्स समुद्दत्तसयरदत्ताभिहाणा पुत्ता जाया, इयरीवि चविऊण गयपुरे णयरे संखस्स इब्भसावगस्स धूया आयाया, अईवसुंदरित्ति सव्वंगसुंदरी से नामं कयं, इयरीओ वि भाउज्ञायाओ चविऊणं कोसलाउरे नंदना भिहाणस्स इब्भस्स सिरिमइकंतिमइणामाओ धूयाओ आयाओ, जोव्वणं पत्ताणि, सव्वंगसुंदरी कहवि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सागेयाओ गयपुरमागएण असोगदत्तसिद्विणिा दिद्वा, कस्सेसा कन्नगत्ति, संखस्स सिद्विस्स सबहुमाणं, समुद्ददत्तस्स मग्गिया लद्धा विवाहो य कओ, कालंतरेण सो विसज्ञावगो आयओ, उवयारो से कओ, वासघरं सज्जियं ।

एत्थंतरंमि य सव्वंगसुंदरीए उइयं तं नियडिनिबंधणं पढमकम्मं, तओ भत्तारेण से वासघरट्ठिएण वोलेंती देविगी पुरिसच्छाया दिट्ठा, तओऽनेन चिंतियं-दुट्ठसीला मे महिला, कोवि अवलोएउं गओत्ति, पच्छा साऽऽगया, न तेन बोल्लाविया, तओ अट्टदुहट्टयाए धरणीए चेव रयणी गमिया, पहाए से भत्तारो अनापुच्छिछय सयणवग्गं एगस्स धिज्ञाइयस्स कहेत्ता गओ सागेयं नयरं, परिनीया यऽनेन कोसलाउरे नंदनस्स धूया सिरिमइत्ति, भाउणा य से तीसे भइनी कंतिमई, सुयं च णेहिं, तओ गाढमुव्विईई जाया, विसेसओ तीसे, पच्छा ताणं गमागमसंववहारो वोच्छिन्नो, सा धम्मपरा जाया, पच्छा पव्वइया, कालेण विहरंती पव्वत्तिणीए समं साकेयं गया, पुव्वभाउज्ञायाओ उवसंताओ भत्तारा य तासिं न सुद्धु । एत्थंतरंमि य से उदियं नियडिनिबंधणं वितियकम्मं, पारणगे भिक्खट्ठं पविट्ठा, सिरिमई य वासघरं गया हारं पोयति, तीए अब्भुट्ठिया, सा हारं मोत्तूण भिक्खत्थमुट्ठिया, एत्थंतरंमि चित्तकम्मोइण्णेणं मयूरेणं सो हारो गिल्लिओ, तीए चिंतियं-अच्छरीयमिणं, पच्छा साडगद्धेण ठइयं, भिक्ख्या पडिग्गाहिया निग्गया य, इयरीए जोइयं-जाव नत्थि हारोत्ति, तीए चिंतियं-किमेयं वड्डुखेड्डुं ?, परियणो पुच्छिओ, सो भणइ-न कोइ एत्थ अन्नं मोत्तूण पविट्ठो अन्नो, तीए अंबाडिओ, पच्छा फुट्टं । इयरीएवि पवत्तिनीए सिट्ठं, तीए भणियं-विचित्तो कम्मपरिणामो, पच्छा उग्गतरतवरया जाया, तेसिं चानत्थभीयाणं तं नेड्डुं न उग्गाहइ; सिरिमई कंतिमइओ भत्तारेहिं हसिज्जंति, न य विप्परिणमंति, तीएवि उग्गतवरयाए कम्मसेसं कयं, एत्थंतरंमि सिरिमई भत्तारसहगया वासहरे चिट्ठइ, जाव मोरेण चित्ताओ ओयरिऊण निग्गिलिओ हारो ताणि संवेगमावन्नानि, अहो से भगवईए महत्थता जं न सिट्ठमिदंति खामेउं पयट्टाणि, एत्थंतरंमि से केवलमुप्पण्णंति, देवेहि य महिमा कया, तेहिं पुच्छियं, तीएऽवि साहिओ परभववुत्तंतो, तानि पव्वइयाणणि, एरिसी दुहावहा मायत्ति ।

अहवा सूयओ-एगस्स खंतस्स पुत्तो खुड्डुओ सुहसीलओ जाव भणइ-अविरतियत्ति, खंतेण धाडिओ लोयस्स पेसणं करेंतो हिंडिऊण अट्टवसट्टो मओ, माया दोसेण रुक्खकोट्टरे सूतओ जाओ, सो य अक्खाणगाणि धम्मकहाओ जाणइ जातिसरणेणं, पढइ, वणचरणएं गहिओ, कुंटितो पाओ अच्छि च काणियं, विधीए उड्डिओ, न कोइ इच्छइ, सो सावगस्स आवणे ठवित्ता मुल्लस्स गओ, तेन अप्पओ जाणाविओ, कीओ, न वा पच्चक्खायंति, पुच्छियाणि साहंति, वीसत्थाणि अच्छह, सो दारओ सद्दाविओ, भणिओ य ससरक्खाणं ढुक्काहि, ठिक्किरियं अच्चेहि, ममं च पच्छतो इट्टगं उक्खणिऊणं णिहणाहि, तहा कयं, सो अविरतओ पायपडितो विन्नवेइ-धूयाए वरं देहि, सूयओ भणइ महेसरस्स-जिणदासस्स देहि, दिन्ना, सा गव्वं वहइ-देवदिन्नत्ति, अन्नया तेन हसियं, निब्बंधे कहियं, अमरिसं वहइ, संखडीए वखित्ताणि हरइ, भणति-तुमंसि पंडितउत्ति पिच्छं उप्पाडियं, सो चिंतेइ-कालं हरामि, भणइ-णाहं पंडितओ सा ण्हाविई, पंडितिया,-एगा ण्हाविणी कूरं छेत्तं णिंती चोरेहिं गहिया, अहंपि एरिसे मग्गामि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रत्ति एह रूवए लएत्ता जाइहामो, ते आगया, वातकोणएण णक्काणि छिण्णाणि, अन्ने भणंति-खत्तमुहे खुरेण छिन्नाणि, बितियदिवसे गहिया, सीसं कोट्टेइ भणति य-केण तुब्भेत्ति ?, तेहिं समं पहाविया, एगंमि गामे भत्तं आणेमिति कलालकुले विक्किया, ते रूवए घेत्तूणं पलाया, रत्तिं रुक्खं विलग्गा, तेवि पलाया उलग्गंति, महिसीओ हरिऊणं तत्थेव आवासिया मंसं खायंति, एक्को मंसं घेत्तूण रुक्खं विलग्गो दिसाओ पलोएइ, तेन दिट्ठा, रूवए दाइए, सो ढुक्को, जिब्भाए गहिओ, पडंतेण आसइत्ति भणिते आसइत्ति काऊणं णट्ठा, सा घरं गया, साण्हाविईं पंडितिया णाहं पंडितओ। ताहे पुणोवि अन्नं लोभं उक्खणइ, पुनरवि दारियापिउणा दारिद्देण धनयओ छलाविओ रूवगा दिन्नत्ति कूडसक्खीहिं दवाविओ, दारिया मग्गिया, कूवे छूढा, सुरंगं खणाविया, पिया कप्पासं कत्ताविओ, सपुत्तया णिज्जाहि, सो गओ दिसं, इमावि गणियवेसेणं पुव्वमागया, तिलक्खागिया कोलिगिणी चोरनिमित्तं सद्दाइस्सामित्ति असंतएणं पत्तियावितो राया वाणियदारियाए, एवमाईणि पंच सयाणि रत्तीगयाणि, पिंच्छित्ता मुक्को, सेणेणं गहिओ, दुण्हं सेणाणं भंडंताणं पडिओ, असोगवणियाए पेसेल्लियाए पुत्तेण दिट्ठो, भणिओ य-संगोवाहि, अहं ते कज्जं काहामि, संगोविओ, अन्नस्स रज्जे दिज्जमाणे भिंडमए मयूरे विलग्गेणं रत्तिं राया भणिओ, पेसिल्लियापुत्तस्स रज्जं दिन्नं, तेन सत्तदिवसे मग्गियं, दोवि कुला पव्वाविया, भत्तं पच्चक्खायं, सहस्सारे उववण्णो ॥ एवंविधां मायां नामयन्तं इत्यादि पूर्ववत्, लोभश्चतुर्विधः-कर्मद्रव्यलोभो योग्यादिभेदाः पुद्गला इति, नोकर्मद्रव्यलोभस्त्वाकरमुक्तिश्चिक्कणिकेत्यर्थः, भावलोभस्तु तत्कर्मविपाकः, तद्भेदाश्चैते-'लोहो हलिद्दखंजणकद्दमकिमिरायसामाणो' सर्वेषां क्रोधादीनां यथायोगं स्थितिफलानि-

पक्खचउमासवच्छरजावज्जीवानुगामिणो कमसो ।
देवनरतिरियनारगगइसाहणहेयवो नेया ॥१॥

लोभे लुद्धनंदोदाहरणं-पाडलिपुत्ते लुद्धनंदो वाणियओ, जिनदत्तो सावओ, जियसत्तू राया, सो तलागं खणावेइ, फाला य दिट्ठा कम्मकरेहिं, सुरामोल्लंति दो गहाय वीहीए सावगस्स उवनीया, तेन ते नेच्छिया, नंदस्स उपनीया, गहिया, भणिया य-अन्नेवि आणेज्जह, अहं चेव गेण्हिस्सामि, दिवसे २ गिण्हइ फाले। अन्नया अब्भहिए सयणिज्जामंतणए वलामोडी-एणीओ, पुत्ता भणिया-फाले गेण्हइ, सो य गओ, ते य आगया, तेहिं फाला य गहिया, अक्कुठा य गया पूवियसालं, तेहिं ऊणगं मोल्लंति एगंते एडिया, किट्टं पडियं, रायपुरिसेहिं गहिया, जहावत्तं रन्नो कहियं। सो नंदो आगओ भणइ-गहिया न वत्ति, तेहिं भण्णइ-किं अम्हेवि गहेण गहिया?, तेन अइलोलयाए एत्तियस्स लाभस्स फिट्टोडहंति पादाण दोसेण एक्काए कुसीए दोवि पाया भग्गा, सयणो विलवइ। तओ रायपुरिसेहिं सावओ नंदोय घेत्तूण राउलं नीया, पुच्छिया, सावओ भणइ-मज्झ इच्छापरिमाणातिरित्तं, अविय-कूंडमाणंति, तेन न गहिया, सावओ पूएऊण विसज्जिओ, नंदो सूलाएभिन्नो, सकुलो य उच्छाइओ, सावगो सिरिघरिओ ठवियओ। एरिसो दुरंतो लोभो ॥

एवंविधं लोभं नामयंत इत्यादि पूर्ववत्। अथेन्द्रियद्वारमुच्यते, तत्रेन्द्रियमिति कः शब्दार्थः?, 'इदि परमैश्वर्ये' इन्दनादिन्द्रः,-सर्वोपलब्धिभोगपरमैश्वर्यसम्बन्धाज्जीवः, तस्य लिङ्गं तेन दृष्टं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सृष्टं चेत्यादि, 'इन्द्रियमिन्द्रलिङ्गम्' इत्यादिना सूत्रेण निपातनात् सिद्धं, तच्च द्विधा-द्रव्यन्द्रियं भावेन्द्रियं च, तत्र निर्वृत्त्युपकरणे द्रव्येन्द्रियं, लब्ध्यापयोगौ भावेन्द्रियमिति, अमूनि च स्पर्शनादिभेदेन पञ्च भवन्ति अतो बहुवचनम्, उक्तं च-''स्पर्शनरसनघ्राणचक्षुः श्रोत्राणीन्द्रियाणि'' एतानि च नामितानि अलं दुःखायेति, अत्रोदाहरणानि । तत्थ सोइंदिए उदाहरणं-वसंतपुरे नयरे पुप्फसालो नाम गंधव्विओ सो अइसुस्सरो विरूवो य, तेन जनो हयहियओ कओ, तंमि नयरे सत्थवाहो दिसायत्तं गएल्लओ, भद्दा य से भारिया, तीए केणवि कारणेण दासीओ पयट्टियाओ, ताओ सुणंतीओ अच्छंति, कालं न याणंति, चिरेण आगयाओ अंबाडियाओ भणंति-मा भट्टिणी ! रूसेह, जं अज्ज अम्हाहिं सुयं तं पसूणवि लोभणिज्जं, किमंग पुण सकण्णाणं?, कहंति ?, ताहिं से कहियं, सा हियएण चिंतेइ-कहमहं पेच्छिज्जामि ? । अन्ना तत्थ नयरदेवयाए जत्ता जाया, सव्वं च नयरं गयं, सावि गया, लोगोवि पणमिऊणं पडिएइ पहायदेसकालो य वट्टइ, सोवि गाइऊण परिस्संतो परिसरे सुत्तो, सा य सत्थवाही दासीए समं आगया, पणिवइत्ता देउलं पयाहिणं करेइ, चेडीहिं दाइओ एस सोत्ति, सा संभंता, तओ गया, पेच्छइ विरूवं, दंतुरं, भणइ-दिट्ठं से रूवेण चेव गेयं, तीए निच्छूढं, चेतियं चऽणेण, कुसीलएहिं से कहियं, तस्स अमरिसो जाओ, तो से घरमूले पच्चूसकालसमए गाइउमारद्धो पउत्थवइयानिबद्धं, जह आपुच्छइ जहा तत्थ चिंतेइ जहा लेहे विसज्जइ जहा आगओ घरं पविसइ, सा चिंतेइ-सभूयं वट्टइ ताए अब्भुट्ठेमित्ति आगासतलगाओ अप्पा मुक्को, सा मया,एवं सोइंदियं दुक्खाय भवइ ।

चक्खिंदिए उदाहरणं-महुराए नयरीएजियसत्तू राया, धारिणी देवी, सा पयईए धम्मसद्धा, तत्थ भंडीरवणं चेइयं, तस्स जत्ता, राया सह देवीए णयरजणो य महाविभूईए निग्गओ, तत्थेगेणमिब्भपुत्तेण जाणसंठियाए देवए जवणियंतरविणिग्गओ सालत्तगो सनेउरो अईव सुंदरो दिट्ठो चलणोत्ति, चिंतियं चऽनेनं-जीए एरिसो चलणो सा रूवेण तियससुंदरीणवि अब्भहिया, अज्झोववन्नो, पच्छा गविट्ठा-का एसत्ति ?, नाया, तग्घरपच्चासन्ने वीही गहिया, तीसे दासचेडीणं दुगुणं देह महामनुस्सत्तणं च दाएइ, ताओ हयहिययाओ कयाओ, देवीएवि साहंति, संववारो लग्गो, देवीएवि गंधाई तओ चेव गिण्हंति । अन्नया तेन भणियं-को एयाओ महामोल्ला गंधाइपुडियाओ उच्छोडेइ ?, चेडीए सिट्ठं-अम्हाणं सामिणित्ति, तेन एगाए पुडियाए भुज्जपत्ते लेहो लिहिऊण छूढो, जहा–

''काले प्रसुप्तस्य जनार्दनस्य, मेघांधकारासु च शर्वरीषु ।
वृ- गाथाद्वयार्थः कथानकेभ्य एवावसेयः, तानि चामूनि-तत्थ निमित्तेत्ति, एगस्स सिद्धपुत्तस्स दो सीसगा निमित्तं सिक्खिया, अन्नया वच्चंति, तेहिं हत्थिपाया दिट्ठा, एगो भणइ-हत्थिणियाए पाया,कहं ?, काइएण, सा य हत्थिणी काण, अहं ?, एगपासेण तणाइं खाइयाइं, तेन काइ-एणेव नायं जहा इत्थी पुरिसो य विलग्गाणि, सा य गुव्विणित्ति, कहं ?, हत्थाणि थंभेत्ता उट्ठिया, दारगो से भविस्सइ, जेण दक्खिणो पाओ गरुओ, रत्तपोत्ता, जेण रत्ता दसिया रुक्खे लग्गा ।।नईतीरे एगाए वुड्डीए पुत्तो पविसियओ, तस्सागमणं पुच्छिया, तीसे य घडओ भिन्नो, तत्थेगो भणइ-'तज्जाएण य तज्जायं' सिलोगो मओत्ति परिणामेइ, बितिओ भणइ-जाहि वुड्डे ! सो घरे आगओ,सा गया,दिट्ठो पुव्वागओ, जुवलगं रूवगे य गहाय आगया,सक्कारिओ, बितिओ आपुच्छइ-सब्भावं मम न कहेसि, तेन पुच्छिया, तेहिं जहाभूयं परिकहियं, एगो भणइ-विवत्ती मरणं, एगो भूमीओ उट्ठिओ सो भूमीए चेव मिलिओ, एवं सोवि दारओ, भणियं च–

'तज्जाएण य तज्जायं' सिलोगो, गुरुणा भणियं-को मम दोसो ?,
न तुमं सम्मं परिणामेसि, एगस्स वेणइगी बुद्धी ।।

अत्थसत्थे-कप्पओ दहिकुंडगउच्छुकलावओ य, एगस्स वेणइगी ।।

लेहे जहा-अट्ठारसलिविजाणगो, एवं गणिएवि । अन्ने भणंति-कुमार वट्टेहि रमन्ता अक्खराणि सिक्खाविया गणियं च, एसाऽवेयस्स वेणइगी । कूवे-खायजाणएण भणियं जहा-एद्दूरे पाणियंति, तेहिं खयं, तं वोलीणं, तस्स कहियं, पासे आहणहत्ति भणिया, घोसगसद्देणं जलमुद्धाइयं, एयस्स वेणइगी ।। आसो-आसवाणियगा बारवई गया, सव्वे कुमारा थुल्ले वड्डे य गेण्हंति, वासुदेवेण दुब्बलओ लक्खणजुत्तो जो सो गहिओ, कज्जनिव्वाही अणगेआसावहो य जाओ, वासुदेवस्स वेणइगी ।। गद्दभे-राया तरुणप्पिओ, सोओधाइओ, अडवीए तिसाए पीडिओ खंधारो, थेरं पुच्छइ, घोसावियं, एगेण पिइभत्तेणाणीओ, तेन कहियं-गद्दभाणं उस्सिंघणा, तस्स सिरापासणं, अन्ने भणंति-उस्सिंघणाए चेव जलासयगमणं, थेरस्स वेणइगी ।। लक्खणे-पारसविसए आसरक्खओ, धीयाएतस्स समं संसग्गी, तीए भणिओ-वीसत्थाणं घोडाणं चम्मं पहाणाण भरेऊण रुक्खाओ मुयाहि, तत्थ जो न उत्तस्सइ तं लएहि, पडहयं च वाएहि, बुज्झावेहि य खक्खरऊणं, सो वेयणकाले भणइ-मम दो देहि, अमुगं २ च, तेन भणिओ-सव्वे गेण्हाहि, किं ते एएहिं, सो नेच्छइ, भज्जाए कहियं-धीया दिज्जउ, भज्जा से नेच्छइ; सो तीसे वड्डइ, दारयं कहे (रे) इ, लक्खणजुत्तेण कुडुंबं परिवड्डइत्ति ।। एगस्स माउलगेण धीया दिन्ना, कम्मं न करेइ; भज्जाए चोदिओ दिवे दिवे अडवीओ रित्तहत्थो एइ, छट्ठे मासे लद्धं कट्ठं कुलओ कओ, सयसहस्सेण सेट्ठिणा लइओ, अक्खयानिमित्तं, आससामिस्स वेणइगी ।।

गंठिंमि-पाडलिपुत्ते मुरुंडो राया, पालित्ता आयरिया, तत्थ जाणएहिं इमाणि विसज्जिययणि-सुत्तं मोहिययं लट्ठी समा समुग्गकोत्ति, केणवि न नायाणि, पालित्तायरिया सद्दाविया, तुब्भे जाणह भगवंति ?, बाढण जाणामि, सुत्तं उण्होदए छूढं मयणं विरायं दिट्ठाणि अग्गगाणि, दंडओ पाणिए छूढो, मूलं गुरुयं, समुग्गओ जउणा घोलिओ उण्होदए कड्ढिओ उग्घाडिओ य, तेन विय ओट्टियं सयलगं राइल्लऊण रयणाणि छूढाणि, तेन सीवणीए सीविऊण विसज्जियं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अब्भिंदेत्ता निप्फेडेह, न सक्किंयं, पादलित्तयस्स वेणइगी ।। अगए–परबलं णयरं रोहेउ एइत्ति रायाए पाणीयाणि विणोसेयव्वाणित्ति विसकरो पाडिओ, पुंजा कया, वेज्जो जवमेत्तं गहाय आगओ, राया रुट्ठो, वेज्जो भणइ-सयसहस्सवेधी, कहं ?, खीणाऊ हत्थी आनीओ, पुंछवालो उप्पाडिओ, तेणं चेव वालेणं तत्थ विसं दिन्नं, विवण्णं करियं तं चरंतं दीसइ, एस सव्वोवि विसं, जोवि एयं खायइ सोवि विसं, एयं सयसहस्सवेधी, अत्थि निवारणाविही ?, बाढं अत्थि, तहेव अगओ दिन्नो, पसमिंतो जाइ; वेज्जस्स वेणइगी ।

जं किं बहुना ?, असारेण पडिवक्खदरिसणेण न आयोवायकुसलदंसणत्ति ।। रहिओ गणियायएक्कं चेव, पाडलिपुत्ते दो गणियाओ-कोसा उवकोसा य, कोसाए समं थूलभद्दसामी अच्छइओ आसि पव्वइओ, जं वरिसारत्तो तत्थेव कओ तओ साविया जाया, पच्चक्खाइ अबंभस्स अन्नत्थ रायनिओगेण, रहिएण आराहिओ, सा दिन्ना, थूलभद्दसामिणो अभिक्खणं २ गुणग्गहणं करेइ; न तहा तं उवयरइ, न तहा तं उवयरइ, सो तीए अप्पणो विन्नाणं दरिसेउकामो असोगवणियाए नेइ, भूमीगएण अंबपिंडी तोडिया, कंडपोंखे अन्नोन्नं लायंतेण हत्थब्भासं आणेत्ता अद्धचंदेण छिन्ना गहिया य, तहावि न तूसइ, भणइ-किं सिक्खियस्स दुक्करं ?, सा भणइ-पिच्छ ममंति सिद्धत्थयरासिंमि नच्चिया सूईण अग्गयंमि य कणियार-कुसुमयपोइयासु य, सो आउट्टो, सा भणइ-

'न दुक्करं छोडिय अंबपिंडि, न दुक्करं सिक्खिउ नच्चियाए ।
तं दुक्करं तं च महानुभावं, जं सो मुनी पमदवणंमि वुच्छो ।।१।।'

तओ तस्स संतिगो वुत्तंतो सिट्ठो, पच्छा उवसतो रहिओ, दोण्हवि वेणइगी ।। सीया साडी दीहं च तणं कोंचयस्स अवसव्वयं एक्कं चेव, रायपुत्ता आयरिएण सिक्खाविया, दव्वलोभी य सो रायाणओ तं मारेउमिच्छइ, ते दारगा चिंतेंति-एएण अम्हं विज्ञा दिन्ना, उवाएण नित्थारेमो, जाहे सो जेमओ एइ ताहे ण्हाणसाडियं मग्गइ, ते सुक्कियं भणंति-अहो सीया साडी, बारसंमुहं तणं देंति, भणंति-अहो दीहं तणं, पुव्वं कुंचएण पयाहिणीकुज्जइ, तद्दिवसं अपयाहिणीकओ, परिगयं जहा विरत्ताणि, पंथो दीहो सीयाणं ममं काउं मग्गइ, दोण्हवि वेणइगी ।। निव्वोदए-वाणियगभज्जा चिरपउत्थे पइम्मि दासीए सब्भावं कहेइ-पाहुणयं आणेहित्ति भणिया, तीए पाहुणओ आनीओ,आवस्सयं च से कारियं, रत्ति पवेसिओ, तिसाइओ निव्वोदयं दिन्नं, मओ, देउलियाए उज्झिओ, ण्हाविया पुच्छिया, केण कारियं ?, दासीए, सा पहया, कहियं, वाणिगिणी पुच्छिया, साहइ सब्भावं, पलोइयं, तयाविसो घोणसोत्ति दिट्ठो य, नयरमयहराणं वेणइगी ।।

गोणे घोडगपडणं च रुक्खाओ एक्कं, एगो अकयपुण्णो जं जं करेइ तं तं से विवज्जइ, मित्तस्स जाइतएहिं बइल्लेहिं हलं वाहेइ, वियाले आणिया, वाडे छूढा, सो जेमेइ, मित्तो सोइ, लज्जाए न ढुक्को, तेनवि दिट्ठा, ते णिप्फिडिया वाडाओ हरिया, गहिओ, देहित्ति राउलं निज्जइ। पडिपंथेणं घोडएणं एइ पुरिसो, सा तेन पाडिओ आसएण, पलायंतो तेन भणिओ-आहणहत्ति, मम्मे आहओ, मओ, तेणवि लइओ, वियाले नयरिबाहिरियाए वुत्था, तत्थ लोमंथिया सुत्ता, इमेवि तहिं चेव, सो चिंतेइ-जावज्जीवबंधणो कीरिस्सामि, वरं मे अप्पा उब्बंधो, सुत्तेसु दंडिखंडेण तंमि वडरुक्खे अप्पाणं उक्कलंबेइ, सा दुब्बला, तुट्टा, पडिएण लोमंथियमयहरओ मारिओ,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेहिवि गहिओ, करणं नीओ, तीहिवि कहियं जहावुत्तं, सो पुच्छिओ भणइ-आमं, कुमारामच्चो भणइ-एसो बलद्दे देउ तुब्भं पुण अक्खीणि ओक्खमंतु, एसो आसं देउ, तुज्झ जीहा उप्पाडिज्जइ, एसो हेट्ठा ठाउ तुब्भं, एगो उवज्झाओ उक्कलंबिज्जउ, णिप्पडिभोत्ति काउं मंतिणा मुक्को, मंतिस्स वेणइगित्ति गाथाद्वयार्थः ।। उक्ता वैनयिकी, साम्प्रतं कर्मजाया बुद्धेर्लक्षणं प्रतिपादयन्नाह–

नि. (९४६) उवओगदिट्ठसारा कम्मपसंगपरिघोलणविसाला ।
साहुक्कारफलवई कम्मसमुत्था हवइ बुद्धी ।।

वृ- उपयोजनमुपयोगः-विवक्षिते कर्मणि मनसोऽभिनिवेशः सारः-तस्यैव कर्मणः परमार्थः उपयोगेन दृष्टः सारो ययेति समासः अभिनिवेशोपलब्धकर्मपरमार्थेत्यर्थः, कर्मणि प्रसङ्गः-अभ्यासः परिघोलनं-विचारः कर्मप्रसङ्गपरिघोलनाभ्यां विशाला कर्मप्रसङ्गपरिघोलनविशाला अभ्यासविचारविस्तीर्णेति भावार्थः, साधुकृतं-सुष्ठुकृतमिति विद्वद्भ्यः प्रशंसा साधुकारस्तेन फलवतीति समासः, साधुकारेण वा शेषमपि फलं यस्याः सा तथा, 'कर्मसमुत्था' कर्मोद्भवा भवति बुद्धिरिति गाथार्थः ।। अस्या अपि विनेयवर्गानुकम्पयोदाहरणैः स्वरूपमुपदर्शन्नाह–

नि. (९४७) हेरन्निए १ करिसए २ कोलिअ ३ डोवे अ ४ मुत्ति ५ घय ६ पवए ७ ।
तुन्नाग ८ वड्ढई ९ पूइए अ १० घड ११ चित्तकारे अ १२ ।।

वृ- हेरण्णिओ अभिक्खजोएण अंधकारेवि ख्वयं जाणए हत्थामोसेणं, करिसओ अभिक्खजोएण जाणए फलनिप्पत्तिं, तत्थ उदाहरणं-एगेण चोरेण खत्तं पउमाकारं खयं, सो जनवायं निसामेइ, करिसओ भणइ-किं सिक्खियस्स दुक्करं ?, चोरेण सुयं, पुच्छिओ गंतूण, छुरियं अंच्छिऊण मारेमि, तेन पडयं पत्थरेत्ता वीहियाण मुट्ठी भरित्ता किं परंमुहा पडंतु उरंमुहा पासेल्लिया (वा)?, तहेव कयं, तुट्ठो । कोलिओ मुट्ठिणा गहाय तंतू जाणइ-एत्तिएहिं वा कंडएहिं बुज्झइत्ति । डोए वड्ढइ जाणइ एत्तियं माई । मोत्तियं आइण्णंतो आगासे उक्खिवित्ता तहा निक्खिवइ जहा कोलवाले पडइ घये घयविक्किणओ सगडे संतओ जइ रुच्चइ कुंडियानालए छुभइ । पवयो आगासे ठियाइं को(क) रणाणि करेइ । तुण्णाओ पुव्वि थुल्लाणि पच्छा जहा न नज्जइ सूइए तइयं गेण्हइ जहा समप्पइ जहा सामिसंतगं तं दूसं धियारेण कारियं । वड्ढईअमवेऊण देवउलरहाणं पमाणं जाणइ । घडकारो पमाणेण मट्टियं गेण्हइ, भाणस्सवि पमाणं अमिणित्ता करेइ । पूविओऽवि पुणो पलप्पमाणममवेऊण करेइ । चित्तकरोवि समवेऊणवि पमाणजुत्तं करेइ, ततियं वा वन्नयं करेइ जत्तिएणं समप्पइ । सव्वेसिं कम्मजत्ति गाथार्थः ।।

उक्ता कर्मजा, साम्प्रतं पारिणामिक्या लक्षणं प्रतिपादयन्नाह–

नि. (९४८) अनुमानहेउदिट्ठंतसाहिया वयविवागपरिणामा ।
हिअनिस्सेअसफलवई बुद्धी परिणामिआ नाम ।।

वृ- अनुमानहेतुदृष्टान्तैः साध्यमर्थं साध्यतीति अनुमानहेतुदृष्टान्तसाधिका, इह लिङ्गात् ज्ञानमनुमानं स्वार्थमित्यर्थः, तत्प्रतिपादकं वचो हेतुः परार्थमित्यर्थः, अथवा ज्ञापकमनुमानं कारको हेतुः, दृष्टमर्थमन्तं नयतीति दृष्टान्तः । आह–अनुमानग्रहणादेव दृष्टान्तस्य गतत्वादलमुपन्यासेन, न, अनुमानस्य तत्त्वत एकलक्षणत्वात्, उक्तं च–

"अन्यथाऽनुपपन्नत्वं, यत्र तत्र त्रयेण किम् ?।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नान्यथाऽनुपपन्नत्वं, यत्र तत्र त्रयेण किम ?॥१॥"

इत्यादि । साध्योपमाभूतस्तु दृष्टान्तः, उक्तं च-"यतः साध्यस्योपमाभूतः, स दृष्टान्त इति कथ्यते" कालकृतो देहावस्था-विशेषो वय इत्युच्यते, तद्विपाके परिणामः-पुष्टता यस्याः सा तथाविधा, हितम्- अभ्युदय-स्तत्कारणं वा, निःश्रेयसं-मोक्षस्तन्निबन्धनं वा हितनिः श्रेयसाभ्यां फलवती हित निःश्रेयस-फलवती बुद्धिः पारिणामिकी नामेति गाथार्थः ॥ अस्या अपि शिष्यगणहितायोदाहरणैः स्वरूपं दर्शयन्नाह-

नि. (९४९)अभए १ सिट्ठि २ कुमारे ३ देवी ४ उदिओदए हवइ राया ५ ।
साहू अ नंदिसेने ६ धनदत्ते ६ सावग ८ अमच्चे ९ ॥

नि. (९५०)खवगे १० अमच्चपुत्ते ११ चाणक्के १२ चेव थूलभद्दे अ १३ ।
नासिक्कसुंदरी नंदे १४ वइरे १५ परिणामिआ बुद्धी ॥

नि. (९५१) चलणाइय १६ आमंडे १७ मणी अ १८ सप्पे अ १९
खग्गि २० थूभिं २१ दे २२ परिणामिअबुद्धीए एवमाई उदाहरणा ॥

वृ- आसामर्थः कथानकेभ्य एवावसेयः, तानि चामूनि-अभयस्स कहं परिणामिया बुद्धी?, जया पज्जोओ रायगिहं ओरोहति णयरं, पच्छा तेन पुव्वं निक्खित्ता खंधावारनिवेसजाणएणं, कहिए नट्ठो, एसा । अहवा जाहे गणियाए छलेण नीओ बद्धो जाव तोसिओ चत्तारि वरा, चिंतियं चऽनेन-मोयावेमि अप्पगं, वरो मग्गिओ-अग्गीं अइमित्ति, मुक्को भणइ-अहं छलेण आनीओ, अहं तं दिवसओ पज्जोओ हीरइत्ति कंदंतं नेमि, गओ य रायगिहं, दासो उम्मत्तओ, वाणियदारियाओ, गहिओ, रडंतो हिओ, एवमाइयाओ बहुयाओ अभयस्स परिणामियाओ बुद्धीओ ॥ सेट्ठित्ति, कट्ठो नाम सेट्ठी एगत्थ नयरे वसइ, तस्स वज्जा नामं भज्जा, तस्स नेच्चइल्लो देवसंमो नाम बंभणो, सेट्ठी दिसात्ताए गओ, भज्जा से तेन समं संपलग्गा, तस्स य घरे तिन्नि पक्खी-सुओ य मयणसलागा कुक्कुडगो यत्ति, सो ताणि उवणिक्खिवित्ता गओ, सोऽवि धिज्जाइओ रत्ती अईइ, मयणसलागा भणइ-को तायस्स न वीहेइ ?, सुयओ वारेइ-जो अंबियाए दइओ अम्हंपि तायओ होइ, सा मयणा अनहियासीया धिज्जाइयं परिवसइ, मारिया तीए, सुयओ न मारिओ । अन्नया साहू भिक्खस्सं तं गिहं अइयया, कुक्कुडयं पेच्छिऊण एगो साहू दिसालोयं काऊण भणइ-जो एयस्स सीसं खाइ सो राया होइत्ति, तं किहवि तेणं धिज्जाइएणं अंतरिएण सुयं, तं भणइ-मारेहि खामि, सा भणइ-अन्नं आणिज्जइ, मा पुत्तभंडं संवट्टियं, निब्बंधे कए मारिओ जाव ण्हाउं गओ, ताव तीसे पुत्तो लेहसालाओ आगओ, तं च सिद्धं तम्मंसं, सो रोवइ, सीसं दिन्नं, सो आगओ, भाणए छूढं, सीसं मग्गइ, भणइ-चेडस्स दिन्नं, सो रुट्ठो, एयस्स कज्जे मए माराविओ, जइ परं एयस्स सीसं खाएज्जा तो राया होज्ज, कयं निब्बंधे ववसिया, दासीय सुयं, तओ चेव दारयं गहाय पलाया, अन्नं नयरं गयाणि, तत्थ अपुत्तो राया मओ, आसेण परिक्खिओ, सो राया जाओ । इओ य कट्ठो आगओ, णिययघरं सडियपडियं पासइ, सा पुच्छिया, न कहेइ, सुयएणं पंजरमुक्केण कहियं बंभणाइसंबन्धो सो तहेव, अलं संसारववहारेणं, अहं एतीसे कएण किलेसमणुहवामि एसावि एवंविहत्ति पव्वइओ, इयराणि तं च्चेव नयरं गयाणि जत्थ सो दारओ राया जाओ, साहूवि विहरंतो तत्थेव गओ, तीए

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पद्मभिन्नाओ, भिक्खाए समं सुवण्णं दिन्नं, कूवियं, गहिओ, रायाए मूलं नीओ, धावीए णाओ, ताणि निव्विसयाणि आणत्ताणि, पिया भोगेहिं निमंतिओ, नेच्छइ, राया सड्ढो कओ, वरिसारत्ते पुण्णे वयंतस्स अकिरियाणिमित्तं धिज्जाइएहिं दुवक्खरियाए उवट्ठविओ, परिभट्ठियारूवं कयं, सा गुव्विणीया अनुव्वयइ, तीए गहिओ, मा पवयणस्स उड्डाहो होउत्ति भणइ-जइ मए तो जोणीए नीउ अह न मए ता पोट्टं भिंदित्ता णीउ, एवं भणिए भिन्नं पोट्टं, मया, वन्नो य जाओ, सेट्ठिस्स पारिणामिगी इयं, जीए वा पव्वइओत्ति ॥ कुमारी-खुड्डगकुमारो, सो जहा जोगसंगहेहिं, तस्सवि परिणामिगी । देवी-पुप्फभद्दे णयरे पुप्फसेणो राया पुप्फवई देवी, तीसे दो पुत्तभंडाणि-पुप्फचूलो पुप्फचूला य, ताणि अणुरत्ताणि भोगे भुंजंति, देवी पव्वइया, देवलोगे देवो उववन्नो, सो चिंतेइ-जइ एयाणि एवं मरंति तो नरयतिरिएसु उववज्जिहिंति सुविणए सो तीसे नेरइए दरिसेइ, सा भीया पुच्छइ पासंडिणो, ते न याणंति, अन्नियपुत्ता तत्थ आयरिया, ते सद्दाविया, ताहे सुत्तं कहुंति, सा भणइ-किं तुम्हेहिवि सुविणओ दिट्ठो ?, सो भणइ-सुत्ते अम्ह एरिसं दिट्ठं, पुणोऽवि देवलोए दरिसेइ, तेऽवि से अन्नियापुत्तेहिं कहिया, पव्वइया, देवस्स पारिणामिया बुद्धी ॥

उदिओदए—पुरमयाले नयरे ओदिओदओ राया सिरिकंता देवी, सावगाणि दोन्निवि, परिवाइया पराजिया दासीहिं मुहमक्कडियाहिं वेलविया निछूढा, पओसमावण्णा, वाणारसीए धम्मरुई राया, तत्थ गया, फलयपट्टियाए सिरिकंताए रूवं लिहिऊण दाएइ धम्मरुइस्स रन्नो, सो अज्झोववन्नो, दूयं विसज्जेइ, पडिहओ अवमाणिओ निच्छूढो, ताहे सव्वबलेणागओ, नयरं रोहेइ, उदिओदओ चिंतेइ-किं एवड्डेण जनक्खएण कएण ?, उववासं करेइ, वेसमणेण देवेन सणयरं साहरिओ । उदिओदयस्स पारिणामिया बुद्धी ॥ साहू य नंदिसेणोत्ति, सेणियपुत्तो नंदिसेणो, सीस्सो तस्स ओहाणुप्पेही, तस्स चिंता(जाया)—भगवं जइ रायगिहं जाएज्ज तो देवीओ अन्ने य पिच्छिऊण साइसए जइ थिरो होज्जति, भट्टारओ य गओ, सेणीओ उण नीति संतेपुरो, अन्ने य कुमारा सअंतेउरा, नंदिसेनस्स अंतेउरं सेतंबरवसणं पउमिणिमज्झे हंसीओ वा मुक्काभरणाओ सव्वासिं छायं हरति, सो ताओ दट्ठूण चिंतेइ-जइ भट्टारएण मम आयरिएण एरिसियाओ मुक्काओ किमंग पुण मज्झ मंदपुन्नस्स असंताण परिच्चइयं ? तव्वियाणइ, निव्वेयमावण्णो आलोइयपडिक्कंतो थिरो जाओ । दोण्हवि परिणामिगी बुद्धी ॥

धनदत्तो सुसुमाए पिया परिणामेइ—जइ एयं न खामो तो अंतरा मरामोत्ति, तस्स पारिणामिगी बुद्धी ॥ सावओ मुच्छिओ अज्झोववण्णो सावियाए वयंसियाए, तीसे परिणामो-मा परिहित्ति अट्टवसट्टो नरएसु तिरिएसु वा (मा) उववज्जिहित्ति तीसे आभरणेहिं विनीओ, संवेगो, कहणं च, तीए पारिणामिया बुद्धी ॥ अमच्चो-वरधनुपिया जउघरे कए चिंतेइ-मा मारिओ होइ एस कुमारो, कहिंपी रक्खिज्जइ, सुरंगाए नीणिओ, पलाओ, एयस्सवि पारिणामिया बुद्धी । अन्ने भणंति-एगो राया देवी से अइप्पिया कालगया, सो य मुद्धो, सो तीए वियोगदुक्खिओ न सरीरठियं करेइ, मंतीहिं भणिओ-देव ! एरिसी संसारट्ठिइत्ति किं कीरइ ?, सो भणइ-नाहं देवीए सरीरट्ठिइं अकरेंतीए करेमि, मंतीहि परिचिंतियं-न अन्नो उवाओत्ति, पच्छा भणियं-देव ! देवी सग्गं गया तं तत्थट्ठिइयाए चेव से सव्वं पेसिज्जउ, लद्धकयदेवीट्ठिईपउत्तीए पच्छा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करेज्जसुत्ति, रन्ना पडिस्सुयं, माइठाणेण एगो पेसिओ, रन्नो आगंतूण साहइ–कया सरीरट्ठिई देवीए, पच्छा राया करेइ, एवं पइदिणं करेंताण कालो वच्चइ, देवीपेसणववएसेण बहुं कडिसुत्तगाइ खज्जइ राया, एगेण चिंतियं-अहंपि खत्ति करेमि, पच्छा राया दिट्ठो, तेन भणिओ-कुतो तुमं ?, भणइ-देव ? सग्गाओ, रन्ना भणियं-देवी दिट्ठत्ति, सो भणइ-तीए चेव पेसिओ कडिसुत्तगाईनिमित्तंति, दवावियं से जहिच्छियं, किंपि न संपडइ, रन्ना भणियं-कया गमिस्ससि?, तेन भणियं-कल्लं, रन्ना भणियं-कल्लं ते संपाडेस्सं, मंती आदिट्ठा-सिग्घं संपाडेह, तेहिं चिंतियं-विनट्ठं कज्जं, को एत्थ उवाओत्ति विसण्णा, एगेण भणियं-धीरा होह अहं भलिस्सामि, तेन तं संपाडिऊण राया भणिओ-देव ! एस कहं जाहित्ति ?, रन्ना भणियं-अन्ने कहं जंतगा ?, तेन भणियं-अम्हे जं पट्ठवेंता तं जलणप्पवेसेणं, न अन्नहा सग्गं गमिस्सइ, रन्ना भणियं-तहेव पेसेह तहा आढत्ता, सो विसण्णो, अन्नो य धुत्तो वायालो रन्नो समक्खं बहुं उवहसइ जहा-देविं भणिज्जसि-सिणेहवंतो ते राया, पुणोवि जं कज्जं तं संदिसेज्जासि, अन्नं च इमं च बहुविहं भणेज्जासि, तेन भणियं-देव ! नाहमेत्तिगं अविगलं भणिउं जाणामि, एसो चेव लट्ठो पेसिज्जउ, रन्ना पडिसुयं, सो तहेव णिज्झिउमाढत्तो, इयरो मुक्को, अवरस्स माणुसाणि, से विसण्णाणि पलवंति-हा ! देव ! अम्हेहिं किं करेज्जामो ?, तेन भणियं-नियतुंडं रक्खेज्जह, पच्छा मंतीहिं खरंडिय मुक्को, मडगं दड्ढं, मंतिस्स पारिणामिया ॥

खमएत्ति, खमओ चेल्लएण समं भिक्ख हिंडइ, तेन मंडुक्कलिया मारिया, आलोयणवेलाए नालोएइ, खुड्डएणं भणियं-आलोएहित्ति, रुट्ठो आहणामित्ति थंभे अब्भडिओ मओ, एगत्थ विराहियसामण्णाणं कुले दिट्ठीविसो सप्पो जाओ, जाणंति परोप्परं, रत्तिं चरंति मा जीवे मारेहामित्ति, फासुगं आहारेमित्ति । अन्नया रन्नो पुत्तो अहिणा खइओ मओ य, राया पउसमावण्णो, जो सप्पं मारेइ तस्स दीणारं देइ, अन्नया आहिंडिएणं ताणं रेक्काओ दिट्ठाओ, तं बिलं ओसहीहिं धमंति, सीसाणि निंताणि छिंदइ, सो अभिमुहो न णीइ, मा मारेहामि किंचित्ति जाइस्सरणत्तणेण, तं निग्गयं निग्गयं छिंदइ, तेन पच्छा रायाए उवनीयाणि, सो राया णागदेवयाए बोहिज्जइ, वरो दिन्नो-कुमारो होहित्ति, सो खमगसप्पो मओ समाणो तत्ता राणियाए नागदत्तो पुत्तो जाओ, उम्मुक्कबालभावो साहुं दट्ठुं जाइं संभरित्ता पव्वइओ । सो य छुहालुगो अभिग्गहं गेण्हइ-मए न रूसियव्वंति, दोसीणस्स हिंडइ, तस्स य आयरियस्स गच्छे चत्तारि खमगा-मासिओ दोमासिओ तिमासिओ चउमासिओ; रत्ति देवया आगया, ते सव्वे खमए अइक्कमित्ता खुड्डयं वंदइ, खमएण निग्गच्छंती हत्थे गहिया, भणिया य-कडगपूयणे ! एयं तिकालभोइयं वंदसि, इमे महातवस्सी नं वंदसित्ति, सा भणइ-भावखमगं वंदामि न दव्वखमएत्ति, गया, पभाए दोसीणगस्स गओ, निमंतेति, एगेण गहाय पाए खेलो छूढो, भणइ-मिच्छामि दुक्कडं खेलमल्लो तुब्भं नोवणीओ, एवं सेसेहिवि, जेमेउमारद्धो, तेहिं वारिओ, निव्वेगमावण्णो, पंचवि सिद्धा, विभासा, सव्वेसिं पारिणामिया बुद्धी ॥

अमच्चपुत्तो वरधनू, तस्स तेसु तेसु पओयणेसु पारियामिया, जहा माया मोयाविया, सो पलाइओ, एवमाइ सव्वं विभासियव्वं । अन्ने भणंति-एगो मंतिपुत्तो कप्पडियरायकुमारेण समं हिंडइ, अन्नया निमित्तिओ घडिओ, रत्तिं देवकुंडिसंठियाणं सिवा रडइ, कुमारेण नेमित्तिओ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुच्छिओ-किं एसा भणइत्ति, तेन भणियं-इमं भणइ-इमंसि नदितित्थंमि पुराणियं कलेवरं चिट्ठइ, एयस्स कडीए सतं पायंकाणं, कुमार ! तुमं गिण्हाहि, तुज्झ पायंका मम य कडेवरंति, मुद्दियं पुण न सक्कुणोमित्ति, कुमारस्स कोड्डं जायं, ते वंचिय एगागी गओ, तहेव जायं, पायंके घेत्तूण पच्चागओ, पुणो रडइ, पुणो पुच्छिओ, सो भणइ-चप्फलिगाइयं कहेइ, एसा भणइ-कुमार ! तुज्झवि पायंकसयं जायं मज्झलि कलेवरंति, कुमारो तुसिणीओ जाओ, अमच्चपुत्तेण चिंतियं, पेच्छामि से सत्तं किं किवणत्तणेण गहियं आउ सोंडीरयाए ?, जइ किवणत्तणेण कयं न एयस्स रज्जंति नियत्तामि, पच्चूसे भणइ-वच्चह तुब्भे, मम पुण सूलं कज्जइ न सक्कुणामि गंतुं, कुमारेण भणियं-न जुत्तं तुमं मोत्तूणं गंतुं, किं तु मा कोइ एत्थ मे जाणेहित्ति तेन वच्चामो, पच्छा कुलपुत्तगघरं नीओ समप्पिओ, तं च सव्वं पेज्जामोल्लं दिन्नं, मंतिपुत्तस्स उवगयं जहा-सोंडीरयाएत्ति, भणियं चऽणेण-अत्थि मे विसेसो अओ गच्छामि, पच्छा गओ, कुमारेण रज्जं पत्तं, भोगावि से दिन्ना, एयस्स पारिणामिगी बुद्धी ॥

चाणक्को-गोल्लविसए चणयग्गामो, तत्थ य चणगो माहणो, सोय सावओ, तस्स घरे साहू ठिया, पुत्तो से जाओ सह दाढाहिं, साहूण पाएसु पाडिओ, कहियं च-राया भविस्सइत्ति, मा दुग्गइं जाइस्सत्ति दंता घट्ठा, पुणोऽवि आयरियाणं कहियं, भणइ-किं कज्जउ ?, एत्ताहे बिंबंतरिओ भविस्सइ, उम्मुक्कबलभावेण चोद्दस विज्जाट्ठाणाणि आगमियाणि, सो य सावओ संतुट्ठो, एगाओ भद्दमाहणकुलाओ भज्जा से आणिया । अन्नया कम्हिंवि कोउते माइघरं भज्जा से गया, केइ भणंति-भाइविवाहे गया, तीसे य भगिनीओ अन्नेसिं खद्धादाणियाणं दिन्नेल्लियाओ, ताओ अलंकियविहुसियाओ आगयाओ, सव्वेऽवि परियणो ताहिं समं संलवएति, सा एगंते अच्छइ, अद्धिई जाया, घरं आगया, ससोगा, निब्बंधे सिट्ठं, तेन चिंतिय-नंदो पाडलिपुत्ते देइ तत्थ वच्चामि, तओ कत्तियपुण्णिमाए पुव्वण्णत्थे आसणे पढमे णिसण्णो, तं च तस्स सल्लीपतियस्स सया ठविज्जइ, सिद्धपुत्तो य णंदेण समं तत्थ आगओ भणइ-एस बंभणो नंदवंसस्स छायं अक्कमिऊण ठिओ, भणिओ दासीए भगवं ! बितीए आसणे निवेसाहि, अत्थु, बितिए आसणे कुंडियं ठवेइ, एवं ततिए दंडयं, चउत्थे गणित्तियं, पंचमे जण्णोवइयं, धिट्ठोत्ति निच्छूढो, पाओ उक्खित्तो, अन्नया य भणइ-

'कोशेन भृत्यैश्च निबद्धमूलं, पुत्रैश्च मित्रैश्च विवृद्धशाखम् ।
उत्पाट्य नन्दनं परिवर्तयामि, महाद्रुमं वायुरवोग्रवेगः ॥१॥"

निग्गओ मग्गइ पुरिसं, सुयं चऽनन विंवंतरिओ राओ होहामित्ति, नंदस्स मोरपोसगा, तेसिं गामं गओ परिव्वायगलिगेणं, तेसिं च महत्तरधूयाए चंदपियणे दोहलो, सो समुदाणिंतो गओ, पुच्छंति, सो भणइ-जइ इमं मे दारगं देह तो णं पाएमि चंदं, पडिसुणेंति, पडमंडवे कए तद्दिवसं पुण्णिमा, मज्झे छिड्डं कयं, मज्झगए चंदे सव्वरसालूहिं दव्वेहिं संजोएत्ता दुद्धस्स थालं भरियं, सद्दाविया पेच्छइ पिबइ य, उवरिं पुरिसो अच्छाडेइ, अवणीए जाओ पुत्तो, चंदगुत्तो से नामं कयं, सोऽवि ताव संवड्ढइ, चाणक्को य धाउबिलाणि मग्गाइ । सो य दारगेहिं समं रमइ रायणीईए, विभासा, चाणक्को पडिएइ, पेच्छइ, तेणवि मग्गिओ–अम्हवि दिज्जउ, भणइ-गावीओ लएहिं, मा मारेज्जा कोई, भणइ-वीरभोज्जा पुहवी, नातं जहा विन्नाणंपि से

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्थि, पुच्छिओ-कस्सत्ति ?, दारएहिं कहियं-परिव्वायगपुत्तो एसो, अहं सो परिव्वायगो, जामु जा ते रायाणं करेमि, पलाओ, लोगो मिलिओ, पाडलिपुत्तं रोहियं। नंदेन भग्गो परिव्वायगो, आसेहिं पिट्ठीओ लग्गो, चंदगुत्तो पउमसरे निब्बुडो, इमो उपस्पृशति, सण्णाए भणइ-वोलीणोत्ति, अन्ने भणन्ति-चंदगुत्तं पउमिणीसरे छुभित्ता रयओ जाओ, पच्छा एगेण जच्चवल्हीककिसोरगएण-आसवारेण पुच्छिओ भणइ-एस पउमसरे निविट्ठो, तओ आसवारेण दिट्ठो, तओऽनेन घोडगो चाणक्कस्स अल्लितो; खग्गं मुक्कं, जाव निगुडिउं जलोयरणट्ठयाए कंचुगं मिल्लइ, तावऽनेन खग्गं घेत्तूण दुहाकओ, पच्छा चंदगुत्तोहक्कारिय चडाविओ, पुणो पलाया, पुच्छिाओऽनेन चंदगुत्तो-जं वेलं तंसि सिट्ठो तं वेलं किं तुमे चिंतियं ?, तेन भणियं-धुवं एवमेव सोहणं भवइ, अज्जो चेव जाणइत्ति, तओऽणेण चिंतियं-जोगो एस न विपरिणमइत्ति । पच्छा चंदगुत्तो छुहाइओ, चाणक्को तं ठवेत्ता भत्तस्स अइगओ, बीहेइ य-मा एत्थ नज्जेज्जामो डोडस्स बाहिं निग्गयस्स पोट्टं फालियं, दहिकूरं गहाय गओ, जिमिओ दारओ। अन्नया अन्नत्थ गामे रत्तिं समुयाणेइ, थेरीए पुत्तगभंडाणं विलेवी वट्टिया, एक्केण मज्झे हत्थो छूढो, दड्ढो रोवइ, ताए भण्णइ-चाणक्कमंगलयं, पुच्छियं, भणइ-पासाणि पढमं घेप्पंति, गआ हिमवंतकूडं, पव्वइओ राया, तेन समं मित्तया जाया, भणइ-समं समेण विभजामो रज्जं, उपवेंताणं एगत्थ णयरं न पडइ, पविट्ठो तिदंडी, वत्थूणि जोएइ, इणदकुमारियाओ दिट्ठाओ, तासिं तणएण न पडइ, मायाए नीणावियाओ, पडियं णयरं, पाडलिपुत्तं, रोहियं, नंदो धम्मबारं मग्गइ, एगेण रहेण जं तरसि तं नीणाहि, दो भज्जाओ एगा कण्णा दव्वं च नीणेइ, कण्णा चंदगुत्तं पलोएइ, भणिया-जाहित्ति, ताहे विलग्गंतीए चंदगुत्तरहे नव अरगा भग्गया, तिदंडी भणइ-मा वारेहि, नवपुरिसजुगाणि तुज्झ वंसो होहित्ति, अइयओ, दोभागीकयं रज्जं। एगा कण्णगा विसभाविया, तत्थ पव्वयगस्स इच्छा जाया, सा तस्स दिन्ना, अग्गिपरियंचणे विसपरिगओ मरिउमारद्धो भणइ-वयंस ! मरिज्जइ, चंदगुथो रुंभामित्ति ववसिओ, चाणक्केण भिउडी कया, नियत्तो, दोवि रज्जाणि तस्स जायाणि। नंदमनुसा चोरियाए जीवंति, चोरग्गाहं मग्गइ, तिदंडी बाहिरियाए नलदामं मुइंगमारणे दट्ठुं आगओ, रन्ना सद्दाविओ, आरक्खं दिन्नं, वीसत्था कया, भत्तदानेन सकुडुंबा मारिया।

आणाए-वंसीहिं अंबगा परिक्खित्ता, विवरीए रुट्ठो, पलीविओ सव्वो गामो, तेहिं गामील्लएहिं कप्पडियत्ते भत्तं न दिन्नंतिकाउं। क्रोसनिमित्तं पारिणामिया बुद्धी-जूयं रमइ कूडपासएहिं, सोवण्णं थालं दीनाराणं भरियं, जो जिणइ तस्स एयं, अहं जीणामि एगो दीनारो दायव्वो। अइचिरंति अन्नं उवायं चिंतेइ, णागराण भत्तं देइ मज्जपाणं च, मत्तेसु पणच्चिओ, भणइ-'दो मज्झ धाउरत्ता कंचणकुंडिया तिदंडं च रायावि य वसवत्ती एत्थवि ता मे होलं वाएहिं' अन्नो असहमाणो भणति-गयपोययस्स मत्तस्स उप्पइयस्स जो अणसहस्सं पए पए सयसहस्सं एत्थवि ता मे होलं वाएहिं। अन्नो भणइ-तिलआढयस्स वुत्तस्स निप्फण्णस्स बहुसइयस्स तिले तिले सयसहस्सं ता मे हालं वाएहिं अन्नो भणइ-नवपाउसंमि पुण्णाए गिरिणईयाए सिग्घवेगाए एगाहमहियमेत्तेण नवनीएण पालिं बंधमि एत्थवि ता मे होलं वाएहि, अन्नो भणइ-जच्चाण नवकिसोराण तद्दिवसेण जायमेत्ताण केसेहिं नहं छाएमि एत्थवि ता मे होलं वाएहि, अन्नो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भणइ-दो मज्झ अत्थि रयणा सालि पसूई य गद्दभिया य छिन्ना छिन्नावि रुहंति एत्थवि ता मे होलं वाएहि, अन्नो भणइ-सयसुक्किलनिच्चसुयंधो भज्ज अणुव्वय नत्थि पवासो निरिणो य दुपंचसओ एत्थवि ता मे होलं वाएहिं, एवं नाऊण रयणाणि मग्गिऊण कोट्ठाराणि सालीण भरियाणि, गद्दभियाए पुच्छिओ छिंन्नाणि २ पुणो पुणो जायंति, आसा एगदिवस जाया मग्गिया एगदिवसियं नवनीयं, एस पारिणामिया चाणक्कस्स बुद्धी ॥

थूलभद्दस्स पारिणामिया-पिइम्मि मारिए नंदेन भणिओ–अमच्चो होहित्ति, असोगवनियाए चिंतेइ-केरिसा भोगा वाउलाणंति पव्वइओ । रन्ना भणिया-पेच्छह मा कवडेण गणियाघरं जाएज्जा, निंतस्स सुणगमडेण चावण्णेण णासं न गेण्हइ, पुरिसेहिं रन्नो कहियं, विरत्तभोगोत्ति सिरिओ ठविओ, थूलभद्दसामिस्स पारिणामिया रन्नो य ॥ नासिक्कं नयरं, नंदो वाणियगो, सुंदरी से भज्जा, सुंदरिनंदो से नामं कयं, तस्स भाया पव्वइयओ, सो सुणेइ–जहा सो तीए अज्झोववन्नो, पाहुणओ आगओ, पडिलाभिओ, भाणं तेणं गहियं, इह पत्थवियउत्ति उज्जाणं नीणिओ, लोगेण य भायणहत्थो दिट्ठो, तओ णं उवहसंति-पव्वइओ सुंदरीनंदो, तओ सो तहवि गओ उज्जाणं, साहुणा से देसणा कया, उक्कडरागोत्ति न तीरइ मग्गो लाइउं, वेउव्वियलद्धिमं च भगवं साहू, तओऽनेन चिंतियं-न अन्नो उवाओत्ति अहिगयरणं उबलोभेमि, पच्छा मेरू पयट्टाविओ, न इच्छइ, अविओगिओ, मुहुत्तेण आणेमि, पडिसुए पयट्टो, मक्कडजुयलं विउव्वियं, अन्ने भणंति-सच्चकं चेव दिट्ठं, साहुणा भणिओ-सुंदरीए वानरीओ य कालट्टयरी ?; सो भणइ-भगवं ! अघडंती सरिसव्व मेरूवमत्ति, पच्छा विज्जाहरमिहुणं दिट्ठं, तत्थ पुच्छिओ भणइ-तुल्ला चेव, पच्छा देवमिहुणगं दिट्ठं, तत्थ पुच्छिओ भणइ-तुल्ला चेव, पच्छा देवमिहुणगं दिट्ठं, तत्थवि पुच्छिओ भणति-भगवं ! एईए अग्गओ वानरी सुंदरित्ति, साहुणा भणियं-थोवेण धम्मेण एसा पाविज्जइत्ति, तओ से उवगयं, पच्छा पव्वइओ । साहुस्स परिणामिया बुद्धी ॥

वइरसामिस्स पारिणामिया-माया नाणुवत्तिया, मा संघो अवमन्निज्जिहितित्ति, पुणो देवेहिं उज्जेनीए वेउव्वियलद्धी दिन्ना, पाडलिपुत्ते मा परिभविहित्ति वेउव्वियं कयं, पुरियाए पवयणओहावणा मा होहितिति सव्वं कहेयव्वं ॥ चलणाहए-राया तरुणेहिं वुग्गाहिज्जइ, जहा थेरा कुमारमच्चा अवनिज्जंतु, सो तेसिं परिक्खणनिमित्तं भणइ-जो रायं सीसे पाएण आहणइ तस्स को दंडो ?, तरुणा भणंति-तिलं तिलं छिंदियव्वओ, थेरा पुच्छिया-चिंतेमोत्ति ओसरिया, चिंतेंति-नूनं देवीए को अन्नो आहणइत्ति आगया भणंति-सक्कारेयव्वो । रन्नो तेसिं च पारिणामिया। आमंडेत्ति-आमलगं, कित्तिमं एगेन नायं अइकढिणं अकाले बिंबो होइत्ति । तस्सवि पारिणामिया। मणित्ति–सप्पो पक्खिणं अंडगाणि खाइ रुक्खे विलग्गित्ता, तत्थ गिद्धेण आलयं विलग्गिय मारिओ, मणी तत्थ पडिओ, हेट्ठा कूवो, तस्स पाणियं रत्तिभूयं, नीणियं कूवाओ साभावियं होइ, दारएण थेरस्स कहियं, तेन विलग्गिऊण गहिओ । थेरस्स परिणामिया ॥ सप्पो-चंडकोसिओ चिंतेइ-एरिसो महप्पा इच्चाइ विभासा, एयस्स पारिणामिगी ॥ खग्गीति-सावयपुत्तो जोव्वण-बलुम्मत्तो धम्मं न गिण्हइ, मरिऊण खग्गिसु उववण्णो, पिट्ठिस्स दोहिंवि पासेहिं जहा पक्खरा तहा चंमाणि लंबंति, अडवीए च उप्पहे जणं मारेइ, साहुणो य तेणेव पहेण अइक्कमंति, वेगेण आगओ, तेएण न तरइ अल्लिउं, चिंतेइ, जाई संभरिया, पच्चक्खाणं, देवलोगगमनं । एयस्स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पारिणामिगी ।। थूमे-वेसावाए नयरीए नाभीए मुनिसुव्वस्स थूभो, तस्स गुणेण कूणियस्स न पडइ, देवया आगासे कूणियं भणइ–

"समणो जइ कूलवालए मागहियं गणियं लभिस्सति ।
लाया य असोगचंदए वेसालिं नगरिं गहेस्सइ ।।१।।"

सो मग्गिज्जइ । तस्स का उप्पत्ती ? -एगस्स आयरियस्स चेल्लओ अविनीओ, तं आयरिओ अंबाडेइ, सो वेरं वहइ । अन्नया आयरिया सिद्धसिलं तेन समं वंदगा विलगा, उत्तरंताण वधाए सिला मुक्का, दिट्ठा आयरिएण, पाया ओसारिया इहरा मारिओ होंतो, सावो दिन्नो-दुरात्मन् ! इत्थीओ विनस्सिहिसित्ति, मिच्छावाईं एसो भवउत्तिकाउं तावसासमे अच्छइ, नईए कूले आयावेइ, पंथब्भासे जो सत्थो एइ तओ आहारो होइ, नईए कूले आयावेमाणस्स सा नई अन्नओ पवूढा, तेन कूलबारओनामं जायं, तत्थ अच्छंतो आगमिओ, गणियाओ सद्दावियाओ, एगा भणइ-अहं आणेमि, कवडसाविया जाया, सत्थेण गया, वंदइ,

उद्दाने होइयम्मि चेइयाइं वंदामि तुब्भे य सुया, आगयामि, पारणगे मोदगा संजोइया दिन्ना, अइसारो जाओ, पओगेण ठविओ, उव्वत्तणाईहिं संभिन्नं चित्तं, आनिओ, भणिओ-रन्नो वयणं करेहि, कहं ?, जहा वेसाली घेप्पइ, थूभो नीणाविओ, गहिया । गणियाकूलवालगाणं दोण्हवि पारिणामिगी । इंदपाउयाओ चाणक्केण पुव्वभणियाओ, एसा पारिणामिया ।। उक्तोऽभिप्रायसिद्धः, साम्प्रतं तपः सिद्धप्रतिपिपादयिषयाऽऽह–

नि. (९५२) न किलम्मइ जो तवसा सो तवसिद्धो दढप्पहारिव्व ।
सो कम्मकूखयसिद्धो जो सव्वक्खीणकम्मंसो ।।

वृ- 'न क्लामति न क्लमं गच्छति यः सत्त्वस्तपसा–बाह्याभयन्तरेण स एवं भूतस्तपःसिद्धः, अग्लानित्वाद्, दृढप्रहारिवदिति गाथाक्षरार्थः ।। भावार्थः कथानकादवसयेः, तच्चेदम्–एगो धिज्जाइयओ दुद्दंतो अविनयं करेइ, सो ताओ थाणाओ नीणिओ हिंडंतो चोरपल्लिमल्लिणो, सेनावइणा पुत्तो गहिओ, तंमि मयंमि सोच्चेव सेनावईं जाओ, निक्किवं पहणइत्ति दढप्पहारी से नामं कयं । सो अन्नया सेनाए समं एगं गामं हंतुं गओ, तत्थ य एगो दरिद्दो, तेन पुत्तभंडाण मग्गंताणं दुद्धं जाएत्ता पायसो सिद्धो, सो य ण्हाइउं गओ, चोरा य तत्थ पडिया, एगेण सो तस्स पायसो दिट्ठो, छुहियत्ति तं गहाय पहाविओ, ताणि खुड्डगरूवाणि रोवंताणि पिउमूलं गयाणि, हिओ पायसोत्ति, सो रोसेणं मारेमित्ति पहाविओ, महिला अवयासेउं अच्छइ, तहवि जाइ जहिं सो चेव चोरसेनावई गाममज्झे अच्छइ, तेन गंतूण महासंगामो कओ, सेणावइणा चिंतियं-एएण मम चोरा परिभविज्जन्ति, तओ असिं गहाय निद्दयं छिण्णो, महिला से भणइ-हा निक्किव ! किमेयं कयंति ?, पच्छा सावि मारिया, गब्भोऽवि दोभाए कओ फुरुफुरेइ, तस्स किवा जाया-अहम्मो कओ, चेडरूवेहिंतो दरिद्दत्ति पउत्ती उवलद्धा, दढयरं निव्वेयं गओ, को उवाओत्ति, साहू दिट्ठा, पुच्छिया यऽनेन-भगवं ! को एत्थ उवाओ ?, तेहिं धम्मो कहिओ, सो य से उवगओ, पच्छा चारित्तं पडिवज्जिय कम्माण समुग्घायणट्ठाए घोरं खंतिअभिग्गहं गिण्हिय तत्थेव विहरइ, तओ हीलिज्जइ हम्मति य, सो संमं अहियासेइ, घोराकारं च कायकिलेसं करेइ, असनाइ व अलंभतो सम्मं अहियासेइ, जावऽनेन कम्मं निग्घाइयं, केवलं से उप्पण्णं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पच्छा सो सिद्धत्ति ॥ उक्तस्तपः सिद्धः, साम्प्रतं कर्मक्षयसिद्धप्रतिपादनाय गाथाचरमदलमाह–'सो कम्म' इत्यादि, स कर्मक्षयसिद्धः, यः किंविशिष्ट इत्यत आह–'सर्वक्षीणकर्मांशः' सर्वे–निरवशेषाः क्षीणाः कर्मांशा-कर्मभेदा यस्य स तथाविध इति गाथार्थः ॥

साम्प्रतं कर्मक्षयसिद्धमेव प्रपञ्चतो निरुक्तविधिना प्रतिपादयन्नाह–

नि. (९५३) दीहकालरयं जं तु कम्मं से सिअमट्ठहा ।
सिअं धंतंति सिद्धस्स सिद्धत्तमुवजायइ ॥

वृ- दीर्घः सन्तानापेक्षयाऽनादित्वात् स्थितिबन्धकालो यस्य तद्दीर्घकालं, निसर्गनिर्मलजीवानुरञ्जनाच्च कर्मैव भण्यते ततश्च दीर्घकालं च तद्रजश्चेति दीर्घकालरजः, यच्छब्दः सर्वनामत्वादुद्देशवचनः, यत्कर्मेत्थप्रकारं, तुशब्दो भव्यकर्मविशेषणार्थः, यतो नाभव्यकर्म सर्वथा ध्यामत इति, ततश्च यद्भव्यकर्मेति 'शेषितम्' इति शेषं कृतं शेषितं-स्थित्यादिभिः प्रभूतं सत् स्थितिसङ्ख्यानुभावापेक्षयैवानाभोगसद्दर्शनज्ञानचरणाद्युपायतः शेषम्–अल्पं कृतमिति भावः, प्राक् किं-भूतं सच्छेषितम् ? इत्याह–'अष्टधा सितम्' अष्टप्रकारं ज्ञानावरणादिभेदेन सितं 'सित वर्णबन्धनयो' रिति वचनात् सितंबद्धमुच्यते । इदानीं निरुक्तिमुपदर्शयति-तच्छेषितं सितं कर्म ध्मातं, 'ध्मा शब्दाग्निसंयोगयो'रिति वचनात् ध्यानानलेन दग्धं महाग्निना लोहमलवदस्येति सिद्ध इति, एवं कर्मदहनानन्तरं सिद्धस्यैव सतः किं ? -सिद्धत्वमुपजायते, नासिद्धस्य, 'भव्योऽसिद्धो न सिध्यती'ति वचनाद्, उपजायत इत्यपि तदात्मनः स्वाभाविकमेव सदनादिकर्मावृतं तदावरणविगमेनाऽऽविर्भवति तत्त्वतः तथाऽपि लौकिकवाचोयुक्तया व्यवहारदेशनयोपजायत इत्युच्यते, अथवा सिद्धस्य सिद्धत्वं भावरूपमुपजायते, न तु प्रदीपनिर्वाणकल्पमभावरूपमिति नयमतान्तरव्यवच्छेदार्थमेतत्, तथा चाऽऽहुरेके–

'दीपो यथा निर्वृत्तिमभ्युपेतो, नैवावनि गच्छति नान्तरिक्षम् ।
दिशं न काञ्चिद्विदिशं न काञ्चित्, स्नेहक्षयात् केवलमति शान्तिम् ॥१॥'

इत्यादि, एवं विधसिद्धत्वभावे दीक्षादिप्रयासवैयर्थ्यात् निरन्वयक्षणभङ्गस्य चायुज्यमानत्वात्, प्रदीपदृष्टान्तस्यायसिद्धत्वात्, तथाहि-तत्र त रूव पुद्गला भास्वरं रूपं परित्यज्य तामसं रूपान्तरमासादयन्तीत्यलं विस्तरेण, अथवाऽन्यथा व्याख्यायते 'दीर्घकालरयं' इति रयः–वेगः चेष्टाऽनुभवः फलमित्यनर्थान्तरं, ततश्च दीर्घकालो रयोऽस्येति दीर्घकालरयं, सन्तानोपभोग्यत्वादिति भावना, यद्भव्यर्म 'सेसित' मिति श्लेषितमिति संश्लिष्ट लेश्यानुभावात् अष्टधा सितमित्यादि पूर्ववत्, अथवाऽन्था व्याख्यायते-दीर्घकालरज इति, तत्र रज इव रजः सूक्ष्मतया स्नेहबन्धनयोग्यत्वाद्वा रज इत्युच्यते, यद्भव्यकर्मेति च नैवं व्याख्यायते, साक्षात्मकर्माभिधनेन सर्वनाम्नो निरर्थकत्वात्, प्रकरणादेव भव्यस्यावगम्यमानत्वाद्, अभव्यस्य सिद्धत्वानुपपत्तेः, ततश्च जन्तुकर्म इति व्याख्यायते, जन्तुः-जीवस्तस्य कर्म जन्तुकर्म, अनेनाबद्धकर्मव्यवच्छेदमाह, तच्च'से' तस्य जन्तोः 'असितम्' असितमिति कृष्णमशूभं संसारानुबन्धित्वात्, एवंविधस्यैव च क्षयः श्रेयानिति, न तु शुभस्य स्वरूपस्येति भावना, अष्टधा सितमिति पूर्ववदिति गाथार्थः। प्रथमव्याख्यापक्षमधिकृत्य सम्बन्धमाह-तत्कर्मशेषं तस्य समस्थित्यसमस्थिति वा स्यात् ?, न तावत् समस्थिति विषमनिबन्धनत्वात्, नाप्यसमस्थिति चरमसमये युगपत् क्षयासम्भवादिति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदयुक्तम्, उभयथाऽप्यदोषात्, तथाहि-विषमनिबन्धनत्वे सत्यपि विचित्रक्षयसम्भवात् कालतः समस्थितित्वाविरोध एव, चरमपक्षेऽपिसमुद्घातगमनेन समस्थितिकरणभावाददोषः, न चैतत् स्वमनीषिकयैवोच्यते, यत आह निर्युक्तिकारः-

नि. (९५४) नाऊण वेअणिज्जं अइबहुअं आउअं च थोवागं ।
गंतूण समुग्घायं खवंति कम्मं निरवसेसं ॥

वृ-'ज्ञात्वा' केवलेनावगम्य, किं ?-वेदनीयं कर्म, किंभूतं ?-'अतिबहु' शेषवोपग्राहिकमपिक्षयाऽतिप्रभूतमित्यर्थः, तथाऽऽयुष्कं च कर्म 'स्तोकम्' अल्पं, तदपेक्षयैव ज्ञात्वेति वर्तते, अत्रान्तरे 'गत्वा' प्राप्य 'समुद्घातम्' इति सम्यग्-अपुनर्भावेनोत्-प्राबल्येन कर्मणो हननं घातः-प्रलयो यस्मिन् प्रयत्नविशेषेऽसौ समुद्घात इति तम्, 'क्षपयन्ति' विनाशयन्ति 'कर्म' वेदनीयादि निरवशेषम्' इति निरवशेषमिव प्रभूततमक्षणपणाच्छेषस्य चान्तर्मुहूर्त्तमात्र-कालावधित्वात्, किञ्चिच्छेषत्वादसत्कल्पनेति भावना,अत्राऽऽह-'ज्ञात्वा वेदनीयमतिबह्वि' त्यत्र को नियमः? येन तदेव बहु तथाऽऽयुष्कमेवाल्पमित, अत्रोच्यते,वेदनीयस्य सर्वकर्मभ्यो बन्ध-कालबहुत्वात् केवलिनोऽपि तद्बन्धकत्वादायुष्कस्य चाल्पत्वात्, उक्तं च-'जाव णं अयं जीवे एयइ वेयइ चलइ फंदइ ताव णं अट्ठविहबंधए वा सत्तविहबंधए वा छव्विहबंधए वा एगविहबंधए वा नो णं अबंधए' आयुष्कस्य त्वान्तर्मुहूर्तिक एव बन्धकाल इति, उक्तं च-"सिय तिभागे सिय तिभागतिभागे" इत्याद्यलं प्रसङ्गेनेति । इदानीं समुद्घातदिस्वरूप-प्रतिपादनायैवाऽऽह

नि. (९५५) दंड कवाडे मंथंतरे अ साहरणया सरीरत्थे ।
भासाजोगनिरोहे सेलेसी सिज्झणा चेव ॥

वृ- इह समुद्घातं प्रारभमाणः प्रथममेवावर्जीकरणमभ्येति, आन्तर्मौहूर्तिकमुदीरणावलिकायां कर्मपुद्गलप्रक्षेपव्यापाररूपमित्यर्थः, ततः समुद्घातं गच्छति, तस्य चायं क्रयः-इह प्रथमसमय एव स्वदेहविष्यकम्भतुल्यविष्कम्भमूर्ध्वमधश्चाऽऽयतमुभयतोऽपि लोकान्तगामिनं जीवप्रदेश-सङ्घीतं दण्डं दण्डस्थानीयं केवली ज्ञानाभोगतः करोति, द्वितीयसमये तु तमेव दण्डं पूर्वापर-दिग्द्वयप्रसारणात् पार्श्वतो लोकान्तगामिनं कपाटमिव कपाटं करोति, तृतीयसमये तदेव कपाटं दक्षिणोत्तर दिग्द्वयप्रसारणान्मन्थसदृशं मन्थानं करोति लोकान्तप्रापिणमेव, एवं च लोकस्य प्रायो बहु परिपूरितं भवति, मन्थान्तराण्यपूरितानि भवन्ति, अनुश्रेणिगमनात्, चतुर्थे तु समये तान्यपि मन्थान्तराणि सह लोकनिष्कुटैः पूरयति, ततश्च सकलो लोकः पूरितो भवतीति, तदनन्तरमेव पञ्चमे समये यथोक्तक्रमात् प्रतिलोमं मन्थान्तराणि संहरति-जीवप्रदेशान् सकर्मकान सङ्कोचयति, षष्ठे समये मन्थानमुपसंहरति घनतरसङ्कोचात्, सप्तमे समये कपाटमुपसंहरति दण्डात्मनि सङ्कोचात्, अष्टमसमये दण्डमुपसंहृत्य शरीरस्थ एव भवति अमुमेवार्थं चेतसि निधायोक्तं दण्डकपाटं मन्थान्तराणि संहरणता प्रतिलोममिति गम्यते, शरीरस्थ इति वचनात्; न चैतत् स्वमनीषिकाव्याख्यानं, यत उक्तम्-

प्रथम समये दण्डं कपाटमथ चोत्तरे तथा समये ।
मन्थानमथ तृतीये लोकव्यापी चतुर्थे तु ॥१॥
संहरति पञ्चमे त्वन्तराणि मन्थानमथ पुनः षष्ठे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सप्तमके तु कपाटं संहरति ततोऽष्टमे दण्डम् ॥२॥ इति ।

तस्येदानीं समुद्घातगतस्य योगव्यापारश्चिन्त्यते-योगाश्चमनोवाक्कायाः, अत्रैषां कः कदा व्याप्रियते ?, तत्र हि मनोवाग्योगव्यापार एव, प्रयोजनाभावात्, काययोगस्यैव केवलस्य व्यापारः, तत्रापि प्रथमाष्टमसमययोरौदारिककायप्राधान्यादौदारिकयोग एव, द्वितीयषष्ठसप्तमे समये पुनरौदारिके तस्माच्च बहिः कार्मणे वीर्यपरिस्पन्दादौदारिककार्मणमिश्रः, त्रिचतुर्थपञ्चमेषु तु बहिरेवौदारिकात् बहुतरप्रदेश-व्यापारादसहायः कार्मणयोग एव, तन्मात्रचेष्टनादिति, अन्यत्राप्युक्तम्-

"औदारिकप्रयोक्ता प्रथमाष्टमसमययोरसाविष्टः ।
मिश्रौदारिकयोक्ता सप्तमषष्ठद्वितीयेषु ॥१॥
कार्मणशरीरयोगी चतुर्थके पञ्चमे तृतीये च ।
समयत्रयेऽपि तस्मिन् भवत्यनाहारको नियमाद् ॥२॥" इति,

—कृतं प्रसङ्गेन । भाषायोगनिरोध इति, कोऽर्थः ?-परित्यक्तसमुद्घातः कारणवशाद् योगत्रयमपि व्यापारयेत्, ततर्थ मध्यवर्तिनं योगमाह—भाषेति, अत्रान्तरेऽनुत्तरसुरपृष्टो मनोयोगं सत्यं वाऽसत्यामृषं वा प्रयुङ्क्ते, एवमामन्त्रणादौ वाग्योगमपि, नेतरौ द्वौ भेदौ द्वयोरपि, काययोगमप्यौदारिकं फलकप्रत्यर्पणादाविति, ततोऽन्तर्मुहूर्तमात्रेणैव कालेन योगनिरोधं करोति, अत्र केचिद् व्याचक्षते-जघन्येनैतावता कालेन उत्कृष्टतस्तु षड्भिर्मासैरिति, एतच्चायुक्तं, 'क्षपयन्ति कर्म निरवशेष' मिति वचनात् फलकादीनां च प्रज्ञापनायां प्रत्यर्पणस्यैवोक्तत्वात्, एवं च सति ग्रहणमपि स्याद्, अलं प्रसङ्गेन, प्रकृतं प्रस्तुमः-स हि योगनिरोधं कुर्वन् प्रथममेव याऽसौ प्रथममेव शरीरप्रदेशसम्बद्धा मनः पर्याप्तिनिर्वृत्तिर्यया पूर्वं मनोद्रव्यग्रहणं कृत्वा भावमनः प्रयुक्तवान् तत्कर्मसंयोगविघटनाय मन्त्रसामर्थ्येन विषमिव स भगवाननुत्तरेणाचिन्त्येन निरावरणेन करणवीर्येण तद्व्यापारं निरुध्य च –

'पज्जत्तमित्तसन्निस्स जत्तियाइं जहन्नजोगिस्स ।
होंति मनोदव्वाइं तव्वावारो य जम्मत्तो ॥१॥
तदसंखगुणविहीणं समए २ निरुंभमाणो सो ।
मनसो सव्वनिरोहं करेज्ञऽसंखेज्ञसमएहिं ॥२॥
पज्ञत्तमेत्तबेंदियजहन्नवयजोगपज्ञया जे य ।
तदसंखगुणविहीणे समए समए निरुंभंतो ॥३॥
सव्ववइजोगरोहं संखाईएहिं कुणइ समएहिं ।
तत्तो य सुहुमपणगस्स पढमसमयोववन्नस्स ॥४॥
जो किर जोगो तदसंखेज्ञगुणहीनमेक्किक्के ।
समए निरुंभमाणो देहतिभागं च मुंचंतो ॥५॥
रुंभइ स कायजोगं संखाईएहि चेव समएहिं ।
तो कयजोगनिरोहो सेलेसी भावनामेइ ॥६॥ त्ति

ततः शैलेशी प्रतिपद्यते, तत्र शिलाभिर्निर्वृत्तः शिलानां वाऽयमित्यण् शैलः-पर्वतस्तेषामीशः-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रभुः शैलेशः, स च मेरुः, तस्येवेयं स्थिरतासाम्यादवस्थेति शैलेशी, अथवा-अशैलेशः सन्नभूततद्भावाच्छैलेशवदाचरति शैलेशीभवतीत्यध्याहारः, अथवा सर्वसंवरः शीलं तस्येशः शीलेशः तस्येयं योगनिरोधावस्थेति शैलेशी, इयं च मध्यमप्रतिपत्त्या ह्रस्वपञ्चाक्षरोद्गिरणमात्रं कालं भवति, स च काययोगनिरोधारम्भात् प्रभृति ध्यायति सूक्ष्मक्रियाऽनिवृत्तिध्यानं, ततः सर्वनिरोधं कृत्वा शैलेश्यवस्थायां व्युच्छिन्नक्रियमप्रतिपातीति, ततो भवोपग्राहिकर्मजालं क्षपयित्वा ऋजुश्रेणिप्रतिपन्नः अस्पृशद्गत्या सिध्यतीति, अत्र बहु वक्तव्यं तत्तु नोच्यते ग्रन्थविस्तरभयादिति गाथार्थः ॥ अनन्तरगाथेपन्यस्तसमुद्घातमात्रापेक्षः संबन्धः । आह—समुद्घातगतानां विशिष्ट-कर्मक्षयो भवतीति काऽत्रोपपत्तिरिति ?,उच्यते, प्रयत्नविशेषः, किं निदर्शनम् ? इत्यत् आह-

नि. (९५६) जह उल्ला साडीआ आसुं सुक्कइ विरल्लिआ संती ।
तह कम्मलहुअ समए वच्चंति जिना समुग्घायं ॥

वृ- 'यथा' इत्युदाहरणोपन्यासार्थः, आर्द्रा शाटिका, जलेनेति गम्यते, 'आशु' शीघ्रं 'शुष्यति' शोषमुपयाति, 'विरल्लिता' विस्तारिता सती भवति, तथा तेऽपि प्रयत्नविशेषात् कर्मोदकमधिकृत्य शुष्यन्तीति शेषः, यतश्चैवमतः'कर्मलघुतासमये व्रजन्ति जिनाः समुद्घात' मिति तत्र कर्मण—आयुष्कस्य लघुता कर्मलघुता, लघोर्भावो लघुता-स्तोकतेत्यर्थः, तस्याः समयः-कालः कर्मलघुतासमयः, स च भिन्नमुहूर्तप्रमाणस्तस्मिन्, अथवा कर्मभिर्लघुता कर्मलघुता, जीवस्येति हृदयं, सा च समुद्घातानन्तरभावन्येव भूतोपचारं कृत्वाऽनागतैव गृह्यते, तस्याः समयस्तस्मिन्, भिन्नमुहूर्त एवेत्यर्थः, व्रजन्ति-गच्छन्ति जिनाः-केवलिनः 'समुद्घातं' प्राक्प्ररूपितस्वरूपमिति गाथार्थः ॥ साम्प्रतं यदुक्तं 'शैलेशीं प्रतिपद्यते सिध्यति चे'ति, तत्रासावेकसमयेन लोकान्ते सिध्यतीत्यागमः, इह च कर्ममुक्तस्य तद्देशनियमेन गतिर्नोपपद्यते इति मा भूदव्युत्पन्नविभ्रम इत्यतस्तन्निरासेनेष्टार्थसिद्ध्यर्थमिदमाह—

नि. (९५७) लाउअ एरंडफले अग्गी धूमे उसू धनुविमुक्के ।
गइपुव्वपओगेणं एवं सिद्धाणवि गईओ ॥

वृ- अलाबु एरण्डफलम्, अग्निधूमौ, इषुर्धनुर्विमुक्तः, अमीषां यथा तथा गमनकाले स्वभावतस्तन्निबन्धना-भावेऽपि देशादिनियतैव गतिः पूर्वप्रयोगेण प्रवर्तते, एवमेव व्यवहित-तुशब्दस्यैवकारार्थत्वात् सिद्धानामपि गतिरित्यक्षरार्थः ॥ अधुना भावार्थः प्रयोगैर्निदर्श्यते-तत्र कर्मविमुक्तो जीवः सकृदूर्ध्वमेवाऽऽलोकाद्गच्छति, असङ्गत्वेन तथाविधपरिणामत्वादष्टमृत्ति-कालेपलिप्ताधोनिमग्नक्रमापनीतमृत्तिकालेपजलतलमर्यादोर्ध्वगामितथाविधालाबुवत् तथा छिन्नवन्धनत्वेन तथाविधपरिणतेस्तद्विधैरण्डफलवत् तथा स्वाभाविकपरिणामत्वादग्निधूमवत् तथा पूर्वप्रयुक्तक्रियातथाविधसयामर्थ्याद्धनुःप्रयत्नेरितेषुवद्, इषुः-शर इति गाथार्थः ॥ एवं प्रतिपादिते सत्याह—

नि. (९५८) कहिं पडिहया सिद्धा, कहिं सिद्धा पइट्ठिया ।
कहिं बोंदिं चइत्ता णं, कत्थ गंतूण सिज्झई ?॥

वृ- 'क्वप्रतिहताः' क्वप्रतिस्खलिता इत्यर्थः 'सिद्धाः' मुक्ताः, तथा 'क्वसिद्धाः प्रतिष्ठिताः' क्व व्यवस्थिता इत्यर्थः, तथा 'क्व बोन्दिं त्यक्त्वा' क्व तनुं परित्यज्येत्यर्थः, इह बोन्दिः तनुः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शरीरमित्यनर्थान्तरं, तथा क्वगत्वा 'सिध्यन्ति' निष्ठितार्थां भवन्ति, इत्यनुस्वारलोपोऽत्र द्रष्टव्यः, अथवैकवचनतोऽप्येवमुपन्यासः सूत्रशैल्याऽविरुद्ध एव, यतोऽन्यत्रापि प्रयोगः-

'वत्थगंधमलंकारं इत्थीओ सयणाणि य ।
अच्छंदा जे नं भुंजंति न से चाइत्ति वुच्चई ॥१॥'

इत्यादि गाथार्थः ॥ इत्थं चोदकपक्षमधिकृत्याऽऽह–

नि. (९५९) अलोए पडिहया सिद्धा, लोअग्गे अ पइट्ठिआ ।
इहं बोंदिं चइत्ता णं, तत्थ गंतूण सिज्झई ॥

वृ- 'अलोके' केवलाकाशास्तिकाये 'प्रतिहताः' प्रतिस्खलिताः सिद्धा इति, इह च तत्र धर्मास्तिकायाद्यभावात् तदानन्तर्यवृत्तिरेव प्रतिस्खलनं, न तु सम्बन्धिविघातः, प्रदेशानां निष्प्रदेशत्वादिति सूक्ष्मधिया भावनीयं, तथा 'लोकाग्रे च' पञ्चास्तिकायात्मकलोकमूर्धनि च प्रतिष्ठिताः, अपुनरागत्या व्यवस्थिता इत्यर्थः, तथा 'इह' अर्धतृतीयद्वीपसमुद्रान्तः 'बोन्दिं' तनुं 'त्यक्त्वा' परित्यज्य सर्वथा किम्?-'तत्र' लोकाग्रं 'गत्वा' अस्पृशद्गत्या समयप्रदेशान्तरमस्पृशन्नित्यर्थः, 'सिध्यन्ति' निष्ठितार्था भवन्ति सिद्ध्यति वेति गाथार्थः ॥ तत्र 'लोकाग्रे च प्रतिष्ठिता' इति यदुक्तं तदङ्गीकृत्याऽऽह–क्व पुनर्लोकान्त इत्यत्रान्तरमाह–

नि. (९६०) ईसीपब्भाराए सीआए जोअणंमि लोगंतो ।
बारसहिं जोअणेहिं सिद्धी सव्वट्ठसिद्धाओ ॥

वृ- ईषत्प्राग्भारा-सिद्धिभूमिस्तस्याः 'सीताया' इति द्वितीयं भूमेर्नामधेयं योजने लोकान्त ऊर्ध्वमिति गम्यते, अधस्तिर्यक् चैतावति क्षेत्रे तदसम्भवात्, तथा चाऽह–द्वादशभिर्योजनैः सिद्धिःऊर्ध्वं भवति, कुतः?-सर्वार्थसिद्धाद् विमानवरात्,अन्ये तु 'सिद्धिं' लोकान्तरक्षेत्र-लक्षणामेव व्याचक्षते, तत्त्वं तु केवलिनो विदन्तीति गाथार्थः ॥ साम्प्रतमस्या एव स्वरूपव्या-वर्णनायाह–

नि. (९६१) निम्मलदगरयवण्णा तुसारगोखीरहारसरिवन्ना ।
उत्ताणयछत्तयसंठिआ य भणिया जिनवरेहिं ॥

वृ- निर्मलदगरजोवर्णाः, तत्र दगरजः– श्यक्ष्णोदकणिकाः, तुषारगोक्षीरहारतुल्यवर्णाः, तुषारः हिमं, गोक्षीरादयः प्रकटाथाः । संस्थानमुपदर्शयन्नाह–उत्तानच्छत्रसंस्थिता च भणिता जिनवरैरिति, उत्तानच्छत्रवत् संस्थितेति गाथार्थः ॥ अधुना परिधिप्रतिपादनेनास्या एवोपायतः प्रमाणम-भिधित्सुराह–

नि. (९६२) एगा जोअणकोडी बायालीसं च सयसहस्साइं ।
तीसं चेव सहस्सा तो चेव सया अउणवन्ना ॥

वृ- निगदसिद्धा, नवरं पञ्चचत्वारिंशद्योजनलक्षप्रमाणक्षेत्रस्याल्पमन्यत् परिध्याधिक्यं प्रज्ञापनातोऽवसेयम्, इहौघत इदमिति ॥ इदानीमस्या एव बाहुल्यं प्रतिपादयन्नाह–

नि. (९६३) बहुमज्झदेसभागे अट्ठेव य जोअणाणि बाहल्लं ।
चरमंतेसु अ तणुई अंगुलऽसंखिज्जईभागं ॥

वृ- मध्यदेशभाग एव बहुमध्यदेशभागस्तस्मिन्नष्टैव योजनानि बाहुल्यम्–उच्चैस्त्वं 'चरिमान्तेषु' पश्चिमान्तेषु तन्वी, कियता तनुत्वेन ? इत्यत्राह–अङ्गुलासङ्ख्येयभागं यावत् तन्वीति गाथार्थः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सा पुनरनेन क्रमेणेत्थं तन्वीति दर्शयति–

नि. (९६४) गंतूण जोअणं जोअणं तु परिहाइ अंगुलपुहुत्तं ।
तीसेऽविअ पेरंता मच्छिअपत्ताउ तनुअयरा ॥

वृ- गत्वा योजनं योजनं तु वीप्सा 'परिहायइ'त्ति परिहीयते 'अङ्गुलपृथक्त्वं' पृथक्त्वं पूर्ववत्, 'एवम्' अनेन प्रकारेण हानिभावे सति तस्या अपि च पर्यन्ताः, किं ? -मक्षिकापत्रात् तनुतरा घृतपूर्णतथविधकरोटिकाकारेति गाथार्थः ॥ स्थापना चेयं । अस्याश्चोपरि योजनचतुर्विंशतिभागे सिद्धा भवन्तीति ॥ अत एवाऽऽह–

नि. (९६५) ईसीपब्भाराए सीआए जोअणंमि जो कोसो ।
कोसस्स य छब्भाए सिद्धाणोगाहणा भणिआ ॥

वृ- ईषत्प्राग्भारायाः सीताया इति पूर्ववत्, 'योजने' उपरिवर्तिनि यः क्रोश उपरिवर्त्येव, क्रोशस्य च तस्य 'षड्भागे' उपरिवर्तिन्येव सिद्धानामवगाहना भणिता, लोकाग्रे च प्रतिष्ठिता इति वचनाद्, अयं गाथार्थः ॥ अमुमेवार्थं समर्थयन्नाह–

नि. (९६६) तिन्नि सया तित्तीसा धनुत्ति भागो अ कासछब्भाओ ।
जं परमोगाहोऽयं तो ते कोसस्स छब्भाए ॥

वृ- त्रीणि शतानि धनुषां त्रयस्त्रिंशदधिकानि धनुस्त्रिभागश्च क्रोशषड्भागो वर्तते 'यत्' यस्मात् परमावगाहोऽयं सिद्धानामिति वर्तते, ततस्ते क्रोशस्य षड्भाग इति गाथार्थः॥

अथ कथं पुनस्तत्र तेषामुपपातोऽवगाहना वेत्यत्रोच्यते–

नि. (९६७) उत्ताणउव्व पासिल्लउव्व अहवा निसन्नओ चेव ।
जा जह करेइ कालं सो तह उववज्जए सिद्धो ॥

वृ- उत्तानको वा पृष्ठतो वा अर्धावनतादिस्थानतः पार्श्वस्थितो वा तिर्यक्स्थितो वा, अथवा निष्पन्न (षण्ण) कश्चैव इति प्रकटार्थं, किं बहुना ?, यो 'यथा' यन प्रकारेणावस्थितः सन् करोति कालं स 'तथा' तेन प्रकारेणोपपद्यते सिद्ध इति गाथार्थः ॥

किमित्येतदेवम् ? इत्यत् आह–

नि. (९६८) इह भवभिन्नागारो कम्मवसाओ भवंतरे होइ ।
न य तं सिद्धस्स जओ तंमी तो सो तयागारो ॥

वृ- इहभवभिन्नाकारः 'कर्मवशात्' कर्मवशेन 'भवान्तरे' स्वर्गादौ भवति, तदाकारभेदस्य कर्मनिबन्धनत्वात्, न च कर्म सिद्धस्य, यतः 'तस्मिन्' अपवर्गे ततोऽसौ सिद्धः 'तदाकारः' पूर्वभवाकार इति गाथार्थः ॥ तथा किं च–

नि. (९६९) जं संठाणं तु इहं भवं चयंतस्स चरमसमयंमि ।
आसी अ पएसघनं तं संठाणं तहिं तस्स ॥

वृ- यत् संस्थानमत्रैव 'भवं' संसारं मनुष्यभवं वा त्यजतः सतश्चरमसमये आसीत् प्रदेशघनं तदेव संस्थानं तत्र तस्य भवति, त्रिभागेन रन्ध्रापूरणादिति गाथार्थः ॥ तथा चाऽऽह–

नि. (९७०) दीहं वा हस्सं वा जं चरमभवे हविज्ज संठाणं ।
तत्तो तिभागहीना सिद्धाणोगाहणा भणिआ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- 'दीर्घं वा' पञ्च धनुःशतप्रमाणं 'ह्रस्वं वा' हस्तद्वयप्रमाणं, वाशब्दात् मध्यमं वा विचित्रं यत् 'चरमभवे' पश्चिमभवे भवेत् संस्थानं 'ततः' तस्मात् संस्थानात् त्रिभागहीना, कुतः ?- त्रिभागेन शुषिरपूरणात्, सिद्धानामवगाहना, अवगाहन्तेऽस्यामवस्थायामित्यवगाहना स्वावस्थैवेति भावः, 'भणिता' उक्ता तीर्थकरगणधरैरिति गाथार्थः ॥

साम्प्रतमुत्कृष्टादिभेदभिन्नाम-वगाहनामभिधित्सुराह-

नि. (९७१) तिन्नि सया तित्तीसा धनुत्ति भागो अ होइ बोद्धव्वो ।
एसा खलु सिद्धाणं उक्कोसोगाहणा भणिआ ॥

नि. (९७२) चत्तारि अ रयणीओ रयणितिभागूणिआ य बोद्धव्वा ।
एसा खलु सिद्धाणं मज्झिमओगाहणा भणिआ ॥

नि. (९७३) एगा य होइ रयणी अट्ठेव य अंगुलाइ साहीआ ।
एसा खलु सिद्धाणं जहन्नओगाहणा भणिआ ॥

वृ- एतास्तिस्रोऽपि निगदसिद्धाः, नवरमाक्षेपपरिहारौ भाष्यकृतोक्तौ, तौ चेमौ-

'किह मरुदेवीमाणं ? नाभीओ जेण किंचिदूणा सा ।
तो किर पंचसयं चिय अहवा संकोयओ सिद्धा ॥१॥'
सत्तूसिएसु सिद्धी जहन्नओ किहमिहं बिहत्थेसु ? ।
सा किर तित्थकरेसुं सेसाणं सिज्झमाणाणं ॥२॥
ते पुण होज्ज बिहत्था कुम्मापुत्तादओ जहन्नेणं ।
अन्ने संवट्टियसत्तहत्थसिद्धस्स हीनत्ति ॥३॥
बाहुल्लतो य सुत्तंमि सत्त पंच य जहन्नमुक्कोसं ।
इहरा हीनब्भहियं होज्जंगुलधनुपुहुत्तेहिं ॥४॥
अच्छेरयाइ किंचिवि सामन्नसुए न देसियं सव्वं ।
होज्ज व अनिबद्धं चिय पंचसयादेसवयणं व ॥५॥

इत्यादि कृतं प्रसङ्गेन । साम्प्रतमुक्तानुवादेनैव संस्थानलक्षणं सिद्धानामभिधातुकाम आह-

नि. (९७४) ओगाहणाइ सिद्धा भवत्तिभागेण हुंति परिहीणा ।
संठाणमनित्थंत्थं जरामरणविप्पमुक्काणं ॥

वृ- निगदसिद्धा, नवरम् 'अनित्थंस्थम्' इतीदंप्रकारमापन्नमित्थम् इत्थं तिष्ठतीति इत्थस्थं न इत्थस्थं अनित्थंस्थमिति केनचित् प्रकारेण लौकिकेनास्थितमित्यर्थः ॥ आह-आघत एते किं देशभेदन स्थिता ? उत नेति ?, नेत्याह-कुत इति ?, अत्रोच्यते, यस्मात्-

नि. (९७५) जत्थ य एगो सिद्धो तत्थ अनंता भवक्खयविमुक्का ।
अन्नुन्नसमोगाढा पुट्ठा सव्वे अ लोगंते ॥

वृ- यत्रैव देशे चशब्दास्यैवकारार्थत्वात् एकः 'सिद्धः' निर्वृतः, तत्रानन्ताः किं ?-'भवक्षयविमुक्ता' इति भवक्षयेण विमुक्ताः भवक्षयविमुक्ताः, अनेन पुनः स्वेच्छया भवावतरणशक्तिमत्सिद्धाव्यवच्छेदमाह, अन्योऽन्यसमवगाढाः, तथाविधाचिन्त्यपरिणामवत्त्वात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्मास्तिकायादिवत्, 'पुट्ठा सव्वे य लोगंते' त्ति स्पृष्टाः-लग्नाः सर्वे च लोकान्ते, अथवा स्पृष्टः सर्वैश्च लोकान्त इति, लोकाग्रे च प्रतिष्ठिता इति वचनाद्, अयं गाथार्थः ॥ तथा–

नि. (९७६) फुसइ अनंते सिद्धे सव्वपएसेहिं निअमसो सिद्धो ।
तेऽवि असंखिज्जगुणा देसपएसेहिं जे पुट्ठा ॥

वृ- स्पृशत्यनन्तान् सिद्धान् सर्वप्रदेशैः आत्मसम्बन्धिभिः 'नियमात' नियमेन सिद्ध इति, तथा तेऽप्यसङ्ख्येयगुणा वर्तन्ते देशप्रदेशैर्ये स्पृष्टाः, तेभ्यः सर्वदेशप्रदेशस्पृष्टेभ्यः, कथं ?,-सर्वात्मप्रदेशैरनन्ताः स्पृष्टाः, तथैकैकप्रदेशेनाप्यनन्ता एव, स चासङ्ख्येयप्रदेशात्मकः, ततश्च मूलानन्तकं सकलजीवप्रदेशासङ्ख्येयानन्तकैर्गुणितं यथोक्तमेव भवतीति गाथार्थः ॥

साम्प्रतं सिद्धानेव लक्षणतः प्रतिपादयन्नाह–

नि. (९७७) असरीरा जीवघना उवउत्ता दंसणे अ नाणे अ ।
सागारमनागारं लक्खणमेअं तु सिद्धाणं ॥

वृ- अविद्यमानशरीराः, औदारिकादिपञ्चविधशरीररहिता इत्यर्थः, जीवाश्चेति घनाश्चेति विग्रहः, घनग्रहणं शुषिरापूरणाद्, उपयुक्ताः, क्व?, 'दर्शने च' केवलदर्शने 'ज्ञाने च' केवल एवेति, इह च सामान्यसिद्धलक्षणमेतदिति ज्ञापनार्थं सामान्यालम्बनदर्शनाभिधानमादावदुष्टमिति, तथा च सामान्यविषयं दर्शनं विशेषविषयं ज्ञानमिति, ततश्च साकारानाकारं सामान्यविशेषरूपमित्यर्थः, 'लक्षणं' तदन्यव्यावृत्तं स्वरूपमित्यर्थः 'एतद्' अनन्तरोक्तं, तुशब्दो वक्ष्यमाणनिरुअपमसुखविशेषणार्थः, 'सिद्धानां' निष्ठितार्थानामिति गाथार्थः ॥

साम्प्रतं केवलज्ञानदर्शनयोरशेषविषयतामुपदर्शयति–

नि. (९७८) केवलनाणुवउत्ता जाणंती सव्वभावगुणभावे ।
पासंति सव्वओ खलु केवलदिट्ठीहिऽनंताहिं ॥

वृ- केवलज्ञानेनोपयुक्ताः केवलज्ञानोपयुक्ताः न त्वन्तः करणेन, तदभावादिति, किं ?, 'जानन्ति' अवगच्छन्ति 'सर्वभालुणभावान्' सर्वपदार्थगुणपर्यायानित्यर्थः, प्रथमो भावशब्दः पदार्थवचनः द्वितीयः पर्यायवचन इति, गुणपर्यायभेदस्तु सहवर्तिनो गुणाः क्रमवर्तिनः पर्याया इति, तथा 'पश्यन्ति सर्वतः खलु' खलुशब्दस्यावधारणार्थत्वात् सर्वत एव, 'केवलदृष्टिभिरनन्ताभिः' केवलदर्शनैरनन्तैरित्यर्थः, अनन्तत्वात् सिद्धानामिति, इह चाऽऽदौ ज्ञानग्रहणं प्रथमतया तदुपयोगस्थाः सिद्ध्यन्तीति ज्ञापनार्थमिति गाथार्थः ॥ आह–किमेते युग पज्ञानन्ति पश्यन्ति च ? इत्याहोश्विदयुगपदिति, अत्रोच्यते, अयुगपत्, कथमवसीयते ?, यत आह–

नि. (९७९) नाणंमि दंसणंमि अ इत्तो एगयरयंमि उवउत्ता ।
सव्वस्स केवलिस्सा जुगवं दो नत्थि उवओगा ॥

वृ- ज्ञान दर्शन च 'एत्तो' त्ति अनयोरेकतरस्मिन्नुपयुक्ताः, किमिति ? यतः सर्वस्य केवलिनः सत्त्वस्य 'युगपद्' एकस्मिन् काले द्वौ न स्तः उपयोगौ, तत्स्वाभव्यात्; क्षायोपशमिकसंवेदने तथादर्शनात्, अत्र बहु वक्तव्यं तत्तु नोच्यते ग्रन्थविस्तरभयादिति गाथार्थः ॥

साम्प्रतं निरुमपसुखभाजश्च त इत्येतदुपदर्शयन्नाह–

नि. (९८०) नवि अत्थि मानुसाणं तं सुक्खं नेव सव्वदवाणं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जं सिद्धाणं सुक्खं अव्वाबाहं उवगयाणं ॥

वृ- नैवास्ति 'मानुपाणां' चक्रवर्त्यादीनामपि तत् सौख्यं, नैव 'सर्वदेवानाम्' अनुत्तरसुर-पर्यन्तानामपि, यत् सिद्धानां सोख्यम् 'अव्याबाधामुपगताना'मिति तत्र विविधा आबाधा व्याबाधा न व्याबाधा अव्याबाधा तामुपसामीप्येन गतानां-प्राप्तानामिति गाथार्थः ॥

यथा नास्ति तथा भङ्गयोपदर्शयति-

नि. (९८१) सुरगणसुहं समत्तं सव्वद्धापिंडिअं अनंतगुणं ।
न य पावइ मुत्तिसुहंऽनंताहिवि वग्गवग्गूहि ॥

वृ- 'सुरगणसुखं' देवसङ्घातसुखं 'समस्तं' सम्पूर्णम् अतीतानागतवर्तमानकालोद्भवमित्यर्थः, पुनश्च 'सव्वद्धापिंडिअं' सर्वकालसमयगुणितं, तथाऽनन्तगुणमिति, तदेवंप्रमाणं किलासद्भाव-कल्पनयैकैकाकाशप्रदेशे स्थाप्यते, इत्येवं सकललोकालोकाकाशानन्तप्रदेशपूरणेनानन्तं भवति, न च प्राप्नोति तथाप्रकर्षगतमपि 'मुक्तिसुखं' सिद्धिसुखम्, अनन्तैरपि वर्गवर्गैर्वर्गितमिति गाथार्थः ॥ तथा चैतदभिहितार्थानुवाद्येवाऽऽह ग्रन्थकारः-

नि. (९८२) सिद्धस्स सुहो रासी सव्वद्धापिंडिओ जइ हविज्ञा ।
सोऽनंतवग्गभइओ सव्वागासे न माइज्ञा ॥

वृ- सिद्धस्य सम्बन्धिभूतः सुखराशिः, सुखसङ्घात इत्यर्थः, 'सर्व्वाद्धापिण्डितः' सर्वकाल-समयगुणितः यदि भवेदित्यनेन कल्पनामात्रतामाहः, सः 'अनन्तवर्गभक्तः' अनन्तवर्गापवर्गितः सन् समीभूत एवेति भावार्थः, 'सर्वाकाशे' लोकालोकाकाशे न मायात्, अयमत्र भावार्थः-इह किल विशिष्टाह्लादविशेषास्ते सर्वाकाशप्रदेशादिभ्योऽपि भूयांस इत्यतः किलोक्तं-'सव्वागासे न माएज्ज' त्ती त्यादि, अन्यथा नियतदेशावस्थितिः तेषां कथमिति सूरयोऽभिदधतीति, तथा चैतत्संवाद्यार्षवेदेऽप्युक्तम्, इत्यलं व्यासङ्गेनेति गाथार्थः ॥

साम्प्रतमस्यैवंभावस्यापि सतः निरुपमतां प्रतिपादयन्नाह-

नि. (९८३) जह नाम कोइ मिच्छो नगरगुणे बहुविहे विआणंतो ।
न चएइ परिकहेउं उवमाइ तहिं असंतीए ॥

वृ- यथा नाम कश्चित् म्लेच्छः 'नगरगुणान्' सद्गृहनिवासादीन् 'बहुविधान्' अनेकप्रकारान् विजानन्नरण्यगतः सन्नन्यम्लेच्छेभ्यो न शक्नोति परिकथयितुं, कुतो निमित्तात् ?, इत्यत आह-उपमायां तत्रासत्यामिति गाथाक्षरार्थः ॥ भावार्थः कथानकादवसेयः, तच्चेदम्-एगो महारन्नवासी मिच्छो रन्ने चिट्ठइ, इओ य एगो राया आसेण अवहरिउं तं अडविं पवेसिओ, तेन दिट्ठो, सक्कारेऊण जनवयं नीओ, रन्नावि सो नयरं, पच्छा उवयारित्ति गाढमुवचरिओ जहा राया तहा चिट्ठइ धवलधराईंभोगेणं, विभासा, कालेण रन्न सरिउमारद्धो, रन्ना विसज्जिओ गओ, रन्निगा पुच्छंति- केरिसं नयरंति ?, सो विआणंतोऽवि तत्थोवमाऽभावा न सक्कइ नयरगुणे परिकहिउं । एस दिट्ठंतो, अयमत्थोवणओत्ति-

नि. (९८४) इअ सिद्धाणं सुक्खं अनोवमं नत्थि तस्स ओवम्मं ।
किंचि विसेसेणित्तो सारिक्खमिणं सुणह वुच्छं ॥

वृ- 'इय' एवं सिद्धानां सौख्यमनुपमं वर्तते, किमित्यत आह-यतो नास्ति तस्यौपम्यमिति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथाऽपि बालजनप्रतिपत्तये किञ्चिद्विशेषेण 'एत्तो' त्ति आर्षत्वादस्य साध्श्यमिदं–वक्ष्यमाणलक्षणं शृणुत, वक्ष्य इति गाथार्थः ॥

नि. (९८५) जह सव्वकामगुणिअं पुरिसो भोत्तुण भोअणं कोइ ।
तण्हा छुहाविमुक्को अच्छिज्ज जहा अमिअतित्तो ॥

वृ- 'यथा' इत्युदाहरणोपन्यासार्थः 'सर्वकामगुणितं' सकलसौंदर्यसंस्कृतं पुरुषो भुक्त्वा भोजनं कश्चित्; भुज्यत इति भोजनं, तृट्क्षुद्विमुक्तः सन् आसीत यथाऽमृततृप्तः, अबाधारहितत्वाद्, इह च रसनेन्द्रियमेवाधिकृत्येष्टविषयप्राप्तयौत्सुक्यविनिवृत्त्या सुखप्रदर्शनं सकलेन्द्रियार्थावाप्तयाऽशेषौत्सुक्यनिवृत्त्यपलक्षणार्थम्, अन्यथा बाधान्तरसम्भवात् सुखाभाव इति, उक्तं च–

"वेणुवीणामृदङ्गादिनादयुक्तेन हारिणा ।
श्लाध्यस्मर कथावद्धगीतेन स्तिमितः सदा ॥१॥
कुट्टिमादौ विचित्राणि, दृष्ट्वा रूपाण्यनुत्सुकः ।
लोचनानन्ददायीनि, लीलावंति स्वकानि हि ॥२॥
अम्बरागुरुकर्पूरधूपगंधानितस्ततः ।
पटवासादिगंधांश्च, व्यक्तमाघ्राय निःस्पृहः ॥३॥
नानारससमायुक्तं, भुक्त्वाऽन्नमिह मात्रया ।
पीत्वोदतृप्तात्मा खादयन् खादिमंशुभम् ॥४॥
मृदुतूलीसमाक्रान्तदिव्यपर्यङ्कसंस्थितः ।
सहसाऽम्भोदसंशब्दश्रुतेर्भयघनं भृशम् ॥५॥
इष्टभार्यापरिष्वक्तस्तद्रतान्तेऽथवा नरः ।
सर्वेन्द्रियार्थसम्प्राप्त्या, सर्ववाधानिवृत्तिजम् ॥६॥
यद्वेदयति शं हृद्यं, प्रशान्तेनान्तरात्मना ।
मुक्तात्मनस्ततोऽनन्तं, सुखमाहुर्मनीषिणः ॥७॥" इति गाथार्थः ॥

नि. (९८६) इअ सव्वकालतित्ता अउलं निव्वाणमुवगया सिद्धा ।
सासयमव्वाबाहं चिट्ठंति सुही सुहं पत्ता ॥

वृ- 'इअ' एवं सर्वकालतृप्ताः स्वस्वभावावस्थितत्वात्, अतुलं निर्वाणमुपगताः सिद्धाः, सर्वदा सकलौत्सुक्यविनिवृत्तेः, यतश्चैवमतः 'शाश्वत' सर्वकालभावि 'अव्याबाधं' व्याबाधापरिवर्जितं सुखं प्राप्ताः सुखिनः सन्तस्तिष्ठन्तीति योगः । सुखं प्राप्ता इत्युक्ते सुखिन इत्यनर्थकं, न, दुःखाभावमात्रमुक्तिसुखनिरासेन वास्तवसुखप्रतिपादनार्थत्वादस्य, तथाहि–अशेषदोषक्षयतः शाश्वतमव्याबाधं सुखं प्राप्ताः सुखिनः सन्तस्तिष्ठन्ति न तु दुःखाभावमात्रान्विता एवेति गाथार्थः ॥ साम्प्रतं वस्तुतः सिद्धपर्यायशब्दान् प्रतिपादयन्नाह–

नि. (९८७) सिद्धत्ति अ बुद्धत्ति अ पारगयत्ति अ परंपरगयत्ति ।
उम्मुक्ककम्मकवया अजरा अमरा असंगा य ॥

वृ- 'सिद्धा इति च' कृतकृत्यत्वात् 'बुद्धा इति च' केवलेन विश्वागमात् 'पारगता इति च'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवार्णवपारगमनात् 'परम्परागता इति च' पुण्यबीजसम्यक्त्वज्ञानचरणक्रमप्रतिपत्त्युपाय-मुक्तत्वात् परम्परया गताः परम्परागता उच्यन्ते, उन्मुक्तकर्मकवचाः सकलकर्मवियुक्तत्वात्, तथा अजरा वयसोऽभावात्, अमरा आयुषोऽभावात्, असङ्गाश्च सकलक्लेशाभावादिति गाथार्थः।।

साम्प्रतमुपसंहरन्नाह–

नि. (९८८) निच्छिन्नसव्वदुक्खा जाइजरामरणबंधनविमुक्का ।
अव्वाबाहं सुक्खं अनुहुंती सासयं सिद्धा ।।

वृ- वस्तुतो व्याख्यातैवेति न प्रतन्यते ।।

नि. (९८९) सिद्धाण नमोक्कारो जीवं० ।।

नि. (९९०) सिद्धाण नमुक्कारो धन्नाण०।।

नि. (९९१) सिद्धाण नमुक्कारो एवं० ।।

नि. (९९२) सिद्धाण नमुक्कारो सव्व० बिइअं होइ मंगलं ।।

वृ- गाथासमूहः सामान्यतोऽर्हन्नमस्कारवदवसेयः, विशेषतस्तु सुगम एवेति ।। उक्तः सिद्धनमस्काराधिकारः, साम्प्रतमाचार्यनमस्कारः, तत्राचार्य इति कः शब्दार्थः, उच्यते,–'चर गतिभक्षणयोः' इत्यस्य (चरेः) आङि वा गुरा विति ण्यति आचार्य इति भवति, आचर्यतेऽसावित्याचार्यः, कार्यार्थिभिः सेव्यत् इत्यर्थः, अयं च नामादिभेदाच्चतुर्विधः, तथा चाऽऽह–

नि. (९९३) नामंठवणादविए भावंमि चउव्विहो उ आयरिओ ।
दव्वंमि एगभविआई लोइए सिप्पसत्थाई ।।

वृ- नामाचार्यः स्थापनाचार्यः द्रव्याचार्यो भावाचार्य इति, तत्र नामस्थापनाचार्यौ सुगमौ, द्रव्याचार्यमागमनोआगमादिभेदं प्रायः सर्वत्र तुल्यविचारत्वादनादृत्य ज्ञशरीरादिव्यातिरिक्तिं द्रव्याचार्यमभिधातुकाम आह– 'द्रव्य' इति द्रव्याचार्यः, 'एकभविकादिः' एकभविकः बद्धायुष्कः अभिमुखनामगोत्रश्चेति, अथवा आदिशब्दाद्–द्रव्यभूत आचार्य द्रव्याचार्यः, भूतशब्द उपमावाची, द्रव्यनिमित्तं वा य आचारवानित्यादि, भावाचायः-लौकिको लोकोत्तरश्च, तत्र लौकिकः शिल्पशास्त्रादिः, तत्परिज्ञानात् तदभेदोपचारेणैवमुच्यते, अन्यथा शिल्पादिग्राहको गृह्यते, अन्ये त्वेवं भेदमकृत्वौघत एवैनमपि द्रव्याचार्यं व्याचक्षत इति गाथार्थः ।। अधुना लोकोत्तरान् भावाचार्यान् प्रतिपादयन्नाह–

नि. (९९४) पंचविहं आयारं आयरमाणा तहा पभासंता ।
आयारं दंसंता आयरिया तेन वुच्चंति ।।

वृ- 'पञ्चविधं' पञ्चप्रकारं–ज्ञानदर्शनचारित्रतपोवीर्यभेदात्, 'आचार' मिति आङ् मर्यादायां चरणं चारः–मर्यादया कालनियमादिलक्षणया चार आचार इति, उक्तं च-'काले विनए बहुमाने' इत्यादि, तमाचरन्तः सन्तः अनुष्ठानरूपेण, तथा प्रभाषमाणाः अर्थाद् व्याख्यानेन, तथाऽऽचारं दर्शयन्तः सन्तः प्रत्युपेक्षणादिक्रियाद्वारेण, मुमुक्षुभिः सेव्यन्ते येन कारणेनाचार्यास्तेनोच्यन्त इति गाथार्थः ।। अमुमेवार्थं स्पष्टन्नाह–

नि. (९९५) आयारो नाणाईं तस्सायरणा पभासणाओ वा ।
जे ते भावायरिया भावायारोवउत्ता य ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- 'आचारः' पूर्ववत् ज्ञानादिपञ्चप्रकारः, तस्य आचारस्याऽऽचरणात् प्रभाषणाद्वा, वा शब्दाद् दर्शनाद्वा हेतोर्ये मुमुक्षुभिर्गुणैर्वा ज्ञानादिभिराचर्यन्ते ते भावाचार्या उच्यन्ते, एतच्चा-आचरणाद्यनुपयोगतोऽपि सम्भवति यतः अत आह-'भावाचारोपयुक्ताश्च' भावार्थमा-चारो भावाचारः तदुपयुक्ताश्चेति गाथार्थः ॥ आयरियनमोक्कारो ४ इत्यादिगाथाप्रपञ्चः सामान्येनार्हन्न-मस्कारवदवसेयः विशेषस्तु सुगम एवेति ॥

उक्त आचार्यनमस्काराधिकारः ॥ साम्प्रतपाध्यायनमस्काराधिकारः, तत्रोपाध्याय इति कः शब्दार्थः ?, उच्यते-'इङ् अध्ययने' इत्यस्य 'इङश्चे'ति धञ् उपाध्यायः, उपेत्याधीयतेऽस्मात् साधवः सूत्रमित्युपाध्यायः, स च नामादिभेदाच्चतुर्विध इति, आह च -

नि. (९९६) नामंठवणादविए भावंमि चउव्विहो उवज्झाओ ।
दव्वे लोइअ सिप्पाइ निण्हगा वा इमे भावे ॥

वृ- इयं हि तत्त्वत आचार्यगाथातुल्ययोगक्षेमैवेति न प्रतन्यते, नवरं निह्नवा वेति यदुक्तं तत्र ते ह्यभिनिवेशदोषेणैकमपि पदार्थमन्यथा प्ररूपयन्तो मिथ्यादृष्टय एव इत्यतो द्रव्योपाध्याया।

नि. (९९७) बारसंगो जिनक्खाओ सज्झाओ कहिओ वुहेहिं ।
तं उवइसंति जम्हा उवज्झाया तेन वुच्चंति ॥

वृ- द्वादशाङ्ग आचारादिभेदात् 'जिनाख्यातएः' अर्हत्प्रणीतः स्वाध्यायः वाचनानिबन्धनत्वात् इह सूत्रमेव गृह्यते, कथितः 'बुधैः' गणधरादिभिः, य इति गम्यते, 'तं' स्वाध्यायमुपदिशन्ति वाचनारूपेण यस्मात् कारणादुपाध्यायस्तेनोच्यन्ते, उपेत्याधीयतेऽस्मादित्यन्वर्थोपपत्तेरिति गाथार्थः ॥ साम्प्रतमागमशैल्याऽक्षरार्थमधिकृत्योपाध्यायशब्दार्थं निरूपयन्नाह-

नि. (९९८) उत्ति उवओगकरणे ज्झत्ति अ झाणस्स होइ निद्देसे ।
एएण हुंति उज्झा एसो अन्नोऽवि पज्ञाओ ॥

वृ- उ इत्येतदक्षरं उपयोगकरणे वर्तते, ज्झ इति चेदं ध्यानस्य भवति निर्देशे, ततश्च प्राकृतशैल्या एतेन कारणेन भवति उज्झा, उपयोगपुरस्सरं ध्यानकर्तार इत्यर्थः, एषोऽन्योऽपि पर्याय इति गाथार्थः ॥ अथवा-

नि. (९९९) उत्ति उवओगकरणे वत्तिअ पावपरिवज्ञणे होइ ।
झत्ति अ झाणस्स कए उत्ति अ ओसक्कणा कम्मे ॥

वृ- निगदसिद्धा, नवरमुपयोगपूर्वकं पापरिवर्जनतो ध्यानारोहणेन कर्माण्यपनयन्तीत्युपाध्याया इत्यक्षरार्थः, अक्षरार्थाभावे च पदार्थाभावप्रसङ्गात्पदस्य तत्समुदायरूपत्वादक्षरार्थः प्रतिपत्तव्य इत्यलं विस्तरेण ॥ 'उवज्झायनमोक्कारो'४ इत्यादिगाथापूगः सामान्येनार्हन्नमस्कारवदवसेयः, विशेषस्तु सुगम एवेति ॥ उक्त उपाध्यायनमस्काराधिकारः ॥

साम्प्रतं साधुनमस्काराधिकारः, तत्र 'राध साध संसिद्धा' वित्यस्य उणूप्रत्ययान्तस्य साधुरिति भवति, अभिलषितमर्थ साधयतीति साधुः, स च नामादिभेदतः, तथा चाऽऽह-

नि. (१०००) नामं १ ठवणासाहू २ दव्वसाहू अ ३ भावसाहू अ ४ ।
दव्वंमि लोइआई भावंमि अ संजओ साहू ॥

वृ- वस्तुतो गतार्थैवेति न विव्रियते ॥ द्रव्यसाधून् प्रतिपादयन्नाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नि. (१००१) घडपडरहमाईणिं उ साहंता हुंति दव्वसाहुत्ति ।
अहवावि दव्वभूआ ते हुंती दव्वसाहुत्ति ॥

वृ- निगदसिद्धा, नवरमथवाऽपि 'द्रव्यभूता' इति भावपर्यायशून्याः ॥ भावसाधून् प्रतिपादयन्नाह–

नि. (१००२) निव्वाणसाहए जोए, जम्हा साहंति साहुणो ।
समा य सव्वभूएसु, तम्हा ते भावसाहुणो ॥

वृ- निर्वाणसाधकान् 'योगान्' सम्यग्दर्शनादिप्रधानव्यापारान् यस्मात् साधयन्ति साधवः विहितानुष्ठानपरत्वात्, तथा समाश्च सर्वभूतेष्विति योगप्राधान्यख्यापनार्थमेतत्, तस्मात्ते भावसाधव इति गाथार्थः ॥

नि. (१००३) किं पिच्छसि साहूणं तवं व निअमं व संजमगुणं वा ।
तो वंदसि साहूणं ? एअं मे पुच्छिओ साह ॥

वृ- निगदसिद्धा ।

नि. (१००४) विसयसुहनिअत्ताणं विसुद्धचारित्तनिअमजुत्ताणं ।
तच्चगुणसाहयाणं सदायकिच्चुज्जयाणं नमो ॥

वृ- निगदसिद्धैव ।

नि. (१००५) असहाइ सहायत्तं करंति मे संजमं करिंतस्स ।
एएण कारणेणं नमामिऽहं सव्वसाहूणं ॥

वृ- परमार्थसाधनप्रवृत्तौ सत्यां जगत्यसहाये सति प्राकृतशैल्या वाऽसहायस्य सहायत्वं कुर्वन्ति मम संयमं कुर्वतः सतः, अनेन प्रकारेण नमाम्यहं सर्वसाधुभ्य इति गाथार्थः ॥ 'साहूण नमोक्कारो ४ इत्यादिगाथाविस्तरः सामान्येनार्हन्नमस्कारवदवसेयः, विशेषस्तु सुखोन्नेय इति कृतं प्रसङ्गेन ॥ उक्तं वस्तुद्वारम्, अधुनाऽऽक्षेपद्वारावयवार्थ-प्रचिकटिषयेदमाह– (इतः प्राक् "एसो पंच नमुक्कारो" इत्यादि पुस्तकादर्शेषु वर्तते, न च वृत्तौव्याख्यातः)

नि. (१००६) नवि संखेवो व वित्थारु संखेवो दुविहु सिद्धसाहूणं ।
वित्थारओऽनेगविहो पंचविहो न जुज्जइ तम्हा ॥

वृ- इहास्या गाथाया अंशकक्रमनियमाच्छन्दोविचितौ लक्षणमनेन पाठेन विरुध्यते 'न संखेवो' इत्यादिना, यत इहाद्य एव पञ्चमात्रोऽशकः इत्यतोऽपपाठोऽयमिति, ततश्चापिशब्द एवात्र विद्यमानार्थो द्रष्टव्यः, 'नवि संखेवो' इत्यादि, इह किल सूत्रं संक्षेपविस्तरद्वयमतीत्य न वर्तते, तत्र संक्षेपवत् सामायिकसूत्रं, विस्तरवच्चतुर्दश पूर्वाणि, इदं पुनर्नमस्कारसूत्रमुभयातीतं, यतोऽत्र न संक्षेपो नापि विस्तर इत्यपिशब्दस्य व्यवहितः सम्बन्धः, 'संक्षेपो द्विविध' इति यद्ययं संक्षेपः स्यात् ततस्तस्मिन् सति द्विविध इति-द्विविध एव नमस्कारो भवेत्, सिद्ध-साधुभ्यामिति, कथं ?, परिनिर्वृतार्हदादीनां सिद्धशब्देन ग्रहणात् संसारिणां च साधुशब्देनेति, तथा च नैते संसारिणः सर्व एव साधुत्वमतिलङ्घ्य वर्तन्त इति, तद्भावे शेषगणाभावात्, अतस्तन्नमस्कार एवेतरनमस्कारभावात्, अथायं विस्तरः, इत्येतदप्यचारु, यस्माद् विस्तरतोऽनेकविधः प्राप्नोति, तथा च-ऋषभाजितसम्भवाभिनन्दसुमतिपद्मप्रभसुपार्श्वचन्द्रप्रभेत्याद-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महावीरवर्द्धमान-स्वामिपर्यन्तेभ्यश्चतुर्विंशत्यर्हद्भयः, तथा सिद्धोभ्योऽपि विस्तरेण- अनन्तरसिद्धेभ्यः परम्परसिद्धेभ्यः प्रथमसमयसिद्धेभ्यः द्वितीयतृतीयसमयादिसङ्ख्येयासङ्ख्येयानन्तसमयसिद्धेभ्यः, तथा तीर्थलिङ्गचारित्रप्रत्येकबुद्धादिविशेषणविशिष्टेभ्यः तीर्थकरसिद्धोभ्यः अतीर्थकरसिद्धेभ्यः तीर्थसिद्धेभ्यः इत्येवमादिरनन्तशो विस्तरः, यततश्चैवमत आह पक्षद्वयमप्यङ्गीकृत्य पञ्चविधः-पञ्चप्रकारो न युज्यते यस्मान्नमस्कार इति गाथार्थः ।। गतमाक्षेपद्वारम्, अधुना प्रसिद्धिद्वारायवार्थ उच्यते-तत्र यत्तावदुक्तं 'न संक्षेप' इति, तन्न संक्षेपात्मकत्वात्, ननु स कारणवशात् कृतार्थाकृतार्थापरिग्रहेण सिद्ध-साधुमात्रक एवोक्तः, सत्यमुक्तोऽयुक्तास्त्वसौ, कारणान्तरस्यापि भावात्, तच्चोक्तमेव, अथवा वक्ष्यामः 'हेतुनिमित्त' मित्यादिना, सति च द्वैविध्ये सकलगुणनमस्कारासम्भवादेकपक्षस्य व्यभिचारित्वात्, तथा चाऽऽह–

नि. (१००७) अरहंताई निअमा साहू साहू अ तेसु भइअव्वा ।
तम्हा पंचविहो खलु हेउनिमित्तं हवइ सिद्धो ।।

वृ- इहार्हदादयो नियमात् साधवः, तद्गुणानामपि तत्र भावात्, साधवस्तु 'तेषु' अर्हदादिषु 'भक्तव्याः' विकल्पनीयाः, यतस्ते सर्वेऽर्हदादयः, किं तर्हि ?, केचिदर्हन्त एव ये केवलिनः, केचिदाचार्याः सम्यक् सूत्रार्थविदः, केचिदुपाध्यायाः सूत्रविदः, केचिदुपाध्यायाः सूत्रविद एव, केचिदेतद्व्यतिरिक्ताः शिष्यकाः साधव एव, नार्हदादय इति, ततश्चैकपदव्यभिचारान्न तुल्याभिधानता, तन्नमस्करणे च नेतरनमस्कारफलमिति, प्रयोगश्च-साधुमात्रनमस्कारो विशिष्टार्हदादिगुणनमस्कृतिफलप्रापणसमर्थो न भवति, तत्सामान्याभिधाननमस्कारत्वात्, मनुष्यमात्रनमस्कारवत् जीवमात्रनमस्कारवद्वेति, तस्मात् पञ्चविध एव नमस्कारः, खलु-शब्दस्यावधारणार्थत्वात्, विस्तरेण च व्यक्त्यपेक्षया कर्तुमशक्यत्वात्, तथा-'हेतुनिमित्तं भवति सिद्ध' इति, तत्र हेतुर्नमस्कारार्हत्वे य उक्तः 'मग्गे अविप्पनासो'त्ति इत्यादि तन्निमित्तं चोपाधिभेदाद्भवति सिद्धः पञ्चविध इति गाथार्थः ।। गतं प्रसिद्धिद्वारम्, अधुना क्रमद्वारावयवार्थं प्रतिपादयन्नाह–

नि. (१००८) पुव्वाणनुपुव्वि न कमो नेव य पच्छानुपुव्वि एस भवे ।
सिद्धाईआ पढमा बीआए साहुणो आई ।।

वृ- इह क्रमस्तावद् द्विविधः-पूर्वानुपूर्वी च पश्चानुपूर्वी चेति, अनानुपूर्वी तु क्रम एव न भवति, असमञ्जसत्वात्, तत्रायमर्हदादिक्रः पूर्वानुपूर्वी न भवति, सिद्धाद्यनभिधानाद्, एकान्तकृतकृत्यत्वेनार्हन्नमस्कार्यत्वेन च सिद्धानां प्रधानत्वात्, प्रधानस्य चाभ्यर्हितत्वेन पूर्वाभिधानादिति भावार्थः, तथा नैव च पश्चानुपूर्व्येषु क्रमो भवेत्, साध्वाद्यनभिधानात्, इह सर्वपाश्चात्याः अप्रधानत्वात् साधवः, ततश्च तानभिधाय यदि पर्यन्ते सिद्धाभिधानं स्यात् पश्चानुपूर्वीति, तथा चामुमेवार्थ प्रतिपादयन्नाह–सिद्धाद्या प्रथमा-पूर्वानुपूर्वी, भावना प्रतिपादितैव, 'द्वितीयायां' पश्चानुपूर्व्या साधव आदौ, युक्तिः पुनरप्यत्राभिहितैवेति गाथार्थः ।।

साम्प्रतं पूर्वानुपूर्वीत्वमेव प्रतिपादयन्नाह–

नि. (१००९) अरहंतुवएसेणं सिद्धा नज्जंति तेन अरिहाई ।
नवि कोई परिसाए पणमित्ता पणमई रन्नो ।।

वृ- इह 'अर्हदुपदेशेन' आगमेन सिद्धाः 'ज्ञायन्ते' अवगम्यन्ते प्रत्यक्षादिगोचरातिक्रान्ताः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सन्तो यतस्तेनार्हदादिपूर्वानुपूर्वी क्रम इति गम्यते, अत एव चार्हतामभ्भर्हितत्वं, कृतकृत्यत्वं चाल्पकालव्यवहितत्वात् प्रायः समानमेव, तथा अर्हन्नमस्कार्यत्वमप्यसाधनम्, अर्हन्नमस्कारपूर्वकसिद्धत्वयोगेनार्हतामपि वस्तुतः सिद्धनमस्कार्यत्वात् प्रधानत्वादिति भावना, आह–यद्येवमाचार्यादिस्तर्हि क्रमः प्राप्तः, अर्हतामपि तदुपदेशेन संवित्तिरिति, अत्रोच्यते, न, इहार्हत्सिद्धयोरेवायं वस्तुतस्तुल्यवलयोर्विचारः श्रेयान्, परमनायकभूतत्वाद्, आचार्यास्तु तत्परिषत्कल्पा वर्तन्ते, नापि कश्चित् परिषदं 'प्रणम्य' प्रनामं कृत्वा ततः प्रणमति राज्ञ इत्यतोऽचोद्यमेतदिति गाथार्थः ॥ उक्तं क्रमद्वारम्, अधुना प्रयोजनफलप्रदर्शनायेदमाह–

नि. (१०१०) इत्थ य पओअणमिणं कम्मखंओ मंगलागमो चेव ।
इहलोअपारलोइअ दुविह फलं तत्थ दिट्ठंता ॥

वृ- 'अत्र च' नमस्कारकरणे प्रयोजनमिदं-यदुत करणकाल एवाक्षेपेण 'कर्मक्षयः' ज्ञानावरणीयादिकर्मापगमः, अनन्तपुद्गलापगममन्तरेण भावतो नकारमात्रस्याप्यप्राप्तेरित्यादि भावितं, तथा मङ्गलागमश्चैव यः करणकालभावीति, तथा कालान्तरभावि पुनरैहलौकिकपारलौकिकभेदभिन्नं 'द्विविधं फलं' द्विप्रकारं फलं, 'तत्र दृष्टान्ताः' वक्ष्यमाणलक्षणा इति ।

नि. (१०११)इह लोइ अत्थकामा २ आरुग्गं ३ अभिरई ४ अ निप्फत्ती ५ ।
सिद्धी अ ६ सग्ग ७ सुकुलप्पच्चायाई ८ अ परलोए ॥

वृ- इह लोकेऽर्थकामौ भवतः, तथाऽऽरोग्यं भवति नीरुजत्वमित्यर्थः, एते चार्थादयः शुभविपाकिनोऽस्य भवन्ति, तथा चाह-अभिरतिश्च भवति, आभिमुख्येन रतिः–अभिरतिः इह लोकेऽर्थादिभ्यो भवति, परलोके च तेभ्य एव शुभानुबन्धित्वान्निष्पत्तिः, पुण्यस्येति गम्यते, अथवाऽभिरतेश्च निष्पत्तिरित्येकवाक्यतैव, तथा 'सिद्धिश्च' मुक्तिश्च, तथा स्वर्गः सुकुलप्रत्यायातिश्च परलोक इत्यामुष्मिकं फलं ॥ इह च सिद्धिश्चेत्यादिक्रमः प्रधानफलापेक्ष्युपायख्यापनश्च (नार्थः), तथाहि-विरला एवैकभवेन सिद्धिमासादयन्ति, अनासादयन्तश्चाविराधकाः स्वर्गसुकुलोत्पत्तिमन्तरेण नावस्थान्तरमनु भवन्तीति गाथार्थः ॥

साम्प्रतं यथाक्रममेवार्थादीनाधिकृत्योदाहरणानि प्रतिपादयन्नाह–

नि. (१०१२)इहलोगंमि तिदंडी १ सादिव्वं २ माउलिंगवण ३ मेव ।
परलोइ चंडपिंगल ४ हुंडिअ जक्खो ५ अदिट्ठंता ॥

वृ- अक्षरगमनिका सुज्ञेया, भावार्थः कथानकेभ्योऽवसेयः, तानि चामूनि–नमोक्कारो अत्थावहो, कहंति ?, उदाहरणं-जहा एगस्स सावगस्स पुत्तो धम्मं न लएइ; सोऽवि सावओ कालगओ, सो विवहाराहओ एवं चेव विहरइ । अन्नया तेसिं घरसमीवे परिव्वायओ आवासिओ, सो तेन समं मित्तिं करेइ, अन्नया भणइ-आणेहि निरुवहयं अणाहमडयं जओ ते ईसरं करेमि, तेन मग्गिओ लद्धो उब्बद्धओ मनुस्सो, सो मसाणं नीओ, जं च तत्थ पाउग्गं । सोय दारओ पियरिं नमोक्कारं सिक्खाविओ, भणिओ य-जाहे बीहेज्जसि ताहे एयं पढिज्जसि, विज्जा एसा, सो तस्स मयगस्स पुरओ ठविओ, तस्स य मयगस्स हत्थे असी दिन्नो, परिव्वायओ विज्जं परियत्तेइ, उट्ठिउमारद्धो वेयालो, सो दारओ भीओ हियए नमोक्कारं परियट्टेइ, सो वेयालो पडिओ, पुणोऽवि जवेइ, पुणोवि उट्ठिओ, सुट्ठुतरागं परियट्टेइ, पुणोऽवि पडिओ, तिदंडी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भणइ-किंचि जाणसि, ?, भणइ-नत्थि, पुणोऽवि जवइ, ततियवारा, पुणोऽवि पुच्छिओ, पुणो नवकारं करेइ, ताहे वाणमंतरेण रुसिएण तं खग्गं गहाय सो तिदंडी दो खंडीकओ, सुवन्नकोडी जाओ, अंगोवंगाणि य से जुत्तजुत्ताणि काउं सव्वरत्ति वूढं ईसरो जाओ नमोक्कारफलेणं, जइ न होंतो नमोक्कारो तो वेयालेण मारिज्जंतो, सो सुवन्नं होंतो ॥ कामनिप्फत्ती, -कहं ?, एगा साविगा तीसे भत्ता मिच्छादिट्ठी अन्नं भज्जं आनेउं मग्गइ, तीसे तणएण न लहइ से सवत्तगंति, चिंतेइ-किह मारेमि ?, अन्नया कण्हसप्पो घडए छुभित्ता आणीओ, संगोविओ, जिमिओ भणइ-आणेहि पुप्फाणि अमुगे घडए ठवियाणि, सा पविट्ठा, अंधकारंति नमोक्कारं करेइ, जइवि मे कोइ खाएज्जा तोवि मे मरंतीए नमोक्कारो न नस्सहिति, हत्थो छूढो, सप्पो देवयाए अवहिओ, पुप्फमाला कया, सा गहिया, दिन्ना य से, सो संभंतो चिंतेइ-अन्नाणि, कहियं, गओ पेच्छइ घडगं पुप्फगंधं च, नवि इत्थ कोइ सप्पो, आउट्टो पायपडिओ सव्वं कहेइ खामेइ य, पच्छा सा चेव घरसामिणी जाया, एवं कामावहो ॥

आरोग्गाभिरई-एगं नगरं, नईए तडे खरकम्मिएणं सरीरचिंताए निग्गएणं नईए वुज्झंतं माउलिंगं दिट्ठं, रायाए उवनीयं, सूयस्स हत्थे दिन्नं, जिमियस्स उवनीयं, पमाणण अइरित्तं वन्नेण गंधेणं अइरित्तं, तस्स मनुसस्स तुट्ठो, भोगो दिन्नो, राया भणइ-अनुनईए मग्गह, जाव लद्धं, पत्थयणं गहाय पुरिसा गया, दिट्ठो वणसंडो, जो गेण्हइ फलाणि सो मरइ, रन्नो कहियं, भणइ-अवस्सं आनेयव्वाणि, अक्खपडिया वच्चंतु, एवं गया आणेन्ति, एगो पविट्ठो सो बाहिं उच्छुब्भइ, अन्ने आणंति, सो मरइ, एवं काले वच्चंते सावगस्स परिवाडी जाया, गओ तत्थ, चिंतेइ-मा विराहियसामन्नो कोइ होज्जत्ति निसीहिया नमोक्कारं च करेंतो ढुक्कइ, वाणमंतरस्स चिंता, संबुद्धो, वंदइ,भणइ–अहं तत्थेव साहरामि, गओ, रन्नो कहियं, संपूइओ, तस्स ओसीसे दिने दिने ठवेइ, एवं तेन अभिरईं भोगा य लद्धा, जीवयाओ य, किं अन्नं आरोग्गं?, रायावि तुट्ठो ॥

परलोए नमोक्कारफलं-वसंतपुरे नयरे जियसत्तू राया, तस्स गणिया साविया सा चंडपिंगलेण चोरेण समं वसइ । अन्नया कयाइ तेन रन्नो घरं हयं, हारो नीनिओ, भीएहिं संगोविज्जइ । अन्नया उज्जाणियागमणं, सव्वाओ विभूसियाओ गणियाओ वच्चंति, तीए सव्वाओ अइसयमित्ति सो हारो आविद्धो, जीसे देवीए सो हारो तीसे दासीए सो नाओ, कहियं रन्नो, सा केण समं वसइ ?, कहिए चंडपिंगलो गहिओ, सूले भिन्नो, तीए चिंतियं-मम दोसेण मारिओत्ति सा से नमोक्कारं देइ, भणइ य-नीयाणं करेहि जहा-एयस्स रन्नो पुत्तो आयामित्ति, कयं, अग्गमहिसीए उदरे उववन्नो, दारओ जाओ, सा साविया कीलावणधावीया जाया । अन्नया चिंतेइ-कालो समो गब्भस्स य मरणस्स य, होज्ज कयाइ, रमावेंती भणइ–मा रोव चंडपिंगलत्ति, संबुद्धो, राया मओ, सो राया जाओ, सुचिरेण कालेण दोवि पव्वइयाणि, एवं सुकुलपच्चायाई तम्मूलागं च सिद्धिगमणं ॥

अहवा वितियं उदाहरणं-महुराए नयरीए जिनदत्तो सावओ, तत्थ हुंडिओ चोरो, नयरं मुसइ, सो कयाइ गहिओ सूले भिन्नो, पडिचरह बितिज्जयावि से नज्जिहिंति, मनूसा पडिचरंति, सो सावओ तस्स नाइदूरेण वीईवयइ, सो भणइ-सावय ! तुमंसि अनुकंपओ तिसाइओऽहं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देह मम पाणियं जा मरामि, सावओ भणइ-इमं नमोक्कारं पढ जा ते आणेमि पाणियं, जइ विस्सारेहिसि तो आणीयंपि न देमि, सो ताए लोलयाए सावओ तेहिं मानुस्सेहिं गहिओ चोरभत्तदायगोत्ति, रन्नो निवेइयं, भणइ-एयंपि सूले भिंदह, आधायणं निज्जइ, जक्खो ओहिं पउंजइ, पेच्छइ सावयं, अप्पणो य सरीरयं, पव्वयं उप्पाडेऊण णयरस्स उवरिं ठाऊण भणइ-सावयं भट्टारयं न याणेह ?, खामेह, मा भे सव्वे चूरेहामि, देवणिम्मियस्स पुव्वेण से आययणं कयं, एवं फलं लब्भइ नमोक्कारेणेति गाथार्थः ॥ उक्ता नमस्कारनिर्युक्तिः, साम्प्रतं सूत्रोपन्यासार्थं प्रत्यासत्तियोगाद् वस्तुतः सूत्रस्पर्शनिर्युक्तिगतामेव गाथामाह–

<u>नमस्कार निर्युक्ति : समाप्ता-</u>

अध्ययनं-१- सामायिकं

नि. (१०१३) नंदिअनुओगदारं विहिवदुवुग्घाइयं च नाऊणं ।
काऊण पंचमंगल आरंभो होइ सुत्तस्स ॥

वृ- नन्दिश्चानुयोगद्वाराणि चेत्येकवद्भावाद् नन्दिअनुयोगद्वारं, 'विधिवद्' यथावद् 'उपोद्घातं च' उद्देसे इत्यादिलक्षणं 'ज्ञात्वा' विज्ञाय, भणित्वेति वा पाठान्तरं, तथा कृत्वा 'पञ्चमङ्गलानि' नमस्कारमित्यर्थः, किम् ?, आरम्भो भवति सूत्रस्य, इह च पुनर्नन्द्याद्युपन्यासः किल विधिनियमख्यापनार्थः, नन्द्यादि ज्ञात्वैव भणित्वैव वा, नान्यथेति, उपोद्घातभेदोपन्यासोऽपि सकलप्रवचनसाधारणत्वेन तस्य प्रधानत्वात्, प्रधानस्य च सामान्यग्रहणेऽपि भेदेनाभिधानदर्शनाद्, यथा ब्राह्मणा आयाता वशिष्टोऽप्यायात इति, कृतं च सूर्येति गाथार्थः ॥ सम्बन्धान्तरप्रतिपादनायैवाऽऽह–

नि. (१०१४) कयपंचनमुक्कारो करेइ सामाइयंति सोऽभिहिओ ।
सामाइअंगमेव य जं सो सेसं तओ वुच्छं ॥

वृ- कृतः पञ्चनमस्कारो येन स तथाविधः शिष्यः सामायिकं करोतीत्यागमः, सोऽभिहिः पञ्चनमस्कारः, सामायिकाङ्गमेव च यदसौ, सामायिकाङ्गगा च प्रागुक्ता, 'शेषं'सूत्रं 'ततः' तस्माद्वक्ष्यत इति गाथार्थः ॥ तच्चेदम्–

मू. (२) *करेमि भंते ! सामाइयं, सव्वं सावज्जं जोगं पच्चक्खामि जावज्जीवाए तिविहं तिविहेणं, मणेणं वायाए काएणं न करेमि न कारवेमि करंतंपि अन्नं न समणुजाणामि, तस्स भंते ! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि*

वृ- इह च सूत्रानुगम एव अहीनाक्षरादिगुणोपेतमुच्चारणीयं, तद्यथा-अहीनाक्षरमनत्यक्षरमव्यावद्धाक्षरमस्खलितम-मिलितमव्यत्याम्रेडितं प्रतिपूर्णं परिपूर्णघोषं कण्ठोष्ठविप्रमुक्तं वाचनोपगमत्, इत्यमूनि प्राग् व्याख्यातत्वात्र वयाख्यायन्ते, ततस्तस्मिन्नुच्चरिते सति केषाञ्चिद्भगवतां साधूनां केचनार्थाधिकारा अधिगता भवन्ति, केचन त्वनधिगताः, ततश्चानधिगताधिगमनाय व्याख्या प्रवर्तत इति, तल्लक्षणं चेदं-

'संहिता च पदं चैव, पदार्थः पदविग्रहः ।
चालना प्रत्यवस्थानं, व्याख्या तन्त्रस्य षड्विधा ॥१॥' इति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्रास्खलितपदोच्चारणं संहिता, अथवा-परः सन्निकर्षः संहिता, यथा करेमि भंते ! सामाइय-मित्यादि जाव वोसिरामित्ति । पदं च पञ्चधा, तद्यथा–नामिकं नैपातिकम् औपसर्गिकम् आख्यातिकं मिश्रं चेति, तत्र अश्व इति नामिकं खल्विति नैपातिकं परीत्यौपसर्गिकं धावतीत्याख्यातिकं संयत इति मिश्रम्, अथवा सुबन्तं तिङन्तं च, 'सुप्तिङन्तं पद' मिति वचनात्, तत्र करोमि भयान्त ! सामायिकं, सर्वं सावद्यं योगं प्रत्याख्यामि यावज्जीवया त्रिविधं त्रिविधेन, मनसा वाचा कायेन न करोमि न कारयामि कुर्वन्तपप्यन्यं न समनुजाने, तस्य भयान्त ! प्रतिक्रमामि निन्दामि गर्हामि आत्मानं व्युत्सृजामीति पदानि । अधुना पदार्थः-स च चतुर्विधः, तद्यथा-कारकविषयः समासविषयस्तद्धितविषयो निरुक्तिविषयश्च, तत्र कारक-विषयः- पचतीति पाचकः, समासविषयः-राज्ञः पुरुषो राजपुरुष इति, तद्धितविषयः-वसुदेवस्यापत्यं वासुदेवः, निरुक्तिविषयः-भ्रमति चरौति च भ्रमरः, अत्रापि, 'डुकृञ् करण' इत्यस्य लट्प्रत्ययान्तस्य 'तनादिकृञ्भ्य उ रिति उत्त्वे गुणे रपरत्वे च कृते करोमीति भवति अभ्युपगमश्चास्यार्थः, रूवं प्रकृतिप्रत्ययविभागः सर्वत्र वक्तव्यः, इह तु ग्रन्थविस्तरभयान्नोक्त इति, भयं प्रतीतं, तथा वक्ष्यामश्चोपरिष्टादिति, अन्तो-विनाशः, भयस्यान्त इत्ययमेव पदविग्रहः, पदपृथक्करणं पदविग्रह इति, सामायिकपदार्थः पूर्ववत्, सर्वमित्यपरिशेषवाची शब्दः,

अवद्यं-पापं सहावद्येन सावद्यः-सपाप इत्यर्थः, युज्यत इति योगः-व्यापारस्तं, प्रत्याख्यामीति, प्रतिशब्दः प्रतिपेधे आङ् आभिमुख्ये ख्या प्रकथने, ततश्च प्रतीपमभिमुखं ख्यापनं सावद्ययोगस्य करोमि प्रत्याख्यामीति, अथवा प्रत्याचक्ष इति 'चक्षिङ् व्यक्तायां वाचि' 'स्य प्रत्याङ्पूर्वस्यायमर्थः प्रतिषेधस्यादरेणाभिधानं करोमि प्रत्याचक्षे, 'यावज्जीवये' त्यत्र यावच्छन्दः परिमाणमर्यादा-वधारणवचनः, तत्र परिमाणे यावत् मम जीवनपरिमाणं तावत् प्रत्याख्यामीति, मर्यादायां यावज्जीवनमिति, मरणमर्यादाया आरान्न मरणकालमात्र एवेति, अवधारणे यावजीवनमेव तावत् प्रत्याख्यामि, न तस्मात् परत इत्यर्थः, जीवनं जीवेत्ययं क्रियाशब्दः परिगृह्यते तया, अथवा प्रत्याख्यानक्रिया गृह्यते, यावज्जीवो यस्यां सा यावज्जीवा तया, 'त्रिविध' मिति तिस्त्रो विधा यस्य सावयोगस्य स त्रिविधः, स च प्रत्याख्येयत्वेन कर्म संपद्यते, कर्मणि च द्वितीया विभक्तिः, अतस्तं त्रिविधं योगं-मनोवाक्कायव्यापारलक्षणं, 'कायवाङ्मनः कर्मयोगः' इति वचनात्, त्रिविधेनेति करणे तृतीया, 'मनसा वाचा कायेन' तत्र 'मन ज्ञाने' मननं मन्यते वाऽनेनेति असुन् प्रत्यये मनः, तच्चतुर्द्धा-नामस्थापनाद्रव्यभावैः, द्रव्यमनस्तद्योग्यपुद्गलमयं, भावमनो मन्ता जीव एव, 'वच परिभाषणे' वचनम् उच्यते वाऽनयेति वाक्, साऽपि चतुर्विधैव नामादिभिः, तत्र द्रव्यवाक् शब्दपरिणामयोग्यपुद्गला जीवपरिगृहीता भाववाक् पुनस्त एव पुद्गलाः शब्दपरिणाममापन्नाः, 'चिञ् चयने' चयनं चीयते वाऽनेनेति "निवासचिति-शरीरोपसमाद्यानेष्वादेश्च कः" इति कायः, जीवस्य निवासात् पुद्गलानां चितेः पुद्गलानामेव केषाञ्चित् शरणात् तेषामेवावयवसमाधानात् कायः-शरीरं, सोऽपि चतुर्द्धा नामादिभिः, तत्र द्रव्यकायो ये शरीरत्वयोग्याः अगृहीतास्तत्स्वामिना च जीवेन ये मुक्ता यावत्तं परिणामं न मुञ्चन्ति तावद् द्रव्यकायः, भावकायस्तु तत्परिणामपरिणता जीवबद्धा जीवसम्प्रयुक्ताश्च, अनेन त्रिविधेन करणभूतेन, त्रिविधं पूर्वाधिकृतं सावद्यं योगं न करोमि न कारयामि कुर्वन्तमप्यन्यं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न समनुजानामि-नानुमन्येऽहमिति, तस्येत्यधिकृतो योगः संबध्यते, भयान्तं इति पूर्ववत्,
प्रतिक्रमामि-निवर्तेऽहमित्युक्तं भवति, निन्दामीति जुगुप्से इत्यर्थः, गर्हामीति च स एवार्थः, किन्त्वात्मसाक्षिकी निन्दा गुरुसाक्षिकी गर्हेति, किं जगुप्से ?-'आत्मानम्' अतीतसावद्ययोगकारिणं, 'व्युत्सृजामी'थि विविधार्थो विशेषार्थे वा विशब्दः उच्छब्दो भृगार्थः सृजामित्यजामीत्यर्थः, विविधं विशेषेण वा भृशं त्यजामि व्युत्सृजामि, एवं तावत्पदार्थपदविग्रहौ यथासम्भवमुक्तौ, अधुना चालनाप्रत्यवस्थाने वक्तव्ये, तदत्रान्तरे सूत्रस्पर्शनिर्युक्तिरुच्यते, स्वस्थानत्वात्, आह च निर्युक्तिकारः-

नि. (१०१५) अक्खलिअसंहिआई वक्खाणचउक्कए दरिसिअंमि ।
सुत्तप्फासिअनिज्जुत्तिवित्थरत्थो इमो होइ ॥

वृ- 'अक्खलिआइ'त्ति अस्खलितादौ सूत्र उच्चरिते, तथा संहितादौ व्याख्यानचतुष्टये दर्शिते सति, किं ?-सूत्रस्पर्शनिर्युक्तिविस्तरार्थः अयं भवतीति गाथार्थः ॥

नि. (१०१६)करणे १ भए अ २ अंते ३ सामाइअ ४ सव्वए अ ५ वज्जे अ ६ ।
जोगे ७ पच्चक्खाणे ८ जावज्जीवाइ ९ तिविहेणं १० ॥

वृ- करणं भयं च अन्तः सामायिकं सर्व च वर्जं च योगः प्रत्याख्यानं यावज्जीवया त्रिविधेनेति पदानि, पदार्थं तु भाष्यगाथाभिर्न्यक्षेण प्रतिपादयिष्यतीति गाथासमासार्थः ॥

साम्प्रतं करणनिक्षेपं प्रदर्शयन्नाह-

[भा.१५२]नामं १ ठवणा २ दविए ३ खित्ते ४ काले ५ तहेव भावे अ ६ ।
एसो खलु करणस्सा निक्खेवो छव्विहो होइ ॥

वृ- अक्षरगतं पदार्थमात्रमधिकृत्य निगदसिद्धा, साम्प्रतं द्रव्यकरणप्रतिपादनायाऽऽह-

[भा.१५३] जाणगभविअइरित्तं सन्ना नोसन्नओ भवे करणं ।
सन्ना कडकरणाई नोसन्ना वीससपओगे ॥

वृ- इह यथासम्भवं द्रव्यस्य द्रव्येण द्रव्ये वा करणं द्रव्यकरणं, तच्च नोआगमतो ज्ञभव्यातिरिक्तं संज्ञा नोसंज्ञातो भवेत् करणं, एतदुक्तं भवति-ज्ञशरीरभव्यशरीरव्यतिरिक्तं द्रव्यकरणं द्विधा-संज्ञाकरणं नोसंज्ञाकरणं च, तत्र संज्ञाकरणं कटकरणादि, आदिशब्दात् पेलुकरणादिपरिग्रहः, पेलुशब्देन रुतपूणिकोच्यते, अयमत्र भावार्थः-कटनिर्वर्तकमयोमयं चित्रसंस्थानं पाल्लकादि तथा रुतपूणिकानिर्वर्तकं शलाकाशल्यकाङ्गरुहादि संज्ञाद्रव्यकरणमन्वर्थोपपत्तेरिति, आह-इदं नामकरणमेव पर्यायमात्रतः संज्ञाकरणमिति न कश्चिद्विशेष इति, उच्यते, इह नामकरणमभिधानमात्रं गृह्यते, संज्ञाकरणं त्वन्वर्थतः संज्ञायाः करणं २, द्रव्यस्य संज्ञया निर्दिश्यमानत्वात्, तथा च भाष्यकारेणाप्येतदेवाभ्यधायि-

"सन्ना नामंति मई तं नो नामं जमभिधाणं ॥१॥
जं वा तदत्थविकले कीरइ दव्वं तु दवणपरिणामं ।
पेलुक्करणाइ न हि तं तयस्थसुण्णं न वा सद्दो ॥२॥
जइ न तदत्थविहीणं तो किं दव्वकरणं ? जओ तेणं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दव्वं कीरइ सण्णाकरणंति य करणरूढिओ ॥३॥"

'नोसंज्ञे' ति नोसंज्ञाद्रव्यकरणं, तच्च द्विधा-प्रयोगतो विश्रसातश्च, अत एवाह-वीससपओगेत्ति गाथार्थः ॥ तत्र विश्रसाकरणं द्विप्रकारं-साधनादिभेदात्, अत एवाह ग्रन्थकारः-

[भा.१५४] वीससकरणमणाईं धम्माईण परपच्चयाजो(यज्जो) गा।
साईं चक्खुप्फासिअमब्भाइममचक्खुमनुमाई ॥

वृ- विश्रसा स्वभावो भण्यते तेन करणं विश्रसाकरणम्, इह च 'कृत्यलुटो बहुल' मिति वचनात् करणादिषु यथाप्रयोगमनुरूपार्थः करणशब्दोऽवसेय इति, 'अनादि' आदिरहितं 'धर्मादीना' मिति धर्माधर्माका-शास्तिकायानामन्योऽन्यसमाधानं करणमिति गम्यते, आह-करणशब्दस्तावदपूर्वप्रादुर्भावे वर्तते, ततश्च करणं चानादि चेति विरुद्धम्, उच्यते, नावश्यम-पूर्वप्रादुर्भाव एव, किं तर्हि ?, अन्योऽन्यसमाधानेऽपीति न दोषः, अथवा 'परप्रत्यययोगा'दिति परवस्तुप्रत्ययभावाद्धर्मास्तिकायादीनां तथा तथा योग्यताकरणमिति, एवमप्यनादित्वां विरुध्यत इति चेत्, न, गा'दिति परवस्तुप्रत्ययभावाद्धर्मास्तिकायादीनां तथा तथा योग्यताकरणामिति, एवमप्यनादित्वं विरुध्यत इति चेत्, न, अनन्तशक्तिप्रचितद्रव्यपर्यायोभयरूपत्वे सति वस्तुनो द्रव्यादेशेनाविरोधादित्यत्र बहु वक्तव्यं तत्तु नोच्यते, गमनिकामात्रत्वात् प्रारम्भस्येति, अथवा परप्रत्ययोगात् तत्तत्पर्यायभवनं साद्येव करणं, देवदत्तादिसंयोगाद्धर्मादीनां विशिष्ट पर्याय इत्यर्थः, एवमरूपिद्रव्याण्यधिकृत्योक्तं साद्यमनाद्यं च विश्रसाकरणम्, अधुना रूपिद्रव्याण्य-धिकृत्य साद्येव चाक्षुषेतरभेदमाह-सादि चक्षुःस्पर्श चाक्षुषमित्यर्थः, अभ्रादि, आदिशब्दात् शक्रचापादिपरिग्रहः, 'अचक्खु'त्ति अचाक्षुषमण्वादि, आदिशब्दात् द्व्यणुकादिपरिग्रहः, करणता चेह कृतिः करणमितिकृत्वा, अन्यथा वा स्वयं वुद्ध्या योजनीयेति गाथार्थः ॥ चाक्षुषा-चाक्षुषभेदमेव विशेषेण प्रतिपादयन्नाह-

[भा.१५५] संघायभेअतदुभयकरणं इंदाउहाइ पच्चक्खं ।
दुअअनुमाईणं पुण छउमत्थाईणऽपच्चक्खं ॥

वृ- सङ्घातभेदतदुभयैः करणं संघातभेदतदुभयकरणम् इन्द्रायुधादिस्थूलमनन्तपुद्गलात्मकं प्रत्यक्षं, चाक्षुषमित्यर्थः, द्व्यणुकादीनाम्, आदिशब्दात्तथाविधानन्ताणुकान्तानां पुनः करणमिति वर्तते, किं ?, छद्मस्थादीनाम् ? आदिशब्दः स्वगतानेकभेदप्रतिपादनार्थ इति, अप्रत्यक्षम्-अचाक्षुषमिति गाथार्थः ॥ उक्तं विश्रसाकरणम्, अधुना प्रयोगकरणं प्रतिपादयन्नाह-

[भा.१५६] जीवमजीवे पाओगिअं च चरमं कुसुंभरागाई ।
जीवप्पओगकरणं मूले तह उत्तरगुणे अ ॥

वृ- इह प्रायोगिकं द्वेधा-जीवप्रायोगिकजीवप्रयोगिकं च, प्रयोगेन निर्वृत्तं प्रायोगिकं, चरमम्-अजीवप्रयोगकरणं कुसुम्भरागादि, आदिशब्दाच्छेषवर्णादिपरिग्रहः ॥ एवं तावदल्पवक्त-व्यत्वादभिहितमोघतोऽजीवप्रयोगकरणमिति, अधुना जीवप्रयोगकरणमाह-जीवप्रयोगकरणं द्विप्रकारं-'मूल' इति मूलगुणकरणं, तथा 'उत्तरगुणे (ति) च' उत्तरगुणकरणं चेति गाथासमासार्थः। व्यासार्थं तु ग्रन्थकार एव वक्ष्यति, तत्राल्पवक्तव्यत्वादेवाजीवप्रयोगकरणमादावेवाभिधित्सुराह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१५७] जं जं निज्जीवाणं कीरइ जीवप्पओगओ तं तं ।
वन्नाइ रूवकम्माइ वावि अज्जीवकरणं तु ॥

वृ- यद् यन्निर्जीवानां पदार्थानां क्रियते-निर्वर्त्यते 'जीवप्रयोगतो' जीवप्रयोगेण तत्तद्वर्णादि कुसुम्भादेः रूपकर्मादि वा कुट्टिमादौ अजीवविषयत्वात्तदजीवकरणमिति गाथार्थः ॥

[भा.१५८] जीवहुप्पओगकरणं दुविहं भूलप्पओगकरणं च ।
उत्तरपओगकरणं पंच सरीराइं पढमंमि ॥

वृ- जीवप्रयोगकरणं 'द्विविधं' द्विप्रकारं-मूलप्रयोगकरणमुत्तरप्रयोगकरणं च, चशब्दस्य व्यवहित उपन्यासः, पञ्च शरीराणि 'प्रथमं' मूलप्रयोगकरणमिति गाथार्थः ॥

[भा.१५९] ओरालियाइआइं ओहेणिअरं पओगओ जमिह ।
निप्फन्ना निप्फज्जइ आइल्लाणं च तं तिण्हं ॥

वृ- औदारिकादीनि, आदिशब्दाद्वैक्रियाहारकतैजसकार्मणशरीरपरिग्रहः, 'ओघेन' इति सामान्येन, 'इतरत्' उत्तरप्रयोगकरणं गृह्यते, तल्लक्षणं चेदं-'प्रयोगतः' प्रयोगेणैव यद् 'इह' लोके निष्पन्नाः, मूलप्रयोगेण निष्पद्यत इति 'तद्' उत्तरकरणं, आद्यानां च तत् त्रयाणाम्, एतदुक्तं भवति-पञ्चानामौदारिकादिशरीराणामाद्यं सङ्घातकरणं मूलप्रयोगकरणमुच्यते, अङ्गोपाङ्गादिकरणं तूत्तरकरणमौदारिकादीनां त्रयाणां, न तु तैजसकार्मणयोः, तदसम्भवादिति गाथार्थः ॥ तत्रौदारिकादीनामष्टाङ्गानि मूलकरणानि, तानि चामूनि–

[भा.१६०]सीस १ सुरो २ अर ३ पिट्ठी ४ दो बाहू ६ ऊरुआ य ८ अट्ठंगा ।
अंगुलिमाइ उवंगा अंगोवंगाणि सेसाणि ॥

वृ- निगदसिद्धा, नवरमङ्गोपाङ्गानि 'शेषाणि' करपादादीनि गृह्यन्ते ॥ किञ्च–

[भा.१६१] केसाईउवरयणं उरालविउव्वि उत्तरं करणं ।
ओरालिए विसेसो कन्नाइविनट्ठसंठवणं ॥

वृ- 'केशाद्युपरचनं' केशादिनिर्माणसंस्कारौ, आदिशब्दान्नखदन्ततद्रागादिपरिग्रहः औदारिकवैक्रिययोरुत्तरकरणं, यथासम्भवं चे योजना कार्येति, तथौदारिके विशेष उत्तरकरणे इति, कर्णादिविनष्टसंस्थापनं, नेदं वैक्रियादौ, विनाशाभावाद्, विनष्टस्य च सर्वथा विनाशेन संस्थापनाभावादिति गाथार्थः ॥ इत्थंभूतमुत्तरकरणमाहारके नास्ति, गमनागमनादि तु भवति, अथवेदमन्याद्दक् त्रिविधं करणं, तद्यथा-सङ्घातकरणं परिशाटकरणं सङ्घातपरिशाटिकरणं च, तत्राऽऽद्यानां शरीराणां तैजसकार्मणरहितानां त्रिविधमप्यस्ति, द्वयोस्तु चरमद्वयमेवेति, आह च–

[भा.१६२] आइल्लाणं तिण्हं संघाओ साडणं तदुभयं च ।
तेआकम्मे संघायसाडणं साडणं वावि ॥

वृ- वस्तुतो व्याख्यातैवेति न व्याख्यायते ॥ साम्प्रतमौदारिकमधिकृत्य सङ्घातादिकालमानमभिधित्सुराह–

[भा.१६३] संघायमेगसमयं तहेव परिसाडणं उरालंमि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संघायणपरिसाडण खुड्डागभवं तिसमऊणं ॥

वृ- 'सङ्घातम्' इति सर्वसङ्घातकरणमेकसमयं भवति, एकान्तादानस्यैकसामयिकत्वात्, घृतपूपदृष्टान्तोऽत्र, यथा-घृतपूर्णप्रतप्तायां तापिकायां सम्पानकपक्षेपात् स पूपः प्रथमसमय एवैकान्तेन स्नेहपुद्गलानां ग्रहणमेव करोति, न त्यागम्, अभावाद्, द्वितीयादिषु तु ग्रहणमोक्षौ, तथाविधसामर्थ्ययुक्तत्वात्; पुद्गलानां च सङ्घातभेदधर्मत्वात्, एवं जीवोऽपि तत्प्रथमतयोत्पद्यमानः सन्नाद्यसमये औदारिकशरीरप्रयोग्याणां द्रव्याणां ग्रहणमेव करोति, न तु मुञ्चति, अभावाद्, द्वितीयादिषु तु ग्रहणमोक्षौ, युक्तिः पूर्ववत्, अतः सङ्घातमेकसमयमिति स्थितं, तथैव 'परिशाटन' मिति परिशाटनाकरणमेकसमयमिति वर्तते, सर्वपरिशाटस्याप्येकसामयिकत्वादेवेति, 'औदारिक' इत्यौदारिकशरीरे 'संघायणपरिसाडण'त्ति सङ्घातनपरिशाटनकरणं तु क्षुल्लकभवग्रहणं त्रिसमयोनं, तत् पुनरेवं भावनीयं-जघन्यकालस्र प्रतिपादयितुमभिप्रेतत्वात् विग्रहेणोत्पाद्यते, ततश्च द्वौ विग्रहसमयावेकः सङ्घातसमय इति, तैर्न्यूनं, तथा चोक्तम्–

'दो विग्गहंमि समया समयो संघायणाए तेहूणं ।
खुड्डागभवग्गहणं सव्वजहन्नो ठिई कालो ॥१॥'

इह च सर्वजघन्यमायुष्कं क्षुल्लकभवग्रहणं प्राणापानकालस्यैकस्य सप्तदशभाग इति, उक्तं च भाष्यकारेण-खुड्डागभवग्गहणा सत्तरस हवंति आणपाणूंमि'त्ति गाथार्थः ॥

[भा.१६४] एयं जहन्नमुक्कोसयं तु पलिअत्तिमं तु समऊणं ।
विरहो अंतरकालो ओराले तस्सिमो होइ ॥

वृ- इदं जघन्यं सङ्घातादिकालमानम् उत्कष्टं तु सङ्घातपरिशाटकरणकालम्: नमौदारिकमाश्रित्य पल्योपमत्रितयमेव समयोनम्, इयमत्र भावना-इहोत्कृष्टकालस्य प्रतिपाद्यत्वादयमविग्रहसमापन्नः इह भवात् परभवं गच्छन्निहभवशरीरशाटं कृत्वा परभवायुषस्त्रिपल्योपमकालस्य प्रथमसमये शरीरसङ्घातं करोति, ततो द्वितीयसमयादारभ्य सङ्घातपरिशाटोभयकाल इति, तेन सङ्घातनासमयेन ऊनं पल्योपमत्रयमिति, उक्तं च–

"उक्कोसो समऊणो जो सो संघातणासमयहीणो ।
चोयग-किह न दुसमयविहूणो साडणसमएऽवणीयंमि ? ॥१॥
भण्णइ भवचरिमंमिवि समये संघातसाडणा चेव ।
परभवपढमे साडणमओ तदूणो न कालोत्ति ॥२॥
चो०-जइ परपढमे साडो निव्विग्गहदो य तंमि संघातो ।
ननु सव्वसाडसंघातणाओ समए विरुद्धाओ ॥३॥
आ०-जम्हा विगच्छमाणं विगयं उप्पज्जमाणमुप्पन्न ।
तो परभवाइसमए मोक्खादानानमविरोहो ॥४॥
चुइसमए णेहभवो इहदेहविमोक्खओ जहातीए ।
जइ परभवोवि न तहिं तो सो को होउ संसारी ? ॥५॥
ननु जह विग्गहकाले देहाभावेऽवि परभवग्गहणं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तह देहाभावंमिवि होज्जेहभवोऽपि को दोसो ? ।।६।।
आ०-जं चिय विग्गहकालो देहाभावेवि तो परभवो सो ।
चउसमएऽवि न देहो न विग्गहो जइ स का होइ ? ।।७।।"

एवमौदारिके जघन्यतभेरदः सङ्घातपरिशाटकाल उक्तः । सङ्घातपरिशाटयोस्त्वेक एव (समयः), द्वितीयस्यासम्भवाद्; अधुना सङ्घातादिविरहो जघन्येतरभेदोऽभिधीयते, तथा चाऽऽह-विरहः कः ?, उच्यते, अन्तरकालः, औदारिके तस्य सङ्घातादेरयं भवतीति गाथार्थः ।।

[भा.१६५] तिसमयहीनं खुड्डं होइ भवं सव्वबंधसाडाणं ।
उक्कोस पुव्वकोडी समओ उअही अ तित्तीस ।।

वृ- त्रिसमयहीनं क्षुल्लं भवति, 'भवम्' इति भवग्रहणं, सर्वबन्धशाटयोरन्तरकाल इति, तत्र त्रिसमयहीनं सर्वबन्धस्य क्षुल्लं तु सम्पूर्ण सर्वशाटस्येति, उत्कृष्टः पूर्वकोटिसमयः, तथा 'उदधीनि च (धयश्च)' सागरोपमाणि च त्रयस्त्रिशत् सर्वबन्धस्य, समयोनस्त्वयमेव शाटस्येति गाथाक्षरार्थः ।। भावार्थस्तु भाष्यगाथाभ्योऽवसेयस्ताश्चेमाः-

"संघायंतरकालो जहन्नओ खुड्डयं तिसमऊणं ।
दो विग्गहंमि समया तइओ सणघायणासमओ ।।१।।
तेहूणं खुड्डभवं धरिउं परभवम विग्गहेणेव ।
गंतूण पढमसमए संघाययओ अ विन्नेओ ।।२।।
उक्कोसं तेत्तीसं समयाहियपुव्वोडिअहिआइं ।
सो सागरोवमाइं अविग्गहेणेह संघायं ।.३।।
काऊण पुव्वकोडिं धरिउं सुरजेट्ठमाउयं तत्तो ।
भोत्तूण इहं तइए समए संघाययंतस्स ।।४।।'

इदं पुनः सर्वशाटान्तरं जघन्यं क्षुल्लकभवमानं, कथम् ?, इहानन्तरातीतभवचरमसमये कश्चिदौदारिकशरीरी सर्वशाटं कृत्वा वनस्पतिष्वागत्य सर्वजघन्यं क्षुल्लकभवग्रहणायुष्कमनुपाल्य पर्यन्ते सर्वशाटं करोति, ततश्च क्षुल्लकभवग्रहणमेव भवति, उत्कृष्टं तु त्रयहिंस्त्रशत् सारगोपमाणे पूर्वकोट्याऽधिकानि, कथम् ?, इह कश्चित् संयतमनुष्य औदारिकसर्वशाटं कृत्वाऽनुत्तरसुरेषु त्रयस्त्रिशत् सागरोपमाण्यतिवाह्य पुनर्मनुष्येष्वौदारिकसर्वसङ्घातं कृत्वा पूर्ल्कोट्यन्ते औदारिक-सर्वशाटं करोतीति, उक्तं च भाष्यकारेण-

"खुड्डागभवग्गहणं जहन्नमुक्कोसयं च तित्तीसं ।
तं सागरोवमाइं संपुन्ना पुव्वकोडी उ ।।१।।"

गुरवस्तु व्याचक्षते-तदारम्भसमयस्य पूर्वभवशाटेनावरुद्धत्वात् समयहीनं क्षुल्लकभवग्रहणं जघन्यं शाटान्तरमिति, तथ च किलैवमक्षराणि नीयन्ते-त्रिसमयहीनं क्षुल्लकमित्येतदपि न्याय्यमेवास्माकं प्रतिभाति, किन्त्वतिगम्भीरधिया भाष्यकृता सह विरुध्यत इति गाथार्थः ।।

इदानीं सङ्घातपरिशाटान्तरमुभयरूपमप्यभिधित्सुराह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१६६] अंतरमेगं समयं जहन्नमोरालगहणसाडस्स ।
सतिसमया उक्कोसं तित्तीसं सागरा हुंति ॥

वृ- 'अन्तरम्' अन्तरालम्, एकं समयं 'जघन्यं' सर्वस्तोकम् औदारिकग्रहणशाटयोरिति, सत्रिसमयान्युत्कृष्टं त्रयस्त्रिंशत् सागरोपमाणि भवन्तीति गाथाक्षरार्थः ॥

भावार्थस्तु भाष्यगाथा-भ्यामवसेयः, ते चेमे –

"उभयंतरं जहन्नं समओ निव्विग्गहेण संघाए ।
परमं सतिसमयाइं तित्तीसं उदहिनामाइं ॥१॥
अनुभविउं देवाइसु तेत्तीसमिहागयस्स तइयंमी ।
समए संघायतओ नेयाइं समयकुसलेहिं ॥२॥"

उक्तौदारिकमधिकृत्य सर्वङ्घातादिवक्तव्यता, साम्प्रतं वैक्रियमधिकृत्योच्यते, तत्रेयं गाथा–

[भा.१६७] वेउव्विअसंघाओ जहन्नु समओ उ दुसमउक्कोसो ।
साडो पुण समयं चिअ विउव्वणाए विनिद्दिट्ठो ॥

वृ- अस्य व्याख्या-वैक्रियसङ्घातः कालतो 'जघन्यः' सर्वस्तोकः समय एव, तुशब्दस्यैवकारार्थत्वेनावधारणार्थत्वाद्, अयं चौदारिकशरीरिणां वैक्रियलब्धिमतां विकुर्वणारम्भे देवानारकाणां च तत्प्रथमतया शरीरग्रहण इति, तथा 'द्विसमय' इति द्विसमयमान उत्कृष्टः वैक्रियसङ्घात इति वर्तते कालश्चेति गम्यते, स पुनरौदारिकशरीरिणो वैक्रियलब्धिमतस्तद्वि-कुर्वाणारम्भ एव वैक्रियसङ्घातं समयेन कृत्वाऽऽयुष्कक्षयात् मृतस्याविग्रहगत्या देवेषूपपद्यमानस्य वैक्रियमेव सङ्घातयतोऽवसेय इति भावना, शाटः पुनः समयमेव कालतः 'विकुर्वयाणां' वैक्रियशरीरविषयो विनिर्दिष्ट इति गाथाक्षरार्थः ॥ अधुना सङ्घातपरिशाटकालमानमभिधित्सुराह–

[भा.१६८] संघायणपरिसाडो जहन्नओ एगसमइओ होइ ।
उक्कोसं तित्तीसं सायरणामाइं समऊणा ॥

वृ- इह वैक्रियस्यैव सङ्घातपरिशाटः खलूभयरूपः कालतो जघन्य एकसामयिको भवति, उत्कृष्टस्त्रयस्त्रिंशत् सागरोपमाणि सागरनामानि समयोनानीति गाथाक्षरार्थः ॥ भावार्थस्त्वयम्–

उभयं जहन्न समओ सो पुण दुसमयविउव्वियमयस्स ।
परमतराइं संघातसमयहीणाइं तेत्तीसं ॥१॥'

इदानीं वैक्रियमेवाधिकृत्य सङ्घाताद्यन्तरमभिधित्सुराह–

[भा.१६९] सव्वग्गहोभयाणं साडस्स य अंतरं विउव्विस्स ।
समओ अंतमुहुत्तं उक्कोसं रुक्खकालीअं ॥

वृ- इह 'सर्वग्रहोभययोः' सङ्घातसंघातपरिशाटयोरित्यर्थः, शाटस्य च 'अन्तरं' विरहकालः 'वैक्रियस्य' वैक्रियशरीरसम्बन्धिनः समयः सङ्घातस्योभयस्य च, अन्तर्मुहूर्त शाटस्य, इदं तावज्जघन्यं त्रयाणामपि कथं ज्ञायत इति चेत् ? यत आह–उत्कृष्टं 'वृक्षकालिकं' वृक्षकालेनानन्तेन निर्वृत्तं वृक्षकालिकमिति गाथाक्षरार्थः ॥ भावार्थस्त्वयं–

'संघातंतर समयो दुसमयविउव्वियमयस्स तइयंमि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सो दिवि संघातयतो तइए व मयस्स तइयंमि ॥१॥'

अविग्रहेण सङ्घातयतः द्वितीय-सङ्घातपरिशाटस्य समय एवान्तरमिति,

'उभयस्स चिरविउव्वियमयस्स देवे सविग्गह गयस्स ।
साडस्संतोमुहुत्तं तिण्हवि तरुकालमुक्कोसं ॥१॥'

उक्ता वैक्रियशरीरमधिकृत्य सङ्घातादिवक्तव्यता, साम्प्रतमाहारकमधिकृत्यैनां प्रतिपादयन्नाह–

[भा.१७०] आहारे संघाओ परिसाडो असमयं समं होइ ।
उभयं जहन्नमुक्कोसयं च अंतोमुहुत्तं तु ॥

वृ- 'आहार' इत्याहारकशरीरे सङ्घातः- प्राथमिको ग्रहः परिशाटश्च-पर्यन्ते मोक्षश्च, कालतः 'समयं' कालविशेषं 'समं' तुल्यं भवति, सङ्घातोऽपि समयं शाटोऽपि समयमित्यर्थः, 'उभयं' सङ्घातपरिशाटोभयं गृह्यते, तज्जघन्यत् उत्कृष्टतश्चान्तर्मुहूर्तमेव भवतीति वर्तते, अन्तर्मुहूर्तमात्रकालावस्थायित्वादस्येति गर्भार्थः, उत्कृष्टात्तु जघन्यो लघुतरो वेदितव्य इति गाथार्थः ॥

साम्प्रतमाहारकमेवाधिकृत्य सङ्घातताद्यन्तरमभिधातुकाम आह–

[भा.१७१] बंधनसाडुभयाणं जहन्नमंतोमुहुत्तमंतरणं ।
उक्कोसेण अवड्ढं पुग्गलपरिअट्टदेसूनं ॥

वृ- बन्धनं-सङ्घातः शाटः-शाट एव उभयं सङ्घातशाटौ अमीषां बन्धनशाटोभयानां 'जघन्यं' सर्वस्तोकम् 'अन्तर्मुहूर्तमन्तरणम्' अन्तर्मुहूर्तविरहकालः, सकृत्परित्यागानन्तरमन्तर्मुहूर्तेनैव तदारम्भादिति भावना, उत्कर्षः अर्द्धपुद्गलपरावर्तो देशोनोऽन्तरमिति, सम्यग्दृष्टिकालस्योत्कृष्टस्याप्येतावत्परिमाणत्वादिति गाथार्थः ॥ उक्ताऽऽहारकशरीरमधिकृत्य सङ्घातादिवक्तव्यता, इदानीं तैजसकार्मणे अधिकृताऽऽह–

[भा.१७२] तेआकम्माणं पुण संताणाणाइओ न संघाओ ।
भव्वाण हुज्ज साडो सेलेसीचरमसमयंमि ॥

वृ- तैजसकार्मणयोः पुनर्द्वयोः शरीरयोः सन्तानानादितः कारणात्, किं ?, न सङ्घातः-न तत्प्रथमतया ग्रहणं, प्रागेव सिद्धिप्रसङ्गात्, भव्यानां भवेत् शाटः केषाञ्चित्, कदेति ?, अत आह–शैलेशीचरसमये, स चैकसामायिक एवेति गाथार्थः ॥

[भा.१७३] उभयं अनाइनिहणं संतं भव्वाण हुज्ज केसिंचि ।
अंतरमनाइभावा अच्चंतविओगओ नेसिं ॥

वृ- 'उभयम्' इति सङ्घातपरिशाटोभयं प्रवाहमङ्गीकृत्य सामान्येन 'अनाद्यनिधनम्' अनाद्यपर्यवसितमित्यर्थः, 'सान्तं' सपर्यवसानमुभयं भव्यानां भवेत् केषाञ्चित्, न तु सर्वेषामिति, अन्तरमनादिभावादत्यन्तवियोगतश्च नानयोरिति गाथार्थः ॥ अथवेदमन्यज्जीवप्रयोगनिर्वृत्तं चतुर्विधं करणमिति, आह च–

[भा.१७४]अहवा संघाओ ? साडणं च२उभयं ३ तहो भयनिसेहो ४ ।
पड १ संख २ सगड २ थूणा ४ जीवपओगे जहासंखं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अथवाशब्दः प्रकारान्तरप्रदर्शनार्थः, 'सङ्घात' इति सङ्घातकरणं, 'सातनं च' शातनकरणं च 'उभयं' सङ्घातशातनकरणं 'तथोभयनिषेध' इति सङ्घातपरिशाटशून्यम् । अमीषामेवोदाहरणानि दर्शयन्नाह–पटः शङ्खः शकटं स्थूणा, 'जीवप्रयोग' इति जीवप्रयोगकरणे तत्कायव्यापारमाश्रित्य यथासङ्ख्यमेतान्युदाहरणानि समवसेयानि, तथाहि-पटस्तन्तु-सङ्घातात्मकत्वात् सङ्घातकरणं शङ्खस्त्वेकान्तसाटकरणादेव शाटकरणं शकटं तक्षणकीलिकादियोगादुभयकरणं स्थूणा पुनरुर्ध्वतिर्यक्करणयोगात् संघातशाटविरहादुभयशून्या इति गाथार्थः ॥ उक्तं जीवप्रयोगकरणम्, आह–'जं जं निज्जीवाणं कीरइ जीवप्पओगओ तं तं' इत्यादिनाऽस्याजीवकरणतैव युक्तियुक्तेति, अत्रोच्यते, न, अभिप्रायापरिज्ञानाद्, इहादावेवाथवा-शब्दप्रयोगतः प्रकारान्तरमात्रप्रदर्शनार्थमेत दुक्तं, ततश्चात्र व्युत्पत्तिभेदमात्रमाश्रीयते, जीवप्रयोगात् करण जीवप्रयोगकरणमिति, ज्यायांश्चान्वर्थ इत्यलं प्रसङ्गेन ॥

उक्तं द्रव्यकरणं, साम्प्रतं क्षेत्रकरण-स्यावसरः, तत्रेयं निर्युक्तिगाथा–

नि. (१०१७) खित्तस्स नत्थि करणं आगासं जं अकित्तिमो भावो ।
वंजणपरिआवन्नं तहावि पुण उच्छुकरणाई ॥

वृ- अस्या व्याख्या–इह 'क्षेत्रस्य' नभसः 'नास्ति करणं' निर्वृत्तिकारणाभावान्न विद्यते करणं मुख्यवृत्त्या 'आकाशं' क्षेत्रं 'यद्' यस्मात् 'अकृत्रिमो भावः' अकृतकः पदार्थः, अकृतकस्य च सतो नित्यत्वात् करणानुपपत्तिरिति भावः । आह–यद्येवं किमिति निर्युक्तिकारेण निक्षपगाथयामुपन्यस्तमिति ?, अत्रोच्यते, व्यञ्जनपर्यायापन्नं तथापि पुनरिक्षुकरणाद्यस्त्येवेति, इह व्यञ्जनशब्देन क्षेत्राभिव्यञ्जकत्वात् पुद्गलाः गृह्यन्ते, तत्सम्बन्धात् पर्यायः कथञ्चित् प्रागवस्थापरित्यागेनावस्थान्तरापत्तिरित्यर्थः, तमापन्नं पुनस्तथाऽपि यदा विवक्ष्यते तदा पर्यायो द्रव्यादनन्य इति पर्यायद्वारेण क्षेत्रकरण मस्तीति सभावार्थऽक्षरगमनिका ॥ उपचार-मात्रद्वेक्षुकरणादि, यथेक्षुक्षेत्रकरणं शालिक्षेत्रकरणम्, अथवाऽऽदिशब्दाद् यत्र प्ररूप्यते क्रियते वेति गाथार्थः ॥

उक्तं क्षेत्रकरणम्, इदानीं कालकरणस्यावसरः, तत्रेयं गाथा–

नि. (१०१८) कालेवि नत्थि करणं तहावि पुण वंजणप्पमाणेणं ।
बवबालवाइकरणेहिंऽनेगहा होइ ववहारो ॥

वृ- अस्या व्याख्या-कलनं कालः कलासमूहो वा कालस्तस्मिन् कालेऽपि, न केवलं क्षेत्रस्य, किं ?, नास्ति करणं-न विद्यते कृतिः, कुतः ?-तस्य वर्तनादिरूपत्वाद्, वर्तनादीनां च स्वयमेव भावात्, समयाद्यपेक्षायां च परोपादानत्वादिति भावना, आह–यद्येवं किमिति निर्युक्तिकृतोपन्यस्तमिति ?, अत्रोच्यते, तथाऽपि पुनर्व्यञ्जनप्रमाणेन भवतीति शेषः, इह व्यञ्जनशब्देन विवक्षया वर्तनाद्यभिव्यञ्जकत्वाद् द्रव्याणि गृह्यन्ते, तत्प्रमाणेन-तन्नीत्या तद्बलेन भवतीति, तथाहिवर्तनादयस्तद्वतां कथञ्चिदभिन्ना एव, ततश्च तद्वतां करणे तेषामपि करणमेवेति भावना, समयादिकालापेक्षायामपि व्यवहारनयादस्ति कालकरणमिति, आह च-बवबालवादिकरणैरनेकधा भवति व्यवहार इति, अत्रादिशब्दात् कौलवादीनि गृह्यन्ते, उक्तं च–

'बवं च बालवं चेव, कोलवं थीविलोयणं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गराइ वणियं चेव, विट्ठी भवइ सत्तमा ॥१॥

एयाणि सत्त करणाणि चलाणि वट्टंति, अवराणि सउणिमाईणि चत्तारि थिराणि, उक्तं च–

सउणि चउप्पय णागं किंछुग्घं च करणं थिरं चउहा।
बहुलचउद्दसिरत्ती सउणी सेसं तियं कमसो ॥१॥

एस एत्थ भावणा-बहुलचउद्दसिराईए सउणी हवति, सेसं तियं चउप्पयाई करणं अमावासाए दिया राओ य तो पडिवयदियाय, तओ सुद्धपडिवयणिसादौ ववाईणि हवंति, एएसिं च परिजाणणोवाओ।

पक्खतिहओ दुगुणिया दुरूवहीणा य सुक्कपक्खंमि।
सत्तहिए देवसियं तं चिय रूवाधियं रत्तिं ॥१॥

एसेत्थ भावणा-अहिगयदिणंमि करणजाणणत्थं पक्खतिहिओ दुगुणियत्ति-अहिगयतिहिं पडुच्च अइगआ दुगुणा कज्जंति, जहा सुद्धचउत्थीए दुगुणा अट्ठ हवंति 'दुरूवहीण' त्ति तओ दोन्नि रूवाणि पाडिज्जंति, सेसाणि छ सत्तहिं भागे देवसियं करणं भवइ, एत्थ य भागाभावा छच्चेव, तओ ब्वाइकमेण चादुप्पहरिगकरणभोगेणं चउत्थीए दिवसओ वणियं हवइ, 'तं चिय रूवाहियं रत्तिं'ति रत्तीए विट्ठी, कण्हपक्खे पुणो दो रूवा न पाडिज्जंति, एवं सव्वत्थ भावना कायव्वा, भणियं च–

'किण्हनिसि तइय दसमी सत्तमी चाउद्दसीय अह विट्ठी।
सुक्कचउत्थेकारसि निसि अट्ठमि पुन्निमा य दिवा ॥१॥
सुद्धस्स पडिवयनिसि पंचमिदिण अट्ठमीए रत्तिं तु।
दिवसस्स बारसी पुन्निमा रत्तिं बवं होइ ॥२॥
बहुलस्स चउत्थीए दिवया य तह सत्तमीइ रत्तिंमि।
एक्कारसीय उ दिवा बवकरणं होइ नायव्वं ॥३॥

इत्यलं प्रसङ्गेनेति गाथार्थः ॥ उक्तं कालकरणम्, अधुना भावकरणमभिधीयते, तत्र भावः पर्याय उच्यते, तस्य च जीवाजीवोपाधिभेदेन द्विभेदत्वात् तत्करणमप्योघतो द्विविधमेवेति, अत आह–

नि. (१०१९) जीवमजीवे भावे अजीवकरणं तु तत्थ वन्नाई।
जीवकरणं तु दुविहं सुअकरणं नो अ सुअकरणं ॥

वृ- इहानुस्वारस्यालाक्षणिकत्वाज्जीवाजीवयोः सम्बन्धि 'भाव' इति भावविषयं करणमवसेयमिति, अल्पवक्तव्यत्वादजीवभावकरणमेवादावुपदर्शयति-'अजीवकरणं तु' तुशब्दस्य विशेषणार्थत्वादजीवभावकरणं परिगृह्यते, 'तत्र' तयोर्मध्ये वर्णादि, इह परप्रयोगमन्तरेणाभ्रादेर्नानावर्णान्तरगमनं तदजीवभावकरणम्, आदिशब्दाद् गन्धादिपरिग्रहः, तत्राऽऽह-ननु च द्रव्यकरणमपि विश्रसाविषयमित्थंप्रकारमेवोक्तं, को न्वत्र भावकरणे विशेष इति ?, उच्यते, इह भावाधिकारात् पर्यायप्राधन्यमाश्रीयते तत्र तु द्रव्यप्राधन्यमिति विशेषः, जीवकरणं तु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनः 'द्विविधं' द्विप्रकारं-श्रुतकरणं नाश्रुतकरणं च, श्रुतकरणमिति श्रुतस्य जीवभावत्वाच्छ्रुतभावकरणं, नाश्रुतभावकरणं च गुणकरणादि, चशब्दस्य व्यवहितः सम्बन्ध इति गाथार्थः ॥ साम्प्रतं जीवभावकरणेनाधिकार इति तदेव यथोद्दिष्टं तथैव भेदतः प्रतिपिपादयिषुराह–

नि. (१०२०) बद्धमबद्धं तु सुअं बद्धं तु दुवालसंग निद्दिट्ठं ।
तव्विवरीअमबद्धं निसीहमनिसीह बद्धं तु ॥

वृ- इह बद्धमबद्धं तु श्रुतं, तुशब्दो विशेषणार्थः, किं विशिनष्टि ?-लौकिकलोकोत्तरभेदमिदमेवमिति, तत्र पद्यगद्यबन्धनाद् बद्धं शास्त्रोपदेशवत्; अत एवाह–वद्धं तु द्वादशाङ्गम्-आचारादि गणिपिटकं निर्दिष्टं, तुशब्दस्य विशेषर्णार्थत्वाल्लोकोत्तरमिदं, लौकिकं तु भारतादि विज्ञेयमिति, तद्विपरीतमबद्धम् लौकिकलोकोत्तरभेदमेवावसेयमिति, निषीथमुच्यते, प्रकाशपाठात् प्रकाशेपदेशत्वाच्चानिषीथमिति गाथार्थः ॥ साम्प्रतमनिषीथनिषीथयोरेव स्वरूपप्रतिपादनायाह–

नि. (१०२१) भूआपरिणयविगए सद्दकरणं तहेव न निसीहं ।
पच्छन्नं तु निसीहं निसीहनामं जहऽज्झयणं ॥

वृ- भूतम्-उत्पन्नम् अपरिणतं-नित्यं विगतं-विनष्टं, ततश्च भूतापरिणतविगतानि, एतदुक्तं भवति-'उप्पन्ने इ वा विगए इ वा धुवे इ वा' इत्यादि, शब्दकरणमित्यनेनोक्तिमाह, तथा चोक्तम्–'उत्ती तु सद्दकरणे' इत्यादि, तदेवं भूतादिशब्दकरणं 'न निषीथ' मिति निषीथं न भवति, प्रकाशपाठात् प्रकाशेपदेशत्वाच्च, प्रच्छन्नं तु निषीथं रहस्यपाठाद् रहस्योपदेशाच्च निषीथनाम यथाऽध्ययनमिति गाथार्थः ॥ अथवा निषीथं गुप्तार्थमुच्यते, "जहा-अग्गाणीए विरिए अत्थिनत्थिप्पवायपुव्वे य पाठो-जत्थेगो दीवायणो भुंजइ तत्थ दीवायणसयं भुंजइ जत्थ दीवायणसयं भुंजइ तत्थ एगो दीवायणो भुंजइ, एवं हम्मइ वि जाव जत्थ दीवायणसयं हम्मइ तत्थेगो दीवायणो हम्मइ," तथा चामुमेवार्थमभिधातुकाम आह–

नि. (१०२२) अग्गेणीअंमि य जहा दीवायण जत्थ एग तत्थ सयं ।
जत्थ सयं तत्थेगो हम्मइ वा भुंजए वावि ॥

वृ- सम्प्रदायाभावान्न प्रतन्यत इति ॥

नि. (१०२३) एवं बद्धमबद्धं आएसाणं हवंति पंचसया ।
जह एगा मरुदेवी अच्चंतत्थावरा सिद्धा ॥

वृ- 'एवम्' इत्यनन्तरोक्तप्रकारं 'बद्धं' लोकोत्तरं, लौकिकं त्वत्रारण्यकादि द्रष्टव्यम्, अबद्धां पुनरादेशानां भवन्ति पञ्च शतानि, किम्भूतानि ?, अत आह–यथैका–तस्मिन् समयेऽद्वितीया 'मरुदेवी' ऋषभजननी 'अत्यन्तस्थावरा' इत्यनादिवनस्पतिकायादुद्वृत्त्य 'सिद्धा' निष्ठितार्था सञ्जातेति, उपलक्षणमेतदन्येषामपि स्वयम्भूरमणजलधिमत्स्यपद्मपत्राणां वलयव्यतिरिक्तसकलसंस्थानसम्भवादीनामिति, लौकिकमप्य ड्डिकाप्रत्यड्डिकादिकरणं ग्रन्थानिबद्धं वेदितव्यमिति गाथार्थः ॥ अत्र वृद्धसम्प्रदायः-आरुहए पवयणे पंच आएससयाणि जाणि अनिबद्धाणि, तत्थेगं मरुदेवा नवि अंगे न उवंगे पाठो अत्थि जहा-अच्चंतं थावरा होइऊण सिद्धत्ति, विइयं सयंभुरमणे समुद्दे मच्छाणं पउमपत्ताण य सव्वसंठाणाणि अत्थि वलयसंठाणं मोत्तु, तइयं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विण्हुस्स सातिरेगजोयणसयसहस्सविउव्वणं, चउत्थं करडओकुरुडा दोसट्टियरुवज्झाया, कुणालनयरीए निद्धमणमूले वसही, वरिसासु देवयानुकंपणं, नागरेहिं निच्छुहणं, करडेण रूसिएण वुत्तं-'वरिस देव ! कुणालाए,' उक्कुरुडेण भणियं-'दस दिवसाणि पचं य' पुणरवि करडेण भणियं-'मुट्ठिमेत्ताहिं धाराहिं' उक्कुरुडेण भणियं-'जहा रत्तिं तहा दिवं' एवं वोत्तूण-मवक्कंता, कुणालाएवि पन्नरसदिवसअणुबद्धवरिसणेणं सजाणवया (सा) जलेण उक्कंता तओ ते तइयवरिसे साएए नयरे दोऽवि कालं काऊण अहे सत्तमाए पुढवीए काले नरगे बावीससागरोवमट्ठिईआ नेरइया संवुत्ता । कुणालानयरीविनासकालाआ तेरसमे वरिसे महावीरस्स केवलनाणसमुप्पत्ती। एयं अनिबद्धं, एवमाइ पंचाएससयाणि अबद्धाणि ।। एवं लोइयं अबद्धकरणं बत्तीसं अड्डियाओ बत्तीसं पच्चड्डियाओ सोलस करणाणि, लोगप्पवाहे पंचट्ठाणाणि तं जहा-आलीढं पच्चालीढं वइसाहं मंडलं समपयं, तत्थालीढ दाहिणं पाणं अग्गओहुत्तं काउंवामपायं पच्छओहुत्तं ओसारेइ, अंतरं दोण्हवि पायाणं पंचपाया, एवं चेव विवरीयं पच्चालीढं, वइसाहं पण्हीओ अब्भिंतराहुत्तीओ समसेढीए करेइ, अग्गिमयलो बहिराहुत्तो, मंडलं दोवि पाए दाहिणवामहुत्ता ओसारेत्ता ऊरुणोवि आउंटावेइ जहा मंडलं भवइ, अंतरं चत्तारि पया, समपायं दोवि पाए समं निरंतरं ठवेइ, एयाणि पंचट्ठाणाणि, लोगप्पवाए (हि) सयणकरणं छट्ठं ठाणं, इत्यलं विस्तरेण ।।

उक्तं श्रुतकरणम्, अधुना नोश्रुतकरणमभिधित्सुराह—

नि. (१०२४) नोसुअकरणं दुविहं गुणकरणं तह य जुंजणाकरणं ।
गुणकरणं पुण दुविहं तवकरणे संजमे अ तहा ।।

वृ- श्रुतकरणं न भवतीति नोश्रुतकरणम्, 'अमानोनाः प्रतिषेधवाचका' इति वचनात्, 'द्विविधं' द्विप्रकारं 'गुणकरणम्' इति गुणानां करणं गुणकरणं, गुणानां कृतिरित्यर्थः, 'तथा' इति निर्देशे'चः'समुच्चये व्यवहितश्चास्य योगः, कथं ?,'योजनाकरणं च' मनः प्रभृतीनां व्यापार-कृतिश्चेत्यर्थः,गुणकरणं पुनः 'द्विविधं' द्विप्रकारं, कथं ?, 'तपकरणम्' इति तपसः अनशना-देर्वाह्या भ्यन्तरभेदभिन्नस्य करणं तपः करणं, तपः कृतिरिति हृदयं, तथा 'संजमे अ'त्ति संयमविषयं च पञ्चाश्रवविरमणादिकरणमिति भाव इत्ययं गाथार्थः ।।

इदानीं योजनाकरणं व्याचिख्यासुराह—

नि. (१०२५)जुंजणकरणं तिविहं मन १ वय२ काए अ३मनसि सच्चाई ।
सट्ठाणि तेसि भेओ चउ १ चउहा २ सत्तहा ३ चेव ।।

वृ- योजनाकरणं 'त्रिविधं' त्रिप्रकारं 'मणवइकाए य'त्ति मनोवाक्कायविषयं, तत्र 'मनसि सत्यादि' मनोविषयं सत्यादियोजनाकरणं तद्यथा—सत्यमनोयोजनाकरणम्, असत्यमनोयोजना-करणं, सत्यमृषामनोयोजनाकरणम्, असत्यामृषामनोयोजनाकरणमिति, 'स्वस्थाने' प्रत्येकं मनोवाक्कायलक्षणं 'तेषां' योजनाकरणानां 'भेदः' विभागः 'चउ चउहा सत्तहा चेव'त्ति अयमत्र भावार्थः-मनोयोजनाकरणं चतुर्भेदं सत्यमनोयोजनाकरणादि दर्शितमेव, एवं वाग्योजनाकरणमपि चतुर्भेदमेव द्रष्टव्यं, काययोजनाकरणं तु सप्तभेदं, तद्यथा-औदारिककाययोजनाकरणम्, एवमौदारिकमिश्रम्, एवं वैक्रियकायः एवं वैक्रियमिश्रम्, एवमाहारककायः एवमाहारकमिश्रम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं कार्मणकाययोजनाकरणमिति गाथार्थः ॥ इत्थं तावद् व्यावर्णितं यथोद्दिष्टं करणम्, अधुनाऽत्र येनाधिकार इति तद्दर्शनायाऽऽह–

नि. (१०२६) भावसुअसद्दकरणे अहिगारो इत्थ होइ कायव्वो ।
नोसुअकरणे गुणजुंजणे अ जहसंभवं होइ ॥

वृ- भावश्रुतशब्दकरणे 'अधिकारः'अवतारो भवति कर्तव्यः श्रुतसामायिकस्य, न तु चारित्रसामायिकस्य, तस्य अन्ते यथासम्भवाभिधानाद्, इह च भावश्रुतं सामायिकोपयोग एव, शब्दकरणमप्यत्र तच्छब्दविशिष्टः श्रुतभाव एव विवक्षितो न तु द्रव्यश्रुतमिति, तत्र वस्तुतोऽस्यानवतारात्, तथा नोश्रुतकरणमधिकृत्य 'गुणजुंजणे य'त्ति गुणकरणे योजनाकरणे च यथासम्भवं भवति, अधिकरणमिति गम्यते, तत्र यथासम्भवमिति गुणकरणे चारित्रसामायिकस्यावतारः, तपः संयमगुणात्मकत्वाच्चारित्रस्य, योजनाकरणे च मनोवाग्योजनायां सत्यासत्यामृषाद्वये द्वयस्यापि भावनीयः, काययोजनायामपि द्वयस्याद्यस्यैवेति गाथार्थः ।

साम्प्रतं सामायिककरणमेवाव्युत्पन्नविनेयवर्गव्युत्पादनार्थं सप्तभिरनुयोगद्वारैः कृताकृतादिभिः निरूपयन्नाह–

नि. (१०२७)कयाकयं १ केन कयं २ केसु अ दव्वेसु कीरई वावि ३ ।
काहे व कारओ ४ नयओ५करणं कइविहं ६ (च) कहं ७ ? ॥

वृ- 'कयाकयं'ति सामायिकस्य करणमिति क्रियां श्रुत्वा चोदक आक्षिपति-एतत्सा-मायिकमस्याः क्रियायाः प्राक् किं कृतं क्रियते ? आहोश्विदकृतमिति, उभयथाऽपि दोषः, कृतपक्षे भावादेव करणानुपपत्तेः, अकृतपक्षेऽपि वान्ध्येयादेरिव करणानुपपत्तिरेवेति, अत्र निर्वचनं, कृतं चाकृतं च कृताकृतं, नयमतभेदेन भावना कार्या, केन कृतमिति वक्तव्यं, तथा केषु द्रव्येष्विष्टादिषु क्रियते ?, कदा वा कारकोऽस्य भवतीति, वक्तव्यं, 'नयत' इति केनालोचनादिना नयेनेति, तथा करणं 'कइविहं' कतिभेदं 'कथं' केन प्रकारेण लभ्यत इति वक्तवयमयं गाथासमासार्थः ॥ अवयवार्थं तु प्रतिद्वारं भाष्यकार एव वक्ष्यति, तत्राऽऽद्यद्वारावयवार्थाभिधित्सयाऽऽह–

[भा.१७५] उप्पन्नाणुप्पन्नं कयाकयं इत्थ जह नमुक्कारे ।
केणंति अत्थओ तं जिनेहिं सुत्तं गणहरेहिं ॥

वृ- इहोत्पन्नानुत्पन्नं कृताकृतमभिधीयते, सर्वमेव च वस्तूत्पन्नानुत्पन्नं क्रियते, द्रव्यपर्यायोभयपत्वाद्वस्तुन इति, अत्र नैगमादिनायैर्भावना कार्येति, अत एवाऽऽह-अत्र यथा नमस्कारे नयभावना कृता तथैव कर्तव्येति गम्यते, सा पुनर्नमस्कारानुसारेणैव भावनीयेति द्वारम् । सा पुन भावना-इह केइ उप्पन्नं इच्छंति, केइ अनुप्पन्नं इच्छंति, ते य नेगमाई सत्त मूलनया, तत्थ नेगमोऽनेगविहो, तत्थाइनेगमस्स अनुप्पन्नं कीरइ नो उप्पन्नं, कम्हा ?, जहा पंच अत्थिकाया निच्चा एवं सामाइयंपि न कयाइ नासि न कयाइ न भवदि न कयाइ न भविस्सइ, भुविं च भवइ अ भविस्सइ, धुवे निइए अक्खए अव्वए अवट्ठिए निच्चे न एस भावे केणइ उप्पाइएत्तिकट्टु, जदावि भरहेरवएहिं वासेहिं वोच्छिज्जइ तयावि महाविदेहे वासे अव्वोच्छिती तम्हा अनुप्पन्नं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सेसाणं नेगमाणं छण्ह य संगहाईण नयाणं उप्पन्नं कीरइ, जेणं पन्नरससुवि कम्मभूमीसु पुरिसं पडुच्च उप्पज्जइ, जइ उप्पन्नं कहं उप्पन्नं ?, तिविहेण सामित्तेण उप्पत्ती भवइ, तं जहा-समुट्ठाणेणं वायणाए लद्धीए, तत्थ को णओ कं उप्पत्तिं इच्छइ ?, तत्थ जे पढमवज्जा नेगमा संगहववहारा य त तिविहंपि उप्पत्तिं इच्छंति, समुट्ठाणेणं जहा तित्थगरस्स सएणं उवट्ठाणेणं, वायणाए वायणायरियणिस्साए जहा भगवया गोयमसामी वाइओ, लद्धीए वा अभवियस्स नत्थि, भवियस्स पुण उवएसगमंतरेणावि पडिमाइ दट्टूणं सामाइयावरणिज्जाण कम्माण खओवसमेणं सामाइयलद्धी समुप्पज्जइ, जहा सयंभूरमणे समुद्दे पडिमासंठिया य मच्छा पउमपत्तावि पडिमासंठिदा साहुसंठिया य, सव्वाणि किर तत्थ संठाणाणि अत्थि मोत्तूण वलयसंठाणं, एरिसं नत्थि जीवसंठाणंति, ताणि संठाणाणि दट्टूण कस्सइ संमत्तसुयचरित्ताचरित्तसामाइयाइ उप्पज्जेज्जा ।

उज्जुसुओ पढमं समुट्ठाणेणं नेच्छइ, किं कारणं ?, भगवं चेव उट्ठाणं, स एव वायणायरिओ गोयमप्पभिईणं, तेन दुविहं-वायणासामित्तं लद्धिसामित्तं च, जं भणियं-वायणायरियनिस्साए सामाइयलद्धी जस्स उप्पज्जइ, तिन्नि सद्दणया लद्धिमिच्छंति, जेण उट्ठाणे वायणायरिए य विज्जमाणेवि अभवियस्स न उप्पज्जइ, तिन्नि सद्दनया लद्धिमिच्छंति, जेण उट्ठाणे वायणायरिए य विज्जमाणेवि अभवियस्स न उप्पज्जइ, लब्धेरभावात्, एवं उप्पन्नं अनुप्पन्नं वा सामाइयं कज्जइ, कयाकयंति दारं गतं, अधुना द्वितीयद्वारमधिकृत्याऽऽह–'केन' इति, केन कृतमित्यत्र निर्वचनम्, 'अर्थतः' अर्थमङ्गीकृत्य 'तत्' सामायिकं 'जिनैः' तीर्थकरैः, सूत्रं त्वङ्गीकृत्य गणधरैरिति, व्यवहारमतमेतत्; निश्चयमतं तु व्यक्त्यपेक्षया यो यत्स्वामी तत्तेनैवेति, व्यक्त्यपेक्षश्चेह तीर्थकरगणधरयोरुपन्यासो वेदितव्यः, प्रधानव्यक्तित्वाद्, अन्यथा पुनरुक्तदोषप्रसङ्ग इति, उक्तं च भाष्यकारेण–

"ननु निग्गमे गयं चिय केण कयंति त्ति का पुणो पुच्छा ?।
भण्णइ स वज्झकत्ता इहंतरंगो विसेसोऽयं ॥१॥"

बाह्यकर्ता सामान्येनान्तरङ्गस्तु व्यक्त्यपेक्षयेति भावना, अयं गाथार्थः ॥

साम्प्रतं केषु द्रव्येषु क्रियत इत्येतद् विवृण्वन्नाह–

[भा.१७६] तं केसु कीरई तत्थ नेगमो भणइ इट्ठदव्वेसु ।
सेसाण सव्वदव्वेसु पज्जवेसुं न सव्वेसुं ॥

वृ- 'तत्' सामायिकं 'केषु' द्रव्येषु स्थितस्य सतः 'क्रियते' निर्वर्त्यत इति द्रव्येषु प्रश्नः, नयप्रविभागेनेह निर्वचनं तत्र 'नेगमो भणइ' नैगमनयो भाषते–'इष्टद्रव्येषु' इति मनोज्ञपरिणामकराणत्वान्मनोज्ञेष्वेव शयनाशनादिद्रव्येष्विति, तथाहि–

'मनुन्नं भोयणं भोच्चा, मनुन्नं सयनासनं ।
मनुन्नंसि अगारंसि, मनुन्नं झायए मुनी ॥१॥'

इत्यागमः, 'शेषाणां' सङ्ग्रहादीनां सर्वद्रव्येषु, शेषनया हि परिणामविशेषात् कस्यचित् किञ्चिन्मनोज्ञमिति व्यभिचारात्, सर्वद्रव्येषु स्थितस्य क्रियते यत्र मनोज्ञः परिणाम इति मन्यन्ते, पर्यायेषु न सर्वेष्ववस्थानाभावात्, तथाहि-यो यत्र निषद्यादौ स्थितः न स तत्र तत्सर्वपर्यायेषु,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकभाग एव स्थितत्वात, इत्थं चैतदङ्गीकर्तव्यम्, अन्यथा पुनरुक्तदोषप्रसङ्गः, तथा चोक्तं –

"ननु भणियमुवग्घाए केसुत्ति इहं कओ पुणो पुच्छा ?।
केसुत्ति तत्थ विसओ इह केसु ठियस्स तल्लाहो ॥१॥
तो किह सव्वदव्वावत्थाणं ? ननु जाइमेत्तवयणाओ ।
धम्माइसव्वदव्वाहारो सव्वो जणोऽवस्सं ॥२॥"

अथवोपोद्घाते सर्वद्रव्याणि विषयः सामायिकस्य, इह तान्येव सर्वद्रव्याणि सामायिकस्य हेतुः, श्रद्धेयज्ञेयक्रियानिबन्धनत्वात्, अथवाऽन्यथा पुनरुक्तपरिहारः-कृताकृतादिगाथायां कृतमकृतं वा सामायिकं कार्य कर्म, कर्तु रीप्सिततमत्वात्, केन कृतमिति कर्तुः प्रश्नः, केषु द्रव्येष्विति साधकतमकरणप्रश्नः, प्राकृते तृतीयाबहुवचनं सप्तमीबहुवचनतुल्यं तृतीयार्थे वा सप्तमीं कृत्वा निर्देशः, न चैतदपि स्वमनीषिकाव्याख्यानं, यतो भाष्यकारेणाप्यभ्यधायि–

"विसओवि उवग्घाए केसुत्तीहं स एवं हेउत्ति ।
सद्धेयणेयकिरियानिबंधनं जेण सामइयं ॥१॥'
(अहवा) कयाकयाइसु कज्जं केण व कयं च कत्तत्ति ।
केसुत्ति करणभावो ततियत्थे सत्तमी काउं ॥२॥"

इत्यलं प्रसङ्गेनेति गाथार्थः ॥ साम्प्रतं कदा कारकोऽस्य भवतीत्येतन्नयैर्निरूपयन्नाह–

[भा.१७१] काहु ? उदिट्ठे नेगम उवट्ठिए संगहो अ ववहारो ।
उज्जुसुओ अक्कमंते सद्दु समत्तंमि उवउत्तो ॥

वृ- कदाऽसौ सामायिकस्य कारको भवतीति प्रश्नः, इह नयैर्निर्वचनं 'उद्दिट्ठे नेगम'त्ति उद्दिष्टे सति नैगमो मन्यते, इयमत्र भावना-सामान्यग्राहिणो नैगमनस्योद्दिष्टमात्र एव सामायिके गुरुणा शिष्योऽनधीयानोऽपि तत्क्रियाऽननुष्ठायी सन् सामायिकस्य कर्ता वनगमन-प्रस्थितप्रस्थककर्तृवत्, यस्मादुद्देशोऽपि तस्य कारणं सामायिकस्य, तस्मिंश्च कारणे कार्योपचारः, 'उवट्ठिए संगहो य ववहारो'त्ति सङ्ग्रहो व्यवहारश्च मन्यते-उपस्थितः सन् कारको भवतीति, इयमत्र भावना–इहोद्देशानन्तरं वाचनाप्रार्थनाय यदा वन्दनं दत्त्वोपस्थितो भवति तदा प्रत्यासन्नतरकारणत्वात् सङ्ग्रहव्यवहारयोः कारक इति, ऋजुसूत्र आक्रामन् कारको भवतीति मन्यते, एतदुक्तं भवति-उद्देशानन्तरं गुरुपादमूले वन्दित्वोपस्थितः-सामायिकं पठितुमारब्धः कारकः, वृद्धास्तु व्याचक्षते-न पठन्नेव, किन्तु समाप्तेः कारक इति सामायिकक्रियां वा प्रतिपद्यमानस्तदुपयोगरहितोऽपि कारकः, यस्मात् सामायिकार्थस्य सामायिकशब्दक्रिये असाधारणं कारणम्, असाधारण-कारणेन च व्यपदेश इति, 'सद्दु समत्तंमि उवउत्तो'त्ति शब्दादयो नया मन्यन्ते-समाप्ते सत्युपयुक्त एव कारको भवति, त्रयाणां च शब्दादीनां नयानां शब्दक्रियावियुक्तोऽपि नया मन्यन्ते-समाप्ते सत्युपयुक्त एव कारको भवति, सामायिकस्येति भावना, अयं गाथार्थः ॥ कदा कारक इति गतं, नयतो-नयप्रपञ्चत इत्यर्थः, अथवा कदा कारक इत्येतावद् द्वारं गतं, नयत इत्येतत्तु द्वारान्तरमेव, अतस्तदभिधित्सयाऽऽह–

[भा.१७८]आलोअणा य १ विणए २ खित्त ३ दिसाऽभिग्गहे अ ४ काले ५ ।

रिक्ख ६ गुणसंपया वि अ ७ अभिवाहारे अ ८ अट्ठमए ॥

वृ- इहाऽऽभिमुख्येन गुरोरात्मदोषप्रकाशनम्-आलोचनानयः, तथा विनयश्च पवधावनानुरागादिः, तथा 'क्षेत्रम' इक्षुक्षेत्रादि, तथा दिगभिग्रहश्च वक्ष्यमाणलक्षणः, कालश्चाहरादिः, तथा रिक्षसम्पत्–नक्षत्रसंपत् गुणसंपच्च गुणाः-प्रियधर्मादयः, अभिव्याहरणम् अभिव्याहारश्चाष्टमो नय इति गाथासमासार्थः ॥ व्यासार्थं तु प्रतिपदं भाष्यकार एव सम्यग् न्यक्षेण वक्ष्यति, तथा चाऽऽद्यद्वारव्याचिख्यासयाऽऽह–

[भा.१७९] पव्वज्जाए जुग्गं तावइ आलोअणं गिहत्थेसुं ।
उवसंपयाइ साहुसु सुत्ते अत्थे तदुभए अ ॥

वृ- प्रव्रज्यायाः–निष्क्रमणस्य यत् प्राणिजातं स्त्रीपुरुपनपुंसकभेदं 'योग्यम्' अनरूपं तदन्वेषणं, यदिति वाक्यशेषः, तावत्येवाऽऽलोचनाऽवलोकना वा, केषु? -'गृहस्थेषु' गृहस्थविषय, इति, एतदुक्तं भवति-योग्यं हि सर्वोपाधिशुद्धमेव भवति, ततश्च तदन्वेषणेन सर्वस्यैव विधेः कस्त्वं ? को वा ते निर्वेदः ? इत्यादिप्रश्नादेराक्षेप इति, ततश्च प्रयुक्तालोचनस्य योग्यताऽवधारणानन्तरं सामायिकं दद्यात्, न शेषाणां प्रतिषिद्धदीक्षाणामिति नयः । एवं तावद् गृहस्थस्याकृतसामायिकस्य सामायिकार्थमालोचनोक्ता, साम्प्रतं कृतसामायिकस्य यतेः प्रतिपादयन्नाह उपसम्पदि साधुषु आलोचनेति वर्तते, सूत्रे अर्थे तदुभये च, इयमत्र भावना-सामायिकसूत्राद्यर्थ यदा कश्चिदुपसम्पदं प्रयच्छति यतिस्तदाऽसावालोचनां ददाति, अत्र विधिः सामाचार्यामुक्त एव, आह–अल्पं सामायिकसूत्रं, तत्कथं तदर्थमपि यतेरुपसम्पत् ?, तद्भावे वा कथं यतिः? कथं वा प्रतिक्रमणमन्तरेण शुद्धिरिति ?, अत्रोच्यते, मन्दग्लानादिव्याघाताद् विस्मृतसूत्रस्य यतेः सूत्रार्थमप्युपसम्पदविरुद्धैव, एष्यत्कालं वा दुष्षमान्तमालो क्यानागमतामर्षकं सूत्रमिति, तदभावेऽपि च तदा चारित्रपरिणामोपेतत्वादसौ यतिरेव, शुद्धिश्चास्य यावत् सूत्रमधीतं तावत् तेनैव प्रतिक्रमणं कुर्वत इत्यलं विस्तरेणेति गाथार्थः ॥

अधुनैकगाथयैव विनयादिद्वारत्रयं व्याचिख्यासुराह–

[भा.१८०] आलोइए विनीअस्स दिज्जए तं (पडि २) पसत्थखित्तंमि ॥
अभिगिज्झ दो दिसाओ चरंतिअं वा जहाकमसो ॥

वृ- आलोचिते सति विनीतस्य, पादधावनानुरागादिविनयवत इत्यर्थः,उक्तं च भाष्यकारेण

'अनुरत्तो भत्तिगओ अमुई अनुयत्तओ विसेसण्णू ।
उज्जुत्तगऽपरितंतो इच्छियमत्थं लहइ साहू ॥१॥'

दीयते 'तत्' सामायिकं, सत्यापि न यत्र तत्र क्वचित्, किं तर्हि ?, 'प्रशस्तक्षेत्रे' इक्षुक्षेत्रादाविति, अत्राप्युक्तं-

'उच्छुवणे सालिवणे पउमसरे कुसुमिए य वनसंडे ।
गंभीरसाणुणाए पयाहिणजले जिनघरे वा ॥१॥
देज्ज न उ भग्गझामियसुसाणसुण्णासु सण्णगेहेसु ।
छारंगारकयारामेज्झाईदव्वदुट्ठे वा ॥२॥'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा 'अभिगृह्य' अङ्गीकृत्य द्वे 'दिशौ' पूर्वां वोत्तरां वा दीयत इति वर्तते, तथा चरन्ती वा, तत्र चरन्ती नाम यस्यां दिशि तीर्थकरकेवलिमनः पर्यायज्ञान्यवधिज्ञानिचतुर्दशपूर्वधरादयो यावद् युगप्रधाना इति विहरन्ति, यथाक्रमश इति गुणोपक्षया तासु दिक्षु यथाक्रमेण दीयत इति, उक्तं च–

पुव्वाभिमुहो उत्तरमुहो व देज्जाऽहवा पडिच्छिज्जा ।
जाए जिनादओ वा दिसाएँ जिनचेइयाइं व् दिंसाएँ जिणचेइयाइं वा ॥१॥'

इति गाथार्थः ॥ द्वारत्रयं गतम्, अधुना कालादिद्वारत्रयमेकगाथयैवाभिधित्सुराह–

[भा.१८१] पडिकुट्ठदिणे वज्जिअ रिक्खेसु अ मिगसिराइ भणिएसुं ।
पियधम्मई गुणसंपयासु तं होइ दायव्वं ॥

वृ- प्रतिक्रुष्टानि-प्रतिषिद्धानि दिनानि-वासराः, प्रतिक्रुष्टानि च तानि दिनानि चेति विग्रहः, तानि चतुर्दश्यादीनि वर्ज्जयित्वाऽप्रतिक्रुष्टेष्वेव पञ्चम्यादिषु दातव्यमिति योगः, उक्तं च-

"चाउद्दसिं पन्नरसिं वज्जेज्जा अट्ठमिं च नवमिं च ।
छट्ठिं च चउत्थि बारसिं च दोण्हंपि पक्खाणं ॥१॥"

एतेष्वपि दिनेषु प्रशस्तेषु मुहूर्तेषु दीयते, नाप्रशस्तेषु, तथा 'ऋक्षेषु'नक्षत्रेषु च मृगशिरादिषु, 'उक्तेषु' ग्रन्थान्तराभिहितेषु, न तु प्रतिषिद्धेषु, उक्तं च –

"मियसिरअद्दापूसो तिन्नि य पुव्वाइ मूलमस्सेसा ।
हत्थो चित्ता य तहा दह वुड्ढिकराइं नाणस्स ॥१॥"
(तथा)-'संझागयं रविगयं विड्डेरं सग्गहं विलंबिं च ।
राहुहयं गहभिन्नं च वज्जए सत्त नक्खत्तो ॥२॥'

तथा प्रियधर्मादिगुणसम्पत्सु सतीषु 'तत्' सामायिकं भवति दातव्यमिति, उक्तं च–

"पियधम्मो दढधम्मो संविग्गोऽवज्जभीरु असढो य ।
खंतो दंतो गुत्तो थिरव्वय जिइंदिओ उज्जू ॥१॥"

विनीततस्याप्येता गुणसम्पदोऽन्वेष्टव्या इति गाथार्थः ॥

साम्प्रतं चरमद्वारव्याचिख्या-सयाऽऽह–

[भा.१८२] अभिवाहारो कालिअसुअंमि सुत्तत्थतदुभएणं ति ।
दव्वगुणपज्जवेहि अ दिट्ठीवायंमि बोद्धव्वो ॥

वृ- 'अभिव्याहरणम्' आचार्यशिष्ययोर्वचनप्रतिवचने अभिव्याहारः, स च 'कालिकश्रुते' आचारादौ 'सुत्तत्थतदुभएणं ति सूत्रतः अर्थतस्तदुभयतश्चेति, इयमत्र भावना-शिष्येणेच्छा-कारेणेदमङ्गाद्युद्दिशत इत्युक्ते सतीच्छापुरस्सरमाचार्यवचनम्–अहमस्य साधोरिदमङ्गमध्ययनुमुद्देशं वोद्दिशामि-वाचयामीत्यर्थः, आप्तोपदशपारम्पर्यपख्यानपनार्थं क्षमाश्रमणानां हस्तेन, न स्वोत्प्रेक्षया, सूत्रतोऽर्थतस्तदुभयतो वाऽस्मिन् कालिकश्रुते अ(त) थोत्कालिके, दृष्टिवादे कथमिति ?, तदुच्यते-'दव्वगुणपज्जवेहि य दिठीवायंमि बोद्धव्वो' द्रव्यगुणपर्यायैश्च 'दृष्टिवादे' भूतवादे बोद्धव्योऽभिव्याहार इति, एतदुक्तं भवति-शिष्यवचनान्रमाचार्यवचनमुद्दिशामि सूत्रतोऽर्थतश्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्यगुणपर्यायैः अनन्तगमसहितैरिति, एवं गुरुणा समादिष्टेऽभिव्याहारे शिष्याभिव्याहारः-ब्रवीति शिष्यः-उद्दिष्टमिदं मम, इच्छाम्यनुशासनं क्रियमाणं पूज्यैरिति, एवमभिव्याहारद्वारमष्टमं नीतिविशेषैर्नयैर्गतमिति गाथार्थः ॥ व्याख्याता प्रतिद्वारगाथा, साम्प्रतमधिकृतमूलद्वारगाथायामेव करणं कतिविधमिति व्याचिख्यासुराह–

[भा.१८३] उद्देस १ समुद्देसे २ वायण ३ मणुजाणणं च ४ आयरिए ।
सीसम्मि उद्दिसिज्ञंतमाइ एअं तु जं कइहा ॥

वृ- इह गुरुशिष्ययोः सामायिकक्रियाव्यापारणं करणं, तच्चतुर्द्धा-'उद्देस समुद्देसे'ति उद्देशकरणं समुद्देशकरणं 'वायणमनुजाननं च'त्ति वाचनाकरणमनुज्ञाकरणं च, छन्दोभङ्ग-भयादिह वाचना-करणमत्रोपन्यस्तम्, अन्यथाऽमुना क्रमेण इह-उद्देशो वाचना समुद्देशेऽनुज्ञा चेति गुरोर्व्यापारः, 'आयरिए'त्ति गुराविदं करणं गुरुविषयमिर्त्थः, 'सीसम्मि उद्दिसिज्ञंतमाइ' शिष्ये-शिष्यविषयम् उद्दिश्यमानादि-उद्दिश्यमानकरणं वाच्यमानकरणं समुद्दिश्यमानकरणम् अनुज्ञाय-मानकरणं च, 'एयं तु जं कइह' त्ति एतदेव चतुर्विधं तद् यदुक्तं कतिविधमिति गाथार्थः ॥ आह–पूर्वमने-कविधं नामादिकरणमभिहितमेव, इह पुनः किमिति प्रश्न ?, उच्यते, तत् पूर्वगृहीतस्य करणमनेकविधमुक्तम्, इह पुनरस्मिन् गुरुशिष्यदानग्रहणकाले चतुर्विधं करणमिति, पूर्वं वा करणमविशेषेणोक्तम्, इह गुरुशिष्यक्रियाविशेषाद् विशेषितमिति न पुनरुक्तम्, अथवाऽयमेव करणस्यावसरः, पूर्वत्रानेकान्तद्योतनार्थं विन्यासः कृत इति विचित्रा सूत्रस्य कृतिरित्यलं विस्तरेण, द्वारं ६ । कथमिति द्वारमिदानीं, तत्रेयं गाथा–

नि. (१०२८) कह सामाइअलंभे ? तस्सव्वविघाइदेसवाघाई ।
देसविघाईफड्डगअनंतवड्ढीविसुद्धस्स ॥

नि. (१०२९) एवं ककारलंभो सेसाणवि एवमेव कमलंभो ।
एअंत तु भावकरणं करणे अ भए अ जं भणिअं ॥

वृ- अस्या व्याख्या–'कथं' केन प्रकारेण सामायिकलाभ इति प्रश्नः, अस्योत्तरं-तस्य-सामायिकस्य सर्वविघातीनि देशविघातीनि च स्पर्द्धकानि भवन्ति, इह सामायिकावरणं-ज्ञानावरणं दर्शनावरणं (मिथ्यात्व) मोहनीयं च, अमीषां द्विविधानि स्पर्द्धकानि-देशघातीनि सर्वघातीनि च, तत्र सर्वघातिषु सर्वेषूद्घातितेषु सत्सु देशघातिस्पर्द्धकानामप्यनन्तेषूद्घातितेष्वनन्तगुणवृद्ध्या प्रतिसमयं विशुद्ध्यमानः शुभशुभतरपरिणामो भावत्ः ककारं लभते, तदनन्तगुणवृद्ध्यैव प्रतिसमयं विशुद्धमानः सन् रेफमित्येवं शेषाण्यपि, अत एवाऽऽह-देशघातिस्पर्द्धकानन्तवृद्ध्या विशुद्धस्य सतः ॥ किं ? –'एव' मित्यादि, –पर्वार्द्ध गतार्थम्, आह- उपक्रमद्वारेऽ-भिहितमेतत्-क्षयोपशमात् जायते, पुनश्चोपोद्घातेऽभिहितमेतत्–कथं लभ्यत इति तत्रोक्रम्, इह किमर्थं प्रश्न इति पुनरुक्तता, उच्यते, त्रयमप्येतदपुनरुक्तं, कुतः ?, यस्मादुपक्रमे क्षयोपशमात् सामायिकं लभ्यत इत्युक्तम्, उपोद्घाते स एव क्षयोपशमस्तकत्कारणभूतः कथं लभ्यत इति प्रश्नः, इह पुनर्विशेषिततरः प्रश्नः-केषां पुनः कर्मणां स क्षयोपक्षम इति प्रत्यासन्नतरकारणप्रश्न इत्यलं प्रसङ्गेन । द्वारमेवोपसंहरन्नाह–एतदेव-अनन्तरोदितं सामायिक-करणं यत्तद्भावकरणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'करणेय'त्ति उपन्यस्तद्वारपरामर्शः। 'भए च'त्ति भयमपि 'यद् भणितं' यदुक्तमिति गाथाद्वयार्थः। मूलद्वारगाथायां करणमित्येतद् द्वारं व्याख्यातम्, एतद्वयाख्यानाच्च सूत्रेऽपि करोमीत्ययमवयव इति, अधुना द्वितीयावयवव्याचिख्यासयाऽऽह–

[भा.१८४] होइ भयंतो भयअंतगो अ रयणा भयस्स छब्भेआ।
सव्वंमि वन्निएऽनुक्कमेण अंतेवि छब्भेआ ॥

वृ- भवति भदन्त इत्यत्र 'भदि कल्याणे सुखे च' अर्थद्वये धातुः 'जृविशिभ्यां झच्' औणादिकप्रत्ययो दृष्टः, तं दृष्ट्वा प्रकतिरुह्यते, भदि कल्याण इति अनुनासिकलोपश्चेति, तस्यौणादिकविधानात्, ततश्च भदन्त इति भवति, भदन्तः- कल्याणः सुखश्चेत्यर्थः, प्राकतशैल्या वा भवति भवान्त इति, अत्र भवस्य–संसारस्यान्तस्तेनाऽऽचार्येण क्रियत इति भवान्तकरत्वाद् भवान्त इति, तथा–भयान्तश्चेत्यत्र भयं त्रासः तमाचार्यं प्राप्य भयस्यान्तो भवतीति भयान्तो-गुरुः, भयस्य वाऽन्तको भयान्तक इति, तस्याऽऽमन्त्रणं, 'रचना' नामादिविन्यासलक्षणा, भयस्य 'षड्भेदाः' षट्प्रकाराः-नामस्थापनाद्रव्यक्षेत्रकालभावभेद भिन्नाः, तत्र पञ्च प्रकाराः प्रसिद्धाः, षष्ठं भावभयं सप्तधा–इहलोकभयं परलोकभयमादानभयमकस्माद्भयमश्लोक-भयमाजीविकाभयं मरणभयं चेति, तत्रापीहलोके भयं स्वभवाद् यत् प्राप्यते परलोकभयं परभवात्, किञ्चनद्रव्यजातमादानं तस्य नाशहरणादिभ्यो भयम् आदानभय, यत्तु बाह्यनिमित्तमन्तरेणाहेतुकं भयम् अकस्माद् भवति तदाकस्मिकं, 'श्लोक श्लाघायां' श्लोकनं श्लोकः श्लाधा–प्रशंसा तद्विपर्ययोऽश्लोकस्तस्माद् भयमश्लोकभयम्, आजीविकाभयं-दुर्जीविकाभयं, प्राणपरिणत्या-गभयं मरणभयमिति, एवं सर्वस्मिन् वर्णिते 'अनुक्रमेण' उक्तलक्षणेनान्तेऽपि षड् भेदा इति, तत्र 'अम गत्यादिषु' अमनमन्ताः- अवसानमित्यर्थः, अस्मिन्नपि षड् भेदाः, तद्यथा–नामान्तः स्थापनान्तः द्रव्यान्तः क्षेत्रान्तः कालान्तः भावान्तश्चेति, नामस्थापने क्षुण्णे, द्रव्यान्तो घटाद्यन्तः, क्षेत्रान्त ऊर्ध्वलोकादिक्षेत्रान्तः, कालान्तः समयाद्यन्तः, भावान्तः औदयिकादिभावान्तः ॥

[भा.१८५] एवं सव्वंमिऽवि वन्निअंमि इत्थं तु होइ अहिगारो।
सत्तभयविप्पमुक्के तहा भवंते भयंते अ ॥

वृ- 'एवम्' उक्तेन प्रकारेण 'सर्वस्मिन्' 'नेकभेदभिन्ने भयादौ वर्णिते सति 'अत्र तु' प्रकृते भवत्यधिकारः- प्रकृतयोजना सप्तभयविप्रमुक्तो यस्तेन, तथा भवान्तो यः भदन्तश्चेति, पश्चानुपूर्व्या ग्रन्थ इति गाथाद्वयार्थः ॥ मूलद्वारगाथायां व्याख्यातं भयान्तद्वारद्वयं, तद्व्याख्यानाच्च भदन्तभवान्तभयान्त इति गुर्वामन्त्रणार्थः सूत्रावयव इति, उक्तं च– भाष्यकारेण

'आमंतेइ करेमी भदंत ! सामाइयंति सीसोऽयं।
आहामंतणवयणं गुरुणो किंकारणमिणंति ॥१॥
(भण्णइ)-गुरुकुलवासोवसंगहत्थं जहा गुणत्थीह।
निच्चं गुरुकुलवासी हवेज्ज सीसो जओऽभिहियं ॥२॥
नाणस्स होइ भागी थिरयरओ दंसणे चरित्ते य।
धन्ना आवकहाए गुरुकुलवासं न मुंचंति ॥३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आवस्सयंपि निच्चं गुरुपामूलंमि देसियं होइ ।
वीसुंपि हि संवसओ कारणओ जणइ सेज्जाए ॥४॥
एवं चिय सव्वावस्सयाइ आपुच्छिऊण कज्जाइं ।
जाणावियमामंतणवयणाओ जेण सव्वेसिं ॥५॥
सामाइयमाईयं भदंतसद्दो य जं तयाईए ।
तेणाणुवत्तइ तओ करेमि भंतेत्ति सव्वेसु ॥६॥
किच्चाकिच्चं गुरुवो विदंति विणयपडिवत्तिहेउं च ।
ऊसासाइ पमोत्तं तयणापुच्छाय पडिसिद्धं ॥७॥
गुरुविरहंमिवि ठवणागुरूवि सेवोवदंसणत्थं च ।
जिनविरहंमिऽवि जिनबिंबसेवणामंतणं सफलं ॥८॥
रन्नो व परोक्खस्सवि जह सेवा मंतदेवयाए वा ।
तह चेव परोक्खस्सवि गुरुणो सेवा विनयहेउं ॥९॥"

इत्यादि, कृतं विस्तरेण ॥ साम्प्रतं सामायिकद्वारव्याचिख्यासयाऽऽह-

नि. (१०३०) सामं १ समं च २ सम्मं ३ इग ४ मवि सामाइअस्स एगट्ठा ।
नामं ठवणा दविए भावंमि अतेसि निक्खेवो ॥

नि. (१०३१) महुरपरिणाम सामं १ समं तुला २ संम खीरखंडजुई ३ ।
दोरे हारस्स चिई इग ४ मेआइं तु दव्वंमि ॥

वृ- इह सामं समं च सम्यक् 'इगमवि' देशीपदं क्वापि प्रदेशार्थे वर्तते, सम्पूर्णशब्दावयवमेवाधिकृत्याऽऽह-सामायिकस्यैकार्थिकानि । अमीषां निक्षेपमुपदर्शयन्नाह-नामस्थानपनाद्रव्येषु भावे च नामादिविषय इत्यर्थः, 'तेषां' सामप्रभृतीनां निक्षेपः, कार्य इति गम्यते, स चायं-नामसाम स्थापनासाम द्रव्यसाम भावसाम च, एवं समसम्यक्पदयोरपि द्रष्टव्यः ॥ तत्र नामस्थापने क्षुण्णे एव, द्रव्यसामप्रभृतींश्च प्रतिपादयन्नाह-

'महुरे' त्यादि,-इहौघतो मधुरपरिणामं द्रव्य-शर्करादि द्रव्यसाम समं 'तुला' इति भूतार्थालोचनायां समं तुलाद्रव्यं, सम्यक् 'क्षीरखण्डयुक्तिः' क्षीरखण्डयोजनं द्रव्यसम्यगिति, तथा 'दोरे' इति सूत्रदवरके मौक्तिकान्येवाधिकृत्य भाविपर्यायापेक्षया 'हारस्य' मुक्ताकलापस्य चयनं चितिः-प्रवेशेनं द्रव्येकम्, अत एवाह-'एयाहं तु दव्वंमि'त्ति एतान्युदाहरणानि द्रव्यविषयाणीति गाथाद्वयार्थः ॥ साम्प्रतं भावसामादि प्रतिपादयन्नाह-

नि. (१०३२) आओवमाइ परदुक्खमकरणं १ रागदोसमज्झत्थं ।
नाणाइतिगं ३ तस्साइ पोअणं ४ भावसामाइं ॥

वृ- आत्मोपमया-आत्मोपमानेन परदुःखाकरणं भावसामेति गम्यते, इह चानुस्वारोऽलाक्षणिकः, एतदुक्तं भवति-आत्मनव परदुःखाकरणपरिणामो भावसाम, तथा 'रागद्वेषमाध्यस्थ्यम्' अनासेवनया रागद्वेषमध्यवर्तित्वं समं, सर्वत्राऽऽत्मनस्तुल्यरूपेण वर्तनमित्यर्थः, तथा ज्ञानादित्रयमेकत्र सम्यगिति गम्यते, तथाहि-ज्ञानदर्शनचारित्रयोजनं सम्यगेव, मोक्ष-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रसाधकत्वादिति भावना, 'तस्य' इति सामादि सम्बध्यते, 'आत्मनि प्रोतनम्' आत्मनि प्रवेशनम् इकमुच्यते, अत एवाऽऽह-'भावसामाई' भावसामादावेतान्युदाहरणानीति गाथार्थः ॥ सामायिकशब्दयोजना चैवं द्रष्टव्य-इहाऽत्मन्येव साम्न इकं निरुक्तनिपातनात् साम्नो नकारस्याऽऽय आदेशः, ततश्च सामायिकम्, एवं समशब्दस्याऽऽयादेशः, समस्य वा आयः समायः स एव सामायिकमिति, एवमन्यत्रापि भावना कार्येति कृतं प्रसङ्गेन ॥

साम्प्रतं सामायिकपर्यायशब्दान् प्रतिपादयन्नाह-ग्रन्थकारः

नि. (१०३३) समया सम्मत्त पसत्थ संति सुविहिअ सुहं अनिंदं च ।
अदुगुंछिअमरगरिहिअं अनवज्जमिमेऽवि एगट्ठा ॥

वृ- निगदसिद्धैव । आह-अस्य निरुक्तावेव 'सामाइयं समइय' मित्यादिना पर्यायशब्दाः प्रतिपादिता एव तत् पुनः किमर्थमभिधानमिति ?, उच्यते, तत्र पर्यायशब्दमात्रता, इह तु वाक्यन्तरेणार्थनिरूपणमिति, एवं प्रतिशब्दमर्थभेदतोऽनन्ता गमा अनन्ताः पर्याया इति चैकस्य सूत्रस्येति ज्ञापितं भवति, अथवाऽसम्मोहार्थं तत्रोक्तावप्यभिधानमदुष्टमेव इत्यत एवोक्तम्-'इमेऽवि एगट्ठ'त्ति एतेऽपि तेऽपीत्यदोषः ॥ साम्प्रतं कण्ठतः स्वयेमेव चालनां प्रतिपादयन्नाह-

नि. (१०३४)को कार ओ ?, करंतो किं कम्मं ?, जं तु कीरई तेन ।
किं कारयकरणाण य अन्नमणन्नं च ? अक्खेवो ॥

वृ- इह 'करोमि भदन्त ! सामायिकम्' इत्यत्र कर्तृकर्मकरणव्यवस्था वक्तव्या, यथा करोमि राजन् ! घटमित्युक्ते कुलालः कर्ता घट एव कर्म दण्डादि करणमिति, एवमत्र कः कारकः कुलालसंस्थानीयः ? इत्यत आह-'करेंतो'त्ति तत् कुर्वन्नत्मैव, अथ किं कर्म घटादिसंस्थानीयम्? इत्यत्राऽऽह-यत्तु 'क्रियते' निर्वर्त्यते 'तेन' कर्त्रा तच्च तद्गुणरूपं सामायिकमेव, तुशब्दः करणप्रश्ननिर्वचनसङ्ग्रहार्थः, यथा कर्म निर्दिष्टमेवं किं करणमित्युद्देशादिचतुर्विधमिति निर्वचनम्, एवं व्यवस्थिते सत्याह-'किं कारगकरणाण य' त्ति किं कारककरणयोः ?, चशब्दात् कर्मणश्च परस्परतः कुलालघटदण्डादीनामिवान्यत्वम्, आहोश्विदनन्यत्वमेवेति ?, उभयथाऽपि दोषः, कथम् ?, अन्वत्वे सामायिकवतोऽपि तत्फलस्य मोक्षास्याभावः, तदन्यत्वाद्, मिथ्यादृष्टेरिव, अनन्यत्वे तु तस्योत्पत्तिविनाशाभ्यामात्मनोऽप्युत्पत्तिविनाशप्रसङ्ग इति, अनिष्टं चैतत्, तस्यानादिमत्त्वाभ्युपगमादित्याक्षेपश्चालनेति गाथार्थः ॥ विजृम्भितं चात्र भाष्यकारेण-

"अन्नत्ते समभावा-भावाओ तप्पओयणाभावो ।
पावइ मिच्छस्स व से सम्मामिच्छाऽविसेसो य ॥१॥
अह व मई-भिन्नेणवि धनेन सधनोत्ति होइ ववएसो ।
सधनो य धनाभागी जह तह सामाइयस्सामी ॥२॥
तं न जओ जीवगुणो सामइयं तेन विफलता तस्स ।
अन्नत्तणओ जुत्ता परसामइयस्स वाऽफलता ॥३॥
जइ भिन्नं तब्भावेऽवि नो तओ तस्सभावरहिओत्ति ।
अन्नानिच्चिय निच्चं अंधो व समं पईवेणण ॥४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एगत्ते तन्नासे नासो जीवस्स संभवे भवणं ।
कारगसंकरदोसो तदेकयाकप्पणा वावि ॥"

इत्यादि, इत्थं चालनामभिधायाधुना प्रत्यवस्थानं प्रतिपादयन्नाह–

नि. (१०३५) आया हु कारओ मे सामाइयं कम्म करणमाया य ।
परिणामे सइ आया सामाइयमेव उ पसिद्धी ॥

वृ- इहाऽऽत्मैव कारको मम, तस्य स्वातन्त्रेण प्रवृत्तेः, तथा सामायिकं कर्म तद्गुणत्वात्, करणं चोद्देशादिलक्षणं तक्रियत्वादात्मैव, तथाऽपि यथोक्तदोषाणामसम्भव एव, कुत इत्याह–यस्मात् परिणामे सत्यात्मा सामायिकं, परिणमनं–परिणामः कथञ्चित् पूर्वरूपापरित्यागेनोत्तररूपापत्तिरिति, उक्तं च–

"नार्थान्तरगमो यस्मात्; सर्वथैव न चाऽगमः ।
परिणामः प्रमासिद्ध, इष्टश्च खलु पण्डितैः ॥१॥"

इत्यादि, तस्मिन् परिणामे सति, अयमत्र भावार्थः- परिणामे सति तस्य नित्यानित्याद्यनेकरूपत्वाद् द्रव्यगुणपर्यायाणामपि भेदाभेदसिद्धेः, अन्यथा सकलसंव्यवहारो च्छेदप्रसङ्गाद्, एकान्तपक्षेणायत्वानन्यत्वयोरनभ्युपमाद्, इत्थं चैकत्वानेकत्वापक्षयोः कर्तृकर्मकरणव्यवस्थासिद्धेः 'आत्मा' जीवः सामायिकमेव तु प्रसिद्धिः, तथाहि–न तदेकान्तेन अन्यत् तद्गुणत्वान्न चानन्य(त्त) द्गुणत्वादेवेति, इत्थं चैतदङ्गीकर्तव्यम्, अन्यथा गुणगुणिनोरेकान्तभेदे विप्रकृष्टगुणमात्रोपलब्धौ प्रतिनियतगुणिविषय एव संशयो न स्यात्, तदन्येभ्योऽपि तस्य भेदाविशेषात्, दृश्यते च यदा कश्चिद्धरिततरूतरूणशाखाविसररन्ध्रोदरान्तरतः किमपि शुक्लं पश्यति तदा किमियं पताका किं वा बलाकेत्येवं प्रतिनियतगुणिविषय इति, अभेदपक्षे तु संशयानुत्पत्तिरेव, गुणग्रहणत एव तस्यापि गृहीतत्वादित्यलं विस्तरेणेति गाथार्थः ॥ भाष्यकारदूषणानि त्वमूनि–

"आया हु कारओ मे सामाइय कम्म करणमाआ य ।
तम्हा आया सामाइयं च परिणामओ एक्कं ॥१॥
जं नाणाइसहावं सामाइय जोगमाइकरणं च ।
उभयं च स परिणामो परिणामाणन्नया जं च ॥२॥
तेनाया सामइयं करणं च चसद्दओ अभिन्नाइं ।
ननु भणियमणन्नत्ते तन्नासे जीवनासोत्ति ॥३॥
जइ तप्पज्जयनासो को दोसो होइ ? सव्वहा नत्थि ।
जं सो उप्पायव्वयधुवधम्माणंतपज्ञाओ ॥४॥
सव्वं चिय पइसमयं उप्पज्जइ नासए य निच्चं च ।
एवं चेव य सुहदुक्खबंधमोक्खाइसब्भावो ॥५॥
एगं चेव य वत्थुं परिणामवसेण कारगंतरयं ।
पावइ तेनादोसो विवक्खया कारगं जं च ॥६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुंभोऽवि सज्जमाणो कत्ता कम्मं स एवं करणं च ।
नाणाकारगभावं लहइ जहेगो विवक्खाए ॥७॥
जह वा नाणाणण्णो नाणी नियओवओगकालंमि ।
एगोऽवि तस्सभावो सामाइयकारगो चेवं ॥८॥"

साम्प्रतं परिणामपक्षे सत्येकत्वानेकत्वापक्षयोरविरोधेन कर्तृकर्मकरणव्यवस्थामुपदर्शयन्नाह–

नि. (१०३६) एगत्ते जह मुट्ठिं करेइ अत्थंतरे अत्थंतरे घडाईणि ।
दव्वत्थंतर भावे गुणस्स किं केन संबद्धं !॥

वृ- 'एकत्वे' कर्तृकर्मकरणाभेदे कर्तृकर्मकरणभावो दृष्टः, यथा मुष्टिं करोति, अत्र देवदत्तः कर्ता तद्धस्त एव कर्म तस्यैव च प्रयत्नविशेषः करणमिति, तथाऽर्थान्तरे-कर्तृकर्मकरणानां भेदे दृष्ट एव तद्भावः, तथा चाऽऽह–घटादीनि यथा करोतीति वर्तते, तत्रापि कुलालः कर्ता घटः कर्म दण्डादि करणमिति । इह च सामायिकं गुणो वर्तते, स च गुणिनः कथञ्चिदेव भिन्न इति । विपक्षे बाधामुपदर्शयति–द्रव्यात् सकाशाद्, गुणिन इत्यथः, एकान्तेनैवार्थान्तर-भावे–भेदे सति, कस्य ? गुणस्य, किं केन सम्बद्धामिति ?, न किञ्चित् केनचित् सम्बद्धं, ज्ञानादीनामपि गुणत्वात्तेषामपि चाऽऽत्यादिगुणिभ्य एकान्तभिन्नत्वात्, संवेदनाभावत् सर्वव्यवस्थानुपपत्तेरिति भावना, एवमेकान्तेनानर्थान्तरभावेऽपि दोषा अभ्यूह्या इति गाथार्थः ॥

कण्ठतस्तावदुक्ते चालनाप्रत्यवस्थाने, अत एव चात्र पुनरुक्तदोपोऽपि नास्ति, अनुवादद्वारेण चालना-प्रत्यवस्थान-प्रवृत्तेरित्यलं प्रसङ्गेन, प्रकृतं प्रस्तुमः, तत्र सर्वं सावद्यं योगमित्याद्यवशिष्यते, तदिह सर्वशब्दनिरू-पणायाऽऽह–

नि. (१०३७)नामं १ ठवणा २ दविए ३ आएसे ४ निरवसेसए ५ चेव ।
तह सव्वधत्तसव्वं च ६ भावसव्वं च सत्तमयं ७ ॥

वृ- इह सर्वमिति कः शब्दार्थः ?, उच्यते, 'सृ गतौ' इत्यस्य औणादिको वप्रत्ययः सर्वशब्दो वा निपात्यते स्त्रियते स इति श्रियते वाऽनेनेति सर्वः, तदिदं च नामसर्व स्थापनासर्वं द्रव्यसर्वम् आदेशसर्वं निरवशेषसर्वं, तथा सर्वधत्तसर्वं च भावसर्वं च सप्तममिति समासार्थः ॥

व्यासार्थं तु भाष्यकारः स्वयमेव वक्ष्यति, तत्र नामस्थापने क्षुण्णत्वादनायदृत्य शेषभेदव्या-चिख्यासया पुनराह–

[भा.१८५]दविए चउरो भंगा सव्व १ मसव्वे अ २ दव्व १ देसे अ २ ।
आएस सव्वगामो नीसेसे सव्वगं दुविहं ॥

वृ- 'द्रव्य' इति द्रव्यसर्वे चत्वारो भङ्गा भवन्ति, तानेव सूचयन्नाह–'सव्वमसव्वे अ दव्व देसे य'त्ति-अयमत्र भावार्थः-इह यद्विवक्षितं द्रव्यमङ्गुल्यादि तत् कृत्स्नं-परिपूर्णम् अनूनं स्वैरवयवैः सर्वमुच्यते, सकलमित्यथः, एवं तस्यैव द्रव्यस्य कश्चित्स्वावयवो देशः कृत्स्नतया-स्वावयव-परिपूर्णतया यदा सकलो विवक्ष्यते तदा देशोऽपि सर्वः, एवमुभयस्मिन् द्रव्ये तद्देशे च सर्वत्वं, तेयोरेव यथास्वमपरिपूर्णतायामसर्वत्वं, ततश्चतुर्भङ्गी-द्रव्यं सर्वं देशोऽपि सर्वः १ द्रव्यं सर्वं देशोऽसर्वः २ देशः सर्वः द्रव्यमसर्वं ३ देशोऽसर्वः द्रव्यमप्यसर्वम् ४, अत्र यथाक्रममुदाहरणं-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्पूर्णमङ्गुलि द्रव्यसर्वं तदेव देशोनं द्रव्यमसर्व, तथा देशः-पर्व तत्सम्पूर्व देशसर्वम् पर्वैकदेशः देशासर्वम्, एवं द्रव्यसर्वम् । अथाऽऽदेशसर्वमुच्यते-आदेशनम् आदेश उपचारो व्यवहारः, स च बहुतरे प्रधाने वाऽऽदिश्यते देशेऽपि, यथा विवक्षितं घृतमभिसमीक्ष्य बहुतरे भुक्ते स्तोके च शेषे उपचारः क्रियते-सर्वं घृतं भुक्तं वा, प्रधानेऽप्युचारः, यथा ग्रामप्रधानेषु पुरुषेषु गतेषु ग्रामो गत इति व्यपदिश्यते, तत्र प्रधानपक्षमेवाधिकृत्याऽऽह ग्रन्थकारः-'आएस सव्वगामो'त्ति आदेशसर्वं सर्वो ग्रामो गत इत्याघात इति वेति क्रियाभावनोक्तैव । एवमादेश-सर्वमुक्तम्, अथ निरवशेषसर्वमभिधीयते, तत्राऽऽह-'निस्सेसे सव्वगं दुविहं'ति निरवशेषसर्व 'द्विविधं' द्विप्रकारं सर्वापरिशेषसर्व तद्देशापरिशेषसर्वं चेति गाथार्थः ।। अत्रोदाहरणमाह, -

[भा.१८६] अनिमिसिणो सव्वसुरा सव्वापरिसेससव्वगं एअं १ ।
तद्देसापरिसेसं सव्वे काला जहा असुरा २ ।।

वृ- 'अनिमेषिणः सर्वसुराः'अनिमिषनयनाः सर्वे देवा इत्यर्थः, सर्वापरिशेषसर्वमेतत्, यस्मान्न कश्चिद्देवानां मध्येऽनिमिषत्वं व्यभिचरतीति, तथा तद्देशापरिशेषमिति-तद्देशपरिशेषसर्वं सर्वे काला यथा असुरा इति, इयमत्र भावना- तेषामेव देवानां देश एको निकायः असुराः, ते च सर्वं एवासितवर्णा इति गाथार्थः ।। सर्वधत्तसर्वप्रतिपादनायाऽऽह-

[भा.१८७] सा हवइ सव्वघत्ता दुपडोआरा जिआ य अजिआ य ।
दव्वे सव्वघडाई सव्वद्धत्ता पुणो कसिणं ।।

वृ- सा भवति 'सव्वधत्ता' इत्यत्र सर्वं-जीवाजीवाख्यं वस्तु धत्तं-निहितमस्यां विवक्षायामिति सर्वधत्ता, ननु 'दधातेही' ति हिशब्दादेशाद्धितमिति भवितव्यं कथं धत्तमिति ?, उच्यते, प्राकृते देशीपदस्याविरुद्धत्वान्न दोषः, अथवा धत्त इति डित्थवदव्युत्पन्न एव यदृच्छाशब्दः, अथवा सर्वं दधातीति सर्वधं-निरवशेषवचनं सर्वधमात्तं-आगृहीतं यस्यां विवक्षायां सा सर्वधात्ता, एवमपि निष्ठान्तस्य पूर्वनिपातः, 'जातिकालसुखादिभ्यः परवचनमिति परनिपात एव, अथवा सर्वधेन आत्ता सर्वधात्ता तया यत् सर्वं तत् सर्वधात्तासर्वमिति, सा च भवति सर्वधात्ता 'दुपडोयार'त्ति द्विप्रकारा-जीवाश्चाजीवाश्च, यस्मात् यत् किञ्चनेह लोकेऽस्ति तत् सर्वं जीवाश्चाजीवाश्च, न ह्येतद्व्यतिरिक्तमन्यदस्ति, अत्राऽऽह-द्रव्यसर्वस्य सर्वधत्तासर्वसय च को विशेष इति ?, अयमभियप्रायः-द्रव्यसर्वमपि विवक्षयाऽशेषद्रव्यविषयमेव, अत्रोच्यते, 'दव्वे सव्वघडाई' इह द्रव्यसर्वे सर्वे घटादयो गृह्यन्ते, आदिशब्दादङ्गुल्यादिपरिग्रहः, सर्वधत्ता पुनः कृतस्नं वस्तु व्याप्य व्यवस्थितेति विशेष इत्ययं गाथार्थः ।। अधुना भावसर्वमुच्यते -

[भा.१८८] भावे सव्वोदइओदयलक्खणओ जहेव तह सेसा ।
इत्थ उ खओवसमिए अहिगारोऽसेससव्वे अ ।।

वृ- 'भाव' इति द्वारपरामर्शः, सर्वो द्विपकारोऽपि शुभाशुभभेदेन औदयिकः- उदयलक्षणः कर्मोदयनिष्पन्न इत्यर्थः यथैवायमुक्तस्तथा शेषा अपि स्वलक्षणतो वाच्या इति वाक्यशेषः, तत्र मोहनीयकर्मोपशमस्वभावतः शुभः सर्व एवौपशमिकः, कर्मणां क्षयादेव शुभः सर्वः क्षायिकः, शुभाशुभश्च मिश्रः सर्वः क्षायोपशमिकः, परिणतिस्वभावः सर्वः शुभाशुभश्च पारिणामिकः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं व्युत्पत्त्यर्थप्ररूपणां कृत्वा प्रकृतयोजनामुपदर्शयन्नाह–'एत्थ उ'इत्यादि, अत्र तु 'क्षायोपशमिक' इति क्षायोपशमिकभावसर्वेण अधिकारः, अवतार उपयोग इत्यर्थः, 'अशेषसर्वेण च' निरवशेष-सर्वेण चेति गाथार्थः ॥

व्याख्यातः सौत्रः सर्वावयवः, साम्प्रतं सावद्या वयवव्या-चिख्यासयाऽऽह–

नि. (१०३८) कम्ममवज्जं जं गरिहअिंति कोहाइणो व चत्तारि ।
सह तेन जो उ जो पच्चक्खाणं इवइ तस्स ॥

वृ- 'कर्म' अनुष्ठानमवद्यं भण्यते, किमविशेषेण ?, नेत्याह–'यद् गर्हितम्' इति यन्निन्द्यमित्यर्थः, क्रोधादयो वा चत्वारः, अवद्यमिति वर्तते, सर्वावद्यहेतुत्वात् तेषां कारणे कार्योपचारात्, सह तेन-अवद्येन 'यस्तु योगः' य एव व्यापारः असौ सावद्य इत्युच्यते, 'प्रत्याख्यानं'निषेधलक्षणं भवति 'तस्य' सावद्ययोगस्य, पाठान्तरं वा-'कम्मं वज्जं जं गरहियं'ति इह तु 'वृजी वर्जने'इत्यस्य वर्जनीयं वर्ज्यं त्यजनीयमित्यर्थः, शेषं पूर्ववत्, नवरं सह वर्ज्येन सवर्ज्यः प्राकृते सकारस्य दीर्घदिशात् सावज्जमिति गाथार्थः ॥

अधुना योगोऽभिधीयते, स च द्विधा–द्रव्ययोगो भावयोगश्च, तथा चाऽऽह-

नि. (१०३९) दव्वे मनवयकाए जोगा दव्वा दुहाउ भावंमि ।
जोगा सम्मत्ताईं पसत्थ इअरो उ विवरीओ ॥

वृ- 'द्रव्य' इति द्वारपरामर्शः, 'मनवइकाए जोगा दव्वे' त्ति मनोवाक्काययोग्यानि द्रव्याणि द्रव्ययोगः, एतदुक्तं भवति-जीवेनागृहीतानि गृहीतानि वा स्वव्यापारावप्रवृत्तानि द्रव्ययोग इति, द्रव्याणां वा हरीतक्यादीनां योगो द्रव्ययोगः, 'दुहा उ भावंमि'त्ति द्विधैव द्विप्रकार एव, 'भाव' इति भावविषयः 'जोगो'त्ति योगोऽधि कृतः-प्रशस्तोऽप्रशस्तश्च, तत्र 'सम्मत्ताई पसत्थ'त्ति सम्यक्त्वादीनाम्, आदिशब्दाद् ज्ञानचरणपरिग्रहः, प्रशस्तः युज्यतेऽनेन करणभूतेनाऽऽत्माऽपवर्गेणेतिकृत्वा, 'इयरो उ विवरीओ'त्ति इतरस्तु मिथ्यात्वादिर्योगः, 'विपरीत' इत्यप्रशस्तो वर्तते, युज्यतेऽनेनाऽऽत्माऽष्टविधेन कर्मणेतिकृत्वाऽयं गाथार्थः ॥ सावद्यं योगमिति व्याख्यातौ सूत्रावयवाविति, अधुना प्रत्याख्यामीत्यवयवप्रस्तावात् प्रत्याख्यानं निरूप्यते, इह प्रत्याख्यामीति वा प्रत्याचक्षे इति वा उत्तमपुरुषैकवचने द्विधा शब्दौ, तत्राऽऽद्यः प्रत्याख्यामीति, प्रतिशब्दः प्रतिषेधे आङ् आभिमुख्ये ख्या प्रकथने, प्रतीपं आभिमुख्येन ख्यापनं सावद्ययोगस्य करोमि प्रत्याख्यामीति, अथवा 'चक्षिङ् व्यक्तायां वाचि' प्रतिषेधस्याऽऽदरेणाभिधानं करोमि प्रत्याचक्षे, प्रतिषेधस्याख्यानं प्रत्याख्यानं निवृत्तिरित्यर्थः, इदं च षट्प्रकारं नामस्थापना-द्रव्यक्षेत्रातीच्छाभावभेदभिन्नमिति, तत्र च नामस्थापने क्षुण्णत्वादनादृत्य द्रव्यप्रत्याख्यानादि प्रतिपादयन्नाह–

नि. (१०४०) दव्वंमि निण्हगाई ३ निव्विसयाई अहोइ खित्तंमि ४ ।
भिक्खाईणमदाणे अइच्छ ५ भावे पुणो दुविहं ६ ॥

वृ- द्रव्यमिति द्वारपरामर्शः, 'निण्हगाइ'त्ति निह्नवादिप्रत्यख्यानम्, आदिशब्दाद् द्रव्ययोर्द्रव्याणां द्रव्यभूतस्य द्रव्यहेतोर्वा यत् प्रत्याख्यानं तद् द्रव्यप्रत्याख्यानमिति, 'निव्विसयाइण य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

होइ खित्तंमि' त्ति निर्विषयादि च भवति क्षेत्र इति, तत्र निर्विषयस्याऽऽदिष्टस्य क्षेत्रप्रत्याख्यानम्, आदिशब्दान्नगरादिप्रतिषिद्धपरिग्रहः, 'भिक्षादीनामदानेऽति (ग) च्छे' ति भिक्षणं-भिक्षा प्राभृतिकोच्यते, आदिशब्दात् वस्त्रादिपरिग्रहः, तेषामदाने सत्यतिगच्छेति वच्नमतीच्छेति वेति प्रत्याख्यानं, 'भावे पुणो दुविहं' ति भाव इति द्वारपरापर्शः, भावप्रत्याख्यानं पुनर्द्विविधं, तत्र भावप्रत्याख्यानमिति भावस्य-सावद्ययोगस्य प्रत्याख्यानं भावतो वा-शुभात् परिणामोत्पादाद् भावहेतोर्वा-निर्वाणार्थं वा भाव एव वा-सावद्य-योगविरतिलक्षणः प्रत्याख्यानं भावप्रत्याख्यानमिति गाथार्थः ॥ साम्प्रतं द्वैविध्यमेवोपदर्शयन्नाह–

नि. (१०४१) सुअ नोसुअ सुअ दुविहं पुव्व १ मपुव्वं २ तु होइ नायव्वं ।
नोसुअपच्चक्खाणं मूले १ तह उत्तरगुणे अ २ ॥

व- 'सुयणोसुय' त्ति श्रुतप्रत्याख्यानं नोश्रुतप्रत्याख्यानं च, 'सुयं दुविहं' ति श्रुतप्रत्याख्यानं द्विविधं, द्वैविध्यमेव दर्शयति-'पुव्वमपुव्वं तु होइ नायव्वं' ति पूर्वश्रुतप्रत्यख्यानमपूर्वश्रुतप्रत्याख्यानं च भवति ज्ञातव्यमिति, तत्र पूर्वश्रुतप्रत्याख्यानं प्रत्याख्यानसंज्ञितं पूर्वमेव, अपूर्व श्रुतप्रत्याख्यानं त्वातुरप्रत्याख्यानादिकमिति, तथा 'नोसुयपच्चक्खाणं' ति नोश्रुतप्रत्याख्यानं श्रुतप्रत्याख्यानादन्यदित्यर्थः, 'मूले तह उत्तरगुणे य' त्ति मूलगुणप्रत्याख्यानमुत्तरगुणप्रत्याख्यानं च, तत्र मूलगुणप्रत्याख्यानं देशसर्वभेदं, देशतः श्रावकाणां सर्वतस्तु संयतानामिति, इहाधिकृतं सर्वं, सामायिकानन्तरं सर्वशब्दोपादानादिति गाथार्थः ॥ इह च वृद्धसम्प्रदायः 'पच्चक्खाणे उदाहरणं रायधूयाए– वरिसं मंसं न खाइयं, पारणए अणेगाणं जीवाणं घाओ कओ, साहूहिं संबोहिया, पव्वइया, पुव्वं दव्वपच्चक्खाणं पच्छा भावपच्चक्खाणं जातमिति कृतं प्रसङ्गेन । प्रत्याख्यामीति व्याख्यातः सूत्रावयवः, अधुना यावज्जीवतयेति व्याख्यायते–इह चाऽऽदौ भावार्थमेव-आभिधित्सुराह–

नि. (१०४२) जावदवधारणंमि जीवणमवि पाणधारणे भणिअं ।
आपाणाधारणाओ पावनिवित्ती इहं अत्थो ॥

वृ- यावद् इत्ययं शब्दोऽवधारणे वर्तते, जीवनमपि प्राणधारणे भणितं, 'जीव प्राणधारण' इति वचनात्, ततश्चाप्राणधारणात्-प्राणधारणं यावत् पापनिवृत्तिरित्यर्थः, परतस्त न विधिर्नापि प्रतिषेधो, विधावाशंसादोषप्रसङ्गात् प्रतिषेधे तु सुरादिपूत्पन्नस्य भङ्गप्रसङ्गादिति गाथार्थः ॥ इह च जीवन जीव इति क्रियाशब्दोऽयं, न जीवतीति जीव आत्मपदार्थः, जीवनं तु प्राणधारणं, जीवनं जीवितं चेत्येकोऽर्थः, तत्र जीवितं दशधा वर्तते, तदेव तावदादौ निरूपयन्नाह–

नि. (१०४३) नामं १ ठवणा २ दविए ३ ओहे ४ भव ५ तब्भवे अ ६ भोगे अ ७ ।
संजम ८ जस ९ कित्तीजीविअं च १० तं भण्णई दसहा ॥

वृ- नामजीवितं स्थापनाजीवितं द्रव्यजीवितम् ओघजीवितम् भवजीवितं तद्भवजीवितं भोगजीवितं च तथा संयमजीवितं यशोजीवितं कीर्तिजीवितं च तद्भण्यते दशधेति गाथासमासार्थः ॥ अवयवार्थं तु भाष्यकारः स्वयमेव वक्ष्यति, तत्र नामस्थापने क्षुण्णत्वादनादृत्य शेषभेदव्याचिख्यासयाऽऽह–

[भा.१८९] दव्वे सच्चित्ताई ३ आउअसद्दव्वया भवे ओहे ४ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नेरइयाईण भवे ५ तब्भव तत्थेव उववत्ती ६ ॥

वृ- 'द्रव्य' इति द्वारपरामर्शः, द्रव्यजीवितं सच्चित्तादि आदिशब्दान्मिश्राचित्तपरिग्रहः, इह च कारणे कार्योपचाराद् येन द्रव्येण सचित्ताचित्तमिश्रभेदेन पुत्रहिरण्योभयरूपेण यस्य यथा जीवितमायत्तं तस्य तथा तद्रव्यजीवित-मिति, द्विपदादिद्रव्यस्य चान्ये, उक्तं द्रव्यजीवितं, 'आउयसद्दव्वया भवे ओहे'त्ति आयुरिति प्रदेशकर्म तद्रव्यसहचरितं जीवस्य प्राणधारणं सदैव संसारे भवेदोघ इति द्वारपरामर्शः ओघजीवितं, सामान्यजीवितमित्यर्थः, इदं चाङ्गीकृत्य यदि परं सिद्धा मृताः, न पुनरन्ये कदाचन इत्युक्तमोघजीवितं, 'नेरइयाईण भवे'त्ति नारकादीनामिति, आदिशब्दात् तिर्यङ्नरामरपरिग्रहः, भव इति द्वारपरामर्शः, स्वभवे स्थितिर्भवजीवितमिति, उक्तं भवजीवितं, 'तब्भव तत्थेव उववत्ति'त्ति तस्मिन् भवे जीवितम् तद्भवजीवितं, इदं चौदारिकशरीरिणामेव भवति, यत आह–तत्रैवोपपत्तिः, तत्रैवोपपात इत्यर्थः, भवश्च तदायुष्कबन्धस्य प्रथमसमयादारभ्य यावच्चरमसमयानुभवः, स चौदारिकशरीरिणां तिर्यङ्म-नुष्याणां, तद्भवोपपत्तिमागतानां तद्भवजीवितं भवति, ननु च भवजीवितमनन्तरं चतुर्द्धा वर्णितं नारकादिगतिसमापन्नानां याऽवस्था, तत्र स्वायुष्कबन्धकालात् प्रभृति सर्वैव भवस्थितिः यथास्वमभाधासहिता भवजीवितम्, इह तु तदाभवजीविते आबाधोनिका कर्मस्थितिः, तद्भवोदयात् प्रभृति कर्मनिषेकः तद्भवजीवितमिति महान् विशेषः, तत् किमर्थमौदारिकाणा-मेव ?, उच्यते ?, तेषां हि गर्भकालव्यवहितं योनिनिःसरणं जन्मोच्यते, तेन च गर्भकालेन सहैव तद्भजीवितं, वैक्रियशरीरिणां तूपपातादेव कालान्तराव्यवहितं जन्मेति जीवित स्वाबाधाकालसहितमितिकृत्वा तद्भवजीवितमौदारिकाणामेव सुप्रतिपादमिति, तेषां चेदं स्वकायस्थित्यनुसारतो विज्ञेयमिति गाथार्थः ॥ उक्तं तद्भवजीवितं ।

नि. (१०४४) भोगंमि चक्किमाई ७ संजमजी' तु संजयजनस्स ८ ।
जस ९ कित्ती अभगवओ १० संजमनरजीव अहिगारो ॥

वृ- भोगंमित्ति द्वारपरामर्शः, भोगजीवितं च चक्रवर्त्यादीनाम्, अ'दिशब्दाद्बलदेव-वासुदेवादिपरिग्रहः, उक्तं च भोगजीवितं, 'संजमजीयं तु संजयजणस्स'त्ति संयमजीवितं तु 'संयतजनस्य' साधुलोकस्य, उक्तं संयमजीवितं, 'जसकित्ती य भगवओ'त्ति यशोजीवितं भगवतो महावीरस्य, कीर्तिजीवितमपि तस्यैव, अयं चानयोर्विशेषः-दानपुण्यफला कीर्त्तिः, पराक्रमकृतं यशः' इति, अन्येत्विदमेकमेवाभिदधति, असंयमजीवितं चाविरतिगतं संयमप्रति-पक्षतो गृह्णन्तीति, 'संजमनरजीव अहिगारो'त्ति-संयमनरजीवितेनेहाधिकार इति गाथार्थः ॥ यावज्जीवता चे 'जीव प्राणधारण' इत्यस्याव्ययीभावे समासे 'यावदवधारण' इत्यनेन निर्वृत्ते भावप्रत्यय उत्पादिते यावज्जीवं भावः षष्ट्या 'व्ययादाप्सुपः इति सुपलुक्, तस्य 'भावस्त्वतलौ' विति तलि स्त्रीलिङ्गता यावज्जीवता तया यावज्जीवतया, तत्रालाक्षणिकवर्णलोात् 'जावज्जीवाए' इति सिद्धम्, अथवा प्रत्याख्यानक्रिया अन्यपदार्थ इति तामभिसमीक्ष्य समासो बहुव्रीहिः, यावज्जीवो यस्यां सा यावज्जीवा तयेत्यलं प्रसङ्गेन, तिस्रो विधा यस्य योऽस्य स त्रिविधः सावद्ययोगः, स च प्रत्याख्येय इति कर्म संपद्यते, कर्मणि च द्वितीया विभक्तिः, तं त्रिविधं योगं, त्रिविधनैव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करणेन, करणे तृतीयेति, मनसा वाच कायेन चेति, अत्र मनःप्रभृतीनां पूर्वं स्वरूपं दर्शितमेवेति न प्रतन्यते,नवरं भावार्थ उच्यते–तत्र 'त्रिविधं त्रिविधेने' त्यत्रानन्तरस्य करणस्य विवरणसूत्र-मेवेदं, यदुत-मनसा वाचा कायेनेति, तस्य च करणस्य कर्म प्रत्यख्येयो योगस्तमपि सूत्र एव विवृणोति-न करोमि न कारयामि कुर्वन्तमप्यन्यं न समनुजानामि-नानुमन्येऽहमिति । अत्राऽऽह-किं पुनः कारणमुद्देशक्रममतिलङ्घ्य व्यत्सासेन निर्देशः कृत इति ?, अत्रोच्यते, योगस्य करणतन्त्रो (न्त्रतो) पदेशनार्थं, तथाहि-योगः करणवश एव, करणानां भावे योगस्यापि भावादभावे चाभावादिति, करणाना मेव तथा क्रियारूपेण परिणतेरित्यत्र बहु वक्तव्यं तत्तुं नोच्यते ग्रन्थविस्तरभयादिति, अपरस्त्वाह–न करोमि न कारणामि कुर्वन्तं न समनुजानामीत्येतावता ग्रन्थेन गतेऽन्यमपीत्यतिरिच्यते, तथा चातिरिक्तेन सूत्रेण नार्थः, उच्यते, साभिप्रायकमिदम्, अनुक्तस्याप्यर्थस्य सङ्ग्रहार्थं, यस्मात् सम्भावनेऽपिशब्दोऽयं, सोऽयमपिशब्दः उभयशब्दमध्यस्थ एतत् करोति-यथा कुर्वन्तं नानुजानामि एवं कारयन्तमप्यनुज्ञापयन्तमप्यन्यं नानुजानामि, तथा यथा वर्त्तमानकाले कुर्वन्तमन्यं न समनुजानामीति एवमपिशब्दादतीतकाले कृतवन्तमपि कारितवन्तमपि तथाऽनागतेऽपि काले करिष्यन्तमपि कारयिष्यन्तमपीति त्रिकालोपसङ्ग्रहो वेदितव्य इति, न क्रियाक्रियावतोर्भेद एव अतो न केवला क्रिया सम्भवतीति ख्यापनार्थमन्य-ग्रहणम्, अत्रापि बहु वक्तव्यं तत्तु नोच्यते मा भूत् मुग्धमतिविनेयसम्मोह इति, किञ्चित्तु सूत्रस्पर्शनिर्युक्तौ वक्ष्याम इति । एवं तावदिदमेतावत् सूत्रस्य व्याख्यातम् ।। इह च सर्वं सावद्य योगं प्रत्याख्यामीत्यत्र प्रत्याख्यानं गृहस्थान् साधूंश्चाधिकृत्य भेदपरिणामतो निरूपयन्नाह–

नि. (१०४५) सीआलं भंगसयं तिविहं तिविहेण समिइगुत्तीहिं ।
सुत्तप्फासिअनिज्जुत्तिवित्थरत्थो गओ एवं ।।

वृ- गुरवस्तु व्याचक्षते-तदिदमेतावत् सूत्रस्य व्याख्यातं, साम्प्रतं त्रिविधं त्रिविधेनेत्येतदेव किल व्याचष्टे, तत्र त्रिविधं सावद्यं योगं प्रत्याख्येयं कृतकारितानुमतिभेदभिन्नं त्रिविधेन मनसा वाचा कायेनेति करणेन प्रत्याख्याति यतः अतस्तद्भेदोपदर्शनायैवाऽऽह–सिआलं भंगसयं गाहा ।।अत्राऽऽह-यद्येवमिह सर्वसावद्ययोगप्रत्याख्यानाधिकारात् सप्तचत्वारिंशदधिकशतं प्रत्या-ख्यानभेदानां गृहस्थप्रत्याख्यानभेदत्वादयुक्तमेतदिति, अत्रोच्यते, न, प्रत्याख्यानसामान्यतो गृहस्थप्रत्या-ख्यानभेदाभिधानेऽप्यदोषत्वादित्यलं प्रसङ्गेन, प्रकृतं प्रस्तुमः, तत्र 'सीयालं भंगसयं'ति-एतद्भव्यते,

'सीयालं मंगसयं गिहिपच्चक्खाणभेयपरिमाणं ।
तं च विहिणा इमेणं भावेयव्वं पयत्तेणं ।।१।।
तिन्नि तिया तिन्नि दुगा तिन्निक्किक्का य होंति योगेसुं ।
तिदुएक्कं तिदुएक्कं चेव करणाइं ।।२।।
पढमे लब्भइ एगो सेसेसु पएसु तिय तिय तियं च ।
दो नव तिय दो नवगा तिगुणिय सीयालभंगसयं ।।३।।'

का पुनरत्र भावना ?, उच्यते–न करेइ न कारवेइ करेंतमपि अन्नं न समणुजाणइ मणेणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वायाए काएणं एस एक्को भेओ १ ।

चो०-न करेईच्चाइतिगं गिहिणो कह होइ देसविरअस्स ?।
आ०-भन्नइ विसयस्स बहिं पडिसेहो अनुमईएवि ॥४॥
केई भणंति गिहिणो तिविहंतिविहेण नत्थि संवरणं ।
तं न जओ निद्दिट्ठं पन्नत्तीए विसेसेउं ॥५॥
तो कह निज्जुत्तीएऽनुमइनिसेहोत्ति ? सो सविसयंमि ।
सामण्णेणं नत्थि उ तिविहं तिविहेण को दोसो ?॥६॥
पुत्ताईसंतइणिमित्तमिथमेक्कारसिं पवण्णस्स ।
जंपंति केइ गिहिणो दिक्खाभिमुहस्स तिविहंपि ॥७॥
आह कहं पुण मनसा करणं कारावणं अनुमई य ।
जह वयतणुजोगेहिं करणाई तह भवे मनसा ॥८॥
तदहीनत्ता वइतणुकरणाईणं अहव मनकरणं ।
सावज्जजोगमणणं पन्नत्तं वीयरागेहिं ॥९॥
कारवणं पुण मनसा चिंतेइ य करेउ एस सावज्जं ।
चिंतेई य कए पुण सुट्ठु कयं अनुमई होइ ॥१०॥

एस एक्को भेओ गओ ॥ इदानिं बितिओ भेओ-न करेइ न कारवेइ करेंतंपि अन्नं न समणुजाणइ मणेण वायाए एस एक्को १, तहा मणेणं काएण य बितिओ २, तहा वायाए काएण य ततिओ ३, एस बितिओ भूलभेओ गओ ॥ इयाणि तइओ-ण करेइ न कारवेइ करेंतंपि अन्नं न समणुजाणइ मणेण वायाए एस एक्को १, तहा मणेणं काएण य बितिओ २, तहा वायाए य ततिओ ३, एस बितिओ भूलभेओ गओ ॥ इदानिं तइओ-न करेइ न कारवेइ करेंतंपि अन्नं न समणुजाणइ मणेण एक्को १ वायाए बितिओ २ काएण ततिओ ३ एस तइ मूलभेओ गओ । इदानिं चउत्थो–न करेइ न कारवेइ मणेण वायाए काएणं एक्को १ न करेइ करेंतंपि नानुजाणइ बितीओ २ न कारवेइ करेंतं नानुजाणइ ३ तइओ एस चउत्थो मूलभेओ, इदानिं पंचमो-न करेइ न कारवेइ मणेणं वायाए एस एक्को १ न करेइ करेंतं नानुजाणइ एस बितिओ २ न कारवेति नानुजाणइ एस तइओ ३ एए तिन्नि भंगा वायाए लद्धा, अन्नऽवि तिन्नि, मणेणं काएण य एमेव लब्भंति ३, तहाऽवरेवि वायाए काएण य लब्भंति तिन्नि तिन्नि ३, एवमेव एए सव्वे नव, एवं पञ्चमोऽप्युक्तो मूलभेद इति । इयाणिं छट्ठो–ण करेइ न कारवेइ मणेणं एस एक्को, तह य न करेइ करेंतं नानुजाणइ मणेणं एस बितिओ, न कारवेइ करेंतं नानुजाणइ मनसैव तृतीयः, एवं वायाए काएणवि तिन्नि भंगा लब्भंति, षष्ठोऽपि मूलभेदः, अधुना सप्तमोऽभिधीयते इति-ण करेइ मणेण वायाए काएण य एक्को, एवं न कारवेइ मणादीहिं एस बितिओ, करेंतं नानुजाणइत्ति तइओ, सप्तमोऽप्युक्तो मूलभेद इति । इदानीमष्टमः-न करेइ मणेणं वायाए एक्को तहा मणेण काएण य एस बितिओ, तहा वायाए काएण य एस तइओ, एवं न कारवेइ एत्थवि तिन्नि भंगा एवमेव लब्भंति, करेंतं नानुजाणइ एत्थ वि तिण्णि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एष उक्तोऽष्टमः । इदानीं नवमः–न करेइ मणेण एक्को १ न कारवेइ बितिओ २ करेंतं नानुजाणइ एस तइओ, एवं वायाए बितियं काएणवि होइ तितयमेव, नवमोप्युक्तः इदानीमागतगुणनं क्रियते–

'लद्धफलमाणमेअं भंगा उ हवंति अउणपन्नासं ।
तीयाणगयसंपइगुणियं कालेण होइ इमं ॥१॥
सीयालं भंगसयं कह ? कालतिएण होइ गुणणाओ ।
तीयस्स पडिक्कमणं पच्चुप्पन्नस्स संवरणं ॥२॥
पच्चक्खाणं च तहा होइ य एसस्स एव गुणणाओ ।
कालतिएणं भणियं जिनगणहरवायएहिं च ॥३॥

एवं तावद् गृहस्थप्रत्याख्यानभेदाः प्रतिपादिताः, साम्प्रतं साधुप्रत्याख्यानभेदान् सूचयन्नाह- 'तिविहं तिविहेणं'त्ति अयमत्र भावार्थः-त्रिविधं त्रिविधेनेत्यनेन सर्वसावद्ययोगः प्रसिद्ध एव हिंसादिः, तं स्वयं सर्वं न करोति न कारयति कुर्वन्तमप्यन्यं न समनुजानाति, एकैकं करणात्रिकेन-मनसा वाचा कायेनेति नव भेदाः, अतीतानागतवर्तमानकालत्रयसम्बद्धाश्च सप्तविंशतिरिति, इदं च प्रत्याख्याने भेदजालं 'समिइगुत्तहिं'ति समितिगुप्तिषु सतीषु भवति, समितिगुप्तिभिर्वा निष्पद्यते, तत्रेर्यासमितिप्रमुखाः प्रवीचाररूपाः समितयः पञ्च गुप्तयश्च प्रवीचाराप्रवीचाररूपा मनोगुप्त्याद्यास्तिस्त्र इति, उक्तं च–

'समिओ नियमा गुत्तो गुत्तो समियत्तणंमि भइयव्वो ।
कुसलवइमुदीरंतो जं वइगुत्तोऽवि समिओऽवि ॥१॥'

अन्ये तु व्याचक्षते-किलैता अष्टौ प्रवचनमातरः सामायिकसूत्रसङ्ग्रहः, तत्र 'करेमि भंते ! सामाइयं'ति पंच समिईओ गहिआओ, 'सव्वं सावज्जं जोगं पच्चक्खामि'ति तिन्नि गुत्तीओ गहियाओ, एत्थ समिईओ पवत्तणे निग्गहे य गुत्तीओत्ति, एयाओ अट्ठ पवयणमायाओ जाहिं सामाइयं चोद्दसय पुव्वाणि मायाणि, माउगाओत्ति मूलं भणियंति होइ ॥ इहैव प्रायः सूत्रस्पर्श-निर्युक्तिवक्तव्यताया उक्तत्वात् मध्यग्रहणे च तुलादण्डन्यानेनाऽऽद्यन्तयोरप्या-क्षेपादिदमाह– 'सुत्तप्फासियणिनज्जुत्तिवित्थ–रत्थो गओ एवं'त्ति सूत्रस्पर्शनिर्युक्तिविस्तरार्थो गतः, 'एवम्' उक्तेन प्रकारेणेति गाथार्थः ॥ साम्प्रतं सूत्र एवातीतादिकालग्रहणं त्रिविधमुक्तमिति दर्शयन्नाह–

नि. (१०४६) सामाइयं करेमी पच्चक्खामी पडिक्कमामित्ति ।
पच्चुप्पन्नमणागयअईअकालाण गहणं तु ॥

वृ- सामायिकं करोमि तथा प्रत्याख्यामि सावद्यं योगमिति, तथा प्रतिक्रमामीति प्राक्कृतस्य, इदं हि यथासङ्ख्यमेव प्रत्युत्पन्नानागतातीतकालानां ग्रहणमिति, उक्तं च-'अईयं निंदइ पडुप्पन्नं संवरेइ अनागयं पच्चक्खाइ'त्ति गाथार्थः ॥ साम्प्रतं तस्य भदन्त ! प्रतिक्रमामीत्येतद् व्या-ख्यायते–तत्र 'तस्ये' त्यधिकृतो योगः संबध्यते, ननु च प्रतिक्रमामीत्यस्याः क्रियायाः सोऽधिकृतो योगः कर्म, कर्मणि च द्वितीया विभक्तिरतस्तमित्यभिधेये तस्येत्यभिधीयते किमर्थमिति ?, आह-प्रयोजनार्थं षष्ठी विवक्षातः प्रयुक्ता सम्बन्धलक्षणाऽवयवलक्षणा वा, योऽसौ योगस्त्रि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

